॥ अथ कालिकापुराणं प्रारभ्यते ॥

अस्य ग्रन्थस्य पुनर्मुद्रणादयोऽधिकाराः श्रीवेङ्कटेश्वरमुद्रणालयस्य

श्रीराम पुस्तकालय नागपुर.

पुस्तक नंबर १२९९ विषय पुराण

पुस्तक लेजाने वालोंसे प्रार्थना है कि वे इस पुस्तकको संभाल पूर्वक स्वच्छ रखें व पढने के बाद शीघ्रही वापिस करें.

श्रीराम पुस्तकालय

को

सादर समर्पण

जीतमल नागरमल पोद्दार.

प्रस्तावना–

अद्याहं सहर्षः सुहृदयान्विबुधवरानभ्यर्थये । पुरा किल भगवता क्रमेण जनताया बुद्धिमांद्यमाकलय्य व्यासरूपेण वेदशाखाप्रणयनमकारि । ततश्च तेनैव "स्त्रीशूद्रद्विज बंधूनां त्रयी न श्रुतिगोचरा" इति विचार्य प्रतिदेवतामहत्त्वसूचकान्यष्टादशमहापुराणान्युपपुराणानि च सेतिहासानि प्रणीतानि । तानि च सुप्रसिद्धानि संत्येव । यच्छ्रवणपठनतस्तदनुसारेण क्रियामार्गोपासनादिसमनुचरतां स्त्रीशूद्रवेदग्रहणासमर्थद्विजादीनां चित्तशुद्धिपुरःसरं मोक्षमार्गावलंबनं भविष्यत्यवश्यमिति किं विशेषतः कथनेन "न हि कस्तूरिका गंधः शपथेन विभाव्यते" इति । अतस्तस्मै वेदव्यासमहर्षये सहस्रशो धन्यवादाः ।

अथ प्रस्तुतविषये किंचिल्लिख्यते । परमकारुणिकेन तेनैव वेदव्यासेन हिमशैलगतमार्कंडेयऋषिसंवादेन श्रीकालिकापुराणं प्रतिपादितम् । अस्मिंश्च ब्रह्मविष्णुमहेशादि देवताविविधसद्भक्तिसुसेव्या शक्तिः सर्वजनबुद्धिगततमोनिरसनपूर्वकमोक्षप्रापिका सर्वकर्तृत्वादिसामर्थ्यवती च वर्णिता । तयैव शक्त्या शिवं मोहयितुं दक्षात्मजात्वमासाद्य योगमार्गनिरतस्यापि तस्य सृष्टिसंहारकार्ये नियोजनं कृतम् । ततश्च केनचित्कारणेन दक्षाध्वरे देहं नैजं परित्यज्य हिमाचलान्मेनायां द्वितीयं देहमासाद्य हरस्यार्धांगप्रासादितम् । इत्यादिबहुविधसरसकथानकानि भगवत्या उपासनाविधानानि च विशेषतो वर्णितानि । तदेतच्छ्रीकालिकापुराणं सर्वेषां परं शाक्तमतावलंबिनां विशेषत उपकारकं मत्वा मया महता श्रमेण भूयसा द्रव्यव्ययेन च विद्वद्वारा संशोध्योत्तमसीसकाक्षरैः सुपत्रेषु निज "श्रीवेंकटेश्वर" स्टीमयंत्रालये मुद्रयित्वा प्रकाशितम् । सर्वसामान्यतो मूल्यमप्यस्यालपमेव स्थापितम् । तदेतत्कालिकापुराणपुस्तकग्रहणेन पठनश्रवणादिस्वोपयोगं विधाय मां कृतार्थयंतु भवंत इति शम् ।

सर्वेषां बुधवराणामाज्ञाकारी–श्रीकृष्णदासात्मजः क्षेमराजः ।

॥ श्रीः ॥

अथ कालिकापुराणस्थितविषयाणां प्रत्यध्यायानुक्रमणिका ।

अध्यायाः	विषयाः	पत्रांकाः
१	मङ्गलाचरणम्, काल्या सतीदेहमापन्नया कथं शिवचित्ताकर्षणं कृतं कथं वा दक्षकोपाद्देहं परित्यज्य नगकन्यात्वासादनेन पुनः शिवार्धांगयोगो लब्ध इति कमठादिऋषिप्रश्नः, मार्कंडेयस्य ऋषिप्रश्नानुसारेण कालिकापुराणारंभकरणम्, ब्रह्मणो मनसः संध्योत्पत्तिः, तस्यैव मनसः कामप्रादुर्भावश्च	१
२	कामबाणविद्धानां संध्यायामनुरक्तानां ब्रह्मादीनां चेष्टितमवलोक्य शिवकृतं प्रबोधनम्, ब्रह्मणः कामोपरि क्रोधश्च	३
३	मदनं प्रति ब्रह्मणः शापदानम्, स्वदेहस्वेदसंभूतां रतिं मदनाय समर्प्य दक्षस्य स्वदेशगमनञ्च	५
४	शिवमोहनाय मदनं प्रति ब्रह्मण आज्ञाकरणम्, ब्रह्मणो निश्वासतो वसंताविर्भावः, शिवचित्ताकर्षणसमर्थायाः स्त्रियः कथमुपलब्धिरिति ब्रह्मणो विचारश्च	६
५	विष्णुमाया मत्कन्या भूत्वा हरमोहनं करोत्विति मनस्यानीय दक्षस्य विधिकथनात्तपस्यारंभः, मंदरोपरि स्तवसंतुष्टाया विष्णुमायायाः प्रत्यक्षभूतायाः समीपे ब्रह्मणो हरमोहनकरणाय प्रार्थना च	८
६	दक्षपत्न्यां देहमासाद्य हरानुयायिनी भविष्यामीत्युक्त्वा योगमायायास्तिरोधानम्, हरमोहनार्थं मदनं प्रति ब्रह्मणो निदेशः, मदनगणानां समुद्भवः, मदनाय योगमायास्वरूपवर्णनञ्च	१०
७	यत्रयत्र हरो विचरति स्म तत्रतत्र गत्वापि ससहायेन मया प्रहर्तं न ततोपि मोहमेति परमधुना योगनिद्रावचनमंगीकृत्य पुनर्यतामीति मदनवचनम्	१२
८	दक्षकृतयोगमायास्तुतिवर्णनम्, दक्षं प्रति तवाहं पुत्री भविष्यामीति देवीवरप्रदानम्, दक्षपत्न्यां वीरण्यां देव्या उत्पत्तिकथनम्, सतीनाम्न्या दक्षकन्याया बाल्यावस्थावर्णनञ्च	१४

अध्यायाः	विषयाः	पत्रांकाः
९	शिवप्राप्तये सत्या व्रताचरणवर्णनम्, शिवस्य सविधे दारपरिग्रहार्थं विष्णुब्रह्मणोरभ्यर्थनाकरणञ्च	६१
१०	व्रतसंतुष्टस्य शिवस्य सत्या सह संवादः, तस्यै वरप्रदानम्, सतीवरणार्थं दक्षसन्निधौ शिवाज्ञया ब्रह्मणो गमनम्, विवाहनिश्चयं कृत्वा ब्रह्मणः शिवसन्निधावागमनञ्च	८१
११	सतीशिववैवाहिकमंगलवर्णनम्, सतीं दृष्टा सकामस्य ब्रह्मणो वधार्थमुद्यतस्य शिवस्य सांत्वनाय विष्णुनिरूपितानन्यत्ववर्णनञ्च	२०
१२	शिवसन्निधौ विष्णुप्रतिपादितानन्यत्वैकत्ववर्णनम्, समाधियोगेन शिवस्य हृदि प्रकृतिपुरुषादिदर्शनञ्च	२२
१३	शिवस्य हृदये विष्णुशक्त्या नानाविधब्रह्मांडदर्शनतो मायासामर्थ्य परिज्ञानकथनम्....	२४
१४	विवाहमंगलं विधाय सत्या सह हिमवद्गिरौ हरस्य नानाविधकामविलासभोगवर्णनम्	२६
१५	जलदागमकालवर्णनपूर्वकं हिमाचलशिखरनिवासाय हरं प्रति सतीप्रार्थनाकरणम्	२७
१६	स्वपितुर्दक्षस्य यज्ञेऽनाह्वानरूपं पत्युरवमानं दुःसहं मत्वा सत्याः प्राणविमोचनवर्णनम्	२९
१७	भृशं कुपितस्य शिवस्य वीरभद्रादिगणैः सह दक्षयज्ञवाटे प्रवेशः, तत्र विशेषतो यज्ञविध्वंसनं कृत्वा शिवस्य सतीशवसमीपे समागमनञ्च	३१
१८	शिवस्य सतीशवं स्कंधे निधाय पर्यटतो महाशोकाकुलस्य स्कंधतः सत्या एकैकावयवपतनम्, शिवस्य शोकनिवृत्तये ब्रह्मकृतोपदेशकथनञ्च	३३
१९	पुनःपुनः सतीं स्मृत्वा शोकाकुलस्य हरस्य शोकनिवृत्तये ब्रह्मकृतसमाधानम्, ब्रह्मणा सगणेन सह शिवस्य सिप्राख्यकासारसविधे प्रयाणम्, सिप्राख्यसरोवर्णनप्रसंगेन ब्रह्मणो मानसोद्भवसंध्यायाः सौंदर्यमवलोक्य ससुतस्य ब्रह्मणो मोहावेगप्राप्तिः, मदनशापानंतरं तत्कलुषमपहातुं संध्यायास्तपस्यार्थं चन्द्रभागगिरौ गमनं च	३७
२०	ससुतं ब्रह्माणमात्मानं च सकामं ज्ञात्वा परं लज्जितायास्तपोभाव-	

अध्यायाः	विषयाः	पत्रांकाः
	मजानंत्यास्तपोयोगकथनार्थं ब्रह्मणो वचनाद्विप्रवरस्य वसिष्ठस्य चन्द्रभागगिरौ चंद्रभागसरःसमीपे गमनम्, चन्द्रभागगिरीतिहासे पृष्टे तत्कथनप्रसंगाच्चंद्रस्य रोहिणीं विना अन्यस्त्रीणां दर्शनमप्यकुर्वाणस्य दक्षशापात्क्षयागमः, क्रमेण भूतनाशं विलोक्य ब्रह्मणे देवैरेतन्निरूपणञ्च	३९
२१	चंद्रस्य क्षयनिरासार्थं ब्रह्मवचनाद्देवतानां दक्षसमीपे गमनम्, यदि सर्वासु स्त्रीषु विधुः समं वर्तनं करिष्यति तदा मासार्धं वृद्धिं क्षयं च भजिष्यति इति दक्षवचनात्सैर्वैर्देवैश्चंद्रस्य क्षयनिवृत्त्यर्थं कारितात्स्नानजलाच्चंद्रभागस्य सरस उत्पत्तिः, पर्वतस्यापि चंद्रभागेतिनामकरणञ्च	४४
२२	चंद्रभागवर्णनं समाप्य पूर्वकथाप्रसंगकथनम्, वसिष्ठस्य सन्ध्यया सह संवादे तस्यै तपश्चर्याविधिवर्णनम्, तपःसंतुष्टाद्विष्णोः सन्ध्याया वरलाभः, विष्णुवचनानुसारेण मेधातिथेर्यज्ञे वसिष्ठं मनस्यानीय अग्निकुंडे तस्या देहपातनम्, अग्नितस्तस्या उत्पत्तिश्च	४८
२३	अग्न्युत्पन्नायाः कन्याया अरुंधतीति नामकरणम्, अरुंधत्यै स्त्रीधर्मशिक्षणार्थं तस्याः सावित्रीसमीपे स्थापनम्, वसिष्ठारुंधतीविवाहवर्णनम्, तयोरभिषेकजलात्सिप्रसरःप्रादुर्भावस्तन्माहात्म्यकथनञ्च	५१
२४	सिप्रसरस्तीरे हरशोकनिवृत्त्यर्थं ब्रह्मादिकृतमायास्तुतिः, हरशोकापनोदनानंतरं हरिब्रह्मादीनां स्वस्वलोकगमनञ्च	५६
२५	कल्पेकल्पे सृष्टिः कथं भवतीति प्रश्नमंगीकृत्य प्रकृतिसंचरवर्णनम्	५७
२६	आदिसृष्टिवर्णनम्	६०
२७	प्रतिसर्गकथनम्	६२
२८	सृष्टिसंहारकल्पादिनिरूपणम्	६३
२९	सर्वस्योत्पन्नस्यासारताकथनपूर्वकं सारवद्वस्तुनिरूपणम्	६४
३०	शम्भुगणानामनेकरूपताकथनप्रसंगेन शिवस्य यज्ञवराहं प्रति वराहकायत्यागार्थं कथनम्, वाराह्या धरया सह रममाणस्य वराहस्य सुतत्रयोत्पत्तिः,वराहसुतानां जगत्पीडाकरत्ववर्णनञ्च ...	६५
३१	ब्रह्मविष्ण्वादितेजोभिराप्यायितस्य शिवस्य शरभरूपमासाद्य वराहेण सह महोग्रयुद्धवर्णनम्, युद्धं कुर्वाणस्य शिवस्य शरीरतो नानारूपगणानामुत्पत्तिः, सपुत्रस्य वराहस्य शरभकृतवधवर्णनञ्च	६६

अध्यायाः	विषयाः	पत्रांकाः
३२	यज्ञवराहस्य देहाद्यज्ञोत्पत्तिः, वराहसुतदेहेभ्यो दक्षिणाग्निगार्हपत्याहवनीयाग्नीनामुत्पत्तिश्च	७२
३३	कपिलशापतोऽतिखिन्नस्य स्वायंभुवमनोर्गंगाद्वारान्तिकबदर्यां तपस्यतो हस्ते भगवतो हरेर्मत्स्यावतारग्रहणम्	७३
३४	प्रलयसमये स्वायंभुवमनोर्वेदैः सह मत्स्यावतारिभगवत्कृतरक्षणवर्णनम्	७५
३५	प्रलये विवरमधिगतां वसुधामुद्धृत्य कमठरूपेण हरिणा नरनारायणरूपिणा पुनस्तस्यां यथावत्सृष्टिरचनावर्णनम्	७७
३६	ब्रह्मणो वचनाच्छिवस्य शरभतनुपरित्यागः, शरभस्य अष्टौ पादाः अष्टमूर्तिषु विलयं गताः,देहमध्यतः कपालिभैरवोत्पत्तिः, कपालिव्रतनिरूपणश्च	८०
३७	वराहपुत्रस्य नरकासुरस्य चरितकथनप्रसंगेन गर्भभारप्रपीडितायाः पृथिव्याः स्तवनात्संतुष्टस्य विष्णोः शंखस्पर्शेन गर्भपीडानिरसनम्, तस्या आश्वासनश्च	८०
३८	विदेहराजस्य यज्ञार्थं धरोत्खननं कुर्वाणस्य पृथिव्या मध्यात्सीतोत्पत्तिः, राज्ञा धरायाः संवादः,यत्र सीता लब्धा तत्रैकः पुत्रोऽग्रे मिलिष्यति तस्यावाल्यं संरक्षणं कर्तव्यं तं परमहं नेष्यामीति राज्ञे तस्याः कथनम्,नरकासुरस्योत्पत्तिकथनम्,जनकगृहे तस्य वृद्धिश्च	८२
३९	नरकस्य बाल्ये जनकगृहे निवासादिकथनम्,गंगायां नरकाय पृथिव्यास्तदुत्पत्तिविषये कथनम्, विष्णुकथनात्प्राग्ज्योतिषपुरे राज्यप्राप्तिः कामाख्यादेवीं परित्यज्य यदन्यपूजनं करिष्यसि तदाचिरान्मरिष्यसि नूनमिति विष्णुकथनम्, तदनुसारेण नरकस्य राज्यकरणञ्च	८४
४०	नरकस्य बाणासुरेण सह सख्यकथनम्, विष्णोर्हस्तेन निधनमेष्यसीति नरकं प्रति शापदानम्, बाणकथनान्नरकस्य तपश्चरणम्, विधेः सकाशान्नरकस्य वरप्राप्तिवर्णनञ्च	८९
४१	आसुरं भावमाश्रितस्य द्विजादीनतितापयतो नरकस्य कृष्णहस्तेन मरणवर्णनम्	९२
४२	हिमालयान्मेनकायां भगवत्या जन्मवर्णनम्, तस्याश्च कालीनामप्राप्तिवर्णनञ्च	९६
४३	हिमवति शिवस्य तपस्यार्थमागमनम्, नारदवचनाद्धिमतो शिवसेवा-	

अध्यायाः	विषयाः	पत्रांकाः
	र्थं कालीनियोजनञ्च	९८
४४	तारकासुरपीडया सर्वदेवगणस्य विधिसमीपे गमनम्, शिवस्य रेतसा काल्यां जायमानात्सुतात्तस्य वध इति विधिकथनम्, हरमोहनार्थं कामस्योद्योगः, शिवस्य भाललोचनोत्थाग्निना मदनस्य दाहः, काल्या हरविषयिणी चिंता च	१००
४५	हरप्राप्त्यर्थं काल्यास्तपोवर्णनम्, शिवस्य ब्रह्मचारिवेषमाश्रितस्य काल्या सह संवादः, काल्याः शिवे दृढतरं भावं विलोक्य तस्य प्रत्यक्षदर्शनञ्च	१०४
४६	हरस्य काल्या सह महता समारंभेण विवाहवर्णनम्	१०८
४७	सगरौर्वसंवादप्रसंगेन कालीतिशिवोक्त्या रुष्टाया देव्यास्तपोवर्णनम्, कालीकृतशिवस्तुतिवर्णनम्, शिवकथनानुसारेणाकाशगंगायां स्नानात्काल्या गौरीत्वलाभवर्णनम्, हरस्यार्द्धांगे गौर्याः प्रवेशकथनञ्च	१०९
४८	कुमारकार्तिकेयोत्पत्तिवर्णनम्	११५
४९	शिवगणयोर्भृंगिमहाकालयोर्गौरीशापकथनम्, तयोर्वचनाद्गौरीहरयोरपि मानुषत्वाङ्गीकारवर्णनम्, पूष्णः पुत्रस्य पौष्यस्य स्त्रियां चंद्रशेखरे-	
	तिनाम्ना हरस्योत्पत्तिकथनञ्च	११८
५०	आर्यावर्त्तान्तर्गतभोगवतीपुर्यां इक्ष्वाकुवंशीयककुत्स्थराज्ञो भार्यायां मनोन्मथिन्यां तस्या अनुग्रहार्थं गौर्या उत्पत्तिवर्णनम्, तारावत्यास्तस्या बाल्यवर्णनम्, स्वयंवरे तस्याश्चंद्रशेखरनृपवरणम्, विवाहसमारंभवर्णनञ्च	१२३
५१	दृषद्वत्यां स्नानार्थमागतां तारावतीं दृष्ट्वा कापोताख्यमुनेः कामपीडा, ऋषेरभिप्रायं ज्ञात्वा सखीसंमतेन निजाकल्पभूपितायाश्चित्रांगदाया मुनिसंनिधौ प्रेषणम्, कापोतमुनेश्चित्रांगदायां पुत्रद्वयोत्पत्तिः चित्रांगदाया उर्वश्यां ककुत्स्थादुत्पत्तिः, चित्रांगदासुतयोः कापोतमुनिकृतसंस्कारकथनञ्च	१२३
५२	पुनः कदाचित्स्नानार्थमागतां तारावतीं ज्ञात्वा वञ्चनाकरणात्तस्यै कापोतमुनिशापदानम्, सौधारूढौ तारावतीचंद्रशेखरौ दृष्ट्वा भृंगीमहाकालयोर्जन्मग्रहणार्थं राज्ञीशरीरप्रवेशनाय गौर्यै हरस्य निदेशः, तारावत्यां कापोतशापानुसारेण हरस्य कापालिवेषस्य संभोगात् वानरमुखपुत्रद्वयजन्मवर्णनम्, तारावत्याः शोकमाश्रिताया हरवचः	

अध्यायाः	विषयाः	पत्रांकाः
	नाचंद्रशेखरे हरे च भेदाभावदर्शनम्, वेतालभैरवेतिपुत्रनामकरणञ्च	१२९
५३	मातापित्रोः स्वस्मिन्नप्रीतिं विलोक्य वेतालभैरवयोस्तपस्यार्थं वनगमनम्, तुंबुरुसुवर्चसौ पुत्रौ भार्या चित्रांगदां च राज्ञे चंद्रशेखराय समर्प्य ततः पुत्रयोरर्धराज्यं दत्त्वा कापोतस्य तपसे गमनम्, वेतालभैरवयोस्तपसा शिवस्य प्रादुर्भाववर्णनञ्च	१३०
५४	वेतालभैरवौ प्रति शिवप्रोक्तमहामायामन्त्रविधिनिरूपणम्	१३६
५५	महामायोपासनाङ्गत्वेन देहशुद्धिविधानवर्णनम्	१३७
५६	भगवत्याः परमतोषदपूज्यद्रव्याणां विस्तरेण वर्णनम्	१३८
५७	देव्याः संतोषाय बलिदानकथनम्, बलिनिरूपणञ्च	१३९
५८	महामायामन्त्रकल्पकवचनिरूपणम्	१४३
५९	शिवोमावासुदेवसूर्यरुद्रादिपूजाप्रतिपत्तिबीजमंत्रादिनिरूपणम्	१४५
६०	देव्याः सकाशात् वरप्राप्तियोग्यतंत्रविधिनिरूपणम्	१५०
६१	महादेव्या अंगमंत्रनिरूपणम्	१५२
६२	शरदि महामायोत्सवविधिकथनम्, प्रतिकल्पं भगवत्या अवतारवर्णनम्, महिषासुरहंत्र्या देव्या विस्तरेण चरितवर्णनञ्च	१५५
६३	दक्षयज्ञविघातार्थं भगवत्या उग्रचण्डादेव्या उत्पत्तिवर्णनम्, तस्या उपासनाविधिनिरूपणम्, ब्रह्माण्यादिनानाविधशक्तिध्यानादिनिरूपणञ्च	१६०
६४	कामाख्यायाः कालकूटे गिरौ स्थिताया माहात्मवर्णनम्, भुवनेश्वर्यादिदेवीपीठवर्णनञ्च	१६३
६५	कामाख्यापंचमूर्तीनां रूपमंत्रतंत्रादिकल्पनिरूपणम्	१६७
६६	भगवत्याः पीठमंडलस्थितदेवतानामकथनपूर्वकं पूजनप्रकारवर्णनम्	१६७
६७	त्रिपुराख्यभगवतीमहापूजाफलादीनां विस्तरेण कथनम्	१७०
६८	देव्याः कामेश्वरीमूर्तेस्तंत्रध्यानपूजाक्रमनिरूपणम् ...	१७३
६९	पंचमूर्तिधरादेव्याः पंचमंत्रकथनपूर्वकं पूजाफलनिरूपणम्	१७५
७०	भगवत्याः परमसंतोषकरमुद्राविधिनिरूपणम्	१७७
७१	भगवतीपरमतुष्टिकरबलिदानक्रमादिविधिनिरूपणम् ...	१८१
७२	षोडशोपचाराणां मध्ये भगवतीप्रीतिकराणां षण्णां निरूपणम्	१८६
७३	वस्त्रमारभ्य धूपान्तोपचारकथनम्	१८८
७४	भगवत्या निवेदनीयपदार्थानां कथनम्	१९८

अध्यायाः	विषयाः	पत्रांकाः
७५	देवीप्रदक्षिणानमस्कारविधिकथनम्....	१९४
७६	कामाख्यादेवीमाहात्म्यकथनप्रसंगेन तस्याः कवचनिरूपणम्	१९५
७७	मातृकान्यासकथनम्	१९७
७८	योनिमुद्राया अष्टभेदकथनम्, देव्या नानाविधिसहितं यंत्रधारणं तत्फलनिरूपणञ्च	१९८
७९	त्रिपुरादेव्याः कवचनिरूपणम्, मंत्रपुरश्चरणविधिकथनञ्च	२०५
८०	मंत्रशुद्धिकथनम्, नीलाचले कामरूपाख्यपीठे वेतालभैरवयोः शिववचनाद्गमनम्, तत्र भगवत्या आराधनम्, वेतालभैरवयोर्भगवत्या वरप्रदानम्, अजरामरत्वलाभसन्तुष्टयोस्तयोः शिवेन नीतयोर्नीलगिरिस्थितबहुविधस्थानदर्शनञ्च	२०८
८१	नीलगिरिमध्यवायव्यपूर्वभागस्थितोमास्थानदर्शनवर्णनम्	२१३
८२	ततः पूर्वं दर्पणाख्यगिरिस्थिततन्नामसरःस्नानपुण्यफलनिरूपणम्	२१६
८३	शरावत्यादिनानाविधमहातीर्थस्नानफलकथनम्, कामरूपपीठस्थितदेवतार्चननिरूपणम्, कामरूपपीठस्थितावरणदेवतापूजनविधिश्च	२२१
८४	कामेश्वरीपीठयात्रावर्णनम्	२२६
८५	कामरूपपीठनिकटस्थितब्रह्मपुत्रलौहित्याख्यनदोत्पत्तिकथनम्, मातृहत्यापनोदाय परशुरामस्य लौहित्यसरःस्नानेन दोषनिवृत्तिकथनञ्च	२२८
८६	जामदग्न्यस्य क्रूरकारित्वविषये तस्य पूर्वेतिहासकथनम्, लौहित्यतीर्थस्नानफलकथनञ्च	२३०
८७	सगरनृपौर्वसंवादेन राजपुत्रस्त्रीप्रभृतीनां सदाचारवर्णनम् ...	२३१
८८	सदाचारकथनप्रसंगेन विशेषतो राजधर्मनिरूपणम्, नीराजनाविधिकथनञ्च	३३५
८९	पौषमासे राज्ञः पुष्पनक्षत्रोपरिस्नानविधिनिरूपणम्, पुष्पनक्षत्रयुतायां पौषतृतीयायां शिवचंडिकापूजाविधिकथनञ्च	२३७
९०	राज्ञो रणे जयावाप्त्यर्थं शक्रोत्थानध्वजोत्सववर्णनम् ...	२४२
९१	ज्येष्ठ दशम्यां विष्णोरिष्टिः, राज्ञावश्यत्याज्यराज्यन्नवस्तूनां निरूपणम्	२४३
९२	भैरववंशवर्णनम्, खाण्डववनेतिहासकथनञ्च	२४५
९३	वेतालवंशकथनम्, कालिकापुराणश्रवणपठनफलनिरूपणञ्च	२५०

समाप्तेयं कालिकापुराणानुक्रमणिका श्रीशिवयोः पदारविंदार्पिताऽस्तु ।

॥ श्रीगणेशायनमः ॥ ॥ श्रीकालिकायैनमः ॥ ॥ यद्योगिभिर्भवभयार्त्तिविनाशयोग्यमासाद्यवन्दितमतीवविविक्तचित्तैः ॥ तद्वः पुनातुहरिपादसरोजयुग्ममाविर्भवत्क्रमविलङ्घितभूर्भुवःस्वः ॥ १ ॥ सापातुवःसकलयोगिजनस्यचित्तेऽविद्यातमिस्रतरणिर्य्यतिमुक्तिहेतुः ॥ याचास्यजन्तुनिवहस्यविमोहिनीतिमायाविभोर्ज्जनुषिशुद्धसुबुद्धिहन्त्री ॥ २ ॥ ईश्वरञ्जगतामाद्यम्प्रणम्यपुरुषोत्तमम् ॥ नित्यज्ञानमयञ्चैक्ष्येपुराणंकालिकाह्वयम् ॥ ३ ॥ मार्कण्डेयम्मुनिश्रेष्ठंस्थितंहिमधरान्तिके ॥ मुनयःपरिपप्रच्छुःप्रणम्यक्रमठादयः ॥ ४ ॥ भगवन्तसम्यगाख्यातंसर्व्वशास्त्राणितत्त्वतः ॥ वेदान्तसर्व्वास्तथासाङ्गान्तसारभूतम्प्रमथ्यच ॥ ५ ॥ सर्व्ववेदेषुशास्त्रेषुयोयोनःसंशयोऽभवत् ॥ ससच्छिन्नस्त्वयाब्रह्मन्तसवित्रेव तमश्चयः ॥ ६ ॥ जैवातृकाख्यभवतःप्रसादाद्द्विजसत्तम ॥ निःसंशयावयञ्जातावेदेशास्त्रेचसर्व्वशः ॥ ७ ॥ कृतकृत्यावयम्ब्रह्मँस्त्वत्तोऽधीत्यसमन्ततः ॥ सरहस्यन्धर्म्मशास्त्रञ्यँदङ्गादि स्वयम्भुवा ॥ ८ ॥ भूयस्तच्छ्रोतुमिच्छामोहरङ्गालीपुराकथम् ॥ मोहयामासयतिनंसतीरूपेणचेश्वरम् ॥ ९ ॥ सर्व्वदाध्याननिलयञ्यँमिनयँतिनाव्विरम् ॥ सङ्क्षोभयामासकथंसंसारविमुखंहरम् ॥ १० ॥ सतीवाकथमुत्पन्नादक्षदोरेषुशोभना ॥ कथंहरोमनश्चक्रेदारग्रहणकर्म्मणि ॥ ११ ॥ कथंवादक्षकोपेनत्यक्तदेहासतीपुरा ॥ हिमवत्तनयाजाताभूयोवाकथमागता ॥ १२ ॥ कथमर्द्धशरीरंसाऽहरत्स्मरारिपोः पुनः ॥ एतत्सर्वंसमाचक्ष्वविस्तरेणाद्विजोत्तम ॥ १३ ॥ नाऽन्योस्तिसंशयच्छेत्तात्वत्समोनभविष्यति ॥ यथाजानीमविप्रेन्द्रतत्कुरुष्वै[1]

१ तदेतत्कुरुष्वेत्यर्थः ।

तदात्मवित् ॥ १४ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ शृणुध्वम्मुनयःसर्वेगुह्याद्गुह्यतरम्मम ॥ पुण्यंशुभकरंसम्यग्ज्ञानदङ्गामदम्परम् ॥१५॥
एतद्ब्रह्मापुरोवाचनारदायमहात्मने ॥ पृष्टस्तेनततःसोपिवालखिल्येभ्यउक्तवान् ॥ १६ ॥ वालखिल्यामहात्मानस्ततआचक्षिरपुनः ॥
यवक्रीतायमुनयेसप्रोवाचासितायच ॥ १७ ॥ असितोमेसमाचष्टएतद्विस्तरतोद्विजाः ॥ अहव्वैःकथयिष्यामिकथामेताम्पुरातनीम् ॥ १८ ॥
प्रणम्यपरमात्मानञ्चक्रपाणिञ्जगत्पतिम् ॥ व्यक्ताऽव्यक्तस्वरूपायसदसद्व्यक्तिरूपिणे॥१९॥ स्थूलायसूक्ष्मरूपायविश्वरूपायवेधसे ॥ नित्याय
नित्यज्ञानायनिर्व्विकारायतेजसे॥२०॥विद्याऽविद्यास्वरूपायकालरूपायवैनमः॥निर्म्मलायोर्म्मिषट्कादिरहितायविरागिणे ॥२१॥ व्यापिनेवि
श्वरूपायसृष्टिस्थित्यन्तकारिणे॥योगिभिश्चिन्त्यतेयोसौवेदान्तान्तगचिन्तकैः॥२२॥ अन्तरन्तःपरञ्ज्योतिःस्वरूपम्प्रणमामितम् ॥ तमेवा
राध्यभगवान्ब्रह्मालोकपितामहः॥२३॥प्रजाःससर्ज्जसकलाःसुरासुरनरादिकाः॥सृष्ट्वाप्रजापतीन्दक्षप्रमुखान्त्सयथाविधि॥२४॥मरीचिमत्रिम्पु
लहन्तथैवाङ्गिरसंक्रतुम्॥पुलस्त्यञ्चवशिष्ठञ्चनारदञ्चप्रचेतसम्॥२५॥भृगुञ्चमानसान्पुत्रान्यदादशससर्ज्जसः ॥ तदातन्मनसोजाताचारुरूपाव
रांगना ॥२६॥नाम्नासन्ध्येतिविख्याता सायंसन्ध्याजयन्तिका॥नतादृशीदेवलोकेनमर्त्त्येनरसातले ॥२७॥ कालत्रयेपिभवितासम्पूर्णगुणशा
लिनी॥निसर्ग्गचारुनीलेनकचभारेणराजते॥२८॥मयूरीवविचित्रेणवर्षासुद्विजसत्तमाः ॥ आरक्तगौरमलिनमाकर्ण्णान्तन्तथाऽलकैः॥२९॥
रजेसुराधिपधनुश्चारुबालेन्दुसन्निभम् ॥ प्रफुल्लनीलनलिनश्यामलन्नयनद्वयम् ॥ ३० ॥ चकाशेचकितायास्तुकुरङ्ग्याःसदृशञ्चलम् ॥

१ वेदान्तान्तगाश्चतेचिन्तकाइतिकर्मधारयः ।

निसर्ग्गचञ्चलञ्चारुभ्रूयुग्मंश्रवणायतम् ॥३१॥ मीनाङ्ककोदण्डसमन्नीलन्तस्याद्विजोत्तमाः॥भ्रूमध्याधोनिम्नभागादायतप्रांशुनासिका॥३२॥
लावण्यानिद्रवन्तीवललाटात्तिलपुष्पवत् ॥ तद्रक्तंशोणपद्माभपूर्ण्णचन्द्रसमप्रभम् ॥ ३३ ॥ बिम्बाधरारुणिम्नाभिरेजेरागिमनोहरम् ॥
सौन्दर्य्यलावण्यगुणैरापूर्ण्णवदनम्पुनः ॥ ३४ ॥ अभितश्चिबुकयँ्यातुमुद्यताविवतत्कुचौ ॥ राजीवकुड्मलाकारौपीनोत्तुंगौनिरन्तरौ
॥ ३५ ॥ श्यामास्यौतत्कुचौविप्रामुनीनामपिमोहनौ ॥ वलिभाजिक्षीणमध्यमुष्टिग्राह्यमिवाशुगम् ॥ ३६ ॥ तन्मध्यन्ददृशुः सर्वेशक्तितु
ल्यम्मनोभुवः ॥ तस्याश्चोरुयुगंरेजेस्थूलोर्द्धङ्करभायतम् ॥ ३७ ॥ आनमद्वारणकरप्रतिमम्मृदुमन्थरम् ॥ स्थलाम्बुजारुणम्पाद
युग्मंसत्पार्ष्णिराजितम् ॥ ३८ ॥ अंगलीदलसंकीर्ण्णङ्कुसुमायुधबाणवत् ॥ ताश्चारुदर्शनान्तन्वीन्तनुरोमावलीवृताम् ॥ ३९ ॥ सस्वे
दवदनान्दीर्घनयनाञ्चारुहासिनीम् ॥ चारुकर्ण्णयुगाङ्कान्तान्त्रिगम्भीरांषडुन्नताम् ॥ ४० ॥ दृष्ट्वाघातासमुत्थायचिन्तयामासहृद्गतम् ॥
दक्षादयस्तेस्रष्टारोमरीच्याद्यास्तुमानसाः ॥ ४१ ॥ दध्युःसमुत्सुकाःसर्व्वेतान्दृष्ट्वावरवर्ण्णिनीम् ॥ किङ्कर्म्मास्याभवेत्सृष्टौकस्यवावर
वर्ण्णिनी ॥ ४२ ॥ भविष्यतीतितेसर्व्वेचिन्तयामासुरुत्सुकाः ॥ एवञ्चिन्तयतस्तस्यब्रह्मणोमुनिसत्तमाः ॥ ४३ ॥ मनसःपुरुषोवल्गु
राविर्भूतोविनिःसृतः ॥ काञ्चनीचूर्ण्णपीताभःपीनोरस्कःसुनासिकः ॥ ४४ ॥ सुवृत्तोरुकटीजंघोनीलवेष्टितकेशरः ॥ लग्नभ्रूयुगलोलोलः
पूर्णचन्द्रनिभाननः ॥ ४५ ॥ कपाटविस्तीर्ण्णहृदिरोमराजिविराजितः ॥ शुभ्रमातंगकरवत्पीनानिस्तलबाहुकः ॥ ४६ ॥ आरक्तपा

१ हरिद्राचूर्णमित्यर्थः । २ करिशुण्डावत् । ३ निस्तलं वर्तुले चले । इति विश्वः ।

णिनयनमुखपादकरोद्भवः ॥ क्षीणमध्यश्चारुदन्तःप्रमत्तगजबन्धनः ॥ ४७ ॥ प्रफुल्लपद्मपत्राक्षःकेशरघ्राणतर्प्पणः ॥ कम्बुग्रीवो
मीनकेतुःप्रांशुर्म्मकरवाहनः ॥ ४८ ॥ पञ्चपुष्पायुधोवेगीपुष्पकोदण्डमाण्डितः ॥ कान्तःकटाक्षपातेनभ्रामयन्नयनद्वयम्॥४९॥सुगन्धिमरुता
भान्तंशृंगाररससेवितम् ॥तव्वींक्ष्यतादृशन्दक्षप्रमुखामानसाश्चते ॥५०॥ मरीच्याद्यादशततोविस्मयाविष्टचेतसः ॥ औत्सुक्यम्परमञ्जग्मुरा
पुर्व्वैकारिकम्मनः ॥ ५१ ॥ सचापिवेधसव्वींक्ष्यस्रष्टारञ्जगताम्पतिम् ॥ प्रणम्यपुरुषःप्राहविनयानतकन्धरः ॥ ५२ ॥ पुरुषउवाच ॥
किङ्करिष्याम्यहङ्कर्म्मब्रह्मँस्तत्रनियोजय ॥ मान्याय्येपुरुषोयस्मादुचितेशोभतेविधे ॥ ५३ ॥ अभिधानञ्चयद्योग्यंस्थानम्पत्नीच
याममम ॥ तन्मेकुरुष्वलोकेशत्वंस्रष्टाजगताय्यँतः ॥ ५४ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ एवन्तस्यवचःश्रुत्वापुरुषस्यमहात्मनः ॥ क्षण
न्नकिञ्चित्प्रोवाचस्वसृष्टावपिविस्मितः ॥ ५५ ॥ ततोमनःसुसयँयम्यसम्यगुत्सृज्यविस्मयम् ॥ उवाचपुरुषम्ब्रह्मातत्कर्म्मोद्देशमावहन् ॥ ५६॥
॥ ब्रह्मोवाच ॥ ॥ अनेनचारुरूपेणपुष्पबाणैश्चपञ्चभिः ॥ मोहयन्पुरुषाँस्त्रीश्चकुरुसृष्टिंसनातनीम् ॥ ५७ ॥ नदेवोनचगन्धर्वोनकिन्नरम
होरगाः ॥ नासुरोनचदैत्योवानविद्याधरराक्षसाः ॥ ५८ ॥ नयक्षानपिशाचाश्चनभूतानविनायकाः ॥ नगुह्यकानवासिद्धानमनुष्यानपक्षिणः
॥ ५९ ॥ पशवोनमृगाःकीटपतङ्गाजलजाश्चये ॥ नतेसर्व्वेभविष्यन्तिनलक्ष्यायेशरस्यते ॥ ६० ॥ अहव्वींवासुदेवोवास्थाणुर्व्वापुरुषोत्तम ॥
भविष्यामस्तववशेकिमन्यैःप्राणधारिभिः ॥ ६१ ॥ प्रच्छन्नरूपीजन्तूनाम्प्रविशन्हृदयंसदा ॥ सुखहेतुःस्वयम्भूत्वाकुरुसृष्टिंसनातनीम् ॥
॥ ६२ ॥ त्वत्पुष्पवाणस्यसदासुख्यँलक्ष्यम्मनोस्तुच ॥ सर्व्वेषाम्प्राणिनान्नित्यम्मदमोदकरोभवान् ॥ ६३ ॥ इतितेकर्म्मकथितंसृष्टिप्राव

र्त्तकम्पुनः ॥ नामापिचगदिष्यामियत्तेयोग्यम्भविष्यति ॥ ६४ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्त्वाचसुरश्रेष्ठोमानसानाम्मुखानिच ॥
आलोक्यस्वासनेपद्मेसूपविष्टोऽभवत्क्षणात् ॥ ६५ ॥ ॥ इतिश्रीकालिकापुराणेकामप्रादुर्भावोनामप्रथमोऽध्यायः ॥ १ ॥ मार्कण्डेय
उवाच ॥ ॥ ततस्तेमुनयःसर्व्वेतदभिप्रायवेदिनः ॥ चक्रुस्तदुचितन्नाममरीच्यत्रिमुखास्तदा ॥ १ ॥ मुखावलोकनादेवज्ञात्वावृत्तान्तम
न्यतः ॥ दक्षादयस्तुस्रष्टारःस्थानम्पत्नीञ्चतेददुः ॥ २ ॥ ततोनिश्चित्यनामानिमरीचिप्रमुखाद्विजाः ॥ ऊचुःसंगतमेतस्मैपुरुषायद्विजोत्तमाः
॥ ३ ॥ ऋषयऊचुः ॥ ॥ यस्मात्प्रमथ्यचेतस्त्वञ्जातोऽस्माकन्तथाविधेः ॥ तस्मान्मन्मथनाम्नात्वँल्लोकेख्यातोभविष्यसि ॥ ४ ॥
जगत्सुकामरूपस्त्वन्त्वत्समोनाहिविद्यते ॥ अतस्त्वङ्कामनाम्नाऽपिख्यातोभवमनोभव ॥ ५ ॥ मदनान्मदनाख्यस्त्वंशम्भोर्द्दर्प्पाच्चदर्प्पकः ॥
तथाकन्दर्प्पनाम्नापिलोकेख्यातोभविष्यसि ॥६॥ त्वदाशुगानाँय्यद्वीर्य्यन्तद्वीर्य्यन्नभविष्यति ॥ वैष्णवानाञ्चरौद्राणाम्ब्रह्मास्त्राणाञ्चतादृशम
॥७॥ स्वर्ग्गेमर्त्त्येचपातालेब्रह्मलोकेसनातन ॥ तवस्थानानिसर्व्वाणिसर्व्वव्यापीभवान्यतः ॥ ८॥ किंवाचातिविशेषेणसामान्येनास्तिते
समः ॥ यत्रयत्रभवेत्प्राणीशाद्वलास्तरवोऽथवा ॥ ९ ॥ तत्रतत्रतवस्थानमस्त्वाब्रह्मसदोदयम् ॥ दक्षोऽयम्भवतःपत्नींस्वयन्दास्य
तिशोभनाम् ॥ १० ॥ आद्यःप्रजापतिर्य्योहियथेष्टम्पुरुषोत्तम ॥ एषाचकन्यकाचारुरूपाब्रह्ममनोभवा ॥ ११ ॥ सन्ध्यानामे
तिविख्यातासर्व्वेलोकेभविष्यति ॥ ब्रह्मणोध्यायतोयस्मात्सम्यग्जातावराङ्गना ॥ १२ ॥ अतःसन्ध्येतिलोकेऽस्मिन्नस्याःख्यातिर्भ

१ जनसमूहे । २ स्थितिः ।

विष्यति ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्त्वामुनयःसव्वतूष्णीन्तस्थुर्द्विजोत्तमाः ॥ १३ ॥ अवेक्ष्यब्रह्मवदनाँव्विनयावनताःपुरः ॥
ततःकामोपिकोदण्डमादायकुसुमोद्भवम् ॥ १४ ॥ उन्मादनेतिविख्यातङ्कान्ताभूतुल्यवेल्लितम् ॥ कौसुमानितथास्त्राणिपञ्चादायद्विजोत्तमाः
॥ १५ ॥ हर्षणंरोचनाख्यञ्चमोहनंशोषणन्तथा ॥ मारणञ्चेतिसञ्ज्ञाभिर्म्मुनिमोहकराण्यपि ॥ १६ ॥ प्रच्छन्नरूपीतत्रैवचिन्तयामासनिश्च
यम् ॥ ब्रह्मणाममयत्कार्य्यंसमुद्दिष्टंसदातनम् ॥ १७ ॥ तदिहैवकरिष्यामिमुनीनांसन्निधौविधेः ॥ तिष्ठन्तिमुनयश्चात्रस्वयंञ्चापिप्रजाप
तिः ॥ १८ ॥ एषासन्ध्यावरस्त्रीचदक्षोप्यत्रप्रजापतिः ॥ एतेशरव्यभूतामेभविष्यन्त्यद्यनिश्चयम् ॥ १९ ॥ सन्ध्यापिब्रह्मणाप्रोक्तमिदानीमे
वयद्वचः ॥ अहँव्विष्णुर्हरश्चापितवास्त्रवशवर्त्तिनः ॥ २० ॥ किमन्यैर्जन्तुभिरितितत्सार्थङ्करवाण्यहम् ॥ मार्कण्डेयउवाच ॥ ॥ इतिसं
चिन्त्यमनसानिश्चित्यचमनोभवः ॥ २१ ॥ पुष्पज्याम्पुष्पचापस्ययोजयामासमार्गणैः ॥ आलीढस्थानमासाद्यधनुराकृष्ययत्नतः ॥२२॥
चकारवलयाकारंकामोधन्विवरस्तदा ॥ संहितेतेनकोदण्डेमारुताश्चसुगन्धयः ॥ २३ ॥ ववुस्तत्रमुनिश्रेष्ठाःसम्यगाह्लादकारिणः ॥ ततस्ता
नथधात्रादीन्त्सर्व्वानेवचमानसान् ॥ २४ ॥ पृथक्पृथक्पुष्पशरैर्म्मोहयामासमोहनः ॥ ततस्तेमुनयःसर्व्वेमोहिताश्चतुराननः ॥ मोहितोमन
साकिञ्चिद्विकारम्प्रापुरादितः[1] ॥ २५ ॥ सन्ध्यांसर्वेनिरीक्षन्तःसविकारामुहुर्म्मुहुः ॥ आसन्प्रवृद्धमदनाःस्त्रीयस्मान्मदवर्द्धिनी ॥ २६ ॥ ततः
सर्व्वान्त्समदनोमोहयित्वापुनःपुनः ॥ यथेन्द्रियविकारांस्तेप्रापुस्तानकरोत्तथा ॥ २७ ॥ उदीरितेन्द्रियोधातावीक्षाञ्चक्रेयदाथताम् ॥ तदैव

१ आदौ ।

त्यूनपञ्चाशद्भावाजाताःशरीरतः ॥२८॥ विव्वोकाद्यास्तथाहावाश्चतुःषष्टिकलास्तथा ॥ कन्दर्प्पशरविद्धायाःसन्ध्यायाअभवन्द्विजाः[1]॥२९॥
सापितैर्व्वीक्ष्यमाणाऽथकन्दर्प्पशरपातजान् ॥ चक्रेमुहुर्म्मुहुर्भावान्कटाक्षावरणादिकान् ॥ ३० ॥ निसर्ग्गसुन्दरीसन्ध्यातान्भावान्मदनो
द्भवान् ॥ कुर्व्वन्त्यतितरांरेजेस्वर्ण्णदीवतनूर्म्मिभिः ॥ ३१ ॥ अथभावयुतांसन्ध्याव्वीक्षमाणःप्रजापतिः ॥ घर्म्माम्भःपूरिततनुराभिलाष
मथाकरोत् ॥ ३२ ॥ ततस्तेमुनयःसर्व्वेमरीच्यत्रिमुखाअपि ॥ दक्षाद्याश्चद्विजश्रेष्ठाःप्रापुर्व्वैकारिकेन्द्रियम् ॥ ३३ ॥ दृष्ट्वातथाविधान्दक्षमरी
चिप्रभुखान्विधिम् ॥ सन्ध्याञ्चकर्म्मणिनिजेश्रद्दधेमदनस्तदा ॥ ३४ ॥ यदिदम्ब्रह्मणाकर्म्ममयोद्दिष्टम्मयापितत् ॥ कर्त्तुंशक्यमितिश्रद्धा
भावितात्माभवत्तदा ॥ ३५ ॥ ततोवियद्गतःशम्भुर्व्विधिन्दृष्ट्वातथाविधम् ॥ सदक्षान्मानसान्वापिजहासोपजहासच ॥ ३६ ॥ ससाधुवा
दन्तान्त्सर्व्वान्विहस्यचपुनःपुनः ॥ उवाचेदन्द्विजश्रेष्ठालज्जयंस्तान्वृषध्वजः ॥ ३७ ॥ ॥ ईश्वरउवाच ॥ ॥ अहोब्रह्मंस्तवकथंकाम
भावःसमुद्गतः ॥ दृष्ट्वास्वतनयान्नैतद्योग्यँव्वेदानुसारिणाम् ॥ ३८ ॥ यथामातातथाजामिर्य्यथाजामिस्तथासुता ॥ एषवैवेदमार्ग्गस्यनिश्चय
स्त्वन्मुखोत्थितः ॥ ३९ ॥ कथन्तुकाममात्रेणतत्तेविस्मारितँव्विधे ॥ धैर्य्येजगदिदम्ब्रह्मन्त्समस्तश्चतुरानन ॥ ४० ॥ कथङ्क्षुद्रेणकामेन
तत्तेविघटितँव्विधे ॥ एकान्तयोगिनस्तस्मात्सर्व्वदा दिव्यदर्शनाः ॥ ४१ ॥ कथन्दक्षमरीच्याद्या लोलुपाः स्त्रीषु मानसाः ॥ कथङ्का
मोपि मन्दात्मा प्राप्तकर्म्माधुनैव तु ॥ ४२ ॥ युष्माञ्छरव्यान्कृतवानकालज्ञोऽल्पचेतनः ॥ धिगस्तु तम्मुनिश्रेष्ठायस्य कान्ताजनो

१ ब्रह्मणोमनोजाताः ।

हठात् ॥ ४३ ॥ धैर्य्यमाकृष्य लौल्येषु मज्जयत्यपि तन्मनः ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इति तस्यवचः श्रुत्वा लोकेशो गिरिश
स्य च ॥ ४४ ॥ व्रीडया द्विगुणीभूतस्वेदार्द्रो ह्यभवत्क्षणात् ॥ ततो निगृह्यैन्द्रियकविकारश्चतुराननः ॥ ४५ ॥ जिघृक्षुरपि तत्याज तां
सन्ध्याङ्गामरूपिणीम् ॥ तच्छरीरात्तु घर्म्माम्भो यत्पपातद्विजोत्तमाः॥४६॥अग्निष्वात्ता बर्हिषदो जाताः पितृगणास्ततः ॥ भिन्नाञ्जननिभाः
सर्वे फुल्लराजीवलोचनाः ॥ ४७ ॥ नितान्तयतयः पुण्याःसंसारविमुखाः पराः ॥ सहस्राणाञ्चतुःषष्टिरग्निष्वात्ताः प्रकीर्त्तिताः
॥ ४८ ॥ षडशीतिसहस्राणि तथा बर्हिषदो द्विजाः ॥ घर्म्माम्भः पतितम्भूमौ यद्दक्षस्य शरीरतः ॥ ४९ ॥ समस्तगुणसम्पन्ना
तस्माज्जाता वराङ्गना ॥ तन्वंगीतनुमध्या च तनुरोमावली शुभा ॥ ५० ॥ मृद्वंगी चारुदशना तप्तकाञ्चनसुप्रभा ॥ मरीचिप्रमुखैःषड्भि
र्निगृहीतेन्द्रियक्रिया ॥ ५१ ॥ क्रतुं क्रतुर्व्वशिष्ठश्च पुलस्त्यांगिरसौतदा ॥ क्रत्वादीनाञ्चतुर्णाञ्चयो भूमौ निपपात ह ॥ ५२ ॥ ततःपितृ
गणा जाता अपरेद्विजसत्तमाः ॥ सोमपाआज्यपा नाम्ना तथैवान्ये स्वकालिनः ॥ ५३ ॥ हविर्भुजस्तुते सर्वे कव्यवाहाःप्रकीर्त्तिताः ॥
क्रतोस्तु सोमपाः पुत्रा वसिष्ठस्य स्वकालिनः ॥ ५४ ॥ आज्यपाख्याः पुलस्त्यस्य हविष्मन्तोंऽगिरःसुताः ॥ जातेषु तेषु विप्रे
न्द्रा अग्निष्वात्तादिकेष्वथ ॥ ५५ ॥ लोकानाम्पितृवर्ग्गेषु कव्यवाहाः समन्ततः ॥ सर्वेषामेव भूतानाम्ब्रह्मा भूतः पितामहः ॥ ५६ ॥
सन्ध्या पितृप्रसूर्भूता तदुद्देशाद्यतोभवत् ॥ अथ शङ्करवाक्येन लज्जितः सपितामहः ॥ ५७ ॥ कन्दर्प्पाय चुकोपाशु भ्रुकुटीकुटिला
ननः ॥ पुरैव तदभिप्रायं विदित्वा सोपि मन्मथः ॥ ५८ ॥ स्वबाणान्त्सञ्जहाराशु भीतः पशुपतेर्विधेः ॥ ततः क्रोधसमाविष्टो ब्रह्मा

लोकपितामहः ॥ यच्चकार द्विजेन्द्रास्तच्छृणुध्वंसुसमाहिताः ॥ ५९ ॥ इति श्रीकालिकापुराणे द्वितीयोध्यायः ॥ ॥ २ ॥ ॥
॥ मार्कण्डेय उवाच ॥ ॥ ततः कोपसमाविष्टः पद्मयोनिर्ज्जगत्पतिः ॥ प्रजज्वालातिबलवद्दिधक्षुरिव पावकः ॥१॥ उवाच चेश्वरङ्कामो
भवतः पुरतोयतः॥पुष्पेषुभिर्मामभजत्तत्फलस्याप्नुयाद्धर॥२॥तव नेत्राग्निनिर्दग्धःकन्दर्प्पो दर्प्पमोहितः॥भविष्यति महादेव कृत्वा कर्मातिदुष्क
रम्॥३॥इति वेधाः स्वयङ्कामं शशापद्विजसत्तमाः ॥ समक्षव्योमकेशस्य मुनीनाञ्च यतात्मनाम् ॥४॥ अथ भीतो रतिपतिस्तत्क्षणात्त्यक्तमा
र्गणः ॥ प्रादुर्बभूव प्रत्यक्षं शापं श्रुत्वातिदारुणम् ॥ ५ ॥ उवाच चेदम्ब्रह्माणं सदक्षं समरीचिकम् ॥ तथ्यञ्च गद्गदम्भीत्या भीतिर्हि गुणहा
निकृत् ॥ ६ ॥ मन्मथ उवाच ॥ ब्रह्मन्किमर्थम्भवता शप्तोहमतिदारुणम् ॥ अनागास्तव लोकेश न्यायमार्गानुसारिणः ॥ ७ ॥
त्वयैवोक्तन्तु तत्कर्म यत्तु कुर्यामहँव्विभो ॥ तत्र योग्यो नशापो मे यतो नान्यन्मया कृतम् ॥ ८ ॥ अहँव्विष्णुस्तथा शम्भुःसर्वेत्वच्छ
रगोचराः ॥ इति यद्भवता प्रोक्तन्तन्मयापि परीक्षितम् ॥ ९ ॥ नापराधो ममास्त्यत्र ब्रह्मन्मयि निरागसि ॥ दारुणं शमयस्वैनं शापम्मम
जगत्पते ॥ १० ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इति तस्य वचः श्रुत्वा विधाता जगताम्पतिः ॥ प्रत्युवाच यतात्मानम्मदनं
सदयम्मुहुः ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ आत्मजा मम सन्ध्येयय्यस्मादेतत्समीपतः ॥ लक्षीकृतोहम्भवता ततःशापो मया कृतः
॥ १२ ॥ अधुना शान्तरोषोह न्त्वाव्वँदामि मनोभव ॥ भवतः शापशमनम्भविष्यति यथा तथा ॥ १३ ॥ त्वम्भस्म भूत्वा मदन भर्ग

१ समीपइत्यर्थः ।

लोचनवह्निना ॥ तस्यैवानुग्रहात्पश्चाच्छरीरं समवाप्स्यसि ॥ १४ ॥ यदा हरो महादेवःकुर्यादारपरिग्रहम् ॥ तदा स एव भवता शरीरम्प्रापयिष्यति ॥ १५ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ एवमुक्त्वाथ मदनम्ब्रह्मा लोकपितामहः ॥ अन्तर्द्धे मुनीन्द्राणाम्मानसानाञ्च पश्यताम् ॥ १६ ॥ तस्मिन्नन्तर्हिते शम्भुः सर्व्वेषाञ्च विधातरि ॥ यथेष्टदेशङ्गतवान्ब्रह्मन्मारुतरंहसा ॥ १७ ॥ वेधस्यन्तर्हिते तस्मिन् गते शम्भौ निजास्पदम्॥ दक्षः प्राहाथ कन्दर्प्पम्पत्नीन्तस्य निदेशयन् ॥१८॥ दक्ष उवाच ॥ मद्देहजेयङ्कन्दर्प्प मद्रूपगुणसयुँयुता॥एनाङ्गृह्णीष्व भार्यार्थम्भवतः सदृशीगुणैः॥१९॥एषा तव महातेजाः सर्वदा सहचारिणी॥भविष्यति यथाकामन्धर्मतो वशवर्तिनी॥२०॥मार्कण्डेयउवाच॥ इत्युक्त्वा प्रददौ दक्षो देहस्वेदाम्बुसम्भवाम् ॥ कन्दर्पायाग्रतः कृत्वा नाम कृत्वा रतीति ताम् ॥ २१ ॥ ताव्वीक्ष्य मदनो रामांरत्याख्यां सुमनोहराम् ॥ आत्माशुगेन विद्धोसौ मुमोह रतिरञ्जितः ॥ २२ ॥ क्षणप्रभावदेकान्तगौरी मृगदृशीसदा ॥ लोलापाङ्गचथ तस्यैव मृगीव सदृशी बभौ ॥ २३ ॥ तस्या भ्रूयुगलव्वीक्ष्य संशयम्मदनोकरोत् ॥ उन्मादकृन्मेकोदण्डङ्किन्धात्रास्याम्निवेशितम् ॥ २४ ॥ कटाक्षाणामाशुगतिन्दृष्ट्वा तस्या द्विजोत्तमाः ॥ आशुगत्वन्निजास्त्राणां श्रद्दधते च चारुताम् ॥ २५ ॥ तस्याः स्वभावसुरभिन्धीरंश्वासानिलन्तथा ॥ आघ्राय मदनः श्रद्धान्त्यक्तवान्मलयानिले ॥२६॥ पूर्णेन्दुसदृशव्वँक्त्रन्दृष्ट्वा भ्रूलक्ष्मलक्षितम् ॥ ननिश्चिकाय मदनो भेदन्तन्मुखचन्द्रयोः ॥ २७ ॥ सुवर्णपद्मकलिकातुल्यन्तस्याः कुचद्वयम् ॥ रेजे चूचुकयुग्मेन भ्रमरेणेव सेवितम् ॥ २८ ॥ दृढपीनोन्नतघनस्तनमध्याद्विलम्बि

१ विद्युदित्यर्थः । २ मृगीवलोलापाङ्गीत्यन्वयः ।

नीम् ॥ आनाभितो रोमराजीन्तन्वीं चार्वायतांशुभाम् ॥ २९ ॥ ज्याम्पुष्पधनुषःकामः षट्पदावलिसंभृताम् ॥ विसस्मार च यस्मात्तां विगृह्यैनान्निरीक्षते ॥ ३० ॥ गम्भीरनाभिरन्ध्रान्तश्चतुः पार्श्वत्वगावृताम् ॥ आननाब्जेक्षणद्वन्द्वमारक्तकमलय्यँथा ॥ ३१ ॥ क्षीणा मध्येन वपुषा निसर्गाष्टापदप्रभा ॥ रत्नवेदीव[2] ददृशे कामेन द्विजसत्तमाः ॥ ३२ ॥ रम्भास्तम्भायतास्निग्धन्तदूरुयुगलं मृदु ॥ निज शक्तिसमंकामो वीक्षाञ्चक्रे मनोहरम् ॥ ३३ ॥ आरक्तपार्ष्णिपादाग्रप्रान्तभागम्पदद्वयम् ॥ अनुरागमिवामेने स्थितन्तस्याम्मनोभवः ॥ ३४ ॥ तस्याः करयुगं रक्तनखरैः किंशुकोपमैः ॥ वृताभिरङ्गुलीभिश्च सक्ष्माग्राभिर्मनोहरम् ॥ ३५ ॥ इति दृष्ट्वा स्मरो मेने ममास्त्रै र्द्विगुणीकृतैः ॥ माम्मोहयितुमुद्युक्ता किमेषा द्विजसत्तमाः ॥ ३६ ॥ तद्बाहुयुगलङ्कान्तम्मृडाल[3]युगलायतम् ॥ मृदुस्निग्धं रराजातिकान्ति तोयप्रवाहवत् ॥ ३७ ॥ नीलनीरदसंकाशः केशपाशो मनोहरः ॥ चमरीबालभरवद्विभाति स्म स्मरप्रियः ॥ ३८ ॥ ताव्वीक्ष्य मदनो देवीं रतीमतिमनोहराम् ॥ कान्तितोयौघसम्पूर्णाङ्कचवक्राब्जकुड्मलाम् ॥ ३९ ॥ वक्रपद्माञ्चारुबाहुमृडालीशकलान्विताम् ॥ भ्रूयुग्मविभ्रमत्रा ततनूर्म्मिपरिराजिताम् ॥ ४० ॥ कटाक्षपातभृङ्गौघान्नेत्रनीलोत्पलान्विताम् ॥ तनुलोमालिशैवालाम्मनोद्रुमविशातिनीम् ॥ ४१ ॥ निम्ननाभिह्रदान्दक्षप्रालेयाद्रिसमुद्भवाम् ॥ गंगामिव महादेवो जग्राहोत्फुल्ललोचनः ॥ ४२ ॥ उवाच च तदा दक्षंकामो मोदभरान्वितः ॥ विस्मृत्य शापञ्चतदा विधिदत्तं सुदारुणम् ॥ ४३ ॥ मदन उवाच ॥ अनया सहचारिण्या सम्यक्सुन्दररूपया ॥ समर्थो मोहितुं शम्भुं किमन्यै

१ अष्टापदःशरभः । २ रुक्मदेवीति पाठः । ३ मृणालेति पाठः ।

र्जन्तुभिर्व्विभो ॥ ४४ ॥ यत्र यत्र मया लक्ष्यंक्रियते धनुषोऽनघ ॥ तत्रानयापि चेष्टव्यम्मायया रमणाह्वया ॥ ४५ ॥ यदा देवालयय्याँ
मि पृथिवीव्वा रसातलम् ॥ तदैषाप्यस्तु सश्रीची सर्व्वदा चारुहासिनी ॥ ४६ ॥ यथा पद्मालया विष्णोर्ज्जलदानाय्यँथातडित् ॥ तथा
ममैषा भविता प्रजाध्यक्षसहायिनी ॥४७॥ ॥ मार्क्कण्डेय उवाच ॥ ॥ इत्युक्त्वा मदनो देवीं रतीञ्चग्राहसोत्सुकः ॥ सागरादुत्थिताल्लक्ष्मीं
हृषीकेश इवोत्तमाम् ॥ ४८ ॥ रराज स तया सार्द्धम्भिन्नपीतप्रभः स्मरः ॥ जीमूत इव सन्ध्यायां सौदामिन्या मनोज्ञया ॥ ४९ ॥ इति
रतिपतिरुच्चैर्म्मोदयुक्तो रतीन्तां हृदि परिजगृहेयय्योगदर्शीव विद्याम्॥रतिरपि पतिमग्र्यम्प्राप्य तोषञ्च लेभे हरिमिव कमलोत्था पूर्ण्णचन्द्रो
पमास्या ॥ ४९ ॥ इति श्रीकालिकापुराणे तृतीयोऽध्यायः ॥ ३ ॥ ॥ मार्क्कण्डेय उवाच ॥ ॥ ततःप्रभृति धातापि यदैवान्तर्हितःपुरा ॥
चिन्तयामास सततं शम्भुवाक्यविषार्द्दितः ॥ १ ॥ कान्ताभिलाषमात्रम्मे दृष्ट्वा शम्भुरगर्हयत् ॥ मुनीनाम्पुरतः कस्मात्सदारान्संग्राहिष्यति
॥ २ ॥ का वा भविन्नी तज्जाया काचतन्मनसि स्थिता ॥ योगमार्गमवज्ञाप्य तस्य मोहं करिष्यति ॥ ३ ॥ मन्मथोपि समर्थो नो भविष्य
त्यस्य मोहने ॥ नितान्तयोगी रामाणान्नामापि सहते न सः ॥ ४ ॥ अगृहीतेषु दारेषु हरण कथमादितः ॥ मध्ये चैव भवेत्सृष्टिस्तद्द्वंधो
नान्यकारितः ॥ ५ ॥ केचिद्भविष्यन्ति भवि मया वध्या महाबलाः ॥ केचिद्विष्णोर्व्वाधनीयाः केचिच्छम्भोरुपायतः ॥ ६ ॥ संसार
विमुखे शम्भौ तथैकान्तविरागिणि ॥ अस्मादृते न कर्म्मान्यत्करिष्यति न संशयः ॥ ७ ॥ चिन्तयान्निति लोकेशो ब्रह्मा लोकपि

१ नाशः ।

तामहः ॥ पुनर्ददर्श भूमिष्ठान्दक्षादीन्वियति स्थितः ॥ ८ ॥ रतिद्वितीयम्मदनम्मोदयुक्तान्निरीक्ष्य च ॥ पुनस्तत्र गतः प्राह सा
न्त्वयन्पुष्पसायकम् ॥ ९ ॥ ब्रह्मोवाच ॥ अनया सहचारिण्या राजसे त्वम्मनोभव ॥ एषा च भवता पत्या युक्ता संशोभते भृ
शम् ॥ १० ॥ यथा श्रिया हृषीकेशो यथा तेन हरिप्रिया ॥ क्षणदा विधुना युक्ता तया युक्तो यथा विधुः ॥ ११ ॥ तथैव युवयोःशोभा
दाम्पत्यञ्च पुरस्कृतम् ॥ अतस्त्वञ्जगतः केतुर्विश्वकेतुर्भविष्यसि ॥ १२ ॥ जगद्धिताय वत्स त्वम्मोहयस्व पिनाकिनम् ॥ यथासुखमनाः
शम्भुःकुर्य्याद्दारपरिग्रहम् ॥ १३ ॥ विजने स्निग्धदेशे च पर्व्वतेषु सरित्सु च ॥ यत्र यत्र प्रयातीशस्तत्र तत्रानया सह ॥ १४ ॥ मोहयस्व
यतात्मानँव्वनिताविमुखं हरम् ॥ त्वदृते विद्यते नान्यःकश्चिदस्य विमोहकः ॥ १५ ॥ भूते हरे सानुरागे भवतोपि मनोभव ॥ शापोपशा
न्तिर्भविता तस्मादात्महितङ्कुरु ॥ १६ ॥ सानुरागो वरारोहाय्यँदीच्छति मनोभव ॥ तदा तवोपभोगाय स त्वां सम्भावयिष्यति ॥ १७ ॥
तस्माज्जगद्धिताय त्वय्यँतस्व हरमोहने ॥ शिवस्य भवकेतुस्त्वम्मोहयित्वा महेश्वरम् ॥ १८ ॥ ॥ मार्क्कण्डेय उवाच ॥ ॥ इति श्रुत्वा
वचस्तस्य ब्रह्मणः परमात्मनः ॥ उवाच मन्मथस्तथ्यम्ब्रह्माणञ्जगतो हितम् ॥ १९ ॥ मन्मथ उवाच ॥ करिष्येऽहन्तव विभो वचनाच्छ
म्भुमोहनम् ॥ किन्तु योषिन्महास्त्रम्मे तत्र कान्ताम्प्रभो सृज ॥ २० ॥ मया सम्मोहिते शम्भौ यया तस्यानुमोहनम् ॥ कार्य्यन्मनोरमां
रामान्तान्निदेशय लोकभृत् ॥ २१ ॥ तामहन्ब्रूहि पश्यामि यया तस्यानुमोहनम् ॥ कर्त्तव्यमधुना धातस्तत्रोपायन्तथा कुरु ॥ २२ ॥

॥ मार्कण्डेय उवाच ॥ ॥ एवंवादिनि कन्दर्प्पे धाता लोकपितामहः ॥ कुर्य्यां सम्मोहनीयँयोषामिति चिन्ताञ्जगामह ॥ २३ ॥ चिन्ता विष्टस्य तस्याथ निःश्वासो यो विनिःसृतः ॥ तस्माद्वसन्तः सञ्जातः पुष्पवातविभूषितः ॥ २४॥ चूतांकुरान्मुकुलितान्बिभ्रद्भ्रमरसंहतिम् ॥ किंशुकान्त्सारसान्त्रेजे प्रफुल्ल इव पादपः ॥ २५ ॥ शोणराजीवसंकाशः फुल्लतामरसेक्षणः ॥ सन्ध्योदिताखण्डशशिप्रतिमास्यः सुनासिकः ॥ २६ ॥ शङ्खवच्छ्रवणावर्त्तः श्यामकुञ्चितमूर्द्धजः ॥ सन्ध्यांशुमालिसदृशकुण्डलद्वयमण्डितः ॥ २७ ॥ प्रमत्तमातंगगतिर्व्विस्तीर्णहृदयस्थलः ॥ पीनस्थूलायतभुजः कठोरकरयुग्मकः ॥ २८ ॥ सुवृत्तोरुकटीजंघः कम्बुग्रीवोन्नतांसकः ॥ गूढजत्रुः पीनवक्षाः सम्पूर्णः सर्व्वलक्षणैः ॥ २९ ॥ तादृशेऽथ समुत्पन्ने सम्पूर्णे कुसुमाकरे ॥ ववौ वायुः ससुरभिः पादपा अपि पुष्पिताः ॥ ३० ॥ पिकाश्च नेदुः शतशः पञ्चमम्मधुरस्वराः ॥ प्रफुल्लपद्मा अभवन्त्सरस्यः पुष्टपुष्कराः ॥ ३१ ॥ तमुत्पन्नमवेक्ष्याथ तथाभूशमुशत्तमम् ॥ हिरण्यगर्भो मदनञ्जगाद मधुरव्वँचः ॥ ३२ ॥ ब्रह्मोवाच ॥ एष मन्मथ ते मित्रं सदा सहचरोऽभवेत् ॥ आनुकूल्यन्तव कृतौ सर्व्वदैव करिष्यति ॥ ३३ ॥ यथाग्नेः श्वसनो मित्रं सर्व्वत्रोपकरोति च ॥ तथायम्भवतो मित्रं सदा त्वामनुयास्यति ॥ ३४ ॥ वसते बंतहेतुत्वाद्वसन्ताख्यो भवत्वयम् ॥ तवानुगमनं कर्म्म तथालोकानुरञ्जनम् ॥ ३५ ॥ असौ वसन्ते शृंगारो वसन्ते मलयानिलः ॥ भवन्तु सुहृदो भावाः सदा त्वद्वशवर्तिनः ॥ ३६ ॥ विव्वोकाद्यास्तथा हावाश्चतुःषष्टिकलास्तथा ॥ कुर्व्वन्तु रत्याः सौहृद्यं सुहृदस्ते यथा तव ॥ ३७ ॥ एभिः सहचरैः काम वसन्तप्रमु

१ खेदहेतुत्वादित्यर्थः ।

खैर्भवान् ॥ अनया सहचारिण्या त्वय्युक्तः परिवारया ॥ ३८ ॥ मोहयस्व महादेवङ्कुरु सृष्टिं सनातनीम् ॥ यथेष्टदेशङ्गच्छत्वं सर्व्वैः
सहचरैर्व्वृतः ॥ ३९ ॥ अहन्ताम्भावयिष्यामि या हरम्मोहयिष्यति ॥ एवमुक्तोऽथ मदनः सुरज्येष्ठेन हर्षितः ॥ ४० ॥ जगाम सगणस्तत्रस
पत्न्यनुचरस्तदा ॥ दक्षम्प्रणम्य तान्त्सर्व्वान्मानसानभिवाद्य च ॥ ४१ ॥ यत्रास्ति शम्भुर्ग्गतवाँस्तत्स्थानम्मन्मथस्तदा ॥ तस्मिन्गते
सानुचरेऽथ मन्मथे शृंगारभावादियुते द्विजोत्तमाः ॥ प्रोवाच दक्षम्मधुरम्पितामहः सार्द्धम्मरीच्यत्रिमुखैर्म्मुनीश्वरैः ॥ ४२ ॥ इति श्रीका
लिकापुराणे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ मार्क्कण्डेय उवाच ॥ ॥ अथ ब्रह्मा तदोवाच दक्षाय सुमहात्मने ॥ मरी
चिप्रमुखेभ्यश्च वचनञ्चेदमञ्जसा ॥ १ ॥ ब्रह्मोवाच ॥ भवित्री शम्भुपत्नी का का तं सम्मोहयिष्यति ॥ इति सञ्चिन्तयन्कान्तान्न
स्थिरीकर्त्तुमुत्सहे ॥ २ ॥ विष्णुमायामृते दक्षमहामायाञ्जगन्मयीम् ॥ नान्या तन्मोहकर्त्री स्यात्सन्ध्यासावित्र्युमामृते ॥ ३ ॥ तस्मादहँ
व्विष्णुमायाय्योगनिद्राञ्जगत्प्रसूम् ॥ स्तौमि सा चारुरूपेण शङ्करम्मोहयिष्यति ॥ ४ ॥ भवाँस्तु दक्ष तामेव यजताँव्विश्वरूपिणीम् ॥ यथा
तव सुता भूत्वा हरजाया भविष्यति ॥ ५ ॥ ॥ मार्क्कण्डेय उवाच ॥ ॥ एवव्वँचनमाकर्ण्य ब्रह्मणः परमात्मनः ॥ उवाच दक्षः स्रष्टार
म्मरीच्यादिभिरीरितः ॥ ६ ॥ दक्ष उवाच ॥ यथात्थ भगवस्तँथ्यन्त्वल्लोकेश जगद्धितम् ॥ तत्करिष्यामहे सम्यग्यथा स्यात्तन्मनोहरा
॥ ७ ॥ तथा तथा यातिष्यामि यथा मम सुता स्वयम् ॥ विष्णुमाया भवेत्पत्नी भूत्वा शम्भोर्म्महात्मनः ॥ ८ ॥ मार्क्कण्डेय उवाच ॥ एव
मेवेति तैरुक्तम्मरीचिप्रमुखैस्तदा ॥ यष्टन्दक्षः समारेभे महामायाञ्जगन्मयीम् ॥ ९ ॥ क्षीरोदोत्तरतीरस्थस्तान्ङ्कृत्वा हृदयस्थिताम् ॥

तपस्तप्तुं समारेभे द्रष्टुम्प्रत्यक्षतोम्बिकाम् ॥ १० ॥ दिव्यवर्षेण दक्षोपि सहस्राणान्त्रयं समाः ॥ तपश्चचार नियतः सय्यँतात्मा दृढव्रतः
॥ ११ ॥ मारुताशी निराहारो जलाहारीच पर्ण्णभुक् ॥ एवन्निनाय तत्कालञ्चिन्तयँस्ताञ्जगन्मयीम् ॥ १२ ॥ गते दक्षे तपः कर्त्तुम्ब्रह्मा
सर्व्वजगत्पतिः ॥ जगाम मन्दराभ्याशम्पुण्यात्पुण्यतरम्वरम्॥ १३॥तत्रतत्र जगद्धात्रीँ व्विष्णुमायाञ्जगन्मयीम् ॥ तुष्टाव वाग्भिरुग्राभिरेक
तानं शतं समाः ॥ १४ ॥ ब्रह्मोवाच ॥ विद्याविद्यात्मिकां शुद्धान्निरालम्बान्निराकुलाम् ॥ स्तौमि देवीञ्जगद्धात्रीं स्थूलाणीयःस्वरूपिणीम्
॥१५॥ यस्या उदेति च जगत्प्रधानाख्यञ्जगत्परम्॥यस्यास्तदंशभूतन्ताँस्तौमि निद्रां सनातनीम्॥ १६॥ त्वञ्चि तिः परमानन्दपरमात्मस्वरूपि
णी ॥शक्तिस्त्वं सर्व्वभूतानान्त्वं सर्व्वेषाञ्च पाविनी॥ १७॥त्वं सावित्रीजगद्धात्री त्वं सन्ध्या त्वंरतिर्द्धृतिः॥त्वं हि ज्योतिःस्वरूपेण संसारस्य प्रका
शिनी॥ १८॥तथा तमःस्वरूपेण छादयन्ती सदा जगत्॥त्वमेव सृष्टिरूपेण संसारपरिपूरणी॥ १९॥ स्थितिरूपेण च हरेर्ज्जगताञ्च हितैषिणी॥तथै
वान्तस्वरूपेण जगतामन्तकारिणी॥ २०॥त्वम्मेधा त्वम्महामाया त्वं स्वधा पितृमोदिनी॥त्वं स्वाहा त्वन्नमस्कारवषट्कारौ तथास्मृतिः॥ २१॥
त्वम्पुष्टिस्त्वन्धृतिर्मैत्री करुणा मुदिता तथा ॥ त्वमेव लज्जा त्वं शान्तिस्त्वंकान्तिर्ज्जगदीश्वरी ॥ २२ ॥ महामाया त्वं च स्वाहा स्वधाच
पितृदेवता ॥ या सृष्टिशक्तिरस्माकं स्थितिशक्तिश्च या हरेः ॥ २३ ॥ अन्तशक्तिस्तथैशानी सा त्वं शक्तिः सनातनी ॥ एका त्वन्द्विविधा
भूत्वा मोक्षसंसारकारिणी ॥ २४ ॥ विद्याविद्यास्वरूपेण स्वप्रकाशा प्रकाशतः ॥ त्वल्लँक्ष्मीः सर्वभूतानान्त्वञ्छाया त्वं सरस्वती ॥ २५ ॥
त्रयीमयी त्रिमाता त्वन्त्वञ्चतुःस्वररूपिणी ॥ उद्गीतिः सामवेदस्य या पितृगणरञ्जनी ॥२६॥ त्वँव्वेदिःसर्व्वयज्ञानां सामिधेनी तथा हविः ॥

यदव्यक्तमनिर्देश्यन्निष्कलम्परमात्मनः ॥ २७ ॥ रूपन्तथैव तन्मात्रंसकलञ्च जगन्मयम् ॥ यामूर्तिर्व्विततां सर्व्वधारित्रीम्बिभ्रती क्षिति
म् ॥ २८ ॥ सा त्वँव्विश्वम्भरे लोके शक्तिभूतिप्रदा सदा ॥ त्वल्लँक्ष्मीश्चेतना कान्तिस्त्वम्पुष्टिस्त्वं सनातनी ॥ २९ ॥ त्वंकालरात्रिस्त्व
म्मुक्तिः शान्तिः प्रज्ञा तथा धृतिः॥संसारसागरोत्तारतरणिः सुखमोक्षदे ॥३०॥ प्रसीद सर्व्वजगतान्त्वंगतिस्त्वम्मतिः सदा॥ त्वन्नित्या त्वम
नित्या च त्वञ्चराचरमोहिनी ॥३१॥ त्वं सन्धिनी सर्व्वयोगसांगोपांगविभाविनी ॥ चिन्ताकीर्त्तिर्य्यतीनान्त्वन्त्वन्तदष्टांगसयँयुता ॥३२॥
त्वङ्खड्गिनी शूलिनी च चक्रिणी घोररूपिणी ॥ त्वमीश्वरी जनानान्त्वंसर्व्वानुग्रहकारिणी ॥ ३३ ॥ विश्वादिस्त्वमनादिस्त्वँव्विश्वयो
निरयोनिजा ॥ अनन्ता सर्व्वजगतस्त्वमेवैकान्तकारिणी ॥ ३४ नितान्तनिर्म्मला त्वंहि तामसीति च गीयसे ॥ त्वं हिंसा त्वमहिंसा च
त्वंकाली चतुराननी ॥ ३५ ॥ त्वम्परा सर्व्वजननी दमनी दामिनी तथा ॥ त्वय्येव लीयते विश्वम्भाति तत्तद्विभर्त्ति च ॥ ३६ ॥ त्वं
सृष्टिहीना त्वं सृष्टिस्त्वमकर्ण्णापि सश्रुतिः ॥ तरस्विनीपाणिपादहीना त्वन्नितरांग्रहा ॥ ३७ ॥ त्वन्द्यौस्त्वमापस्त्वंज्योतिर्व्वायुस्त्वञ्च नभो
मनः ॥ अहंकारोपि जगतामष्टधा प्रकृतिःकृतिः ॥ ३८ ॥ जगंन्नाभिर्मेरुरूपधारिणी नालिकापरा ॥ परापरात्मिका शुद्धा मायामोहातिका
रिणी ॥ ३९ ॥ कारणंकार्य्यभूतञ्च सत्यं शान्तं शिवाशिवे ॥ रूपाणि तव विश्वार्थे रागवृक्षफलानि च ॥ ४० ॥ नितान्तह्रस्वा
दीर्घा च नितान्ताणुबृहत्तनुः ॥ सूक्ष्माप्यखिललोकस्य व्यापिनी त्वञ्जगन्मयी ॥ ४१ ॥ मानहीना विमानातिविमानोन्मानसम्भवा ॥
यदृष्टिव्यष्टिसम्भोगरागादिगलिताशया ॥ ४२ ॥ तत्ते महिम्नि तद्रूपन्तव भ्रान्त्यादिकञ्च यत् ॥ इष्टानिष्टविपाकज्ञा यथेष्टानिष्टकारणम् ॥

॥ ४३ ॥ सर्गादिमध्यान्तमयान्निर्म्मरूपम्तथैव च ॥ विचाराद्यांगयोगेन सम्पाद्यैवम्मुहुर्म्मुहुः ॥ ४४ ॥ यत्स्थिरीक्रियते तत्त्वन्तत्ते रूपं सनातनम् ॥ बाह्याबाह्ये सुखन्दुःखञ्ज्ञानाज्ञाने लयालयौ ॥ ४५ ॥ उपतापस्तथा शान्तिर्भूतिस्त्वञ्जगतःपतेः ॥ यस्य प्रभावन्नो वक्तुं शक्नोति भुवनत्रये ॥ ४६ ॥ तस्यैवं सम्मोहकरी सा त्वंकिं स्तूयसे मया ॥ योगनिद्रा महानिद्रा मोहनिद्रा जगन्मयी ॥ ४७ ॥ विष्णुमाया च प्रकृतिः कस्त्वां स्तुत्या विभावयेत् ॥ ममविष्णोः शंकरस्य या वपुर्व्वहनात्मिका ॥ ४८ ॥ तस्याःप्रभावंको वक्तुंगुणान्वेत्तुञ्च कःक्षमः ॥ प्रकाशकरणज्योतिःस्वरूपान्तरगोचरा ॥४९ ॥ त्वमेव जङ्गमस्थेयरूपैका बाह्यगोचरा ॥ प्रसीद सर्व्वजगताञ्जननी स्त्रीस्वरूपिणी ॥ विश्वरूपिणि विश्वेशे प्रसीद त्वं सनातनि ॥ ५० ॥ ॥ मार्कण्डेय उवाच ॥ ॥ एवं संस्तूयमाना सा योगनिद्रा विरञ्चिना ॥ ५१ ॥ आविर्व्वभूव प्रत्यक्षम्ब्रह्मणः परमात्मनः ॥ स्निग्धाञ्जनद्युतिश्चारुरूपोत्तुंगा चतुर्भुजा ॥ ५२ ॥ सिंहस्था खड्गनीलाब्जहस्ता मुक्तकचोत्करा ॥ समक्षमथ ताँव्वीक्ष्य स्रष्टा सर्व्वजगद्गुरुः ॥ ५३ ॥ भक्त्या विनम्रतुंगांसस्तुष्टाव च ननाम च ॥ ५४ ॥ ब्रह्मोवाच ॥ नमो नमस्ते जगतः प्रवृत्तिनिवृत्तिरूपे स्थितिसर्ग्गरूपे ॥ चराचराणाम्भवती च शक्तिः सनातनी सर्व्वविमोहनीति ॥ ५५ ॥ याश्रीः सदा केशवमूर्तिमाया विश्वम्भरा या सकलम्बिभर्ति ॥ ह्रीर्य्योगिनी या महिता मनोज्ञा सात्वन्नमस्ते परमार्थसारे ॥ ५६ ॥ यमादिपूते हृदि योगिनो यांविभावयन्ति प्रमितिप्रतीताम् ॥ प्रकाशशुद्धादियुताँव्विरागां सा त्वं हि विद्या विविधा बलँव्वा ॥ ५७ ॥ कूटस्थमव्यक्तमचिन्त्यरूपन्त्वम्बिभ्रतीकालमयञ्जगन्ति ॥ विकारबीजम्प्रकरोषि नित्यम्प्रत्नानि न्यूनान्यथ मध्यमानि ॥ ५८ ॥ सत्त्वं रजोथो तम इत्य

१ प्रत्नानिपुरातनानिश्रेष्ठानीतियावत् ।

मीपाँव्विकारहीना समवस्थितिर्य्या ॥ सा त्वङ्गुणानाञ्जगदेकहेतुर्ब्बाह्यान्तरालम्भवतीव याति ॥ अशेषजगताम्बीजे ज्ञेयज्ञानस्वरूपिणि
॥ ५९ ॥ जगद्धिताय जगताँव्विष्णुमाये नमोस्तुते ॥ ॥ मार्क्कण्डेय उवाच ॥ ॥ इत्याकर्ण्य्य वचस्तस्य काली लोकविमोहिनी
॥ ६० ॥ ब्रह्माणमूचे जगतां स्रष्टारङ्घनशब्दवत् ॥ ॥ देव्युवाच ॥ ब्रह्मन्किमर्थम्भवता स्तुताहमवधारय ॥ ६१ ॥ उच्यताय्यँदधृ
ष्योस्ति तच्छीघ्रम्पुरतो मम ॥ प्रत्यक्षम्मयि जातायां सिद्धिः कार्य्यस्य निश्चिता ॥ ६२ ॥ तस्मात्तेवाञ्छितम्ब्रूहि यत्करिष्यामि भाविता ॥
॥ ब्रह्मोवाच ॥ ॥ एकश्चरति भूतेशो न द्वितीयां समीहते ॥ ६३ ॥ तम्मोहय यथा दारान्त्स्वयं स च जिघृक्षति ॥ त्वदृते तस्य
नो काचिद्भविष्यति मनोहरा ॥ ६४ ॥ तस्मात्त्वमेकरूपेण भवस्य भव मोहनी ॥ यथा धृतशरीरा त्वल्लँक्ष्मीरूपेण केशवम् ॥ ६५॥ आमो
दयासि विश्वस्य हितायैतन्तथा कुरु ॥ कान्ताभिलाषमात्रम्मे निनिन्द वृषभध्वजः ॥ ६६ ॥ कथम्पुनः सवनितां स्वेच्छया संग्रहिष्यति ॥
हरेऽगृहीतकान्ते तु कथं सृष्टिः प्रवर्त्तते ॥ ६७ ॥ आद्यन्तमध्यहेतौ च तस्मिञ्छम्भौ विरागिणि ॥ इति चिन्तापरो नाहं त्वदन्यं शरण
न्त्विह ॥ ६८ ॥ लब्धवाँस्तेन विश्वस्य हितायैतत्कुरुष्व मे ॥ नविष्णुरस्य मोहाय न लक्ष्मीर्न्न मनोभवः ॥ ६९ ॥ न चाप्यहञ्जगन्मात
स्तस्मात्त्वम्मोहयेश्वरम् ॥ कीर्तिस्तु सर्वभूतानाय्यँथा त्वं ह्रीय्यतात्मनाम् ॥ ७० ॥ यथा विष्णोः प्रियैका त्वन्तथा सम्मोहयेश्वरम् ॥ मार्क्क
ण्डेय उवाच ॥ अथ ब्रह्माणमाभाष्य काली योगमयी पुनः ॥ ७१ ॥ यदुवाच महाभागास्तच्छृण्वन्तुद्विजोत्तमाः ॥ ७३ ॥ इति का
लिकापुराणे पञ्चमोध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ देव्युवाच ॥ ॥ यदुक्तम्भवता ब्रह्मन्त्समस्तं सत्यमेव तत् ॥ मद्दते मोहयित्रीह शंक

रस्य न विद्यते ॥ १ ॥ हरेऽगृहीतदारे तु सृष्टिर्नैषा सनातनी ॥ भविष्यतीति तत्सत्यम्भवता प्रतिपादितम् ॥ २ ॥ ममापिचमहा
न्यत्नो विद्यतेस्य जगत्पतेः ॥ त्वद्वाक्याद्विगुणो मेद्य प्रयत्नोभूत्सुनिर्भरः ॥ ३ ॥ अहन्तथा यतिष्यामि यथा दारपरिग्रहम् ॥ हरः करि
ष्यत्यवशः स्वयमेव विमोहितः ॥ ४ ॥ चार्व्वीम्मूर्तिमहन्धृत्वा तस्यैव वशवर्तिनी ॥ भविष्यामि महाभाग यथा विष्णोर्हरिप्रिया ॥ ५ ॥
यथा सोपि ममैवेह वशवर्ती सदा भवेत् ॥ तथा चाहंकरिष्यामि यथेतरजनं हरम् ॥ ६ ॥ प्रतिसर्ग्गादिमध्यन्तमहं शम्भुन्निराकुलम् ॥
स्त्रीरूपेणानुयास्यामि विशेषेणान्यतो विधे ॥ ७ ॥ उत्पन्ना दक्षजायायाश्चारुरूपेणशंकरम् ॥ अहं सभाजयिष्यामि प्रतिसर्ग्गम्पितामह
॥ ८ ॥ ततस्तु योगनिद्राम्माँव्विष्णुमायाञ्जगन्मयीम् ॥ शांकरीति वदिष्यन्ति रुद्राणीति दिवौकसः ॥ ९ ॥ उत्पन्नमात्रं सततम्मोहये
प्राणिनय्यँथा ॥ तथा सम्मोहयिष्यामि शंकरम्प्रमथाधिपम् ॥ १० ॥ यथान्यजन्तुरवनौ वर्त्तते वनितावशे ॥ ततोप्यतिहरो वामावशवर्त्ती
भविष्यति ॥ ११ ॥ विभिद्य भुवनाधीनां लीनांस्वहृदयान्तरे ॥ माँव्विद्याञ्च महादेवो मोहात्प्रतिग्रहिष्यति ॥ १२ ॥ ॥ मार्कण्डेय
उवाच ॥ इति तस्मै समाभाष्य ब्रह्मणे द्विजसत्तमाः ॥ वीक्ष्यमाणा जगत्स्रष्टा तत्रैवान्तर्द्दधे ततः ॥ १३ ॥ तस्यामन्तर्हितायान्तु धाता
लोकपितामहः ॥ जगाम तत्र भगवान्स्थितो यत्र मनोभवः ॥ १४ ॥ मुदितोत्यर्थमभवन्महामायावचः स्मरन् ॥ कृतकृत्यन्तदात्मान
म्मेने च मुनिपुंगवः ॥ १५ ॥ अथ दृष्ट्वा महात्मानँव्विरिञ्चिम्मदनस्तथा ॥ गच्छन्तं हंसयानेन चाभ्युत्तस्थौ त्वरान्वितः ॥ १६ ॥ आस
न्नन्तमथासाद्य हर्षोत्फुल्लविलोचनः ॥ ववन्दे सर्वलोकेशम्मोदयुक्तम्मनोभवः ॥ १७ ॥ अथाह भगवान्धाता प्रीत्या मधुरगद्गदम् ॥ मदन

म्मोदयन्त्सूक्तय्यँदेव्या विष्णुमायया ॥ १८ ॥ ब्रह्मोवाच ॥ यदाह वत्स शर्व्वस्य मोहने त्वम्पुरा वचः ॥ अनुमोहनकर्त्री या तां सृजेति मनोभव ॥ १९ ॥ तदर्थंसंस्तुता देवी योगनिद्रा जगन्मयी ॥ एकतानेन मनसा मया मन्दरकन्दरे ॥ २० ॥ स्वयमेव तया वत्स प्रत्यक्षीभूतया मम ॥ तुष्टयांऽगीकृतं शम्भुम्मोहनीयो मयेति वै ॥ २१ ॥ तया चदक्षभवने स समुत्पन्नया हरः ॥ मोहनीयस्तु न चिरादिति सत्यम्मनोभव ॥ २२ ॥ मदन उवाच ॥ ब्रह्मन्का योगनिद्रेति विख्यातायाजगन्मयी ॥ कथन्तया हरो वश्यः कार्य्यस्तपसि संस्थितः ॥ ॥ २३ ॥ किम्प्रभावाथ सा देवी का वा सा कुत्र संस्थिता ॥ तदहं श्रोतुमिच्छामि त्वत्तो लोकपितामह ॥ २४ ॥ यस्य त्यक्तसमाधेस्तु न क्षणन्दृष्टिगोचरे ॥ शक्नुमोपि वयं स्थातुन्तंकस्मात्सा विमोहयेत् ॥ २५ ॥ ज्वलदग्निप्रकाशाक्षञ्जटाराजिकरालितम् ॥ शूलिनञ्वीक्ष्य कः स्थातुम्ब्रह्मञ्छक्नोति तत्पुरः ॥ २६ ॥ तस्य तादृक्स्वरूपस्य सम्यङ्मोहनवाञ्छया ॥ ययाभ्युपेतन्तां श्रोतुमहमिच्छामि तत्त्वतः ॥२७॥ ॥ मार्कण्डेय उवाच ॥ ॥ मनोभवस्य वचनं श्रुत्वाऽथ चतुराननः ॥ विवक्षुरपि तद्वाक्यं श्रुत्वा उत्साहकारकम् ॥ २८ ॥ शर्व्वस्य मोहने ब्रह्मा चिन्ताविष्टोभवन्नहि ॥ समर्थो मोहितुमिति निश्वास मुहुर्म्मुहुः ॥ २९ ॥ निःश्वासमारुतात्तस्य नानारूपा महाबलाः ॥ जाता गणा लोलजिह्वा लोलाश्चातिभयंकराः ॥ ३० ॥ तुरङ्गवदनाः केचित्केचिद्गजमुखास्तथा ॥ सिंहव्याघ्रमुखाश्चान्ये श्ववराहखराननाः ॥ ३१ ॥ ऋक्षमार्ज्जारवदनाः शरभास्याः शुकाननाः ॥ प्लवगोमायुवक्त्राश्च सरीसृपमुखाः परे ॥ ३२ ॥ गोरूपा गोमुखाः केचित्तथा पक्षिमुखाः परे ॥ महादीर्घा महाह्रस्वा महास्थूला महाकृशाः ॥ ३३ ॥ पिङ्गाक्षा विरलाक्षाश्च त्र्यक्षैकाक्षा महोदराः ॥ एककर्ण्णास्त्रिकर्ण्णाश्च

चतुःकर्ण्णास्तथा परे ॥ ३४ ॥ स्थूलकर्ण्णा महाकर्ण्णा बहुकर्ण्णा विकर्ण्णकाः ॥ दीर्घाक्षाः स्थूलनेत्राश्च सूक्ष्मनेत्रा विदृष्टयः ॥ ३५ ॥ चतुष्पादाः पञ्चपादास्त्रिपादैकपदास्तथा ॥ ह्रस्वपादा दीर्घपादाः स्थूलपादा महापदाः ॥३६॥ एकहस्ताश्चतुर्हस्ता द्विहस्तास्त्रिशंयास्तथा ॥ विहस्ताश्च विरूपाक्षा गोधिकाकृतयः परे ॥ ३७ ॥ मनुष्याकृतयः केचिच्छिशुमारमुखास्तथा ॥ क्रौञ्चाकारा बकाकारा हंससारसरूपिणः ॥ ३८ ॥ तथैव मद्गुकुररकंककाकमुखास्तथा ॥ अर्द्धनीला अर्द्धरक्ताः कपिलाः पिङ्गलास्तथा ॥ ३९ ॥ नीलाः शुक्लास्तथापीता हरिताश्चित्ररूपिणः ॥ अवादयन्त ते शङ्खान्पटहान्परिवादिनः ॥ ४० ॥ मृदङ्गाण्डिण्डिमाँश्चैव गोमुखान्पणवाँस्तथा ॥ सर्व्वे जटाभिः पिङ्गाभिस्तुङ्गाभिश्च करालिताः॥४१॥निरन्तराभिर्व्विप्रेन्द्रा गणाः स्यन्दनगामिनः॥शूलहस्ताः पाशहस्ताः खड्गहस्ता धनुर्द्धराः॥४२॥ शक्त्यंकुशगदाबाणपट्टिशप्रासपाणयः ॥ नानायुधा महानादंकुर्व्वन्तस्ते महाबलाः ॥४३॥ मारय छेदयेत्यूचुर्ब्रह्मणः पुरतो गताः ॥ तेषान्तु वदतान्तत्र मारयछेदयेत्युत॥४४॥ योगनिद्राप्रभावान्त्स विधिर्व्वक्तुम्प्रचक्रमे॥अथ ब्रह्माणमाभाष्य तान्दृष्ट्वा मदनो गणान्॥४५॥ उवाच वारयन्वक्तुंगणानामग्रतःस्मरः ॥ मदन उवाच ॥ किंकर्म्मैते करिष्यन्ति कुत्र स्थास्यन्ति वा विधे ॥ ४६ ॥ किन्नामधेया एते वा तत्रैतान्विनियोजय ॥ नियोज्यैतान्निजे कृत्ये स्थानन्दत्त्वा च नाम च ॥ ४७ ॥ कृत्वा पश्चान्महामायाप्रभावंकथयस्व मे ॥ मार्कण्डेय उवाच ॥ अथ तद्वाक्यमाकर्ण्य सर्व्वलोकपितामहः ॥ ४८ ॥ गणान्त्समदनानाह तेषांकर्म्मादिकन्दिशन् ॥ ब्रह्मोवाच ॥ एत उत्पन्नमात्रा हि

१ विहस्ता इत्यर्थः ।

मारयेत्यवदँस्तराम् ॥ ४९ ॥ मुहुर्म्मुहुरतोमीषान्नाम मारेति जायताम् ॥ मारात्मकत्वादप्येते माराः सन्तुच नामतः ॥ ५० ॥ सदा विघ्न
ङ्करिष्यन्ति,जन्तूनाञ्च विनार्च्चनम्॥तवानुगमनंकर्म्म मुख्यमेषाम्मनोभव॥५१॥यत्र यत्र भवाय्यँातास्वकर्म्मार्थयँयदायदा॥गन्तारस्तत्रतत्रैते
साहाय्याय तदातदा॥५२॥चित्तोद्भ्रान्तिकरिष्यन्ति त्वदस्त्रवशवर्त्तिनाम्॥ज्ञानिनाञ्ज्ञानमार्ग्गञ्च विघ्नयिष्यंति सर्व्वदा ॥५३॥यथा सांसारिकं
कर्म्म सर्व्वे कुर्व्वन्ति जन्तवः॥तथा चैते करिष्यन्तिसविघ्नमपि सर्व्वतः॥५४॥इमे स्थास्यन्ति सर्व्वत्र वेगिनःकामरूपिणः॥त्वमेवैषांगणाध्यक्षः
पञ्चयज्ञांशभोगिनः॥५५॥नित्यक्रियावतान्तोयभोगिनो वै भवन्त्विति॥५६॥मार्कण्डेय उवाच ॥ इति श्रुत्वा तु ते सर्व्वे मदनं सविधिन्ततः
॥ ५७ ॥ परिवार्य्य यथा कामन्तस्थुः श्रुत्वा निजांगतिम् ॥ तेषाव्वँर्णयितुं शक्यो भुवि किम्मुनिसत्तमाः ॥ ५८ ॥ माहात्म्यञ्च प्रभा
वञ्च ते तपःशालिनो यतः ॥ नैषाञ्चाया न तनया निःसमीहाः सदैव हि ॥ ५९ ॥ न्यासिनोपि महात्मानः सर्व्वे ते ऊर्द्ध्वरेतसः ॥
अतो ब्रह्मा प्रसन्नः स माहात्म्यम्मदनाय च ॥६०॥ गदितुँय्योगनिद्रायाः सम्यक्समुपचक्रमे ॥ ब्रह्मोवाच ॥ ॥ अव्यक्तव्यक्तरूपेण रजः
सत्त्वतमोगुणैः ॥ ६१ ॥ विभज्य यार्थंकुरुते विष्णुमायेति सोच्यते ॥ यानिम्नान्तस्थलाम्भःस्था जगदण्डकपालतः ॥ ६२ ॥ विभज्य
पुरुषँय्याति योगनिद्रेतिसोच्यते ॥ मन्त्रान्तर्भावनपरा परमानन्दरूपिणी ॥ ६३ ॥ योगिनां सत्त्वविद्यान्तः सा निगद्या जगन्मयी ॥
गर्भान्तइर्ज्ञानसम्पन्नम्प्रेरितं सूतिमारुतैः ॥ ६४ ॥ उत्पन्नञ्ज्ञानरहितंकुरुते या निरन्तरम् ॥ पूर्व्वातिपूर्व्वे सन्धातुं संस्कारेण नियोज्य
च ॥६५॥ आहारादौ ततोमोहं ममत्वञ्ज्ञानसंशयम् ॥ क्रोधोपरोधलोभेषु क्षिप्त्वाक्षिप्त्वा पुनःपुनः ॥६६॥ पश्चात्कामे नियोज्याशुचिन्तायु

१ निम्नं गभीरमन्तः स्थलं मध्यभागो यस्य तादृशाम्भसि स्थितां सती अण्डकपालयोर्जगद्विभज्य पुरुषँय्यातीत्यर्थः ।

क्तमहर्निशम् ॥ आमोदयुक्तव्व्यसनासक्तञ्जन्तुंकरोतिया॥६७॥महामायेतिसा प्रोक्ता तेन सा जगदीश्वरी ॥ अहंकारादिसंसक्तसृष्टिप्रभवभा
विनी ॥६८॥ उत्पत्तिरितिलोकैः सा कथ्यतेऽनन्तरूपिणी ॥ उत्पन्नमंकुरम्बीजाद्यथापो मेघसम्भवाः ॥६९॥ प्ररोहयति सा जन्तूस्तँथोत्प
न्नान्प्ररोहयेत् ॥ सा शक्तिः सृष्टिरूपा च सर्व्वेषां ख्यातिरीश्वरी ॥७०॥ क्षमा क्षमावतान्नित्यंकरुणा सा दयावताम् ॥ नित्या सा नित्यरूपेण
जगद्गर्भे प्रकाशते॥७१॥ज्योतिःस्वरूपेण परा व्यक्ताव्यक्तप्रकाशिनी ॥ सा योगिनाम्मुक्तिहेतुर्व्विद्यारूपेण वैष्णवी ॥७२॥ सांसारिकाणां
संसारबन्धहेतुर्व्विपर्य्यया ॥ लक्ष्मीरूपेण कृष्णस्य द्वितीया सुमनोहरा ॥ ७३ ॥ त्रयीरूपेण कण्ठस्था सदा मम मनोभव ॥ सर्व्व
त्रस्था सर्व्वगा दिव्यमूर्त्तिर्न्नित्या देवी सर्व्वरूपा पराख्या ॥ कृष्णादीनां सर्व्वदा मोहयित्री सा स्त्रीरूपैः सर्व्वजन्तोः समन्तात् ॥ ७४ ॥
इतिश्रीकालिकापुराणे षष्ठोऽध्यायः ॥ ६ ॥ मार्कण्डेय उवाच ॥ ॥ अथ ब्रह्मा महामायास्वरूपम्प्रतिपाद्य च ॥ मदनाय पुनः प्राह
युक्तासौ हरमोहने ॥ १ ॥ ब्रह्मोवाच ॥ विष्णुमाया महादेवो यथा दारपरिग्रहम् ॥ करिष्यति तथाकर्त्तुमंगीकारम्पुराकरोत् ॥ २ ॥
साऽवश्यन्दक्षतनया भूत्वा शम्भोर्म्महात्मनः ॥ भविष्यति द्वितीयेति स्वयमेवावदत्स्मर ॥ ३ ॥ त्वमेभिः स्वगणैः सार्द्धरत्या च मधुना
सह ॥ यथेच्छति तथा दारान्ग्रहीतुंकुरु शंकरः ॥ ४ ॥ शम्भौ गृहतिदारे तु कृतकृत्या वयं स्मर ॥ अविच्छिन्नासृष्टिरियम्भविष्यति
न संशयः ॥ ५ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ तथाब्रवीद्द्विजश्रेष्ठा लोकेशाय मनोभवः ॥ मधुरँय्यत्कृतन्तेन महादेवस्य मोहने॥६॥
मदन उवाच ॥ शृणुब्रह्मन्यथास्माभिःक्रियते हरमोहने ॥ प्रत्यक्षेवा परोक्षेवा तस्य तद्वदतो मम ॥७॥ यदा समाधिमाश्रित्य स्थितःशम्भुर्जिते

न्द्रियः ॥ तदा सुगन्धिवातेन शीतलेन विवेगिना ॥ ८ ॥ तम्वीजयामि लोकेश नित्यम्मोहनकारिणा ॥ स्वसायकांस्तथा पञ्च समादाय शरासनम् ॥ ९ ॥ भ्रमामि तस्य सविधे मोहयँस्तद्गणानहम् ॥ सिद्धद्वन्द्वानहन्तत्र रमयामि दिवानिशम् ॥ १० ॥ भावा हावाश्चते सर्व्वे प्रविशन्ति च तेषुवै ॥ मयि प्रविष्टे सविधे शम्भोः प्राणी पितामह ॥ ११ ॥ को वा न कुरुते द्वन्द्वभावन्तत्र मुहुर्म्मुहुः ॥ मम प्रवेशमात्रेण तथा[2] स्युः सर्व्वजन्तवः ॥१२॥ न शम्भुर्न्न वृषस्तस्य मानसीव्विँक्रियांगतौ ॥ यदाहि भवतःप्रस्थं सयाति प्रमथाधिपः ॥१३॥ तत्र गन्ता तदैवाहं सस्तिः समधुर्व्विधे ॥ यदा मेरुम्प्रयात्येष यदा वा नाटकेश्वम् ॥ १४ ॥ कैलासव्वँा यदा याति तत्र गच्छाम्यहन्तदा ॥ यदा त्यक्तसमाधिस्तुहरस्तिष्ठति वैक्षणम् ॥ १५ ॥ ततस्तस्य पुरश्चक्रमिथुनयँयोजयाम्यहम् ॥ तच्चक्रयुगलम्ब्रह्मन्हावभावयुतम्मुहुः ॥ १६ ॥ नानाभावेन कुरुते दाम्पत्यंक्रमसुत्तमम् ॥ नीलकण्ठानपि मुहुः सजायानपि तत्पुरः ॥ १७ ॥ सम्मोहयामि स विधे मृगानन्यांश्च पक्षिणः ॥ विचित्रभावमासाद्य यदा प्रकुरुते रतिम् ॥ १८ ॥ मयूरमिथुनव्वँीक्ष्य तत्तदा को नचोत्सुकः ॥ मृगाश्च तत्पुरस्थाश्च स्वजायाभिस्तु सोत्सुकाः ॥ १९ ॥ अकुर्व्वन्रुचिरम्भावन्तस्य पार्श्वे पुरस्तदा ॥ अपश्यँव्विवरन्नास्य कदाचिदपि मच्छरः ॥ २० ॥ निपात्यःस यदा देहे तन्मया सर्व्वलोककृत् ॥ बहुधा निश्चितञ्ज्ञातं रामासंगादृते हरम् ॥ २१ ॥ अलञ्च सम्मोहयितुं ससहायोपि निष्कलम् ॥ मधुश्च कुरुते कर्म्म यद्यत्तस्य विमोहने ॥ २२ ॥ तच्छृणुष्व महाभाग नित्यन्तस्योचितम्पुनः ॥ चम्पकान्केशरानाम्रान्करुणान्पाटलाँस्तथा ॥ २३ ॥ नागकेशरपुन्नागान्किंशुकान्केतकान्धवान् ॥ माधवीर्म्मल्लिकाः पर्णधारान्कुरुबकांस्तथा ॥ २४ ॥ उत्फुल्लयति तत्तस्य

१ कःप्राणीत्यन्वयः। २ द्वन्द्वीभूताः तुष्टा इति वा पाठः। ३ मयूरान्।

यत्र तिष्ठति वै हरः ॥ सरांस्युत्फुल्लपद्मानि बीजयन्मलयानिलैः ॥ २५ ॥ सुगन्धीकृतवाँय्यन्नादतीव शंकराश्रमम् ॥ लताः सर्व्वाः सुमन
सः फुल्लपादपसञ्चयान् ॥ २६ ॥ वृक्षारुचिरभावेन वेष्टयन्ति स्म तत्रच ॥ तान्वृक्षांश्चारुपुष्पौघाँस्तैः सुगन्धिसमीरणैः ॥ २७ ॥ दृष्ट्वा
कामवशयँयातो न तत्र मुनिरप्युत ॥ तद्गणा अपि लोकेश नानाभावैः सुशोभनैः ॥२८॥ वसन्ति स्म सुराः सिद्धायेये चाति तपोवनाः ॥
न तस्य पुनरस्माभिर्दृष्टम्मोहस्यकारणम् ॥ २९ ॥ भावमात्रन्न कुरुते कायोत्थमपि शंकरः ॥ इति सर्व्वमहन्दृष्ट्वा ज्ञात्वा च हरभावन
म् ॥ ३० ॥ विमुखोहं शम्भुमोहान्नियतव्वाँ यया विना ॥ इदानीन्त्वद्वचःश्रुत्वा योगनिद्रोदितम्पुनः ॥ ३१ ॥ तस्याःप्रभावं श्रुत्वाथ
गणान्दृष्ट्वासहायकान् ॥ मया शम्भोर्व्विमोहाय क्रियते मुहुरुद्यमः ॥ ३२ ॥ भवानपि त्रिलोकेश योगनिद्रा द्रुतम्पु
नः ॥ भवेद्यथा शम्भुजाया तथैव विदधात्वरम् ॥ ३३ ॥ यमानान्नियमानाञ्च प्राणायामस्य नित्यशः ॥ आसनस्य महे
शस्य प्रत्याहारस्य गोचरे ॥ ३४ ॥ ध्यानस्य धारणायाश्च समाधेर्व्विघ्नसम्भवम् ॥ मन्ये कर्त्तुन्न शक्यः स्यादपि मारशतै
रपि ॥ ३५॥ तथाप्ययम्मारगणः करोतु हरस्य योगांगविकारविघ्नम् ॥ यदेव शक्यं किमु वा समर्थः समक्षमन्यस्य न कर्त्तुमोजः ॥३६॥
इति कालिकापुराणे सप्तमोध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ ततो ब्रह्मापि मदनमुवाचेदव्वँचः पुनः॥

१ तथापीति यद्यपि मारशतरपि महेशस्य यमादीनांविघ्नसम्भवः कर्तुन्नशक्यः स्यादित्यहम्मन्ये तथापि तस्य योगांगविकारविघ्नं यदेव शक्यम्भवति तदेवायम्मारगणःकरोतु किमुबाऽथवा हरस्य समक्षं अन्य स्य तेजोबलंव्वा किमपि कर्तुन्नसमर्थोभवतीत्यर्थः एवञ्चविघ्नोद्यमं मा वा करोत्विति भावः यदेव शक्यं हरस्य योगांगविकारविघ्नं तदेवायम्मारगणःकरोति शिवस्य समक्षं अन्यस्य ओजः बलं तेजोविघ्नं कर्तुं वा किमपि विघ्नं कर्तुं भवतीत्यर्थः ।

निश्चित्य योगनिद्रायाः स्मृत्वा वाक्यन्तपोधनाः ॥ १ ॥ ब्रह्मोवाच ॥ ॥ अवश्यं शम्भुपत्नी सा योगनिद्रा भविष्यति ॥ यथाशक्ति भवाँस्तत्र करोत्वस्याः सहायताम् ॥ २ ॥ गच्छत्वं स्वगणैः सार्द्धय्यँत्र तिष्ठति शंकरः ॥ द्रुतम्मनोभवत्वञ्च तत्स्थानम्मधुना सह ॥ ३ ॥ रात्रिन्दिवस्य तुर्य्यांशञ्जगन्मोहय नित्यशः ॥ भागत्रयं शम्भपार्श्वे तिष्ठ सार्द्धंगणैः सदा ॥ ४ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इत्युक्त्वा सर्व्वलोकेशस्तत्रैवान्तरधीयत ॥ शम्भोः सकाशम्मदनो गतवान्त्सगणस्तदा ॥ ५ ॥ एतस्मिन्नन्तरे दक्षश्चिरं कालन्तपोरतः ॥ नियमैर्व्वहुभिर्देवीमाराधयत सुव्रतः ॥ ६ ॥ ततो नियमयुक्तस्य दक्षस्य मुनिसत्तमाः ॥ योगनिद्राम्पूजयतः प्रत्यक्षमभवच्छिवा ॥ ७ ॥ ततः प्रत्यक्षतो दृष्ट्वा विष्णुमायाञ्जगन्मयीम् ॥ कृतकृत्यमथात्मानम्मेने दक्षः प्रजापतिः ॥ ८ ॥ सिंहस्थांकालिकांकृष्णाम्पीनोत्तुंगपयोधराम् ॥ चतुर्भुजाञ्चारुवक्त्रान्नीलोत्पलधरां शुभाम् ॥ ९ ॥ वरदाऽभयादांखड्गस्तांसर्व्वगुणान्विताम् ॥ आरक्तनयनाञ्चारुमुक्तकेशीम्मनोहराम् ॥ ॥ १० ॥ दृष्ट्वा दक्षोथ तुष्टाव महामायाम्प्रजापतिः ॥ प्रीत्या परमया युक्तो विनयानतकन्धरः ॥ ११ ॥ दक्ष उवाच ॥ आनन्दरूपिणीन्देवीञ्जगदानन्दकारिणीम् ॥ सृष्टिस्थित्यन्तरूपान्तां स्तौमि लक्ष्मीं हरेः शुभाम् ॥ १२ ॥ सत्त्वोद्रेकप्रकाशेन यज्ज्योतिस्तत्त्वमुत्तमम् ॥ स्वप्रकाशञ्जगद्धाम तत्तवांशम्महेश्वरि ॥ १३ ॥ रजोगुणातिरेकेण यत्कामस्य प्रकाशनम् ॥ रागस्वरूपम्मध्यस्तन्तत्तेंशांशञ्जगन्मयि ॥ १४ ॥ तमोगुणातिरेकेण यद्यन्मोहप्रकाशनम् ॥ आच्छादनञ्चेतनानान्तत्तेचांशांशंगोचरम् ॥ १५ ॥ परा परात्मिका शुद्धा निर्म्मला लोकमो

१ अवयव इत्यर्थः ।

हिनी ॥ त्वन्त्रिरूपा त्रयीकीर्त्तिर्व्वार्त्तास्य जगतोगतिः॥१६॥बिभर्त्ति माधवो धात्रीय्यँया मूर्त्या निजोत्थया ॥ सा मूर्तिस्तवसर्व्वेषाञ्जगता
मुपकारिणी ॥ १७ ॥ महानुभावा त्वँव्विश्वशक्तिः सूक्ष्मापराजिता ॥ यदूर्ध्वाधोनिरोधेन व्यज्यते पवनैः परम् ॥ १८ ॥ तज्ज्योतिस्तव
मात्रार्थे सात्त्विकम्भावसम्मतम् ॥ यद्योगिनोनिरालंबं निष्कलन्निर्म्मलम्परम् ॥ १९ ॥ आलंबयन्ति तत्तत्वन्त्वदन्तर्गोचरन्तु तत् ॥ या
प्रसिद्धा च कूटस्था सुप्रसिद्धातिनिर्म्मला ॥ २० ॥ साज्ञप्तिस्त्वन्निःप्रपञ्चा प्रपञ्चापि[1] प्रकाशिका ॥ त्वव्विँद्या त्वमविद्या
च त्वमालंबा निराश्रया ॥ २१ ॥ प्रपञ्चरूपा जगतामादिशक्तिस्त्वमीश्वरी ॥ ब्रह्मकण्ठालया शुद्धा वाग्वाणी या प्रगीयते ॥ २२ ॥
वेदप्रकाशनपरा सा त्वव्विँश्वप्रकाशिनी ॥ त्वमग्निस्त्वन्तथा स्वाहा त्वं स्वधा पितृभिः सह ॥ २३ ॥ त्वन्नभस्त्वंकालरूपा त्वंकाष्ठा त्वम्ब
हिष्कृता ॥ त्वमचिन्त्या त्वमव्यक्ता तथा निर्द्देश्यरूपिणी ॥ २४ ॥ त्वंकालरात्रिस्त्वं शान्ता त्वमेव प्रकृतिः परा ॥ यस्याः संसारलोकाना
म्परित्राणाय यद्वहिः ॥ २५ ॥ रूपञ्जानन्ति धात्राद्यास्तत्त्वाञ्ज्ञास्यन्तिकेपराम् ॥ प्रसीद भगवत्यम्ब प्रसीद योगरूपिणि ॥ २६ ॥ प्रसीद
घोररूपे त्वञ्जगन्मयि नमोस्तुते ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इति स्तुता महामाया दक्षेण प्रयतात्मना ॥ २७ ॥ उवाच दक्षञ्ज्ञात्वा
पि स्वयन्तस्येप्सितन्द्विजाः ॥ ॥ भगवत्युवाच ॥ ॥ तुष्टाहन्दक्षभवतो मद्भक्त्या ह्यनया भृशम् ॥ २८ ॥ वरव्वृँणीष्व चाभीष्टं तत्ते
दास्यामि तत्स्वयम् ॥ नियमेन तपोभिश्चस्तुतिभिस्ते प्रजापते ॥ २९ ॥ अतीव तुष्टा दास्येहव्वँरव्वँरय वाञ्छितम् ॥ ॥ दक्ष उवाच ॥

१ प्रपञ्चविशिष्टापीत्यर्थः ।

जगन्मयि महामाये यदि त्वँ वरदा मम ॥ ३० ॥ तदा मम सुता भूत्वा हरजाया भवाधुना ॥ ममैव न वरो देवि केवलञ्जगतामपि ॥
॥ ३१ ॥ लोकेशस्य तथा विष्णोः शिवस्यापि प्रजेश्वरि ॥ ॥ देव्युवाच ॥ ॥ अहन्तव सुता भूत्वा त्वज्जायायां समुद्भवा ॥ ३२ ॥
हरजाया भविष्यामि न चिरात्तु प्रजापते ॥ यदा भवान्मयि पुनर्भवेन्मन्दादरस्तदा ॥ ३३ ॥ देहन्त्यक्ष्यामि सपदि सुखिन्यप्यथ वेतरा ॥
एपदत्तस्तव वरः प्रतिसर्ग्गम्प्रजापते ॥ ३४॥ अहन्तव सुता भूत्वा भविष्यामि हरप्रिया ॥ तथा सम्मोहयिष्यामि महादेवम्प्रजापते ॥३५॥
प्रतिसर्ग्गेय्यथा मोहं सम्प्राप्स्यति निराकुलम् ॥ ॥ मार्कण्डेय उवाच ॥ ॥ एवमुक्त्वा महामाया दक्षम्मुख्यम्प्रजापतिम् ॥ ३६ ॥
अन्तर्द्दधे ततो देवी सम्यग्दक्षस्य पश्यतः ॥ अन्तर्हितायाम्मायायान्दक्षोपि निजमाश्रमम् ॥ ३७ ॥ जगाम लेभे च सुदम्भविष्यति
सुतेति सा ॥ अत्र चक्रे प्रजोत्पादव्विँना स्त्रीसंगमेन च ॥ ३८ ॥ संकल्पाविर्भवाभ्यान्तु मनसा चिन्तनेन च ॥ तत्र ये तनया जाता
बहुशो द्विजसत्तमाः ॥ ३९ ॥ ते नारदोपदेशेन भ्रमन्ति पृथिवीमिमाम् ॥ पुनःपुनः सुता येये तस्य जाताः सहस्रशः ॥ ४० ॥ ते सर्व्वे
भ्रातृपदवीय्ययुर्न्नारदवाक्यतः॥ पृथिव्यां सृष्टिकर्त्तारः सर्व्वे यूयन्द्विजोत्तमाः॥४१॥पश्यध्वम्पृथिवींकृत्स्नामुपान्तप्रान्तमायताम् ॥ इतिनार
दवाक्येन नोदिता दक्षपुत्रकाः ॥ ४२ ॥ अद्यापिन निवर्त्तन्ते भ्रमन्तः पृथिवीमिमाम् ॥ ततः समुत्पादयितुम्प्रजा मैथुनसम्भवाः ॥ ४३ ॥
उपयेमे वीरणस्य तनयान्दक्ष ईप्सिताम् ॥ वीरणी नाम तस्यास्तु असक्नीत्यपि सत्तमाः ॥ ४४ ॥ तस्याम्प्रथमसंकल्पो यदा भूतः प्रजा

१ इतरा असुखिनी ।

पतेः ॥ सद्योजातामहामायातदा तस्यान्द्विजोत्तमाः ॥ ४५ ॥ तस्यान्तुजातमात्रायांसुप्रीतोभूत्प्रजापतिः ॥ सैवैषेतितदामेनेतान्दृष्ट्वाते
जसोज्ज्वलाम् ॥ ४६ ॥ बभूवपुष्पवृष्टिश्चमेघाश्चववृषुर्जलम् ॥ दिशःशान्तास्तदातस्याञ्जातायाञ्चसमुद्गताः ॥ ४७ ॥ अवादयन्तात्रि
दशाः शुभव्वाँद्यव्विँयद्गताः ॥ जज्वलुश्चाग्नयःशान्तास्तस्यांसत्यान्नरोत्तमाः ॥ ४८ ॥ वीरण्यालक्षितोदक्षस्तान्दृष्ट्वाजगदीश्वरीम् ॥
विष्णुमायाम्महामायान्तोषयामासभक्तितः ॥ ४९ ॥ दक्षउवाच ॥ ॥ शिवाशान्तामहामायायोगनिद्राजगन्मयी ॥ या प्रोच्यते विष्णु
मायातान्नमामिसनातनीम् ॥ ५० ॥ ययाधाताजगत्सृष्टौनियुक्तस्तांम्पुराकरोत् ॥ स्थितिञ्चविष्णुरकरोद्यन्नियोगाज्जगत्पतिः ॥ ५१ ॥
शम्भुरन्तन्ततोदेवीन्तान्नमामिमहीयसीम् ॥ विकाररहितांशुद्धामप्रमेयाम्प्रभावतीम् ॥ ५२ ॥ प्रमाणमानमेयाख्याम्प्रणमामिसुखात्मिका
म् ॥ यस्त्वाव्विँचिन्तयेद्देवीव्विँद्याऽविद्यात्मिकाम्पराम् ॥ ५३ ॥ तस्यभोग्यञ्च मुक्तिञ्चसदाकरतलेस्थिता ॥ यस्त्वाम्प्रत्यक्षतोदेवींसकृ
त्पश्यतिपावनीम् ॥ ५४ ॥ तस्यावश्यम्भवेन्मुक्तिर्व्विद्याविद्याप्रकाशिका ॥ योगनिद्रेमहामायेविष्णुमायेजगन्मयि ॥ ५५ ॥ याप्रमाणार्थ
सम्पन्नाचेतनासातवात्मिका ॥ येस्तुवन्तिजगन्मातर्भवतीमम्बिकेतिच ॥ ५६ ॥ जगन्मयीतिमायेति सर्वन्तेषाम्भविष्यति ॥ मार्कण्डे
य उवाच ॥ ॥ इतिस्तुताजगन्मातादक्षेणसुमहात्मना ॥ ५७ ॥ तथोवाचतदादक्षय्यँथामाताशृणोतिन ॥ सम्मोह्यसर्व्वन्तत्रस्थय्यँ
थादक्षःशृणोतितत् ॥५८॥ नान्यःशृणोतिचतथामाययाहतदाम्बिका ॥ ॥ देव्युवाच ॥ ॥ अहमाराधितापूर्व्वय्यँदर्थम्मुनिसत्तम ॥५९॥

१सृष्टिमित्यर्थः ।

ईप्सितन्तव सिद्धन्तदवधारयसाम्प्रतम् ॥ ॥ मार्कण्डेय उवाच ॥ ॥ एवमुक्तातदादेवीदक्षञ्चनिजमायया ॥ ६० ॥
आस्थायशैशवम्भावञ्जनन्यंकेरुरोदसा ॥ ततस्ताव्वीरिणीयत्नात्सुसंस्कृत्ययथोचितम् ॥ ६१ ॥ शिशुपालेनविधिनातस्यैस्तन्यादिकन्ददौ
॥ ६२ ॥ पालितासाथवीरिण्यादक्षेणसुमहात्मना ॥ ववृधेशुक्लपक्षस्यनिशानाथोयथान्वहम् ॥ ६३ ॥ तस्यान्तुसहुणाःसर्व्वेविविशुर्द्विजस
त्तमाः ॥ शैशवेपियथाचन्द्रेकलाः सर्व्वामनोहराः ॥ ६४ ॥ रेमेसानिजभावेनसखीमध्यगतायदा ॥ तदालिखतिभर्ग्गस्यप्रतिमामन्वहम्मु
हुः ॥ ६५ ॥ यदागायतिगीतानितदाबाल्योचितानिसा ॥ उग्रंस्थाणुंहरंरुद्रंसस्मारस्मरमानसा ॥ ६६ ॥ तस्याश्चक्रेनामदक्षःसती
तिद्विजसत्तमाः ॥ प्रशस्तायाःसर्व्वगुणैःसत्त्वादपि नयादपि॥६७॥ववृधेदक्षवीरिण्योःप्रत्यहंकरुणातुला॥तस्याम्बाल्येपिभक्तायान्तयोर्न्नित्य
म्मुहुर्म्मुहुः ॥६८॥ सर्व्वकान्तगुणाक्रान्तासदासानयशालिनी ॥ तोषयामासपितरौनित्यंनित्यन्नरोत्तमाः॥६९॥अथैकदापितुःपार्श्वेतिष्ठन्ती
न्तांसतीव्विँधिः ॥ नारदश्चददर्शाथरत्नभूतांक्षितौ शुभाम् ॥ ७० ॥ सापितौवीक्ष्यमुदिताविनयावनतातदा ॥ प्रणनामसतीदेवम्ब्रह्माणमथ
नारदम् ॥ ७१ ॥ प्रणामान्तेसतीव्वीक्ष्यविनयावनताव्विँधिः ॥ नारदश्चतथैवाशीर्व्वादमेतमुवाचह ॥ ७२ ॥ त्वामेवयःकामयतेयन्त्वंका
मयसेपतिम् ॥ तमाप्नुहिपतिन्देवंसर्व्वज्ञञ्जगदीश्वरम् ॥ ७३ ॥ योनान्याञ्जगृहेनापिगृह्णातिनग्रहीष्यति ॥ जायांसतेपतिर्भूयादनन्य
सदृशः शुभे ॥ ७४ ॥ इत्युक्त्वासुचिरन्तौतुस्थित्वादक्षाश्रमेपुनः ॥ विसृष्टौतेनसय्यौतौस्वस्थानन्द्विजसत्तमाः ॥ ७५ ॥ ॥ इति
कालिकापुराणेअष्टमोध्यायः ॥ ८ ॥ ॥ ७ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ बाल्यव्यँतीत्यसांप्रापयौवनंशोभनन्ततः ॥ अती

वरूपेणांगेनसर्व्वांगसुमनोहरा ॥ १ ॥ ताञ्चीक्ष्यदक्षोलोकेशःप्रोद्भिन्नान्तर्व्वयःस्थिताम् ॥ चिन्तयामासभर्गायकथन्दास्यइमांसुताम् ॥
॥ २ ॥ अथसापिस्वयम्भर्गम्प्राप्तुमैछत्तदान्वहम् ॥ आराधयामासचतंगृहेमातुरनुज्ञया ॥३॥ आश्विनेनन्दकाख्यायाल्लँवणैःसगुडोदनैः॥
पूजयित्वाहरम्पश्चाद्वन्देसानिनायतत् ॥ ४ ॥ कार्तिकस्यचतुर्दश्यांसापूपैः पायसैर्हरम् ॥ समाकीर्णैःसमाराध्यसस्मारपरमेश्वरम् ॥ ५ ॥
कृष्णाष्टम्याम्मार्ग्गशीर्षेसलिलैःसयवोदनैः ॥ पूजयित्वाहरंन्नीलैर्न्निनायदिवसम्पुनः ॥ ६ ॥ पौषेतुकृष्णसप्तम्याङ्कृत्वाजागरणन्निशि ॥ अ
पूजयच्छिवम्प्रातःकृशरान्नेनसासती ॥ ७ ॥ माघस्यपौर्णमास्यान्तुकृत्वाजागरणन्निशि ॥ आर्द्रवस्त्रानदीतीरेह्येकरोद्धरपूजनम् ॥ ८ ॥ ना
नाविधैःफलैःपुष्पैःसम्यक्तत्कालसम्भवैः ॥ चकारनियताहारन्तम्मासंहरमानसा ॥ ९ ॥ चतुर्दश्यांकृष्णपक्षेतपस्यस्यविशेषतः ॥ कृत्वाजा
गरणन्देवम्बिल्वपत्रैरपूजयत् ॥ १० ॥ चैत्रेशुक्लचतुर्दश्याम्पालाशैःकुसुमैःशिवम् ॥ अपूजयद्दिवारात्रौतंस्मरन्तीनिनायतम् ॥ ११ ॥ वैशा
खस्यतृतीयायांशुक्लायांसयवोदनैः ॥ पूजयित्वाहरन्देवंगव्यैर्म्मासञ्चरन्त्यनु ॥ १२ ॥ निनायसानिराहारास्मरन्तीवृषवाहनम् ॥ ज्येष्ठस्यपू
र्णिमारात्रौसम्पूज्यवृषवाहनम् ॥ १३ ॥ वसनैर्बृहतीपुष्पैर्न्निराहारानिनायताम् ॥ आषाढस्यचतुर्दश्यांशुक्लायांकृत्तिवाससः ॥ १४ ॥ बृहती
कुसुमैःपूजादेवस्याकारिवैतया ॥ श्रावणस्यसिताष्टम्याञ्चचतुर्दश्याञ्चसाशिवम् ॥ १५ ॥ यज्ञोपवीतैर्व्वासोभिःपवित्रैरप्यपूजयत् ॥ भाद्रेकृ
ष्णत्रयोदश्याम्पुष्पैर्न्नानाविधैःफलैः ॥ १६ ॥ सम्पूज्याथचतुर्दश्याञ्चकारफलभोजनम् ॥ इतिव्रतय्यँदारब्धम्पुरासत्यातदैवतु ॥ १७॥

१ नीलवृषैर्दूर्व्वाभिर्व्वा नीलवर्णैः पत्रैः पुष्पैर्व्वा ।

सावित्रीसहितोब्रह्माजगामाथहरान्तिकम् ॥ वासुदेवोपिभगवान्त्सहलक्ष्म्यातदन्तिकम् ॥ १८ ॥ प्रस्थंहिमवतःशम्भुःस्थितोयत्रगणैःसह ॥
तौतुदृष्ट्वाब्रह्मकृष्णौसस्त्रीकौसंगतौहरः ॥१९॥ यथोचितंसमाभाष्यपप्रच्छागमनन्तयोः ॥ तथाविधाँस्तुतान्दृष्ट्वादाम्पत्यभावसंयुँतान् ॥२०॥
काश्चिदीहाश्चमनसाचक्रेदारपरिग्रहे ॥ अथागमनहेतुन्नःकथयध्वञ्चतत्त्वतः ॥ २१ ॥ किमर्थमागतायूयंकिंकार्य्यंवोत्रविद्यते ॥ इतिपृष्टस्त्र्य
म्बकेनब्रह्मालोकपितामहः ॥ २२ ॥ उवाचचमहादेवव्विँष्णुनापरिचोदितः ॥ ॥ ब्रह्मोवाच ॥ ॥ यदर्थमागतावावान्तच्छृणुष्वत्रिलोचन
॥ २३ ॥ विशेषतश्चदेवार्थव्विँश्वार्थश्चवृषध्वज ॥ अहंसृष्टिरतःशम्भोस्थितिहेतुस्तथाहरिः ॥ २४ ॥ अन्तहेतुर्भवानस्यजगतःप्रति
सर्गकम् ॥ तत्कर्म्मणिसदैवाहम्भवद्भ्यांसहितोह्यलम् ॥ २५ ॥ हरिःस्थितावपितथामयालम्भवतासह ॥ त्वमन्तकरणेश
क्तोविनानावाम्भविष्यसि ॥ २६ ॥ तस्मादन्योन्यकृत्येषुसर्व्वेषाव्वृँषभध्वज ॥ साहाय्यन्नःसदायोग्यमन्यथानजगद्भवेत् ॥ २७ ॥
केचिद्भविष्यन्त्यसुराममवध्यामहेश्वर ॥ अपरेतुहरेर्व्वध्याभवतोपितथापरे ॥ २८ ॥ केचित्त्वद्वीर्य्यजातस्यकेचिन्मेंशभव
स्यवै ॥ मायायाः केचिदपरेवध्याःस्युर्द्देववैरिणः ॥ २९ ॥ योगयुक्तेत्वयिसदारागद्वेषादिवर्ज्जिते ॥ दयामात्रैकनिरतेनवध्या
असुरास्तव ॥३०॥ अबाधितेषुतेष्वीशकथंसृष्टिस्तथास्थितिः ॥ अन्तश्चभवितायुक्तन्नित्यन्नित्यँव्वृषध्वज॥३१॥ सृष्टिस्थित्यन्तकर्म्माणि
नकार्याणियदाहर ॥ शरीरभेदमस्माकम्मायायाश्चनयुज्यते॥३२॥एकस्वरूपाहिवयम्भिन्नाः कार्य्यस्यभेदतः ॥ कार्य्यभेदोनसिद्धश्चेद्रूपभेदोऽ

१ सर्गकर्म्मणि ।

प्रयोजनः ॥ ३३ ॥ एकएवत्रिधाभूत्वावयम्भिन्नस्वरूपिणः ॥ भूतामहेश्वरइतितत्त्वव्विँद्धिसनातनम् ॥ ३४ ॥ मायापिभिन्नरूपेणकमला
ख्यासरस्वती ॥ सावित्रीचाथसन्ध्याचभूताकार्य्यस्यभेदतः ॥ ३५ ॥ प्रवृत्तेरनुरागस्यनारीमूलम्महेश्वर ॥ रामापारिग्रहात्पश्चात्कामक्रोधा
दिकोद्भवः ॥ ३६ ॥ अनुरागेतुसञ्जातेकामक्रोधादिकारणे ॥ विरागहेतुर्य्यँत्नेनसान्त्वयन्तीहजन्तवः ॥ ३७ ॥ संगःप्रथमएवस्याद्रागवृक्षा
त्फलम्महत् ॥ तस्मात्सञ्जायतेकामःकामात्क्रोधस्ततोभवेत् ॥ ३८ ॥ वैराग्यञ्चनिवृत्तिश्चशोकात्स्वाभाविकादपि ॥ संसारविमुखेहेतुरसंग
श्चसदातनः ॥ ३९ ॥ दयातत्रभवेन्नित्यंशान्तिश्चापिमहेश्वर ॥ अहिंसाचतपःशान्तिर्ज्ञानमार्ग्गानुसाधनम् ॥ ४० ॥ त्वयितावत्तपोनिष्ठेविसं
गिनिदयायुते ॥ अहिंसाचतथाशान्तिःसदातवभविष्यति ॥ ४१ ॥ ततोसुखविधौयत्नस्तवकस्माद्भविष्यति ॥ अकृतेदूषणय्यँद्यत्त
त्सर्वंकथितन्तव ॥ ४२ ॥ तस्माद्विश्वहितायत्वन्देवानाञ्चजगत्पते ॥ परिगृह्णीष्वभार्य्यार्थेवामामेकांसुशोभनाम् ॥ ४३ ॥ यथापद्मालया
विष्णोः सावित्रीचयथामम ॥ तथासहचरीशम्भोर्य्यास्यात्तांगृह्णसम्प्रति ॥ ४४ ॥ मार्कण्डेय उवाच ॥ ॥ इतिश्रुत्वावचस्तस्य
ब्रह्मणःपुरतोहरेः ॥ तदाजगादलोकेशंस्मितार्द्दितमुखोहरः ॥ ४५ ॥ ॥ ईश्वरउवाच ॥ ॥ एवमेवयथात्थत्वम्ब्रह्मन्विश्वनिमित्ततः ॥ ४६ ॥
नस्वार्थतःप्रवृत्तिर्म्मेसम्यग्ब्रह्मविचिन्तनात् ॥ तथापियत्करिष्यामितत्तेवक्ष्येजगद्धितम् ॥ ४७ ॥ तच्छृणुष्वमहाभागयुक्तमेववचोमम ॥
यामेतेजःसमर्थास्याद्ग्रहीतुमिहभागशः ॥ ४८ ॥ तान्निदेशयभार्य्यार्थेयोगिनींकामरूपिणीम् ॥ योगयुक्तेमयितथायोगिन्येवभविष्यति
॥ ४९ ॥ कामासक्तेमयिपुनर्म्मोहिन्येवभविष्यति ॥ ताम्मेनिदेशयब्रह्मन्भार्य्यार्थेवरवर्णिनीम् ॥ ५० ॥ यदक्षरंवेदविदोनिगदन्तिमनीषिणः ॥

ज्योतिःस्वरूपम्परमञ्चिन्तयिष्येसनातनम् ॥ ५१ ॥ तच्चिन्तायांसदाशक्तोब्रह्मन्गच्छामिभावनाम् ॥ तत्रयाविघ्नजननीनभवित्रीहसास्तुमे ॥
॥५२॥ त्वव्वाँविष्णुरहव्वाँपिपरब्रह्मस्वरूपिणः ॥ अंगभूतामहाभागयोग्यन्तदनुचिन्तनम्॥५३॥तच्चिन्तयाविनानाहंस्थास्यामिकमलासन॥
तस्माज्जायाम्प्रादिशस्वमत्कर्म्मानुगतांसदा॥५४॥मार्क्कण्डेय उवाच॥इतितस्यवचःश्रुत्वाब्रह्मासर्वजगत्पतिः॥सस्मितम्मोदितमनाइदव्वँचनम
ब्रवीत्॥५५॥ब्रह्मोवाच॥अस्तीदृशीमहादेवमार्ग्गितायादृशीत्वया ॥ दक्षस्यतनयायाभूत्सतीनाम्नीसुशोभना॥५६॥सैवेदृशीभवद्भार्य्याभविष्य
तिसुधीमती॥तान्त्वदर्थेतपस्यन्तीन्त्वत्प्राप्तिम्प्रतिकामिनीम् ॥५७॥ विद्धित्वन्देवदेवेशसर्वेष्वात्मसुवर्त्तसे॥मार्क्कण्डेय उवाच ॥अथब्रह्मवचः
शेषेभगवान्मधुसूदनः ॥ ५८ ॥ यदुक्तम्ब्रह्मणासर्वन्तत्कुरुष्वेत्युवाचसः ॥ करिष्यइतितेनोक्तेस्वेष्टन्देशग्प्रजम्मतुः ॥५९॥ हरिर्ब्रह्मा चमु
दितौसावित्रीकमलायुतौ ॥ कामोपिवाक्यानिहरस्यश्रुत्वाचामोदयुक्तोरतिर्नासामित्रः॥६०॥शम्भुंसमासाद्यविविक्तरूपी तस्थौवसन्तव्विँनियो
ज्यशश्वत् ॥ ६१ ॥ ॥ इतिकालिकापुराणेनवमोध्यायः ॥९॥ ॥ छ ॥ ॥ मार्क्कण्डेय उवाच ॥ अथसत्यापुनःशुक्लपक्षेष्टम्यामुपोषिता ॥
आश्विनेमासिदेवेशम्पूजयामासभक्तितः ॥ १ ॥ इतिनन्दाव्रतेपूर्णेनवम्यान्दिनभागतः ॥ तस्यास्तुभक्तिनम्रायाःप्रत्यक्षमभवद्धरः ॥ २ ॥
प्रत्यक्षतोहरव्वीक्ष्यसामोदहृदयासती ॥ ववन्दे चरणौतस्यलज्जयावनतानता॥३॥अथप्राहमहादेवःसतीन्तद्व्रतधारिणीम् ॥ तामिच्छन्नपिभा
र्यार्थेतस्याश्चर्य्याफलप्रदः ॥ ४ ॥ ॥ ईश्वरउवाच ॥ ॥ अनेनत्वद्व्रतेनाहम्प्रीतोस्मिदक्षनन्दिनि ॥ वरव्वँरप्रदास्यामियस्तवाभिमतोभवेत्

१ रतिनेत्यार्षम् ।

॥ ५ ॥ मार्कण्डेयउवाच ॥ जानन्नपीहतद्भावम्महादेवोजगत्पतिः ॥ ऊचेथवरयस्वेतितद्वाक्यश्रवणेच्छया ॥६॥ सापित्रपासमाविष्टानोवक्तुं
हृदयेस्थितम् ॥ शशाकबालाभींष्टंय्यल्लँज्जयाछादितय्यँतः ॥ एतस्मिन्नन्तरेकामःसाभिप्रायंहरन्तदा ॥ ७ ॥ वामापरिग्रहेनेत्रेवक्रव्यापार
लिंगितम् ॥ सम्प्राप्यविवरञ्चायंसन्दधेपुष्पहेतिना ॥ ८ ॥ हर्षणेनाथबाणेनाविव्याधहृदयेहरम् ॥ ततोसौहर्षितःशम्भुर्वीक्षाञ्चक्रेसतीम्मुहुः ॥
॥ ९ ॥ विस्मृत्यचपरंब्रह्मचिन्तनम्परमेश्वरः ॥ ततः पुनर्म्मोहनेनबाणेनैनम्मनोभवः ॥ १० ॥ विव्याधहर्षितःशम्भुर्मोहितश्चतदाभृशम् ॥
ततोयदासौमोहस्यहर्षस्यचद्विजोत्तमाः ॥ ११ ॥ भावंव्यक्तीचकारैषमाययापिविमोहितः ॥ अथत्रपांस्वांसंदृष्ट्वयदाप्राहहरंसती ॥ १२ ॥
ममेष्टन्देहिवरदवरमित्यर्थकारकम् ॥ तदावाक्यस्यावसानमनपेक्ष्यवृषध्वजः ॥ १३ ॥ भवस्वममभार्येतिप्राहदाक्षायणीम्मुहुः ॥ एतच्छु
त्वावचस्तस्यसाभीष्टफलभावनम् ॥ १४ ॥ तूष्णीन्तस्थौप्रमुदितावरम्प्राप्यमनोगतम् ॥ सकामस्यहरस्याग्रेतत्रसाचारुहासिनी ॥ १५ ॥
अकरोन्निजभावाँश्चहावानपिद्विजोत्तमाः ॥ स्वस्यभावान्त्समादायशृंगाराख्योरसस्तदा ॥ १६ ॥ तयोर्विवेशविप्रेन्द्राःकलहावायथो
चितम् ॥ हरस्यपुरतोरेजेस्निग्धभिन्नाञ्जनप्रभा ॥ १७ ॥ चन्द्राभ्यासेभ्रलेखेवस्फटिकोज्ज्वलवर्ष्मणः ॥ अथसातमुवाचेदंहरन्दाक्षायणी
मुहुः ॥ १८ ॥ पितुर्म्मेंगोचरीकृत्यमांगृह्णीष्वजगत्पते ॥ एवम्मितव्यँचोदेवीयदोवाचसतीतदा ॥ १९ ॥ ममभार्य्याभवेत्यूचेपुनःकामेनमो
हितः ॥ अथैतद्वीक्ष्यमदनःसरतिःससखोमुदा ॥ २० ॥ युक्तोबभूवशश्वच्चआत्मानञ्चाभ्यनन्दयन् ॥ अथदाक्षायणीशंभुंसमाभाष्यद्विजो

१ शरीरस्य ।

त्तमाः ॥ २१ ॥ जगाममातुरभ्याशंहर्षमोहसमन्विता ॥ हरोपिहिमवत्प्रस्थम्प्रविश्यचनिजाश्रमम् ॥२२॥ दाक्षायणीविप्रलम्भदुःखाद्ध्या
नपरोभवत् ॥ विप्रलब्धोपिभूतेशोब्रह्मवाक्यमथास्मरत् ॥२३॥ जायापरिग्रहस्यार्थेयदुक्तम्पद्मयोनिना ॥ स्मृत्यैवब्रह्मवाक्यस्यपुराविश्वासतः
परम् ॥ २४ ॥ चिन्तयामासमनसाब्रह्माणव्वृँषभध्वजः ॥ अथसञ्चिन्त्यमानोसौपरमेष्ठीत्रिशूलिनः ॥ २५ ॥ पुरस्तात्प्राविशत्तूर्णमिष्टसि
द्धिप्रचोदितः ॥ यत्रायंहिमवत्प्रस्थेविप्रलब्धोहरःस्थितः ॥ २६ ॥ सावित्रीसहितोब्रह्मातत्रैवसमुपस्थितः ॥ अथतँवीक्ष्यधातारंसावित्रीस
हितंहरः ॥ २७ ॥ सोत्सुकोविप्रलब्धश्चसत्यर्थेतमुवाचह ॥ ॥ ईश्वरउवाच ॥ ॥ ब्रह्मन्विश्वार्थतोदारपरिग्रहकृतौचयत् ॥ २८ ॥
त्वमात्थतत्सार्थमिवप्रतिभातिममाधुना ॥ अहमाराधितोभक्त्यादाक्षायण्यातिभक्तितः ॥ २९ ॥ तस्यावरमहन्दातुयँदायातःप्रपूजितः ॥
तत्सकाशेतदाकामोमांविव्याधमहेषुभिः॥ ३० ॥ माययामोहितश्चाहन्तत्प्रतीकारमञ्जसा ॥ नशक्तःकर्त्तुमभितःपुराहंकमलासन ॥ ३१ ॥
तस्याश्चवाञ्छितम्ब्रह्मन्नेतदेवमयेक्षितम् ॥ यदहंस्यांविभोभर्त्ताव्रतभक्तिसमायुतः ॥ ३२ ॥ तस्मात्त्वंकुरुविश्वार्थेमदर्थेचप्रजापते ॥ दक्षोय
थामामामन्त्र्यसुतान्दातातथाद्रुतम् ॥ ३३ ॥ गच्छत्वन्दक्षभवनंकथयस्ववचोमम ॥ यथासतीवियोगस्यभंगःस्याच्चन्तथाकुरु ॥ ३४ ॥
मार्कण्डेयउवाच ॥ इत्युदीर्य्यमहादेवः सकाशेस्यप्रजापतेः ॥ सावित्रींवीक्ष्यसत्यास्तुविप्रयोगोव्यवर्धत ॥ ३५ ॥ तंसमाभाष्यलोकेशः
कृतकृत्योमुदान्वितः ॥ इदञ्जगादजगतांहितम्पथ्यञ्चधूर्ज्जटे ॥ ३६ ॥ ब्रह्मोवाच ॥ यदात्थभगवञ्छंभोतद्विश्वार्थंसुनिश्चितम् ॥ नास्त्येवभ

१ चिन्ता ।

वतःस्वार्थोममापिवृषभध्वज ॥ ३७ ॥ सुताश्चतुभ्यन्दक्षस्तुस्वयमेवप्रदास्यति ॥ अहञ्चापिवदिष्यामित्वद्वाक्यन्तत्समक्षतः ॥ ३८ ॥ ॥
मार्कण्डेयउवाच ॥ ॥ इत्युदीर्य्यमहादेवम्ब्रह्मालोकपितामहः ॥ जगामदक्षनिलयंस्यन्दनेनातिवेगिना ॥ ३९ ॥ अथदक्षोपिवृत्तान्तंसर्वं
श्रुत्वासतीमुखात् ॥ चिन्तयामासदेयेयंमत्सुताशम्भवेकथम् ॥ ४० ॥ आगतोपिमहादेवःप्रसन्नःसञ्जगामह ॥ पुनरेवकथंसोपिसुतार्थेऽत्यर्थं
मीप्सितः ॥ ४१ ॥ प्रस्थाप्योवामयातस्यदूतोनिकटमञ्जसा ॥ नैतद्योग्यन्नगृह्णीयाद्यद्येनांविभुरात्मने ॥ ४२ ॥ अथवापूजयिष्यामितमे
ववृषभध्वजम् ॥ मदीयतनयाभर्त्तास्वयमेवयथाभवेत् ॥ ४३ ॥ तथैवपूजितःसोपिवाञ्छत्यतिप्रयत्नतः ॥ शंभुर्भवतुमद्भर्त्तेत्येवन्दत्तश्चते
नतत् ॥ ४४ ॥ इतिचिन्तयतस्तस्यदक्षस्यपुरतोविधिः ॥ उपस्थितोहंसरथःसावित्रीसहितस्तदा ॥ ४५ ॥ तन्दृष्ट्वावेधसन्दक्षःप्रणम्यावनतः
स्थितः ॥ आसनञ्चददौतस्मैसमाभाष्ययथोचितम्॥४६॥ततस्तंसर्वलोकेशन्तत्रागमनकारणम् ॥ दक्षःपप्रच्छविप्रेन्द्राश्चिन्ताविष्टोपिहार्षितः
॥ ४७ ॥ ॥ दक्षउवाच ॥ ॥ तवात्रागमनेहेतुंकथयस्वजगद्गुरो ॥ पुत्रस्नेहात्कार्य्यवशादथवाश्रममागतः॥४८॥ ॥ मार्कण्डेयउवाच ॥ ॥ इति
पृष्टःसुरश्रेष्ठोदक्षेणसुमहात्मना ॥ प्रहसन्नब्रवीद्वाक्यम्मोदयंस्तम्प्रजापतिम्॥४९॥ ब्रह्मोवाच ॥ ॥शृणुदक्षयदर्थंतेसमीपमहमागतः॥ तल्लोकस्य
हितंपथ्यंभवतोपितदीप्सितम् ॥ ५० ॥ तवपुत्र्यासमाराध्यमहादेवञ्जगत्पतिम् ॥ योवरःप्रार्थितःसोद्यस्वयमेवागतोगृहम् ॥ ५१ ॥ शंभुना
तवपुत्र्यर्थेत्वत्सकाशमहम्पुनः ॥ प्रस्थापितोस्मियत्कृत्यंश्रेयस्तदवधारय ॥ ५२ ॥ वरन्दातुर्य्यदायातस्तावत्प्रभृतिशंकरः ॥ त्वत्सु

१ आगमिष्यतीतिशेषः ।

ताविप्रयोगेननशर्म्मलभतेञ्जसा ॥ ५३ ॥ लब्धच्छिद्रोपिमदनोनिचखानतदाभृशम् ॥ सर्वैःपुष्पकरैर्बाणैरेकदैवजगत्प्रभुम् ॥ ५४ ॥
सबाणविद्धःकामेनपरित्यज्यात्माचिन्तनम् ॥ सतींविचिन्तयन्नास्तेव्याकुलः प्राकृतोयथा ॥ ५५ ॥ विस्मृत्यप्रस्तुताम्वाणीङ्गणाग्रे
विप्रयोगतः ॥ क्वसतीत्येवगिरिशोभाषतेन्यकृतावपि ॥ ५६ ॥ मया यद्वाञ्छितम्पूर्वन्त्वयाचमदनेनच ॥ मरीच्याद्यैर्म्मुनिवरैस्त
त्सिद्धमधुनासुत ॥ ५७ ॥ त्वत्पुत्र्याराधितःशम्भुःसोपितस्याविचिन्तनात् ॥ अनुमोदयितुम्प्रेप्सुर्वर्ततेहिमवद्गिरौ ॥ ५८ ॥ यथा
नानाविधैर्भावैः सत्यानन्दाव्रतेनच ॥ शम्भुराराधितस्तेनतथैवाराध्यतेसती ॥ ५९ ॥ तस्मात्त्वन्दक्षतनयांशम्भ्वर्थेपरिकल्पिताम् ॥
तस्मैदेह्यविलंबेनतेनतेकृतकृत्यता ॥ ६० ॥ अहन्तमानयिष्यामिनारदेनत्वदालयम् ॥ तस्मैत्वमेनांसय्यँच्छतदर्थेपरिकल्पिताम् ॥६१॥
मार्कण्डेयउवाच ॥ एवमेवेतिदक्षस्तमुवाचपरमेष्ठिनम् ॥ विधिश्चगतवाँस्तत्रगिरिशोयत्रसंस्थितः ॥ ६२ ॥ गतेब्रह्मणिदक्षोपिसदारतनयो
मुदा ॥ अभवत्पूर्णदेहस्तुपीयूषैरिवपूरितः ॥ ६३ ॥ अथब्रह्मापिमोदेनप्रसन्नःकमलासनः ॥ आससादमहादेवंहिमवद्गिरिसंस्थितम् ॥ ६४ ॥
तंवीक्ष्यलोकस्रष्टारमायान्तव्वृँषभध्वजः ॥ मनसासंशयञ्चक्रेसतीप्राप्तौमुहुर्म्मुहुः ॥ ६५ ॥ अथदूरान्महादेवोलोकेशंसामसय्युँतम् ॥
उवाचमदनोन्माथीविधिंसस्मरमानसः ॥ ६६ ॥ ॥ ईश्वरउवाच ॥ ॥ किमवोचत्सुरश्रेष्ठसत्यर्थेत्वत्सुतःस्वयम् ॥ कथयस्वय
थास्वान्तंमन्मथेननदीर्यते ॥ ६७ ॥ बाधमानोविप्रयोगोमामेवचसतीमृते ॥ अभिहन्तिसुरश्रेष्ठत्यक्त्वान्यान्प्राणधारिणः ॥ ६८ ॥
सतीतिसततंवेद्मिब्रह्मन्कार्य्यान्तरेप्यहम् ॥ सायथाहिमयाप्राप्यातद्विधत्स्वतथाद्भुतम् ॥ ६९ ॥ ॥ ब्रह्मोवाच ॥ ॥ सत्यर्थे

यन्ममसुतोवदतिस्मवृषध्वज ॥ तच्छृणुष्वनिजंसाध्यंसिद्धमित्यवधारय ॥ ७० ॥ देयातस्मैमयापुत्रीतदर्थेपरिकल्पिता ॥ ममापीष्ट
मिदंकर्म्मत्वद्वाक्यादधिकम्पुनः ॥ ७१ ॥ मत्पुत्र्याराधितःशम्भुरेतदर्थेस्वयम्पुनः ॥ सोप्यन्विच्छतितांयस्मात्तस्माद्देयामयाहरे ॥
॥ ७२ ॥ शुभेलग्नेमुहूर्त्तेचसमागच्छतुमेन्तिकम् ॥ तदादास्यामितनयाम्भिक्षार्थंशम्भवेविधे ॥ ७३ ॥ इत्यवोचन्मुदादक्षस्तस्मात्त्वं
वृषभध्वज ॥ शुभेमुहूर्तेतद्देशमगच्छतामनुयाचतु ॥ ७४ ॥ ॥ ईश्वरउवाच ॥ गमिष्येभवतासार्द्धंनारदेनमहात्मना ॥ द्रुतमेवजगत्स्रष्टृ
स्तस्मात्त्वन्नारदंस्मर ॥ ७५ ॥ मरीच्यादीन्दशतथामानसानापिसंस्मर ॥ तैः सार्द्धन्दक्षनिलयंगमिष्येहंगणैः सह ॥ ७६ ॥ ततःस्मृतास्ते
कमलासनेनसनारदाब्रह्मसुतामनोजवाः ॥ समागतायत्रहरोविधिश्चतत्रागताः काममवेत्यचिन्ताम् ॥ ७७ ॥ ॥ इतिश्रीकालिकापुराणे
दशमोध्यायः॥१०॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ ततःसमागताःसर्वेमानसाश्चसनारदाः ॥ विधेःस्मरणमात्रेणवातेनेवविनोदिताः ॥ १ ॥
तैःसार्द्धम्ब्रह्मणाशम्भुःसगणोदक्षमन्दिरम् ॥ जगाममोदयुक्तोथकालेतत्कर्म्मयोगिनि ॥ २ ॥ गणाःशंखाँश्चपटहाण्डिण्डिमाँस्तूर्य्यवंश
कान् ॥ वादयन्तोमुदायुक्ताअनुगच्छन्तिशंकरम् ॥ ३ ॥ केचित्तालंकरतलैःकुर्व्वन्तोंघ्रितलस्वनम् ॥ विमानैरतिवेगैःस्वैरनुयान्तिवृष
ध्वजम् ॥ ४ ॥ कोलाहलम्प्रकुर्वन्तस्तथानानाविधान्रवान् ॥ गणाअनेकाकृतयःशब्दयोगेननिर्य्ययुः ॥ ५ ॥ ततोदेवामुदायुक्तागन्धर्वा
प्सरसोगणाः ॥ वाद्यैर्मोदैस्तथानृत्यैरन्वीयुर्व्वृषभध्वजम् ॥ ६ ॥ तेषांशब्देनविप्रेन्द्रागन्धर्व्वाणांगरीयसाम् ॥ गणानाञ्चदिशःसर्वाःपू
रिताचवसुन्धरा ॥ ७ ॥ कामोपिसगणःशम्भुंसशृंगाररसादिभिः ॥ मोदयन्मोहयन्काममन्वियात्ससमक्षतः ॥ ८ ॥ हरेगच्छतिभार्य्यार्थे

तदानींसकलाःसुराः ॥ ब्रह्माद्याःस्वयमेवाशुवाद्यञ्चक्रुर्म्मनोहरम् ॥ ९ ॥ दिशःसर्वाःसुप्रसन्नाबभूवुर्द्विजसत्तमाः ॥ जज्वलुश्चाग्नयःशान्ताः
पुष्पवृष्टिरजायत ॥ १० ॥ ववुर्वाताःसुरभयोवृक्षाश्चापिसुपुष्पिताः ॥ बभूवुःप्राणिनःस्वस्थाअस्वस्थायेपिकेचन ॥ ११ ॥ हंससारसकाद
म्बानीलकण्ठाश्चचातकाः॥चुक्रुशुर्मधुराञ्छब्दान्प्रेरयन्तइवेश्वरम् ॥ ॥ १२ ॥ भुजंगोव्याघ्रकृत्तिश्चजटाचन्द्रकलातथा ॥ जगामभूप
णत्वञ्चतेनापिपरिदीपितः ॥१३ ॥ ततःक्षणेनबलिंनाबलीवर्द्देनवेगिना ॥ सब्रह्मनारदाद्यैश्चप्रापदक्षालयंहरः ॥ १४ ॥ ततोदक्षोमहाते
जाअभ्युत्थायस्वयंहरम् ॥ ब्रह्मादींश्चददौतेषामासनानियथोचितम् ॥१५॥ कृत्वायथोचितान्तेषांपूजाम्पाद्यादिभिस्तथा॥चकारसंविदन्दक्षोमु
निभिर्म्मानसैःपुनः ॥ १६ ॥ ततःशुभेमुहूर्त्तेतुलग्नेचद्विजसत्तमाः ॥ सतीन्निजसुतान्दक्षोददौहर्षेणशम्भवे ॥ १७ ॥ उद्वाहविधिनासो
पिपाणिञ्जग्राहहर्षितः ॥ दाक्षायण्यावरतनोस्तदानीव्वृँषभध्वजः ॥ १८ ॥ ब्रह्माथनारदाद्याश्चमुनयःसामगीतिभिः ॥ ऋचायजुर्भिः
सुश्राव्यैस्तोषयामासुरीश्वरम् ॥ १९ ॥ वाद्यञ्चक्रुर्गणाःसर्वेननृतुश्चाप्सरोगणाः ॥ पुष्पवृष्टिञ्चससृजुर्म्मेघागगनसंगताः ॥ २० ॥
अथशम्भुमुपागत्यगरुडेनातिवेगिना ॥ सार्द्धंकमलयाचेदमुवाचगरुडध्वजः ॥ २१ ॥ ॥ श्रीभगवानुवाच ॥ ॥ स्निग्धनीलाञ्ज
नश्यामशोभयाशोभसेहर ॥ दाक्षायण्यायथाचाहम्प्रातिलोम्येनपद्मया ॥ २२ ॥ कुरुत्वमनयासार्द्धंरक्षान्देवस्यवानृणाम् ॥ अनयासहसं
सारसारिणाम्मंगलंसदा ॥ २३ ॥ कुरुदस्यून्यथायोग्यंहनिष्यसिचशंकर ॥ यएवैनांसाभिलाषोदृष्ट्वाश्रुत्वाथवाभवेत् ॥ २४ ॥ तंहनि
ष्यसिभूतेशनात्रकार्य्याविचारणा ॥ ॥ मार्कंडेयउवाच ॥ ॥ एवमस्त्वितिसर्वज्ञःप्रोवाचपरमेश्वरम् ॥ २५ ॥ प्रहृष्टमानसम्प्रीत्या

प्रसन्नवदनोद्विजाः ॥ अथब्रह्मातदादृष्ट्वादक्षजाश्चारुहासिनीम् ॥ २६ ॥ स्मरानिष्टमनावक्रंवीक्षाञ्चक्रेतदीयकम् ॥ मुहुर्म्महुस्तदाब्रह्मापश्य
तिस्मसतीमुखम् ॥ २७ ॥ तदेन्द्रियविकारश्चप्राप्तवानवशःपुनः ॥ अथतस्यपपाताशुतेजोभूमौद्विजोत्तमाः ॥ २७ ॥ तज्ज्वलद्दहनाभासम्मु
नीनाम्पुरतस्तदा ॥ ततस्तस्मात्समभवँस्तोयदाःशब्दसय्युताः ॥ २९ ॥ सव्वँर्त्तश्चतथाव्वर्त्तःपुष्करोद्रोणएवच ॥ गर्ज्जन्तश्चाथमुञ्चन्तस्तो
यानिद्विजसत्तमाः ॥ ३० ॥ तैस्तुसञ्छादितेव्योम्नितेषुगर्ज्जत्सुशंकरः ॥ पश्यन्दाक्षायणीन्देवीम्भृशंकामेनमोहितः ॥ ३१ ॥ मोहितोप्यथ
कामेनतदाविष्णुवचःस्मरन् ॥ इयेषहन्तुम्ब्रह्माणंशूलमुद्यम्यशंकरः ॥ ३२ ॥ शम्भुनोद्यमितेशूलेविधिंहन्तुन्द्विजोत्तमाः ॥ मरीचिनारदा
द्यास्तेचकुर्हाहाकृतिंतदा ॥ ३३ ॥ दक्षोमैवम्मैवमितिपाणिमुद्यम्यशंकितः ॥ वारयामासभूतेशङ्क्षिप्रमेवपुरोगतः ॥ ३४ ॥ अथाग्रेमिलितंवी
क्ष्यतदादक्षम्महेश्वरः ॥ प्रत्युवाचाप्रियमिदंस्मारयन्वैष्णवीङ्गिरम् ॥३५॥ ईश्वरउवाच ॥ ॥ नारायणेनविप्रेन्द्रयदिदानीमुदीरितम्॥ मया
प्यंगीकृतंकर्त्तुन्तदिहैवप्रजापते॥३६॥एनाय्यँःसाभिलाषःसन्वीक्षतेतहंनिष्यासि ॥इतिवाचन्तुसफलामेनंहत्वाकरोम्यहम् ॥३७॥ साभिलाषः
कथम्ब्रह्मासतींसमवलोकयत्॥अभवत्त्यक्ततेजास्तुततोहान्मिकृतागसम्॥३८॥मार्कण्डेय उवाच॥ तमेवव्वाँदिनव्विँष्णुःक्षिप्रम्भूत्वापुरःसरः ॥
इदमूचेवारयँस्तंहन्तुंसर्वजगत्प्रभुः ॥ ३९ ॥ श्रीभगवानुवाच ॥ नहनिष्यसिभूतेशस्रष्टारञ्जगतांवरम् ॥ अनेनैवसतीभार्य्याभवदर्थेप्रकल्पि
ता ॥ ४० ॥ प्रजाःस्रष्टुमयंशम्भोप्रादुर्भूतश्चतुर्म्मुखः ॥ अस्मिन्हतेजगत्स्रष्टानास्त्यन्यःप्राकृतोधुना ॥ ४१ ॥ सृष्टिस्थित्यन्तकर्माणिकरि
ष्यामः कथम्पुनः ॥ अनेनापिमयाचैवभवताचसमञ्जसम् ॥ ४२ ॥ एकस्मिन्निहतेमीषुकस्तत्कर्म्मकरिष्यति ॥ तस्मान्नवध्योभवताविधा

तावृषभध्वज ॥ ४३ ॥ ईश्वरउवाच ॥ ॥ प्रतिज्ञाम्पूरयिष्यामिहत्वैवञ्चतुराननम् ॥ अहमेवप्रजाःस्रक्ष्येस्थावराणिचराणिच ॥ ४४ ॥
अन्यंस्रक्ष्येविधातारमथवाहंस्वतेजसा ॥ सएवसृष्टिकर्तास्यात्सर्वदामदनुज्ञया ॥ ४५ ॥ हत्वैनञ्चैँधिमेवाहम्प्रतिज्ञाम्पालयान्विभो ॥
स्रष्टारमेकंस्रक्ष्यामिनवारयचतुर्भुज ॥ ४६ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इतितस्यवचःश्रुत्वागिरिशस्यचतुर्भुजः ॥ स्मितप्रसन्नवदनः
पुनर्म्मैवमितीरयन् ॥ ४७ ॥ प्रतिज्ञापूरणङ्कर्त्तुर्य्योग्यमात्मानिनोभवेत् ॥ इत्युवाचाभिवदनमीश्वरस्याद्विजोत्तमाः ॥ ४८ ॥ ततःपुनःशम्भु
रूचेकथमात्माविधिर्म्मम ॥ लक्ष्यतेभिन्नएवायम्प्रत्यक्षेणाग्रतःस्थितः ॥ ४९ ॥ अथप्रहस्यभगवान्मुनीनाम्पुरतस्तदा ॥ इदमूचेमहादेवन्तो
षयन्गरुडध्वजः॥५०॥श्रीभगवानुवाच॥नब्रह्माभवतोभिन्नोनशम्भुर्ब्रह्मणस्तथा॥नचायय्युँवयोर्भिन्नोऽभिन्नत्वंसर्वदातनम्॥५१॥प्रधानस्या
प्रधानस्यभागाभागस्वरूपिणः ॥ ज्योतिर्मयस्यभागोमेयुवामेकोहमंशकः ॥ ५२ ॥ कस्त्वंकोहञ्चकोब्रह्माममैवपरमात्मनः ॥ अंशत्रयमिद
म्भिन्नंसृष्टिस्थित्यन्तकारणम् ॥ ५३ ॥ चिन्तयस्वात्मनात्मानंसंस्तंवङ्कुरुचात्मनि ॥ एकत्वंब्रह्मवैकुण्ठशम्भूनांहृद्गतंकुरु ॥ ५४ ॥ शिरो
ग्रीवादिभेदेनयथैकस्यैवधर्म्मिणः ॥ अङ्गानिमेतथैकस्यभागत्रयमिदंहर ॥ ५५ ॥ यज्ज्योतिरग्र्यंस्वपरप्रकाशंकूटस्थमव्यक्तमनन्तरूपम् ॥
नित्यञ्चदीर्घादिविशेषणाद्यैर्हीनम्परन्तच्चवयन्नभिन्नाः ॥५६॥ मार्कण्डेय उवाच ॥ एतच्छ्रुत्वावचस्तस्यमहादेवोविमोहितः ॥ जानन्सचाप्य
भिन्नत्वंसद्विस्मृत्यान्यचिन्तनात् ॥ ५७ ॥ पुनःपप्रच्छगोविन्दमनन्यत्वन्त्रिभेदिनाम् ॥ ब्रह्मविष्णुत्र्यम्बकानामेकस्यचविशेषकम् ॥५८॥

१ परिचयम्।

ततोनारायणःपृष्टःकथयामासशम्भवे ॥ अनन्यत्वन्त्रिदेवानामेकत्वञ्चव्यदर्शयत् ॥५९॥ श्रुत्वाततोविष्णुमुखाब्जकोशादनन्यताविष्णुविधी
शतत्त्वे ॥ दृष्ट्वास्वरूपञ्चजघाननैनंव्विधिम्मृडःपुष्पमधूकराभम् ॥६०॥ इतिकालिकापुराणेएकादशोध्यायः ॥११॥ ऋषयऊचुः॥अनन्यत्व
न्त्रिदेवानाय्यँज्जगादजनार्दनः ॥ शम्भवेतद्वयंश्रोतुमिच्छामोद्विजसत्तम ॥१॥ एकत्वन्दर्शयामासकथंवागरुडध्वजः ॥ तत्समाचक्ष्वविप्रे
न्द्रपरंकौतूहलंहिनः ॥२॥ ॥ मार्क्कण्डेय उवाच ॥ शृणुध्वम्मुनयोगुह्यम्परमंप्रयतम्परम् ॥ त्रिदेवानामनन्यत्वन्तथैवैकत्वदर्शनम् ॥३॥ हरे
णपृष्टोगोविन्दस्तंसमाभाष्यसादरम् ॥ इदमाहमुनिश्रेष्ठाअभिन्नप्रतिपादकम् ॥४॥ ॥ श्रीभगवानुवाच ॥ इदन्तमोमयंसर्व्वमासीद्भुवनवर्ज्जि
तम्॥ अप्रज्ञातमलक्ष्यञ्चप्रसुप्तमिवसर्व्वतः॥५॥नदिवारात्रिभागोत्रनाकाशन्नचकाश्यपी ॥ नज्योतिर्नजलंवायुर्न्नान्यत्किञ्चनसांस्थितम् ॥६॥
एकमासीत्परम्ब्रह्मसूक्ष्मन्नित्यमतीन्द्रियम् ॥ अव्यक्तञ्ज्ञानरूपेणद्वैतहीनविशेषणम् ॥७॥ प्रकृतिःपुरुषश्चैवनित्यौद्वौसर्व्वसंहितौ ॥ स्थितः
कालोपिभूतेशजगत्कारणमेककम् ॥ ८ ॥ यदेकम्परमम्ब्रह्मतत्स्वरूपापरंहर ॥ रूपत्रयमिदन्नित्यन्तस्यैवजगतःपतेः ॥ ९ ॥ कालोनामाप
रंरूपमनाद्यन्तत्तुकारणम् ॥ सर्व्वेषामेवभूतानामवच्छेदेनसंगतः ॥ १० ॥ ततस्तत्स्वप्रकाशेनभास्वद्रूपम्प्रकाशते ॥ पुरासृष्ट्यर्थमतुलंक्षो
भयन्प्रकृतिंस्वयम् ॥११॥ संक्षुब्धायान्तुप्रकृतौमहत्तत्त्वमजायत ॥ महत्तत्त्वात्ततःपश्चादहंकारस्त्रिधाभवत् ॥१२॥ अहंकारेतुसञ्जातेशब्दत
न्मात्रतस्ततः ॥ आकाशमसृजद्विष्णुरनन्तम्मूर्त्तिवर्ज्जितम् ॥ १३ ॥ ततस्तुरसतन्मात्रादपःसृष्ट्वामहेश्वरः ॥ निराधारःस्वयन्दध्रेतास्तदा
निजमायया ॥ १४ ॥ ततस्त्रिगुणसाम्येनसंस्थिताम्प्रकृतिंप्रभुः ॥ पुनः संक्षोभयामाससृष्ट्यर्थम्परमेश्वरः ॥ १५ ॥ ततःसाप्रकृतिस्तासुबी

जन्त्रिगुणभागवत् ॥ अप्सुसंसर्ज्जयामासजगद्बीजान्निराकुलम् ॥ १६॥ तद्विवृद्धंक्रमेणैवहैममण्डमभून्महत् ॥ जग्राहापःसमस्तास्तागर्भ
एवतदंडकम् ॥ १७ ॥ अप्सुस्थितासुहैमाण्डगर्भोविष्णुस्तदण्डकम् ॥ तथैवमाययादध्रेब्रह्माण्डमतुलम्पुनः ॥१८॥ वारिणावह्निभिश्चैववायु
भिर्व्योमसातथा॥बहिस्तदण्डकञ्छन्नंशर्व्वपार्श्वेसमन्ततः॥१९॥सप्तसागरमानेनतथानद्यादिमानतः॥ब्रह्माण्डाभ्यन्तरेतोयन्तदन्यत्तुबहिर्गतम्
॥२०॥तदन्तःस्वयमेवासौविष्णुर्ब्रह्मस्वरूपधृक्॥दैवंवर्षसुषित्वैवप्रबिभेदतदण्डकम्॥२१॥तस्मात्समभवन्मेरुरुत्पन्नोस्मिन्महेश्वरः ॥ जरायुः
पर्वताजातासमुद्राःसप्ततज्जलात् ॥२२॥ तन्मध्येगन्धतन्मात्रात्पृथिवीसमजायत॥ईश्वरेणप्रकृत्याचयोजितात्रिगुणात्मिका ॥ २३ ॥ प्रागे
वपर्वतादिभ्यःसमुत्पन्नावसुन्धरा ॥ ब्रह्माण्डखण्डसय्योगाद्दृढाभूतातुसाभृशम् ॥ २४ ॥ तस्यामेवास्थितोब्रह्मासर्वलोकगुरुःस्वयम् ॥ यदा
ब्रह्माण्डमध्यस्थोब्रह्माव्यक्तोनचाभवत् ॥ २५ ॥ तदैवरूपतन्मात्रात्तेजः सम्यगजायत ॥ वायुस्तुस्पर्शतन्मात्रात्प्रकृत्याविनियोजितात्
॥ २६ ॥ बभूवसर्वभूतानाम्प्राणभूतःसमन्ततः ॥ अद्भिस्तेजोभिरतुलैर्वायुभिर्व्योमसातथा ॥ २७ ॥ अंतर्बहिस्तदण्डस्यव्याप्तमन्यत्तुगर्भ
गम् ॥ ततोब्रह्मशरीरन्तुत्रिधाचक्रेमहेश्वरः ॥ २८ ॥ प्रधानेच्छावशाच्छम्भोस्त्रिगुर्णात्रिगुणीकृतम् ॥ तदूर्द्धभागःसञ्जातश्चतुर्वक्त्रश्चतुर्भुजः
॥ २९ ॥ पद्मकेशरगौरांगकायोब्राह्मो महेश्वरः ॥ तन्मध्यभागोनीलांगएवक्त्रश्चतुर्भुज ॥ ३० ॥ शंखचक्रगदापद्मपाणिःकायःसवैष्णवः ॥
अभवत्तदधोभागःपञ्चवक्त्रश्चतुर्भुजः ॥ ३१ ॥ स्फटिकाभ्रसमःशुक्लःसकायश्चन्द्रशेखरः ॥ इतस्ततोब्रह्मकायेसृष्टिशक्तिन्ययोजयत
॥ ३२ ॥ स्वयमेवाभवत्स्रष्टाब्रह्मरूपेणलोकभृत् ॥ स्थितिशक्तिन्निजाम्मायाम्प्रकृत्याख्यांन्ययोजयत् ॥ ३३ ॥ महेशोवैष्णवेकायेज्ञानश

क्तिन्निजान्तथा ॥ स्थितिकर्त्ताभवद्विष्णुरहमेवमहेश्वरः ॥ ३४ ॥ सर्वशक्तिनियोगेनसदातद्रूपतामम ॥ अन्तशक्तिन्तथाकायेशाम्भवेसन्य
योजयत् ॥ ३५ ॥ अन्तकर्त्ताभवच्छम्भुःसएवपरमेश्वरः ॥ ततस्त्रिषुशरीरेषुस्वयमेवप्रकाशते ॥ ३६ ॥ ज्ञानरूपम्परञ्ज्योतिरनादिर्भग
वान्प्रभुः ॥ सृष्टिस्थित्यन्तकरणादेकएवमहेश्वरः ॥३७॥ ब्रह्माविष्णुःशिवश्चेतिसञ्ज्ञामापपृक्पृथक् ॥ अतस्त्वञ्चविधाताचतथाहमपिनपृथ
क् ॥ ३८ ॥ एवंशरीरंरूपञ्चज्ञानमस्माकमन्तरम् ॥ मार्कण्डेयउवाच ॥ एतच्छ्रुत्वावचस्तस्यविष्णोरमिततेजसः ॥ ३९ ॥ हर्षोत्फुल्लमुखः
प्रोचेपुनरेवजनार्द्दनम् ॥ ॥ ईश्वरउवाच ॥ ॥ एकएवमहेशश्चज्योतीरूपोनिरञ्जनः ॥ ४० ॥ कावामायाथकःकालःकावाप्रकृतिरुच्यते
केपुमांसस्ततोभिन्नाभिन्नाश्चेत्कथमेकता ॥ ४१ ॥ तन्मेवदस्वगोविन्दतत्प्रभावयँयथातथम् ॥ श्रीभगवानुवाच ॥ त्वमेवपश्यसिसदाध्या
नस्थःपरमेश्वरम् ॥ ४२ ॥ आत्मन्यात्मस्वरूपन्तज्ज्योतीरूपंसदक्षरम् ॥ मायाञ्चप्रकृतिङ्कालम्पुरुषञ्चस्वयंविभो ॥ ४३ ॥ ज्ञातात्वन्ध्या
नयोगेनतस्माद्ध्यानपरोभव ॥ माययामोहितोयस्मादधुनात्वस्मदीयया॥४४॥ततोविस्मृत्यपरमञ्ज्योतिर्हिवनितारतः॥अधुनाकोपयुक्तस्त्वँ
व्विस्मृत्यात्मानमात्मनि॥४५॥माम्पृच्छसिप्रकृत्यादिरूपाणिप्रमथाधिप॥मार्कण्डेयउवाच॥ततस्तत्रमहादेवःश्रुत्वावाक्यंसुनिश्चितम्॥४६॥
मुनीनाम्पश्यताय्योगयुक्तोध्यानपरोभवत् ॥ आसाद्यबन्धम्पर्य्यङ्कन्निर्निमीलितलोचनः ॥४७॥ आत्मानञ्चिन्तयामासतदात्मानिमहेश्वरः॥
परञ्चिन्तयतस्तस्यशरीराँव्विबभौशुभम् ॥४८॥ तेजोभिरुज्ज्वलन्द्रष्टुन्नशेकुर्म्मुनयस्तदा॥तत्क्षणाद्ध्यानयुक्तश्चशम्भुःसविष्णुमायया॥४९॥
परित्यक्तोतिविबभौतपस्तेजोभिरुज्ज्वलः ॥ येयेगणास्तदातस्थुःसेवयाशङ्करान्तिके ॥ ५० ॥ नतेपिवीक्षितुंशेकुःशंकरञ्चा

१ लुप्तम् ।

दिवाकरम् ॥ स्वयमेवतदाविष्णुःसमाधिमनसोभृशम् ॥५१॥ प्रविवेशशरीरांतर्ज्योतीरूपेणधूर्जटेः ॥ प्रविश्यतस्यजठरेयथासृष्टिक्रमःपुरा ॥
॥ ५२ ॥ तथैवदर्शयामासस्वयन्नारायणोव्ययः ॥ नस्थूलन्नचसूक्ष्मञ्चनविशेषणगोचरम् ॥५३॥ नित्यानन्दन्निरातंकमेकंशुद्धमतीन्द्रियम्॥
अदृश्यंसर्व्वद्रष्टारन्निर्गुणम्परमम्पदम् ॥ ५४ ॥ परमात्मानमानन्दंजगत्कारणकारणम् ॥ प्रथमन्ददृशेशम्भुरात्मानन्तत्स्वरूपिणम् ॥
॥ ५५ ॥ तत्रप्रविष्टमनसावहिर्ज्ञानविवर्ज्जितः ॥ तस्यैवरूपम्प्रकृतिंसृष्ट्यर्थेभिन्नतांगताम् ॥५६॥ ददर्शतस्यैवाभ्याशेपृथग्भूतांमिवैकिकाम् ॥
पुरुषाँश्चददर्शासौयथैववसतस्ततः ॥ ५७ ॥ अग्नेरिवकणात्स्थूलादजस्रन्द्विजसत्तमाः ॥ तदेवकालरूपेणाभासतेचमुहुर्मुहुः ॥ ५८ ॥ सृष्टि
स्थित्यन्तयोगानामवच्छेदेनकारणम् ॥ प्रकृतिःपुरुषश्चैवकालोपिचमुहुर्म्मुहुः ॥ ५९ ॥ अभिन्नान्भाषमाणाँश्चसर्ग्गार्थेभिन्नतांगतान् ॥ पृथ
ग्भूतानभिन्नाँश्चददृशेचेन्दुशेखरः ॥ ६० ॥ एकमेवाद्वयम्ब्रह्मनेहनानास्तिकिञ्चन ॥ सप्रधानस्वरूपेणकालरूपेणभासते ॥ ६१ ॥ तथापु
रुषरूपेणसंसारार्थम्प्रवर्त्तते ॥ भोगार्थम्प्राणिनांशश्चच्छरीरेचप्रवर्त्तते ॥६२॥ सैवमायायाप्रकृतिःसामोहयतिशंकरम् ॥ हरिन्तथाविरिञ्चिञ्चत
थैवान्यजनुर्भवान् ॥ ६३ ॥ मायाख्याप्रकृतिर्ज्जाताजन्तून्संमोहयत्यपि ॥ साक्षीरूपेणचसदालक्ष्मीभूताहरेःप्रिया ॥ ६४ ॥ सासावि
त्रीरतीसन्ध्यासासतीसैववीरिणी ॥ बुद्धिरूपास्वयन्देवीचण्डिकेतिचगीयते ॥ ६५ ॥ इतिस्वयन्ददर्शाशुध्यानमार्ग्गगतोहरः ॥ महदा
दिप्रभेदेनतथासृष्टिक्रमंस्वयम् ॥ ॥ ६६ ॥ दर्शयित्वाहरिःकालम्प्रकृतिम्पुरुषाँस्तथा ॥ तथान्यद्दर्शयामासतच्छरीरद्विजोत्तमाः
॥ ६७ ॥ ॥ इतिश्रीका० द्वादशोध्यायः ॥ १२ ॥ छ ॥ मार्क्कण्डेयउवाच ॥ ततोब्रह्माण्डसंस्थानन्दर्शयामासशम्भवे ॥ ववृधेतोयरा

शिस्थम्ब्रह्माण्डञ्चयथापुरा ॥ १ ॥ तन्मध्येपद्मगर्भाभम्ब्रह्माणञ्चजगत्पतिम् ॥ ज्योतीरूपम्प्रकाशार्थंसृष्टयर्थञ्चपृथग्गतम् ॥ २ ॥
शरीरिणञ्चददृशे ब्रह्माण्डान्तर्गतम्मुहुः ॥ चतुर्भुजम्प्रकाशन्तञ्ज्योतिर्भिः कमलासनम् ॥ ३ ॥ तत्रैवचत्रिधाभूतञ्चँपुर्ब्राह्मन्द
दर्शसः ॥ ऊर्ध्वमध्यान्तभागैश्चब्रह्मविष्णुशिवात्मकम् ॥ ४ ॥ यथोर्ध्वभागोत्रपुषोब्रह्मत्वमगमत्तदा ॥ मध्यँय्यथाविष्णुभूतन्ददर्शान्तस्य
शम्भुताम् ॥ ५ ॥ एकमेवशरीरन्तुत्रिधाभूतम्मुहुर्म्मुहुः ॥ हरोददर्शस्वेगर्भेतथासर्व्वमिदञ्जगत् ॥ ६ ॥ कदाचिद्वैष्णवङ्कायम्ब्राह्मेकायेल
यञ्व्रँजेत् ॥ ब्राह्मन्तथावैष्णवेचशाम्भवेवैष्णवन्तथा ॥ ७ ॥ शाम्भवंवैष्णवेकायेब्राह्मञ्चाँप्यथशाम्भवे ॥ गच्छन्तल्लीनतांशम्भुरेकताञ्चमु
हुर्म्मुहुः॥८॥ददर्शवामदेवोपिभिन्नञ्चाप्यपृथग्गतम् ॥ परमात्मनिगच्छन्तल्लीनतान्तद्वपुःस्वयम्॥९॥तन्मध्येपृथिवींशम्भुर्ददर्शावितताञ्जले॥
महापर्वतसंघातैर्विरलंस्थगितान्नतः॥१०॥पुनर्ददर्शब्रह्माणंकुर्वन्तंसर्ग्गमादितः ॥ आत्मनञ्चपृथग्भूताञ्विँष्णुञ्चगरुडासनम् ॥११॥ दक्षम्प्रजाप
तिंतत्रतथैवचनिजान्गणान्॥मरीच्यादीन्दशतथावीरिणीञ्चतथासतीम्॥१२॥ संध्यांरतीञ्चकन्दर्प्पंशृंगारंसवसन्तकम्॥हावान्भावांस्तथामारा
न्नृपीन्देवान्मरुद्गणान् ॥ १३ ॥ मेघांश्चचन्द्रंसूर्य्यञ्चवृक्षान्वल्लीस्तृणानिच ॥ सिद्धान्विद्याधरान्यक्षान्राक्षसान्किन्नरांस्तथा ॥१४॥ मानुषां
श्चभुजंगांश्चग्राहान्मत्स्यांश्चकच्छपाम् ॥ उल्कानिर्घातकेतूंश्चकृमिकीटपतंगकान् ॥ १५ ॥ कांचिद्ददर्शवनितान्द्वन्द्वभावम्प्रकुर्वतीम् ॥
उत्पन्नमुत्पद्यन्तञ्चविपद्यन्तञ्चकञ्चन ॥१६॥ हसतोरमतःकांश्चित्काश्चिद्विलपतस्तथा॥धावतश्चापराञ्छम्भुर्ददर्शपरमेश्वरः ॥१७॥ दिव्या

लंकारसञ्छन्नामालाचन्दनचर्चिताः ॥ वीक्षाञ्चचक्रिरेकेचिच्छम्भुनाक्रीडितामुहुः ॥१८॥ स्तुवन्तःप्रस्तुवन्तश्चशम्भुंविष्णुन्तथाविधिम् ॥
केचिद्दृशिरेतेनमुनयश्चतपोधनाः ॥ १९ ॥ तपांसिचरतः केचिन्नदीतीरेतपोवने ॥ स्वाध्यायवेदनिरताः पाठयन्तश्चकेचन ॥ २० ॥
तथैवसागराःसप्तनद्योदेवसरांसिच ॥ तथैवपर्वतस्थोसौदृदृशेशम्भुना स्वयम् ॥ २१ ॥ मायालक्ष्मीस्वरूपेणहरिंसम्मोहयत्परम् ॥ सती
रूपातथात्मानम्मोहयन्तीतिशंकरः ॥ २२ ॥ सत्यासार्द्धंस्वयंरेमेकैलासेमेरुपर्वते ॥ मन्दरेदेवविपिनेशृंगाररससेविते ॥ २३ ॥ सतीदेहन्त
थात्यक्ताजाताहिमवतःसुता ॥ यथाप्रापपुनस्तान्तुयथाचैवान्धकोहतः ॥ २४ ॥ कार्त्तिकेयःसमुत्पन्नोयथाहंस्तारकाह्वयम् ॥ तत्सर्वंविस्तरा
त्सम्यग्ददर्शवृषभध्वजः ॥ २५ ॥ हिरण्यकशिपुर्जघ्नेनरसिंहस्वरूपिणा ॥ यथाहतःकालनेमिर्हिरण्याक्षोयथाहतः ॥ २६ ॥ विष्णुनायादृशं
युद्धन्दानवौघैःपुराकृतम् ॥२७॥ यथायेयेचनिहतास्तत्सर्व्वन्ददृष्टवान्हरः ॥ २८ ॥ जगत्प्रपञ्चान्ब्रह्मादीन्नक्षत्रग्रहमानुषान् ॥ सिद्धविद्याधरादीं
श्चदृष्ट्वादृष्ट्वापृथक्पृथक् ॥ २९ ॥ आत्मानन्तान्त्संहरन्तन्ददृशेशम्भुरीश्वरः ॥ संहारान्तेददर्शासौब्रह्मविष्णुमहेश्वरान् ॥ ३० ॥ शून्यं
समभवत्सर्व्वञ्जगदेतच्चराचरम् ॥ शून्येजगतिसर्व्वस्मिन्ब्रह्माविष्णुशरीरगः ॥ ३१ ॥ लीनःशम्भुश्चतस्यैवशरीरम्प्राविवेशह ॥
एकमेवददर्शासौविष्णुमव्यक्तरूपिणम् ॥ ३२ ॥ नान्यत्किञ्चिद्ददर्शासौतदाविष्णुमृतेहरः ॥ अथविष्णुञ्चददृशेलयन्तम्परमात्मानि ॥
॥ ३३ ॥ भासमानम्परन्तत्त्वेज्योतीरूपेसनातने ॥ ततोज्ञानमयन्नित्यमान्दम्ब्रह्मणःपरम् ॥ ३४ ॥ केवलञ्ज्ञानगम्यञ्चददर्श

१ वीक्षणं वीक्षा गुरोश्चहलइत्यप्रत्ययः ॥ २ आगमशास्त्रनित्यंत्वाननुम् ॥

न्यन्नकिञ्चन ॥ एकत्वञ्चपृथक्त्वञ्चजगतःपरमात्मनि ॥ ददर्शस्वशरीरान्तःसर्ग्गस्थित्यन्तसय्यँमान् ॥ ३५ ॥ प्रकाशम्परमात्मानंशान्त
न्नित्यमतीन्द्रियम् ॥ एकमेवाद्वयम्ब्रह्मददर्शान्यन्नकिञ्चन ॥ ३६ ॥ कोवाविष्णुर्हरःकोवाकोब्रह्माकिमिदञ्जगत् ॥ इतिभेदोनजगृहे
शम्भुनापरमात्मना ॥ ३७ ॥ एवंसम्पश्यतस्तस्यशरीराभ्यन्तराद्बहिः ॥ निःससारथमायापिप्रविवेशवृषध्वजम् ॥ ३८ ॥ अनन्य
त्वम्पृथक्त्वञ्चदर्शयित्वाजनार्द्दनः ॥ शम्भवेतच्छरीरात्तुबहिर्भूतस्ततोद्रुतम् ॥ ३९ ॥ अथत्यक्तसमाधेस्तुहरस्यचलितात्मनः ॥ सती
म्मनोजगामाशुमोहितस्यचमायया ॥ ४० ॥ ततोमुहुर्हरोवक्रन्दाक्षायण्यामनोहरम् ॥ प्रबुद्धकमलाकारंवीक्षाञ्चक्रेद्विजोत्तमाः ॥ ४१ ॥
ततोदक्षमरीच्यादीन्त्स्वगणान्कमलासनम् ॥ विष्णुञ्चतत्रसंवीक्ष्यशंकरोविस्मितोभवत् ॥ ४२ ॥ अथतंविस्मयाविष्टम्महादेवव्वृँषध्वजम् ॥
स्मितप्रफुल्लवदनंहरमाहजनार्द्दनः ॥ ४३ ॥ श्रीभगवानुवाच ॥ ॥ यद्यत्पृष्टन्त्वयैकत्वेभिन्नतायाञ्चशंकर ॥ त्रयाणामथदेवानान्तज्ज्ञात
मधुनात्वया ॥४४॥ प्रकृतिःपुरुषश्चैवकालोमायानिजान्तरे ॥ त्वयाज्ञातामहादेवकीदृशास्तेचकेपुनः ॥४५॥ एकम्ब्रह्मसदाशान्तन्नित्यञ्चप
रमम्महत् ॥ तत्कथम्भिन्नतांजातन्दृष्टन्तत्कीदृशन्त्वया ॥४६॥मार्कंडेयउवाच ॥ इतिपृष्टोभगवताभगवान्वृषभध्वजः ॥ जगादहरयेतथ्यमे
तद्वाक्यन्द्विजोत्तमाः ॥ ४७ ॥ ईश्वरउवाच ॥ एकंशिवंशान्तमनन्तमच्युतम्ब्रह्मास्तितस्मान्नहिकिञ्चिदीदृशम् ॥ तस्मादभिन्नंसकलञ्जगद्धरेः
कालादिरूपाणिचसृष्टिहेतुः ॥ ४८ ॥ समस्तभूतप्रभवन्निरञ्जनव्वँयञ्चतस्यैवसदांशरूपिणः ॥ सृष्टिस्थितिंसय्यँमनन्तदीरितंरूपत्रयन्तस्य
विभातिभेदतः ॥ ४९ ॥ नाहन्नचत्वन्नहिरण्यगर्भोनकालरूपम्प्रकृतिन्नचान्यम् ॥ तत्प्रेरणांकर्त्तुमलञ्चकिञ्चिद्विनापिरूपंसदपीहतस्य ॥५०॥

श्रीभगवानुवाच ॥ ॥ इतितत्त्वन्त्वयाप्रोक्तञ्ज्ञानञ्चवृषभध्वज ॥ तदंशभूतास्तुवयम्ब्रह्मविष्णुपिनाकिनः ॥ ५१ ॥ तस्मात्त्वयानवध्योयं
विरिञ्चिस्तवचेद्भवेत् ॥ एकताविदिताशम्भोब्रह्मविष्णुपिनाकिनाम् ॥ ५२ ॥ मार्कण्डेयउवाच ॥ ॥ इतितस्यवचःश्रुत्वाविष्णोरमिततेजसः ॥ नजघानमहादेवोविधिन्दृष्ट्वाथचैकताम् ॥ ५३ ॥ इतिवःकथितंविष्णुर्य्यथानन्यत्वमादिशत् ॥ शम्भवेप्रस्तुतन्तद्वःकथयामिपुनर्द्विजाः ॥ ५४ ॥ इतिकालिकापुराणेत्रयोदशोध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ जलदेष्वथगर्जत्सुमहादेवःसतीपतिः ॥
विसृज्यविष्णुप्रभृतीञ्जगामहिमवद्गिरिम् ॥ १ ॥ आरोप्यवृषभेतुङ्गेसतीमामोदशालिनीम् ॥ जगामहिमवत्प्रस्थंरम्यङ्कुञ्जसमन्वितम् ॥ २ ॥
अथसाशंकराभ्याशेसुदतीचारुहासिनी ॥ विरेजेवृषभस्थातिचन्द्रान्तेकालिकोपमा ॥ ३ ॥ ब्रह्मादयश्चतेसर्वेमरीच्याद्याश्चमानसाः ॥ दक्षोपि
सर्वेमुदिताअभवन्त्ससुरासुराः ॥ ४ ॥ केचिच्छङ्खान्वादयन्तः केचित्तालस्वनङ्गणाः ॥ केचिद्धास्यम्प्रकुर्वन्तोअनुजग्मुर्व्वृषध्वजम् ॥ ५ ॥
विसृष्टाअपिब्रह्माद्याःशम्भुनापुनरेवते ॥ अनुजग्मुःकियद्दूरम्मुदापरमयायुताः ॥ ६ ॥ ततःशम्भुंसमाभाष्यब्रह्माद्यामानसाश्चते ॥ स्वंस्वंस्था
नन्तदाजग्मुःस्यन्दनैराशुगामिभिः ॥ ७ ॥ देवाश्चसर्वेसिद्धाश्चतथैवाप्सरसाङ्गणाः ॥ यक्षविद्याधराद्याश्चयेयेतत्रसमागताः ॥ ८ ॥ तेहरेण
विसृष्टास्तुगतवन्तोनिजास्पदम् ॥ बभूवुरामोदयुताःकृतदारेवृषध्वजे ॥ ९ ॥ ततोहरःसस्वगणःस्वंस्थानम्प्राप्यमोदनम् ॥ कैलासन्तत्रवृष
भादवतारयतिप्रियाम् ॥ १० ॥ ततोविरूपाक्षइमाम्प्राप्यदाक्षायणींगणान् ॥ स्वीयान्विसर्ज्जयामासनन्द्यादीन्गिरिकन्दरात् ॥ ११ ॥ उवाच
शम्भुस्तान्त्सर्वान्नन्द्यादीनतिसूनृतम् ॥ यदाहंवःस्मराम्यत्रस्मरणाच्चलमानसाः ॥ १२ ॥ समागमिष्यथतदामत्पार्श्वम्भोस्तदातदा ॥

इत्युक्तेवामदेवेनतेनन्दिभैरवादयः ॥ १३ ॥ महाकोपीप्रपातायजग्मुस्तुहिमवद्गिरौ ॥ ईश्वरोपितयासार्द्धंतेषुयातेषुमोहितः ॥ १४ ॥ दाक्षाय
ण्याचिरंरेमेरहस्यनुदिनम्भृशम् ॥ कदाचिद्वन्यपुष्पाणिसमाहृत्यमनोहराम् ॥ १५ ॥ मालांविधायसत्यास्तुशिरःस्थानेन्ययोजयत् ॥ कदा
चिद्दर्प्पणेवक्त्रंवीक्षन्तीमात्मनःसतीम् ॥१६॥ अनुगम्यहरोवक्त्रंस्वीयमप्यवलोकयत् ॥ कदाचित्कुन्तलांस्तस्याउल्लास्योल्लासमागतः॥१७॥
बध्नातिमोचयत्येवंशश्वत्संमार्ज्जयत्यपि ॥ सरागौचरणावस्यायावकेनोज्ज्वलेनच ॥ १८ ॥ निसर्ग्गरक्तौकुरुतेपुरारागात्वृषध्वजः ॥ उच्चैरपि
यदाख्येयमन्येषाम्पुरतोमुहुः ॥ १९ ॥ तत्कर्ण्णेकथयत्यस्याहरोद्रष्टुन्तदाननम् ॥ नदूरमपिगत्वासौसमागम्यप्रयत्नतः ॥ २० ॥ अनुबध्ना
तितामक्षिणपृष्ठदेशेऽन्यमानसाम् ॥ अन्तर्हितस्तुतत्रैवमाययावृषभध्वजः ॥२१॥ तामालिलिङ्गभीत्यासाचकिताव्याकुलाभवत् ॥ सौवर्ण्ण
पद्मकलिकातुल्येतस्याःकुचद्वये ॥ २२ ॥ चकारभ्रमराकारम्मृगनाभिविशेषकम् ॥ हारमस्याःकुचयुगाद्वियोज्यसहसाहरः ॥ २३ ॥ नियो
जयतितत्रैवसकरस्पर्शनंमुहुः ॥ अंगदान्वलयान्वर्म्मीविश्लेष्यचपुनःपुनः ॥ २४ ॥ तत्स्थानात्पुनरेवासौतत्स्थानेप्रयुयोजच ॥ कालिकेयंस
मायातिसवर्ण्णातिसखीतिताम् ॥ २५ ॥ पश्येत्यस्यास्तथेच्छन्त्याःप्रोक्ताजग्राहतत्कुचौ ॥ कदाचिन्मदनोन्मादचेतनःप्रमथाधिपः ॥ २६ ॥
चकारनर्म्मकर्म्माणितयाहृत्प्रिययामुदा ॥ आहृत्यपद्मपुष्पाणिवन्यपुष्पाणिशंकरः ॥ २७ ॥ पुष्पाभरणसर्वांगींकुरुतेस्मकदाचन ॥ गिरि
कुञ्जेषुरम्येषुतयासहसतीपतिः ॥ २८ ॥ विजहारसमस्तेषुवनेषुमुदितोहरः ॥ नयानेनोपवेशेचनास्थितौनापिचेष्टिते ॥ २९ ॥ तयाविनाक्षण

१ कंचुकी ।

मपिशर्म्मलेभेवृषध्वजः ॥ विहृत्यसुचिरंकालंकैलासगिरिकन्दरे ॥ ३० ॥ महाकोषीप्रपातायजगामहिमवद्गिरौ ॥ तस्मिन्प्रविष्टेहिमवत्प
र्वतेवृषभध्वजे ॥ ३१ ॥ कामोपिसहमित्रेणरत्याचप्रजगामह ॥ तस्मिन्प्रविष्टेकामेतुवसन्तः शंकरान्तिके ॥ ३२ ॥ विततानिजाःश्रीश्च
वृक्षेतोयेतथाभुवि ॥ सर्वेसुपुष्पितावृक्षालताश्चान्याःसुपुष्पिताः ॥ ३३ ॥ अम्भांसिफुल्लपद्मानिपद्मेषुभ्रमरास्तथा ॥ प्रविष्टेतत्रसुरभौप्रववुर्म्म
लयानिलाः ॥ ३४ ॥ सुगन्धिपुष्पगन्धेनमोहिताश्चपुरन्ध्रयः ॥ मुनीनामपिचेतांसिप्रमथ्यसुरभिस्तदा ॥ ३५ ॥ स्मरःसारंसमुद्धृत्रेतक्रौघा
दाज्यवत्कृती ॥ सन्ध्यार्द्धचन्द्रसंकाशाः पलाशाश्चविरेजिरे ॥ ३६ ॥ कामास्त्रवत्सुमनसःप्रमोदायाभवत्सदा ॥ बभुःपंचजपुष्पाणिसरःसुस
कलाञ्जनात्॥३७॥सम्मोहयितुमुद्युक्तासुमुखीवाम्बुदेवता॥ नागकेशरवृक्षाश्चस्वर्णवर्णप्रसूनकैः॥३८॥बभुर्म्मदनकेत्वाभामनोज्ञाःशंकरांतिके॥
चंपकास्तरवोहैमपुष्पत्वंप्रकटंमुहुः ॥ ३९ ॥ कुर्वतःप्रचुरैःपुष्पैःसम्यग्रेजुस्तथास्फुटैः ॥ प्रफुल्लपाटलापुष्पैर्दिशःस्युःपाटलांशवः ॥ ४० ॥
यथातथापुष्पितास्तेपाटलाख्यामहीरुहाः ॥ लवंगवल्लीसुरभिर्गंधेनोद्वास्यमारुतम् ॥ ४१ ॥ सम्मोहयतिचेतांसिभृशंका
मिजनेपुरा ॥ वासन्तीवासितास्तत्रबल्वजाःकिलरेजिरे ॥ ४२ ॥ तद्गन्धलुब्धभ्रमरारतिमिश्रामनोहराः ॥ चारुपावकवर्चस्विशिखराश्चूतशा
खिनः ॥ ४३ ॥ बभुर्म्मदनबाणौघपर्य्यङ्कवदनावृताः ॥ अम्भांसिमलहीनानिरेजुःफुल्लकुशेशयैः ॥ ४४ ॥ मुनीनामिवचेतांसिप्रव्यक्त
ज्योतिरुद्गमात् ॥ तुषाराःसूर्य्यरश्मीनांसङ्गमादगमन्क्षयम् ॥ ४५ ॥ ममत्वानीवविज्ञानशालीनांहृदयात्तदा ॥ निःशङ्काःकोकिलाः शब्दन्त

१ देवस्य ।

न्वतेस्मतदान्वहम् ॥ ४६ ॥ प्राणिव्यधन पुष्पेषुपुष्पज्याशब्दवद्भृशम् ॥ चुकूजुर्भ्रमरास्तत्रवनान्तर्गतपुष्पगाः ॥४७ ॥ कान्तालीलावुभु
क्षोस्तुस्मरव्याघ्रस्यशब्दवत् ॥ चन्द्रस्तुपारवद्भानुर्न्नचैताः सकलाःकलाः ॥ ४८ ॥ क्रमाद्भारमोहायजनानांकुशलम्भुवि ॥ प्रसन्नाःसहच
न्द्रेणनिस्तुषारास्तदाभवन् ॥४९॥ विभावर्य्यः प्रियेणेवकामिन्यःसुमनोहराः ॥ तस्मिन्कालेमहादेवःसहसत्याधरोत्तमे ॥५० ॥ रेमेससुचिरं
ञ्छन्नोनिकुञ्जेसनदीषुच ॥ सापितेनसमंरेमेतथादाक्षायणीशुभा ॥ ५१ ॥ यथाहरःक्षणमपिशान्तिन्नापतयाविना ॥ सम्भोगविषयेदेवी
सतीतस्यमनःप्रिया ॥ ५२ ॥ विशतीवहरस्यांगेपाययन्तीवितद्रसम् ॥ तस्याःकुसुममालाभिर्भूषयन्त्सकलांतनुम् ॥ ५३ ॥ स्वहस्तरचिता
भिश्चवरन्नर्म्मचकारसः ॥ आलापैर्व्वीक्षणैर्हासैस्तथासम्भाषणैर्हरः ॥ ५४ ॥ तस्यांविवेशगिरिशःसय्यँमीवात्मसंविदम् ॥ तद्वक्त्रचन्द्रपी
यूषपानस्थिरतनुर्हरः ॥ ५५ ॥ नावापशौषिकीन्तन्वीमवस्थांसकदाचन ॥ तद्वक्त्राम्बुजवासेनतत्सौन्दर्यैश्चनर्म्मभिः ॥ ५६ ॥ गुणैरिवमहा
दन्तीवद्धोनान्यद्विचेष्टते॥५७॥इतिहिमगिरिकुञ्जेप्रस्थभागेदरीषुप्रतिदिनमभिरेमेदक्षपुत्र्यामहेशः॥ ऋतुभुजपरिमाणैःक्रीडतस्तस्यजातानवद
शचमुनीन्द्रावत्सराः पञ्चचान्ये ॥ ५८ ॥ इतिकालिकापुराणे चतुर्द्दशोध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ मार्क्कण्डेय उवाच ॥
॥ कदाचिदथदक्षस्यतनयाजलदागमे ॥ जगादाद्रेः शिखरिणःप्रस्थस्थव्वृँषभध्वजम् ॥ १ ॥ सत्युवाच ॥ घनागमोयंसंप्राप्तःकालःपरमदुः
सहः ॥ अनेकवर्णमेघौघस्थगिताम्बरदिक्चयः ॥ २ ॥ विवांतिवाताहृदयन्दारयन्तोतिवेगिनः ॥ कदम्बरजसाधौतपाथोलेशादिकार्षिणः॥३॥

१ तुषारवद्भानुः तुषारयुक्तकिरणश्चन्द्रः एताः सकलाः कलाः क्रमेणनबभार किंतु एकदवै बभोरत्यर्थः अर्थात्सर्वासुतिथिषु पूर्ण एव चन्द्र उदितवानितियावत् ।

मेघानांगर्ज्जितैरुच्चैर्द्धारासारांश्चिमुञ्चताम् ॥ विद्युत्पताकिनान्तीव्रैः क्षुब्धंकस्यनमानसम्॥४॥नसूर्योदृश्यतेनापिमेघच्छन्नोनिशापतिः ॥ दिवा
पिरात्रिवद्भातिविरहिव्यत्ययाकरम् ॥५॥ मेघानैकत्रतिष्ठन्तोध्वनन्तःपवनेरिताः॥पतन्तइवलोकानान्दृश्यन्तेमूर्ध्निशंकर ॥६॥ वाताहतामहावृ
क्षानृत्यन्तइवचाम्बरे॥दृश्यन्तेहरभीरूणान्त्रासकाःकामुकेप्सिताः ॥७॥ स्निग्धनीलाञ्जनश्याममुदिरौघस्यपृष्ठतः॥बलाकराजीभात्युच्चैर्य्यमुना
घुष्टफेनवत्॥८॥क्षणंक्षणञ्चञ्चलेयन्दृश्यतेकालिकागता॥अम्बुधाविवसन्दीप्तःपावकोवडवामुखः ॥ ९ ॥ प्ररोहन्तिहिशस्यानिमन्दिरप्रांगणेष्व
पि॥किमन्यत्रविरूपाक्षशस्योद्भूतिर्व्वदाम्यहम्॥१०॥श्यामलैराजतैःकक्षैर्व्विशदोयंहिमाचलः॥मन्दराश्रयवृक्षौघपत्रैर्दुग्धाम्बुधिर्य्यथा॥११॥
कुसुमश्रीश्चकुटजम्भेजेसास्याथकिंशुकान् ॥ उच्चावचान्कलौलक्ष्मीर्य्यथासन्त्यज्यसज्जनान् ॥ १२ ॥ मयूराःस्तनयित्नूनांशब्देनहृषिता
मुहुः ॥ केकायन्तेप्रतिवनेसततव्वृष्टिसूचकाः ॥ १३ ॥ मेघोन्मुखानाम्मधुरश्चातकानांस्वनोहर ॥ श्रूयतामतिमत्तानाव्वृष्टिसान्निधिसूचकः
॥ १४ ॥ गगनेशक्रचापेनकृतंसाम्प्रतमास्पदम् ॥ धारासारशरैस्तापम्भेत्तुम्प्रतियथोद्गतः ॥ १५ ॥ मेघानाम्पश्यभग्गेहदुर्न्नयङ्करकोत्करैः ॥
यत्ताडयन्त्यनुगतम्मयूरश्चातकन्तथा ॥ १६ ॥ शिखिसारङ्गयोर्दृष्ट्वामित्रादपिपराभवम् ॥ हंसागच्छन्तिगिरिशविदूरमपिमानसम् ॥ १७ ॥
एतस्मिन्विषमेकालेनीडङ्काकाश्चकोरकाः ॥ कुर्व्वन्तित्वंविनागेहात्कथंशान्तिमवाप्स्यसि ॥ १८ ॥ महतीबाधतेभीतिर्म्मामेघोत्थापि
नाकधृक् ॥ यतस्वतस्माद्वासायमाचिरव्वँचनान्मम ॥ १९ ॥ कैलासेवाहिमाद्रौवामहाकोष्यामथक्षितौ ॥ तवोपयोग्यन्त्वव्वाँसङ्गुरुष्ववृष
भध्वज ॥ २० ॥ एवमुक्तस्तदाशम्भुर्द्दाक्षायण्यातयासकृत् ॥ ईषज्जहासशीर्षस्थचन्द्ररश्मिसिताननः ॥ २१ ॥ अथोवाचसतीन्देवींस्मित

भिन्नोष्ठसम्पुटः ॥ महात्मासर्व्वतत्त्वज्ञस्तोषयन्परमेश्वरीम् ॥ २२ ॥ ईश्वरउवाच ॥ यत्रप्रीत्यैमयाकार्य्योवासस्तवमनोहरे ॥ मेघास्तत्रनगन्तारःकदाचिदपिमत्प्रिये ॥ मेघानितम्बपर्य्यन्तंसञ्चरन्तिमहीभृतः ॥ २३ ॥ सदाप्रालेयधाम्नस्तुवर्षास्वपिमनोहरे ॥ कैलासस्यतथादेवीयावदामेखलङ्घनाः ॥ सञ्चरन्तिनगच्छन्तितस्मादूर्द्ध्वंकदाचन ॥२४॥ सुमेरोर्वारिधेरूर्द्ध्वन्नगच्छन्तिबलाहकाः ॥ जम्बूमूलंसमासाद्यपुष्करावर्त्तकादयः ॥ २५ ॥ एतेषुचगिरीन्द्रेषुयस्योपरितवेहते ॥ मनःप्रियेनिवासायतमाचक्ष्वद्रुतम्मायि ॥ २६ ॥ स्वेच्छाविहारैस्तवकौतुकानिसुवर्ण्णपक्षानिलवृन्दवृन्दैः ॥ शकुन्तवर्ग्गैर्म्मधुरस्वनैस्तेसदोपदेयानिगिरौहिमोत्थे ॥ २७ ॥ सिद्धांगनास्तेसखितासनातनीमिच्छन्त्यएवोपकृतिंसकौतुकाम् ॥ स्वेच्छाविहारैर्म्मणिकुट्टिमेगिरौकुर्व्वन्त्यएष्यन्तिफलादिदानकैः ॥ २८ ॥ यादेवकन्यागिरिकन्यकाश्चयानागकन्याश्चतुरंगमुख्यः ॥ सर्व्वास्तुतास्तेसततंसहायतांसमाचरिष्यन्त्यनुमोदविभ्रमैः ॥ २९ ॥ रूपन्तवेदमतुलव्वँदनंसुचारुदृष्ट्वांगनानिजवपुर्न्निजकान्तिसङ्घम् ॥ हेलान्निजेवपुषिरूपगणेषुनित्यङ्कर्त्तारइत्यनिमिषेक्षणचारुरूपाः ॥ ३० ॥ यामेनकापर्व्वतराजजायारूपैर्ग्गुणैः ख्यातवतीत्रिलोके ॥ साचापितेतत्रमनोनुमोदन्नित्यङ्करिष्यत्यथसूचनाद्यैः ॥ ३१ ॥ पुरन्ध्रिवर्ग्गैर्ग्गिरिराजवन्द्यैः प्रीतिंवितन्वद्भिरुदाररूपाम् ॥ शिक्षासदातेस्वकुलोचितापिकार्य्यान्वहम्प्रीतियुतागुणौघैः ॥ ३२ ॥ विचित्रकोकिलालापमोदकुञ्जगणावृतम् ॥ सदावसन्तप्रभवंगन्तुमिच्छसिकिम्प्रिये ॥ ३३ ॥ नानास्वच्छजलापूर्ण्णसरःशतसमावृतम् ॥ पद्मिनीशतसय्युक्तमचलेन्द्रंहिमालयम् ॥ ३४ ॥ सर्व्वकामप्र

१ वृन्दैरितिवापाठः ।

दैर्व्वृक्षैश्शाद्वलैःकल्पसञ्ज्ञकैः ॥ सञ्छन्नयँस्यकुसुमान्युपयोक्ष्यसितत्रवै ॥ ३५ ॥ प्रशान्तश्वापदगणम्मुनिभिर्य्यतिभिर्व्वृतम् ॥ देवालय
म्महाभागेनानामृगगणैर्व्वृतम् ॥ ३६ ॥ स्फटिकस्वर्ण्णवप्राद्यैराजतैश्चविराजितम् ॥ मानसादिसरोवर्ग्गैरभितःपरिशोभितम् ॥ ३७ ॥
हिरण्मयैरत्ननालैःपंकजैर्मुकुलैर्वृतम् ॥ शिशुमारैस्तथाशंखैःकच्छपैर्मकरैर्झषैः ॥ ३८ ॥ निषेवितैर्मञ्जुलैश्चतथानीलोत्पलादिभिः ॥ देवीशत
स्नानशक्तसर्वगन्धैश्चकुंकुमैः ॥ ३९ ॥ विचित्रस्रग्गन्धजलैरापूर्णैःस्वच्छकान्तिभिः ॥ शाद्वलैस्तरुभिस्तुंगैस्तीरस्थैरुपशोभितैः ॥ ४० ॥
नृत्यद्भिरिवशाखौघैर्व्यञ्जयन्तंस्वसम्भवम् ॥ कादम्बैः सारसैर्मत्तचक्रांगग्रामशोभितैः ॥ ४१ ॥ मधुराराविभिर्मोदकारिभिर्भ्रमरादिभिः ॥
वासवस्यकुबेरस्ययमस्यवरुणस्यच ॥ ४२ ॥ अग्नेःकौणपराजस्यमारुतस्यहरस्यच ॥ पुरीभिःशोभिशिखरमेरुमुच्चैःसुरालयम् ॥ ४३ ॥
रम्भाशचीमेनकादिरम्भोरुगणसेवितम् ॥ किन्त्वमिच्छसिसर्वेषांसारभूतम्महागिरिम् ॥ ४४ ॥ तवदेवीशतयुतासाप्सरोगणसेविता ॥
नित्यञ्चरिष्यतिशचीतवयोग्यांसहायताम् ॥ ४५ ॥ अथवाममकैलासमचलेन्द्रंसदाश्रयम् ॥ स्थानमिच्छसिवित्तेशपुरीपरिविराजितम्
॥ ४६ ॥ गंगाजलौघप्रयतम्पूर्णचन्द्रसमप्रभम् ॥ दरीषुसानुषुसदायक्षकन्याभिरीहितम् ॥ ४७ ॥ नानामृगगणैर्जुष्टम्पद्माकरशता
वृतम् ॥ सर्वैर्गुणैश्चसदृशंसुमेरोरविसुन्दरि ॥ ४८ ॥ स्थानेष्वेतेषुयत्रास्तितवान्तःकरणस्पृहा ॥ तद्भुतम्मेसमाचक्ष्वत्वासंकर्त्तास्मितत्रते
॥ ४९ ॥ मार्कण्डेयउवाच ॥ इतीरितेशंकरेणतदादाक्षायणीशनैः ॥ इदमाहमहादेवंश्लक्ष्णंस्वेच्छाप्रकाशनम् ॥ ५० ॥ सत्युवाच ॥
हिमाद्रावेववसतिमहमिच्छेत्वयासह ॥ नचिरात्कुरुवासँत्वन्तस्मिन्नेवमहागिरौ ॥५१ ॥ ॥ मार्कण्डेयउवाच ॥ अथतद्वाक्यमाकर्ण्यहरःपरम

मोदितः ॥ हिमाद्रिशिखरन्तुंगन्दाक्षायण्यासमंययौ ॥ ५२ ॥ सिद्धांगनागणायुक्तमगम्यम्मेघपक्षिभिः ॥ जगामशिखरन्तुंगंमरी
चवनराजितम् ॥ ५३ ॥ इतिकालिकापुराणेपञ्चदशोध्यायः ॥ १५ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ विचित्रकनकै
रूप्यैःशिखरंरत्नकर्बुरम् ॥ बालार्कसदृशन्तुंगमाससादसतीसखः ॥१॥ स्फटिकाभ्रमयेतस्मिञ्छाद्वलद्रुमराजिते ॥ विचित्रपुष्पवल्लीभिः
सरसीभिश्चसंयुते ॥ २ ॥ प्रफुल्लतरुशाखाग्रगुञ्जद्भ्रमरभूषिते ॥ पंकेरुहैःप्रफुल्लैश्चनीलोत्पलचयैस्तथा ॥ ३ ॥ शोभितेचक्रवाकौघैः
कादम्बैर्हंसमद्गुभिः ॥ प्रमत्तसारसैःक्रौञ्चैर्नीलकण्ठैश्चशब्दिते ॥ ४ ॥ पुंस्कोकिलकलस्वानैर्मधुरैर्मृगसेविते ॥ तुरंगवदनैःसिद्धैरप्स
रोभिःसयुग्मकैः ॥ ५ ॥ विद्याधरीभिर्देवीभिःकिन्नरीभिर्विहारिते ॥ पुरन्ध्रीभिःपार्वतीभिःकन्याभिश्चसमन्विते ॥ ६ ॥ विपञ्चीत
न्त्रिकामन्द्रमृदंगपटहस्वनैः ॥ नृत्यद्भिरप्सरोभिश्चकौतुकोत्थैःसुशोभिते ॥ ७ ॥ दैवीलताभिर्दिव्याभिर्गन्धिनीभिःसमावृते ॥ ऊर्ध्व
प्रफुल्लकुसुमैर्निकुञ्जैरुपशोभिते ॥ ८ ॥ शैलराजपुराभ्याशेशिखरेवृषभध्वजः ॥ सहसत्याचिरंरेमेएवम्भूतेसुशोभने ॥ ९ ॥ तस्मि
न्स्वर्गसमेस्थानेदिव्यमानेनशंकरः ॥ दशवर्षसहस्राणिरेमेसत्यासमम्मुदा ॥ १० ॥ सकदाचित्ततस्थानात्कैलासंयातिशंकरः ॥ कदा
चिन्मेरुशिखरंदेवदेवीवृतम्पुरा ॥ ११ ॥ दिक्पालानान्तथोद्यानंवनानिवसुधातलम् ॥ गत्वागत्वापुनस्तत्ररेमेतेभ्यःसतीसखः ॥
॥ १२ ॥ नजज्ञेसदिवारात्रन्नब्रह्मनतपःसमम् ॥ सत्याहितमनाःशम्भुःप्रीतिमेवचकारह ॥ १३ ॥ एकम्महादेवमुखंसतीपश्यतिसर्वशः ॥

१ वृद्धिनिमित्तस्येतिपुंवद्भावनिषेधः ।

महादेवोऽपिसर्वत्रसदाद्राक्षीत्सतीमुखम् ॥ १४ ॥ एवमन्योन्यसंसर्गादनुरागमहीरुहम् ॥ वर्द्धयामासतुःशम्भुसत्यौभावाम्बुसेचनैः
॥ १५ ॥ एतस्मिन्नन्तरेदक्षोजगतांहितकारकः ॥ महायज्ञंसमारेभेयष्टुंसर्व्वजनान्वितम् ॥१६॥ अष्टाशीतिसहस्राणियत्रजुह्वतिऋत्विजः ॥
उद्गातारश्चतुःषष्टिसहस्राणिमहर्षयः ॥ १७ ॥ अध्वर्यवोऽथहोतारस्तावन्तोनारदादयः ॥ अधिष्ठातास्वयंविष्णुःसहसर्वमरुद्गणैः ॥ १८ ॥
स्वयन्तत्राभवद्ब्रह्मात्रयीविधिनिदर्शकः ॥ तथैवसर्वदिक्पालाद्वारपालाश्चरक्षकाः ॥ १९ ॥ उपतस्थेस्वयं यज्ञःस्वयंवेदीधराभवत् ॥
तनूनपादापिनिजश्चक्रेरूपंसहस्रशः ॥ २० ॥ हविषांग्रहणायाशुतस्मिन्यज्ञमहोत्सवे ॥ आमन्त्र्याशुमरीच्याद्याःपवित्रैकैकधारिणः ॥ २१ ॥
सर्वत्रसामिधेन्योतज्ज्वालयामासुरर्च्चिषम् ॥ सप्तर्षयःसामगाथाकुर्वन्तिस्मपृथक्पृथक् ॥ २२ ॥ गान्दिशोविदिशःखञ्चपूयरन्तःश्रुतिस्वरैः ॥
नवृतास्तत्रयागेषुदक्षेणसुमहात्मना ॥ २३ ॥ नकेचिदृषयोदेवानमनुष्यानपक्षिणः ॥ नोद्भिदोनतृणंवाऽपिपशवोनमृगास्तथा ॥ २४ ॥
गन्धर्वविद्याधरसिद्धसंघान्नादित्यसाध्यर्षिगणान्त्सयक्षान् ॥ सस्थावरान्नागवरान्त्समस्तान्वव्रेसदक्षःसुमहाध्वरेषु ॥ २५ ॥ कल्पमन्वन्त
रयुगवर्षमासदिवानिशाः ॥ कलाकाष्ठानिमेषाद्यावृताःसर्व्वेसमागताः ॥ २६ ॥ महर्षिराजर्षिसुरर्षिसंघानृपाः सपुत्राः सचिवैःससैन्यैः ॥
वसुप्रमुख्यागणदेवतायाःसर्वावृतास्तेनगतामखन्तम् ॥ २७ ॥ कीटाःपतङ्गाजलजाश्चसर्व्वेसवानराः श्वापदविघ्नघोराः ॥ मेघाः सशैलाः
सनदीसमुद्राःसरांसिवाप्यश्चगतावृतास्ते ॥ २८ ॥ सर्वेस्वभागंहविषाञ्जिघृक्षवः क्रतुम्प्रजग्मुर्द्दढयज्विनस्ते ॥ पातालवासाअसुराः
समागतानागस्त्रियोदेवसमाः समस्ताः ॥ २९ ॥ जगद्धर्त्यस्तियत्किञ्चिच्चेतनाचेतनम्पुनः ॥ सर्वंवृत्वासमारेभेयज्ञंसर्वस्वदक्षिणम् ॥

॥ ३० ॥ तस्मिन्यज्ञेवृतः शम्भुर्नदक्षेणमहात्मना ॥ कपालीतिविनिश्चित्यतस्ययज्ञार्हतानहि ॥ ३१ ॥ कपालिभार्येतिसतीदयितापि
सुतानिजा ॥ नाहूतायज्ञविषयेदक्षेणदोषदर्शिना. ॥ ३२ ॥ श्रुत्वासतीतथायज्ञन्तातेनारब्धमुत्तमम् ॥ कपालिभार्येतिवृतानाहमित्यपित
तत्त्वतः ॥३३॥ उच्चैश्चुकोपदक्षायरक्तनेत्राऽऽननातदा॥शापेनदक्षन्दग्धुञ्चमनश्चक्रेतदासती॥३४॥कोपाविष्टाऽपिसापूर्वसमयंस्मृतवत्यमुम्॥
मनसेतिविनिश्चित्यनशशापतदासती ॥ ३५ ॥ अलंशापेनमेपूर्वंसुदृढःसमयःकृतः॥अस्तीतिमय्यवज्ञायाम्प्राणान्मोक्ष्येध्रुवम्पुनः ॥ ३६ ॥
यदास्तुताहन्दक्षेणसुचिरन्तनयार्थिना ॥ तदैवसमयोमेयंशापेनालङ्करोमितम् ॥३७॥ इतिसञ्चिन्त्यसादेवीनित्यरूपमथात्मनः ॥ सस्मारातु
लमत्युग्रनिष्कलन्तज्जगन्मयम् ॥३८॥ पूर्वरूपंस्मरन्तीसायोगनिद्राह्वयंहरेः ॥ एवंसञ्चिन्तयामासमनसादक्षजातदा॥३९॥ब्रह्मणोदितदक्षेण
यदर्थमहमीडिता ॥ तत्किञ्चिदपिनोजातंशङ्करोपिनपुत्रवान् ॥ ४० ॥ इदानीमेकमेवाऽभूत्कार्यन्देवगणस्यच ॥ यच्छंकरःसानुरागोमत्कृते
भूच्चयोषिति ॥ ४१ ॥ मत्तोनान्यापुनःशम्भोरागंवर्द्धयितुम्पुनः ॥ शक्तानकाऽपिभवितासनान्यांसंग्रहीष्यति ॥ ४२ ॥ तथाप्यहन्तनुन्त्य
क्ष्येसमयात्पूर्वयोजितात् ॥ हितायजगताङ्कुर्य्याम्प्रादुर्भावम्पुनर्गिरौ ॥ ४३ ॥ पुराहिमवतःप्रस्थेरम्येदेवगृहोपमे ॥ शम्भुः सार्द्धम्मयारन्तुं
सुचिरम्प्रीतिसंयुतः ॥ ॥ ४४ ॥ तत्रयामेनकादेवीचार्वङ्गीचारितव्रता ॥ सुशीलासापुरन्ध्रीणामुत्तमापार्वतीगणे ॥ ४५ ॥ सामाम्मातृवदाच
रसर्वकर्मसुनर्मकम् ॥ तस्याम्मेत्यनुरागोभूत्सामेमाताभविष्यति ॥ ४६ ॥ कन्याभिःपार्वतीभिश्चबाल्यक्रीडामहश्चिरम् ॥ कृत्वाकृत्वामेन
कायाः करिष्येमोदमुत्तमम् ॥४७॥ पुनश्चाहम्भविष्यामिशम्भोर्जायाऽतिवल्लभा ॥ करिष्येदेवकार्याणितदुपायादसंशयम्॥४८॥इतिसञ्चिन्त

यन्तीसापुनःकोपसमावृता ॥ जज्वालदक्षतनयादक्षदारुणकर्म्मणा ॥४९॥ क्रोधरक्तेक्षणातत्रतनुयष्टेस्तदासती ॥ स्फोटश्चकारद्वाराणिसर्वा
ण्यावृत्ययोगतः ॥ ५० ॥ तेनस्फोटेनमहतातस्यास्तुप्राणवायवः ॥ निर्भिद्यदशमद्वारमात्मनस्तेबहिर्ययुः ॥ ५१ ॥ त्यक्तप्राणान्तुतान्दृष्ट्वा
देवाःसर्व्वेन्तरिक्षगाः ॥ हाहाकारन्तदाचक्रुःशोकव्याकुलितेक्षणाः ॥ ५२ ॥ ततस्तुसत्याभगिनीसुतातान्द्रष्टुमागता ॥ चुक्रोशशोकाद्विज
यामृतान्दृष्ट्वासतीम्मुहुः ॥ ५३ ॥ हासतिक्वगतासीतिहासतीतवकिन्त्विदम् ॥ हामातृष्वसरित्युच्चैस्तदाशब्दोमहानभूत् ॥ ५४ ॥ विप्रियश्र
वणादेवप्राणास्त्यक्तास्त्वयासति ॥ अहंकथन्तुजीवामिदृष्ट्वेदृग्विप्रियन्दृढम् ॥ ५५ ॥ पाणिनावदनंसत्यामार्जयन्तीमुहुर्म्मुहुः ॥ करुणंविल
पन्तीस्ममुखञ्चिघ्रतिसातदा ॥५६॥ सिञ्चन्तीनेत्रजैस्तोयैः सत्याःसाहृदयम्मुखम् ॥ केशानुल्लास्यपाणिभ्यांवीक्षन्तीवदनम्मुहुः ॥ ५७॥ ऊ
र्द्धाधःकम्पितशिराःशोकव्याकुलितेन्द्रिया ॥ हृदयम्पञ्चशाखाभ्यांविनिहन्तीतथाशिरः ॥ ५८ ॥ इदञ्चवचनंसाश्रुकण्ठासाविजयाब्रवीत् ॥
श्रुत्वातेमरणंमातावीरिणीशोककर्षिता ॥५९॥धारयन्तीकथम्प्राणान्त्सद्यस्त्यक्ष्यतिजीवितम् ॥ सतथानिरनुक्रोशःक्रूरकर्म्मापितातव ॥६०॥
प्रमीताम्भवतींश्रुत्वाकथन्धास्यतिजीवितम्॥ विचिन्त्यनूनंकर्माणिस्वीयानिभवतीम्प्रति॥६१॥कृतानिसनृशंसानिदक्षःशोकाकुलस्तदा ॥ य
ज्वासचज्ञानशीलःकथंयज्ञेप्रवर्तते॥६२॥निःश्रद्धस्त्यक्तबुद्धिश्चकथंवानभवेत्क्रतौ॥हामातर्देहिवचनंरुदन्त्याबालवन्मम॥६३॥ भवत्यानिर्ग
मेशोकाद्रियेशल्यसमानसून्॥त्वंकिंस्मरसिमेशम्भोर्विहितस्यकदाचन॥६४॥तेनामर्षवशम्प्राप्तामातर्माकिन्नभाषसे ॥तदेववदनञ्चक्षुर्मुखंसाना

१ मेइतिविहितस्यशेषेषष्ठी मयाविहितं शम्भोरपराधंकिं स्मरसीत्यर्थः ।

सिकातव॥६५॥एतेषांक्रगताःसर्वेविभ्रमाहसितंक्रच॥ननुतेविभ्रमैर्हीनन्नेत्रयुग्मंसुनासिकम्॥६६॥स्मितहीनञ्चवदनन्दृष्ट्वासोढाकथंहरः॥ कासु
धासम्मितंवाक्यंहराश्रमसमागताम् ॥६७॥ सूनृतन्त्वामृतेमातर्वदिष्यतिमुहुर्मुहुः॥श्रद्धावतीबान्धवेषुपत्युर्भावशानुगा ॥६८॥ सर्वलक्षण
सम्पूर्णात्वत्समायाभविष्यति ॥ त्वद्दतेदेवदेवेशःशोकोपहतचेतनः ॥ ६९ ॥ दुःखितात्मानिरुत्साहोनिश्चेष्टश्चभविष्यति ॥ एवंलपन्तीभृश
दुःखितासतीम्मृतांसमीक्ष्यातिशयंशुचाहता ॥ पपातभूमौविजयाविरावंवितन्वतीचोर्द्धभुजाप्रवेपती ॥ ७० ॥ इतिकालिकापुराणेसतीदेहत्या
गोनामषोडशोऽध्यायः ॥ १६ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ एतस्मिन्नन्तरेशम्भुःशोभनेमानसेह्रदे ॥ समाप्यसन्ध्यामायातःस्वमाश्रम
पदन्प्रति ॥ १ ॥ आगच्छन्नेवसंरावंविजयायावृषध्वजः ॥ शुश्रावदारुणन्तीव्रञ्चकितश्चततोभवत् ॥२॥ ततउष्णावलवतामनोमारुतरंहसा ॥
स्वमाश्रमपदंशर्वआससादत्वरान्वितः ॥ ३ ॥ आसाद्यदेवीन्दयितान्तदादाक्षायणींहरः ॥ मृतान्दृष्ट्वापिनजहौमृतेतिप्रियभावतः ॥ ४ ॥
ततोनिरीक्ष्यवदनमामृज्यचपुनःपुनः ॥ पप्रच्छकस्मात्सुप्तासीत्येवन्दाक्षायणीम्मुहुः ॥ ५ ॥ ततोभर्गवचःश्रुत्वातदातद्भगिनीसुता ॥
विजयाप्राहनिधनन्दाक्षायण्यायथातथा ॥६॥ विजयोवाच ॥ दक्षःकर्त्तुंक्रतुंशम्भोर्देवान्त्सर्वान्त्सवासवान् ॥ आजुहावतथादैत्यान्राक्षसान्त्सि
द्धगुह्यकान् ॥ ७ ॥ ब्रह्माणमथगोविन्दमिन्द्रादीनपिदिक्पतीन् ॥ देवयोनीरँतथासर्व्वान्त्साध्यविद्याधरादिकान् ॥ ८ ॥ नाहूतानिक्रतौ
तेनयानिसत्त्वानिशंकर ॥ तानिदक्षेणनोसन्तिसमस्तभुवनेष्वपि ॥ ९ ॥ एवंम्प्रविततंयज्ञंश्रुत्वैषावचनान्मम ॥ विमृष्यवत्यनाह्वानेहेतुंशंभो
रथात्मनः ॥ १० ॥ चिन्तयानांतथाहन्तांसतीञ्ज्ञात्वायथाश्रुतम् ॥ उक्तवत्यस्मिभूतेशयज्ञानाह्वानकारणम् ॥ ११ ॥ शम्भुःकपालीत

जायातत्संसर्गाद्विगर्हिता ॥ अतःशम्भुःसतीचापिनाध्वरेमेमिलिष्यतः ॥ १२ ॥ इत्यनाह्वानहेतुर्मेश्रुतपूर्वः पुरामुखात् ॥ दक्षस्यवी
रिणींश्लक्ष्णांगदतस्तस्यमंदिरे ॥ १३ ॥ एतच्छ्रुत्वाममवचःसाविवर्णमुखीक्षितौ ॥ उपविष्टानमांकिञ्चिदुक्त्वाकोपपरायणा ॥ १४ ॥
बभूववदनन्तस्यास्तत्क्षणात्परुषंहर ॥ भ्रुकुटीकुटिलंश्यामंयथाखम्धूमकेतुना ॥ १५ ॥ सामुहूर्त्तमिवध्यात्वास्फोटेनमहताततः ॥
प्राणानुदसृजच्चैषाभित्त्वामूर्द्धानमात्मनः ॥ १६ ॥ मार्कण्डेयउवाच ॥ इतिश्रुत्वावचस्तस्याविजयायावृषध्वजः ॥ अतीवकोपादुत्तस्थौ
दिधक्षुरिवपावकः ॥ १७ ॥ तस्यकोपपरीतस्यकर्णनासाक्षिवक्त्रतः ॥ घोराज्वलन्त्यः कणिकाःसृजन्त्योऽग्नेर्महारवम् ॥ १८ ॥
उल्काविनिःसृताबह्व्यःकल्पान्तादित्यवर्चसः ॥ अथतत्रजगामाशुदक्षोयत्रमहातपाः ॥ १९ ॥ यज्ञञ्चक्रेहरोगत्वायज्ञवाटाद्बहिःस्थितः ॥
तंयज्ञन्ददृशेभर्गःकोपेनमहतावृतः ॥ २० ॥ महाधनसमापन्नम्पात्रीजुह्वादिभिर्वृतम् ॥ हुताज्याहुतिसंवृद्धंदीप्तवह्निविराजितम्
॥ २१ ॥ यथास्थानस्थितान्त्सर्वान्दिक्पालान्त्सायुधध्वजान् ॥ विधातारन्तथाविष्णुंयज्ञमध्येव्यवस्थितम् ॥ २२ ॥ ददर्शकु
पितःशम्भुस्तान्दृष्ट्वातीवकोपितः ॥ भगंसूर्यन्तथासोमम्भार्याभिःसहसंवृतम् ॥२३॥ सहस्राक्षंगौतमञ्चपूर्वेभागेव्यवस्थितम् ॥ सनत्कुमारमा
त्रेयम्भार्गवंविनतासुतम् ॥ २४ ॥ मरुद्गणाँस्तथासाध्यानाग्नेय्यञ्जातवेदसम् ॥ कालंसचित्रगुप्तञ्चकुम्भयोनिंसगालवम् ॥ २५ ॥
विश्वेदेवांस्तथासर्वान्कव्यवाहादिकान्पितॄन् ॥ अग्निष्वात्तादिकान्त्सर्वान्भूतग्रामञ्चतुर्विधम् ॥ २६ ॥ भौमम्प्रेतगणान्त्सिद्धान्दक्षिणाशां
व्यवस्थितान् ॥ रक्षांसिचपिशाचांश्चभूतानिमृगपक्षिणः ॥ २७ ॥ क्रव्यादान्क्षुद्रजन्तूंश्चतथापुण्यजनेश्वरम् ॥ महर्षिम्मौद्गलंराहुन्नै

र्ऋत्यांकिन्नरांस्तथा ॥ २८ ॥ महोरगांस्तथानक्रान्मत्स्यान्ग्राहाँश्चकच्छपान् ॥ समुद्रान्तसप्तसिन्धूंश्चनदांस्तीर्थानिगुह्यकान्
॥ २९ ॥ मानसादिह्रदान्त्सर्व्वान्गंगाजम्बूनदांस्तथा ॥ कामम्मधुंवसन्तञ्चवरुणञ्चसहानुगम् ॥३०॥ शनैश्चरंगिरीन्त्सर्वान्पश्चिमाशाव्यव
स्थितान् ॥ प्राणादिपञ्चवायूँश्चसगणञ्चसमीरणम् ॥ ३१ ॥ कल्पद्रुमान्हिमाद्रिंचकश्यपञ्चमहामुनिम् ॥ वायव्यांकमलात्रातम्फला
निचकलानिधिम् ॥ ३२ ॥ नानारत्नानिहैमानिमनुष्यान्पर्वतांस्तथा ॥ हिमाद्रिमुख्यायक्षाश्चस्थूणाकर्णादयोबुधाः ॥ ३३ ॥ नलकूबरे
णसहितोयक्षराण्नरवाहनः ॥ ध्रुवोधरश्चसोमश्चविष्णुश्चैवाऽनिलोनलः ॥ ३४ ॥ प्रत्यूषश्चप्रभासश्चकौबेर्यांसंस्थितानिमान् ॥
वृषध्वजंविनासर्वान्रुद्राञ्जीवम्मनूँस्तथा ॥ ३५ ॥ विविधान्बाहुजान्वैश्याञ्छूद्रानपिसमन्ततः ॥ ऐशान्यांविविधान्नानिव्रीहीनपिलताअपि
॥ ३६ ॥ ऐशानीपूर्व्वयोर्म्मध्येब्रह्मर्षीन्त्संशितव्रतान् ॥ महर्षींश्चतुरोवेदान्वेदाङ्गानितथैवषट् ॥ ३७ ॥ नैर्ऋत्यपश्चिमान्तस्थमनन्तं
श्वेतपर्वततम् ॥ काद्रवेयसहस्रेणसहितान्त्सप्तभोगिनः ॥ ३८ ॥ केतुन्तत्रैवकूष्माण्डंडाकिनीगणसंयुतम् ॥ तथाजलधरानन्यान्नानावर्णा
न्त्सविद्युतान् ॥ ३९ ॥ दिग्गजानपितत्रस्थानैरावतमुखान्हरः ॥ यथास्थानास्थितान्त्सर्वान्दिक्करिण्याचसंयुतान् ॥ ४० ॥ तमेवन्दूरतो
दृष्ट्वायज्ञवाटम्महाधनम् ॥ वीरभद्राह्वयन्तूर्णम्प्रेषयामासतम्प्रति ॥ ४१ ॥ वीरभद्रोपिबहुभिःसंवृतोविविधैर्गणैः ॥ व्यध्वंसयत्ततोयज्ञ
न्दक्षस्यसुमहात्मनः ॥ ४२ ॥ विकुर्वन्तंमहायज्ञंवीरभद्रंसमीक्ष्यवै ॥ वारयामासवैकुण्ठःसर्वदेवगणावृतः ॥ ४३ ॥ तंवार्यमाणन्दृष्ट्वैवक्रोधसं
रक्तलोचनः॥स्वयंविवेशतंयज्ञंध्वंसयामासचेश्वरः॥४४॥विशन्तमेवतंयज्ञेप्रथमम्पुरतोभगः ॥ बाहूवितत्यभृतेशमाससादत्वरान्वितः ॥४५॥

तमागतमभिप्रेक्ष्यभर्गोपिभृशरोषितः ॥ अंगुल्यग्रप्रहारेणतस्यनेत्रेजघानह ॥ ४६ ॥ हीननेत्रम्भगन्दृष्ट्वाविरूपाक्षन्दिवाकरः ॥ स्पर्द्धमानस्ततः शर्वमाससादत्वरान्वितः ॥ ४७ ॥ ततःसूर्यम्महादेवःपाणौधृत्वाकरेणच ॥ दूरीकृत्यातिकुपितोयज्ञमेवाभ्यधावत ॥ ४८ ॥ मार्त्तण्डश्चहसन्वेगाद्धितत्यविपुलौभुजौ ॥ एहियोत्स्येत्वयेत्युक्तातमग्रेप्रत्यवारयत् ॥ ४९ ॥ हसतस्तस्यसूर्यस्यक्रोधेनवृषभध्वजः ॥ दन्तान्करप्रहारेणशातयामासवक्रतः ॥ ५० ॥ विदन्तम्मिहिरन्दृष्ट्वाहीननेत्रम्भगन्तथा ॥ सर्वेदेवाश्चऋषयोयेचान्येतत्रदुद्रुवुः ॥ ५१ ॥ विद्राव्यसर्वान्देवादीन्हरःपरमकोपनः ॥ मृगरूपेणापयान्तंयज्ञमेवान्वपद्यत ॥ यज्ञोप्याकाशमार्गेणब्रह्मस्थानंविवेशह ॥ ५२ ॥ वृषध्वजोपिकुपितोब्रह्मस्थानञ्जगामह ॥ ब्रह्मणःसदनाद्यज्ञोभीतोभर्गादवातरत् ॥ ५३ ॥ अवतीर्यसतीदेहम्प्रविवेशस्वमायया ॥ भर्गोपिदक्षदुहितुर्मृतायानिकटंगतः ॥५४॥ अन्वगच्छत्तदायज्ञन्ददर्शचसतीशवम् ॥ मृतान्दृष्ट्वातदादेवींहरोदाक्षायणींसतीम् ॥ विस्मृत्ययज्ञन्तत्प्रान्तेस्थितोबाढंशुशोचताम् ॥ ५५ ॥ बहुविधगुणवृन्दञ्चिन्तयञ्छूलपाणिर्ललितदशनपंक्तिवक्त्रमञ्जप्रकाशम् ॥ अरुणदशनवस्त्रम्भ्रूयुगंवीक्ष्यतस्याः खरतरपृथुशोकव्याकुलोसौरुरोद ॥ ५६ ॥ इतिकालिकापुराणेसप्तदशोध्यायः ॥ १७ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ दाक्षायणीगुणगणान्गणयन्गोरथस्तदा ॥ विललापातिदुःखार्तोमनुजःप्राकृतोयथा ॥१॥ विलपन्तन्तदाभर्गंविज्ञायमकरध्वजः ॥ रतीवसन्तसहितआससादमहेश्वरम् ॥ तंशुचातिपरिभ्रष्टंयुगपत्सरतीपतिः ॥२॥ जघानपञ्चभिर्बाणैरुदन्तन्भ्रष्टचेतनम् ॥ ३ ॥ शोकाभिहतचित्तोपिस्मरबा

१ पंक्तिमित्यार्षम् । २ दशनाच्छादनमोष्ठमित्यर्थः ।

णसमाकुलः ॥ संकीर्णभावमापन्नःशुशोचचसुमोहच ॥ ४ ॥ क्षणम्भूमौनिपततिक्षणमुत्थायधावति ॥ क्षणंभ्रमतितत्रैवनिमीलतिविभुःपुनः
॥५॥ ध्यायन्दाक्षायणीन्देवींहसमानःकदाचन ॥ परिष्वजतिभूमिष्ठांरसभावैरिवस्थिताम् ॥६॥ सतीसतीतिसततन्नामव्याहृत्यशंकरः ॥ मा
नन्त्यजवृथेत्येवमुक्त्वास्पृशतिपाणिना ॥ ७ ॥ पाणिनापरिमार्ज्यैनामलंकारान्यथास्थितान् ॥ तस्याविश्लिष्यचपुनस्तत्रैवानुयुयोजच ॥
॥ ८ ॥ एवंकुर्वतिभूतेशेमृतानोवाचकिञ्चन ॥ यदासतीतदाभर्गःशोकाद्गाढंरुरोदह ॥ ९ ॥ रुदतस्तस्यपततोबाष्पान्वीक्ष्यतदासुराः ॥ ब्रह्मा
दयःपराञ्चिताञ्जग्मुश्चिन्तापरायणाः ॥ १० ॥ बाष्पाःपतन्तोभूमौचेद्दहेयुःपृथिवीमिमाम् ॥ उपायस्तत्रकःकार्यइतिहाहेतिचुक्रुशुः ॥ ११ ॥
ततोविमृश्यतेदेवाब्रह्माद्यास्तुशनैश्चरम् ॥ तुष्टुवुर्मूढभर्गस्यबाष्पधारणकारणात् ॥ १२ ॥ ॥ देवाऊचुः ॥ ॥ शनैश्चरमहाभागलोकानुग्र
हकारक ॥ मूलशक्तिसमुद्भूतनमस्तेसूर्यसम्भव ॥ १३ ॥ नमस्तेशूलहस्तायपाशहस्तायधन्विने ॥ तथावरदहस्तायनमश्छायात्मजायते ॥
॥ १४ ॥ नीलमेघप्रतीकाशभिन्नाञ्जनचयोपम ॥ नमस्तेसर्वलोकानाम्प्राणधारणहेतवे ॥ १५ ॥ गृध्रध्वजनमस्तेस्तुप्रसीदभगवन्दृढम् ॥
बाष्पेभ्यःशोकजेभ्यश्चपाहिभर्गस्यनःक्षितिम् ॥ १६ ॥ यथापुराशतंवर्षानवजग्राहवर्षणम् ॥ भवानेवतुमेघेभ्यस्तथाकुरुहराम्बुनि ॥ १७ ॥
तवचापांग्रहन्दृष्ट्वामेघास्तेपुष्करादयः ॥ मुमुचुःसततंवर्षम्महेन्द्रस्यकिलाज्ञया ॥ १८ ॥ आकाशएववर्षाम्भस्तत्सर्वम्भवतापुरा ॥ विनाशि
तंयथाबाष्पन्तथानाशयशूलिनः ॥ १९ ॥ नत्वामृतेन्यःशक्तोस्तिहरबाष्पनिवारणे ॥ दहेत्सदेवगन्धर्वब्रह्मलोकान्तसपर्वतान् ॥ २० ॥ पृथि

१ विचारपरायणा इत्यर्थः।

वीम्पतितोबाष्पस्तस्माद्धारयमायया ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इत्येवम्भाषमाणेषुदेवेषुमिहिरात्मजः ॥ २१ ॥ प्रत्युवाचसतान्देवा
न्नातिहृष्टमनाइव ॥ ॥ शनैश्चरउवाच ॥ ॥ करिष्येभवतांकर्म्मयथाशक्तिसुरोत्तमाः ॥ २२ ॥ तथाकिन्तुविदध्यंहिनमांवेत्तियथाहरः॥
दुःखशोकाकुलस्यास्यसमीपेबाष्पधारिणः ॥ २३ ॥ कोपान्नश्येच्छरीरम्मेनियतन्नात्रसंशयः ॥ तस्माद्यथामाम्भूतेशोनजानातिसतीपतिः ॥
तथाकुरुध्वन्नेत्रेभ्योहरलोतकधारिणम् ॥ २४ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ ततोब्रह्मादयोदेवास्तेसर्वेशंकरान्तिकम् ॥ २५ ॥ गत्वा
हरंसम्मुमुहुःसांसार्यायोगमायया ॥ शनैश्चरोपिभूतेशमासाद्यान्तर्हितस्तदा ॥ २६ ॥ बाष्पवृष्टिन्दुराधर्षामवजग्राहमायया ॥ यदासनाशक
द्बाष्पान्तसन्धारयितुमर्कजः ॥ २७ ॥ तदामहागिरौक्षिप्ताबाष्पास्तेजलधारके ॥ लोकालोकस्यानिकटेजलधाराह्वयोगिरिः ॥ २८ ॥ पुष्कर
द्वीपपृष्ठस्थस्तोयसागरपश्चिमे ॥ सतुसर्वप्रमाणेनमेरुपर्वतसन्निभः ॥ २९ ॥ तस्मिन्विन्यस्तबान्वाष्पाँस्तदाशक्तःशनैश्चरः ॥ सपर्वतोपि
तान्बाष्पान्नधर्तुंक्षमईशितुः ॥ ३० ॥ विदीर्णस्तैस्तुबाष्पौघैर्भग्नमध्योभवद्भुतम् ॥ तेबाष्पाःपर्वताम्भित्त्वाविविशुस्तोयसागरम् ॥ ३१ ॥ सा
गरोपिग्रहीतुन्तान्नशशाकखरानति ॥ ततस्तुसागरम्मध्येभित्वाबाष्पाः समागताः ॥ ३२ ॥ तोयघेःप्राग्भवांवेलांस्पर्शमात्राद्विभेदताम् ॥
विभिद्यवेलान्तेबाष्पाःपुष्करद्वीपमध्यगाः ॥ ३३ ॥ नदीभूत्वावैतरणीपूर्वसागरगाभवत् ॥ जलधारस्यभेदेनसंसर्गात्सागरस्यच ॥ ३४ ॥
अवाप्यसौम्यतांकिञ्चिद्बाष्पास्तेनाभिदन्क्षितिम् ॥ वैवस्वतपुरद्वारेयोजनद्वयविस्तृता ॥ ३५ ॥ अद्यापितिष्ठत्यपगाहरलोतकसम्भवा ॥ अ

१ आगमशास्त्रस्यानित्यत्वात्क्षमभावः ।

थशोकविमूढात्माविलपन्वृषभध्वजः ॥३६॥ जगामप्राच्यदेशाँस्तुस्कन्धेकृत्वासतीशवम् ॥ उन्मत्तवद्गच्छतोस्यदृष्ट्वाभावन्दिवौकसः॥३७॥
ब्रह्माद्याश्चिन्तयामासुःशवभ्रंशनकर्म्मणि ॥ हरगात्रस्यसंस्पर्शाच्छवोनायंविशीर्णताम् ॥ ३८ ॥ गमिष्यतिकथन्तस्मादस्यभ्रंशोभविष्यति
॥ इतिसञ्चिन्तयन्तस्तेब्रह्मविष्णुशनैश्चराः ॥ ३९ ॥ सतीशवान्तर्विविशुरदृश्यायोगमायया ॥ प्रविश्याथशवन्देवाःखण्डशस्तेसतीशवम् ॥
॥ ४० ॥ भूतलेपातयामासुःस्थानेस्थानेविशेषतः ॥ देवीकूटेपादयुग्मम्प्रथमन्यपतत्क्षितौ ॥ ४१ ॥ उड्डियानेचोरुयुग्मंहितायजगतान्ततः
॥ कामरूपेकामगिरौन्यपतद्योनिमण्डलम् ॥ ४२ ॥ तत्रैवन्यपतद्भूमौपूर्वतोनाभिमण्डलम् ॥ जालन्धरेस्तनयुगंस्वर्णहारविभूषितम्॥४३॥
अंशग्रीवम्पूर्णगिरौकामरूपात्ततःशिवः ॥ यावद्भुवङ्गतोभर्गःसमादायसतीशवम् ॥४४॥ प्राच्येषुयाज्ञिकोदेशस्तावदेवप्रकीर्त्तितः ॥ अन्येश
रीरावयवालवशःखण्डिताःसुरैः ॥ ४५ ॥ आकाशगङ्गामगमन्पवनेनसमीरिताः ॥ यत्रयत्रापतन्त्सत्यास्तदापादादयोद्विजाः ॥ ४६ ॥ तत्रत
त्रमहादेवःस्वयंलिङ्गस्वरूपधृक् ॥ तस्थौमोहसमायुक्तःसतीस्नेहवशानुगः ॥ ४७॥ ब्रह्माविष्णुःशनिश्चापिसर्वेदेवगणास्तथा ॥ पूजयाञ्चकुरी
शस्यप्रीत्यासत्याःपदादिकम् ॥ ४८ ॥ देवीकूटेमहादेवीमहाभागेतिगीयते ॥ सतीपादयुगेलीनायोगनिद्राजगत्प्रभुः ॥ ४९ ॥ कात्यायनीचो
ड्डियानेकामाख्याकामरूपिणी ॥ पूर्णेश्वरीपूर्णगिरौचण्डीजालन्धरेगिरौ ॥ ५० ॥ पूर्वान्तेकामरूपस्यदेवीदिक्करवासिनी ॥ तथाललितका
न्तेतियोगनिद्राप्रगीयते ॥ ५१ ॥ यत्रैवपतितंसत्याःशिरस्तत्रवृषध्वजः ॥ उपविष्टःशिरोवीक्ष्यश्वसञ्छोकपरायणः ॥ ५२ ॥ उपविष्टेहरेतत्र
ब्रह्माद्यास्तेदिवौकसः ॥ समीपमगमँस्तस्यदूरतःसान्त्वयन्हरम् ॥ ५३ ॥ देवानागच्छतोदृष्ट्वाशोकलज्जासमान्वितः ॥ गत्वाशिलात्वन्तत्रैव

लिंगत्वंगतवान्हरः ॥ ५४ ॥ हरेलिंगत्वमापन्नेब्रह्माद्यास्तुदिवौकसः ॥ तुष्टुवुस्त्र्यम्बकन्तत्रालिंगरूपञ्जगद्गुरुम् ॥ ५५ ॥ देवाऊचुः ॥ ॥
महादेवंशिवंस्थाणुमुग्रंरुद्रंवृषध्वजम् ॥ श्मशानवासिनम्भर्गंसर्वान्तकरणम्परम् ॥ ५६ ॥ त्वान्नमामोवयम्भक्त्याशंकरन्नीललोहितम् ॥
गिरीशंवरदन्देवम्भूतभावनमव्ययम् ॥ ५७ ॥ अनादिमध्यसंसारयोगविद्यायशम्भवे ॥ नमःशिवायशान्तायब्रह्मणेलिंगमूर्त्तये ॥ ५८ ॥
ज्ञानामृतान्तसम्पूर्णशुद्धदेहान्तरायच ॥ नमःशिवायशान्तायब्रह्मणेलिंगमूर्त्तये ॥ ५९ ॥ आदिमध्यान्तभूतायस्वभावानलदीप्तये ॥
नमःशिवायशान्तायब्रह्मणेलिंगमूर्त्तये ॥ ६० ॥ जटिलायगिरीशायविद्याशक्तिधरायते ॥ नमःशिवायशान्तायब्रह्मणेलिंगमूर्त्तये ॥
॥ ६१ ॥ प्रलयार्णवसंस्थायप्रलयस्थितिहेतवे ॥ नमःशिवायशान्तायब्रह्मणेलिंगमूर्त्तये ॥ ६२ ॥ यःपरेभ्यःपरस्तस्मात्परायपरमा
त्मने ॥ नमःशिवायशान्तायब्रह्मणेलिंगमूर्त्तये ॥ ६३ ॥ ज्वालामालावृतांगायनमस्तेविश्वरूपिणे ॥ नमः शिवायशान्तायब्रह्मणे
लिंगमूर्त्तये ॥ ६४ ॥ ओन्नमःपरमार्थायज्ञानदीपायवेधसे ॥ नमःशिवायशान्तायब्रह्मणेलिंगमूर्त्तये ॥ ६५ ॥ नमोदाक्षायणी
कान्तमृडभर्गमहेश्वर ॥ नमस्तेसर्वभूतेशप्रसीदभगवञ्छिव ॥ ६६ ॥ सशोकेत्वयिलोकेशेचेष्टमानेमहेश्वर ॥ सुराःसमाकुलाः
सर्वेतस्माच्छोकम्परित्यज ॥ ६७ ॥ नमोनमस्तेभूतेशसर्वकारणकारण ॥ प्रसीदरक्षनःसर्वांस्त्यजशोकन्नमोस्तुते ॥ ६८ ॥ ॥
मार्कण्डेयउवाच ॥ इतिसंस्तूयमानस्तुमहादेवोजगत्पतिः ॥ निजंरूपंसमास्थायप्रादुर्भूतःशुचाहतः ॥ ६९ ॥ तंशुचाविह्वलं
दृष्ट्वाप्रादुर्भूतंविचेतसम् ॥ शोकापहंविधिःसाम्नातुष्टाववृषभध्वजम् ॥ ७० ॥ ब्रह्मोवाच ॥ ॥ हिरण्यबाहोब्रह्मात्वंविष्णुस्त्व

जगतःपतिः ॥ सृष्टिस्थितिविनाशानांहेतुस्त्वंकेवलंहर ॥ ७१ ॥ त्वमष्टमूर्तिभिःसर्वंजगद्व्याप्यचराचरम् ॥ उत्पादकःस्थापकश्चनाशकश्चापिविश्वकृत् ॥ ७२ ॥ त्वामाराध्यमहादेवमुक्तियातामुमुक्षवः ॥ रागद्वेषादिभिस्त्यक्तासंसारविमुखाबुधाः ॥ ७३ ॥ तृतीयंयद्भवन्नेत्रंललाटस्थम्महेश्वर ॥ सततम्भ्राजमानञ्चचिन्त्यतेयन्मुमुक्षुभिः ॥ ७४ ॥ विभिन्नवाय्वग्निजलौघवर्जितन्नदूरसंस्थंरविचन्द्रसंयुतम् ॥ त्रिमार्गमध्यस्थमनुप्रकाशकन्तत्त्वम्परंशुद्धमयम्महेश्वर ॥ ७५ ॥ यदष्टशाखस्यतरोःप्रसूनञ्चिदम्बुवृद्धस्यसमीपजस्य ॥ तपश्छदःसंस्थगितस्यपीनंसूक्ष्मोपगन्तेवशदंसदैव ॥ ७६ ॥ अधस्समाधायसमीरणस्वनंनिरुद्ध्यचोर्ध्वन्निशिहंसमध्यतः ॥ हृत्पद्ममध्येसुमुखीकृतंरजःपरन्तुतेजस्तवसर्वदेक्ष्यताम् ॥ ७७ ॥ प्राणायामैःपूरकैःस्तम्भकैर्वारिक्तैश्चित्रैश्चोदनंयत्पराख्यम् ॥ दृश्यादृश्यंयोगिभिस्तेप्रपञ्चाःशुद्धंवृद्धन्तत्त्वतस्तेस्तिलब्धम् ॥ ७८ ॥ सूक्ष्मञ्जगद्व्यापिगुणौघपीनम्मृग्यम्बुधैःसाधनसाध्यरूपम् ॥ चौरैरक्षैर्नाप्लुतन्नैवनीतंवित्तन्तवास्त्यर्थहीनम्महेश ॥ ७९ ॥ नकोपेननशोकेननमानेननदम्भतः ॥ उपयोज्यतुतद्वित्तमन्यथैव विवर्द्धते ॥ ॥ ८० ॥ माययामोहितःशम्भोविस्मृतन्तेहृदिस्थितम् ॥ मायाम्भिन्नम्परिज्ञायधारयात्मानमात्मना ॥ ८१ ॥ मायास्माभिःस्तुतापूर्वंजगदर्थेमहेश्वर ॥ तयाध्यानगतञ्चित्तम्बहुयत्नैःप्रसाधितम् ॥ ८२ ॥ शोकःक्रोधश्चलोभश्चकामोमोहःपरात्मता ॥ ईर्ष्यामानौविचिकित्साकृपासूयाजुगुप्सता ॥ ८३ ॥ द्वादशैतेबुद्धिनाशहेतवोमनसोमलाः ॥ नत्वाहशैर्निषेव्यन्तेशोकन्त्यजततोहर ॥ ८४ ॥ ॥ मार्कण्डेयउ

१ चोदयंद्यत्पराख्यमिति पाठान्तरम् ।

वाच ॥ इतिशाम्यंस्ततःशम्भुःसंस्मृत्यापिस्ववाञ्छितम् ॥ नावदध्रेतदात्मानंशोकात्सत्याविनाकृतः ॥ ८५ ॥ अधोमुखःस्थितोवीक्ष्यब्रह्मा
णंसशनैरिदम् ॥ प्राहब्रह्मन्नायांतिगंवदाकिंकरवाण्यहम् ॥ ८६ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्तोवामदेवेनविधातासर्वदेवतैः ॥ इदमा
हतदेशस्यशोकविध्वंसकंवचः ॥ ८७ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्यजशोकम्महादेवसंस्मृत्यात्मानमात्मना ॥ नत्वंशोकस्यसदनम्परंशो
कात्तवान्तरम् ॥ ८८ ॥ सशोकेत्वयिभूतेशदेवाभूताःससाध्वसाः ॥ भ्रंशयेज्जगतींकोपःशोकःसर्वांश्चशोषयेत् ॥ ८९ ॥ त्वद्बाष्पव्याकुला
पृथ्वीविदीर्णास्यान्नचेच्छनिः ॥ अवजग्राहतेबाष्पंसोपिकृष्णोभवद्धठात् ॥९०॥ यत्रदेवाःसगन्धर्वाःसदाक्रीडन्तिसोत्सुकाः ॥ सुमेरुसदृशो
योसौमानतः पर्वतोत्तमः ॥ ९१ ॥ यस्मिन्प्रविश्यसुगिरौपद्मनालनिभेघनाः ॥ उत्पिबन्तिस्मतोयानिपुष्करावर्त्तकादयः ॥ ९२ ॥
मन्दरात्सततंयत्रकुम्भयोनिर्महामुनिः ॥ गत्वागत्वातपस्तेपेहितायजगतोहर ॥ ९३ ॥ यस्मिन्स्थित्वागिरौपूर्वमगस्त्यस्तोयसाग
रम् ॥ ययौतमोबलात्कृत्वाकरमध्यगतंकिल ॥ ९४ ॥ शनैश्चरेणतेवोढुमसमर्थेनलोतकैः ॥ क्षिप्तैर्विदारितस्तेसौजलधाराह्वयो
गिरिः ॥ ९५ ॥ विभिद्यपर्वतंशम्भोबाष्पास्तेसागरंययुः ॥ भित्त्वातुसागरंशीघ्रम्प्रमीताण्डजसंकुलम् ॥ ९६ ॥ जग्मुस्तेपूर्वपु
लिनन्तस्यताद्विभिदुश्चते ॥ भित्त्वावेलान्ततःपृथ्वींविभिद्याशुतरंगिणीम् ॥ ९७ ॥ चक्रुर्वैतरणीन्नाम्नापूर्वसागरगामिनीम् ॥ ननावान
विमानेननद्रोण्यास्यन्दनेनच ॥ ९८ ॥ तर्तुंशक्यासातुनदीतप्ततोयातिभीषणा ॥ दुःखेनतान्तुपृथिवीबिभर्तिमहताधुना ॥ ९९ ॥

१ आयतिरुत्तरकालः ।

सदाचोर्ध्वगतैर्बाष्पैर्विक्षिपन्तीनभश्चरान् ॥ तस्यास्तूपरिनोयान्तिदेवाअपिभयातुराः ॥ १०० ॥ यमद्वारम्परावृत्ययोजनद्वय
विस्तृता ॥ निम्नावहतिसम्पूर्णाभीषयन्तीजगत्त्रयम् ॥ १०१ ॥ त्वन्निःश्वासमरुज्जातैर्व्यस्ताःपर्वतकाननाः ॥ समाकुलद्वी
पिनागानाद्यापिप्रतिशेरते ॥ १०२ ॥ तवनिःश्वासजोवायुःपीडयञ्जगतःसुखम् ॥ नाद्यापिप्रशमंयातिबाधाहीनःसनातन ॥ १०३ ॥
सतीशवन्तेवहतःशीर्य्यमाणापदेपदे ॥ नाद्यापिव्याकुलापृथ्वीव्याकुलत्वंविमुञ्चति ॥ १०४ ॥ नस्वर्गेनचपातालेतत्सत्त्वंविद्यतेऽ
धुना ॥ यत्तेक्रोधेनशोकेननाकुलंवृषभध्वज ॥ १०५ ॥ तस्माच्छोकममर्षञ्चत्यक्त्वाशान्तिम्प्रयच्छनः ॥ आत्मानञ्चात्मनावेत्थधार
यात्मानमात्मना ॥ ६ ॥ सतीचदिव्यमानेनव्यतीतेशरदांशते ॥ साचत्रेतायुगस्यादौभार्यातवभविष्यति ॥ ७ ॥ मार्कण्डेय
उवाच ॥ ॥ इत्युक्तोवेधसाशम्भुस्तूष्णीन्ध्यानपरायणः ॥ अधोमुखस्तदाप्राहब्रह्माणममितौजसम् ॥ ८ ॥ ॥ ईश्वरउवाच ॥
यावद्ब्रह्मन्नहंशोकादुत्तरामिसतीकृतात् ॥ तावन्ममसखाभूत्वाकुरुशोकापनोदनम् ॥ ॥ ९ ॥ तस्मिन्नवसरेयत्रयत्रगच्छाम्यहं
विधे ॥ तत्रतत्रभवान्गत्वाशोकहानिङ्करोतुमे ॥ ११० ॥ ॥ मार्कण्डेयउवाच ॥ ॥ एवमस्त्वितिलोकेश प्रोक्तावृषभवाहनम् ॥
हरेणसार्द्धङ्कैलासङ्गन्तुञ्चक्रेमनस्ततः ॥ ११ ॥ ब्रह्मणासहितंशम्भुङ्कैलासगमनोत्सुकम् ॥ समासेदुर्गणाद्दृष्ट्वानन्दिभृङ्गिमुखाश्चये ॥
॥ १२ ॥ ततःपर्वतसङ्काशोवृषभःपुरतोविधेः ॥ उपतस्थेसिताभ्रस्यसदृशोगैरिकोयथा ॥ १३ ॥ वासुक्याद्याश्चयेसर्पायथास्थान

१ मरुत्समूहैरित्यर्थः ।

श्चेतेहरम् ॥ भूषयाश्चकुरुद्गम्यशिरोबाह्वादिषुद्रुतम् ॥ १४ ॥ ततोब्रह्माचविष्णुश्चमहादेवःसतीपतिः ॥ सर्वैःसुरगणैःसार्द्धंजग्मुः
प्रालेयपर्वतम् ॥ १५ ॥ ततस्तानौषधिप्रस्थान्निःसृत्यनगराद्गिरिः ॥ सर्वैरमात्यैःसहितउपतस्थेसुरोत्तमान् ॥ १६ ॥ ततःसम्पू
जितास्तेनसुरौघागिरिणासह ॥ सचिवैःपौरवर्गैश्चमुमुदुस्तेसुरर्षभाः ॥ १७ ॥ ततोददर्शतत्रैवगिरीन्द्रस्यपुरेहरः ॥ विजयामौषधिप्र
स्थेसखीभिर्गौतमात्मजाम् ॥ १८ ॥ सापिसर्वान्सुरवरान्प्रणम्यहरमुख्यकान् ॥ चुक्रोशमातृभगिनीम्पृच्छन्तीगिरिशंसतीम् ॥
॥ १९ ॥ क्वसतीतेमहादेवशोभसेनतयाविना ॥ विस्मृतापित्वयातातमद्धदोनापसर्पति ॥ १२० ॥ ममाग्रेसापुराप्राणान्यदात्यज
तिकोपतः ॥ तदैवाहंशोकशल्यविद्धानाप्नोमिवैसुखम् ॥ २१ ॥ इत्युक्त्वावदनंवस्त्रप्रान्तेनाच्छाद्यसाभृशम् ॥ रुदन्तीप्रापतद्भूमौ
कश्मलञ्चाविशत्तदा ॥ १२२ ॥ ॥ इतिकालिकापुराणेअष्टादशोध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ ॥
ततस्ताम्पतितान्दृष्ट्वातदादाक्षायणींस्मरन् ॥ नशशाकहरःसोढुंशोकमुद्वेगसम्भवम् ॥ १ ॥ भ्रष्टधैर्य्यस्ततःशम्भुर्बाष्पव्याकुललो
चनः ॥ पश्यतांसर्वदेवानाञ्चिन्ताध्यानपरोभवत् ॥ २ ॥ अथाश्वास्यतदाधाताविजयांशोककर्शिताम् ॥ हरमाश्वासयन्त्सांत्वपूर्व
मेतदुवाचह ॥ ३ ॥ ब्रह्मोवाच ॥ ॥ पुराणयोगिन्भगवन्नशोकस्तवयुज्यते ॥ परधाम्नितवध्यानमासीत्कस्मात्त्रियामिह ॥ ४ ॥
प्रभविष्णुःपरःशान्तःसूक्ष्मःस्थूलतरःसदा ॥ तवस्वभावश्चकथंशोकेनबहुधाकृतः ॥ ५ ॥ निरञ्जनन्ध्यानगम्यंयतीनांपरात्परन्निर्म्मलंसर्व्व
गामि ॥ मलैर्हीनंरागलोभादिभिर्यत्तत्तेरूपन्त्वद्भुतङ्गृह्णबुद्ध्या ॥ ६ ॥ शोकोलोभःक्रोधमोहौचहिंसामानोदम्भोमदमोहप्रमोदाः ॥

ईर्ष्यासूयाऽक्षान्तिरसत्यताचचतुर्दशज्ञाननशाहिदोषाः ॥ ७ ॥ ध्यानेनत्वांयोगिनश्चिन्तयन्तित्वंविष्णुरूपीजगतांविधाता ॥ यातेमहा
मोहकरीसतीतितवैवसालोकमोहायमाया ॥ ८॥ यासर्वलोकाञ्जननेथगर्भेविमोहयन्तीपूर्वदेहस्यबुद्धिम् ॥ विनाश्यबाल्यङ्कुरुतेहिज
न्तोर्विमोहयत्यद्यसात्वांसशोकम् ॥ ९ ॥ सतीसहस्राणिपुरोज्झितानित्वयामृतानिप्रतिकल्पमेवम् ॥ हितायलोकस्यचराचरस्यपुनर्गृ
हीताचतथात्वयेयम् ॥ १० ॥ भवान्तरेध्यानयोगेनपश्यसतीसहस्राणिमृतानियानि ॥ यथातयात्वम्परिवर्ज्जितश्चयथास्तिसा
वावृषराजकेतोः ॥ ११ ॥ यतःसमुत्पद्यमुहुर्भवन्तंसाप्राप्स्यतीशात्रिदशैर्दुरापम् ॥ पुनश्चजायायादृशीतेभवित्रीतत्तत्सर्वन्ध्यानयोगेन
पश्य ॥ १२ ॥ ॥ मार्कण्डेय उवाच ॥ एवम्बहुविधम्ब्रह्माव्याहरत्सामशंकरम् ॥ गिरिराजपुरात्तस्माद्गमयामासनिर्ज्जनम् ॥ १३॥
ततोहिमवतःप्रस्थेप्रतीच्यान्तत्पुरस्यच ॥ सिप्रन्नामसरःपूर्णन्ददृशुर्द्रुहिणादयः ॥ १४ ॥ तद्रहःस्थानमासाद्यब्रह्मशक्रादयःसुराः ॥ उप
विष्टायथान्यायम्पुरस्कृत्यमहेश्वरम् ॥ १५ ॥ तंसिप्रसंज्ञंकासारम्मनोज्ञंसर्वदेहिनाम् ॥ शीतामलजलंसर्वैर्गुणैर्मानससम्मितम् ॥ १६ ॥
दृष्ट्वाक्षणंहरस्तास्मिन्त्सोत्सुकोभूदवेक्षणे ॥ सिप्रान्नामनदीन्तस्माद्विसृतान्दक्षिणोदधिम् ॥१७॥ गच्छान्तीञ्चददर्शासौपावयन्तीञ्जगज्जनान् ॥
तत्सरःपूर्णमासाद्यचरतःशकुनान्बहून् ॥ १८ ॥ नानादेशागताञ्छम्भुर्वीक्षाञ्चक्रेमनोरमान् ॥ गम्भीरपवनोद्वृत्तिसम्पन्नेषुविराजतः ॥ १९ ॥
कोकद्वन्द्वाँस्तरंगेषुददर्शनृत्यतोयथा ॥ मद्गुचञ्चुपुसम्पृक्ताँस्तरंगान्त्सपृथक्पृथक् ॥ २० ॥ वीक्षाञ्चक्रेयथातोयादुत्पतत्पतगान्मुहुः ॥ का
दम्बैः सारसैर्हंसैःश्रेणीभूतैस्तटेतटे ॥ २१ ॥ भंगीकृतैर्यथाशंखैःसागरस्तादृशंसरः ॥ महामीनाहतिक्षुब्धैस्तोयशब्दोत्थसाध्वसैः ॥२२॥

पक्षिभिर्विहितैःशब्दैस्तत्रतत्रमनोहरम् ॥ प्रफुल्लैःपंकजैश्चैवक्वचिज्जालैर्मनोहरैः ॥ २३ ॥ सरोरेजेयथास्वर्गोनक्षत्रैःस्थूलसूक्ष्मकैः ॥ महोत्पलानाम्मध्येषुविरलन्नीलमुत्पलम् ॥ २४ ॥ रेजेनक्षत्रमध्येषुनीलनीरदखण्डवत् ॥ पद्मसंघातमध्यस्थाहंसाःकैश्चिन्नसंस्तुताः ॥ २५ ॥ प्रफुल्लपंकजभ्रान्त्यानिश्चलाःस्वर्गवासिभिः ॥ द्विधादृष्ट्वाशोणशुक्लेपद्मेफुल्लेविधिःस्वके ॥ २६ ॥ कायेरुणत्वम्फुल्लत्वंस्वासनाब्जेनिनिन्दच ॥ फुल्लम्महोत्पलंवीक्ष्यसरसस्तस्यशंकरः ॥ २७ ॥ मौलीन्दुकान्तिमलिनंहस्तस्थन्नोत्पलम्ममे ॥ हरिःस्वचक्रसूर्यांशुफुल्लंहस्तगताम्बुजम् ॥ २८ ॥ सरःपद्मञ्चसदृशम्मेनेवीक्ष्यसमन्ततः ॥ तत्सरोवीक्ष्यसम्पूर्णन्नानापक्षिसमाकुलम् ॥ २९ ॥ पद्मिनीशतसञ्छन्नन्नीलोत्पलचयैर्वृतम् ॥ देवदारुतरूणाञ्चतटस्थानाम्प्रसूनजैः ॥ ३० ॥ परागैर्वासितजलंहृदयानन्दकारकम् ॥ तीरेतीरेमहावृक्षैःशाद्वलैःपरिवारितम् ॥ ३१ ॥ दृष्ट्वाशम्भुः क्षणन्तत्रसोत्सुकःशोकवर्ज्जितः ॥ सिप्रामालोकयामासनिःसृतांसरसस्ततः ॥ ३२ ॥ यथेन्दुमण्लाद्गंगामेरोर्जाम्बूनदीयथा ॥ तथादृष्टामहेशेनसिप्रासिप्राद्विनिःसृता ॥ ३३ ॥ ऋषयऊचुः ॥ सिप्राह्वयःकःकासारःकथंसिप्राततःसृता ॥ कीदृशोस्यप्रभावश्चतत्समाचक्ष्वविस्तरात् ॥ ३४ ॥ मार्कण्डेयउवाच ॥ शृण्वन्तुमुनयःसर्वेयथासिप्रानदीसृता ॥ सिप्रस्यचमहाभागाःप्रभावंगदतोमम ॥ ३५ ॥ वासिष्ठेनयदादेवीपरिणीतात्वरुन्धती ॥ तदावैवाहिकैस्तोयैः सिप्रासिन्धुरभूद्विजाः ॥ ३६ ॥ सासमागत्यपतितासिप्रेसरसिशासनात् ॥ यथामन्दाकिनीविष्णुपादादब्धौशिवोदका ॥ ३७ ॥ ब्रह्मविष्णुमहादेवै

१ पक्षिविशेषैः ।

स्तोयंसिक्तंतयोःपुरा ॥ विवाहेशान्तिविहितंगायत्रीद्रुपदादिभिः ॥ ३८ ॥ एकीभूतन्तुतत्तोयम्मानसाचलकन्दरात् ॥ तत्सर्वम्पतितंसिप्रे
कासारेसागरोपमे ॥ ३९ ॥ देवानामुपभोगार्थम्पुराधात्राविनिर्मितम् ॥ सरःसिप्राह्वयंसानौप्रालेयस्यगिरेर्महत् ॥ ४० ॥ तत्राद्यापिसुना
सीरःसहितश्चाप्सरोगणैः ॥ शचीसहायोरमतेप्रसन्नेसलिलेशुभे ॥ ४१ ॥ तद्दैवैःसर्वदायत्नाद्रक्ष्यतेद्यापिरत्नवत् ॥ नतत्रमानुषंकश्चिद्यातुं
शक्नोतियोऽमुनिः ॥ ४२ ॥ तपःप्रभावान्मुनयः प्रयान्तिसरसींशुभाम् ॥ सिप्राख्यान्तुमहायत्नात्स्नातुम्पातुञ्चतज्जलम् ॥ ४३ ॥ तत्रस्ना
त्वाचपीत्वाचमनुष्यादैवयोगतः ॥ अवश्यममरत्वायगच्छन्त्यविकलन्द्रियाः ॥ ४४ ॥ वृद्धिंगच्छतिवर्षासुसरोनैतद्द्विजोत्तमाः ॥ नग्रीष्मे
शोषतांयातिसर्वदातद्यथातथा ॥ ४५ ॥ तत्रतत्पतितन्तोयंवसिष्ठोद्वाहसम्भवम् ॥ ब्रह्मविष्णुमहादेवकरपद्मैरुदीरितम् ॥ ४६ ॥ ववृधेसिप्रग
र्भस्थमन्वहन्द्विजसत्तमाः ॥ तत्रवृद्धन्तुतत्तोयञ्चक्रेणचहरिःपुरा ॥ ४७ ॥ गिरेःशृंगंविनिर्भिद्यलोकानांहितकाम्यया ॥ पृथिवीम्प्रेरयामास
कृत्वापुण्यतमान्नदीम् ॥ ४८ ॥ परिवृत्यमहेंद्रंसापुनानास्नानकारिणः ॥ दक्षिणंसागरंयाताफलदाजाह्नवीसमा ॥ ४९ ॥ सिप्राख्यात्सरसो
यस्मान्निःसृतासामहानदी ॥ अतःसिप्रेतितन्नामपुरैवब्रह्मणाकृतम् ॥ ५० ॥ कार्तिक्याम्पौर्णमास्यान्तुतस्यांयःस्नातिमानवः ॥ सयाति
विष्णुसदनंविमानेनातिदीप्यता ॥ ५१ ॥ कार्तिकंसकलम्मासंस्नात्वासिप्राजलेनरः ॥ प्रयातिब्रह्मसदनम्पश्चान्मोक्षमवाप्नुयात् ॥ ५२ ॥
॥ ऋषयऊचुः ॥ वसिष्ठेनकथंदेवीपरिणीतात्वरुंधती ॥ कस्यसातनयाब्रह्मन्नुत्पन्नावावदस्वनः ॥५३॥ पतिव्रतासुप्रथितात्रिषुलोकेषुयावरा ॥
भर्तृपादौविनान्यत्रयानचक्षुःप्रवास्यति ॥५४॥यस्याःस्मृत्वाकथामात्रंमाहात्म्यसहितंस्त्रियः ॥ प्रेत्येहचसतीत्वंवैप्राप्नुवन्त्यन्यजन्मनि॥५५॥

आसन्नकालधर्मोयान्नपश्यतितथाऽशुचिः ॥ पुरुषःपापकारीचतस्याजन्मवदस्वनः ॥ ५६ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ शृणुध्वं
सायथाजातायस्यवातनयाशुभा ॥ यथावापवसिष्ठंसायथाभूतापतिव्रता ॥ ५७ ॥ यासासन्ध्याब्रह्मसुतामनोजातापुराभवत् ॥ तपस्त
प्त्वातनुंत्यक्त्वासैवभूतात्वरुन्धती ॥ ५८ ॥ मेधातिथेःसुताभूत्वामुनिश्रेष्ठस्यसासती ॥ ब्रह्मविष्णुमहेशानांवचनाच्चरितव्रता ॥ ५९ ॥ वव्रेपति
म्महात्मानंवसिष्ठंसंशितव्रतम् ॥ ॥ ऋषयऊचुः ॥ ॥ कथंतयातपस्तप्तंकिमर्थंकुत्रसन्ध्यया ॥ ६० ॥ कथंशरीरंसात्यक्त्वाभूतामेधातिथेः
सुता ॥ कथंवागदितंदेवैर्ब्रह्मविष्णुशिवैःपतिम् ॥ ६१ ॥ वसिष्ठंसुमहात्मानंसावव्रेसंशितव्रतम् ॥ तन्नःसर्वंसमाचक्ष्वविस्तरेणाद्विजोत्तम ॥६२॥
एतन्नःश्रोष्यमाणानाञ्चरितन्द्विजसत्तम ॥ अरुन्धत्यामहासत्याःपरंकौतूहलम्महत् ॥ ६३ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ ब्रह्मापित
नयांसन्ध्यान्दृष्ट्वापूर्वमथात्मनः ॥ कामायमानसञ्चक्रेत्यक्त्वासाचसुतेतिवै ॥ तस्याश्चचलितांश्चित्तङ्कामबाणविलोडितम् ॥ ६४ ॥
ऋषीणाम्प्रेक्षतान्तेषाम्मानसानाम्महात्मनाम् ॥ भर्गस्यवचनंश्रुत्वासोपहासविधिम्प्रति ॥ आत्मनश्चलचित्तत्वममर्यादमृषीन्प्रति
॥ ६५ ॥ कामस्यतादृशम्भावम्मुनिमोहकरम्मुहुः ॥ दृष्ट्वासन्ध्यास्वयन्तत्रत्रपामायातिदुःखिता ॥ ततस्तुब्रह्मणाशप्तेमदनेतदन
न्तरम् ॥ ६६ ॥ अन्तर्भूतेविधौशम्भौगतेचापिनिजास्पदम् ॥ अमर्षवशमापन्नासन्ध्याध्यानपराभवत् ॥ ६७ ॥ ध्यायन्ती
क्षणमेवाशुपूर्ववृत्तम्मनस्विनी ॥ इदंविममृषेसंध्यातस्मिन्कालेयथोचितम् ॥ ६८ ॥ उत्पन्नमात्राम्मान्दृष्ट्वायुवतीम्मदनेरितः ॥ अकार्षी
त्सानुरागोयमभिलाषम्पितामहः ॥ ६९ ॥ सर्वेषाम्मानसानाञ्चमुनीनाम्भावितात्मनाम् ॥ दृष्ट्वैवमाममर्यादंसकाममभवन्मनः ॥ ७० ॥

ममापिमथितश्चित्तम्मदनेनदुरात्मना ॥ येनदृष्ट्वामुनीन्त्सर्वांश्चलितम्मेमनोभृशम् ॥ ७१ ॥ फलमेतस्यपापस्यमदनःस्वयमाप्त
वान् ॥ स्वयंशशापकुपितःशम्भोरग्रेपितामहः ॥ ७२ ॥ ममोचितम्फलंसर्वम्प्राप्तुमिच्छामिसाम्प्रतम् ॥ यन्माम्पिताभ्रातरश्च
सकामामपरोक्षतः ॥ ७३ ॥ दृष्ट्वाचक्रुःस्पृहान्तस्मान्नमत्तःकोपिपापकृत् ॥ ममापिकामभावोभूदमर्यादंसमीक्ष्यतान् ॥ ७४ ॥
पत्याविवस्वकेतातेसर्वेषुसहजेष्वपि ॥ करिष्याम्यस्यपापस्यप्रायश्चित्तमहंस्वयम् ॥ ७५ ॥ आत्मानमग्नौहोष्यामिवेदमार्गानुसा
रतः ॥ किन्त्वेकांस्थापयिष्यामिमर्य्यादामिहभूतले ॥ ७६ ॥ उत्पन्नमात्रानयथासकामाःस्युः शरीरिणः ॥ एतदर्थमहंकृत्वातपः
परमदारुणम् ॥ ७७ ॥ मर्य्यादांस्थापयित्वैवपश्चात्त्यक्ष्यामिजीवितम् ॥ यस्मिञ्छरीरेपित्रामेह्यभिलाषःस्वयन्ततः ॥ ७८ ॥ भ्रातृ
भिस्तेनकायेनकिञ्चिन्नास्तिप्रयोजनम् ॥ येनस्वेनशरीरेणतातेचसहजेस्वके ॥ ॥ ७९ ॥ उद्भावितःकामभावोनतत्सुकृतसाधकम् ॥
इतिसञ्चिन्त्यमनसासन्ध्याशैलवरन्ततः ॥८०॥ जगामचन्द्रभागाख्यञ्चन्द्रभागायतःसृता ॥ ८१ ॥ तयासशैलःसमधिष्ठितःसदासुवर्णगौ
र्यासुसमप्रभाभृता ॥ सोमेनसंध्यासमयोदितेनयथोदयाद्रिर्विरराजशश्वत् ॥ ८२ ॥ इतिकालिकापुराणेऊनविंशतितमोध्यायः ॥ १९ ॥
मार्कण्डेयउवाच ॥ ॥ अथतत्रगतान्दृष्ट्वासंध्याङ्गिरिवरम्प्रति ॥ तपसेनियतात्मानम्ब्रह्माप्राहस्वकंसुतम् ॥ १ ॥ वसिष्ठंसंशिता
त्मानंसर्वज्ञंज्ञानियोगिनम् ॥ समीपेसुसमासीनंवेदवेदांगपारगम् ॥ २ ॥ ब्रह्मोवाच ॥ वसिष्ठगच्छयत्रैषासन्ध्यायातामनस्विनी ॥

तपसेधृतकामासादीक्षस्वैनांयथाविधि ॥ ३ ॥ मन्दाक्षमभवत्तस्याःपुराद्दष्ट्वेहकामुकान् ॥ युष्मान्माञ्चतथात्मानंसकामान्मुनिसत्तम ॥ ४ ॥
अयुक्तरूपन्तत्कर्मपूर्ववृत्तंविमृष्यसा ॥ अस्माकमात्मनश्चापिप्राणान्त्संत्यक्तुमिच्छति ॥ ५ ॥ अमर्यादेषुमर्यादांतपसास्थापयिष्य
ति ॥ तपः कर्त्तुंगतासाध्वीचन्द्रभागायसाम्प्रतम् ॥ ६ ॥ नभावन्तपसस्तातसातुजानातिकञ्चन ॥ तस्माद्यथोपदेशंसाप्राप्नो
तित्वन्तथाकुरु ॥ ७॥ इदंरूपम्परित्यज्यरूपान्तरंपरम्भवान् ॥ परिगृह्यान्तिकेतस्यास्तपश्चर्यान्निदेशंतु ॥ ८ ॥ इदंस्वरूपम्भवतोदृष्ट्वापूर्वं
यथात्रपाम् ॥ तथाप्राप्यनकिञ्चित्सात्वदग्रेव्याहरिष्यति ॥ ९ ॥ परित्यज्यस्वकंरूपंरूपान्तरधरोभवान् ॥ तस्मात्सन्ध्याम्महाभागामुपदेष्टु
म्प्रगच्छतु ॥१०॥ ॥ मार्कण्डेयउवाच ॥ ॥ तथेत्युक्त्वावसिष्ठोपिवर्णीभूत्वाजटाधरः ॥ तरुणश्चन्द्रभागाययौसन्ध्यान्तिकम्मुनिः ॥
॥ ११ तत्रदेवसरःपूर्णंगुणैर्मानससंमितम् ॥ ददर्शसवशिष्ठोथसन्ध्यान्तत्तीरगामिनीम् ॥ १२ ॥ तीरस्थयातयारेजेतत्सरःकमलोज्ज्वलम् ॥
उद्यदिन्दुसनक्षत्रम्प्रदोषेगगनंयथा ॥ १३ ॥ तान्तत्रदृष्ट्वाथमुनिःसमाभाष्यसकौतुकः ॥ वीक्षाञ्चक्रेसरस्तत्रबृहल्लोहितसंज्ञकम् ॥ १४ ॥
चन्द्रभागानदी तस्मात्कासाराद्दक्षिणाम्बुधिम् ॥ यान्तीनिर्भिद्यददृशेतेनसानुगिरेर्महत् ॥ १५ ॥ निर्भिद्यपश्चिमंसानुश्चन्द्रभागस्यसानदी ॥
यथाहिमवतोगंगातथागच्छतिसागरम् ॥ १६ ॥ ऋषयऊचुः ॥ चन्द्रभागाकथंसिन्धुस्तत्रोत्पन्नामहागिरौ ॥ कीदृक्सरस्ताद्रिप्रेन्द्रबृहल्लो
हितसंज्ञकम् ॥ १७ ॥ कथंसपर्वतश्रेष्ठश्चन्द्रभागाह्वयोभवत् ॥ चन्द्रभागाह्वयाकस्मान्नदीजातावृषोदका ॥ १८ ॥ एतन्नःश्रोष्यमाणाना

१ मन्दाक्षंलज्जा । २ छान्दसोगुणः ।

ज्ञायतेकौतुकम्महत् ॥ माहात्म्यञ्चन्द्रभागायाःकासारस्यगिरेस्तथा ॥ १९ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ श्रूयताञ्चन्द्रभागायाउत्पत्ति
र्मुनिसत्तमाः ॥ युष्माभिश्चन्द्रभागस्यमाहात्म्यन्नामकारणम् ॥ २० ॥ हिमवद्गिरिसंसक्तःशतयोजनविस्तृतः ॥ योजनत्रिंशदायामःकुन्दे
न्दुधवलोगिरिः ॥ २१ ॥ तस्मिन्गिरौपुरावेधाश्चन्द्रंशुद्धंसुधानिधिम् ॥ विभज्यकल्पयामासदेवान्नंसापितामहः ॥ २२ ॥ पित्रर्थञ्चतथात
स्यतिथिवृद्धिक्षयात्मकम् ॥ कल्पयामासजगतांहितायकमलासनः ॥ २३ ॥ विभक्तश्चन्द्रमास्तस्मिञ्जीमूतेद्विजसत्तमाः ॥ अतोदेवाश्चन्द्र
भागन्नाम्नाचक्रुःपुरागिरिम् ॥ २४ ॥ ॥ ऋषयऊचुः ॥ ॥ यज्ञभागेपुतिष्ठत्सुतथाक्षीरोदजेऽमृते ॥ किमर्थमकरोच्चन्द्रन्देवार्थङ्कमलासनः ॥
॥ २५ ॥ तथाकव्येस्थितेकस्मात्पित्रर्थंसमकल्पयत् ॥ तिथिक्षयेतथावृद्धौकथमिन्दुरभूद्धुरो ॥ २६ ॥ एतन्नःसंशयम्ब्रह्मञ्छिन्द्धिसूर्योयथा
तमः ॥ नान्योस्तिसंशयस्यास्यच्छेत्तात्वत्तोद्विजोत्तम ॥ २७ ॥ मार्कण्डेयउवाच ॥ पुरादक्षःस्वतनयाअश्विन्याद्यामनोरमाः ॥ षड्विंश
तिन्तथैकाञ्चसोमायादात्प्रजापतिः ॥ २८ ॥ समस्तास्तास्ततःसोमउपयेमेयथाविधिं ॥ निनायचस्वकंस्थानन्दक्षस्यानुमतेतदा ॥ २९ ॥
अथचन्द्रःसमस्तासुतासुकन्यासुरागतः ॥ रोहिण्यासार्द्धमवसद्रतोत्सवकलादिभिः ॥ ३० ॥ रोहिणीमेवभजतेरोहिण्यासहमोदते ॥ विनेन्दू
रोहिणींशान्तिन्नकांचिल्लभतेपुरा ॥ ३१ ॥ रोहिणीतत्परञ्चन्द्रंवीक्ष्यताःसर्वकन्यकाः ॥ उपचारैर्बहुविधैर्भेजुश्चन्द्रमसम्प्रति ॥ ३२ ॥ निषे
व्यमाणोनुदिनंयदानैवाकरोद्विधुः ॥ तासुभावन्तदासर्वाअमर्षवशमागताः ॥ ३३ ॥ अथोत्तराफाल्गुनीतिनाम्नायाभरणीतथा ॥ कृत्तिकार्द्रा
मघाचैवविशाखोत्तरभाद्रपत् ॥ ३४ ॥ तथाज्येष्ठोत्तराषाढेनवैताःकुपिताभृशम् ॥ हिमांशुमुपसंगम्यपरिवव्रुःसमन्ततः ॥ ३५ ॥ पारिवार्य

निशानाथन्ददृशूरोहिणीन्ततः ॥ वामांकस्थान्तस्यतेनरममाणांस्वमण्डले ॥ ३६ ॥ तांवीक्ष्यतादृशींसर्वारोहिणींवरवर्णिनीम् ॥ जज्वलुश्चा
तिकोपेनहविषेवहुताशनः ॥ ३७ ॥ ततोमघात्रिपूर्वाश्चभरणीकृत्तिकातथा ॥ चन्द्रांकस्थाम्महाभागांरोहिणीञ्जगृहुर्हठात् ॥३८॥ ऊचुश्चाती
वकुपिताःपरुषंरोहिणीम्प्रति ॥ जीवन्त्यान्त्वयिदुःप्राज्ञेनास्मानिन्दुस्तुभावभाक् ॥ ३९ ॥ समुपैष्यतिकस्मिंश्चित्समयेसुरतोत्सुकः ॥
बह्वीनांक्षेमवृद्ध्यर्थन्त्वाहनिष्यामदुर्म्मतिम् ॥ ४० ॥ नत्वांहत्वाभवेत्पापमस्माकमपिकिञ्चन ॥ प्रजनघ्नीम्बहुस्त्रीणामनृतौपापकारिणीम् ॥
॥ ४१ ॥ यस्मिन्नर्थेपुराब्रह्माव्याजहारसुतम्प्रति ॥ ४२ ॥ नीतिशास्त्रोपदेशायतन्नःसंश्रुतमस्तिवै ॥ एकस्ययत्रनिधनेप्रवृत्तेदुष्टकारिणः ॥
बहूनाम्भवतिक्षेमन्तस्यपुण्यप्रदोवधः ॥ ४३ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ तासान्तादृगभिप्रायम्बुद्ध्वादृष्ट्वाचकर्मच ॥ भीताश्चरोहिणी
न्दृष्ट्वाप्रियामतिमनोरमाम् ॥ आत्मानञ्चापराधञ्चतदसम्भोगजम्मुहुः ॥ ४४ ॥ विचिन्त्यरोहिणीम्भीरुन्तासांहस्तादमोचयत् ॥ मोचयित्वा
चबाहुभ्यांसम्परिष्वज्यरोहिणीम् ॥ ४५ ॥ वारयामासताःसर्वाःकृत्तिकाद्याःसभामिनीः ॥ तदेन्दुंवारयन्त्यस्ताःकृत्तिकाद्यामघान्तकाः ॥
साम्यमूचुर्मनस्विन्यस्तांवीक्षन्त्योऽथरोहिणीम् ॥ ४६ ॥ नतेत्रपावाभीतिर्वापापतोस्मान्निरंस्यतः ॥ सञ्जायतेनिशानाथप्राकृतस्येववर्त्त
तः ॥४७॥ कथमस्मान्निराकृत्यचारित्रव्रतधारिणीः ॥ संदाभक्तिमतीरेकाम्मूढवत्त्वान्निषेवसे ॥ ४८ ॥ किन्तेनावगतोधर्मोवेदमूलःश्रुतःपुरा ॥
यद्धर्म्महीनंकुरुषेकर्मसद्भिर्विगर्हितम् ॥ ४९ ॥ धर्मशास्त्रार्थगंकर्मचरन्तीनांयथोचितम् ॥ कथमुद्वाहितानान्त्वम्मुखमात्रन्नवीक्षसे ॥ ५० ॥
गदतोयच्छ्रुतंपूर्वन्नारदायपितुर्मुखात् ॥ दक्षस्यधर्मशास्त्रार्थन्तच्छृणुष्वानिशापते ॥ ५१ ॥ बहुदारःपुमान्यस्तुरागादेकाम्भजोत्त्रियम् ॥

सपापभाक्स्त्रीजितश्चतस्याशौचंसनातनम् ॥ ५२ ॥ यद्दुःखञ्जायतेस्त्रीणांस्वाम्यसम्भोगजंविधो ॥ नतस्यसदृशन्दुःखंकिञ्चिदन्यत्रविद्यते ॥
॥ ५३ ॥ सतीमृतुमतीञ्जायांयोनेयात्पुरुषाधमः ॥ ऋतुघस्रेषुशुद्धेषुभ्रूणहासचजायते ॥ ५४ ॥ भार्यास्याद्यावदात्रेयीतावत्कालंविबो
धनम् ॥ तस्यास्तुसंगमेकिञ्चिद्विहितञ्चापिनाचरेत् ॥ ५५ ॥ बहुभार्यस्यभार्याणाम्मृतुमैथुननाशनम् ॥ नाकिञ्चिद्विद्यतेकर्मशास्त्रेणा
पियदीरितम् ॥ ५६ ॥ तोषयेत्सततम्भार्याविधिवत्पाणिपीडिताः ॥ तासान्तुष्टयातुकल्याणमकल्याणमतोन्यथा ॥ ५७ ॥ सन्तुष्टोभार्य
याभर्त्ताभर्त्राभार्यातथैवच ॥ यस्मिन्नेतत्कुलेनित्यंकल्याणन्तत्रवैध्रुवम् ॥ ५८ ॥ ययाविरुद्धयतेस्वामीसौभाग्यमदहृतया ॥ सपत्नीसंगमं
कर्त्तुंसास्याद्वेश्याभवान्तरे ॥ ५९ ॥ इहापिलोकेवाच्यत्वमधर्मञ्चापिविन्दति ॥ नपितुश्चकुलंस्वामिकुलन्तस्याःप्रमोदते ॥ ६० ॥
विरुद्धयमानेपत्यौयत्सपत्न्यावाप्रवर्त्तते ॥ अतीवदुःखम्भवतितदकल्याणकृत्तयोः ॥ ६१ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इत्येवम्भा
पमाणासुतासुचातीवनिष्ठुरम् ॥ चुकोपचन्द्रमादृष्ट्वामलिनंरोहिणीमुखम् ॥ ६२ ॥ रोहिणीचतदातासामवलोक्याग्रताम्मुहुः ॥ नाकि
ञ्चित्सापिप्रोवाचभयशोकत्रपाकुला ॥ ६३ ॥ अथापिकुपितश्चन्द्रस्ताः शशापतदास्त्रियः ॥ यस्मान्ममपुरश्चोग्रास्तीक्ष्णावाचःसमीरिताः
॥ ६४ ॥ भवतीभिश्चतिसृभिर्लोकेस्मिन्कृत्तिकादिभिः ॥ उग्रातीक्ष्णाइतिख्यातिः प्राप्तव्यात्रिदशेष्वपि ॥ ६५ ॥ तस्मादेवंविधानेननवैताः
कृत्तिकादयः ॥ यात्रायान्नोपयुक्ताहिभविष्यध्वन्दिनेदिने ॥ ६६ ॥ युष्मान्पश्यन्तिदेवाद्यामनुष्याद्याश्चयेक्षितौ ॥ यात्रायान्तेनदोषेण

१ रजस्वला ।

तेषांयात्रानचेष्टदा ॥ ६७ ॥ अथसर्वास्तदाशापन्तस्यश्रुत्वातिदारुणम् ॥ चंद्रस्यहृदयंज्ञात्वाशापाच्चातीवनिष्ठुरम् ॥ ६८ ॥ जग्मुःसर्वा
स्तदादक्षभवनम्प्रत्यमर्षिताः ॥ ऊचुश्चदक्षम्पितरमाश्विन्याद्याःसगद्गदम् ॥ ६९ ॥ सोमोवसतिनास्माभिरोहिणीम्भजतेसदा ॥ सेवमा
नानभजतेसोस्मान्परवधूरिव ॥ ७० ॥ नावस्थानेनावसानेभोजनेश्रवणेतथा ॥ विनेन्दोरोहिणींशांतिलभंतेनाहिकाश्चन ॥ ७१ ॥ रोहि
ण्यावसतस्तस्यसमीपंवीक्ष्यतेसुताः ॥ यान्तीःसोन्यत्रनयनमाधायनाहिवीक्षते ॥ ७२ ॥ मास्त्वन्यःस्वामिसद्भावोमुखमात्रंनवीक्षते ॥
अस्मिन्वस्तुनियत्कार्यन्तदस्माभिर्निगद्यताम् ॥ अस्माभिरेतत्समयेप्यतिरुद्धश्चचन्द्रमाः ॥ ७३ ॥ सतत्कृतेततश्चास्मच्छापन्तीव्रं
तदाकरोत् ॥ दारुणाश्चातितीक्ष्णाश्चलोकेवाच्यत्वमाप्यच ॥ ७४ ॥ अयात्रिकाभविष्यध्वंयूयमित्युक्तवान्विधुः ॥ मार्कण्डेय
उवाच ॥ ॥ श्रुत्वावाक्यंसपुत्रीणान्ताभिः सार्द्धम्प्रजापतिः ॥ ७५ ॥ जगामयत्रसोमोभूद्रोहिण्यासहितस्तदा ॥ दूरादेवविधुर्दृष्ट्वादक्ष
मायान्तमासनात् ॥ ७६ ॥ उत्तस्थावन्तिकेप्राप्यववन्देचमहामुनिम् ॥ अथदक्षस्तदोवाचकृतासनपरिग्रहः ॥ ७७ ॥ सामपूर्वञ्चन्द्रमस
ङ्कृतसंवन्दनन्तथा ॥ ॥ दक्षउवाच ॥ ॥ समंवर्तस्वभार्यासुवैषम्यंत्वम्परित्यज ॥ ७८ ॥ वैषम्येबहवोदोषाब्रह्मणापरिकीर्तिताः ॥ रति
पुत्रफलादारास्तासुकामानुबन्धनात् ॥ ७९ ॥ कामानुबन्धःसंसर्गात्संसर्गः सङ्गमाद्भवेत् ॥ संगमश्चाप्यभिध्यानाद्वीक्षणादभिजायते
॥ ८० ॥ तस्माद्भार्यास्वभिध्यानङ्कुरुत्वंवीक्षणादिकम् ॥ यद्येवन्नैवकुरुषेमद्वचोधर्मयन्त्रितम् ॥ ८१ ॥ तदालोकवचोदुष्टैः पापवाँस्त्वम्भ

१ लोकवचसादुष्टइत्यर्थः ।

विष्यसि ॥ मार्कण्डेय उवाच ॥ ॥ एतच्छ्रुत्वावचस्तस्यदक्षस्यसुमहात्मनः ॥ ८२ ॥ एत्रमस्त्वितिचन्द्रोपिन्यगदद्दक्षशङ्कया ॥ अ
थानुमन्त्र्यतनयाश्चन्द्रआमातरन्तथा ॥ ८३ ॥ ययौदक्षोनिजंस्थानङ्कृतकृत्यस्तदामुनिः ॥ गतेदक्षेततश्चन्द्रस्तांसमासाद्यरोहिणीम्
॥ ८४ ॥ जग्राहपूर्ववद्भावन्तासुतस्यांचरागतः ॥ तत्रैवरोहिणीम्प्राप्यनकाश्चिदपिवीक्षते ॥ ८५ ॥ रोहिण्यामेववसतेततस्ताःकु
पिताःपुनः ॥ गत्वाताः पितरम्प्राहुर्दौर्भाग्योद्विग्नमानसाः ॥ ८६ ॥ सोमोवसतिनास्मासुरोहिणीम्भजतेसदा ॥ तवापिनाकरोद्वाक्य
न्तस्मान्नःशरणम्भव ॥ ८७ ॥ उद्वेगकोपसंयुक्तउत्तस्थौतत्क्षणान्मुनिः ॥ जगाममनसाध्यायन्कर्तव्यन्निकटंविधोः ॥ ८८ ॥ उपग
म्यतदाप्राहवचश्चन्द्रम्प्रजापतिः ॥ समंवर्त्तस्वभार्यासुवैषम्यन्त्वम्परित्यज ॥ ८९ ॥ नचेदिदंवचोस्माकम्मौर्ख्यात्त्वन्नावबुध्यसे ॥ धर्म
शास्त्रातिगायाहंशप्स्येतुभ्यन्निशापते ॥ ९० ॥ मार्कण्डेयउवाच ॥ ॥ ततोदक्षभयाच्चन्द्रस्तत्कर्त्तुम्प्रतितत्पुरः ॥ अंगीचकारातिशया
त्कार्यमेवम्मुहुस्त्विति ॥ ९१ ॥ समम्प्रवर्तनंकर्त्तुम्भार्यास्वंगीकृतेततः ॥ विधुनाप्रययौदक्षःस्वस्थानञ्चन्द्रसम्मतः ॥ ९२ ॥ गतेदक्षे
निशानाथोरोहिण्यासहितोभृशम् ॥ रममाणोविसस्मारदक्षस्यवचनन्तुसः ॥ ९३ ॥ सेवमानाश्चताःसर्वाअश्विन्याद्यामनोरमाः ॥ नाभज
च्चन्द्रमास्तासुअवज्ञामेवचाकरोत् ॥ ९४ ॥ अवज्ञातास्तुताःसर्वाश्चन्द्रेणपितुरन्तिकम् ॥ गत्वैवार्तस्वराश्चार्तारुदन्त्यश्चेदमब्रुवन् ॥ ९५ ॥
नाकरोद्वचनंसोमस्तवापिमुनिसत्तम ॥ अवज्ञांकुरुतेस्मासुपूर्वतोप्यधिकंसच ॥ ९६ ॥ तस्मात्सोमेननःकार्यन्नकिञ्चिदपिविद्यते ॥ तपस्वि
न्योभविष्यामस्तपश्चर्यान्निदेशय ॥ ९७ ॥ तपसाशोधितात्मानःपरित्यक्ष्यामजीवितम् ॥ किमस्माकञ्जीवितेनदुर्भगानान्द्विजोत्तम ॥९८॥

मार्कण्डेयउवाच ॥ इत्युक्तातास्ततःसर्वादक्षजाःकृत्तिकादयः ॥ कपोलमालम्ब्यकरैरुपोपविविशुःक्षितौ ॥ ९९ ॥ तास्तुदृष्ट्वातथाभूतादुःखव्याकुलितेन्द्रियाः ॥ अतिदीनमुखोदक्षःकोपाज्जज्वालवह्निवत् ॥ १०० ॥ अथकोपपरीतस्यदक्षस्यसुमहात्मनः ॥ निश्चक्रामतदायक्ष्मानासिकाग्राद्विभीषणः ॥ १०१ ॥ दंष्ट्राकरालवदनःकृष्णांगारसमप्रभः ॥ अतिदीर्घःस्वल्पकेशःकृशोधमनिसन्ततः ॥ १०२ ॥ अधोमुखोदण्डहस्तःकाशंविश्रम्यसन्ततम् ॥ कुर्वाणोनिम्ननेत्रश्चयोषासम्भोगलोलुपः ॥ १०३ ॥ सचोवाचतदादक्षंकस्मिँस्थास्याम्यहम्मुने ॥ किंवाचाहंकरिष्यामितन्मेवदमहामते ॥१०४॥ ततोदक्षस्तुतम्प्राहसोमंयातुद्रुतम्भवान् ॥ सोममत्तुभवान्नित्यंसोमेत्वन्तिष्ठस्वेच्छया ॥१०५॥ ॥ मार्कण्डेयउवाच ॥ ॥ इतिश्रुत्वा वचस्तस्यदक्षस्याऽथमहामुने ॥ शनैःशनैस्ततःसोममाससादगदःसच ॥ १०६ ॥ आसाद्यसतदासोमंवल्मीकम्पन्नगोयथा ॥ प्रविवेशेन्दुहृदयञ्छिद्रम्प्राप्यमहागदः ॥ १०७ ॥ तस्मिन्प्रविष्टेहृदयेदारुणेराजयक्ष्माणि ॥ मुमोहचन्द्रस्तन्द्राश्चविषमाम्प्राप्तवाँश्चसः ॥ १०८ ॥ उत्पद्यप्रथमंयस्माल्लीनोराजन्यसौगदः ॥ राजयक्ष्मेतिलोकेस्मिन्नस्यख्यातिरभूद्द्विजाः ॥ १०९ ॥ ततस्तेनाभिभूतःसयक्ष्मणारोहिणीपतिः ॥ क्षयञ्जगामानुदिनंग्रीष्मेक्षुद्रनदीयथा ॥ ११० ॥ अथचन्द्रेक्षीयमाणेसर्वौषध्योगताःक्षयम् ॥ क्षयंयातास्वौषधीषुनयज्ञःसमवर्त्तत ॥ १११ ॥ यज्ञाभावात्तुदेवानामन्नंसर्वंक्षयंगतम् ॥ पर्जन्याश्चततोनष्टास्ततोवृष्टिर्नचाभवत् ॥ ११२ ॥ वृष्ट्यभावेतुलोकानामाहाराःक्षीणतांगताः ॥ दुर्भिक्षव्यसनोपेतेसर्वलोकेद्विजोत्तमाः ॥ ११३ ॥ दानधर्मादिकंकिञ्चिन्नलोकस्यप्रवर्तते ॥

१ विश्रम्य विश्रामं कृत्वा सन्ततं काशं कुर्वाण इत्यन्वयः ।

सत्त्वहीनाःप्रजाःसर्वालोभेनोपहतेन्द्रियाः ॥ ११४ ॥ पापमेवतदाचक्रुःकुकर्म्मरतयश्चताः ॥ एतान्दृष्ट्वातदाभावान्दिक्पालाःसपुरन्दराः ॥
॥ ११५ ॥ जग्मुःक्षोभम्परन्देवाः सागराश्चग्रहास्तथा ॥ ततोदृष्ट्वाजगत्सर्वंव्याकुलन्दस्युपीडितम् ॥ ११६ ॥ ब्रह्माणमगमन्देवाःसर्वेशक्र
पुरोगमाः ॥ उपसंगम्यदेवेशंस्रष्टारञ्जगताम्पतिम् ॥ ११७ ॥ प्रणम्याथयथायोग्यमुपविष्टास्तदासुराः ॥ तान्म्लानवदनान्त्सर्वान्वीक्ष्यले
कपितामहः ॥ ११८ ॥ अभिभूतान्परेणेवहृतस्वविषयानिव ॥ पप्रच्छसम्मुखीकृत्यगुरुमिन्द्रंहुताशनम् ॥ ११९ ॥ ॥ ब्रह्मोवाच ॥ ॥
स्वागतम्भोसुरगणाःकिमर्थंयूयमागताः ॥ दुःखोपहतदेहाँश्चयुष्मान्म्लानाँश्चलक्षये ॥ १२० ॥ निराबाधान्निरातंकान्युष्मान्त्सर्वाश्चकाम
गान् ॥ कृत्वास्वविषयेन्यस्तान्कथम्पश्यामिदुःखितान् ॥ १२१ ॥ यद्वोभवद्दुःखबीजंयुष्मान्वायस्तुबाधते ॥ तत्कथ्यतामशेषेणासिद्धश्चा
प्यवधार्यताम् ॥१२२॥ ॥ मार्कण्डेयउवाच ॥ ततोवृद्धश्रवाजीवःकृष्णवर्त्माचलोकभृत् ॥ उवाचात्मभुवेतस्मैसुराणान्दुःखकारणम्॥१२३॥
शृणुसर्वजगत्कर्त्तस्त्वांयेनवयमागताः ॥ यद्वास्माकन्दुःखबीजंयतोम्लानश्रियोवयम् ॥ १२४ ॥ नक्वचित्सम्प्रवर्त्तन्तेयज्ञालोकेपितामह ॥
निराधारानिरातंकाःप्रजाःसर्वाःक्षयंगताः ॥ १२५ ॥ नचदानादिधर्मश्चनतपांसिक्षितौक्वचित् ॥ नैववर्षतिपर्जन्यः क्षीणतोयाभवत्क्षितिः
॥ १२६ ॥ क्षीणाः सर्वास्तथौषध्यः सस्यालोकाःसमाकुलाः ॥ दस्युभिःपीडिताविप्रावेदवादन्नकुर्वते ॥ १२७ ॥ अन्नवैकल्यमासाद्यम्रिय
न्तेवहवः प्रजाः ॥ क्षीणेषुयज्ञभागेषुभोग्यहीनास्तथावयम् ॥ १२८ ॥ दुर्बलास्तुश्रियाहीनानैवशान्तिलभामहे ॥ रोहिण्यामन्दिरेचन्द्रो
वक्रगत्याचिरंस्थितः ॥ १२९ ॥ वृषराशौसचक्षीणोज्योत्स्नाहीनश्चवर्त्तते ॥ यदैवान्विष्यतेदेवैश्चन्द्रोनैषाम्पुरःसरः ॥१३०॥ कदाचिदपिदे

वानांसमाजेवाभवद्विधे ॥ कदाचिद्रोहिणीन्त्यक्त्वानैवक्वचनगच्छति ॥ १३१ ॥ यद्यन्यःकोपिनभवेत्तदाचन्द्रोबहिर्भवेत् ॥ दृश्यतेसक
लाहीनःकलामात्रावशेषकः १३२ ॥ इतिसर्वत्रलोकेशवृत्तःकर्मविपर्ययः ॥ तन्दृष्ट्वाकान्दिशीकास्तुवयन्त्वांशरणंगताः ॥ १३३ ॥ पाता
लाद्यावदुत्थायकालकञ्जादयोऽसुराः ॥ नास्माँल्लोकेशबाधन्तेतावन्नस्त्राहिसाध्वसात् ॥ १३४ ॥ अयम्प्रवर्त्ततेकस्माज्जगतांवाव्यतिक्रमः ॥
नजानीमस्तुतत्सर्वंविप्लवेवापिकारणम् ॥ १३५ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ एतत्सुराणांवचनान्दिव्यदर्शीपितामहः ॥ श्रुत्वाक्षण
मभिध्यायन्निजगादसुरोत्तमान् ॥ १३६ ॥ ब्रह्मोवाच ॥ शृण्वन्तुदेवताः सर्वायदर्थंलोकविप्लवः ॥ प्रवर्ततेऽधुनायेनशान्तिस्तस्यभविष्यति
॥ १३७ ॥ सोमोदाक्षायणीः कन्याः सप्तविंशतिसंख्यकाः ॥ अश्विन्याद्यावरवधूर्भार्यार्थेपरिणीतवान् ॥ १३८ ॥ परिणीयसताः सर्वारो
हिण्यांसततंविधुः॥प्रावर्त्ततानुरागेणनसमस्तासुवर्त्तते ॥ १३९ ॥ अश्विन्याद्यास्तुताःसर्वादौर्भाग्यज्वरपीडिताः॥ षड्विंशतिर्वरारोहाःपितरम्प्र
स्थिताःस्वकम्॥१४०॥प्रवर्त्ततेनिशानाथोरोहिण्यांरागतोयथा ॥ तथानतामभजतेतद्दक्षायन्न्यवेदयन् ॥ १४१ ॥ ततोदक्षोमहाबुद्धिःसाम्ना
संस्तूयविट्पतिम् ॥ बहुसूनृतमाभाष्यपुत्र्यर्थेचान्वरोधत ॥ १४२ ॥ अनुरुद्धोयथाकामन्दक्षेणसुमहात्मना ॥ समम्प्रवर्त्तितुंतासुसमयंकृत
वान्विधुः ॥ १४३ ॥ सममंगीकृतेभावन्तासुकर्त्तुंहिमांशुना ॥ स्वञ्जगामततःस्थानन्दक्षोपिमुनिसत्तमः ॥ १४४ ॥ गतेदक्षेमुनिश्रेष्ठेवैषम्य
न्तासुचन्द्रमाः ॥ जहौनभावन्ताःशश्वत्कुपिताःपितरंगताः ॥ १४५ ॥ ततोदक्षःपुनश्चन्द्रमवरुद्ध्यसुतान्तरे ॥ समांवृत्तिम्प्रतिश्राव्यवचनञ्चे
दमब्रवीत् ॥ १४६ ॥ नसमंवर्त्ततेचन्द्रसर्वास्वासुभवान्यदि ॥ तदाशप्स्येत्वहन्तुभ्यन्तस्मात्कुरुसमञ्जसम् ॥ १४७ ॥ ततोगतेपुनर्दक्षेनसमं

वर्त्ततेयदा ॥ तासुचन्द्रस्तदादक्षम्पुनर्गत्वाब्रुवन्नृषा ॥ १४८ ॥ नतेवचःसत्कुरुतेनैवास्मासुप्रवर्त्तते ॥ वयन्तपश्चरिष्यामःस्थास्यामश्चतवान्तिके ॥ १४९ ॥ तासामितिवचःश्रुत्वाकुपितःसमहामुनिः ॥ क्षयायचन्द्रस्यपुनःशापायोत्सुकतांगतः ॥ १५० ॥ शापायोद्युक्तमनसःकुपितस्यमहामुनेः ॥ क्षयोनाममहारोगोनासिकाग्राद्विनिर्गतः ॥ १५० ॥ प्रेषितःसचचन्द्रायदक्षेणमुनिनाततः ॥ प्रविष्टवाँस्तस्यदेहेक्षयितस्तेनचन्द्रमाः ॥ १५२ ॥ क्षीणेचन्द्रेक्षयंयाताज्योत्स्नास्तस्यमहात्मनः ॥ क्षीणासुसर्वज्योत्स्नासुसर्वौषध्यःक्षयंगताः ॥ १५३ ॥ ओषध्यभावाल्लोकेस्मिन्नयज्ञःसम्प्रवर्त्तते ॥ यज्ञाभावादनावृष्टिस्ततःसर्वप्रजाक्षयः ॥ १५४ ॥ यज्ञभागोपभोगेनहीनानाम्भवतान्तथा ॥ दुर्बलत्वंसमुत्पन्नंविकारश्चस्वगोचरे ॥ १५५ ॥ इतिवःकथितंसर्वंयथाभूल्लोकविप्लवः ॥ येनोपायेनतच्छान्तिस्तच्छृण्वन्तुसुरोत्तमाः ॥ १५६ ॥ इतिकालिकापुराणेविंशतितमोध्यायः ॥ २० ॥ ॥ ब्रह्मोवाच ॥ ॥ गच्छन्तुभोःसुरगणादक्षस्यसदनम्प्रति ॥ प्रासादायतचन्द्रार्थेसचपूर्णोभवेद्यथा ॥ १ ॥ पूर्णेचन्द्रेजगत्सर्वम्प्रकृतिस्थम्भविष्यति ॥ युष्माकञ्चभवेच्छान्तिरोषधीनाञ्चसम्भवः ॥ २ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इतिब्रह्मवचःश्रुत्वादेवाःशक्रपुरोगमाः ॥ प्रययुर्हृष्टमनसस्तदादक्षनिवेशनम् ॥ ३ ॥ यथान्यायमुपस्थायसर्वेमुनिवरंसुराः ॥ प्रोचुःप्रजापतिन्दक्षम्प्रणम्यश्लक्ष्णयागिरा ॥ ४ ॥ देवाऊचुः ॥ प्रसीदसीदताम्ब्रह्मन्नस्माकम्बहुदुःखिनाम् ॥ उद्धरस्वमहाबुद्धेत्राहिनःशोकसागरात ॥ ५ ॥ यद्रूपम्ब्रह्मसंज्ञन्तुसृष्टिकृत्परमात्मनः ॥ तदंशस्त्वम्परञ्ज्योतिर्विप्ररूपनमोस्तुते ॥ ६ ॥ रक्षणात्सर्वजगताम्प्रजापालनकारणात् ॥ दक्षःप्रजापतिश्चेतियोगेशस्तन्नुमोवयम् ॥ ७ ॥ दक्षायसर्वजगतान्दक्षायकुशलात्मनाम् ॥ दक्षायात्महितायाशुनमस्तुभ्यम्महात्मने ॥ ८ ॥

सततञ्चिन्त्यमानस्ययोगिभिर्नियतेन्द्रियैः ॥ सारस्यसारभूतस्त्वन्दक्षायपरमात्मने ॥ ९ ॥ योगिवृत्तिरनाधृष्यःपारगाणाम्परायणः ॥ आ
द्यन्तमुक्तःसहसातस्मैतुभ्यन्नमोनमः ॥ १० ॥ इतितेषांवचःश्रुत्वादक्षोयज्ञभुजान्तथा ॥ प्राहप्रसन्नवदनःशक्रमाभाष्यमुख्यतः ॥ ११ ॥
दक्षउवाच ॥ कुतःशक्रमहाबाहोभवतान्दुःखमागतम् ॥ दुःखहेतुंवदविभोश्रोतुमिच्छाम्यहन्तुतम् ॥ १२ ॥ ममास्तिवाकिङ्कर्त्तव्यम्भवतान्दुः
खहानये ॥ तदहंयदिशक्नोमिकरिष्यामिहितंसमम् ॥ १३ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ तच्छ्रुत्वावचनन्तस्यब्रह्मसूनोर्म्महात्मनः ॥
जगादवाक्पतिःशक्रोवीतिहोत्रोऽथतम्मुनिम् ॥ १४ ॥ तऊचुः ॥ क्षयीजातोनिशानाथस्तस्मिन्क्षीणेक्षयंगताः ॥ सर्वौषध्योद्विजश्रेष्ठतद्धानि
र्यज्ञहानिकृत् ॥ १५ ॥ यज्ञेविनष्टेसकलाःप्रजाःक्षुद्भयकातराः ॥ वृष्ट्यभावान्महद्दुःखम्प्राप्यनष्टाश्चकाश्चन ॥ १६ ॥ क्षयोयंरात्रिनाथस्य
यस्तेकोपात्प्रवर्त्तते ॥ ससर्वजगतोब्रह्मन्नभावार्थमुपस्थितः ॥ १७ ॥ नाधुनातत्रिभुवनेयन्नक्षुब्धंतुकिञ्चन ॥ विष्टुतंवास्तिविप्रेन्द्रस्थावराःपत
गाश्चवा ॥ १८ ॥ नयज्ञाःसम्प्रवर्त्तन्तेनतपस्यन्तितापसाः ॥ आहारदुःखान्निश्रीकाःप्रजाःक्षीणाभयातुराः ॥ १९ ॥ एवम्प्रवृत्तेविप्रेन्द्रवि
प्लवेस्माद्रसातलात् ॥ दैत्यानयावदुत्थायबाधन्तेतावदुद्धर ॥ २० ॥ प्रसीददक्षचन्द्रस्यतम्पूरयतपोबलात् ॥ पूर्णेचन्द्रेजगत्सर्वम्प्रकृतिस्थ
म्भविष्यति ॥२१॥ ॥ मार्कण्डेय उवाच ॥ ॥ इतितेषांवचःश्रुत्वाप्रजापतिसुतस्तदा ॥ उवाचतान्त्सुरगणान्हृदयाच्छल्यमुद्धरन्॥२२॥
॥ ॥ दक्ष उवाच ॥ ॥ यन्मेवचोनिशानाथेप्रवृत्तंशापकारणम् ॥ २३ ॥ नकेनापिनिदानेनामिथ्याकर्तुन्तदुत्सहे ॥ किन्तुमद्वचनंयस्मा
न्नैकान्तेनमृषाभवेत् ॥ २४ ॥ चन्द्रोपिवर्द्धतेयस्मात्तदुपायमुदैक्षत ॥ तत्राप्ययमुपायोस्तिमासार्द्धंयातुचन्द्रमाः ॥ २५ ॥ क्षयंवृद्धिञ्चमासा

र्द्धसमम्भार्यासुवर्तताम् ॥ तस्यतद्वचनंश्रुत्वातम्प्रसाद्यप्रजापतिम् ॥ २६ ॥ सर्वेसुरगणास्तत्रगतायत्रास्तिचन्द्रमाः ॥ एवमुक्तेतुवचनेदक्षे
णमुनिनाद्विजाः ॥ २७ ॥ अथचन्द्रंसमादायभार्याभिःसहितन्तदा ॥ जग्मुस्तेब्रह्मभवनम्मुदिताःसुरसत्तमाः ॥ २८ ॥ तत्रगत्वामहाभागा
यथादक्षेणभाषितम् ॥ तत्सर्वंकथयामासुर्ब्रह्मणेपरमात्मने ॥ २९ ॥ ब्रह्मादक्षवचःश्रुत्वादेवानांवदनात्तदा ॥ चन्द्रभागम्महाशैलंजगामस
हितःसुरैः ॥ ३० ॥ तत्रगत्वासुरश्रेष्ठःप्रजानांहितकाम्यया ॥ स्नापयामासशुभ्रांशुम्बृहल्लोहितपुष्करे ॥ भूतभव्यभवज्ज्ञानःपूर्वमेवपितामहः ॥
॥ ३१ ॥ एतदर्थञ्चकारात्रसरःपूर्णञ्जगद्गुरुः ॥ तत्रस्नातस्यजन्तोस्तुनीरोगत्वम्प्रजायते ॥ चिरायुष्ट्वञ्चसततम्बृहल्लोहितसंज्ञके ॥ ३२ ॥
तत्रस्नातस्यचन्द्रस्यशरीरात्तत्क्षणंगदः ॥ राजयक्ष्मानिःससारपूर्वरूपोयथोदितः ॥ ३३ ॥ निःसृत्यराजयक्ष्मापित्रह्माणञ्चजगत्प
तिम् ॥प्रणम्याहंकिंकरिष्येक्वगच्छामीत्युवाचतम् ॥ ३४ ॥ स्थानम्पत्नीञ्चलोकेशकृत्यम्ममसनातनम् ॥ निदेशयानुरूपम्मेस्रष्टात्वञ्ज
गतांयतः ॥ ३५ ॥ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ ततोब्रह्मापितम्पुष्टन्निरीक्ष्येन्दुंशरीरगैः ॥ अमृतैस्तेनातिभुक्तैःक्षीणञ्चापि
निशापतिम् ॥ ३६ ॥ दोर्भिःस्वयन्तंगृहीत्वागिरौनिष्पिष्यवैमुहुः ॥ अमृतंगालयामासशरीराद्राजयक्ष्मणः ॥ ३७ ॥ अमृता
निचयान्याशुगालितानितदाजले ॥ क्षीरोदस्यसचिक्षेपमध्येरहसिलोकभृत् ॥ ३८ ॥ तस्मादस्यामृतादिन्दोःकलाःक्षीणास्तुयाः
पुरा ॥ तासाञ्जग्राहलवशश्चूर्णान्क्षीरोदसागरात् ॥ ३९ ॥ कलामात्रावशेषस्यसंसर्गाद्राजयक्ष्मणः ॥ क्षीणाःकलाःपञ्चदशयाःपूर्वममृता
त्मिकाः ॥ ४० ॥ ताराजयक्ष्मगर्भस्थाश्चूर्णीभूतास्तुपीडया ॥ तेजोज्योत्स्नासुधाभिस्तुनिबद्धंऽयत्कलापतेः ॥ ४१ ॥ शरीरन्तत्रिधा

भूतंगर्भस्थंराजयक्ष्मणः ॥ ज्योतिश्चूर्णमभूज्ज्योत्स्नालीनाराजादियक्ष्मणि ॥ ४२ ॥ द्रवीभूताःसुधाःसर्वागर्भेरोगस्यचस्थिताः ॥ यदा
निर्गालयामाससुधाम्ब्रह्मागलान्तरात् ॥ ४३ ॥ तदाज्योत्स्नासुधाज्योतिःसर्वन्तस्माद्बहिर्गतम् ॥ क्षीरोदसागरेक्षिप्तन्तत्सर्वंविधिना
तदा ॥ ४४ ॥ देवान्गिरौपरित्यज्यस्वयंगत्वाद्रुतन्ततः ॥ ततोमृतानिप्रक्षाल्यकलाचूर्णानिवारिभिः ॥ ४५ ॥ ज्योत्स्नाञ्चाप्याजगामाशु
गृहीत्वातत्रयंगिरिम् ॥ क्षीरोदाद्गिरिमासाद्यचन्द्रभागन्तदाविधिः ॥ ४६ ॥ देवमध्येकलाचूर्णंसुधाज्योत्स्नान्यवीविशत् ॥ संस्थाप्यतत्र
यम्ब्रह्मादेवानाम्मध्यतःस्थितः ॥ ४७ ॥ जगादराजयक्ष्माणन्तत्स्थानादिनिदेशयन् ॥ ॥ ब्रह्मोवाच ॥ ॥ सर्वदायोदिवारात्रौसन्ध्यायां
वनितारतः ॥ ४८ ॥ सेवतेसुरतन्तस्मिन्राजयक्ष्मन्वसिष्यसि ॥ प्रतिश्यायश्वासकाससंयुक्तोमैथुनञ्चरेत् ॥ ४९ ॥ सतेप्रवेश्यःसततंश्ले
ष्मणश्चतथाविधः ॥ कृष्णाख्यामृत्युपुत्रीयाभवतःसदृशीगुणैः ॥ ५० ॥ सातेस्तुभार्य्यासततम्भवन्तमनुयास्यति ॥ क्षीणत्वम्भवतःकृत्य
न्ततस्त्वंविषयंकुरु ॥ ५१ ॥ द्रुतंगच्छयथाकामञ्चन्द्रात्त्वंविमुखोभव ॥ ॥ मार्कण्डेय उवाच ॥ ॥ एवंविसृष्टोविधिनाराजयक्ष्माम
हागदः ॥ ५२ ॥ पश्यतांसर्वदेवानामन्तर्द्धानञ्जगामह ॥ अन्तर्हितेमहारोगेब्रह्मालोकपितामहः ॥ ५३ ॥ चन्द्रंसमग्रयामासकलापञ्चदशै
धितम् ॥ तेनक्षीरोदधौतेनसुधापूरेनचात्मभूः ॥ ५४ ॥ सज्योत्स्नैस्तुकलाचूर्णैःपूर्ववच्चाकरोद्विधुम् ॥ सषोडशकलापूर्णःपूर्ववद्विबभौ
यदा ॥ ५५ ॥ चन्द्रस्तदासर्वदेवासुमुदुस्तस्यदर्शनात् ॥ अथचन्द्रस्तदापूर्णःप्रणिपत्यपितामहम् ॥ ५६ ॥ उवाचेदंसुरसदोमध्यगोना

तिहर्षितः ॥ ५७ ॥ सोमउवाच ॥ ॥ नस्यामपूर्ववद्ब्रह्मञ्छरीरेममवर्त्तते ॥ ५८ ॥ नवीर्यंवातथोत्साहोनिषीदन्त्यङ्गसन्धयः ॥ नोत्सहे
पूर्ववच्चेष्टांविधातुंसुतरामहम् ॥ ५९ ॥ चेष्टाहीनस्त्वनुदिनंवर्तेयंकेनलोककृत् ॥ ॥ ब्रह्मोवाच ॥ ॥ ग्रस्तस्ययक्ष्मणासोमयदभूदंग
सन्धयः ॥ ६० ॥ पूर्वंविशीर्णाभवतस्तत्पूर्णमभवन्नहि ॥ अधुनाभवतोदेहचूर्णान्निःसारितम्मया ॥ ६१ ॥ शरीरात्सामृतज्योत्स्नामञ्जसा
राजयक्ष्मणः ॥ तेषाम्प्रक्षालनविधौलवशोयत्स्थितञ्जले ॥ ६२ ॥ ज्योत्स्नायाश्चसुधायाश्चतेनहीनोभवान्यतः ॥ ततोंगसन्धयो
राजँस्तवसीदन्तिसाम्प्रतम् ॥ ६३ ॥ तस्योपायंविधास्यामियथानार्तिंलभेद्भवान् ॥ प्राजापत्यःपुरोडाशोहवनीयःपुरोध्वरे ॥ ६४ ॥
ऐन्द्रस्ततोनुचाग्नेयःप्रदेयःसर्वतःक्रतौ ॥ ततोनुभवतोभागःपुरोडाशोमयाकृतः ॥ ६५ ॥ तेनभागेनभुक्तेननित्यंयज्ञकृतेनहि ॥ पूर्ववत्ते
समुत्साहःस्यामवीर्यम्भविष्यति ॥ ६६ ॥ येचामृतकणास्तोयेक्षीरोदस्यास्थितास्तव ॥ शरीरचूर्णेवायत्तेज्योत्स्नानाञ्चापियेलवाः ॥
॥ ६७ ॥ तत्सर्वंम्भवतोज्योत्स्नायोगादनुदिनंविधो ॥ वृद्धिंयास्यतिसततङ्क्षीरसागरगर्भगम् ॥ ६८ ॥ स्वारोचिषेन्तरेप्राप्तेद्वितीयेशंकरां
शजः ॥ दुर्वासाभवितविप्रःप्रचण्डश्चण्डभानुवत् ॥ ६९ ॥ सदेवेन्द्रस्याविनयाच्छापन्दत्त्वासुदारुणम् ॥ करिष्यतित्रिभुवनान्निःश्री
कंससुराऽसुरम् ॥ ७० ॥ श्रियाहीनेततोलोकेभवितालोकविप्लवः ॥ यथातवक्षयात्सोमप्रवृत्तःसर्वविप्लवः ॥ ७१ ॥ तन्मानुषप्रमाणेनतृती
येतुकृतेयुगे ॥ भविष्यतिस्थास्यतिचयावद्युगचतुष्टयम् ॥ ७२ ॥ ततश्चतुर्थेसम्प्राप्तेसहदेवैःकृतेयुगे ॥ क्षीरोदान्निर्मथिष्यामःशम्भुर्विष्णुरह

१ स्याम बलम्। २ ग्रस्तस्येति हे सोमयक्ष्मणाग्रस्तस्य भवतः अंगसन्धयः पूर्वंयद्विशीर्णाअभवन् तत्पूर्णाभूदित्यर्थः।

न्तथा ॥ ७३ ॥ मन्थानम्मन्दरंकृत्वावेत्रंकृत्वातुवासुकिम् ॥ यज्ञभागेषुहीनेषुदेवान्नार्थैवयन्ततः ॥ ७४ ॥ मथिष्यामःसमन्दे
वैःक्षीरोदंसहदानवैः ॥ त्वच्छरीरामृतमिदंयत्स्थितङ्क्षीरसागरे ॥ ७५ ॥ तत्प्रमथ्यग्रहीष्यामोराशीभूतन्तथाक्षयम् ॥ सर्वौषध्यन्तरेकृत्वा
त्वच्छरीरन्तदावयम् ॥ ७६ ॥ क्षेप्स्यामःसागरजलेशरीरार्थंविधोतव ॥ निर्मथ्यसागरम्पश्चात्समुद्धार्यंयदामृतम् ॥ ७७ ॥ तदातववपुस्त
स्मिन्पूर्ववत्सम्भविष्यति ॥ ओजोवीर्याद्भुतङ्कान्तमक्षयञ्चसुधात्मकम् ॥ ७८ ॥ दृढाङ्गसन्धिकञ्चारुभविष्यतिवपुस्तव ॥ ॥ मार्कण्डेय
उवाच ॥ ॥ सुधांशुमेवमाभाष्यब्रह्मालोकपितामहः ॥ ७९ ॥ विधोःक्षयायमासार्द्धंवृद्धयेयत्नवानभूत् ॥ यथादक्षेणगंदितम्मासार्द्धंयातु
चन्द्रमाः ॥ ८० ॥ क्षयंवृद्धिञ्चमासार्द्धंयत्नन्तत्राकरोद्विधिः ॥ ततःषोडशधाचन्द्रंसुरज्येष्ठोविभक्तवान् ॥ ८१ ॥ विभज्यचसुरान्त्सर्वा
न्त्समुवाचेदमुत्तमम् ॥ कलाःषोडशचन्द्रस्यतत्रैकाशम्भुमूर्द्धनि ॥ ८२ ॥ तिष्ठत्वद्यावधिपराक्षयंयान्तुक्षयंविना ॥ क्षयेणयदिरोगेणमासा
र्द्धंदक्षवाक्यतः ॥८३॥ क्षयायपीडयतेचंद्रोनोपशांतिस्तदाभवेत् ॥ किंत्वस्ययाकलाशम्भौज्योत्स्नागच्छंतुताम्प्रति ॥ ८४ ॥ चतुर्दशकला
संस्थाःप्रतिमासंसुरोत्तमाः ॥ चतुर्दशकलासंस्थान्यमृतानिपिबंतुवै ॥ ८५ ॥ प्रतिपत्तिथिमारभ्यभवंतस्ताश्चतुर्दशीम् ॥ तेजोभागाः
सूर्य्यबिम्बश्चतुर्दशातिथौक्रमात् ॥ ८६ ॥ प्रविशंतुक्षयंत्वेवंकृष्णपक्षेविधोर्भवेत् ॥ यातुशेषाकलादर्शेहरित्पत्रेपलायिता ॥ ८७ ॥
तिष्ठतुप्रथमेभागेतिथौतस्यान्निशापतेः ॥ द्वितीयेदर्शभागेतुरोहिण्यायातुमंदिरम् ॥ ८८ ॥ तृतीयेतुसरस्वत्यांस्नात्वासमुत्थितोविधुः ॥ चतु
र्थेवलसम्पूर्णस्तिथिभागेविभावसोः ॥ ८९ ॥ मण्डलंयातुचंद्रोयंसबिम्बरथघोटकः ॥ यावत्कालेनहिकलाप्रथमाक्षयमाप्नुयात् ॥ ९० ॥

एवमेवंकृष्णपक्षेतावत्साप्रतिपद्भवेत् ॥ द्वितीयादौकृष्णपक्षेवृद्धिह्रासस्तथाविधः ॥ ९१ ॥ तिथीनांवृद्धिहेतुश्चशुक्लकृष्णेतथाभवेत् ॥ ततः
पुनःशुक्लपक्षेयावत्पूर्वकलोदिता ॥ ९२ ॥ वृद्धिर्नैतिभवेतावत्प्रतिपत्तिथिरादितः ॥ ततोद्वितीयभागस्ययाज्योत्स्नाहरमूर्द्धनि ॥ ९३ ॥
स्थितायावैकलायातुगतासापुनरेष्यति ॥ युष्माभिस्तुभवेत्पेयममृतंयद्दिनेदिने ॥९४॥ ताद्वितीयादितिथिभिःपूर्णाताभिःसदैवहि ॥ स्वयमु
त्पत्स्यतेचन्द्रोज्योत्स्नायोगात्सुरोत्तमाः ॥९५॥यथादिनेदिनेभागाःक्षयंयान्तितथाविधोः ॥ वृद्धिंगच्छन्त्यनुदिनंशुक्लपक्षेन्वहंसुराः ॥९६॥
तेजोभागःसूर्यबिम्बात्पुनरेवसमेष्यति ॥ प्रयास्यतिकृष्णपक्षेयथाभागक्रमन्तथा ॥ ९७ ॥ ज्योत्स्नाहरशिरश्चन्द्रात्प्रत्यहम्पुनरेष्यति ॥
तेजोभागःसूर्यबिम्बादमृतम्वर्षतिस्वयम् ॥ ९८ ॥ एवंवृद्धिःशुक्लपक्षे सुधांशोः सम्भविष्यति ॥ पक्षयोःशुक्लकृष्णत्वञ्चन्द्रवृद्धिक्षयाद्भवेत् ॥
॥ ९९ ॥ यावत्कालेनयोभागःक्षयंवृद्धिञ्चयास्यति ॥ तावत्कालमभिव्याप्यातिथिःस्थास्यतिसापुनः ॥ १०० ॥ चिरेणवृद्धिर्य्यदिवाक्षयो
वाद्रुतेनवृद्धिर्य्यदिवाक्षयोवा ॥ द्रुतात्तिथीनान्तुसदाक्षयःस्याच्चिरस्तुवृद्धिस्तिथिषुप्रवेशे ॥१०१॥ हव्यंकव्यञ्चचन्द्रेणविनानसम्भविष्यति ॥
तस्मात्तयोःप्रवृद्ध्यर्थञ्चन्द्रंरक्षन्तुदेवताः ॥ १०२ ॥ आश्वासनीयःशुभ्रांशुःकलाशेषोनुमासतः ॥ अमावास्यापराह्णेतुपितृभीरोहिणीगृहे ॥
॥ १०३ ॥ तस्यैवास्वादनात्कव्यंवृद्धिंयास्यतिचान्वहम् ॥ तेनकव्येनपितरस्तृप्तिंयास्यन्तिवैपराम् ॥ १०४ ॥ ॥ मार्कण्डेयउवाच ॥
ततःसुरगणाःसर्वेयथोक्तंविधिनातथा ॥ चक्रुर्लोकहितार्थायचन्द्रस्यक्षयवृद्धये ॥ १०५ ॥ महादेवोपिचन्द्रार्द्धंस्वरूपम्परमात्मनः ॥ जग्रा
हदेवैर्विधिनाशिरसाक्षुधितोभृशम् ॥ १०६ ॥ यत्तेजःपरमन्नित्यमजमव्ययमक्षयम् ॥ तत्स्वरूपाचन्द्रकलाशापतस्तुक्षयंगता ॥ १०७ ॥

प्रविशन्तियदाज्योतिरानन्दमजरम्परम् ॥ योगिनस्तुतदातेषाञ्चिन्तनंलीनमेष्यति ॥ १०८ ॥ महादेवशिरःसंस्थेलीनोवित्तेसुधानिधौ ॥
चन्द्रद्वाराभवेन्मुक्तिरित्येवंवैदिकीश्रुतिः ॥ १०९ ॥ एतज्ज्ञात्वामहादेवःक्षयवृद्ध्याविनाकृतम् ॥ हितायसर्वलोनाञ्चग्राहशिरसाविधुम् ॥
॥ ११० ॥ चन्द्रज्योत्स्नासमायोगादौषध्योयान्तिवृद्धये ॥ सर्वौषधीषुवृद्धासुप्रवर्त्तन्तेततोध्वराः ॥ १११ ॥ अध्वरेषुप्रवृत्तेषुस्वान्स्वा
न्भागाँस्तुदेवताः ॥ परिगृह्णन्तिपितरस्तथाकव्यानिभूरिशः ॥ ११२ ॥ अमृतम्ब्रह्मणासृष्टंयद्देवेभ्यःपुरातनम् ॥ तेनतृप्यन्तिहीनायेहव्यभा
गेनदेवताः ॥ ११३ ॥ यज्ञेनाप्यायितन्तच्चज्योत्स्नाभिर्वृद्धिमेतिवै ॥ यज्ञजोत्स्नाविनाभूतन्तच्चस्यात्क्षीणमन्यथा ॥ ११४ ॥ अतोमृतस्य
यज्ञस्यचन्द्रमाःकारणंस्वयम् ॥ अतोदक्षस्यशापात्तुरक्षायैतच्चिकीर्षितम् ॥ ११५ ॥ अद्यापिकृष्णपक्षेतुसुधांशुःपीयतेसुरैः ॥ तेजःसूर्यंयाति
शम्भुश्चन्द्रार्द्धञ्ज्योत्स्निकातथा ॥ ११६ ॥ पुनश्चशुक्लपक्षेतुशेषोदेतिकलाततः ॥ ज्योत्स्नाद्वितीयोभागस्तुतेजोभागोद्वितीयकः ॥ ११७ ॥
अन्येत्युग्रशिरश्चन्द्रात्सूर्य्यबिम्बाद्यथाक्रमम् ॥ कलाःषोडशचन्द्रस्यतत्रैकाशम्भुशेखरे ॥ ११८ ॥ सिताऽसितावुभौपक्षौशेषाणामुद
यक्षयौ ॥ इतिवःसर्वमाख्यातंविभगक्तश्चन्द्रमायथा ॥ ११९ ॥ ब्रह्मणापर्वतश्रेष्ठयथातच्चन्द्रभागतः ॥ यज्ञभागेस्थितेयस्मादेवान्नमकरो
द्विधुम् ॥ १२० ॥ कव्येस्थितेपिपित्रन्नान्तिथिवृद्धिक्षयोयथा ॥ इदम्पुण्यतमाख्यानंयःशृणोतिसकृन्नरः ॥ १२१ ॥ राजयक्ष्मात
स्यकुलेनकदाचिद्भविष्यति ॥ यक्ष्मणापरिभूतोयःशृणोतिवचनंविधेः ॥ १२२ ॥ नचिराद्यक्ष्मणायुक्तःसभवेन्नरसत्तमः ॥ इदंस्वस्त्ययन
म्पुण्यंद्वह्याद्वह्यतमंशुभम् ॥ १२३ ॥ यःशृणोत्येकचित्तःसन्त्समहापुण्यभाग्भवेत् ॥ इतिकालिकापुराणेएकविंशोऽध्ययः ॥ २१ ॥ छ ॥

॥ मार्कण्डेय उवाच ॥ ॥ यत्रदेवसभाभूतासानौतस्यमहागिरेः ॥ तत्रजातादेवनदीसीताख्यावचनाद्विधेः ॥ १ ॥ स्नापयित्वाय
दाचन्द्रंसीतातोयैर्म्मनोहरैः ॥ चन्द्रम्पपुत्रब्रह्मवाक्यात्सर्वेतेत्रिदिवौकसः ॥ २ ॥ तदासीताजलश्चन्द्रस्नानयोगाच्चसामृतम् ॥ भूत्वानि
पतितन्तास्मिम्बृहल्लोहितसंज्ञके ॥ ३ ॥ तद्विवृद्धन्तदातोयन्तास्मिन्त्सरसिनोममौ ॥ तद्ददर्शस्वयम्ब्रह्माविवृद्धंसामृतञ्जलम् ॥ ४ ॥ तद्दर्श
नाज्जलात्तस्मादुत्थिताकन्यकोत्तमा ॥ चन्द्रभागेतितन्नामाविधिश्चक्रेस्वयन्ततः ॥५॥ भार्यार्थेसागरस्तान्तुजग्राहब्रह्मसम्मते ॥ तयैवाधिष्ठित
न्तोयङ्गदाग्रेणनिशापतिः ॥ ६ ॥ निर्भिद्यपश्चिमेपार्श्वेगिरिन्तंसमवाहयत् ॥ तस्याऽमृतजलम्भित्त्वावृहल्लोहितनामकम् ॥ ७ ॥ कासारंसागरं
यातश्चन्द्रभागानदीतुसा ॥ सागरेपितदाभार्याश्चन्द्रभागाम्महानदीम् ॥ ८ ॥ तेनतोयप्रवाहेणनिनायभवनंस्वकम् ॥ एवन्तास्मिन्त्समुत्पन्ना
चन्द्रभागाह्वयानदी ॥ ९ ॥ चन्द्रभागेमहाशैलेगुणैर्गंगासमासदा ॥ नद्यश्चपर्व्वताःसर्वेद्विरूपाश्चस्वभावतः ॥ १० ॥ तोयन्नदीनांरूपन्तुश
रीरमपरन्तथा ॥ स्थावरःपर्वतानान्तुरूपङ्गायन्तथापरम् ॥ ११ ॥ शुक्तीनामथकम्बूनांयथैवान्तर्गतातनुः ॥ बहिरस्थिस्वरूपन्तुसर्वदैवप्रव
र्त्तते ॥ १२ ॥ एवञ्चलंस्थावरन्तुनदीपर्वतयोस्तदा ॥ अन्तर्वसतिकायस्तुसततन्नोपपद्यते ॥ १३ ॥ आप्याय्यतेस्थावरेणशरीरम्पर्वतस्यतु ॥
तथानदीनांकायस्तुतोयेनाप्याय्यतेसदा ॥ १४ ॥ नदीनांकामरूपित्वम्पर्वतानान्तथैवच ॥ जगत्स्थित्यैपुराविष्णुःकल्पयामासयत्नतः ॥
॥ १५ ॥ तोयहानौनदीदुःखञ्जायतेसततंसुराः ॥ विशीर्णेस्थावरेदुःखञ्जायतेगिरिकायजम् ॥ १६ ॥ तस्मिन्गिरौचन्द्रभागेबृहल्लोहिततीरगा
म् ॥ सन्ध्यान्दृष्ट्वाथपप्रच्छवसिष्ठंसादरन्तदा ॥ १७ ॥ ॥ वसिष्ठ उवाच ॥ ॥ किमर्थमागताभद्रेनिर्जनन्त्वम्महीधरम् ॥ कस्यवातनया

गौरिकिंवातवचिकीर्षितम् ॥ १८ ॥ एतादिच्छाम्यहंश्रोतुंयादिगुह्यन्नतेभवेत् ॥ वदनम्पूर्णचन्द्राभन्निःश्रीकंवाकथन्तव ॥ १९ ॥ मार्कण्डेय
उवाच ॥ ॥ एतच्छ्रुत्वावचस्तस्यवसिष्ठस्यमहात्मनः ॥ दृष्ट्वाचतम्महात्मानञ्ज्वलन्तमिवपावकम् ॥ २० ॥ शरीरधृग्ब्रह्मचर्यसदृशन्तञ्ज
टाधरम् ॥ सादरम्प्रणिपत्याथसन्ध्योवाचतपोधनम् ॥ २१ ॥ यदर्थमागताशैलंसिद्धन्तन्मेद्विजोत्तम ॥ तवदर्शनमात्रेणतन्मेसेत्स्यतिवा
विभो ॥ २२ ॥ तपःकर्तुमहम्ब्रह्मन्निर्जनंशैलमागता ॥ ब्रह्मणोहम्मनोजातासन्ध्यानाम्नाचविश्रुता॥२३॥नोपदेशमहञ्जानेतपसोमुनिसत्तम ॥
यदितेयुज्यतेगुह्यम्मात्वंसमुपदेशय ॥ २४ ॥ एतच्चिकीर्षितंगुह्यन्नान्यत्किञ्चनविद्यते ॥ अज्ञात्वातपसोभावन्तपोवनमुपाश्रिता ॥ २५ ॥
चिन्तयापरिशुष्येहंवेपतेचमनः सदा ॥ ॥ मार्कण्डेयउवाच ॥ ॥ आकर्ण्यतस्यावचनम्वसिष्ठोब्रह्मणः सुतः ॥ २६ ॥ स्वयंससर्व
तत्त्वज्ञोनान्यत्किञ्चनपृष्टवान् ॥ अथतान्नियतात्मानन्तपसेऽतिधृतोद्यमाम् ॥ २७ ॥ वसिष्ठोमन्त्रयाञ्चक्रेगुरुवच्छिष्यवत्तदा ॥ २८ ॥
वसिष्ठउवाच ॥ परमंयोमहत्तेजःपरमंयोमहत्तपः ॥ परमोयःसमाराध्योविष्णुर्मनसिधीयताम् ॥ २९ ॥ धर्मार्थकाममोक्षाणांयएकस्त्वा
दिकारणम् ॥ तमेकञ्जगतामाद्यम्भजस्वपुरुषोत्तमम् ॥ ३० ॥ शङ्खचक्रगदापद्मधरङ्कमललोचनम् ॥ शुद्धस्फटिकसंकाशंकचिन्नीलाम्बु
दच्छविम् ॥ ३१ ॥ गरुडोपरिशुक्लाब्जेपद्मासनगतंहरिम् ॥ श्रीवत्सवक्षसंशान्तंवनमालाधरम्परम् ॥ ३२ ॥ केयूरकुण्डलधरंकिरीटमुकुटो
ज्ज्वलम् ॥ निराकारंज्ञानगम्यंसाकारन्देहधारिणम् ॥ ३३ ॥ नित्यानन्दन्निरालम्बंसूर्य्यमण्डलमध्यगम् ॥ मन्त्रेणानेनदेवेशंविष्णु
म्भजशुभानने ॥ ३४ ॥ ॐनमोवासुदेवायओमित्यन्तेनसन्ततम् ॥ तपस्यामारभेन्मौनीतत्रैतान्नियमाञ्च्छृणु ॥ ३५ ॥ स्नानम्मौनेनकर्त्त

व्यम्मौनैनैवतुपूजनम् ॥ द्वयोःपर्णजलाहारम्प्रथमंषष्ठकालयोः ॥ ३६ ॥ तृतीयेषष्ठकालेतुउपवासपरोभवेत् ॥ एवन्तपःसमाप्तौतुषष्ठेकाले
क्रियाभवेत् ॥ ३७ ॥ वृक्षवल्कलवासाश्चकालेभूमिशयस्तथा ॥ एवम्मौनीतपस्याख्याव्रतचर्य्याफलप्रदा ॥ ३८ ॥ एवन्तपःसमुद्दिश्य
कामाञ्चिन्तयमाधवम् ॥ सतेप्रसन्नइष्टार्थन्नचिरादेवदास्यति ॥ ३९ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ उपदिश्यवसिष्ठोऽथसन्ध्यायैतपसः
क्रियाम् ॥ तामाभाष्ययथान्यायन्तत्रैवान्तर्दधेमुनिः ॥ ४० ॥ सन्ध्यापितपसोभावंज्ञात्वामोदमवाप्यच ॥ तपः कर्त्तुंसमारेभेबृहच्छोहि
ततीरगा ॥ ४१ ॥ यथोक्तन्तुवसिष्ठेनमंत्रन्तपसिसाधनम् ॥ व्रतेनतेनगोविन्दम्पूजयामासभक्तितः ॥ ४२ ॥ एकान्तमनसस्तस्याःकुर्व
न्त्याःसुमहत्तपः ॥ विष्णौविन्यस्तमनसोगतमेकश्चतुर्युगम् ॥ ४३ ॥ नकोपिविस्मयन्नापतस्यादृष्ट्वातपोद्भुतम् ॥ नतादृशीतपश्चर्याभवि
ष्यतिचकस्याचित् ॥४४॥ मानुषेणाऽथमानेनगतेत्वेकचतुर्युगे ॥ अन्तर्बहिस्तथाकाशेदर्शयित्वानिजंवपुः ॥४५॥ प्रसन्नस्तेनरूपेणयद्रूपाश्चि
न्तितन्तया ॥ पुरःप्रत्यक्षतांयातस्तस्याविष्णुर्जगत्पतिः ॥ ४६ ॥ अथसापुरतोदृष्ट्वामनसाचिन्तितंहरिम् ॥ शङ्खचक्रगदापद्मधारिण
म्पद्मलोचनम् ॥ ४७ ॥ केयूरकुण्डलधरंकिरीटमुकुटोज्ज्वलम् ॥ तार्क्ष्यस्थम्पुण्डरीकाक्षन्नीलोत्पलदलच्छविम् ॥ ४८ ॥ ससाध्वसमहं
वक्ष्येकिंकथंस्तौमिवाहरिम् ॥ इतिचिन्तापराभूत्वान्यमीलयतचक्षुषी ॥४९॥ निमीलिताक्ष्यास्तस्यास्तुप्रविश्यहृदयंहरिः ॥ दिव्यंगीतन्ददौ
तस्यैवाचन्दिव्येचचक्षुषी ॥ ५० ॥ दिव्यंज्ञानन्दिव्यचक्षुर्दिव्यांवाचमवाप्यच ॥ प्रत्यक्षंवीक्ष्यगोविन्दन्तुष्टावजगताम्पतिम् ॥ ५१ ॥ ॥
सन्ध्योवाच ॥ ॥ निराकारंज्ञानगम्यम्परंयन्नैवस्थूलंनापिसूक्ष्मन्नचोच्चैः ॥ अन्तश्चिन्त्यंयोगिभिर्यस्यरूपन्तस्मैतुभ्यंहरयेमेनमोस्तु ॥५२॥

शिवंशान्तानिर्म्मलंनिर्विकारंज्ञानात्परंसुप्रकाशंविसारि ॥ रविप्रख्यन्ध्वान्तभागात्परस्ताद्रूपंयस्यत्वान्नमामिप्रसन्नम् ॥ ५३ ॥ एकं शुद्धन्दीप्यमानंविनोदश्चित्तानन्दंसत्त्वजम्पापहारि ॥ नित्यानन्दंसत्यभूरिप्रसन्नंयस्यश्रीदंरूपमस्मैनमोस्तु ॥ ५४ ॥ विद्याकारोद्भावनी यम्प्रभिन्नंसत्त्वच्छन्नन्ध्येयमात्मस्वरूपम् ॥ सारम्पारम्पावनानाम्पवित्रन्तस्मैरूपंयस्यचैवन्नमस्ते ॥ ५५ ॥ नित्यार्जवंव्ययहीनंगुणौघैरष्टा ङ्गैर्यश्चिन्त्यतेयोगयुक्तैः ॥ तत्त्वव्यापिप्राप्ययज्ज्ञानयोगेपरंयातायोगिनस्तन्नमस्ते ॥ ५६ ॥ यत्साकारंशुद्धरूपम्मनोज्ञङ्गरुत्मस्थन्नीलमे घप्रकाशम् ॥ शङ्खश्चक्रम्पद्मगदेदधान्तस्मैनमोयोगयुक्तायतुभ्यम् ॥ ५७ ॥ गगनम्भूर्दिशश्चैवसलिलञ्ज्योतिरेवच ॥ वायुःकालश्चरूपा णियस्यतस्मैनमोस्तुते ॥ ५८ ॥ प्रधानपुरुषौयस्यकार्यागत्वेनिवत्स्यतः ॥ तस्मादव्यक्तरूपायगोविन्दायनमोस्तुते ॥ यःस्वयंयश्चभूता नियःस्वयंतद्गुणःपरः ॥५९॥ यःस्वयञ्जगदाधारस्तस्मैतुभ्यंनमोनमः ॥ परःपुराणःपुरुषःपरमात्माजगन्मयः ॥ अक्षयोयोव्ययोदेवस्तस्मै तुभ्यन्नमोनमः ॥ ६० ॥ योब्रह्माकुरुतेसृष्टियोविष्णुःकुरुतेस्थितिम् ॥ संहरिष्यतियोरुद्रस्तस्मैतुभ्यंनमोनमः ॥ ६१ ॥ नमोनमःकारण कारणायदिव्यामृतज्ञानविभूतिदाय ॥ समस्तलोकान्तरमोहदायप्रकाशरूपायपरात्पराय ॥ ६२ ॥ यस्यप्रपञ्चोजगदुच्यतेमहान्क्षितिर्दिशः सूर्यइन्दुर्म्मनोजवः ॥ वह्निर्मुखान्नाभितश्चान्तरिक्षन्तस्मैतुभ्यंहरयेतेनमोस्तु ॥ ६३ ॥ त्वम्परःपरमात्माचत्वंविद्याविविधाहरे ॥ शब्दब्रह्म परम्ब्रह्मविचारणपरात्परः ॥ ६४ ॥ यस्यनादिर्नमध्यञ्चनान्तमस्तिजगत्पतेः ॥ कथंस्तोष्यामितन्देवंवाङ्मनोगोचराद्बहिः ॥ ६५ ॥ यस्य ब्रह्मादयोदेवामुनयश्चतपोधनाः ॥ नविवृण्वन्तिरूपाणिवर्णनीयःकथंसमे ॥६६॥ स्त्रियामयातेकिंज्ञेयानिर्गुणस्यगुणाःप्रभोः ॥ नैवजानन्ति

यद्रूपंसेन्द्राअपिसुरासुराः ॥ ६७॥ नमस्तुभ्यञ्जगन्नाथनमस्तुभ्यन्तपोमय॥प्रसीदभगवँस्तुभ्यम्भूयोभूयोनमोनमः ॥ ६८ ॥ ॥ मार्कंडेयउ
वाच ॥ अथतस्याःशरीरन्तुवल्कलाजिनसंवृतम् ॥ परिक्षीणञ्जटाव्रातैःपवित्रैर्मूर्ध्निराजितम् ॥६९॥ हिमानीतर्जिताम्भोजसदृशंवदनन्तथा ॥
निरीक्ष्यकृपयाविष्टोहरिःप्रोवाचतामिदम् ॥७०॥ ॥ श्रीभगवानुवाच ॥ ॥ प्रीतोस्मितपसाभद्रेभवत्यापरमेणवै ॥ स्तवेनचशुभप्रज्ञेवरंवरय
साम्प्रतम्॥७१॥येनतेविद्यतेकार्यंवरेणास्तिमनोगतम्॥तत्करिष्येचभद्रन्तेप्रसन्नोहंतवव्रतैः॥७२॥सन्ध्योवाच॥यदिदेवप्रसन्नोसितपसाममसा
म्प्रतम् ॥ वृतस्तदाऽयम्प्रथमोवरोममविधीयताम् ॥७३॥उत्पन्नमात्रादेवेशप्राणिनोस्मिन्नभस्तले॥नभवन्तुक्रमेणैवसकामाःसम्भवंतुवै॥७४॥
पतिव्रताहंलोकेषुत्रिष्वपिप्रथितायथा॥भविष्यामितथानान्यावरएकोवृतोमम ॥७५॥सकामाममदृष्टिस्तुकुत्रचिन्नपतिष्यति॥ऋतेपतिञ्जगन्नाथ
सोऽपिमेऽतिसुहृत्तरः ॥७६॥ योद्रक्ष्यतिसकामोमांपुरुषस्तस्यपौरुषम् ॥ नाशंगमिष्यतितदासतुक्लीबोभविष्यति ॥७७॥ श्रीभगवानुवाच ॥
प्रथमःशैशवोभावःकौमाराख्योद्वितीयकः ॥ तृतीयोयौवनोभावश्चतुर्थोवार्द्धकस्तथा ॥ ७८ ॥ तृतीयेत्वथसम्प्राप्तेवयोभागेशरीरिणः ॥
सकामाःस्युर्द्वितीयान्तेभविष्यन्तिक्वचित्क्वचित् ॥७९॥ तपसातवमर्यादाजगतिस्थापितामया ॥ उत्पन्नमात्रानयथासकामाःस्युःशरीरिणः ॥
॥ ८० ॥ त्वञ्चलोकेसतीभावन्तादृशंसमवाप्स्यसि ॥ त्रिषुलोकेषुनान्यस्यायादृशंसम्भविष्यति ॥ ८१ ॥ यःपश्यतिसकामस्त्वाम्पाणिग्रह
मृतेतव ॥ ससद्यःक्लीबताम्प्राप्यदुर्ब्बलत्वंगमिष्यति ॥ ८२ ॥ पतिस्तवमहाभागस्तपोरूपसमान्वितः ॥ सप्तकल्पान्तजीवीचभविष्यतिस
हत्वया ॥ ८३ ॥ इतियेतेवरामत्तःप्रार्थितास्तेकृतामया ॥ अन्यच्चतेवदिष्यामिपूर्वंयन्मनसिस्थितम् ॥ ८४ ॥ अग्रौशरीरत्यागस्तेपूर्वमेवप्र

तिश्रुतः ॥ सचमेधातिथेर्यज्ञेमुनेर्द्वादशवार्षिके ॥ ८५ ॥ हुतप्रज्वलितेवह्नौनचिरात्क्रियतान्त्वया ॥ एतच्छैलोपत्यकायांचन्द्रभागानदी
तटे॥८६॥ मेधातिथिर्महायज्ञंकुरुतेतापसाश्रमे ॥ तत्रगत्वास्वयञ्च्छन्नामुनिभिर्न्नोपलक्षिता॥८७॥मत्प्रसादाद्द्विजातातस्यपुत्रीभविष्यसि ॥
यस्त्वयावाञ्छनीयोस्तिस्वामीमनसिकश्चन ॥ ८८ ॥ तन्निधायनिजस्वान्तेत्यजवह्नौवपुःस्वकम् ॥ यदात्वन्दारुणेसन्ध्येतपश्चरसिपर्वते ॥
॥ ८९ ॥ यावच्चतुर्युगन्तस्यव्यतीतेतुकृतेयुगे ॥ त्रेतायाःप्रथमेभागेजातादक्षस्यकन्यका ॥ ९० ॥ सददौकन्यकाःसप्तविंशतिश्चसुधांशवे ॥
तासांहेतोर्यदाशप्तश्चंद्रोदक्षेणकोपिना ॥ ९१ ॥ तदाभवत्यानिकटेसर्वेदेवाःसमागताः ॥ नदृष्टाश्चत्वयासन्ध्येदेवाश्चब्रह्मणासह ॥ ९२ ॥
मयिविन्यस्तमनसात्वञ्चदृष्टानतैःपुनः ॥ चन्द्रस्यशापमोक्षार्थञ्चन्द्रभागानदीयथा ॥ ९३ ॥ सृष्टाधात्रातदैवात्रमेधातिथिरुपस्थितः ॥ तप
सातत्समोनास्तिनभूतोनभविष्यति ॥ ९४ ॥ तेनयज्ञःसमारब्धोज्योतिष्टोमोमहाविधिः ॥ तत्रप्रज्वलितोवह्निस्तास्मिँस्त्यजवपुःस्वकम् ॥
॥ ९५ ॥ एतन्मयास्थापितन्तेकार्यार्थम्भोस्तपास्विनि ॥ तत्कुरुष्वमहाभागेयाहियज्ञम्महामुनेः ॥ ९६ ॥ ॥ मार्कण्डेय उवाच ॥ ॥
नारायणःस्वयंसन्ध्यांपस्पर्शाऽथाग्रपाणिना ॥ ततःपुरोडाशमयन्तच्छरीरमभूत्क्षणात् ॥ ९७ ॥ महामुनेर्मयायज्ञेतस्मिन्विश्वोपकारिणि ॥
नाग्निःक्रव्यादतांयातुत्वेतदर्थन्तथाकृतम् ॥ ९८ ॥ एवंकृत्वाजगन्नाथस्तत्रैवान्तरधीयत ॥ सन्ध्याप्यगच्छत्तत्सत्रेयत्रमेधातिथिर्म्मुनिः ॥
॥ ९९ ॥ अथविष्णोःप्रसादेनकेनाप्यनुपलक्षिता ॥ प्रविवेशतदायज्ञंसन्ध्यामेधातिथेर्म्मुनेः ॥ १०० ॥ वसिष्ठेनपुरासातुवर्णीभूत्वातपास्वि
नी ॥ उपदिष्टातपश्चर्त्तुवचनात्परमेष्ठिनः ॥ १०१ ॥ तमेवकृत्वामनसितपश्चर्योपदेशकम् ॥ पतित्वेनतदासन्ध्याब्राह्मणम्ब्रह्मचारिणम् ॥

॥ १०२ ॥ समिद्धेग्नौमहायज्ञेमुनिभिर्नोपलक्षिता ॥ तदाविष्णोःप्रसादेनसंविवेशाविधेःसुता ॥ १०३ ॥ तस्याःपुरोडाशमयंशरीरन्तत्क्षणा
त्ततः ॥ दग्धम्पुरोडाशगन्धंव्यस्तारयदलक्षितम् ॥ १०४ ॥ वह्निस्तस्याःशरीरन्तुदग्ध्वासूर्य्यस्यमण्डले ॥ शुद्धम्प्रवेशयामासविष्णोरेवा
ज्ञयापुनः ॥ १०५ ॥ सूर्योद्विधाविभज्याऽथतच्छरीरन्तदारथे ॥ स्वकेसंस्थापयामासप्रीतयेपितृदेवयोः ॥ १०६ ॥ यदूर्द्ध्वभागास्तस्यास्तु
शरीरस्यद्विजोत्तमाः ॥ प्रातःसन्ध्याभवत्सातुअहोरात्रादिमध्यगा ॥ १०७ ॥ यच्छेषभागस्तस्यास्तुअहोरात्रान्तमध्यगा ॥ सासायमभव
त्सन्ध्यापितृप्रीतिप्रदासदा ॥ १०८ ॥ सूर्योदयात्तुप्रथमंयदास्यादरुणोदयः ॥ प्रातःसन्ध्यातदोदेतिदेवानाम्प्रीतिकारिणी ॥ १०९ ॥ अ
स्तंगतेततःसूर्येशोणपद्मनिभासदा ॥ उदेतिसायंसन्ध्यापिपितॄणाम्मोदकारिणी ॥ ११० ॥ तस्याःप्राणास्तुमनसाविष्णुनाप्रभविष्णुना ॥
दिव्येनतुशरीरेणचक्रिरेऽथशरीरिणः ॥ १११ ॥ मुनेर्यज्ञाऽवसानेतुसम्प्राप्तेमुनिनातुसा ॥ प्राप्तापुत्रीवह्निमध्येतप्तकाञ्चनसप्रभा ॥ ११२॥
ताञ्जग्राहतदापुत्रीम्मुनिरामोदसंयुतः ॥ यज्ञार्थतोयैःसंस्नाप्यनिजक्रोडेकृपायुतः ॥ ११३ ॥ अरुन्धतीतितस्यास्तुनामचक्रेमहामुनिः ॥
शिष्यैःपरिवृतस्तत्रमहामोदमवापच ॥११४॥ नरुणद्धियतोधर्मसाकेनापिचकारणात् ॥ अतस्त्रिलोकविदितन्नामसाप्रापसान्वयम् ॥११५॥
यज्ञंसमाप्यसमुनिःकृतकृत्यभावमासाद्यसम्मदयुतस्तनयाप्रलम्भात् ॥ तस्मिन्निजाश्रमपदेसहशिष्यवर्गैस्तामेवसन्ततमसौदयतेमहर्षिः ॥
॥ ११६ ॥ ॥ इतिकालिकापुराणेद्वाविंशतितमोध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ अथसावृधेदेवीतस्मिन्मु
निवराश्रमे ॥ चन्द्रभागानदीतीरेतापसारण्यसंज्ञके ॥ १ ॥ यथाचन्द्रकलाशुक्लपक्षेनित्यंविवर्द्धते ॥ यथाज्योत्स्नातथासापिप्रापवृद्धिमरुन्ध

ती ॥ २ ॥ साप्राप्तेपञ्चमेवर्षेचन्द्रभागान्तदागुणैः ॥ तापसारण्यमपिसापवित्रमकरोत्सती ॥३॥ तत्रतीर्थम्महापुण्यम्मेधातिथिनिषेवितम् ॥
क्रीडास्थानमरुन्धत्याःपूतम्बाल्योचितंकृतम् ॥४॥ अद्यापितापसारण्येचन्द्रभागानदीजले ॥ अरुन्धतीतीर्थतोयेस्नात्वायातिहरिन्नरः॥५॥
कार्त्तिकंसकलम्मासञ्चन्द्रभागानदीजले ॥ स्नात्वाविष्णुगृहंगत्वाह्यन्तेमोक्षमवाप्नुयात् ॥ ६ ॥ माघेमासिपौर्णमास्याममायांवातथैवच ॥
चन्द्रभागाजलेस्नानंयस्तुकुर्य्यात्सकृत्सकृत् ॥ ७ ॥ तस्यवंशेराजयक्ष्मानकदाचिद्भविष्यति ॥ देहान्तेचन्द्रभवनंगत्वायातिहरेर्गृहम् ॥
॥ ८ ॥ पुण्यक्षयादिहागत्यवेदज्ञोब्राह्मणोभवेत् ॥ चन्द्रभागाजलम्पीत्वाचन्द्रलोकमवाप्नुयात् ॥ ९ ॥ सकृत्स्नात्वातुविधिवद्वाजिमेधायु
तँलभेत् ॥ चन्द्रभागाजलेस्नात्वाक्रीडन्तीम्बाललीलया ॥ १० ॥ पितुःसमीपेतत्तीरेकदाचित्तामरुन्धतीम् ॥ गच्छन्नाकाशमार्गेणददर्श
कमलासनः ॥ ११ ॥ अथावतीर्यभगवान्ब्रह्मालोकपितामहः ॥ अरुन्धत्यास्तदाकालमुपदेशेददर्शह ॥ १२ ॥ अथोवाचतदाब्र
ह्मामुनिभिःपरिपूजितः ॥ मेधातिथिप्रभृतिभिरुचितन्तम्महामुनिम् ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ उपदेशस्यकालोयमरुन्धत्या
महामुने ॥ तस्मादेनांसतीनान्तुस्त्रीणान्त्वंकुरुसन्निधौ ॥ १४ ॥ स्त्रीभिस्त्रियश्चोपदेश्याःकाचिदन्यत्रविद्यते ॥ बहुलायाश्चसावित्र्याः
पुत्रीन्त्वंस्थापयान्तिके ॥ १५ ॥ तयोःसंसर्गमासाद्यपुत्रीतवमहामुने ॥ महागुणैश्वर्ययुतानाचिराद्भविष्यति ॥ १६ ॥ मेधाति
थिर्वचःश्रुत्वाब्रह्मणःपरमात्मनः ॥ एवमेवेतिप्रोवाचतन्तदामुनिसत्तमः ॥ १७ ॥ ततोगतेसुरश्रेष्ठपुत्रीम्मेधातिथिर्मुनिः ॥ समादाययौ
सूर्यभवनम्प्रतितत्क्षणात् ॥ १८ ॥ ददर्शतत्रसावित्रींसूर्य्यमण्डलमध्यगाम् ॥ पद्मासनगतान्देवीमक्षमालाधरांसिताम् ॥ १९ ॥ दृष्टा

सातेनमुनिनानिःसृत्यरविमण्डलात् ॥ बहुलासागतातूर्णम्प्रस्थम्मानसभूभृतः ॥ २० ॥ प्रत्यहन्तत्रसावित्रीगायत्रीबहुलातथा ॥ सर
स्वतीचद्रुपदापश्चैतामानसाचले ॥ २१ ॥ धर्माख्यानैस्तथासाध्वीकथाः कृत्वापरस्परम् ॥ स्वंस्वंस्थानम्पुनर्यातिलोकानांहितकाम्यया
॥ २२ ॥ मेधातिथिस्तुताः सर्वादृष्ट्वैकत्रतपोधनः ॥ मातृःसर्वस्यलोकस्यप्रणनामपृथक्पृथक् ॥ २३ ॥ उवाचचसताः सर्वाऋषिःश्लक्ष्ण
न्तपोधनः ॥ ससाध्वसोविस्मितश्चतासामेकत्रदर्शनात् ॥ २४ ॥ मेधातिथिरुवाच ॥ मातःसावित्रिबहुलेमत्पुत्रीयम्महायशाः ॥ कालो
यमुपदेशेस्यास्तदर्थमहमागतः ॥ २५ ॥ जगत्स्रष्टासमादिष्टाप्रयातुतवशिष्यताम् ॥ एषातेनभवत्पार्श्वमानीतापुत्रिकामम ॥ २६ ॥ सौ
चारित्र्यंयथाऽस्याःस्यात्तथैनाम्बालिकाम्मम ॥ युवांविनयतन्देव्यौमातर्मातर्नमोस्तुवाम् ॥ २७ ॥ अथोवाचतदादेवीसावित्रीमुनिसत्त
मम् ॥ स्मितपूर्वम्बहुलयासहिताताञ्चबालिकाम् ॥ २८ ॥ ॥ तेऊचतुः ॥ ॥ ब्रह्मन्विष्णोःप्रसादेनसुचरित्राभवत्सुता ॥ पूर्वमेवमुने
भूतातदुद्देशेनाकिम्पुनः ॥ २९ ॥ किन्त्वहम्ब्रह्मवाक्येनबहुलाचमहासती ॥ विनेष्यावस्तवसुतान्धीरास्यान्नचिराद्यथा ॥ ३० ॥ ब्रह्मणः
पूर्वदुहिताभवतस्तुतपोबलात् ॥ तथाविष्णोःप्रसादेनसुतातेभूदरुन्धती ॥ ३१ ॥ कुलम्पुनातिभवतःसत्यसौवर्द्धयिष्यति ॥ लोकाना
मथदेवानांशिवमेषाकरिष्यति ॥ ३२ ॥ ॥ मार्कण्डेयउवाच ॥ अथताभिर्विसृष्टःसमुनिर्मेधातिथिःसुताम् ॥ आश्वास्यारुन्धतीन्नत्वा
ताःस्वस्थानञ्जगामह ॥ ३३ ॥ गतेतस्मिन्मुनिवरेसहताभ्यामरुन्धती ॥ मातृभ्यामिवनिर्भीतापालितामोदमापसा ॥ ३४ ॥ कदाचित्स
हसावित्र्यारात्रौयातिरवेर्गृहम् ॥ तथाबहुलयायातिशक्रगेहंकदाचन ॥ ३५ ॥ एवन्ताभ्यांसमन्देवीविहरन्तीसुरालये ॥ निनायदिव्यमाने

नसासतपरिवत्सरान् ॥ ३६ ॥ ताभ्यान्तथोपदिष्टासास्त्रीधर्ममचिरात्सती ॥ सर्वज्ञातवतीभूतासावित्रीबहुलाधिका ॥ ३७ ॥ अथ
तस्यास्तदाकालेसम्प्राप्तेउचितेभवत् ॥ शोभनोयौवनोद्भेदःपद्मिनीनांरुचिर्यथा ॥ ३८ ॥ उद्भूतयौवनासातुवसिष्ठम्मानसाचले ॥ विह
रन्तीददर्शैकाचारुतेजस्विनम्मुनिम् ॥ ३९ ॥ दृष्ट्वातमिच्छयाञ्चक्रेकामभावेनसासती ॥ बालसूर्यप्रभञ्चारुरूपम्ब्राह्मश्रियायुतम् ॥
॥ ४० ॥ अथसोपिमहातेजावसिष्ठोवरवर्णिनीम् ॥ दृष्ट्वैवोद्भूतमदनोवीक्षाञ्चक्रेत्वरुन्धतीम् ॥ ४१ ॥ तयोःपरस्परन्दृष्ट्वाववृधेहृच्छयो
महान् ॥ अमर्यादन्द्विजश्रेष्ठाःप्राकृतेमदनोयथा ॥ ४२ ॥ अथधैर्यंसमालम्ब्यतथामेधातिथेःसुता ॥ आत्मानन्धारयामासमनश्चमदने
रितम् ॥ ४३ ॥ वसिष्ठोपिमहातेजाधैर्यमालम्ब्यचात्मनः ॥ मनःसंस्तम्भयामासमदनोन्मथितन्ततः ॥ ४४ ॥ अरुन्धतीततोदेवीवि
हायमुनिसान्निधिम् ॥ जगामयत्रसावित्रीनिन्दन्तीस्वम्मनोवपुः ॥ ४५ ॥ बाध्यमानातिदुःखेनमानसेनमहासती ॥ सतीभावःपरित्यक्तश्चि
न्तयन्तीमयेतिवै ॥४६॥ तस्यामनोजदुःखेनविवर्णमभवन्मुखम् ॥ शरीरंसकलंम्लानंगतिश्चवलिताभवत् ॥४७॥ इदंविमृषेसाचगर्हयन्ती
स्वकम्मनः ॥ मृणालतन्तुवत्सूक्ष्माच्छिन्नाचतत्क्षणादपि ॥ ४८ ॥ स्थितिःसतीनामल्पेनचापल्येनैवनश्यति ॥ इतिस्त्रीधर्म्ममध्याप्यमामा
हचारितव्रता ॥ ४९ ॥ सावित्रीसारमेत्ताद्धिसतीधर्मस्यचोद्धृतम् ॥ तदद्यनाशितम्पुंसिपरकीयेमनोरथम् ॥५०॥ वर्द्धयन्त्यातदाकिम्मेपरत्रेहभ
विष्यति॥इतिसाश्चिन्तयन्तीसापुत्रीमेधातिथेस्तदा॥५१॥ दुःखार्त्ताबहुलान्देवींसावित्रीञ्चाससादह॥तथाविधान्तुतान्दृष्ट्वाविवर्णवदनांसतीम्॥
॥ ५२ ॥ ध्यानचिन्तापराभूतासावित्रीविममर्षह ॥ विमृष्यदिव्यज्ञानेनसर्वज्ञातवतीसती ॥ ५३ ॥ वसिष्ठेनह्यरुन्धत्यायथाभूद्दर्शनन्तथा ॥

यथातयोःसम्प्रवृद्धोमनोजश्चातिदुःसहः ॥ ५४॥ मुखवैवर्ण्यहेतुश्चसावित्रीदिव्यदर्शिनी ॥ अथमेधातिथेःपुत्र्यामूर्ध्निहस्तंनिवेश्यसा ॥ ५५॥
इदमाहमहादेवीसावित्रीचरितव्रता ॥ वत्सेतवमुखंकस्माद्भिन्नवर्णमभूदिदम् ॥ ५६ ॥ छिन्ननालंयथापद्मंसूर्यांशुपरितापितम् ॥ कथंशरीरम
भवन्म्लानन्तेगुणवत्तमे ॥ ५७ ॥ यथानिशापतेर्बिम्बन्तनुकृष्णाभ्रसंवृतम् ॥ अन्तर्मनश्चतेभद्रेसाचिन्तामिवलक्ष्यते ॥ तन्मेकथयतेगुह्यन्नै
तच्चेद्दुःखकारणम् ॥ ५८ ॥ मार्कण्डेयउवाच ॥ अथसाधोमुखीभूत्वाकिञ्चिन्नोवाचलज्जया ॥ सावित्रीम्मातरंगुर्वीन्तथापृष्टाप्यरुन्धती ॥
यदानोक्तवतीकिञ्चित्तदामेधातिथेःसुता ॥ ५९ ॥ स्वयम्प्रकाश्यसावित्रीतामुवाचतपस्विनी ॥ वत्सेयोसौत्वयादृष्टोमुनिर्भास्करसन्निभः ॥
॥६०॥सवसिष्ठोब्रह्मसुतस्तवस्वामीभविष्यति ॥ तवतस्यचदाम्पत्यम्पुराधात्रैवनिर्मितम् ॥ ६१॥ अतस्तवसतीभावोनहीनस्तस्यदर्शनात् ॥
यद्वातवाभूद्धृदयंसकामन्तस्यदर्शनात् ॥६२॥नतद्दोषकरम्पुत्रिमनोदुःखन्ततस्त्यज ॥ त्वयापरन्तपःकृत्वापूर्वजन्मनिशोभने ॥ ६३ ॥ वृतः
सएवदयितःसकामस्तेनसत्वयि ॥ शृणुपूर्वन्त्वयावत्सेवसिष्ठोयंवृतःपतिः ॥ ६४ ॥ यथातपःकृतन्तत्रयेनभावेनसन्ततम् ॥ ॥ मार्कण्डेयउ
वाच ॥ इत्युक्त्वासाचसावित्रीयथासन्ध्याभवत्पुरा ॥ ६५ ॥ कृतन्तपोयदर्थन्तुचन्द्रभागाह्वयेगिरौ ॥ वसिष्ठेनयथापूर्ववर्णिरूपेणवेधसः ॥
॥ ६६ ॥ वचनादुपदिष्टासातपश्चर्यान्दुरत्ययाम् ॥ यथाप्रसन्नोभगवान्विष्णुःप्रत्यक्षतांगतः ॥ ६७ ॥ वरंयथाददौतस्यैमर्य्यादास्थापि
तायथा ॥ यथावावाञ्छितःस्वामीवसिष्ठःसतयामुनिः ॥ ६८ ॥ मेधातिथेर्यथायज्ञेवह्नौत्यक्तन्तयावपुः ॥ यथातत्तनयाजातातस्यैताद्वि
स्तरात्तदा ॥ ६९ ॥ सावित्रीकथयामासक्रमाद्बहुलयासह ॥ अथतस्यावचःश्रुत्वायदभूत्पूर्वजन्मनि ॥ ७० ॥ तच्छ्रुत्वावैतदाज्ञात

म्ममसर्वम्मनोगतम् ॥ इत्यतीवत्रपाम्प्राप्यसातीवाभूदधोमुखी ॥ ७१ ॥ सावित्रीवचनाद्भूतापूर्वजन्मस्मराचसा ॥ तथैवाधोमुखी
भूत्वायद्वृत्तम्पूर्वजन्मनि ॥ ७२ ॥ तस्यसर्वस्यसस्मारदिव्यज्ञारुन्धतीतदा ॥ पूर्वंविष्णुप्रसादेनसाभूत्वादिव्यदर्शिनी ॥ ७३ ॥ अधु
नाबाल्यभावेनप्रच्छन्नादिव्यदर्शना ॥ सावित्रीवचनाच्छ्रुत्वावृत्तान्तम्पूर्वजन्मनः ॥ ७४ ॥ प्रत्यक्षमिवतत्सर्वम्पूर्वज्ञानमवापसा ॥
अवाप्यपूर्वंज्ञानन्तद्यदत्तंविष्णुनापुरा ॥ ७५ ॥ वसिष्ठोयंवृतःस्वामीमयावैपूर्वजन्मनि ॥ इति ज्ञातवतीदेवीसामोदारुन्धतीस्वयम् ॥ ७६ ॥
वसिष्ठदर्शनोद्भूतेपूर्वन्तस्यास्तुहृच्छये ॥ यथातङ्कःसमुत्पन्नःसतीत्वस्यनिवारणे ॥ ७७ ॥ तञ्चस्वयंसातत्याजतदामेधातिथेःसुता ॥
त्यक्ताचिन्तान्ततस्तान्तुविज्ञायारुन्धतींसतीम् ॥ ७८ ॥ सावित्रीसूर्यभवनन्तयासार्द्धञ्जगामह ॥ अरुन्धतीन्निवेश्याथसावित्रीसूर्यम
न्दिरे ॥ ७९ ॥ जगामब्रह्मभवनंसर्वज्ञासासतीवरा ॥ अथप्रणम्यब्रह्माणम्पृष्टातेनैवतत्क्षणात् ॥ ८० ॥ इदञ्जगादसावित्रीब्रह्माणमामि
तौजसम् ॥ भगवञ्जगतान्नाथवसिष्ठम्भवतःसुतम् ॥ ८१ ॥ मानसस्यगिरेःसानौददर्शारुन्धतीसती॥ तयोर्दर्शनमात्रेणववृधेहृच्छयोमहान् ॥
॥ ८२ ॥ परस्परन्तौस्पृहयाञ्चक्रतुश्चप्रजापते ॥ ततोधैर्याच्चुसंस्तभ्यमनोजन्तौसुदुःखितौ ॥ ८३ ॥ विमनस्कौगतौस्थानंलज्जितौतौस्वकं
स्वकम् ॥ एवम्प्रवृत्तेयद्योग्यन्तदात्वेतद्विधीयताम् ॥ ८४ ॥ आयत्याञ्चसुरश्रेष्ठलोकानांहितकाम्यया ॥ इतिश्रुत्वावचस्तस्याब्रह्मासर्वजग
द्गुरुः ॥ ८५ ॥ ददर्शदिव्यज्ञानेनप्रवृत्तिम्भाविकर्मणः ॥ इदञ्चस्वागतम्प्रोचेतदालोकपितामहः ॥ ८६ ॥ तयोर्दाम्पत्यभावस्यकालोयंसमु
पस्थितः ॥ अतोलोकहितार्थायायास्येहन्तत्प्रवृत्तये ॥ ८७ ॥ इतिनिश्चित्यमनसासावित्रीसहितोविधिः ॥ जगाममानसप्रस्थंयत्रा

भूद्दर्शनन्तयोः ॥ ८८ ॥ पितामहेतत्रयातेशर्वःसुरगणैर्युतः ॥ नन्दिभृंगिप्रभृतिभिःसमायातोवृषध्वजः ॥ ८९ ॥ भगवान्वासुदेवोपिब्रह्मणाप
रिचिन्तितः ॥ भक्त्यासोऽपिजगन्नाथः शंखचक्रगदाधरः ॥ ९० ॥ स्थितौब्रह्महरौयत्रतत्रैवस्वयमागतः ॥ अथतेजगतांनाथाब्रह्मविष्णुम
हेश्वराः ॥ ९१ ॥ नारदम्प्रेषयामासुर्दूतम्मेधातिथिम्प्रति ॥ याहिद्रुतन्नारदत्वञ्चन्द्रभागाह्वयंगिरिम् ॥ ९२ ॥ मुनिस्तस्योपत्यकायामास्तेमे
धातिथिःपरः ॥ तमानययथाकाममस्माकंवचनात्स्वयम् ॥ ९३ ॥ मेधातिथिंसमादायभवानागच्छतुद्रुतम् ॥ ब्रह्मादीनांवचःश्रुत्वानारदो
पिद्रुतंययौ ॥ ९४ ॥ मेधातिथिंसमानेतुम्महाकार्यस्यसिद्धये ॥ मेधातिथिंसमाभाष्यदेवानांवचनैस्ततः ॥ ९५ ॥ मेधातिथिंसमादाय
ययौमानसपर्वतम् ॥ सेन्द्रादेवगणाःसर्वेमुनयश्चतपोधनाः ॥ ९६ ॥ साध्याविद्याधरायक्षागन्धर्वाश्चसमागताः ॥ देवाश्चसर्वेदेव्यश्चये
देवानुचरास्तथा ॥ ९७ ॥ तेसर्वेमानसप्रस्थंयाताश्चान्येचजन्तवः ॥ अथभूतेसमाजंतुदेवानाङ्कमलासनः ॥ ९८ ॥ मेधातिथिम्मुनिं
वाक्यमिदमाहातिदेशयन् ॥ ९९ ॥ ब्रह्मोवाच ॥ ॥ मेधातिथेवसिष्ठायपुत्रीन्तेचरितव्रताम् ॥ देहिब्राह्मेणविधिनासमाजेत्रिदिवौकसाम् ॥
वधूवरत्वमनयोःपूर्वंसृष्टम्मयैवहि ॥ १०० ॥ हरिणाचाप्यनुज्ञातङ्कर्मचैतत्समञ्जसम् ॥ एवङ्कृतेतवकुलेभविष्यतिमहद्यशः ॥ १ ॥ हित
ञ्चसर्वभूतानान्देहिताम्माचिरङ्कुथाः ॥ ततोब्रह्मवचः श्रुत्वाह्यतिप्रमुदितोमुनिः ॥ २ ॥ एवमस्त्वितिचोवाचनत्वातान्सुरपुङ्गवान् ॥ एषा
न्तुवचनात्पुत्रीमादायारुन्धतीम्मुनिः ॥ ३ ॥ ध्यानस्थस्यवसिष्ठस्यदेवैःसहजगामह ॥ गत्वावसिष्ठनिकटन्देवैःपरिवृतोमुनिः ॥ ४ ॥
ब्राह्मश्रियादीप्यमानञ्ज्वलन्तामिवपावकम् ॥ धर्मार्थकाममोक्षेषुधृतबुद्धिम्पृथक्पृथक् ॥ १०५ ॥ ददर्शमुनिमासीनम्मानसाचलकन्दरे ॥

वसिष्ठमोजस्विवरम्बालसूर्यमिवोदितम् ॥ ६ ॥ अथपुत्रीमग्रगताङ्कृत्वामेधातिथिर्मुनिः ॥ वसिष्ठन्नियतात्मानमुवाचारुन्धतीपिता ॥
॥ ७ ॥ ॥ ऋषिरुवाच ॥ ॥ भगवन्ब्रह्मणःपुत्रपुत्रीम्मेचरितव्रताम् ॥ दत्ताम्प्रतिगृहाणैनाम्मयाब्राह्मेणधर्मतः ॥ ८ ॥ यत्रयत्राश्रमे
ब्रह्मन्त्स्वेच्छयानिवसिष्यसि ॥ त्वद्भक्तैषाभवित्रीचच्छायेवानुगतातव ॥ ९ ॥ तत्रतत्रैवमेपुत्रीसमानव्रतधारिणी ॥ पतिव्रतावरारोहाशु
श्रूषान्तेकरिष्यति ॥ ११० ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इतिश्रुत्वावसिष्ठस्तुमुनेर्मेधातिथेर्वचः ॥ दृष्ट्वासमागतान्देवान्ब्रह्मविष्णुशिवा
दिकान् ॥ ११ ॥ अवश्यमेतद्भावीतिनिश्चित्यदिव्यचक्षुषा ॥ ब्राह्मणःसम्मतेपुत्रीन्तदामेधातिथेर्मुनेः ॥१२॥ वसिष्ठःप्रतिजग्राहबाढमित्युक्त
वांश्चह ॥ गृहीतपाणिःसादेवीवसिष्ठेनमहात्मना ॥ १३ ॥ पत्युःपादयुगेचक्षुर्युगन्यस्तवतीसती ॥ ततोब्रह्माचविष्णुश्चरुद्रश्चान्येतथा
मराः ॥ १४ ॥ विवाहविधिनातौतुमोदयाञ्चक्रुरुत्सवैः ॥ सावित्रीप्रमुखादेव्योदेवाश्चेन्द्रादयस्तथा ॥ ११५ ॥ दक्षाद्याःकश्यपाद्यास्तुमु
नयोऽतितपोधनाः ॥ उन्मुच्यब्रह्मवचनाद्वल्कलञ्चाऽजिनञ्जटाः ॥ १६ ॥ मन्दाकिनीजलेनाऽशुस्नापयित्वासुतंविधेः ॥ जाम्बूनदैस्तथा
दिव्यैर्भूषणैश्चमनोहरैः ॥ १७ ॥ वसिष्ठम्भूषयाञ्चक्रुस्तथैवारुन्धतींसतीम् ॥ भूषयित्वाऽथतौतत्रसमाप्यमुनिभिर्विधिम् ॥ १८ ॥ विवाहा
वभृथञ्चक्रुस्तयोर्विधिहरीश्वराः ॥ निधायसर्वतीर्थानान्तोयञ्जाम्बूनदेघटे ॥ १९ ॥ आशीर्वादकरैर्मन्त्रैर्गायत्र्याद्युपदादिभिः ॥ स्वयन्तौ
स्नापयाञ्चक्रुर्ब्रह्मविष्णुमहेश्वराः ॥ १२० ॥ ततोमहर्षयश्चान्येतथादेवर्षयश्चये ॥ तेसर्वेऋग्यजुःसामवेदभागैर्महास्वरैः ॥ २१ ॥ गङ्गादिसरि
तान्तोयैश्चक्रुःशान्तिन्तयोर्म्मुहुः ॥ भुवनत्रयसञ्चारिविमानंसूर्यवर्चसम् ॥२२॥ अव्याहतगतिम्ब्रह्मासतोयञ्चकमण्डलुम् ॥ ताभ्यान्दायन्ददौ

विष्णुर्दुष्प्रापंस्थानमुत्तमम् ॥२३॥यदूर्ध्वंसर्वदेवानाम्मरीच्यादेःसमोपतः ॥ सप्तकल्पान्तजीवित्वंरुद्रःप्रादात्तयोर्वरम्॥२४॥ आदितिःकुण्डल युगम्ब्रह्मणानिर्मितंस्वकम् ॥ ददौस्वकर्णादाकृष्यपुत्र्यैमेधातिथेस्तदा॥१२५॥पतिव्रतात्वंसावित्रीबहुलाबहुपुत्रताम् ॥ देवेन्द्रोबहुरत्नानिधने शेनसमन्ददौ ॥२६॥ एवन्देवाश्चमुनयोदेव्यश्चान्येचयेस्थिताः ॥ ददुस्तत्रयथायोग्यन्दायन्ताभ्याम्पृथक्पृथक् ॥२७॥एवंविवाह्यविधिवत्सौ वर्णेमानसाचले ॥ अरुन्धत्यावसिष्ठस्तुमोदमापतयासह ॥२८॥ तत्रयत्पतितन्तोयम्मानसाचलकन्दरे॥विवाहावभृथार्थायशान्त्यर्थेचसुरा हृतम् ॥२९॥ ब्रह्मविष्णुमहादेवपाणिभिः समुदीरितम् ॥ तत्तोयंसप्तधाभूत्वापतितम्मानसाचलात् ॥ १३० ॥ हिमाद्रेःकन्दरेसानौसरस्या श्चपृथक्पृथक् ॥ तत्तोयम्पतितंसिप्रेदेवभोग्येसरोवरे ॥ ३१ ॥ तेनसिप्रानदीजाताविष्णुनाप्रेरिताक्षितौ ॥ महाकोषीप्रयातेतुयद्वारिपतितन्तुवै ॥ ३२ ॥ कौशिकीनामसाजाताविश्वामित्रावतारिता ॥ उमाक्षेत्रेयत्पतितन्तोयन्तेनमहानदी ॥३३॥ कावेरीनामसाजाताकावेरसरसस्मृता ॥ महाकालेसरःश्रेष्ठेपतितन्तज्जलङ्गिरेः ॥ ३४ ॥ हिमाद्रेः पार्श्वभागेतुदक्षिणेशम्भुसन्निधौ ॥ गोमतीनामतैर्जातानदीगोमदुदीरिता ॥ ३५ ॥ मैनाकोनामयःपुत्रःशैलराजस्यतत्समः ॥ तस्मिन्त्सानौसमुत्पन्नोमेनकोदरतःपुरा ॥ ३६ ॥ यत्तत्रपतितन्तोयन्तेनजातामहानदी ॥ देवि काख्यामहादेवप्रेरितासागरम्प्रति ॥ ३७ ॥ यत्तोयंसंगतन्दर्याहंसावतरसन्निधौ ॥ तेनाभूत्सरयूर्नाम्नानदीपुण्यतमास्मृता ॥ ३८ ॥ यान्य म्भांसिमहातोयखाण्डवारण्यसन्निधौ ॥ हिमवत्कन्दरेयाम्येइरायाह्रदमध्यतः ॥ ३९ ॥ इरावतीनामनदीतैर्जाताचसरिद्वरा ॥ एताः सर्वाः

१ शैलराजसमः ।

स्नानपानसेवनैर्जाह्नवीयथा ॥ १४० ॥ फलन्ददतिमर्त्यानान्दक्षिणोदधिगाः सदा ॥ धर्मार्थकाममोक्षाणाम्बीजभूताः सनातनाः ॥४१॥
महानद्यस्तुसप्तैवसर्वदादेवभोगदाः ॥ एवन्नद्यःसप्तजाताःसदापुण्यतमोदकाः ॥ ४२ ॥ अरुन्धत्यावसिष्ठस्यविवाहेदेवसन्निधौ ॥ एवंविवा
ह्यसतदावसिष्ठस्तामरुन्धतीम् ॥ ४३ ॥ देवैर्दत्तन्तदास्थानंविमानेनजगामह ॥ ब्रह्मविष्णुमहेशानांवचनान्मुनिसत्तमः ॥ ४४ ॥ हितायस
र्वजगतान्त्रिषुलोकेषुसर्वदा ॥ यस्मिन्यस्मिन्युगेयादृक्स्त्रीणाम्भवतितादृशम् ॥ ४५ ॥ वेषम्भावंशरीरञ्चकृत्वाधर्म्मेनियोजयन् ॥ विचर
त्येषलोकाँस्त्रीनप्रमत्तःप्रसन्नधीः ॥ ४६ ॥ एवम्पुरावसिष्ठेनपरिणीतात्वरुन्धती ॥ साहितार्थायजगतान्देवानांवचनात्पुरा ॥ ४७ ॥ यइदंशृ
णुयान्नित्यमाख्यानन्धर्मसाधनम् ॥ सर्वकल्याणयंयुक्तश्चिरायुर्वित्तवान्भवेत् ॥ ४८ ॥ यास्त्रीशृणोतिसततमरुन्धत्याःकथामिमाम् ॥ पतिव्र
तासाभूत्वेहपरत्रस्वर्गमाप्नुयात् ॥ ४९ ॥ इदम्परंस्वस्त्ययनमिदन्धर्मप्रदम्परम् ॥ आख्यानंसर्वदाकीर्त्तियशःपुण्यविवर्द्धनम् ॥ १५० ॥
विवाहेपुंसियात्रायांयःश्राद्धेश्रावयेत्तथा ॥ स्थैर्यम्पुंसवनंसिद्धिः पितृप्रीतिश्चजायते ॥ ५१ ॥ इतिवःकथितंसर्वंवसिष्ठस्यमहात्मनः ॥ अरु
न्धतीयथाभूताभार्यावापिपतिव्रता ॥ ५२ ॥ यस्यवातनयाजातायथोत्पन्नाचयत्रच ॥ यथाब्रह्महरीशानांवचनात्सवृतः पतिः ॥ ५३ ॥
एतद्वःसर्वमाख्यातंगुह्याद्गुह्यतरम्परम् ॥ पुण्यदम्पापहरणमायुरारोग्यवर्द्धनम् ॥ ५४ ॥ इतिविपुलवृषौघक्षेमकारीतिहासंसदसिसकृदपी
हश्रावयेद्योद्विजानाम् ॥ सभवतिकलुषौघैर्हीनदेहःसमेतोमुनिवरसहचर्याम्प्रेत्यगीर्वाणएव ॥ १५५ ॥ · ॥ इतिकालिकापुराणेत्रयोविंश
तितमोध्यायः ॥ २३ ॥ ॥ मार्कण्डेयउवाच ॥ ततोमघतःप्रस्थेगिरेःसिप्रसरस्तटे ॥ उपविष्टोमहादेवस्तत्सरोऽपश्यदन्तिके ॥ १ ॥ पुनः

पुनःप्रेष्यमाणोब्रह्मणाहरिणाचसः ॥ ध्यानंकर्त्तुन्तत्रमनःस्थिरंकृत्वादृढात्मवान् ॥ २ ॥ आत्मानमात्मनाद्रष्टुमात्मन्येवविशेषतः ॥
परमंयत्नमकरोद्ध्यानेनस्मरशासनः ॥ ३ ॥ ध्यानेप्रविष्टचित्तन्तुतन्दृष्ट्वाद्रुहिणादयः ॥ हरेप्रविष्टाम्मायाख्यान्तुष्टुवुर्यतमानसाः॥ ४ ॥ माय
यामोहितोभर्गःसतीशोकाकुलोभृशम् ॥ विलपत्येवतान्तस्मिन्मोहहेतुञ्जगत्प्रसूम् ॥ ५ ॥ स्तुत्वाशम्भुशरीरात्तुनिःसार्यैनान्निराकुलाम् ॥
शम्भुचित्तंकरिष्यामोध्यानासक्तान्निरञ्जनम् ॥ ६ ॥ यावत्सतीपुनर्देहंगृहीत्वाहरभामिनी ॥ भवित्रीतावदेवेषविशोकोध्यातुनिष्कलम् ॥ ७ ॥
इतिसञ्चिन्त्यमनसाब्रह्माद्यास्त्रिदिवौकसः ॥ योगनिद्राम्महामायांस्तोतुमेवंसमारभन् ॥ ८ ॥ ॥ देवाऊचुः ॥ श्रीशक्तिम्पावतीन्ताम्पुष्टि
म्परमनिष्कलाम् ॥ वयंस्तुमोमहाभक्त्यामहदव्यक्तरूपिणीम् ॥ ९ ॥ शिवांशिवकरींशुद्धांस्थूलांसूक्ष्माम्परावराम् ॥ अन्तर्विद्यामविद्याख्या
म्प्रीतिमेकाग्रयोगिनीम् ॥ १० ॥ त्वम्मेधात्वन्धृतिस्त्वंहित्वमेकासर्वगोचरा ॥ त्वन्दीधितिःसूर्यगतासुप्रपञ्चप्रकाशिनी ॥ ११ ॥ यातुब्रह्मा
ण्डसंस्थानञ्जगद्बीजेषुयाजगत् ॥ आप्याययतिब्रह्मादींस्तम्बान्तायात्वमापगा ॥ १२ ॥ यएकःसर्वजगताम्प्राणभूतः सदागतिः ॥
देवानाञ्चयआधारःसनभस्वाँस्तवांशकः ॥ १३ ॥ एकंविसारियत्तेजःसर्वत्रैवसमिध्यते ॥ तत्तेरूपञ्जगद्बीजम्बहुधायच्चदृश्यते ॥ १४ ॥ या
ब्रह्मलोकपातालसान्तरालगतासदा ॥ सात्वंवियन्मध्यबहिर्ब्रह्माण्डस्यचसर्वतः ॥ १५ ॥ अचलाचलचक्रेणयन्त्रितायाप्रपञ्चसूः ॥ जगद्धा
त्रीलोकमातासाचत्वम्माधवीक्षितिः ॥ १६ ॥ त्वम्बुद्धिस्त्वन्ताद्विषयात्वम्माताछन्दसांगतिः ॥ गायत्रीत्वंवेदमातात्वंसावित्रीसरस्वती ॥१७॥

१ तस्मिन् शिवेइत्यर्थः । २ ब्रह्मादिस्तम्बान्तान्याआप्यायतिसाआपगावाआपनेजलसमूहेनयागच्छतिसाआपगा । ३ अचलचक्रेणपर्वतसमूहेनेत्यर्थः ।

त्वंवार्तासर्वजगतान्त्वन्त्रयीकामरूपिणी ॥ त्वंहिनिद्रास्वरूपेणप्राणिनोनिर्जरादयः ॥ १८ ॥ येस्वर्गौद्योकसःसर्वान्त्सुस्वपन्तीप्रमोहसि ॥
त्वंलक्ष्मीःपुण्यकर्त्रीणाम्पापिनान्त्वंहियातना ॥ १९ ॥ तथानीतिभृतांश्रीश्चसुखदानैशिकीधृतिः ॥ त्वंशान्तिःसर्वजगतान्त्वंकान्तिश्चन्द्रगो
चरा ॥ २० ॥ त्वन्धात्रीसर्वभूतानांलक्ष्मीस्त्वंविष्णुमोहिनी ॥ त्वन्तत्त्वरूपाभूतानाम्पञ्चानामपिसारकृत् ॥ २१ ॥ त्वन्त्रिलोकीमहामाया
त्वन्नीतिर्मोहकारिणी ॥ संसारचक्रेष्वारोप्यसर्वभूतम्महेश्वरः ॥ २२ ॥ भ्रामयन्नस्तिचयथासात्वम्मायामहेश्वरि ॥ जयन्तीजययुक्तानांह्रीर्वि
द्यानीतिरुत्तमा ॥ गीतिस्त्वंसामवेदस्यग्रन्थिस्त्वंयजुषांहुतिः ॥ २३ ॥ समस्तगीर्वाणगणस्यशक्तिस्तमोमयीसत्त्वगुणैकदृश्या ॥ रजः
प्रपञ्चानुभवैककारिणीयानस्तुताभव्यकरीहसास्तु॥२४॥संसारसागरकरालतरंगदुःखनिस्तारकारितरणिश्चितिरीतिहीना ॥ याष्टांगरूपपरपा
वनकेनिपातविक्षेपकारिणिगिरौप्रणनामताम्वै ॥ २५ ॥ नासाक्षिवक्त्रभुजवक्षसिमानसेचधृत्वासुखानिविदधातिसदैवजन्तोः॥निद्रेतियातिसु
भगाजगतीभवानांसानःप्रसीदतुधृतिस्मृतिवृत्तिरूपा ॥ २६ ॥ सृष्टिस्थित्यन्तरूपायासृष्टिस्थित्यन्तकारिणी ॥ सृष्टिस्थित्यन्तशक्तिर्या
सामायानःप्रसीदतु ॥ २७॥ मार्कण्डेयउवाच ॥ योगनिद्रामहामायासंस्तुतेयन्तदासुरैः ॥ हरस्यहृदयात्क्षिप्तन्निःससारतदाञ्जसा ॥ २८ ॥
विनिःसृतायान्तस्यान्तुविवेशमधुसूदनः ॥ शम्भोरन्तःस्वयन्तस्यशान्त्यर्थंविश्वरूपधृक् ॥ २९ ॥ प्रविश्यहृदयन्तस्यकल्पेकल्पेयथाभ
वत् ॥ सृष्टिःस्थितिस्तथैवान्तस्तथादर्शयदच्युतः ॥३०॥ यथासतीतस्यजायाभूतासायाचयत्सुता ॥ तत्सर्वन्दर्शयामासमुक्तदेहाचसायथा ॥

१ तरणिर्नौका । २ वेगिनि इ० पा० ।

॥ ३१ ॥ बहिर्व्यक्तन्तुनिस्सारम्प्रपञ्चंराजसम्बहु ॥ दर्शयित्वापरञ्ज्योतिर्गतचित्तन्तदाकरोत् ॥ ३२ ॥ ततोहरोपितान्त्सर्वान्प्रपञ्चान्वक्ष्य
चासकृत् ॥ निःसाराञ्चतदामत्त्वासारोचित्तन्न्यवेशयत् ॥ ३३ ॥ ब्रह्मादीनान्तदामायादेवानान्तैःपरिष्टुता ॥ प्रतिश्रुत्यचकर्तव्यन्तत्रैवान्तर्द
धेद्रुतम् ॥ ३४ ॥ भगवानपिवैकुण्ठःशम्भोश्चित्तम्पदेपदे ॥ संयम्यानिःसृतःकायाद्राजेवरविमण्डलात् ॥ ३५ ॥ कृतकृत्यास्तदादेवाब्रह्म
नारायणादयः ॥ स्वंस्वंस्थानंययुःप्रीतियुतास्त्यक्त्वाहरंगिरौ ॥ ३६ ॥ ध्यानासक्तम्महादेवम्प्रणम्येन्द्रादयःसुराः॥विज्ञाप्यमौनिनन्देवञ्जग्मुः
स्थानंस्वकंस्वकम् ॥ ३७ ॥ यातेषुतेषुदेवेषुकपर्दीवृषवाहनः ॥ सहस्रान्दिव्यमानेनदध्यौज्योतिःपरंसमाः ॥ ३८ ॥ ऋषयऊचुः ॥
कथम्मधुरिपुः शम्भोः प्रविश्यहृदयेञ्जसा ॥ कल्पेकल्पेस्थितिंसृष्टिंसंयमञ्चाप्यदर्शयत् ॥ ३९ ॥ यथाजगत्प्रपञ्चायराजसाजगतींगताः ॥
निःसारताकथन्तेपान्दर्शिताकैटभारिणा ॥ ४० ॥ किन्तुसारतरङ्ह्यम्परञ्ज्योतिःसनातनम् ॥ दर्शितन्तेनतत्सर्वमाचक्ष्वद्विजसत्तम
॥ ४१ ॥ श्रोतुमिच्छामइतितेमुनीन्द्राद्भुतमुत्तमम् ॥ विस्तरादिदमाख्याहिधर्म्यन्निश्रेयसम्परम् ॥ ४२ ॥ इतिकालिकापुराणेचतुर्विंश
तितमोध्यायः ॥ २४ ॥ ॥ ७ ॥ मार्कण्डेयउवाच ॥ ॥ आदिसर्गमहंवक्ष्येवाराहन्द्विजसत्तमाः ॥ कल्पेकल्पेयथासृष्टिर्वाराहेयादृशी
भवेत् ॥ १ ॥ आदिसृष्टिन्दर्शयित्वाप्रतिसर्गन्तथाहरिः ॥ शम्भवेदर्शयामासप्रलयादीन्यबोधत ॥ २ ॥ प्रलयम्प्रथमवंवक्ष्येसर्गमादिन्ततः
परम् ॥ प्रतिसर्गन्ततोविप्रावाराहंविनिबोधत ॥ ३ ॥ निमेषोनामकालांशोनेत्रोन्मेषविलक्षितः ॥ तैरष्टादशभिः काष्ठाकाष्ठानान्त्रिंशता
कला ॥ ४ ॥ कलाभिस्तावतीभिस्तुक्षणाख्यः परिकीर्तितः ॥ क्षणैर्द्वादशभिः प्रोक्तोमुहूर्तस्तैस्तुत्रिंशता ॥ ५ ॥ मानुषः स्यादहोरात्रः

पक्षस्तेदशपञ्चच ॥ पक्षाभ्याम्मानुषोमासःपितॄणान्तदहर्न्निशम् ॥ ६ ॥ मासैर्द्वादशभिर्वर्षोदेवानान्तदहर्न्निशम् ॥ कृष्णपक्षःपितॄणान्तु
कर्मार्थन्दिवसोमतः ॥ ७ ॥ स्वप्नार्थंशुक्लपक्षस्तुरजनीपरिकीर्तिता ॥ देवानान्तुदिनम्प्रोक्तंषण्मासाउत्तरायणम् ॥ ८ ॥ रात्रिःस्वप्नायदे
वानांषण्मासादक्षिणायनम् ॥ द्वाभ्यान्द्वाभ्यान्तुमासाभ्यामर्कजाभ्यामृतुःस्मृतः ॥ ९ ॥ ऋतुभिश्चायनम्प्रोक्तन्त्रिभिस्तन्मानुषम्मतम् ॥
ऋतुभिर्वत्सरःषड्भिस्ताँश्चशृणुपृथक्पृथक् ॥ १० ॥ चैत्रादिमासयुगलैः संज्ञाभेदाद्द्विजोत्तमाः ॥ वसन्तश्चैत्रवैशाखौग्रीष्मोज्येष्ठःशुचिस्त
था ॥ ११ ॥ प्रावृण्नभोनभस्यौतुशरत्स्यादिषकार्त्तिकौ ॥ सहःपौषौचहेमन्तःशिशिरोमाघफाल्गुनौ ॥ १२ ॥ षडिमेऋतवःप्रोक्तायज्ञादौ
विवृताःपृथक् ॥ नृणाम्मानेनदशभिर्लक्षैःसप्तभिरुत्तरैः ॥ १३ ॥ अष्टाविंशतिसाहस्रैर्मानंकृतयुगस्यतु ॥ सन्ध्याचतुःशतानीहवर्षाणा
मन्तरालतः ॥ १४ ॥ सन्ध्यांशस्तावताप्रोक्तस्तदन्तर्गतईप्सितः ॥ त्रेताद्वादशभिर्लक्षैर्मानुषैर्वत्सरैर्भवेत् ॥ १५ ॥ षण्नवत्यासहस्रैश्च
सन्ध्याचास्यशतत्रयम् ॥ शतत्रयन्तुसन्ध्यांशस्तदन्तःपरिकीर्तितः ॥ १६ ॥ चतुःषष्टिसहस्राणिलक्षाण्यष्टौप्रमाणतः ॥ भवेद्युगन्द्वाप
राख्यन्तेषुसन्ध्याशतद्वयम् ॥ १७ ॥ शतद्वयन्तुसन्ध्यांशस्तदन्तर्गतइष्यते ॥ द्वात्रिंशत्तुसहस्राणिचतुर्लक्षाणिवैकलेः ॥ ॥ १८ ॥ संव
त्सरैर्भवेन्मानंसन्ध्यैकम्प्रोच्यतेशतम् ॥ वत्सराणामेकशतंसन्ध्यांशश्चतदन्तरे ॥ १९ ॥ एवंकृतश्चत्रेताचद्वापरश्चतथाकलिः ॥ मानुषे
णप्रमाणेनभवेद्युगचतुष्टयम् ॥ २० ॥ त्रिचत्वारिंशतालक्षैर्मानञ्चातुर्युगम्भवेत् ॥ सहस्रैरपिविंशत्यासन्ध्यासन्ध्यांशसंयुतम् ॥ २१ ॥
दैवन्दिनंवत्सरेणमानुषेणसरात्रकम् ॥ एवंक्रमङ्गणित्वातुमानुषीयैश्चतुर्युगैः ॥ २२ ॥ दैवन्द्वादशसाहस्रंवत्सराणाम्प्रकीर्तितम् ॥ दैवैर्द्वा

दशसाहस्रैर्व्वत्सरैर्दैविकंयुगम् ॥ २३ ॥ तद्वैचतुर्युगंनृणांसन्ध्यासन्ध्यांशसंयुतम् ॥ देवानान्तुकृतन्त्रेताद्वापरादिव्यवस्थया ॥ २४ ॥
नयुगव्यवहारोस्तिनचधर्मादिभिन्नता ॥ किन्तुचातुर्युगन्नारम्भवेद्दैवयुगंसदा ॥ २५ ॥ दैविकैरेकसप्तत्यायुगैर्मन्वन्तरम्भवेत् ॥ दैवेयुगसहस्रे
द्वेब्रह्मणःस्यादहर्निशम् ॥ २६ ॥ चतुर्युगसहस्रेद्वेनृणाम्मानेनतद्भवेत् ॥ एकस्मिन्ब्राह्मदिवसेमनवःस्युश्चतुर्दश ॥ २७ ॥ एवंब्राह्मेण
मानेनदिवसैस्तुत्रिभिःशतैः ॥ सषष्टिभिर्वत्सरः स्याद्ब्राह्मोवर्षोनृणांयथा ॥ २८ ॥ ब्राह्मैःपञ्चाशतावर्षैःपरार्द्धःपरिकीर्तितः ॥ तदीश्वरस्य
दिवसस्तावतीरात्रिरीर्यते ॥ २९ ॥ शतेनब्रह्मणोवर्षोकालःस्याद्विपरार्द्धकः ॥ परार्द्धद्वितयेतीतेब्रह्मणःप्रलयोभवेत् ॥ ३० ॥ प्रलीने
ब्रह्मणिपरेजगताम्प्राकृतोलयः ॥ समस्तजगदाधारमव्ययंयत्परात्परम् ॥ ३१ ॥ तस्यब्रह्मस्वरूपस्यदिवारात्रञ्चयद्भवेत् ॥ तत्परन्नामत
स्यार्द्धम्परार्द्धमभिधीयते ॥ ३२ ॥ जगत्स्वरूपीभगवान्परमात्माक्षयोव्ययः ॥ स्थूलात्स्थूलतमःसूक्ष्माद्यस्तुसूक्ष्मतमोमतः ॥ ३३ ॥
नतस्यास्तिदिवारात्रिव्यवहारोनवत्सरः ॥ किन्तुपौराणिकैःपूर्व्वैरस्माभिरपितादृशैः ॥ ३४ ॥ सृष्टिप्रलयबोधार्थंकल्प्यतेतदहर्निशम् ॥
सएवरात्रिःसदिवासवर्षःसवैक्षितिःसृष्टिकरोहरश्च ॥ सविष्णुरूपीपुरुषःपुराणस्तस्मिन्त्समस्तञ्चविभातितद्वत् ॥ ३५ ॥ ततोब्रह्मणिलीनेतु
परमात्मनिशाश्वते ॥ जगत्सर्वंक्रमेणैवतद्रूपत्वायगच्छति ॥ ३६ ॥ ब्रह्मणःशतवर्षान्तेरुद्ररूपीजनार्दनः ॥ जगदन्तंस्वयंकृत्वापरमेलीनमे
तिवै ॥ ३७ ॥ प्रथमंसवितासर्वंस्थावरञ्जंगमन्तथा ॥ तीव्रैः करैःशोषयित्वाजलंसर्वंग्रहीष्यति ॥ ३८ ॥ शुष्कावृक्षास्तृणगणाःप्राणिनःप
र्व्वतास्तथा ॥ चूर्णीकृताविशीर्णाःस्युर्द्दिव्यवर्षशतेनतु ॥ ३९ ॥ ततोद्वादशसूर्य्यस्यरश्मयःप्रबलाभृशम् ॥ अभवन्द्वादशादित्याजगद्भोग्यो

पवृंहिताः ॥ ४० ॥ रश्मिद्वारेणसकलंसूर्यास्तेभुवनानिच ॥ अदहन्पृथिवीद्यौश्चमेदिनीचोष्णताङ्गता ॥ ४१ ॥ ततोविनष्टेसकलेस्थाव
रेजंगमेतथा ॥ आदित्यरश्मितोदेवोरुद्ररूपीजनार्दनः ॥ ४२ ॥ निःसृत्यप्रथमंयातःपातालतलमुन्नतः ॥ सप्तपातालसंस्थाँस्तुनागगन्धर्व
राक्षसान् ॥ ४३ ॥ देवान्नृपीश्चँशेषंचिजघानवरशूलधृक् ॥ एवंस्वर्गेचपातालेपृथिव्यांसागरेषुच ॥४४॥ येप्राणिनस्तान्त्समस्ताञ्जघानसज
नार्दनः ॥ ततोमुखान्महावायुंरुद्रश्चसृष्टवान्त्स्वयम् ॥ ४५ ॥ सोव्याहतगतिर्गाढंससारभुवनत्रये ॥ यावद्वर्षशतंवायुर्भ्रमन्भुवनगर्भगः ॥
॥ ४६ ॥ सर्वमुत्सारयामासयत्किञ्चित्तूलराशिवत् ॥ समस्तन्तत्समुत्सार्य्यजगद्वर्तिसमन्ततः ॥ ४७ ॥ विवेशद्वादशादित्यान्त्सवायुर्जवना
धिकः ॥ प्रविश्यमण्डलन्तेषान्तेजोभिः सहमारुतः ॥ ४८ ॥ महामेघान्त्समारेभेरुद्रेणप्रतियोजितः ॥ ततस्तेप्रेरितामेघास्तेनवातेनवे
गिना ॥ ४९ ॥ रुद्रेणाप्यतिरौद्रेणपर्य्यावव्रुर्नभःसमम् ॥ संवर्ताख्यामहामेघाभिन्नाञ्जनचयोपमाः ॥ ५० ॥ केचिद्धूम्राःशोणवर्णाःशुक्ला
श्चित्राश्चभीषणाः ॥ केचिच्चपर्वताकाराःकेचिन्नागसमप्रभाः ॥ ५१ ॥ प्रासादसदृशाःकेचित्क्रौञ्चवर्णाविभीषणाः ॥ गर्जन्तस्तेमहामेघा
वर्षाणामधिकंशतम् ॥ ५२ ॥ ववृषुस्त्रीनथोलोकान्प्लावयन्तोमहास्वनाः ॥ रथचक्रप्रमाणेनधारापातेनवैदृढम् ॥ ५३ ॥ धारासारेणमह
तापूरितम्भुवनत्रयम् ॥ आध्रुवस्थानमासाद्यतोयराशौस्थितेततः ॥ ५४ ॥ समुखादसृजद्वायुंरुद्ररूपीजनार्दनः ॥ तेनौघवायुनाक्षिप्तामेघाः
संवत्सराञ्छतम् ॥ ५५ ॥ अव्याहतगतेनाशुविध्वस्ताअभवँस्ततः ॥ नष्टेषुतेषुमेघेषुजनोलोकादिकम्पुनः ॥ ५६ ॥ रुद्रस्त्वाब्रह्मभुवन

१ रुद्ररूपी ।

न्ध्वंसयामासनिर्दयः ॥ विध्वस्तेषुसमस्तेषुभुवनेषुविशेषतः ॥ ५७ ॥ विनष्टेब्रह्मलोकेचरुद्रोगाद्वादशारुणान् ॥ सगत्वाद्वादशादित्यान्वे
गेनमहताहरिः ॥ ५८ ॥ अग्रसच्चातिजज्वालतैर्गर्भस्थैर्द्विवाकरैः ॥ ततोब्रह्माण्डमासाद्यरुद्रःकालान्तकोपमः ॥ ५९ ॥ चूर्णीचकारसकल
म्मुष्टिपेपम्महाबलः ॥ चूर्णीकुर्वंस्तुब्रह्माण्डम्पृथिव्यापिविचूर्णिता ॥ ६० ॥ तोयानिचसमस्तानिसदध्रेयोगतोहरिः ॥ यद्ब्रह्मांडाद्बहिस्तोयं
स्थितंपूर्वंसमन्ततः ॥ ६१ ॥ यद्वाभ्यन्तर्गतन्तोयन्तत्सर्वंश्चैकतांगतम् ॥ एकीभूतेषुतोयेषुसर्वव्यापिषुसर्वतः ॥ ६२ ॥ ब्रह्माण्डखण्ड
पूर्णोघःप्लवन्नासीत्सनौरिव ॥ ततःपृथिव्याःसारन्तुगन्धन्तन्मात्रकंक्रमात् ॥ ६३ ॥ अम्भोजग्राहसकलंविनष्टापृथिवीततः ॥ पुनःसरुद्र
स्तेजांसिगर्भस्थानिस्वकायतः ॥ ६४ ॥ निःसारयामासपुनःपुञ्जीभूतानिभीषणः ॥ तानितेजांसिसकलञ्जगृहुःसर्वतःस्थितम् ॥ ६५ ॥
अन्तर्बहिश्चब्रह्माण्डात्तेजोयच्चान्यतोगतम् ॥ जगद्गतंसर्वतेजोगृहीत्वाचैकतोज्ज्वलन् ॥ ६६ ॥ रौद्रब्रह्माण्डखण्डानितेजोथन्यदहज्जले ॥
दग्ध्वाब्रह्माण्डचूर्णानितेजाँस्युज्ज्वलितानिच ॥ ६७ ॥ जलेभ्योरसतन्मात्रंसारभूतन्ततोग्रहीत् ॥ गृहीतसारास्ताआपः प्रनष्टास्तेजसाततः
॥ ६८ ॥ अप्सुनष्टासुतत्तेजःप्रविश्याऽथसदागतिः ॥ एकीभूतोमहाभागोरूपन्तन्मात्रमग्रहीत् ॥ ६९ ॥ गृहीतेरूपतन्मात्रेतेजांसिसकला
न्यथ ॥ विनष्टानिततोवायुःप्रबलोभूदवारितः ॥ ७० ॥ महास्वनन्ततोवायुमासाद्याग्निरिवज्वलन् ॥ रुद्रःसङ्क्षोभयामासतदाकाशंस्वय
न्ततः ॥ ७१ ॥ तेनमङ्क्षूर्ध्वमाकाशमग्रहीन्मरुतस्ततः ॥ तद्गतंस्पर्शतन्मात्रंततोनष्टःप्रभञ्जनः ॥ ७२ ॥ नष्टेवायौततोरुद्रआकाशात्सा
रमग्रहीत् ॥ शब्दतन्मात्रकन्तस्मिन्गृहीतेविगतांवियत् ॥ ७३ ॥ नष्टेनभसिरुद्रोसौकायेब्राह्मेतदाविशत् ॥ ब्राह्मंतदाकुलंकायन्निराधारान्निरा

कुलम् ॥ ७४ ॥ विवेशवैष्णवेकायेशंखचक्रगदाधरे ॥ ततःशौरिर्महातेजाःकायन्तत्पाञ्चभौतिकम् ॥ ७५ ॥ शंखचक्रगदाशार्ङ्गवरासिधरम
च्युतम् ॥ स्वशक्त्यासञ्जहाराशुसारमादायसर्वतः ॥ ७६ ॥ निराधारन्निराकारन्निःसत्त्वन्निरवग्रहम् ॥ आनंदमयमद्वैतन्द्वैतहीनाविशेषणम् ॥
॥ ७७ ॥ नस्थूलन्नचसूक्ष्मंयज्ज्ञानन्नित्यंनिरञ्जनम् ॥ एकमासीत्परम्ब्रह्मस्वप्रकाशंसमन्ततः ॥ ७८ ॥ नाहोनरात्रिर्न्नवियन्नपृथ्वीनासीत्तमो
ज्योतिरभून्नचान्यत् ॥ श्रोत्रादिबुद्ध्याद्युपलभ्यमेकम्प्राधानिकम्ब्रह्मपुमाँस्तदासीत् ॥ ७९ ॥ एवंयावस्थितासृष्टिस्तावत्कालमसृष्टिकम् ॥
आसीदेकम्परन्तत्त्वन्ततःसृष्टिःप्रवर्त्तते ॥ ८० ॥ प्रकृतौसंस्थितोयस्मात्सर्वतन्मात्रसञ्चयः ॥ अहंकारंमहत्तत्त्वंगतोयत्प्राकृतोलयः ॥ ८१ ॥
प्रकृतौसंस्थितंव्यक्तमतीतप्रलयन्तुतत् ॥ तस्मात्प्राकृतसंज्ञोयमुच्यतेप्रतिसञ्चरः ॥ ८२ ॥ अयंवःकथितोविप्राःप्राकृताख्योमहालयः ॥
आदिसृष्टिंशृणुष्वेमांकथ्यमानाम्मयापुनः ॥ ८३ ॥ इतिकालिकापुराणेपञ्चविंशतितमोध्यायः ॥ २५ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ ॥
कालोनामस्वयन्देवःसृष्टिस्थित्यन्तकारकः ॥ अविच्छिन्नःसप्रलयस्तेनभागेनकेनाचित् ॥ १ ॥ लयभागेव्यतीतेतुसिसृक्षासमजायत ॥
ज्ञानस्वरूपस्यतदापरमब्रह्मणोविभोः ॥ २ ॥ ततोऽस्यप्रकृतिस्तेनसम्यक्संक्षोभिताभिया ॥ संक्षुब्धासर्वकार्यार्थमभूत्सात्रिगुणात्मिका ॥
॥ ३ ॥ यथासन्निधिमात्रेणगन्धःक्षोभायजायते ॥ मनसोलोककर्तृत्वात्तथासौपरमेश्वरः ॥ ४ ॥ सएवक्षोभकोब्रह्मञ्क्षोभ्यश्चपरमे
श्वरः ॥ ससंकोचविकाशाभ्याम्प्रधानत्वेपिचस्थितः ॥ ५ ॥ इच्छामात्रेणपुरुषःसृष्ट्यर्थेपरमेश्वरः ॥ ततः संक्षोभयामासपुनरेवज

१ ब्रह्मणा । २ सिसृक्षया ।

गत्पतिः ॥ ६ ॥ गुणसाम्यात्ततस्तस्मात्क्षेत्रज्ञाधिष्ठितात्ततः ॥ गुणव्यञ्जनसम्भूतिः सर्गकालेबभूवह ॥ ७ ॥ प्रधानतत्त्वादुद्भूतमीश्वरे
च्छासमीरितात् ॥ महत्तत्वम्प्रथमतस्तत्प्रधानंसमावृणोत् ॥ ८ ॥ प्रधानेनावृतात्तस्मादहंकारोव्यजायत ॥ वैकारिकस्तैजसश्चभूतादिश्चै
वतामसः ॥ ९ ॥ त्रिविधोयमहंकारोयोजातोमहतोग्रतः ॥ भूतानामिन्द्रियाणाञ्चसवैहेतुः सनातनः ॥ १० ॥ समहाँस्तमहंकारञ्जातमात्रं
समावृणोत् ॥ तन्मात्राणिततः पञ्चजज्ञिरेस्मात्समावृतात् ॥ ११ ॥ प्रथमंशब्दतन्मात्रंस्पर्शतन्मात्रमन्तरम् ॥ तृतीयंरूपतन्मात्रंरस
तन्मात्रमेवच ॥ १२ ॥ पञ्चमङ्गन्धतन्मात्रमेतानिक्रमशोभवन् ॥ प्रत्येकंसर्वतन्मात्रमहङ्कारःसमावृणोत् ॥ १३ ॥ ससर्जशब्दतन्मात्रा
दाकाशंशब्दलक्षणम् ॥ शब्दमात्रन्तथाकाशम्भूतादिःससमावृणोत् ॥ १४ ॥ शब्दतन्मात्रसहितात्स्पर्शतन्मात्रतस्ततः ॥ वायुःसमभवत्स्प
र्शगुणशब्दसमन्वितः ॥ १५ ॥ आकाशवायुसंयुक्ताद्रूपतन्मात्रतस्ततः ॥ तेजःसमभवद्दीप्तंसर्वतस्तदवर्द्धत ॥ १६ ॥ तच्छब्दवत्स्पर्शवच्च
रूपवच्चव्यजायत ॥ ततोवियद्वायुतेजोयुक्तात्तोयंससर्ज्जह ॥ १७ ॥ रसतन्मात्रतः सम्यक्तेनव्याप्तंसमन्ततः ॥ तोयान्याधारशक्तिर्याविं
ष्णोरमिततेजसः ॥ १८ ॥ सादग्रेऽथनिराधाराण्यनिलान्दोलितानिवै ॥ तेषुबीजम्प्रथमतःससर्जपरमेश्वरः ॥ १९ ॥ तदण्डमभवद्धैमंसह
स्रांशुसमप्रभम् ॥ महदादिविशेषान्तैरारब्धंसर्वतोवृतम् ॥ २० ॥ वारिवह्न्यनिलाकाशैस्तमोभूतादिनाबहिः ॥ वृतन्दशगुणैरण्डम्भूतादिर्म
हतातथा ॥ २१ ॥ बीजंयथाबाह्यदलैर्व्याप्तमण्डन्तथापुनः ॥ तोयादिभिस्तथाव्याप्तम्ब्रह्माण्डमतुलन्द्विजाः ॥ २२ ॥ तदण्डमध्येस्वयमेव
विष्णुर्ब्रह्मस्वरूपंविनिधायकायम् ॥ दिव्येनमानेनसवर्षमेकंस्थितोग्रहीद्वीजगणंस्वबुद्ध्या ॥ २३ ॥ ध्यानेनचाण्डंस्वयमेवकृत्वाद्विधासत

स्थौक्षणमात्रमस्मिन् ॥ तदैवतन्मात्रगणैःसमस्तैर्गन्धोत्तरैर्भरमुनैवसृष्टा ॥२४ ॥ स्पर्शस्यशब्दस्यसमस्तरूपगुणस्यगन्धस्यरसस्यचैषा ॥
आधारभूतासकलैःकृतायत्तन्मात्रवर्गैरखिलाधारत्रा ॥ २५ ॥ जातस्तदुत्थैःकनकाचलोसौजरायुभिःपर्वतसञ्चयोभूत् ॥ गर्भादिकैःसप्तप
योधयस्तुस्कन्धद्वयेनात्रिदशालयोभूत् ॥ २६ ॥ स्कन्धद्वयेनापरदेशजेनसताभवन्नागगृहाणितानि ॥ पातालसंज्ञानिमहासुखानियत्रस्वयं
स्यात्परतोमहेशः ॥ २७ ॥ तेजोगणात्तस्यबभूवलोकोयोसौमहर्लोकइतिश्रुतोभूत् ॥ जनाह्वयोभून्मरुतोऽथगर्भाद्ध्यानात्तपोलोकवरोबभूव
॥ २८ ॥ अण्डोर्ध्वगत्यामभवत्तुसत्यम्ब्रह्माण्डखण्डोपरिविष्णुरच्युतः ॥ परम्पदंयन्निगदन्तिधीरायज्ज्ञानगम्यम्परिनिष्ठरूपम् ॥ २९ ॥
एवंविधायप्रथमम्बभूवविष्णुस्वरूपीस्थितयेसएव ॥ स्वयंसमुद्भूततनुर्यतोयंस्वभूरितिख्यातिमवापविष्णुः ॥ ३० ॥ ततोभवद्यज्ञवराहरूपी
विष्णुर्भुवःप्रोद्धरणायपीनः ॥ निमज्जमानाम्पृथिवींसमध्येभित्त्वागतोधर्तुमधोतिवेगात् ॥ दंष्ट्राग्रदेशेविनिधायपृथ्वींसउद्गतःसर्वमतीत्यतोय
म् ॥ ३१ ॥ ततोऽभवत्सप्तफणान्वितोयमनन्तमूर्तिःपृथिवींविधर्तुम् ॥ प्रसार्यशेषोपिफणाःसवैषमध्येनिधायैकफणान्धरित्रीम् ॥ ३२ ॥
दधारतोयोपरितोयसंस्थितस्ततोत्यजद्यज्ञवराहउर्वीम् ॥ प्रसारिताःफणाःसर्वास्तासामेकात्तुपूर्वतः ॥ ३३ ॥ अपरापश्चिमायान्तुदक्षिणोत्तर
योःपरे ॥ एकागताफणैशान्यामाग्नेय्यामपरादिशि ॥ ३४ ॥ पृथ्वीमध्येस्थिताचैकानैर्ऋत्यान्तस्यवैतनुः ॥ शून्यादिग्वायवीतत्रततोनभ्रा
स्थिताक्षितिः ॥ ३५ ॥ सतुदीर्घतनुस्तोयेयदानन्तोनचाशकत् ॥ कूर्मरूपीतदाभूत्वाऽनन्तकायमधाद्धरिः ॥ ३६ ॥ अधोब्रह्माण्डखण्डंस
पद्भिराक्रम्यकच्छपः ॥ ग्रीवाम्वितत्यवायव्याम्पृष्ठेऽनन्तमधारयत् ॥ ३७ ॥ अनन्तःकूर्मपृष्ठेतुनवभिर्वेष्टनैस्तनुम् ॥ निधायपृथिवीन्दध्रेसु

खेनैवमहातनुः ॥ ३८ ॥ ततःफणास्वनन्तस्यचलन्तीपृथिवीस्थिता ॥ वराहःकर्त्तुमचलामचलामकरोद्दृढाम् ॥ ३९ ॥ मेरुंखुरप्रहारेणप्रकृ
त्यपृथिवीतलम् ॥ न्यखनत्साविवेशाथपृथ्वींम्भित्त्वान्तरन्ततः ॥ ४० ॥ योजनानांसहस्राणिषोडशैवरसातलम् ॥ प्रविवेशमहाशैलोवराहां
घ्रिप्रहारतः ॥ ४१ ॥ द्वात्रिंशत्तुसहस्राणियोजनानान्तुविस्तृतम् ॥ मेरोःशिरोभवत्तेनप्रहारेणद्विजोत्तमाः ॥ ४२ ॥ मर्य्यादापर्वतानस्यपा
र्श्वेपोत्रीतदाकरोत् ॥ यथाचलतिनैवैषपर्वतःपृथिवीधरः ॥ ४३ ॥ हिमवत्प्रभृतीनाञ्चभागम्भागंसपञ्चमम् ॥ पदाक्षित्यन्तरञ्चक्रेतदुच्छ्रायप्र
माणतः ॥ ४४ ॥ ततोब्रह्मावराहायनमस्कृत्यमहौजसे ॥ अर्द्धनारीश्वरङ्कायाद्देवदेवंव्यजायत ॥ ४५ ॥ प्रथमञ्जातमात्रःसप्ररुरोदमहास्व
नः ॥ किंरोदिषीतितम्ब्रह्मारुदन्तम्प्रत्युवाचह ॥ ४६ ॥ नामदेहीतितंसोथप्रत्युवाचमहेश्वरः ॥ रुद्रनामारोदनात्त्वम्मारोदीस्त्वम्महाशय ॥
॥ ४७ ॥ एवमुक्तःपुनः सोऽथसप्तवारान्रुरोदसः ॥ ततोऽपराणिनामानिसप्तब्रह्माकरोत्पुनः ॥ ४८ ॥ शर्वम्भवञ्चभीमञ्चमहादेवञ्चतुर्थकम् ॥
पञ्चमञ्चोग्रमीशानंषष्ठम्पशुपतिंपरम् ॥ ४९ ॥ मयायथाविभक्तस्त्वन्तथात्मास्त्वोविभज्यताम् ॥ त्वयापिभूरिसृष्ट्यर्थम्भवाँश्चापिप्रजापतिः
॥ ५० ॥ ततोब्रह्माद्विधाभूत्वापुरुषोर्द्धेनसोऽभवत् ॥ अर्द्धेननारीतस्यान्तुविराजमसूजत्प्रभुः ॥५१॥ तमाहभगवान्ब्रह्माकुरुसृष्टिम्प्रजापते ॥
तपस्तप्त्वाविराट्सोपिमनुंस्वायम्भुवन्ततः ॥ ५२ ॥ ससर्जसोऽपितपसाब्रह्माणम्पर्यतोषयत् ॥ तोषितस्तेनमनसादक्षंसृष्ट्यैससर्जसः॥५३॥
सृष्टेदक्षेऽथदशधाप्रणतोमनुनाविधिः ॥ पुनरेवसुतानन्यान्त्ससर्जदशमानसान् ॥ ५४ ॥ मरीचिमत्र्यङ्गिरसौपुलस्त्यम्पुलहंक्रतुम् ॥ प्रचे

१ सम्बिछ्रेत्यर्थः ।

तसंवसिष्ठश्चभृगुन्नारदमेवच ॥ ५५ ॥ एतानुत्पाद्यमनसामनुंस्वायम्भुवम्पुनः ॥ यूयंसृजध्वमित्युक्त्वालोकेशोन्तर्द्दधेपुनः ॥ ५६ ॥ वराहो
प्यथपोत्रेणखनित्वासप्तसागरान् ॥ पृथिव्यांवलयाकारान्त्ससर्जपरमेश्वरः ॥ ५७ ॥ सप्तधाभ्रमणेनासौसृष्ट्वासप्ताऽथसागरान् ॥ सप्तद्वीपान
वच्छिद्यपृथिव्यन्तन्ततोगतः ॥ ५८ ॥ लोकालोकाह्वयंशैलंकृत्वापृथ्व्यास्तुवेष्टनम् ॥ लक्षद्वयोच्छ्रितम्मानाद्योजनानांसमन्ततः ॥ ५९ ॥
सुदृढंस्थापयामासभित्तिंप्रान्तेयथागृहम् ॥ आदिसृष्टिरियंम्विप्राःकथिताभवताम्मया॥प्रतिसर्गमहंवक्ष्येतच्छृण्वन्तुमहर्षयः॥६०॥इतिकालि
कापुराणेषड्विंशोध्यायः ॥ २६ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ वाराहोयंश्रुतःसर्गोवराहाधिष्ठितोयतः ॥ प्रतिसर्गःश्रुतःसर्वैर्दक्षाद्यैर्यःकृतःपृ
थक् ॥ १ ॥ रुद्रोविराण्मनुर्दक्षोमरीच्याद्यास्तुमानसाः ॥ यंयंसर्गम्पृथक्चक्रुः प्रतिसर्गश्चसस्मृतः ॥ २ ॥ विराट्सुतोसृजद्वंश्यान्मनून्यै
र्वितताञ्जगत् ॥ मनुःसप्तमनून्त्सृष्ट्वाचकारबहुशःप्रजाः ॥३॥ प्रजाःसिसृक्षुःसमनुर्योसौस्वायम्भुवाह्वयः ॥ असृजत्प्रथमंषड्वैमनून्त्सोथपरान्त्सु
तान् ॥ ४ ॥ स्वारोचिषश्चौत्तमिश्चतामसोरैवतस्तथा ॥ चाक्षुषश्चमहातेजाविवस्वानपरस्तथा ॥ ५ ॥ यक्षरक्षःपिशाचाँश्चनागगन्धर्व
किन्नरान् ॥ विद्याधरानप्सरसःसिद्धान्भूतगणान्बहून् ॥ ६ ॥ मेघान्सविद्युतोवृक्षाञ्छैलाँतागुल्मतृणादिकान् ॥ मत्स्यान्पशूँश्चकीटाँश्चजलजा
न्स्थलजाँस्तथा ॥ ७ ॥ एतादृशानिसर्वाणिमनुःस्वायम्भुवःसुतैः ॥ सहितःससृजेसोन्यःप्रतिसर्गःप्रकीर्त्तितः ॥ ८ ॥ अन्येषण्मनवोयेवैते
पिस्वेस्वेन्तरेन्तरे ॥ प्रतिसर्गंस्वयंकृत्वाप्राप्नुवन्तिचराचरम् ॥ ९ ॥ यज्ञस्यसम्भृतंयज्ञंयूपम्प्राग्वंशमेवच ॥ धर्माधर्मौगुणान्सर्वान्वराहइव

१ भित्तिप्रांतेयथागृहम् ।

सृष्टवान् ॥ १० ॥ सुतान्बहून्त्समुत्पाद्यदक्षोदेवर्षिसत्तमान् ॥ महर्षीन्त्सोमपादीश्चबहून्पितृगणाँस्तथा ॥ ११ ॥ सृष्टिम्प्रवर्त्तयामासप्रति
सर्गोस्यसस्मृतः ॥ अजायन्तमुखाद्विप्राःक्षत्रियाबाहुयुग्मतः ॥ १२ ॥ ऊर्वोर्वैश्याःपदःशूद्राश्चतुर्वेदाश्चतुर्मुखात् ॥ ब्रह्मणःप्रतिसर्गोयम्ब्रा
ह्मःसर्गःस्मृतस्ततः ॥ १३ ॥ मरीचेःकश्यपोजातःकश्यपात्सकलञ्जगत् ॥ देवादैत्यादानवाश्चतस्यसर्गःप्रकीर्तितः ॥ १४ ॥ अत्रेर्नेत्रादभू
च्चन्द्रश्चन्द्रवंशस्ततोभवत् ॥ तेनव्याप्तञ्जगसर्वंसोस्यसर्गःप्रकीर्त्तितः ॥ १५ ॥ अथर्वांगिरसीकृत्यापुत्राश्चबहुशोपरे ॥ मन्त्रयन्त्रादयोयेवै
तेसर्वेऽङ्गिरसःस्मृताः ॥ १६ ॥ आज्यपाख्याःपुलस्त्यस्यपुत्राश्चान्येचराक्षसाः ॥ प्रतिसर्गेपुलस्त्यस्यबलवेगसमन्विताः ॥ १७ ॥
काद्रवेयागजाअश्वाःप्रजाबहुतरास्तथा ॥ ससृजेपुलहेनैषसर्गस्तस्यप्रकीर्तितः ॥ १८ ॥ क्रतोःपुत्रावालखिल्याः सर्वज्ञाभूरितेजसः ॥
अष्टाशीतिसहस्राणिज्वलद्भास्करसन्निभाः ॥ १९ ॥ प्रचेतसःसुताःसर्वेयेवैप्राचेतसाःस्मृताः ॥ षडशीतिसहस्राणिपावकोपमतेजसः ॥२०॥
स्वकालिनोवसिष्ठस्यपुत्राश्चान्येचयोगिनः ॥ आरुन्धतेयाःपञ्चाशद्वासिष्ठःसर्गउच्यते ॥ २१ ॥ भृगोश्चभार्गवाजातायेवैदैत्यपुरोधसः ॥
कवयस्तेमहाप्राज्ञास्तैर्व्याप्तमखिलञ्जगत् ॥ २२ ॥ नारदात्तारकाजाताविमानानितथैवच ॥ प्रश्नोत्तरास्तथैवान्येनृत्यगीतञ्चकौतुकम् ॥
॥ २३ ॥ एतेदक्षमरीच्याद्याःकृतदारान्बहून्सुतान् ॥ उत्पाद्योत्पाद्यपृथिवीन्दिवञ्चसमपूरयन् ॥ २४ ॥ तेषांसुतेभ्यश्चसुतास्तत्पुत्रेभ्यःपरे
सुताः ॥ समुत्पन्नाःप्रवर्त्तन्तेह्यद्यापिभुवनेषुवै ॥ २५ ॥ विष्णोस्तुचक्षुषोःसूर्योमनसश्चन्द्रमाःस्मृतः ॥ श्रोत्राद्वायुःसमुद्भूतोमुखादग्निरजा
यत ॥ २६ ॥ तिसर्गोह्ययंवि स्तथाचापिदिशोदश ॥ सृष्ट्यर्थञ्चन्द्रमाःपश्चादत्रिनेत्रादवातरत् ॥ २७॥ भास्करःकश्यपाज्जातोभार्यया

चसमन्वितः ॥ रुद्राश्चबहवोजाताभूतग्रामाश्चतुर्विधाः ॥ २८ ॥ श्ववराहोष्ट्ररूपाश्चप्लवगोमायुगोमुखाः ॥ ऋक्षमार्जारवदनाःसिंहव्याघ्रमुखाः परे ॥ २९ ॥ नानाशस्त्रधराःसर्वेनानारूपामहाबलाः ॥ एषवःप्रतिसर्गोपिकथितोद्विजसत्तमाः ॥ ३० ॥ दैनन्दिनञ्चप्रलयंशृणुध्वङ्कल्पशेषतः ॥ ३१ ॥ इतिकालिकापुराणेसप्तविंशोध्यायः ॥ २७ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ मन्वन्तरम्मनोःकालोयावत्पालयतेप्रजाः ॥ एकोमनुःसकालस्तुमन्वन्तरमितिश्रुतम् ॥ १ ॥ तदेकसप्ततियुगैर्देवानामिहजायते ॥ तैश्चतुर्दशभिःकल्पोदिनमेकन्तुवेधसः ॥ २ ॥ दिनान्तेब्रह्मणोजातेसुषुप्सातस्यजायते ॥ योगनिद्रामहामायासमायातिपितामहम् ॥ ३ ॥ नाभिपद्मम्प्रविश्याथविष्णोरमिततेजसः ॥ सुखंशेतेसभगवान्ब्रह्मालोकपितामहः ॥ ४ ॥ ततोविष्णुःस्वयम्भूत्वारुद्ररूपीजनार्दनः ॥ पूर्ववन्नाशयामाससर्वम्भुवनत्रयम् ॥ ५ ॥ वायुनावह्निनासार्द्धन्दाहयामासवैयथा ॥ महाप्रलयकालेषुतथासर्वञ्जगत्त्रयम् ॥ ६ ॥ जनंयान्तिप्रतापार्तामहर्लोकनिवासिनः ॥ त्रैलोक्यदाहसमयेपीडितादारुणाग्निना ॥ ७ ॥ ततःकालान्तकैर्मेघैर्नानावर्णैर्महास्वनैः ॥ समुत्पाद्यमहावृष्टिमापूर्यभुवनत्रयम् ॥ ८ ॥ चलत्तरंगैस्तोयौघैराश्रुवस्थानसंगतैः ॥ निधायजठरेलोकानिमांस्त्रीन्त्सजनार्दनः ॥ ९ ॥ नागपर्यंकशयनेशेतेसपरमेश्वरः ॥ शयानन्नाभिकमलेब्रह्माणंसजगद्गुरुः ॥१०॥ संस्थाप्यत्रीनिमाँल्लोकान्दग्ध्वाजग्ध्वाश्रियासह ॥ शेतेसभोगिशय्यायाम्ब्रह्मानारायणात्मकः ॥११॥ योगनिद्रावशञ्जातस्त्रैलोक्यग्रासबृंहितः ॥ त्रैलोक्यमखिलन्दग्धंयदाकालाग्निनातदा ॥ १२ ॥ अनन्तः पृथिवीन्त्यक्त्वाविष्णोरान्तिकमागतः ॥ तेनत्यक्तातुपृथिवीक्षणमात्रादधोगता ॥ १३ ॥ पतिताकूर्म्मपृष्ठेचविशीर्णेवतदाभवत् ॥ कूर्म्मोपिमहतोयत्नाच्चलन्तीम्पृथिवीञ्जले ॥ १४ ॥

ब्रह्माण्डम्पाद्भिराक्रम्यपृष्ठेदध्रेधरान्तदा ॥ ब्रह्माण्डखण्डसंयोगाच्चूर्णितापृथिवीभवेत् ॥ १५ ॥ इतिताम्परिजग्राहकूर्मरूपीजनार्दनः ॥
चलज्जलौघसंसर्गाच्चलन्त्याधरयातदा ॥ १६ ॥ कूर्मपृष्ठम्बहुतरैर्वरण्डैर्विततीकृतम् ॥ अनन्तस्तत्रगत्वातुयत्रक्षीरोदसागरः ॥ १७ ॥
तत्रस्वयंश्रियायुक्तंसुषुप्सन्तञ्जनार्दनम् ॥ फणयामध्ययादध्रेत्रैलोक्यग्रासबृंहितम् ॥ १८ ॥ पूर्वम्फणावितत्योर्द्ध्वम्पद्मंकृत्वमहाबलः ॥
विष्णुमाच्छादयामासशेषाख्यः परमेश्वरम् ॥ १९ ॥ तस्योपधानमकरोदनन्तोदक्षिणाम्फणाम् ॥ उत्तराम्पादयोश्चक्रेउपधानम्महाबलः
॥ २० ॥ तालवृन्तन्तदाचक्रेसशेषःपश्चिमाम्फणाम् ॥ स्वपन्तन्वीजयामासशेषरूपीजनार्दनः ॥ २१ ॥ शंखञ्चक्रन्नन्दकासिमिषुधीद्वे
महाबलः ॥ ऐशान्ययाथफणयासदध्रेगरुडन्तथा ॥ २२ ॥ गदाम्पद्मञ्चशार्ङ्गञ्चतथैवविविधायुधम् ॥ यानिचान्यानितस्यासन्नाग्नेय्याफणया
दधौ ॥२३॥एवंकृत्वास्वकङ्कायंशयनीयन्तदाहरेः ॥ पृथ्वीमधरकायेनमग्नामाक्रम्यचाम्भसि ॥ २४ ॥ त्रैलोक्यंब्रह्मसहितंसलक्ष्मीकञ्जनार्द
नम्॥सोपासङ्गञ्जगद्बीजञ्जगत्कारणकारणम् ॥२५॥ नित्यानन्दंवेदमयम्ब्रह्मण्यंपरमेश्वरम् ॥ जगत्कारणकर्त्तारञ्जगत्कारणकारणम् ॥२६॥
भूतभव्यभवन्नाथम्परापरगतिंहरिम्॥दधारशिरसातन्तुस्त्रयमेवस्वकान्तनुम्॥२७॥एवम्ब्रह्मदिनस्यैवप्रमाणेननिशांहरिः॥ सन्ध्याञ्चसमभिव्या
प्यशेतेनारायणोव्ययः ॥ २८ ॥ यस्मादयन्तुप्रलयोब्रह्मणःस्याद्दिनेदिने ॥ तस्माद्दैनन्दिनमितिख्यापयन्तिपुराविदः ॥ २९ ॥ व्यतीताया
न्निशायान्तुब्रह्मालोकपितामहः ॥ त्यक्त्वानिद्रांसमुत्तस्थौसपुनःसृष्टयेहितः ॥ ३० ॥ त्रैलोक्यन्तोयसम्पूर्णंशयानम्पुरुषोत्तमम् ॥ निरीक्ष्य
वैष्णवीम्मायाम्महामायाञ्जगन्मयीम् ॥ ३१ ॥ योगनिद्रांसतुष्टावहरेरंगेषुसंस्थिताम् ॥ ब्रह्मोवाच ॥ चितिशक्तिंनिर्विकाराम्परब्रह्मस्वरूपि

णीम् ॥ ३२ ॥ प्रणमामिमहामायांयोगनिद्रांसनातनीम् ॥ त्वंविद्यायोगिनान्देवित्वंगतिस्त्वम्मतिःस्तुतिः ॥३३॥ त्वंसृष्टिस्त्वंस्थितिःस्वाहा
स्वधात्वगिहगीतिका ॥ त्वंसामगीतिस्त्वन्नीतिस्त्वंह्रीःश्रीस्त्वंसरस्वती ॥ ३४ ॥ योगनिद्रामहामायामोहंनिद्रात्वमीश्वरी ॥ त्वंकान्तिः
सर्वशक्तिस्त्वन्त्वन्तनुर्वैष्णवीशिवा ॥ ३५ ॥ त्वन्धात्रीसर्वलोकानामविद्यात्वंशरीरिणाम् ॥ आधारशक्तिस्त्वन्देवीत्वंहिब्रह्माण्डधारिणी
॥ ३६ ॥ त्वमेवसर्वजगताम्प्रकृतिस्त्रिगुणात्मिका ॥ त्वंसावित्रीचगायत्रीसौम्यासौम्यातिशोभना ॥ ३७ ॥ त्वंसिसृक्षाहरेर्नित्यासुपुष्पात्वं
सुपुप्तिका ॥ पुष्टिर्लज्जाक्षमाशान्तिस्त्वन्धृतिःपरमेश्वरी ॥ ३८ ॥ त्वमेवक्षितिरूपेणध्रियसेसचराचरम् ॥ त्वमापस्त्वमपाम्मातासर्वान्तर्ग
तचारिणी ॥ ३९ ॥ स्तुतिःस्तुत्याचस्तोत्रीचस्तुतिशक्तिस्त्वमेवच ॥ त्वामहंकिंनुस्तोष्यामिप्रसीद परमेश्वरि ॥ ४० ॥ नमस्तुभ्यञ्ज
गन्मातःप्रबोधयजनार्दनम् ॥ एवंस्तुतामहामायाब्रह्मणालोककारिणा ॥ ४१ ॥ नेत्रास्यनासिकाबाहुहृदयान्निर्गताहरेः ॥ राजसीम्मूर्तिं
माश्रित्यसातस्थौब्रह्मदर्शने ॥ ४२ ॥ ततोजनार्दनोभोगिशयनान्निद्रया क्षणात् ॥ परित्यक्तःसमुत्तस्थौसृष्टयेचाकरोन्मतिम् ॥ ४३ ॥
ततोवराहरूपेणनिमग्नाम्पृथिवीञ्जले ॥ मग्नांसमुद्धाराशून्यधाञ्चसलिलोपरि ॥ ४४ ॥ तस्योपरिजलौघस्यमहतीनौरिवस्थिता ॥ वित
तत्त्वाञ्चदेहस्यनमहीयातिसम्प्लवम् ॥ ४५ ॥ ततोहरिःक्षितिंगत्वातोयराशिंस्वमायया ॥ संहृत्यजन्तुस्थितयेप्रवृत्तस्स्ववयमेवहि ॥ ४६ ॥
अनन्तोपियथापूर्वन्तथागत्वाक्षितेस्तलम् ॥ पृथिवीन्धारयामासकूर्म्मस्योपरिसंस्थितः ॥ ४७ ॥ ततोब्रह्मासमुत्पाद्यसर्वानेवप्रजापतीन् ॥

१ निषण्णाम् ।

जगदुत्पादयामाससर्वलोकपितामहः ॥ ४८ ॥ ब्रह्मावाकुरुतेसृष्टिंयदान्येवापिकुर्वते ॥ दक्षाद्यास्तुप्रजापालाःस्वयमेवतदिच्छया ॥ ४९ ॥
परब्रह्मस्वरूपीयःसोनुगृह्णातिसन्ततम् ॥ प्रकृतिश्चानुगृह्णातिमहाभूतानिपञ्चवै ॥ ५० ॥ पुरुषांश्चानुगृह्णातितथैवमहदादयः ॥ ईश्वरेच्छान्व
धिष्ठानात्पुरुषादष्टसञ्चयात् ॥५१॥ पुरुषाणामधिष्ठानान्महाभूतगणस्यच ॥ तथैवमहदादीनांकालस्यचमहात्मनः ॥५२॥ अधिष्ठानात्प्रधा
नस्ययच्चकिञ्चनजायते ॥ स्थावरञ्जंगमंवापिस्थिरंवाप्यथवाद्भुतम् ॥ ५३ ॥ सर्वमेषामधिष्ठानाज्जायतेद्विजसत्तमाः ॥ इतिवःकथितंसर्वंयथै
वादर्शयत्पुरा ॥ हरायसृष्टिसंहारकल्पान्तान्भगवान्हरिः ॥ यथाजगत्प्रपञ्चस्यासारतादर्शितापरा ॥ ५४ ॥ यच्चसारन्दर्शितन्तन्मत्तःशृ
ण्वन्तुवैद्विजाः ॥ ५५ ॥ इतिकालिकापुराणेअष्टाविंशोध्यायः ॥ २८ ॥ ७ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ जगत्सर्वन्तुनिःसारमनित्य
न्दुःखभाजनम् ॥ उत्पद्यतेक्षणादेतत्क्षणादेतद्विपद्यते ॥ १ ॥ तथैवोत्पद्यतेसारान्निसारञ्जगदञ्जसा ॥ पुनस्तस्मिन्विलीयन्तेमहाप्रलयसं
गमे ॥ २ ॥ उत्पत्तिप्रलयाभ्यान्तुजगन्निःसारतांहरिः ॥ शम्भवेदर्शयामासभावेनजगताम्पतिः ॥ ३ ॥ एकंशिवंशान्तमनन्तमच्युतम्परा
त्परंज्ञानमयंविशेषम् ॥ अद्वैतमव्यक्तमचिन्त्यरूपंसारन्त्वेकन्नास्तिसारन्तदन्यत् ॥ ४ ॥ यस्मादेतज्जायतेविश्वमग्र्यंयस्माल्लीनंस्याच्चुपश्चा
त्स्थितञ्च ॥ आकाशवन्मेघजालस्यवृत्त्यायद्विश्वंवैध्रियतेतत्त्वसारम् ॥५॥ अष्टांगयोगैर्यदवाप्तुमिच्छन्योगीपुनात्यात्मरूपंसदैव ॥ निवर्त्त
तेप्राप्ययन्नेहलोकेतद्वैसारंसारमन्यन्नचास्ति ॥ ६ ॥ सारोद्वितीयोधर्मस्तुयोनित्यप्राप्तयेभवेत् ॥ योवैनिवर्त्तकोनामतन्नासारःप्रवर्त्तकः ॥ ७ ॥
धर्मैशनैःसञ्चिनुयाद्वल्मीकोमृत्तिकांयथा ॥ सहायार्थम्परेलोकेपूर्वपापविमुक्तये ॥ ८ ॥ एकोधर्मः परंश्रेयः सर्वसंसारकर्मसु ॥ इतरेतुत्रयो

धर्माज्जायन्तेर्थादयोपरे ॥ ९ ॥ वरम्प्राणपरित्यागःशिरसोवाथकर्त्तनम् ॥ नतुधर्मपरित्यागोलोकेवेदेचगर्हितः ॥ १० ॥ धर्मेणध्रियतेलोको धर्मेणध्रियतेजगत् ॥ धर्मेणैवसुराःसर्वेसुरत्वमगमन्पुरा ॥ ११ ॥ धर्मश्चतुष्पाद्भगवाञ्जगत्पालयतेनिशम् ॥ सएवमूलम्पुरुषोधर्मइत्यभिधीयते ॥ १२ ॥ सर्वक्षरतिलोकेस्मिन्धर्मोनैवच्युतोभवेत् ॥ धमाद्योनविचलतिसएवाक्षरउच्यते ॥ १३ ॥ एतद्वःकथितंसारन्निःसारंसकलञ्जगत् ॥ यथास्वयन्ददर्शासौशम्भुर्ज्ञानेनस्वेन्तरे ॥ १४ ॥ एतद्वैदर्शयामाससविष्णुर्जगताम्पतिः ॥ स्वयञ्जग्राहमनसाध्यानेनात्मानिशङ्करः ॥ १५ ॥ सारन्तत्त्वम्परमन्निष्कलंयन्मूर्त्याहीनम्मूर्तिमान्धर्मएषः ॥ सारोन्योसौसारहीनन्तदन्यज्ज्ञात्वैवेत्थंयातिनित्यम्महाधीः ॥ ॥ १६ ॥ ॥ इतिश्रीकालिकापुराणेएकोनत्रिंशोध्यायः ॥ २९ ॥ ॥ ७ ॥ ॥ ऋषयऊचुः ॥ येसृष्टाःशम्भुनापूर्वम्भूतग्रामाश्चतुर्विधाः ॥ किमर्थन्तेसमुत्पन्नाःकथंवानेकरूपता ॥ १ ॥ शरीरमर्द्धंवाराहमर्द्धन्दन्तावलन्तथा ॥ सिंहव्याघ्रशरीराश्चकेचित्केचिद्गणाधिपाः ॥ ॥ २ ॥ कथन्तेवागणाःक्रूराःकिम्भोगास्तेमहौजसः ॥ एतत्सर्वंवयंश्रोतुमिच्छामोद्विजसत्तम ॥ ३ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ शृण्वन्तुमुनयःसर्वेयथाशम्भुगणाभवन् ॥ यदर्थन्तेसमुत्पन्नायस्मात्तेनैकरूपिणः ॥ ४ ॥ एतद्वःपरमंगुह्यमिदन्धर्मार्थकामदम् ॥ एतद्धिपरमन्तेजःसततम्परमन्तपः ॥ ५ ॥ इदंश्रुत्वामहाख्यानम्परत्रेहनसीदति ॥ यशस्यन्धर्म्यमायुष्यन्तुष्टिपुष्टिप्रदम्परम् ॥ ६ ॥ आदिसर्गेथवाराहेसम्पूर्णेमुनिसत्तमाः ॥ शंकरःप्राहसर्वेशंवाराहञ्जगताम्पतिम् ॥ ७ ॥ ॥ ईश्वरउवाच ॥ ॥ यदर्थम्भवतारूपंवाराहंकल्पितंविभो ॥ तत्ते

१ संधिरार्षः ।

पूर्णंकृतम्पृथ्वीयथावत्स्थापितात्वया ॥ ८ ॥ सागराणाञ्चसंस्थानन्नदीनाञ्चतथाक्षितेः ॥ सृष्टिर्ब्रह्मकृताचापिसञ्जातात्वत्प्रसादतः ॥ ९ ॥
त्वंहिसर्वमयोयज्ञमयस्तेजोमयस्तथा ॥ गुरूणामथसर्वेषान्त्वंगुरुस्त्वम्परात्परः ॥ १० ॥ त्वांवोढुन्नक्षमापृथ्वीविशीर्णेवजगत्पते ॥ यन्त्रि
ताशैलसंघातैर्भवतास्थापितैःपुरा ॥ ११ ॥ तस्मात्वन्त्यजवाराहंशरीरञ्जगताम्पते ॥ जगन्मयञ्जगद्रूपञ्जगत्कारणकारणम् ॥ १२ ॥ कस्त्वा
न्यःक्षमोवोढुंवाराहन्तेवपुर्विभो ॥ विशेषतस्त्वयापृथ्वीसकामाधार्षिताजले ॥ १३ ॥ स्त्रीधर्मिणीत्वत्तेजोभिःसाधाद्गर्भञ्चदारुणम् ॥ रज
स्वलाक्षमागर्भंयामाधत्तजगत्पते ॥ १४ ॥ तस्माद्यस्तनयोभावीसोप्यादास्यतिदुर्द्धरः ॥ एषप्राप्यासुरम्भावन्देवगन्धर्वहिंसकः ॥ १५ ॥
भविष्यतीतिलोकेशःप्राहमान्दक्षसन्निधौ ॥ मलिनीरतिसञ्जातन्दुष्टन्तेनिष्टकारकम् ॥ १६ ॥ कामुकन्त्यजलोकेशवाराहंकायमीदृशम् ॥
त्वमेवसृष्टिस्थित्यन्तकारकोलोकभावनः ॥ १७ ॥ कालेप्राप्तेस्थितिंसृष्टिंसंहारञ्चकरिष्यति ॥ तस्माल्लोकहितार्थायत्यक्त्वाकायम्महाबल ॥
॥ १८ ॥ कालेप्राप्तेपुनस्त्वन्यंकायम्पोत्रंकरिष्यसि ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इतितस्यवचःश्रुत्वाशंकरस्यमहात्मनः ॥ १९ ॥
वाराहमूर्तिर्भगवान्महादेवमुवाचह ॥ ॥ श्रीभगवानुवाच ॥ ॥ करिष्येहन्तववचस्त्वंयथात्थमहेश्वर ॥ २० ॥ इमन्तुयज्ञवाराहंकायन्त्य
क्ष्येनसंशयः ॥ कालेप्राप्तेपुनस्त्वन्यंकायंवाराहमद्भुतम् ॥ २१ ॥ करिष्येहन्दुराधर्षंलोकानाम्भावनायवै ॥ इत्युक्त्वासमहाकायस्तत्रैवान्तर
धीयत ॥ २२ ॥ जगद्गुरुर्जगत्स्रष्टाजगद्धाताजगत्पतिः ॥ तस्मिन्नन्तर्हितेदेवेदेवदेवोमहेश्वरः ॥ २३ ॥ निजंस्थानन्देवगणैःस्वगणैश्चजगा
मह ॥ वराहोपिस्वयंगत्वालोकालोकाह्वयंगिरिम् ॥२४॥ वाराह्यासहरेमेसपृथिव्याचारुरूपया ॥ सतयारममाणस्तुसुचिरम्पर्वतोत्तमे ॥२५॥

नावापतोषंलोकेशः पोत्रीपरमकामुकः ॥ पृथिव्याःपोत्रिरूपायारमयन्त्यास्ततःसुताः ॥ २६ ॥ त्रयोजाताद्विजश्रेष्ठास्तेषान्नामानिमेशृणु ॥
सुवृत्तःकनकोघोरःसर्वएवमहाबलाः ॥ २७ ॥ शिशवस्तेमेरुपृष्ठेकाञ्चनेवप्रसंस्तरे ॥ रेमिरेन्योन्यसंसक्तागह्वरेषुसरःसुच ॥ २८ ॥ सतैः
पुत्रैःपरिवृतोवराहोभार्यया स्वया ॥ रममाणस्तदाकायत्यागन्नैवागणाद्विजाः ॥ २९ ॥ कदाचिच्छिशुभिस्तैस्तुसंश्लिष्टःकर्दमान्तरे ॥
चकारकर्दमक्रीडाम्भार्यया चमहाबलः ॥ ३० ॥ सपंकलेपःशुशुभेवराहोमधुपिंगलः ॥ सन्ध्याघनोयथातोयंक्षरंस्तोयन्तथाविधः ॥ ३१ ॥
सपुत्रैःपरमप्रीतोभार्यया चपृथिव्यया[1] ॥ विरुजन्धरणींरेमेमध्यनिम्नाथसाभवत् ॥ ३२ ॥ अनन्तोपिसमाक्रम्यकूर्मसपृथिवीतले ॥ हरिंवहन्भु
ग्नशिराःसातंकोभूत्प्रपीडया ॥ ३३ ॥ सुवृत्तेनस्वर्णवप्रंघोरेणकनकेनच ॥ विदारितम्पोत्रघातैःस्वर्णभग्नात्कृतंसमम् ॥ ३४ ॥ मेरुपृष्ठेयानि
यानिसौवर्णानिद्विजोत्तमाः ॥ रचितानिसुरैर्यत्नात्तानिभग्नानितत्सुतैः॥३५॥ मानसादीनिदेवानांसरांसिशिशवोथते ॥ आविलानितदाचक्रुः
पोत्रघातैःसमन्ततः ॥ ३६ ॥ पृथिवीवनितारूपारमयामासपोत्रिणम् ॥ स्थावरेणतुरूपेणदुःखमाप्नोतिवैदृढम् ॥ ३७ ॥ सागराश्चसुवृत्ता
द्यैरवगाह्यसमन्ततः ॥ विकीर्णरत्नःपोत्रौघैःसर्वएवाकुलीकृताः ॥ ३८ ॥ इतस्ततश्चाशिशुभिःक्रीडद्भिः पोत्रिभिस्तदा ॥ जगन्तितत्रभग्ना
निनद्यःकल्पद्रुमास्तथा ॥ ३९ ॥ जानन्नपिजगद्धर्त्तावराहःस्वयमेवहि ॥ जगत्पीडांसुतस्नेहाद्धारयामासनैवतान् ॥ ४० ॥ सुवृत्तः
कनकोघोरोयदागच्छतिवैदिवम् ॥ तदादेवगणाभीताःप्राद्रवन्तिदिशोदश ॥ ४१ ॥ एवंसुतैर्भार्यया यज्ञपोत्रीक्रीडँस्तुष्टिन्नापकाश्चित्कदा

---

१ पृथिव्ययेत्यार्षम् ।

चित् ॥ नित्यंनित्यंवर्द्धतेतस्यकामःकायन्त्यक्तुन्नैच्छदेषप्रदिष्टः ॥ ४२ ॥ इतिकालिकापुराणेत्रिंशोध्यायः ॥ ३० ॥ मार्कण्डेयउवाच ॥
ततोदेवगणाः सर्वेसहितादेवयोनिभिः ॥ शक्रेणसहितामन्त्रञ्चक्रुःसम्यग्जगद्धितम् ॥ १ ॥ ततोनिश्चित्यतेसर्वेशक्राद्यामुनिभिःसह ॥
शरण्यंशरणञ्जग्मुर्नारायणमजंविभुम् ॥ २ ॥ तंसमासाद्यगोविन्दंवासुदेवञ्जगत्पतिम् ॥ प्रणम्यसर्वेत्रिदशास्तुष्टुवुर्गरुडध्वजम् ॥ ३ ॥
देवाऊचुः ॥ नमस्तेदेवदेवेशजगत्कारणकारक ॥ कालस्वरूपिन्भगवन्प्रधानपुरुषात्मक ॥ ४ ॥ स्थूलसूक्ष्मजगद्व्यापिन्परेशपुरुषोत्तम ॥
त्वंकर्त्तासर्वभूतानान्त्वम्पातात्वंविनाशकृत् ॥ ५ ॥ त्वंहिमायास्वरूपेणसम्मोहयसिवैजगत् ॥ यद्भूतंयच्चवैभाव्यंयदिदानीम्प्रवर्त्तते ॥
॥ ६ ॥ तत्सर्वम्परमेशत्वंस्थावरञ्जंगमन्तथा ॥ अर्थार्थिनान्त्वमर्थस्तुकामःकामार्थिनान्तथा ॥ ७ ॥ त्वंहिधर्मार्थिनान्धर्मोमोक्षोनिर्वाण
मिच्छताम् ॥ त्वङ्गामुकस्त्वमेवार्थोधार्मिकस्त्वंसदागतिः ॥ ८ ॥ त्वद्वक्त्राद्ब्राह्मणाजाताबाहुजाःक्षत्रियास्तव ॥ ऊर्वोर्वैश्यास्तथाशूद्राः
पादाभ्यान्तवनिर्गताः ॥ ९ ॥ सूर्योनेत्रात्तवविभोमनोजश्चन्द्रमास्तव ॥ श्रवणात्पवनोजातोदशप्राणास्तथापरे ॥ १० ॥ ऊर्ध्वस्वर्गादिभु
वनन्तवशीर्षादजायत ॥ तवनाभेस्तथाकाशाद्भूमिःपादतलादभूत् ॥ ११ ॥ कर्णाभ्यान्तेदिशोजाताजठरात्सकलञ्जगत् ॥ त्वंहिमाया
स्वरूपेणसम्मोहयसिवैजगत् ॥ १२ ॥ निर्गुणोगुणवाँस्त्वंहिशुद्धएकःपरात्परः ॥ उत्पत्तिस्थितिहीनस्त्वन्त्वमच्युतगुणाधिकः ॥ १३ ॥
आदित्यैर्वसुभिर्देवैःसाध्यैर्यक्षैर्मरुद्गणैः ॥ त्वञ्चिन्त्यसेजगन्नाथमुनिभिश्चमुमुक्षुभिः ॥ १४ ॥ त्वांवैचिदानन्दमयंविदन्तिविशेषविज्ञामु
नयोविभोगाः ॥ त्वमेवसंसारमहीरुहस्यबीजञ्जलंस्थानमथोफलञ्च ॥ १५ ॥ त्वम्पद्मयापद्मकरोविभासिवरासिचक्राब्जधनुर्द्धरस्त्वम् ॥

त्वमेवताक्ष्र्येप्रतिभासिनित्यंस्वर्णाचलेतोययुतोयथाब्दः ॥ १६ ॥ त्वमेवपीताम्बरशंकराजास्त्वंसर्वमेतन्नचकिञ्चिदन्यत् ॥ नतेगुणानः
पारिचिन्तनीयाविधेर्हरस्यापिदिशाम्पतीनाम् ॥ १७ ॥ भीतेनभक्त्याशरणम्प्रपन्नागतावयन्नःपरिरक्षविष्णो ॥ ॥ मार्कण्डेयउवाच ॥
इतिस्तुतोदेवदेवोभूतभावनभावनः ॥ १८ ॥ सेन्द्रैर्देवगणैरूचेतान्त्सर्वान्मेघनिस्वनः ॥ ॥ श्रीभगवानुवाच ॥ ॥ यदर्थमागतायूयंय
द्वाभयमुपस्थितम् ॥ १९ ॥ तत्रयद्वामयाकार्यन्तद्देवास्तूर्णमुच्यताम् ॥ देवाऊचुः ॥ शीर्यतेवसुधानित्यंक्रीडयायज्ञपोत्रिणः ॥ २० ॥ लो
काश्चसर्वेसंक्षुब्धानामुवन्त्युपशान्तताम् ॥ शुष्कन्तुम्बीफलंघातैर्यथाजर्जरतांगतम् ॥ २१ ॥ वराहक्षुरघातेनतथाजर्जरिताक्षितिः ॥
तस्ययेवात्रयःपुत्राःकालाग्निसमतेजसः॥ २२ ॥ सुवृत्तःकनकोघोरस्तैश्चाप्याघातितञ्जगत् ॥ तेषाङ्कर्द्दमलीलाभिःसरांसिजगताम्पते ॥२३॥
मानसादीनिभग्नानिप्रकृतिंयान्तिनाधुना ॥ भग्नास्तैर्द्देवतरवोमन्दाराद्यामहाबलैः ॥ २४ ॥ देवनद्योपिरोहन्तिफलम्पुष्पन्दलञ्चवा ॥ यदा
त्रिकूटमारुह्यतेसुवृत्तादयस्त्रयः ॥२५॥ प्लुतङ्कृत्वामहाबाहोपतन्तिलवणार्णवे ॥ तदातत्क्षुब्धतोयौघैःप्लाव्यतेसकलामही ॥ २६ ॥ उत्प्लवन्ति
जनाःसर्वेप्रयान्तिचदिशोदश ॥ जीवितंरक्षमाणास्तेप्रयान्तिचदिशोदश ॥ २७ ॥ यदात्रिविष्टपंयान्तियज्ञवाराहपुत्रकाः ॥ इतस्ततस्तदा
भग्नादेवाःशान्तिन्नलेभिरे ॥ २८ ॥ सर्वेतैःपर्वताःपुत्रैर्वराहस्यजगत्पते ॥ क्रीडद्भिःशिखरेनीताभूरिभागमधोगतिम् ॥ २९ ॥ एवंविक्रीडता
न्तेपांक्रीडाभिःसकलञ्जगत् ॥ नाशमायातिवैकुण्ठतस्माद्रक्षजगत्प्रभो ॥३०॥ ॥ मार्कण्डेयउवाच ॥ ॥ इतितेषान्निगदतांश्रुत्वावाक्य
ञ्जनार्द्दनः ॥३१॥ उवाचशंकरन्देवम्ब्रह्माणञ्चविशेषतः ॥ यत्कृतेदेवताःसर्वाःप्रजाश्चसकलाइमाः ॥ ३२ ॥ प्राप्नुवन्तिमहद्दुःखंशीर्यतेसकल

अगत् ॥ वाराहन्तदहंकायन्त्यक्तुमिच्छामिशंकर ॥३३॥ निर्वेशशक्तन्तन्त्यक्तुंस्वेच्छयानाहिशक्यते ॥ त्वन्त्याजयस्वतंकायंयत्नान्मांशंकरा
धुना ॥३४॥ त्वमाप्यायस्वतेजोभिर्ब्रह्मन्स्मरहरम्मुहुः ॥ आप्यायन्तुतथादेवाःशंकरोहन्तुपोत्रिणम् ॥ ३५ ॥ रजस्वलायाःसंसर्गाद्विप्राणा
म्मारणात्तथा ॥ कायःपापकरोभूतस्तन्त्यक्तुंयुज्यतेधुना ॥३६॥ प्रायश्चित्तैरपैत्यनःप्रायश्चित्तमहन्ततः ॥ चरिष्यामितदर्थम्मेतनुर्यत्नेनशा
म्यताम् ॥ ३७ ॥ प्रजापाल्याममसदासाहिसीदातिनित्यशः ॥ मत्कृतेप्रत्यहन्तस्मात्त्यक्ष्येकायम्प्रजाकृते ॥ ३८ ॥ ॥ मार्कण्डेयउवाच ॥
इत्युक्तौवासुदेवेनतदातौब्रह्मशंकरौ ॥ त्वयायथोक्तन्तत्कार्य्यमितिगोविन्दमूचतुः ॥ ३९ ॥ वासुदेवोपितान्त्सर्व्वान्विसृज्यात्रिदशाँस्तथा ॥
वाराहन्तेजआहर्त्तुंस्वयन्ध्यानपरोभवत् ॥ ४० ॥ शनैःशनैर्यदातेजआहरत्येषमाधवः ॥ तदादेहन्तुवाराहंसत्त्वहीनमजायत ॥ ४१ ॥ ते
जोहीनंयदादेहञ्ज्ञातंसर्वैस्तदामरैः ॥ आससादतदादेवोयज्ञवाराहमद्भुतम् ॥ ४२ ॥ ब्रह्माद्यास्त्रिदशाःसर्वेमहादेवमुमापतिम् ॥ अनुजग्मु
स्तदातेजआधातुंस्मरशासने ॥ ४३ ॥ ततःसर्वैर्देवगणैःस्वंस्वन्तेजोवृषध्वजे ॥ आदधेतेनबलवान्त्सोतीवसमजायत ॥ ४४ ॥ ततःशरभ
रूपीसतत्क्षणाद्गिरिशोभवत् ॥ ऊर्द्ध्वाधोभागतश्चाष्टपादयुक्तःसुभैरवः ॥ ४५ ॥ द्विलक्षयोजनोच्छ्रायःसार्द्धलक्षैकविस्तृतः ॥ ऊर्द्ध्वंवाराहका
यस्तुलक्षयोजनविस्तृतः ॥ ४६ ॥ लक्षार्द्धविस्तृतःपार्श्वेवर्द्धमानस्तदाभवत् ॥ ततःशरभरूपन्तम्महादेवमुमापतिम् ॥ ४७ ॥ ददर्श
यज्ञपोत्रीसस्पृशन्तंशिरसाविधुम् ॥ सुदीर्घनासानखरंकृष्णांगारसमप्रभम् ॥ ४८ ॥ दीर्घवक्त्रम्महाकायमष्टदंष्ट्रासमन्वितम् ॥ बिभ्रतं
ससटंपुच्छन्दीर्घकर्णम्भयानकम् ॥ ४९ ॥ चतुरः पृष्ठतः पादानधरेचतुरस्तथा ॥ कुर्वन्तंघोरमारावमुत्पतन्तम्पुनःपुनः ॥ ५० ॥

तमायान्तन्ततोदृष्ट्वाक्रोधाद्धावन्तमञ्जसा ॥ सुवृत्तःकनकोघोरआसेदुःक्रोधमूर्छिताः ॥ ५१ ॥ तमासाद्यमहाकायंशरभम्भ्रातरस्त्रयः ॥ उच्चि
क्षिपुस्तेयुगपत्पोत्रघातैर्महाबलाः ॥ ५२ ॥ यावत्प्रमाणःशरभस्तत्प्रमाणास्तदाभवन् ॥ शरभोत्क्षेपसमयेमाययापोत्रिणस्त्रयः ॥ ५३ ॥
तेषाम्पोत्रप्रहारेणप्रोत्क्षिप्तःशरभस्तदा ॥ पपातपृथिवीप्रान्तेगम्भीरेतोयसागरे ॥ ५४ ॥ तस्मिन्निपतितेतत्रसागरेमकरालये ॥ उत्पत्यतेत्रयः
पेतुःक्रोधात्तस्मिन्महोदधौ ॥ ५५ ॥ सुवृत्तेकनकेघोरेपतितेसागराम्भसि ॥ वराहोपिसुतस्नेहात्क्रोधाच्चद्विजसत्तमाः ॥ ५६ ॥ उत्पत्यसह
सातस्मिँस्तोयराशौपपातह ॥ उत्पतन्तस्तदातेवैवाराहाःशरभस्तथा ॥ ५७ ॥ बभज्जुर्दिविदेवाँस्तुनक्षत्राणिग्रहाँस्तथा ॥ केचित्तुनिहतादेवा
भूमौपेतुश्चकेचन ॥ ५८ ॥ केचिच्चज्ञानिनोदेवामहर्लोकमुपाश्रिताः ॥ नक्षत्राणिविमानात्तुपतितानिमहीतले ॥ ५९ ॥ अदृश्यन्तद्विजश्रे
ष्ठाज्वालामालाकुलानिवै ॥ तेषामुत्पतनेवेगोयोभूत्परमदारुणः ॥ ६० ॥ तेनातिवेगोजनितोवायुःपरमदारुणः ॥ वायुनातेननुन्नास्तुपर्वताः
पृथिवीतले ॥ ६१ ॥ केचिच्छैलाःपर्वतेषुपतिताःपुनरेवत ॥ विमृद्यवृक्षाञ्जन्तूँश्चनिपेतुश्चपुनःपुनः ॥ ६२ ॥ केचित्तुपर्वताघातैर्नृत्यमानाम
हीतले ॥ बभज्जुरचलाश्चापिव्रजन्तोबहुशःप्रजाः ॥ ६३ ॥ पवताःसमदृश्यन्तवातवेगेनभूतले ॥ ६४ ॥ सङ्घट्टमानास्तेभ्योन्येव्रजन्तइव
तेचलाः ॥ अम्भोनिधौपतद्भिस्तैर्वाराहैःशरभेणच ॥ ६५ ॥ पर्वतैश्चमहातुङ्गैरुत्क्षिप्तास्तोयराशयः ॥ ६६ ॥ तेषाम्प्रपातवेगेनाक्षिप्तेषुजल
राशिषु ॥ निस्तोयाइवसञ्जाताः क्षणंवैसर्वसागराः ॥ ६७ ॥ तैःसर्वैरुदकैःक्षिप्तैःपृथिवीतलमागतैः ॥ उत्प्लाविताःप्रजाःसर्वाःक्षणाज्जग्मुःक्ष
यन्ततः ॥ ६८ ॥ प्लवमानाःप्रजास्तोयेम्रियमाणाःसमन्ततः ॥ हापितस्त्वथहातातहामातर्हासुतेतिच ॥ ६९ ॥ विलपन्तिस्मकरुणम्भी

ताश्चार्त्तामुमूर्षवः ॥ यस्मिन्देशेनिपतितोवाराहैःशरभःसह ॥ ७० ॥ तत्रैवाधोगताभूमिःपादवेगेनदारिता ॥ अपरःपृथिवीप्रान्तउत्थितःप
र्वतैःसह ॥ ७१ ॥ ससर्जजनलोकेषुचलान्तेषाम्प्रभञ्जनैः ॥ जनलोकेषुसंयुक्ताम्पृथिवींशरभस्तदा ॥ ७२ ॥ निःश्रेणीमिवसम्बद्धामचला
मपिपोत्रिभिः ॥ ददर्शविस्मयाविष्टःसभीतःश्रान्तपीडितः ॥ ७३ ॥ ततस्तेयुयुधुःसर्वेपोत्रघातेनपोत्रिणः ॥ खुरप्रहारैर्दंष्ट्राभिर्गात्रक्षेपैश्चदारु
णैः ॥ ७४ ॥ शरभोप्यथदंष्ट्राग्रैर्नखैस्तीक्ष्णैःखुरैस्तथा ॥ लांगूलस्यप्रहारैस्तुतुण्डघातैर्महास्वनैः ॥ ७५ ॥ चतुर्भिःपोत्रिभिस्तैस्तुसएकःश
रभोमहान् ॥ एकान्तंयोधयामाससहस्रम्परिवत्सरान्॥७६॥ तेषाम्प्रहारैर्वेगैश्चभ्रमणैश्चगतागतैः॥आस्फोटितैस्तथारावैर्देहपातैःपृथक्पृथक् ॥
॥ ७७ ॥ पातालेपन्नगाःसर्वेविनेशुःकद्रुजैःसह ॥ ततस्तेसागरन्त्यक्त्वापृथिवीमध्यमागताः ॥ ७८ ॥ परस्परंयुध्यमानाततोभूत्पृथिवीसमा ॥
शेषोपिमहतायत्नाद्बलेनास्तंभ्यकच्छपम् ॥ ७९ ॥ दधारपृथिवीन्दुःखैर्भग्नशीर्षःप्रतापितः ॥ अनन्तेवामनीभूतेसमत्वम्पृथिवीतले ॥ ८० ॥
गतेम्भोभिश्चलाद्भिश्चपर्वतःसर्वजन्तुषु ॥ नष्टेषुयुध्यमानेषुत्रिपोत्रिशरभेषुच ॥ ८१ ॥ सागरैराप्लुतेसर्वजगत्यापोमयेहरिम् ॥ चिन्ताविष्टः
सुरज्येष्ठउवाचाथपितामहः ॥ ८२ ॥ भगवन्भुवनंसर्वंससुरासुरमानुषम् ॥ विध्वस्तम्पृथिवीशीर्णानष्टाःस्थावरजंगमाः ॥८३॥ देवदानवग
न्धर्वादैत्याश्चापिसरीसृपाः ॥ विध्वस्ताजगताम्नाथमुनयश्चतपोधनाः ॥ ८४ ॥ त्वम्पालकोसिसर्वेषान्त्वमेवजगतःप्रभुः ॥ तस्मात्पालय
नःसर्वान्पृथिवीञ्चजगत्पते ॥ ८५ ॥ त्वमेवकायंवाराहंस्वयमेवोपसंहर ॥ संस्थापयमहाबाहोपृथिवीञ्चचराचरैः ॥ ८६ ॥ ॥ मार्कण्डेय

१ सोपानेकाष्ठघटितेनिःश्रेणिस्त्वधिरोहिणी ॥ निःश्रेणी त्यान्निश्रयणीतथानिःश्रयिणीतिचेतिशब्दरत्नावली । २ आस्तभ्येति समस्तात्स्तम्भयित्वेत्यर्थः ।

उवाच ॥ ॥ इतितस्यवचःश्रुत्वाब्रह्मणोथजनार्दनः ॥ यत्नञ्चक्रेतदासर्वंसंस्थापयितुमच्युतः ॥ ८७ ॥ ततोहरीरोहितमत्स्यरूपीभूत्वामु
नीन्त्सप्ततदासवेदान् ॥ अधाच्छ्रुतेरक्षणतत्परोजगद्धितायसर्वश्रुतिकोविदान्वरान् ॥ ८८ ॥ वसिष्ठमत्रिन्त्वथकाश्यपञ्चविश्वादिमित्रञ्चसगौ
तमम्मुनिम् ॥ महातपस्थञ्जमदग्निमुख्यन्तथाभरद्वाजमुनिन्तपोनिधिम् ॥ ८९ ॥ निधायपृष्ठेसहितोयमध्येस्थितोमहानौप्रवरेमुनीन्द्रान् ॥
ततःशिवंक्षान्त्वयितुञ्जनार्दनोजगामयस्मिन्युयुधेसपोत्रिभिः॥९०॥ श्रान्तंवराहैरतिपौत्रघट्टनैर्न्निपीडितंव्यात्तमुखंश्वसन्तम्॥अथागतंवीक्ष्यह
रिंवराहःसस्मारपूर्व्वान्नरसिंहमूर्त्तिम् ॥ ९१ ॥ स्मृतस्तदातेनसमाजगामसखावराहस्यहितेनृसिंहः ॥ तमागतंवीक्ष्यतदानृसिंहन्तदीय
कायान्निजतेजआदात् ॥ ९२ ॥ दृष्टंवराहैःशरभेणतेजोयत्सूर्य्यतुल्यम्प्रविवेशविष्णौ ॥ विज्ञायतेजोरहितन्नृसिंहंससर्जनिश्वासचयान्वरा
हः ॥ ९३ ॥ ततस्तुजाताबहवोवराहाबहुप्रमाणाद्भुततीक्ष्णदंष्ट्राः ॥ तेवैवराहाःशरभंगिरीशम्मायाविनोवीतभयास्तुदन्तः ॥ ९४ ॥ समन्नृ
सिंहेनतदापियुद्धञ्चक्रुर्ममर्दुश्चभृशंगिरीशम् ॥ क्षणम्महापक्षिसमानरूपाःक्षणन्तुगावस्तुरगानराश्च ॥ ९५ ॥ क्षणन्नृसिंहाश्चवराहरूपागो
मायवोवैकृतिकाःक्षणन्ते ॥ अनेकरूपाणिभयङ्कराणिवितन्यमानानिरणेवराहैः ॥ ९६ ॥ निरीक्ष्यभर्गश्चनिपीडितन्तैरथासदन्माधवस्तांगि
रीशम् ॥ पस्पर्शविष्णुर्गिरिशङ्करेणतेजोन्यधात्तत्रनिजम्पुनःसः ॥९ ७ ॥ अथसंस्पृष्टमात्रःसविष्णुनाप्रभविष्णुना ॥ अतीवमुदितोहृष्टो
बलवान्त्समजायत ॥ ९८ ॥ अथोच्चैःशरभोनादन्नादबलवद्दृढम् ॥ आपूरितानियेनैतद्भुवनानिचतुर्दश ॥ ९९ ॥ नदतस्तस्यव
दनाच्छीकरायेविनिःसृताः ॥ ततोगणाःसमभवन्महाकायामहौजसः ॥ १०० ॥ यथावराहनिश्वासान्नानारूपधरागणाः ॥ वराहा

स्तादृशाएतेततोप्यतिबलाःपुनः ॥ १०१ ॥ श्ववराहोष्ट्ररूपाश्चपशुवगोमायुगोमुखाः ॥ ऋक्षमार्जारमातंगशिशुमारस्वरूपिणः ॥ २ ॥ सिंहव्याघ्रमुखाःकेचित्केचित्सर्पाखुमूर्त्तयः ॥ हयग्रीवाहयमुखामाहिषाकृतयःपरे ॥ ३ ॥ अन्येतुमनुजाकारामृगमेषमुखाःपुनः ॥ कबन्धाहीनपादाश्चविहस्ताबहुपाणयः ॥४॥ केचित्तुशरभाकाराःकृकलासमुखाःपरे ॥ मत्स्यवक्त्राग्राहवक्त्राह्रस्वादीर्घाबलाःकृशाः॥१०५॥ चतुःपादाष्टपादाश्चत्रिपादाद्विपदाःपरे ॥ एकपादाभूरिहस्तायक्षकिम्पुरुषोपमाः ॥ ६ ॥ पश्वाकाराःपक्षयुक्तालम्बोदरमहोदराः ॥ दीर्घोदराःस्थूलकेशाबहुकर्णाविकर्णकाः ॥ ७ ॥ स्थूलाधरादीर्घदन्तादीर्घश्मश्रुधराःपरे ॥ येसन्तिप्राणिनोविप्राभुवनेषुसमन्ततः ॥ ८ ॥ चतुर्दशसुतेतेषांरूपेणसमतांगताः ॥ नेहास्तिभुवनेजन्तुःस्थावरोवाजगत्पुनः ॥९॥ यत्तुल्यरूपेणगणोनजातःशंकरस्यच ॥ तेभिन्दिपालैःखड्गैश्चपरिघैस्तोमरैस्तथा ॥ ११० ॥ शंकुलासिगदाभिश्चपाशैःशंकुभिरेवच ॥ खट्वांगैश्चत्रिशूलैश्चकपालैःशक्तिभिस्तथा ॥ ११ ॥ दात्रैःसृणिभिरीषाग्रैर्य्यष्टिभिश्चित्रकण्टकैः ॥ प्रासैःपरशुभिर्बाणैःकोदण्डैरतिभीषणाः ॥ १२ ॥ जटाचन्द्रकलायुक्ताःसर्वएवमहाबलाः ॥ केचिद्वर्गस्यरूपेणवाहनेनाथभूषणैः ॥ १३ ॥ तुल्याजटार्द्धशुभ्रांशुशुभ्रशीर्षामहाबलाः ॥ अर्द्धनारीश्वराःकेचिद्यथारुद्रस्तथैवते ॥ १४ ॥ केचित्तुचारुरूपेणमोहनेनमनोभुवः ॥ तुल्येनवनितासंघैः समञ्जातारतोत्सुकाः ॥ ११५ ॥ आकाशचारिणः सर्वेसर्वेस्वच्छन्दगामिनः ॥ नीलोत्पलदलश्यामाःशुक्लाः केचनलोहिताः ॥ १६ ॥ रक्ताः पीतास्तथाचित्राहरिताःकपिलाः परे ॥ अर्द्धपीताह्यर्द्धरक्तानीलार्द्धाधवलाः परे ॥ ॥ १७ ॥ सकृष्णपीताः शुक्लेनकृष्णेनार्द्धेनरञ्जिताः ॥ एकवर्णाद्विवर्णाश्चत्रिवर्णाश्चतथापरे ॥ १८ ॥ चतुःषट्पञ्चवर्णाश्चकेचिद्दशगुणा

द्विजाः ॥ डिण्डिमान्पटहाञ्छङ्खान्भेर्य्यानकसकाहलान् ॥ १९ ॥ मंडूकाञ्झर्ज्झराँश्चैवझर्झरीश्चसमर्दलाः ॥ वीणास्तन्त्रीः पञ्चतन्त्रीः
शकटान्दर्दराँस्तथा ॥ १२० ॥ गोमुखानानकान्कुण्डान्तसतालकरतालिकान् ॥ वादयन्तोगणाः सर्वेहसन्तश्चमुहुर्मुहुः ॥ २१ ॥ वराहा
भिमुखाभूत्वातस्थुस्तेहृष्टमानसाः ॥ तान्त्सर्वानाहशरभोभगवान्वृषभध्वजः ॥ २२ ॥ निघ्नतैतान्वराहस्यगणान्वैक्रूरकर्मभिः ॥ क्रूरदृष्ट्या
क्रूरयुद्धैःक्रूराभूत्वामहाबलाः ॥ २३ ॥ ततस्तेवैगणाःसर्वेनानाकारावरायुधाः ॥ सार्द्धंवराहस्यगणैर्युयुधुःक्रूरदर्शनाः ॥ २४ ॥ आकाशचा
रिणः सर्वेजलपूर्णञ्जगत्त्रयम् ॥ तेपरित्यज्ययुयुधुर्वियत्येवोभयेगणाः ॥ १२५ ॥ ततःक्षणाद्वराहस्यगणान्त्सर्वान्महाबलान् ॥ हरस्यप्रमथा
जघ्नुर्महावाताइवाम्बुदान् ॥ २६ ॥ हतेषुतेषुवीरेषुवाराहेषुगणेष्वथ ॥ दध्यौवराहः किमितिप्राक्पश्चाद्वृत्तमास्थितम् ॥ २७ ॥ अथचिन्तय
तस्तस्यस्वान्तंगत्वाजनार्दनः ॥ तत्सर्वञ्ज्ञापयामासवराहवपुषोहितम् ॥ २८ ॥ ततोदेहपरित्यागंकर्त्तुंसमयतस्तदा ॥ ततोदंष्ट्राग्रघातेननर
सिंहम्महाबलः ॥ २९ ॥ शरभोभगवान्भर्गोद्विधामध्येचकारह ॥ नरसिंहेद्विधाभूतेनरभागेनतस्यच ॥ १३० ॥ नरएवसमुत्पन्नोदिव्यरूपी
महानृपिः ॥ तस्यपश्चास्यभागेननारायणइतिश्रुतः ॥ ३१ ॥ अभवत्सुमहातेजामुनिरूपीजनार्दनः ॥ नरोनारायणश्चोभौसृष्टिहेतूमहा
मती ॥ ३२ ॥ द्वयोःप्रभावोदुर्द्धर्षः शास्त्रेवेदेतपःसुच ॥ तौनाविविनिधायाथमत्स्यमूर्त्यवितात्मनि ॥ ३३ ॥ आससादपुनर्देवोवाराहः
शरभंहरिः ॥ वपुस्त्यागोमयावश्यंकर्त्तव्योजगतांहिते ॥ ३४ ॥ इतिपूर्वम्प्रतिज्ञातन्तदर्थोयंसमुद्यमः ॥ क्रियतेहरिणासार्द्धंशम्भुनाब्रह्म
णापिच ॥ १३५ ॥ इतिसञ्चिन्त्यसतदाशूकरःपरमेश्वरः ॥ जगादशरभन्देवम्महादेवम्महाबलम् ॥ ३६ ॥ जहिमान्त्वम्महादेवत्यक्ष्ये

कायमसंशयम् ॥ हितायसर्वजगतान्देवानामपिसद्विषाम् ॥ ३७ ॥ ममदेहप्रतीकौघैर्यज्ञंयूयम्प्रकल्प्यच[1] ॥ पृथक्पृथङ्महाभागासशा
मित्रध्रुवादिकम् ॥ ३८ ॥ ततस्तेतान्त्रिभिःपुत्रैर्विधध्वञ्जगतांहिते ॥ कनकेनसुवृत्तेनघोरेणचजगन्मयीम् ॥ ३९ ॥ यज्ञाद्देवाःप्रजाश्चैव
यज्ञादन्नान्नियोगिनः ॥ सर्वंयज्ञात्सदाभाविसर्वंयज्ञमयञ्जगत् ॥ १४० ॥ यमिमम्पृथिवीगर्भमाधत्तमलिनीपुनः ॥ तमुत्पन्नंस्वयन्देवीचि
रंसंगोपयिष्यति ॥ ४१ ॥ प्राप्तेकालेयदादेवीतदायुष्मान्त्सुभाषते ॥ वधस्तस्यातिभारार्तातदैवैनंहनिष्यथ ॥ ४२ ॥ भारार्त्तापृथिवी
मग्नायदाधःशतयोजनम् ॥ शृङ्गीवराहरूपेणप्रोद्धरिष्येतदाइमाम् ॥ ४३ ॥ कृतकृत्यन्तुतंकायन्त्याजयिष्यतितेसुतः ॥ योभावीदेवसे
नानीरुद्रात्पाण्मातुराह्वयः ॥ ४४ ॥ एवंयज्ञवराहेतुभाषमाणेमहाबले ॥ निःसृत्यसुमहत्तेजोज्वालामालातिदीपितम् ॥ १४५ ॥ सूर्यको
टिप्रतीकाशंवराहवपुषस्तदा ॥ हरेर्भगवतोदेहेविवेशमहदद्भुतम् ॥ ४६ ॥ तस्मिन्विष्णौप्रविष्टेतुवाराहेतेजसिद्विजाः ॥ सुवृत्तात्कनकाद्धौ
रात्तेजआदात्स्वयंहरिः ॥ ४७ ॥ तेषामपिशरीरेभ्यस्तेजोभागःपृथक्पृथक् ॥ विनिःसृत्यविनिःसृत्यज्वालामालातिदीपितः ॥ ४८ ॥ प्रवि
वेशहरेःकायेयथातेषाम्पितुस्तथा ॥ ततोहरिश्चब्रह्माचमहादेवश्चतद्वचः ॥ ४९ ॥ वराहस्यप्रतिश्रुत्यओमित्युक्त्वापुनःपुनः ॥ तेषांकायपरि
त्यागेअकार्षुर्यत्नमुत्तमम् ॥ १५० ॥ ततस्तुण्डप्रहारेणशरभःकण्ठमध्यतः ॥ भित्त्वावपुर्वराहस्यपातयामासतज्जले ॥ ५१ ॥ तम्पात
यित्वाप्रथमंसुवृत्तंकनकन्तथा ॥ घोरश्चकण्ठदेशेषुभित्त्वाभित्त्वाजघानह ॥ ५२ ॥ त्यक्तप्राणास्तुस्तेसर्वेपेतुस्तोयेमहार्णवे ॥ जलेशब्दं

१ प्रतीकएकदेशः अंगम्प्रतीकोवयवइतिकोशात्तत्समूहैरित्यर्थः ।

यतस्तेभ्योधिकोयत्तद्भूतग्रामः सउच्यते॥इतिवःकथितंसर्वम्भूताःशम्भुगणायथा ॥१९०॥ यदाहारायदाकारायत्कृत्यास्तेमहौजसः॥यइदंशृ
णुयान्नित्यमाख्यानम्महदद्भुतम्॥सदीर्घायुःसदोत्साहीयोगयुक्तश्चजायते॥१९१॥इतिश्रीकालिकापुराणेएकत्रिंशोध्यायः ॥३१॥ऋषयऊचुः॥
कथंयज्ञवराहस्यदेहोयज्ञत्वमाप्तवान् ॥ त्रेतात्वमगमन्पुत्रावराहस्यकथन्त्रयः ॥ १ ॥ अकालिकोयम्प्रलयःकस्माद्भगवताकृतः ॥ जन
क्षयोमहाघोरोवराहेणमहात्मना ॥ २ ॥ कथंत्वामत्स्यरूपेणवेदास्त्राताश्चशार्ङ्गिणा ॥ कथम्पुनरभूत्सृष्टिःकेनचोर्वीसमुद्धृता ॥ ३ ॥
ईश्वरःशारभङ्गायन्त्यक्तवान्वाकथंगुरो ॥ कीदृक्प्रवृत्तन्तद्देहन्तन्नोवदमहामते ॥ ४ ॥ एतेषान्द्विजशार्दूलभवान्प्रत्यक्षदर्शिवान् ॥ तन्नोद्यश्रो
ष्यमाणानाङ्कथयस्वमहामते ॥ ५ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ शृणुध्वन्द्विजशार्दूलायत्पृष्टोहमिहाद्भुतम् ॥ शृण्वन्नवहिताःसर्वेसर्व
वेदफलप्रदम् ॥ ६ ॥ यज्ञेषुदेवास्तुष्यन्तियज्ञेसर्वम्प्रतिष्ठितम् ॥ यज्ञेनधियतेपृथ्वीयज्ञस्तारयतिप्रजाः ॥ ७ ॥ अन्नेनभूताजीवन्तिपर्जन्या
दन्नसम्भवः ॥ पर्जन्योजायतेयज्ञात्सर्वंयज्ञमयन्ततः ॥ ८ ॥ सयज्ञोभूद्वराहस्यकायाच्छम्भुविदारितात् ॥ यथाहङ्कथयेतद्वःशृण्वन्त्ववहिता
द्विजाः ॥ ९ ॥ विदारितेवराहस्यकायेभर्गेणतत्क्षणात् ॥ ब्रह्मविष्णुशिवादेवाःसर्वैश्चप्रमथैःसह ॥ १० ॥ निन्युर्जलात्समुद्धृत्यतच्छरीरान्नभः
प्रति ॥ तद्विभिदुःशरीरन्तेविष्णोश्चक्रेणखण्डशः ॥ ११ ॥ तस्यांगसन्धयोयज्ञाजातास्तेवैपृथक्पृथक् ॥ यस्मादंगाच्चयेजातास्तच्छृण्वन्तु
महर्षयः ॥ १२ ॥ भ्रूनासासन्धितोजातोज्योतिष्टोमोमहाध्वरः ॥ हनुश्रवणसन्ध्योस्तुवह्निष्टोमोव्यजायत ॥ १३ ॥ चक्षुर्भ्रुवोःसन्धिनातु
व्रात्यष्टोमोव्यजायत ॥ जातःपौनर्भवष्टोमस्तस्यपोत्रौष्ठसन्धितः ॥ १४ ॥ वृद्धष्टोमबृहत्ष्टोमौजिह्वामूलादजायताम् ॥ अतिरात्रंसवैराजम

धोजिह्वान्तरादभूत् ॥ १५ ॥ अध्यापनम्ब्रह्मयज्ञःपितृयज्ञस्तुतर्पणम् ॥ होमोदैवोबलिर्भौतोनृयज्ञोतिथिपूजनम् ॥ १६ ॥ स्नानन्तर्प्पण
पर्य्यन्तन्नित्ययज्ञाश्चसर्व्वशः ॥ कण्ठसन्धेःसमुत्पन्नाजिह्वातोविधयस्तथा ॥ १७ ॥ वाजिमेधमहामेधौनरमेधस्तथैवच ॥ प्राणिहिंसाकरा
येन्येतेजाताःपादसन्धितः ॥ १८ ॥ राजसूयोर्थकारीचवाजपेयस्तथैवच ॥ पृष्ठसन्धौसमुत्पन्नाग्रहयज्ञास्तथैवच ॥ १९ ॥ प्रतिष्ठोत्सर्गय
ज्ञाश्चदानश्राद्धादयस्तथा ॥ हृत्सन्धितःसमुत्पन्नाःसावित्रीयज्ञएवच ॥ २० ॥ सर्वेसांस्कारिकायज्ञाःप्रायश्चित्तकराश्चये ॥ तेमेढ्रसन्धितो
जातायज्ञास्तस्यमहात्मनः ॥ २१॥ रक्षःसत्रंसर्प्पसत्रंसर्वश्चैवाभिचारिकम् ॥ गोमेधोवृक्षयागश्चखुरेभ्योह्यभवन्निमे ॥ २२ ॥ मायेष्टिःपरमेष्टि
श्चगीष्पतिर्भोगसम्भवः ॥ लांगूलसन्धौसञ्जाताअग्नीषोमस्तथैवच ॥ २३ ॥ नैमित्तिकाःश्चयेयज्ञाःसंक्रान्त्यादौप्रकीर्तिताः ॥ लांगूलसन्धौ
तेजातास्तथाद्वादशवार्षिकम् ॥२४॥ तीर्थप्रयोगमाशौचंयज्ञःसंकर्षणस्तथा ॥ अर्कमाथर्वणश्चैवनाडीसन्धेःसमुद्गताः ॥२५॥ ऋचोत्कर्षःक्षे
त्रयज्ञःपञ्चमार्गातियोजनः॥लिंगसंस्थानहेरम्बयज्ञाजाताश्चजानुनि ॥२६॥ एवमष्टाधिकञ्जातंसहस्रन्द्विजसत्तमाः॥यज्ञानांसततँल्लोकायैर्भा
व्यन्तेधुनापिच॥२७॥स्रुगस्यपोत्रात्सञ्जातानासिकायाःस्रुवाभवम्॥अन्येस्रुक्स्रुवभेदायेतेजाताःपोत्रनासयोः॥२८॥ग्रीवाभागेनतस्याभूत्प्रा
ग्वंशोमुनिसत्तमाः॥इष्टापूर्तिर्यजुर्द्धर्मोजाताःश्रवणरन्ध्रतः॥२९॥दंष्ट्राभ्योह्यभवन्यूपाःकुशारोमाणिचाभवन्॥उद्गाताचतथाध्वर्युर्होताशामित्रमे
वच॥३०॥अग्रदक्षिणवामांगपश्चात्पादेषुसंगताः ॥ पुरोडाशाःसचरवोजातामस्तिष्कसञ्चयात् ॥३१॥ कषुर्नेत्रद्वयाज्जातायज्ञकेतुस्तथाखु
रात्॥मध्यभागोभवद्वेदीमेढ्रात्कुण्डमजायत ॥३२॥ रेतोभागात्तथैवाज्यंस्वधामन्त्राः समुद्गताः॥यज्ञालयःपृष्ठभागाद्धृत्पद्माद्यज्ञएवच॥३३॥

वितन्वानाःकालानलसमत्विषः ॥ ५३ ॥ पतितेषुवराहेषुब्रह्माविष्णुर्हरस्तथा ॥ सृष्ट्यर्थञ्चिन्तयामासुःपुनरेवसमागताः ॥ ५४ ॥ हर
स्यतुगणाःसर्वेतदाभर्गसमागताः ॥ उपतस्थुर्महाभागाश्चतुर्भागेनभाजिताः ॥ १५५ ॥ षट्त्रिंशत्सहस्राणिप्रमथाद्विजसत्तमाः ॥ तत्रै
कत्रसहस्राणिभागेषोडशसंस्थिताः ॥ ५६ ॥ नानारूपधरायेवैजटाचन्द्रार्द्धमण्डिताः ॥ तेसर्वेसकलैश्वर्ययुक्ताध्यानपरायणाः ॥५७॥योगि
नोमदमात्सर्यदम्भाहंकारवर्जिताः ॥ क्षीणपापामहाभागाःशम्भोःप्रीतिकराःपराः॥५८॥नतेपरिग्रहंरागंकांक्षन्तिस्मकदाचन॥ संसारविमुखाः
सर्वेयतयोयोगतत्पराः ॥ ५९ ॥ ध्यानावस्थम्महादेवम्परिवार्यधृतव्रताः ॥ कृत्वापरिषदंरुच्यातिष्ठन्तिविगतक्लमाः ॥६०॥ यदैवपरमञ्ज्यो
तिश्चिन्तयत्यम्बिकापतिः ॥ तदैवतेपारिषदाःसर्वेसंवेष्टयन्तितम् ॥ ६१ ॥ तेषोडशसमाख्याताःकोटयोयेयतव्रताः ॥ सिंहव्याघ्रादिसारूप्या
अणिमादिसमायुताः ॥ ६२ ॥ अपरेकामिनःशम्भोःसुनर्मसचिवाःस्मृताः ॥ विचित्ररूपाभरणाजटाचन्द्रार्द्धमण्डिताः ॥ ६३ ॥ हरस्यतु
ल्यरूपेणविशदावृषभध्वजाः ॥ उमासदृशरूपाभिःप्रमदाभिःसमागताः ॥ ६४ ॥ विचित्रमाल्याभरणादिव्यस्रग्गन्धभूषिताः ॥ उमासहायं
क्रीडन्तमनुगच्छन्तिभूषिताः ॥ १६५ ॥ शृंगारवेषाभरणाअष्टौतेकोटयोगणाः ॥ अर्द्धनारीश्वराश्चान्येह्यर्द्धनारीश्वरंहरम् ॥ ६६ ॥ ध्यान
स्थम्प्रविविशुस्तेतुल्यरूपाहरस्यये ॥ उमासहायोहियदारमतेससुखंहरः ॥ ६७ ॥ अर्द्धनारीशरीरास्तुद्वारपालाभवन्तिते ॥ आकशमार्गे
गच्छन्तमनुगच्छन्तिनित्यशः ॥ ६८ ॥ ध्यानस्थम्परिचर्यन्तिसालिलादिभिरीश्वरम् ॥ नानाशस्त्रधराःशम्भोर्गणास्तेप्रमथाःस्मृताः ॥६९॥
प्रमथन्तिचयुद्धेषुयुद्ध्यमानान्महाबलान् ॥ तेवैमहाबलाःशूराःसंख्ययानवकोटयः ॥ १७० ॥ अपरेगायनास्तालमृदंगपणवादिभिः ॥

नृत्यन्तिवाद्यंकुर्वन्तिगायन्तिमधुरस्वरम् ॥७१॥ नानारूपधरास्तेवैसंख्ययाकोटयस्त्रयः ॥ सततश्चानुगच्छन्तिविचरन्तम्महेश्वरम् ॥७२॥
सर्वेमायाविनःशूराःसर्वेशास्त्रार्थपारगाः ॥ सर्वेसर्वत्रसर्वज्ञाःसर्वेसर्वत्रगाःसदा ॥ ७३ ॥ मुहूर्त्तात्सर्वभुवनंगत्वायान्तिपुनर्भवम् ॥ अणिमा
द्यष्टकैश्वर्ययुक्तास्तेवैमहाबलाः ॥ ७४ ॥ अपरेरुद्रनामानोजटाचन्द्रार्द्धमण्डिताः ॥ देवेन्द्रस्यनियोगेनवर्त्तन्तेत्रिदिवेसदा ॥ १७५ ॥ तेषां
संख्याचैककोटिस्तेसर्वेबलवत्तराः ॥ कुर्वन्तिहिसदासेवांहरस्यसततंगणाः ॥ ७६ ॥ विस्मयन्तिचपापिष्ठान्धार्म्मिष्ठान्पालयन्तिच ॥ अनुगृ
ह्णन्तिसततन्धृतपाशुपतव्रतान् ॥ ७७ ॥ विघ्नाँश्चसततंघ्नन्तियोगिनाम्प्रयतात्मनाम् ॥ षट्त्रिंशत्कोटयश्चैतेहरस्यसकलागणाः ॥ ७८ ॥
वराहगणनाशार्थंहितायजगतांतथा ॥ शंकरस्याथसेवायैसमुत्पन्नाइमेगणाः ॥ ७९ ॥ वराहस्यगणान्दृष्ट्वानरसिंहन्तथाहरिम् ॥ स्वयंशरभ
रूपःसन्ध्यायन्नादंयदाकरोत् ॥ १८० ॥ तच्छीकराद्यतोजातास्तत्तेषाम्बहुरूपता ॥ क्रूरदृष्ट्याक्रूरयुद्धैःक्रूरकृत्यैरिमान्गणान् ॥ ८१ ॥ वराह
स्यघ्नतेत्येवंयतःप्रोक्तंकपर्दिना ॥ अतस्तेक्रूरकर्माणःप्रजाताश्चभयंकराः ॥ ८२ ॥ नसदाक्रूरकर्माणितेकुर्वन्तिमहौजसः ॥ दृष्टिमात्रस्यते
क्रूराःक्रूरास्तेनतुकार्यतः ॥ ८३ ॥ फलञ्चलन्तथापुष्पम्पत्रम्मूलन्तथैवच ॥ निवेदितानिभुञ्जन्तिवनपर्वतसानुषु ॥८४॥ आहृत्यापिचभुञ्ज
न्तिपत्रम्पुष्पादिकञ्चयत् ॥भवेद्भगंस्ययद्भोग्यन्तद्भोग्यास्तेमहौजसः॥१८५॥आमिषाणिचनाश्नन्तिहित्वाचैत्रचतुर्दशीम् ॥ तत्रामिषंहरोभुंक्ते
चतुर्दश्याम्मधौसदा॥८६॥ततःसर्वेगणास्तत्रभुञ्जन्तिपललान्यपि॥हतेवराहस्यगणेभर्गमासाद्यतेगणाः ॥८७॥चतुर्भागाःस्वयम्भूत्वाभूतकर्मे
तिवैजगुः॥भूतत्वमभवत्तेषाञ्चतुर्भागवतान्तदा॥८८॥वचनात्पद्मयोनेस्तुभूतग्रामास्ततोमताः॥योलोकविदितःपूर्वम्भूतग्रामश्चतुर्विधः ॥८९॥

तदात्मायज्ञपुरुषोमुञ्जाः कक्षात्समुद्गताः ॥ एवंयावन्तियज्ञानाम्भाण्डानिचहवींषिच ॥ ३४ ॥ तानियज्ञवराहस्यशरीरादेवचाभवन् ॥ एवं
यज्ञवराहस्यशरीरंयज्ञतामगात् ॥ ३५ ॥ यज्ञरूपेणसकलमाप्यायितुमिदञ्जगत् ॥ एवंविधाययज्ञन्तुब्रह्मविष्णुमहेश्वराः ॥ ३६ ॥ सुवृत्त
ङ्गनकंघोरमासेदुर्यज्ञतत्पराः ॥ ततस्तेषांशरीराणिपिण्डीकृत्यपृथक्पृथक् ॥३७॥ त्रिदेवास्त्रिशरीराणिव्यधमन्मुखवायुभिः ॥ सुवृत्तस्यशरी
रन्तुव्यधमन्मुखवायुना ॥ ३८ ॥ स्वयमेवजगत्स्रष्टादक्षिणाग्निस्ततोभवत् ॥ कनकस्यशरीरन्तुध्मापयामासकेशवः ॥ ३९ ॥ ततोभूद्गार्ह
पत्याग्निःपञ्चवैतानभोजनः ॥ घोरस्यतुवपुःशम्भुर्ध्मापयामासवैस्वयम् ॥ ततआहवनीयोग्निस्तत्क्षणात्समजायत ॥ ४० ॥ एतैस्त्रिभिर्जग
द्व्याप्तन्त्रिमूलंसकलञ्जगत् ॥ एतद्यत्रत्रयन्नित्यन्तिष्ठतिद्विजसत्तमाः ॥ ४१ ॥ समस्तादेवतास्तत्रवसन्त्यनुचरैःसह ॥ एतद्भद्रपदन्नित्यमे
तदेवत्रयात्मकम् ॥ ४२ ॥ एतत्त्रयीविधिस्थानमेतत्पुण्यकरम्परम् ॥ यस्मिञ्जनपदेचैतेहूयन्तेवह्नयस्त्रयः ॥ ४३ ॥ तस्मिञ्जनपदेनित्यञ्चतु
र्वर्गोविवर्द्धते ॥ एतद्वःकथितंसर्वंयत्पृष्टोहन्द्विजोत्तमाः ॥ ४४ ॥ यथायज्ञवराहस्यदेहोयज्ञत्वमाप्तवान् ॥ यथाचतस्यपुत्राणान्देहतोवह्नयो
भवन् ॥ ४५ ॥ इतिश्रीकालिकापुराणेद्वात्रिंशोध्यायः ॥ ३२ ॥ मार्कण्डेयउवाच ॥ अकालिकोयम्प्रलयोयतोभगवताकृतः ॥ तच्छृण्व
न्तुमहाभागावाराहंलोकसंक्षयम् ॥ १ ॥ यथावामत्स्यरूपेणवेदास्त्राताश्चशार्ङ्गिणा ॥ तदहंसम्प्रवक्ष्यामिसर्वपापप्रणाशनम् ॥ २ ॥
पुरामहामुनिःसिद्धः कपिलोविष्णुरीश्वरः ॥ साक्षात्स्वयंहरिर्योसौसिद्धानामुत्तमोमुनिः ॥ ३ ॥ ध्यायतःसिद्धमित्येवंसर्वज्ञगदिदंस्वतः ॥
यतोजातोहरेःकायात्कपिलस्तेनसस्मृतः ॥ ४ ॥ सएकदापुराभूत्वामनोःस्वायम्भुवेन्तरे ॥ स्वायम्भुवम्मनुंवाक्यम्मुनिवर्योब्रवीदिदम् ॥

॥ ५ ॥ कपिलउवाच ॥ स्वायम्भुवमुनिश्रेष्ठब्रह्मरूपमहामते ॥ ममैवमीप्सितार्थन्त्वन्दोहिप्रार्थयतोधुना ॥ ६ ॥ जगत्सर्वन्तवैवेदन्त्वयाचपे
रिपालितम् ॥ त्वयासर्वञ्जगत्सृष्टन्त्वमेवजगताम्पतिः ॥ ७ ॥ स्वर्गेपृथिव्याम्पातालेदेवमानुषजन्तुषु ॥ त्वम्प्रभुर्वरदोगोप्तात्वम
वैकःसनातनः ॥ ८ ॥ त्वंवैधाताविधाताचत्वंहिसर्वेश्वरेश्वरः ॥ त्वयिप्रतिष्ठितंसर्वंसततम्भुवनत्रयम् ॥ ९ ॥ तपस्यतोयत्रसमम्प्र
तिभास्यतिसोनुगम् ॥ कार्यकारणतत्त्वौघसहितानिजगन्तिवै ॥ १० ॥ तन्मेदेहिरहःस्थानान्त्रिषुलोकेषुदुर्लभम् ॥ पुण्यम्पापहरं
रम्यञ्ज्ञानप्रभवमुत्तमम् ॥ ११ ॥ अहंहिसर्वभूतानाम्भूत्वाप्रत्यक्षदर्शीवान् ॥ उद्धरिष्येजगज्जातन्निर्मायज्ञानदीपिकाम् ॥ १२ ॥
अज्ञानसागरेमग्नमधुनासकलञ्जगत् ॥ ज्ञानप्लवम्प्रदायाहन्तारयिष्येजगत्त्रयम् ॥ १३ ॥ एतस्मिन्मामभवान्तसम्यगुपपन्नमिहेच्छति ॥
त्वन्नोनाथश्चपूज्यश्चपालकश्चजगत्प्रभो ॥ १४ ॥ इत्येवमुक्तःसमनुःकपिलेनमहात्मना ॥ प्रत्युवाचमहात्मानङ्कपिलंसंशितव्रतम् ॥
॥ १५ ॥ ॥ मनुरुवाच ॥ ॥ यदित्वयाखिलजगद्धितार्थञ्ज्ञानदीपिकाम् ॥ चिकीर्षुणायतःकार्याङ्किंस्थानार्थनयातव ॥ १६ ॥ हिर
ण्यगर्भःसुमहत्तपस्तेपेपुराद्भुतम् ॥ समेययाचेतपसेस्थानङ्कस्मैनचद्विज ॥ १७ ॥ शम्भुःसम्भोगरहितोदेवमानेनवत्सरान् ॥ अयुतानितप
स्तेपेसोपिस्थानन्नचैक्षत ॥ १८ ॥ देवेन्द्रोवीतिहोत्रश्चशमनोरक्षसाम्पतिः ॥ यादःपतिर्मातरिश्वाधनाध्यक्षस्तथैवच ॥ १९ ॥ एतेतेपुस्तप
स्तीव्रन्दिक्पालत्वमभीप्सवः ॥ स्थानन्नमार्गयामासुःकिञ्चनापिमहामुने ॥ २० ॥ देवागाराणितीर्थानिक्षेत्राणिसरितस्तथा ॥ बहूनिपुण्यभा

ञ्ज्यत्रतिष्ठन्तिकपिलाक्षितौ ॥ २१ ॥ तेषामेकतमन्त्वञ्चेदासाद्यकुरुषेतपः ॥ स्थानम्ब्रह्मँस्तपःसिद्धिर्न्नभविष्यतितत्रकिम् ॥ २२ ॥ मत्त
स्स्थानार्थनातावत्केवलन्तेविकत्थनम् ॥ अयंविकत्थनोधर्म्योयुज्यतेनतपस्विनाम् ॥२३॥ ॥ मार्कण्डेयउवाच ॥ एतच्छ्रुत्वावचस्तस्य
मनोःस्वायम्भुवस्यतु ॥ चुकोपकपिलःसिद्धःप्रोवाचचतदामनुम् ॥ २४ ॥ ॥ कपिलउवाच ॥ ॥ त्वयिविश्रम्भमाधायतपसःसिद्धयोचि
रात् ॥ स्थानम्मयाप्रार्थितन्तेतन्मांक्षिपसिहेतुभिः ॥ २५॥ अनेनात्युग्रवचसातवैवाहन्नचक्षमे ॥ स्वयन्त्रिभुवनाध्यक्षइतितेगर्वईदृशः॥२६॥
अक्षम्यन्तेवचोमेद्यप्रार्थनायांविकत्थनम् ॥ यत्त्वंवदसितस्यत्वम्फलमेतदवाप्नुहि ॥२७॥ इदन्त्रिभुवनंसर्वंसदेवासुरमानुषम् ॥ हतप्रहतविध्व
स्तमचिरेणभविष्यति ॥ २८ ॥ येनेयमुद्धृतापृथ्वीयेनवास्थापितापुनः ॥ योवास्याअन्नकर्त्तास्याद्योवास्याःपरिरक्षकः ॥ २९ ॥ तएवसर्वे
हिंसन्तुसकलंसचराचरम् ॥ नचिराद्द्रक्ष्यसिमनोजलपूर्णञ्जगत्त्रयम् ॥ ३० ॥ हतप्रहतविध्वस्तन्तवगर्वविशातनम् ॥ एवमुक्त्वामुनीन्द्रोसौ
कपिलस्तपसान्निधिः ॥ ३१ ॥ अन्तर्द्धेजगामापितदाब्रह्मसदोमुनिः ॥ कपिलस्यवचःश्रुत्वाविषण्णवदनोमनुः ॥ ३२ ॥ भावीतिप्रतिपद्या
शुमनुर्नोवाचाकिञ्चन ॥ ततःस्वायम्भुवोधीमांस्तपसेधृतमानसः ॥ ३३ ॥ हितायसर्वजगतान्दिदृक्षुर्गरुडध्वजम् ॥ विशालाम्बदरींया
तोगंगाद्वारान्तिकंखलु ॥ ३४ ॥ तत्रगत्वाजगद्धर्त्तामनुः स्वायम्भुवः स्वयम् ॥ ददर्शबदरीन्तत्रपुण्याम्पापप्रणाशिनीम् ॥३५॥सदाफलवती
न्नित्यम्मृदुशाद्वलमञ्जरीम् ॥ सुच्छायाम्मसृणांशीर्णशुष्कपत्रविवर्जिताम् ॥३६॥गंगातोयौघसंसिक्तशिखामूलान्तराखिलाम् ॥ उपास्यमानां

१ बहुवचनमुद्धारकादिबहुत्वात् ।

सततन्नानामुनितपोधनैः॥३७॥ तत्स्थानंसर्वतोभद्रन्नानाभृंगगणान्वितम् ॥ फुल्लारविन्दसलिलंरमणीयंवृषप्रदम् ॥ ३८ ॥ प्रविश्यतपसेयत्न
मकरोल्लोकभावनः ॥ सभूत्वानियताहारः परमेणसमाधिना ॥ ३९ ॥ आराधयामासहरिञ्जगत्कारणकारणम् ॥ सर्वेषाञ्जगतान्नाथन्नीलमे
घाञ्जनप्रभम् ॥ ४० ॥ शङ्खचक्रगदापद्मधरंकमललोचनम् ॥ पीताम्बरधरन्देवंगरुडोपरिसंस्थितम् ॥ ४१ ॥ जगन्मयंलोकनाथंव्यक्ता
व्यक्तस्वरूपिणम् ॥ जगद्बीजंसहस्राक्षंसहस्रशिरसम्प्रभुम् ॥ ४२ ॥ सर्वव्यापिनमाधारन्नारायणमजंविभुम् ॥ जपन्नेतत्परम्मन्त्रंसर्ववेद
मयम्मनुः ॥ ४३ ॥ हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे ॥ ॐनमोवासुदेवायशुद्धज्ञानस्वरूपिणे ॥ ४४ ॥ इतिजप्यम्प्रजपतोमनोः स्वाय
म्भुवस्यतु ॥ प्रससादजगन्नाथः केशवोनचिरादथ ॥४५॥ ततः क्षुद्रझषोभूत्वादूर्वादलसमप्रभः ॥ कर्पूरकलिकायुग्मतुल्यनेत्रयुगोज्ज्वलः ॥
॥ ४६ ॥ तपस्यन्तम्महात्मानम्मनुंस्वायम्भुवम्मुनिम् ॥ आससादतदाक्षुद्रमत्स्यरूपीजनार्दनः ॥ ४७ ॥ उवाचचमहात्मानम्मनुंस्वा
यम्भुवन्तथा ॥ सुसन्त्रस्तं स कारुण्ययुक्तम्भीतिसगद्गदम् ॥ ४८ ॥ तपोनिधेमहाभागभीतम्मान्त्रातुमर्हसि ॥ नित्यमुद्वेजितम्मत्स्यैर्वि
शालैर्भक्षितुम्प्रति ॥ ४९ ॥ प्रत्यहम्माम्महाभागमीनाधावन्तिभक्षितुम् ॥ समन्ततोधिकाहन्तुत्वन्नाथोगोपितुंक्षमः ॥ ५० ॥ अद्यप्रभृतै
र्विपुलैर्दारितः पृथुरोमभिः ॥ विश्रान्तोहंक्षुद्रतरानचशक्तः पलायने ॥ ५१ ॥ प्राणाकांक्षीमहात्मानम्भवन्तंशरणम्मुनिम् ॥ प्राप्तोहञ्चे
दनुक्रोशस्तेस्तिमाम्प्रतिपालय ॥ ५२ ॥ भयोद्भ्रान्तमनाश्चाहंवृक्षच्छायाश्चचञ्चलाम् ॥ दृष्ट्वाचलतरंगांश्चमत्स्यादिवाबिभेम्यहम् ॥ ५३ ॥
॥ मार्कण्डेयउवाच ॥ ॥ इतितस्यवचःश्रुत्वामनुः स्वायम्भुवस्ततः ॥ कृपयापरयायुक्तःप्रोचेहंरक्षितातव ॥ ५४ ॥ ततःकरोदरेतोय

मादायाधायतत्रतम् ॥ समक्षंक्षुद्रमत्स्यस्यविहारंसमलोकयत् ॥ ५५ ॥ ततोदयालुःसमनुस्तम्मत्स्यञ्चारुरूपिणम् ॥ अलिञ्जरेतोयपूर्णे न्यधाद्विपुलभोगिनि ॥ ५६ ॥ सतस्मिन्मणिकेमत्स्योवर्द्धमानोदिनेदिने ॥ सामान्यरोहितप्रायदेहोभून्नचिरादथ ॥ ५७ ॥ दशघटजलपूर्णम्प्रत्यहंसमहात्मामणिकंकमतिकुर्वन्वर्द्धयामासमत्स्यम् ॥ सचसुविशदनेत्रोमत्स्यबालोचिरेण मणिकसलिलमध्येलोमशःपीनदेहः ॥ ५८ ॥ इतिश्रीकालिकापुराणेत्रयस्त्रिंशोध्यायः ॥ ३३ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ तन्तथापीवरतनुन्दृष्ट्वामत्स्यम्मनुःस्वयम् ॥ गृहीत्वापाणिनाफुल्लनलिनांसरसींययौ ॥ १ ॥ तत्सरस्तत्रविपुलम्पुण्येनारायणाश्रमे ॥ एकयोजनविस्तीर्णंसार्द्धयोजनमायतम् ॥ ॥ २ ॥ नानामीनगणोपेतंशीतामलजलोत्करम् ॥ तदासाद्यसरोमत्स्यांविनिधायमनुस्तदा ॥ ३ ॥ पालयामासमुतवत्कृपयापरयायुतः ॥ सोचिरेणैवकालेनपीनोवैसारिणोभवत्॥४॥नममौतत्रसरसिबृहत्त्वाद्द्विजसत्तमाः॥सएकदामहामत्स्यःपूर्वापरतटद्वये ॥५॥ शिरःपुच्छेनिधायाशुतुंगदेहःसमुच्छ्रितः॥स्वायम्भुवम्महात्मानञ्चुक्रोशत्राहिमामिति॥६॥तन्तथासमनुर्ज्ञात्वाक्रोशन्तंस्थूलपुच्छकम् ॥ आससादतदामत्स्यञ्ग्राहचक्रेणतम् ॥७॥ नशक्नोम्यहमुद्धर्त्तुम्पृथुरोमाणमद्भुतम् ॥ इतिसञ्चिन्तयन्नेवप्रोद्धारकरेणतम् ॥८॥ भगवानपिविश्वात्मामत्स्यरूपीजनार्दनः ॥ स्वायम्भुवकरम्प्राप्यलघिमानमुपाश्रयत् ॥ ९ ॥ ततःकराभ्यामुद्धृत्यस्कन्धेकृत्वातुतम्मनुः ॥ निनायसागरन्तत्रतोयेचनिदधेततः ॥१०॥ यथेच्छमत्रवर्द्धस्वनकोपित्वांवधिष्यति ॥ अचिरेणैवसम्पूर्णदेहत्वंसमवाप्नुहि ॥ ११ ॥ इत्युक्त्वासमहाभागःसर्वप्राणभृतांवरः ॥

---

१ अलिञ्जरःमृदादिघटितजलपात्रविशेषः । २ अलिञ्जरे । ३ प्रशंसायांकन् ।

लघुत्वञ्चिन्तयँस्तस्यविस्मयम्परमंगतः ॥ १२ ॥ मत्स्योपिनचिरादेवपूर्णकायस्तदामहान् ॥ सर्वतःपूरयांमासदेहाभोगेनसागरम् ॥ १३ ॥
तम्पूर्णकायमालोक्यव्यतीत्याम्भःसमच्छ्रितम् ॥ शिलाभिर्निचितस्फीतम्मानसाचलसन्निभम् ॥ १४ ॥ रुन्धन्तंसागरंसर्वंदेहाभोगाचलीकृ
तम् ॥ स्वायम्भुवोमनुर्द्धीमान्मेनेमत्स्यन्नतन्तदा ॥ १५ ॥ ततःपप्रच्छतंसाम्नामत्स्यंस्वायम्भुवोमनुः ॥ विचिन्त्यलघिमानञ्चपश्यन्मूर्त्ति
न्तदाद्भुताम् ॥ १६ ॥ ॥ मनुरुवाच ॥ ॥ नत्वाम्मत्स्यमहम्मन्येकस्त्वम्मेवदसत्तम ॥ महत्त्वंलघिमानन्तोचिन्तयन्त्सुमहत्तर ॥
॥ १७ ॥ त्वम्ब्रह्माह्यथवाविष्णुःशम्भुर्वामीनरूपधृक् ॥ नचेद्गुह्यम्महाभागतन्मेवदमहामते ॥ १८ ॥ ॥ मत्स्यउवाच ॥ ॥ आराध्यो
हन्त्वयानित्यंयोहरिःससनातनः ॥ तवेष्टकामसिद्ध्यर्थम्प्रादुर्भूतःसमाहितः ॥ १९ ॥ यत्त्वमिच्छसिभूतेशमत्तस्त्वम्मीनमूर्तितः ॥ तत्करि
ष्येऽद्यताम्मूर्त्तिमिमांविद्धिमनोमम ॥ २० ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इतितस्यवचःश्रुत्वाविष्णोरमिततेजसः ॥ ज्ञात्वाप्रत्यक्षतोवि
ष्णुम्मनुस्तुष्टावकेशवम् ॥ २१ ॥ ॥ मनुरुवाच ॥ ॥ नमस्तेजगदव्यक्तपरापरपतेहरे ॥ पावकादित्यशीतांशुनेत्रत्रयधराव्यय ॥
॥ २२ ॥ जगत्कारणसर्वज्ञजगद्धामहरेपर ॥ परापरात्मरूपात्मन्पारिणाम्पारकारण ॥ २३ ॥ आत्मानमात्मनाधृत्वाधरारूपधरोहरे ॥ बि
भर्षिसकलाल्लोकानाधारात्मँस्त्रिविक्रम ॥ २४ ॥ सर्ववेदमयश्रेष्ठधामधारणकारण ॥ सुरौघपरमेशाननारायणसुरेश्वर ॥ २५ ॥ अयोनि
स्त्वञ्जगद्योनिरपादस्त्वंसदागतिः ॥ त्वन्तेजःस्पर्शहीनश्चसर्वेशस्त्वमनीश्वरः ॥ २६ ॥ त्वमनादिः समस्तादिस्त्वन्नित्यानन्तरोन्तरः ॥ यद्धै

१ आभोगः परिपूर्णता । देहपूर्णतयेत्यर्थः ।

ममण्डञ्जगताम्बीजम्ब्रह्माण्डसञ्ज्ञितम् ॥ २७ ॥ तद्बीजम्भवतस्तेजस्त्वयोक्तंसलिलेषुच ॥ सर्वाधारोनिराधारोनिर्हेतुःसर्वकारणम् ॥ २८॥
नमोनमस्तेविश्वेशलोकानाम्प्रभवप्रभो ॥ सृष्टिस्थित्यन्तहेतुस्त्वंविधिविष्णुहरात्मधृक् ॥ २९ ॥ यस्यतेदशधामूर्तिरूर्म्मिषट्कादिवर्ज्जिता ॥
ज्योतिःपतिस्त्वमम्भोधिस्तस्मैतुभ्यन्नमोनमः ॥ ३० ॥ कस्तेभावंवक्तुमीशःपरेशस्थूलात्स्थूलोयोणुरूपोर्थवर्गात् ॥ तस्मैनित्यम्मेनमोस्त्व
द्ययोभूदादित्यवर्णन्तमसः परस्तात् ॥ ३१ ॥ सहस्रशीर्षापुरुषःसहस्रपात्सहस्रचक्षुः पृथिवींसमन्ततः ॥ दशांगुलंयोहिसमेत्यतिष्ठत्समेप्रसी
दत्विहविष्णुरुग्रः ॥ ३२ ॥ नमस्तेमीनमूर्तेहेनमस्तेभगवन्हरे ॥ नमस्तेजगदानन्दनमस्तेभक्तवत्सल ॥ ३३ ॥ ॥ मार्कण्डेयउवाच ॥
स्वायम्भुवेनमनुनासंस्तुतोमत्स्यरूपधृक् ॥ वासुदेवस्तदाप्राहमेघगम्भीरनिःस्वनः ॥ ३४ ॥ ॥ भगवानुवाच ॥ ॥ तुष्टोस्मितपसातेद्य
भक्त्याचापिस्तुतोमुहुः ॥ सपर्ययाचदानेनवरंवरयसुव्रत ॥ ३५ ॥ इष्टार्थंसम्प्रदास्यामितुभ्यन्नात्रविचारणा ॥ वरयस्वेप्सितान्कामाँल्लोका
नांवाहितञ्चयत् ॥ ३६ ॥ ॥ मनुरुवाच ॥ ॥ यदिदेयोवरोमेद्यलोकानांयोहितोभवेत् ॥ तन्मेदेहिवरंविष्णोतंवक्ष्यामिशृणुष्वमे ॥३७॥
शशापकपिलःपूर्वम्ममदर्थेभुवनत्रयम् ॥ हतप्रहतविध्वस्तंसकलन्तेभवेदिति ॥ ३८ ॥ येनेयमुद्धृतापृथ्वीयेनेयम्प्रतिपालिता ॥ संहरिष्यतिय
स्त्वेनान्तेधुनाप्लावयन्त्विमाम् ॥ ३९ ॥ ततोहन्दीनहृदयस्त्वामेवशरणंगतः ॥ नयथेदन्त्रिभुवनम्भविष्यतिजलप्लुतम् ॥ ४० ॥ हतप्रहतवि
ध्वस्तन्तथात्वन्देहिमेवरम् ॥ ॥ भगवानुवाच ॥ ॥ नमत्तःकपिलोभिन्नस्तथानकपिलादहम् ॥ ४१ ॥ यदुक्तन्तेनमुनिनामयोक्तंवि
द्धितन्मनो ॥ तस्माद्यदुदितन्तेनतत्सत्यन्नान्यथाभवेत् ॥ ४२ ॥ करिष्येतत्रसाहाय्यंस्वायम्भुवनिबोधतत् ॥ हतप्रहतविध्वस्तेतोयमग्रेज

गत्रये ॥ ४३ ॥ नचिरादेवतत्तोयंशोषयिष्यामिवैमनो ॥ यावज्जलप्लवस्तावद्यथाकार्यन्त्वयामनो ॥ ४४ ॥ तन्मेनिगदतःपथ्यं
शृणुष्वावहितोधुना ॥ सर्वयज्ञियकाष्ठौघैरेकानौकाविधीयताम् ॥ ४५ ॥ तामहन्द्रढयिष्यामियथानोभिद्यतेजलैः ॥ दशयोजन
विस्तीर्णांत्रिंशद्योजनमायताम् ॥ ४६ ॥ धारिणींसर्वबीजानाम्भुवनत्रयवर्द्धिनीम् ॥ सर्वयज्ञियवृक्षाणाम्भूरिबल्वलतन्तुभिः ॥ ४७ ॥
नवयोजनदीर्घान्तुव्यामत्रयसुविस्तृताम् ॥ कुरुष्वत्वम्मनोतूर्णम्बृहतीमीरिकांवटीम् ॥ ४८ ॥ जगद्धात्रीजगन्मायालोकमाताजग
न्मयी ॥ द्रढयिष्यतितांरज्जुन्नत्रुटयातियथातथा ॥ ४९ ॥ सर्वाणिबीजान्यादायसवेदान्त्सप्तवैऋषीन् ॥ तस्यान्नाविनिषण्णस्त्वंव
र्त्तमानेजलप्लवे ॥ ५० ॥ दक्षेणसहसंगम्यस्मारिष्यसिमनोमम ॥ स्मृतोहन्तूर्णमायास्येभवतोनिकटम्प्रति ॥ ५१ ॥ श्यामलेनाथशृंगेणत्व
म्माञ्ज्ञास्यसिवैतदा ॥ यावत्प्रहतविध्वस्तहतंस्याद्भुवनत्रयम् ॥ ५२ ॥ तावत्पृष्ठेनतान्नावंवोढाहन्नात्रसंशयः ॥ जलप्लुतेतुसम्पूर्णेशृङ्गेममच
तान्तारिम् ॥ ५३ ॥ त्वन्तदावटीरिकयासन्धानिष्यसिवैदृढम् ॥ बद्धायान्नाविमेशृंगेदेवमानेनवत्सरान् ॥ ५४ ॥ सहस्रम्प्रेरयिष्यामितान्ना
वंशोषयञ्जलम् ॥ ततःशुष्केषुतोयेषुप्रोत्तुंगेशिखरेगिरेः ॥ ५५ ॥ हिमाचलस्यबद्धाहन्तस्मिन्नावमहम्मनो ॥ तांवैगोपायितानित्यांयावद्भूःशो
षयेज्जलम्॥५६॥चिन्तितोहन्त्वयाप्राप्स्येयदाहिनिकटन्तव॥शृंगेणश्यामलेनैवत्वम्माञ्ज्ञास्यसिपुष्करे ॥५७॥ पुनःसृष्टिन्ततःकृत्वामत्प्रसा
दान्महामते ॥ त्रैलोक्यदुर्लभामृद्धिमवाप्स्यसिसनातनीम् ॥५८॥ अहमाराधितोयेनजप्येनभवतामनो ॥ सर्वसिद्धिर्भवेत्तस्ययस्तोषयातिते

१ व्यामोबाहोःसकरयोरित्यमरः । २ वटीरज्जुः ।

नमाम् ॥५९॥मार्कण्डेयउवाच॥इतिदत्त्वावरन्तस्मैमत्स्यस्तेननमस्कृतः॥अन्तर्दधेजगन्नाथोलोकानुग्रहकारकः ॥६०॥ स्वायम्भुवोपिभगवा
नन्तर्द्धानंगतेहरौ ॥ यथोक्तंहरिणापूर्वन्नावंरज्जुन्तथाकरोत् ॥ ६१ ॥ सर्वंयज्ञियवृक्षौघाञ्छित्वास्वायम्भुवस्तदा ॥ उद्धृत्यकारयामासवास्या
दिभिरसौतीरम् ॥ ६२ ॥ तेषांवल्कलमुद्धृतसूत्रसंघैर्वटीरिकाम् ॥ पूर्वोक्तेनप्रमाणेनकारयामासवैमनुः॥६३॥ततःकालेनमहतावृत्तंयुद्धम्महाद्भु
तम् ॥ विष्णोर्यज्ञवराहस्यशरभस्यहरस्यच ॥ ६४ ॥ ततोजलप्लुवेजातेविध्वस्तेभुवनत्रये ॥ तयारज्ज्वातरिम्बद्धाबीजान्यादायसर्वशः ॥
॥ ६५ ॥ वेदानृषींस्तदासप्तदशश्चादायवैमनुः ॥ तस्यान्नाविसमाधायतोयमग्रेचराचरे ॥ ६६ ॥ स्वायम्भुवस्तदामत्स्यंहरिंसस्मारनौगतः ॥
ततोजलानामुपरिसशृंगइवपर्वतः ॥ ६७ ॥ उदितश्चैकशृंगेणविष्णुर्म्मत्स्यस्वरूपधृक् ॥ आगतस्तत्रनाचिराद्यत्रास्तेतारिणांमनुः ॥ ६८ ॥
तरिमारुह्यविपुलेतोयराशौभयङ्करे ॥ यावच्चलाचलन्तोयन्तावत्पृष्ठेतारिन्यधात् ॥ ६९ ॥ जलेप्रकृतिमापन्नेशृंगेबद्ध्वावटीरिकाम् ॥ तान्नावन्नो
दयामाससहस्रन्दैववत्सरान् ॥ ७० ॥ स्त्रयन्नावमवष्टभ्यदधारपरमेश्वरः ॥ योगनिद्राजगद्धात्रीसमासीदद्वटीरिकाम् ॥ ७१ ॥ ततः शनैः
शनैस्तोयेशोषंगच्छतिवैचिरात् ॥ पश्चिमंहिमवच्छृंगंसुमग्नन्तोयमध्यतः ॥ ७२ ॥ द्वेसहस्रेयोजनानामुच्छ्रितस्यहिमप्रभोः ॥ पञ्चाशत्तुसह
स्राणिशृंगन्तत्तस्यचोच्छ्रितम् ॥ ७३ ॥ तस्मिञ्छृंगेततोनावम्बद्धामत्स्यात्मधृग्घरिः ॥ जगामशोषणायाशुजलानाञ्जगताम्पतिः ॥ ७४ ॥
एवंहिमत्स्यरूपेणवेदास्त्राताश्चशार्ङ्गिणा ॥ कपिलस्यतुशापेनकृतआकालिकोलयः ॥ ७५ ॥ अकालिकोयम्प्रलयोयतोभगवताकृतः ॥

१ आर्षोनाभावः ।

इतिवः कथितंसर्वंयथावद्द्विजसत्तमाः ॥ ७६ ॥ इतिश्रीकालिकापुराणेचतुस्त्रिंशोध्यायः ॥ ३४ ॥ मार्कण्डेयउवाच ॥ ॥ ७ ॥ ॥
यथापुनरभूत्सृष्टिरकालप्रलयेगते ॥ येनचैवोद्धृतापृथ्वीतच्छृण्वन्तुद्विजोत्तमाः ॥ १ ॥ व्यतीतेप्रलयेविष्णुः कूर्मरूमीमहाबलः ॥ पृष्ठेनिधा
यपृथिवीमुद्धृत्याथसपर्वताम् ॥ २ ॥ समाश्चकारसकलाम्पूर्ववत्परमेश्वरः ॥ शरभस्यवराहस्यतत्पत्राणाम्पदक्रमैः ॥ ३ ॥ यत्रभूमिर्विशी
र्णाभूत्तांसमांकमठोकरोत् ॥ कृत्वासमन्ततोभूमिम्पूर्ववत्परमेश्वरः ॥ ४ ॥ अनन्तन्धारयामासपृथिवीतलसंश्रितम् ॥ ततोब्रह्माचविष्णुश्च
हरश्चपरमेश्वरः ॥ ५ ॥ नावोदरस्थान्तसप्तमुनीन्मनुंस्वायम्भुवन्तदा ॥ नरनारायणौचौभौदक्षश्चोचुः समागताः ॥ ६ ॥ शृण्वन्तुमुनयः
सर्वेनरनारायणौतथा ॥ दक्षस्वायम्भुवमनोवयम्ब्रूमोधुनाचयत् ॥ ७ ॥ सृष्टिर्नष्टावराहस्यशरभस्यचसंगरात् ॥ अतोस्माकंयथाकार्य्यासृष्टि
राकर्ण्यतन्तुतत् ॥ ८ ॥ नरनारायणावेतौसृष्ट्यर्थंसमुपस्थितौ ॥ संस्थापनायदेवानाम्परमन्तप्यतान्तपः ॥ ९ ॥ आप्याय्यतपसा
चोभौजनलोकगतान्त्सुरान् ॥ आनयन्त्वपराञ्च्छश्वत्संसृजन्तुगणान्बहून् ॥ १० ॥ नक्षत्राणिग्रहाँश्चैवतेषांस्थानानिवैमुने ॥ एतयोस्तप
सायान्तुस्थिरताम्पूर्ववन्मनो ॥ ११ ॥ सूर्यस्यरथसंस्थानन्तथाचन्द्ररथस्थितम् ॥ करोत्वयम्महाभागः स्वयमेवजनार्दनः ॥ १२ ॥
पृथिव्यांसर्वबीजानिस्वायम्भुवमनोत्वया ॥ उप्यन्तांसर्वतःसस्यपूर्णाभवतुमेदिनी ॥ १३ ॥ प्ररोहयौषधीर्वृक्षाल्लँतावल्लीश्चसर्वतः ॥
स्वायम्भुवमहान्त्येतत्प्रातान्यृतुफलानिच ॥ १४ ॥ दक्षःसप्तमुनीन्द्रैस्तुयज्ञेनयजतांहरिम् ॥ वराहपुत्रदेहोत्थमग्नित्रयामिदंयजन् ॥ १५ ॥

१ नावोदरस्थानित्यत्रयत्वयलोपयोःसतोरार्षत्वात्सन्धिः ।

असौयज्ञोवराहस्यदेहाज्जातस्तुसृष्टये ॥ अनेनैवतुयज्ञेनदक्षःसृष्टिन्तनोत्विमाम् ॥ १६ ॥ नरनारायणाभ्यान्तुमुनिभिः सप्तभिस्तथा ॥
दक्षेणभवताचापियज्ञेनैभिस्तथाग्निभिः ॥ १७ ॥ सम्पूर्यतामियंसृष्टिःस्वर्गेभुविरसातले ॥ वयञ्चसृष्टिमाप्याय्ययथासम्पद्यतेत्वियम् ॥
॥ १८ ॥ यतिष्यामस्तथानित्यंयूयंकुरुतसर्ज्जनम् ॥ ततःसम्पद्यतांसृष्टिर्यथापूर्वन्तथैवच ॥ १९ ॥ प्रथमन्त्वन्तुबीजानिप्ररोहयम
नोधुना ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्यादिश्यमहाभागाविधिविष्णुवृषध्वजाः ॥ २० ॥ यथास्थानंस्थापयितुम्पर्वतान्प्रययुस्ततः ॥
मेरुमन्दरकैलासहिमवत्प्रभृतिष्वथ ॥ २१ ॥ पुराणिसर्वदेवानान्तेवैचक्रुःपृथक्पृथक् ॥ परित्यज्यततोनावथधृत्यवसुन्धराम् ॥ २२ ॥ स्वा
यम्भुवःक्षितौबीजान्यवपत्सर्वसम्पदे ॥ ततोवृक्षलतावल्लीगुल्मानिचवनानिच ॥ २३ ॥ बालसस्यानिधान्यानितथैवौषधयःसमाः॥ बीजका
ण्डप्ररोहाश्चप्रतानाजलजानिच ॥ २४ ॥ प्रफुल्लानिविकोशानिफलकन्ददलानिच ॥ बभूवुःशाद्वलान्येवसर्वेषाम्प्राणवृद्धये ॥ २५ ॥ पृथि
वीसस्यसम्पन्नावृक्षास्तेशाद्वलाःशुभाः ॥ दृष्टाःपूर्वंयथातस्मान्मनुनाचित्तहर्षिणा ॥२६॥ ततोनरोमहायोगीतपस्तेपेमहत्तमम् ॥ नारायणश्चदे
वानाम्भावनायमहामतिः ॥ २७ ॥ नारायणोनरश्चोभौपरमावृषिसत्तमौ ॥ तपसाराध्यपरमन्तेजोमयमनामयम् ॥ २८ ॥ आनिन्यातेजलग
तान्देवान्देवर्षिसत्तमान् ॥ येमृताअमराःपूर्वंगणशस्तान्पृथक्पृथक् ॥ २९ ॥ तपोबलेनमहतासर्जयामासतुर्म्मुनी ॥ सूर्याचन्द्रमसौदेवौदि
क्पालाँश्चतथादश ॥३०॥ जनार्द्दनःस्वयञ्चक्रेपातालतलवासिनः ॥ सूर्याचन्द्रमसोश्चक्रेरथसंस्थानमच्युतः ॥ ३१ ॥ पूर्ववद्योजयामासदिवा
रात्रस्थितौचतौ ॥ ओषधीषुचजातासुयज्ञवृक्षेषुसत्तमाः ॥ ३२ ॥ सस्यबीजेषुजातेषुदेवेषुचपृथक्पृथक् ॥ दक्षःकर्त्तुंसमारेभेज्योतिष्टोमम्महा

ध्वरम् ॥३३॥ कश्यपोत्रिर्वसिष्ठश्चविश्वामित्रोथगौतमः ॥ जमदग्निर्भरद्वाजएतेसप्तर्षयोमलाः ॥३४॥ एतैःसप्तमुनीन्द्रैस्तुदक्षोब्रह्मसुतःस्वयम् ॥
महायज्ञन्ततश्चक्रेयावद्द्वादशवत्सरान् ॥३५॥हूयमानेषुतत्रैवत्रिष्वग्निषुपुनःपुनः॥ इज्यमानेवराहेतुयज्ञरूपेतदाद्विजैः॥३६॥चतुर्विधाःप्रजाजा
तायज्ञादेवद्विजोत्तमाः॥ततोदक्षस्यसञ्जाताःपुत्र्यःपुण्यास्त्रयोदश ॥३७॥ स्वरूपगुणसम्पन्नाःसृष्ट्यर्थममितप्रजाः॥ताःपुत्रीःप्रददौदक्षःकश्यपा
यमहात्मने॥३८॥ताभ्योजाताश्चबहवस्तैर्व्याप्तंसकलञ्जगत्॥ ससर्वासाम्प्रजानान्तुकश्यपोजनकोह्यभूत् ॥३९॥ निश्चितन्द्विजशार्दूलाःकश्य
पात्सकलञ्जगत् ॥ तासान्नामानितज्जाताःप्रजाःसर्वाःपृथक्पृथक् ॥ ४० ॥ शृण्वन्तुमुनयःसर्वेसम्यक्कथयतोमम ॥ अदितिर्दितिर्दनुःका
लादनायुःसिंहिकामुनिः ॥ ४१ ॥ क्रोधाप्रधावरिष्ठाचविनताकपिलातथा ॥ कद्रूस्त्रयोदशसुताएतादक्षस्यकीर्तिताः ॥ ४२ ॥ सञ्जातोदाक्षिणां
गुष्ठान्मनसाध्यायतोविधेः ॥ तेनदेवमनुष्येषुदक्षइत्येवकथ्यते ॥ ४३ ॥ ब्रह्मणोमानसाःपुत्रादशपूर्वम्प्रकीर्तिताः ॥ तेषांषट्सृष्टिकर्त्तारो
व्यतीतेस्मिञ्जनक्षये ॥ ४४ ॥ मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः ॥ मरीचेस्तनयोजातःकश्यपोलोकभावनः ॥ ४५ ॥ अस्यैवदक्ष
कन्याभ्यःप्रजाजज्ञेथभूरिशः ॥ अस्यजायाप्रजातानान्नामतोविनिबोधत ॥ ४६ ॥ धातामित्रोर्यमाशक्रोवरुणःसोमएवच ॥ भगोविव
स्वान्पूषाचसवितृत्वष्टृविष्णवः ॥ ४७ ॥ अदितेर्द्वादशसुताआदित्यास्तेप्रकीर्तिताः ॥ एषांकनीयान्गुणवान्त्सदायस्तपतिप्रजाः ॥ ४८ ॥
सवैवंशकरोमुख्योगद्यतेवोदिवाकरः ॥ एकएवदितेःपुत्रोहिरण्यकशिपुर्बली ॥ ४९ ॥ चत्वारस्तस्यतनयाहृष्टामदबलान्विताः ॥ प्रह्ला
दोह्यथसंह्लादोवाष्कलःशिविरेवच ॥५०॥ प्रह्लादस्यत्रयःपुत्रास्तेषामाद्योविरोचनः ॥ कुम्भोनिकुम्भोबलवाँस्त्रयःप्राह्लादयःस्मृताः ॥ ५१ ॥

विरोचनसुतोजातोदानशौण्डोबलिर्महान् ॥ बलेश्चपुत्रोविदितोबाणोनाममहाबली ॥ ५२ ॥ शम्भोरनुचरःश्रीमान्महाकालाह्वयश्चसः ॥
बाणस्यचशतम्पुत्राःकुसुम्भममकरादयः ॥ ५३ ॥ चत्वारिंशद्दनोःपुत्राविप्रचित्तिपुरःसराः ॥ शम्बरोनमुचिश्चैवपुलोमाचतथैवच
॥ ५४ ॥ असिलोमातथाकेशीदुर्जयोऽयःशिरास्तथा ॥ अश्वशीर्षोह्ययःशंकुर्वियन्मूर्द्धामहाबलः ॥ ५५ ॥ वेगवान्केतुमाँश्चैवअयः
स्वर्भानुरेवच ॥ अश्वोह्यश्वपतिःकुण्डोवृषपर्वाजकस्तथा ॥ ५६ ॥ अश्वग्रीवश्चसूक्ष्मश्चतुरुण्डुर्म्माण्डलस्तथा ॥ इषुबाहुश्चैकचक्रो
विरूपाक्षोहराहरौ ॥ ५७ ॥ नियन्त्रश्चनिकुम्भश्चकृपसुश्चपटस्तथा ॥ सरभःशूलभश्चैवसूर्यचन्द्रमसौतथा ॥ ५८ ॥ अन्यावेतौदनोः
पुत्रौसूर्यचन्द्रमसौतथा॥दिवाकरनिशानाथौतावन्यौदेवपुंगवौ ॥५९॥ एषाम्पुत्रैश्चपौत्रैश्चतत्पुत्रैश्चैवभूरिभिः ॥ जगद्व्याप्तमिदंसर्वम्बलवी
र्य्यसमन्वितैः ॥ ६० ॥ दनायुषोभवन्पुत्राश्चत्वारोबलवत्तराः ॥ वीरभद्रोविक्षरश्चवत्सोवृत्तस्तथैवच ॥ ६१ ॥ एषाञ्चतुर्णाम्बहवः
पुत्राजाताद्विजोत्तमाः ॥ रूपसत्त्वबलोपेताएकैकस्यशतंशतम् ॥ ६२ ॥ कालायास्तनयाजाताःकालेयाइतिविश्रुताः ॥ विख्यातास्तेम
हावीर्य्याश्चत्वारोदानवाधिपाः ॥ ६३ ॥ विनाशनश्चक्रोधश्चक्रोधहन्तातथैवच ॥ क्रोधशत्रुस्तथाचैतेकालापुत्राःप्रकीर्त्तिताः ॥६४॥ सिंहि
कायाःसुतोजातोराहुश्चंद्रार्कमर्दनः ॥ सुचन्द्रश्चन्द्रहन्ताचतथाचन्द्रविमर्दनः ॥ ६५ ॥ क्रोधायास्तनयाजाताःक्रूरकर्मकरास्तथा ॥ सिंहि
काचैवक्रोधाचद्वेसुतेक्रूरिकेसदा ॥ ६६ ॥ ताभ्याञ्चप्रभवोवंशोह्यतःक्रूरतरःस्मृतः ॥ एकएवमुनेःपुत्रोजातःशुक्रःकविर्महान् ॥६७॥ दैत्यदानव
कालेयप्रभृतीनांसदागुरुः ॥ चत्वारस्तस्यतनयाजाताअसुरयाजकाः ॥ ६८ ॥ त्वष्टावरस्तथात्रिश्चसौकलश्चेतिवाग्मिनः ॥ तेजसासूर्य

सदृशाब्रह्मलोकप्रभावनाः ॥ ६९ ॥ असुराणांसदैत्यानांकालेयानान्तथैवच ॥ क्रोधात्मजानाञ्चतथासिंहिकातनयस्यच ॥ ७० ॥ सूतिप्रसू
तिभिःसर्वञ्जगद्व्याप्तञ्चराचरम् ॥ तेषान्तुयान्यपत्यानिवर्द्धितानिक्रमाद्द्विजाः ॥ ७१ ॥ तेषाम्बहुत्वात्सङ्ख्यातुञ्चिरेणापिनशक्यते ॥ तार्क्ष्य
श्चारिष्टनेमिश्चअनूरुर्गरुडस्तथा ॥ ७२ ॥ आरुणिर्वारुणिश्चैवविनतातनयाःस्मृताः ॥ शेषोवासुकिराजश्चतक्षकःकुलिकस्तथा ॥ ७३ ॥
कूर्मश्चसुमनाश्चेतिकाद्रवेयाःप्रकीर्तिताः ॥ भीमसेनोग्रसेनश्चसुपर्णोगरुडस्तथा ॥ ७४ ॥ गोपतिर्द्धृतराष्ट्रश्चसूर्यवर्चाश्चवीर्य्यवान् ॥
अर्कपृष्टःप्रयुक्तश्चविश्रुतःसुश्रुतस्तथा ॥ ७५ ॥ भीमश्चित्ररथश्चैवाविख्यातःसर्व्वविद्वशी ॥ शालिशीर्षश्चपर्जन्यःकलिर्न्नारदएवच ॥७६॥
इत्येतेदेवगन्धर्व्वामुनिपुत्राःप्रकीर्तिताः ॥ अनवद्यांसानुरागांसवराम्मार्गणाम्प्रियाम् ॥ ७७ ॥ असूयांसुभगाम्भासीमितिकन्याअसूयत ॥
प्राधासर्वगुणोत्थानात्कश्यपात्तुतपोधनात्॥७८॥विश्वावसुः सुचन्द्रश्चसुपर्णःसिद्धएव च ॥ बर्हिःपूर्णश्चपूर्णांगोब्रह्मचारीरतिप्रियः ॥७९॥
भानुश्चदशमश्चैतेप्राधापुत्राःप्रकीर्तिताः ॥ इत्येतेदेवगन्धर्वाःसन्ततम्पुण्यलक्षणाः ॥ ८० ॥ प्राधासूतमहाभागादेवीदेवर्षिसत्तमात ॥ अल
म्बुषामिश्रकेशीगामिनीचमनोरमा ॥ ८१ ॥ विद्युत्पन्नानघारम्भाह्यरुणाराक्षितातुला ॥ सुबाहुःसुरताचैवसुरजासुप्रियातथा ॥ ८२ ॥ वपु
स्तिलोत्तमाचेतिमुख्याअप्सरसःस्मृताः ॥ अतिबाहुस्तुम्बुरुश्चहाहाहूहूस्तथैवच ॥ ८३ गन्धर्वाणामिमेमुख्यादेवतुल्याःप्रकीर्तिताः ॥ अमृ
तम्ब्राह्मणागावोमुनयोप्सरसस्तथा ॥ ८४ ॥ कपिलातनयाःप्रोक्तामहाभागामहोत्सवाः ॥ इतिदक्षसुतानांयेकश्यपात्तनयास्स्मृताः ॥८५॥
तैरिदंसकलंव्याप्तञ्जगत्स्थावरजंगमम् ॥ एवंयज्ञवराहस्ययज्ञरूपस्यपातनात् ॥ ८६ ॥ त्रिभ्योग्निभ्योमनोस्तस्मात्स्वायम्भुवमहात्मनः ॥

मुनिभ्यश्चैवसप्तभ्यःकश्यपादिभ्यएवच ॥ ८७ ॥ नरनारायणाभ्यान्तुव्यतीतेऽकालिकेलये ॥ पुनः प्रजाःपुरासृष्टाहरिणानेकरूपिणा ॥
॥ ८८ ॥ एवम्पुनरभूत्सृष्टिः सृष्टिस्थित्यन्तकारिणः ॥ हरेस्तस्यप्रसादेननरनारायणात्मनः ॥ ८९ ॥ इतिश्रीकालिकापुराणेपञ्चत्रिंशो
ध्यायः ॥ ३५ ॥ मार्कण्डेयउवाच ॥ ॥ ७ ॥ ॥ ईश्वरःशरभंकायंयथातत्याजयत्नतः ॥ तन्मेनिगदतोभूयःशृणुध्वन्द्विजसत्तमाः ॥१॥
हतेयज्ञवराहेतुबह्मालोकपितामहः ॥ उवाचशरभंगत्वासामयुक्तञ्जगद्धितम् ॥२॥ देहाभोगेनभवतः पूरितम्भूरियोजनम् ॥ उपसंहरतस्मात्त्वं
कायंलोकभयंकरम् ॥३॥ तवयुद्धेनसकलम्प्रनष्टम्भुवनत्रयम् ॥आकाशगन्तुत्वांदृष्ट्वाबिभेत्यद्यजनार्दनः॥४॥तस्मात्त्वमूर्द्धलोकानांहितायत्य
जवैतनुम् ॥ मार्कण्डेयउवाच ॥ ततस्तस्यवचःश्रुत्वासुरज्येष्ठस्यशंकरः ॥५॥ तत्याजशारभंकायन्तोयोपर्येवतत्क्षणात् ॥ त्यक्तस्यतस्यदेह
स्यशंकरेणमहात्मना॥६॥अष्टौपादाअष्टमूर्त्तेस्तेषुचाष्टसुभोजिरे॥आद्यन्तुदक्षिणम्पादमाकाशमगमद्भुतम्॥७॥ तद्वामाम्मिहिरम्भेजेपश्चाद्दक्षिण
जंविधौ॥ वामन्तुज्वलनम्भेजेपृष्ठाग्रम्पद्गतंक्षितिम् ॥८॥ पृष्ठाग्रवामंसलिलन्तत्पश्चाद्दक्षिणन्तथा॥वायौवामपदम्भेजेहोतारंसर्वतोमुखम् ॥९॥
एवन्तस्याष्टमूर्त्तेस्तुअष्टमूर्त्तिपुतत्क्षणात् ॥ अष्टौपादास्तथाभेजुःस्वंस्वन्तेजोययुःपदम् ॥ १० ॥ मध्यन्तुशारभंकायंशंकरस्यमहात्मनः ॥
कपालीभैरवोभूतश्चण्डरूपीदुरासदः ॥११॥ मस्तिष्कमेदसायुक्तम्मांसञ्जुह्वतियेशुचौ ॥ ब्रह्मकपालपात्रस्थंसुराभिर्देवपूजनम् ॥१२॥ बलि
र्मनुष्यमांसेनपानन्तुरुधिरंसदा ॥ सुरयापारणंयज्ञेकपालोद्भटधारणम् ॥१३॥ व्याघ्रचर्मपरीधानंसमलन्त्रिवलीवृतम् ॥ एवङ्कुर्वन्तिसततंक

१ यः स्मशानभैरवः पञ्चमहाभैरवाह्वयःसोप्यसावेवकपालीभैरवएवेत्यर्थः ।

पालव्रतधारिणः ॥ १४ ॥ कपालीभैरवस्तेषान्देवःपूज्यस्तुनित्यशः ॥ श्मशानभैरवोयोसौयोमहाभैरवाह्वयः ॥ १५ ॥ बालसूर्यसमोद्योतः
सदाष्टादशबाहुभिः ॥ विभ्राजमानोरक्ताक्षः सर्वदानायिकात्रजैः ॥ १६ ॥ कालीप्रचण्डाप्रमुखैः क्रीडमानस्तुनित्यशः ॥ सद्योदग्धनृमांसा
शीगलल्लोललसद्भुजः ॥ १७ ॥ लोहिताहारविघसःप्रेताशनगतःसदा ॥ स्थूलवक्त्रोथलम्बोष्ठोह्रस्वस्थूलपदालयः ॥ १८ ॥ विनोदीवादनो
लोकेसाट्टहासस्तुभैरवः ॥ एवंसचमहादेवोमहाभैरवरूपधृक् ॥ १९ ॥ मध्यशारभकायेनकायन्दध्रेमहाभुजः ॥ सजगामततोदेवोहरस्यप्रम
थान्प्रति ॥ २० ॥ गणैः सार्द्धन्तथाकाशेविक्रीडतिसभैरवः ॥ समहाभैरवोदेवःपूज्यमानोजगज्जनैः ॥ अद्यापिकुरुतेनित्यमिष्टकामस्यसा
धनम् ॥ २१ ॥ चैत्रशुक्लचतुर्दश्याम्मद्धासवपयःफलैः ॥ मांसैर्मत्स्यैःसरुधिरैःसकृद्योभैरवंयजेत् ॥ २२ ॥ ससर्वकामानत्संसाध्यभोगान्भु
क्त्वायथेष्टतः ॥ प्रयातिशम्भुभवनमारुह्यवृषभंवरम् ॥ २३ ॥ एतद्वःकथितंसर्वंयत्पृष्टोहन्द्विजोत्तमैः ॥ भवद्भिर्यच्चवोन्यद्वारोचतेपृच्छमान्तु
तत् ॥ २४ ॥ इतिकालिकापुराणेषट्त्रिंशोध्यायः ॥ ३६ ॥ छ ॥ ऋषयऊचुः ॥ कथंवराहपुत्रोसौनरकोनामवीर्य्यवान् ॥ सञ्जातोसुरसत्त्वः
सदेवदेवीसुतोपिसन् ॥ १ ॥ चिरजीवीकथंसोभूत्किमर्थमुदरेचिरम् ॥ पृथिव्यान्यत्रसञ्जातःकुत्रवासमहाबलः ॥ २ ॥ सोसुराणाङ्कथंराजा
पुरन्तस्यकिमाह्वयम् ॥ मलिनीरतिसञ्जातःसक्षितौपोत्रिणस्तथा ॥ ३ ॥ श्रूयतेमुनिशार्दूलकथम्भूतस्तथाविधः ॥ एतत्सर्वमशेषेणपृच्छतां
त्वंवदस्वनः॥४॥त्वन्नोगुरुश्चशास्ताचसर्वप्रत्यक्षदर्शिवान् ॥ कथंलब्धवरोभूतोब्रह्मणाप्रभविष्णुना ॥५॥मार्कण्डेयउवाच ॥ शृण्वन्तुमुनयःसर्वे
यत्पृष्टोहन्द्विजोत्तमाः॥यथासनरकोजातोधरागर्भोमहासुरः ॥६॥ रजस्वलायागोत्रायागर्भेवीर्य्येणपोत्रिणः॥ यतोजातस्ततोभूतोदेवपुत्रोपिसो

सुरः॥७॥गर्भसंस्थम्महावीरञ्ज्ञात्वाब्रह्मादयःसुराः॥वराहपुत्रन्दुर्द्धर्षम्महाबलपराक्रमम् ॥८॥गर्भएवतदादेवाःशक्त्यादधुश्चिरन्दृढम्॥यथाका
लेपिसम्प्राप्तेनोगर्भाज्जायतेसच॥९॥ततस्त्यक्तशरीरस्तुवराहस्तनयैःसह॥अतीवशोकसन्तप्ताजगद्धात्र्यभवत्क्षितिः ॥१०॥शोकाकुलासाव्यल
पच्चिरकालम्मुहुर्मुहुः॥प्रकृतिस्थाक्षितिर्भूतामाधवेनप्रबोधिता॥११॥ततःकालेपिसम्प्राप्तेदैवशक्त्यायदाधृतः॥नगर्भःप्रसवंयातितदाभूतपीडिता
क्षितिः ॥ १२ ॥ कठोरगर्भासादेवीगर्भभारन्नचाशकत् ॥ यदावोढुन्तदादेवम्माधवंशरणंगता ॥१३॥शरण्यंशरणंगत्वामाधवञ्जगताम्पतिम् ॥
प्रणम्यशिरसादेवीवाक्यमेतदुवाचह ॥ १४ ॥ पृथिव्युवाच ॥ नमस्तेजगदव्यक्तरूपकारणकारण ॥ प्रधानपुरुषातीतस्थित्युत्पत्तिलया
त्मक ॥ १५ ॥ जगन्नियोजनपरस्वाहाभोगधरोत्तम ॥ जगदानन्दनन्दात्मन्भगवञ्जगदीश्वर ॥ १६ ॥ नियोजकोनियोज्यश्चविभ्राज
न्विष्णुरव्यय ॥ नमस्तुभ्यञ्जगद्धातस्त्रिलोकालयविश्वकृत् ॥ १७ ॥ यः पालयतिनित्यानिस्थापयत्येवतत्परः ॥ तन्त्वान्नियमरूपेणनमा
मिजगदीश्वर ॥१८॥ त्वम्माधवःप्रवेकश्चकामःकामालयोलयः॥ प्रसूतिच्युतिहेत्वर्थत्राणकारणमीश्वर॥१९॥नयस्यतेक्लेदायस्युरापोनोष्मात
थोष्मणे ॥ नशीतायभवेच्छीतन्तस्मैतुभ्यन्नमोनमः ॥२०॥ नसमुद्रःप्लवकरोनशोषायदहात्मकः ॥ नमृत्यवेयस्ययमस्तस्मैतुभ्यन्नमोनमः ॥
॥ २१ ॥ यच्चिद्धार्ययोगिभिःशान्तदेहैरुन्मार्गाणांयात्यरिध्येयकृत्यम् ॥ नित्यंयत्तद्रूपमार्गावसक्तंसत्वन्त्राहित्राणमिच्छन्धरित्रीम् ॥
॥ २२ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इति स्तुतोहृषीकेशोजगद्धात्र्यातदाहरिः ॥ प्रादुर्भूतस्तदाप्राहधरित्रीन्दीनमानसाम् ॥ ॥
॥ २३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कथन्दीनमनादेविधरित्रिपरिदेवसे ॥ तववाकिंकृतापीडावेत्तुमिच्छामितामहम् ॥ २४ ॥ मुखन्ते

पारिशुष्कन्तुशरीरंकान्तिवर्जितम् ॥ आकुलन्नयनद्वन्द्वम्भ्रूविभ्रमविवर्जितम् ॥ २५ ॥ ईदृशन्तवरूपन्तुदृष्टपूर्वंकदापिन ॥ रूपस्यतुवि
पर्यासेदुःखबीजञ्चभाषय ॥ २६ ॥ एतच्छ्रुत्वावचस्तस्यमाधवस्यजगत्पतेः ॥ विनयावनतादेवीपृथ्वीप्राहसगद्गदम् ॥ २७ ॥ ॥ पृथि
व्युवाच ॥ ॥ नगर्भभारंसंवोढुम्माधवाहंक्षमाधुना ॥ भृशान्नित्यंविषीदामितस्मात्त्वन्त्रातुमर्हसि ॥ २८ ॥ त्वयावराहरूपेणमलिनीका
मितापुरा ॥ तेनकामेनकुक्षौमेयोगर्भोयन्त्वयाहितः ॥ २९ ॥ कालेप्राप्तेपिगर्भोयन्नप्रच्यवतिमाधव ॥ कठोरगर्भातेनाहम्पीडितास्मिदिने
दिने ॥३०॥ यदिनत्राहिमान्देवगर्भदुःखाज्जगत्पते ॥ नचिरादेवयास्यामिमृत्योर्वशमसंशयम् ॥३१॥ कयापिनेदृशोगर्भःपूर्वम्माधववैधृतः ॥
योऽचलाञ्चालयतिमांसरसीमिवकुञ्जरः॥३२॥एतच्छ्रुत्वावचस्तस्याःपृथिव्याःपृथिवीधरः ॥ आह्लादयन्प्रत्युवाचहरिस्तप्ताल्लताम्बु ॥३३॥
॥ श्रीभगवानुवाच ॥ ॥ नधरेतेमहद्दुःखञ्चिरस्थायिभविष्यति॥शृणुयेनप्रकारेणचानुभूतमिदन्त्वया॥३४॥मलिन्यासहसंगेनयोगर्भःसन्धृ
तस्त्वया॥सोभूदसुरसत्त्वस्तुघृष्टेःपुत्रोपिदारुणः ॥ ३५ ॥ ज्ञात्वातस्यचवृत्तान्तंगर्भस्यद्रुहिणादयः ॥ दैवीभिःशक्तिभिर्बद्धस्तवकुक्षौतुतत्पुरः
॥३६॥ सर्गादौयदिजायेतभवत्यास्तादृशःसुतः ॥ भ्रंशयेत्सकलाल्लोकाँस्त्रीनिमान्त्ससुरासुरान् ॥३७॥ अतस्तस्यबलंवीर्यञ्ज्ञात्वाब्रह्मादयः
सुराः॥प्राक्सृष्टिकालेतेगर्भन्तथाधूर्जगतांकृते ॥३८॥ अष्टाविंशतिमेप्राप्तेआदिसर्गाच्चतुर्युगे ॥ त्रेतायुगस्यमध्येतुसुतन्त्वञ्जनायिष्यासि॥३९॥
यावत्सत्ययुगंयातित्रेतार्द्धञ्चवरानने ॥४०॥ तावद्वहमहागर्भन्दत्तःकालोमयातव॥नयावज्जायतेधात्रिगर्भस्तेह्यतिदारुणः ॥४१॥ तावद्गर्भवती

१ घृष्टिःशूकरी ।

दुःखन्नत्वम्प्राप्स्यसिभामिनि ॥ मार्कण्डेयउवाच ॥ इत्युक्त्वाभगवान्विष्णुःपृथिवीङ्गर्भिणीन्तदा ॥ ४२ ॥ नाभौपस्पर्शदयितांशंखाग्रेणातिपी
डिताम् ॥ सास्पृष्टाविष्णुनापृथ्वीशरीरंलघुचासदत्॥४३॥गर्भेपिलघिमानंसाप्रापातीवसुखप्रदम् ॥अगर्भायादृशीनारीतादृशीसाप्यजायत ॥
॥ ४४ ॥ धृतगर्भापिमुदितासाबभूवजगत्प्रसूः ॥ ततःपुनरिदंवाक्यमुक्त्वासभगवान्क्षितिम् ॥ ४५ ॥ पुनःप्रसादयामाससामभिर्बहुभिश्च
ताम् ॥ जगद्धात्रिमहासत्त्वेत्वन्धृतिर्द्धारणात्मिका ॥ ४६ ॥ सर्वेषान्धारणाद्देवित्वन्धात्रीतिप्रगीयसे ॥ क्षमायस्माज्जगद्धर्त्रीशक्ताक्षान्तियुतात्र
यत् ॥४७॥ सर्वंवसुत्वयिन्यस्तंयस्माद्वसुमतीततः ॥ तद्दुःखन्त्यजपुत्रस्तेयदासञ्जायतेतदा ॥४८॥ मांस्मरिष्यसिदेवित्वम्पुत्रन्तेपालयाम्यह
म् ॥ इदंरहस्यंकुत्रापिनप्रकाश्यन्त्वयाधरे ॥ ४९ ॥ यन्मयाकथितन्देविरहस्यम्परमम्परम् ॥ गर्भस्तवमहाभागेत्रेतायामध्यभागतः॥५०॥
उत्पत्स्यतेहतेवीरेरावणेरामसंज्ञिना ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्त्वाभगवान्विष्णुस्तत्रैवान्तरधीयत ॥ ५१ ॥ आज्ञाप्यपृथिवीन्देवीङ्गर्भ
भारप्रपीडिताम् ॥ धरापिकुशलाक्षामालघुकायाबलैर्युता ॥ अगर्भेवययौदेवीमुदापरमयायुता ॥ ५२ ॥ इतिश्रीकालिकापुराणेसप्तत्रिंशो
ध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ अथकालेबहुतिथेव्यतीतेद्विजसत्तमाः ॥ विदेहविषयेराजाजनकोनामवीर्यवान् ॥
॥ १ ॥ सर्वराजगुणैर्युक्तोराजनीतिविवर्द्धितः ॥ सत्यवाक्शीलवान्दक्षोब्रह्मण्यःप्रयतःशुचिः ॥ २ ॥ देवद्विजगुरूणाञ्चपूजासुनिरतःसदा ॥
बभूवसर्वलोकानाम्पितेवपरिपालकः ॥ ३ ॥ तस्यराज्ञःसुतोनाभूत्प्राप्तेकालेपिवैयदा ॥ तदासविमनाभूत्वाचिन्ताध्यानपरोभवत् ॥ ४ ॥
एकदासोथशुश्रावनारदस्यमुखान्नृपः ॥ अपुत्रोनृपतिर्वृद्धोनाम्नादशरथोमहान् ॥५॥ पुत्राँल्लेभेमहासत्त्वानध्वरेणमहामतिः॥अयोध्यायान्नग

र्यान्तुऋष्यशृंगपुरोगमैः॥६॥मुनिभिर्विहितैर्यज्ञैर्लब्धवान्सनृपःसुतान् ॥ रामञ्चभरतञ्चैवशत्रुघ्नंलक्ष्मणन्तथा॥७॥ महासत्त्वान्महावीरान्देवग
र्भोपमाञ्छुभान्॥तच्छ्रुत्वाजनकोराजाप्रविश्यान्तःपुरंस्वकम् ॥८॥भार्याभिर्मन्त्रयामासयज्ञार्थम्पुत्रजन्मने॥मन्त्रयित्वातदाराजामहिषीप्रमु
खैःस्वयम्॥९॥चतसृभिस्तुभार्याभिर्यज्ञार्थन्दीक्षितोभवत्॥ततःपुरोधसंराजागौतमम्मुनिसत्तमम्॥१०॥ तत्पुत्रञ्चशतानन्दम्पुरोधायाकरोन्म
खम्॥द्वौपुत्रौतस्यसञ्जातौयज्ञभूमौमनोहरौ॥११॥एकाचदुहितासाध्वीभूम्यन्तरगताशुभा॥नारदस्योपदेशेनयज्ञभूमिन्ततोनृपः ॥१२॥ हले
नदारयामासयज्ञवाटावधिस्वयम् ॥ तद्भूमिजातसीतायांशुभांकन्यांसमुत्थिताम् ॥ १३ ॥ लेभेराजामुदायुक्तःसर्वलक्षणसंयुताम् ॥ तस्यान्तु
जातमात्रायाम्पृथिव्यन्तर्हितास्वयम् ॥ १४ ॥ जगादवचनञ्चेदंगौतमन्नारदन्नृपम् ॥ पृथिव्युवाच ॥ एषासुतामयादत्तातवराजन्मनोहरा ॥
॥ १५ ॥ एनांगृहाणसुभगांकुलद्वयशुभावहाम् ॥ अनयामेमहाभारस्तत्त्वतोहेतुभूतया ॥ १६ ॥ क्षयंयास्यतिभारार्त्तिम्मोचयिष्यामिदारुणा
म् ॥ रावणाद्यामहावीराः कुम्भकर्णादयोपरे ॥ १७ ॥ नाशंयास्यन्तिदुर्द्धर्षाःकृतेस्याराक्षसाःपरे ॥ त्वञ्चमोदन्दुराधर्षंदुहितृकृतिजन्नृप ॥
॥१८॥ अवाप्स्यसिसुराणाञ्चपितॄणामृणशोधनम् ॥ किन्त्वेकःसमयःकार्यस्त्वयाममनरोत्तम ॥१९॥ तमहन्तेप्रवक्ष्यामिपुरोनारदगौतमे ॥
निहतेरावणेवीरेभारार्तिरहितासुखम् ॥ २० ॥ सुपुत्रञ्जनयिष्यामियज्ञभूमावहन्तव ॥ तम्पुत्रवत्पालयिताभवान्नृपतिसत्तम ॥ २१ ॥ याव
द्व्यतीतबाल्यःसन्भवितातनयोमम ॥ व्यतीतबाल्यन्तमहम्पालयिष्येस्वयन्नृप ॥ २२ ॥ तस्यस्यान्मानुषोभावोयथात्वन्तत्करिष्यासि ॥
मार्कण्डेयउवाच ॥ ॥ इतिपृथिव्यावचनंश्रुत्वाराजातदामुदा ॥ २३ ॥ प्रणम्यपृथिवीम्प्राहसाम्नासजनकाह्वयः ॥ राजोवाच ॥ यत्त्वम्ब्रू

पेजगद्धात्रिकारिष्येतद्वचस्तव ॥२४॥ ममापीष्टम्प्रयच्छस्वप्रसीदपरमेश्वरि ॥ देविप्रत्यक्षतोरूपन्द्रष्टुमिच्छाम्यहन्तव ॥२५॥ शक्तिस्त्वंलोक
जननीत्वान्नमामिप्रसीदमे ॥ इतितस्यवचःश्रुत्वाजनकस्यतदाक्षितिः ॥ २६ ॥ मुनीनांसन्निधौरूपन्दर्शयामासभूभृते ॥ नीलोत्पलदलश्या
मामक्षमालाव्जधारिणीम् ॥ २७ ॥ बाहुयुग्मेनशुभ्रेणमृणालायतशोभिना ॥ सुन्दरींलोकधात्रीन्तान्दृष्ट्वाशश्वन्नृपोनमत् ॥ २८ ॥ ततःसा
पृथिवीदेवीसीताज्ञातान्नृपात्मजाम् ॥ करेणशश्वत्संस्पृश्यवचनञ्चेदमब्रवीत् ॥ २९ ॥ इयन्तेमानुषम्भावमवाप्स्यतिजगत्प्रसूः ॥ तवपुत्रीनृप
श्रेष्ठसमयम्प्रतिपालय ॥ ३० ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्त्वापृथिवीदेवीराजानञ्जनकाह्वयम् ॥ सम्भाष्यनारदादीस्तांस्तत्रैवान्त
रधीयत ॥ ३१ ॥ जनकोपिसुताल्लब्ध्वासर्वलक्षणशालिनीम् ॥ सुतद्वयन्तथाप्राप्यमुदितःस्वगृहंययौ ॥ ३२ ॥ ततःकालेतुसम्प्राप्तेरावणे
राक्षसेहते ॥ मानुषेणस्वरूपेणविष्णुनाप्रभविष्णुना ॥ ३३ ॥ गत्वाविदेहराजस्ययज्ञभूमिन्तदाक्षितिः ॥ सुषुवेतनयंवीरंयत्रसीतापुराभवत् ॥
॥ ३४ ॥ जातेपुत्रेतदादेवीजगद्धात्रीजगत्प्रभुम् ॥ सस्मारसमयेविष्णुंस्मरन्तीसमयम्पुरा ॥ ३५ ॥ स्मृतमात्रस्तदादेवःसमयम्प्रत्यपालय
त् ॥ क्षितेर्यत्रसुतोजातस्तत्रप्रादुर्बभूवह ॥ ३६ ॥ प्रादुर्भूतन्तदादेवीप्रणम्यपरमेश्वरम् ॥ संस्तूयसूनृतंशश्वदिदमाहजगत्प्रभुम् ॥ ३७ ॥ पृथि
व्युवाच ॥ एषतेतनयोजातःसुकुमारोमहाप्रभः ॥ संस्मरन्त्समयम्पूर्वन्त्वमेनम्प्रतिपालय ॥३८॥ श्रीभगवानुवाच ॥ अयन्तेतनयोदेविमहा
बलपराक्रमः ॥ भवितामानुषम्भावन्तन्वानःसुचिरम्बुधः ॥ ३९ ॥ यावन्मानुषभावन्तेतनयोभावयिष्यति ॥ तावत्कल्याणभाग्भूत्वाचिरंरा
ज्यङ्करिष्यति ॥ ४० ॥ त्यक्तमानुषभावस्तुयदाचायंविचेष्टते ॥ तदातुनास्यसुचिरञ्जीवितंसंभविष्यति ॥ ४१ ॥ सम्प्राप्तेषोडशेवर्षेराज्यमा

सादयिष्यति ॥ धनरत्नगजैश्वर्ययुक्तोयंरथसञ्चयैः ॥ ४२ ॥ आसाद्यमहतीन्नित्यांश्रियम्भोक्ष्यतिवीर्यवान् ॥ यस्मिन्यस्मिन्युगेभावोयोवा
भवतिवैनृणाम् ॥ ४३ ॥ तन्तम्भावन्तथैवायंकरिष्यतितथाकुरु ॥ एतस्यनिभृतंराज्यंयत्प्राग्ज्योतिषसंज्ञकम् ॥ ४४ ॥ पुरन्तत्रचिरंशास्ता
राज्यमेषसुतस्तव ॥ इत्युक्त्वापृथिवींविष्णुःसमाभाष्यजगत्पतिः ॥ ४५ ॥ दृश्यमानस्तयाक्षिप्रन्तत्रैवान्तर्दधेप्रभुः ॥ प्रसूयपृथिवीपुत्रम्म
ध्यरात्रेमहाद्युतिम् ॥ ४६ ॥ जनकंज्ञापयामासरहस्यम्पूर्वमीरितम् ॥ विदेहराजोज्ञात्वैवपृथिवीजनितंसुतम् ॥ ४७ ॥ तत्रैवयज्ञवाटंसरात्रा
वागात्कृतक्रियः ॥ गच्छन्तंयज्ञवाटन्तन्दृष्ट्वासर्वंसहातदा ॥ ४८ ॥ नोक्त्वाकिञ्चनतंशश्वदन्तर्द्धानङ्गतानृपम् ॥ अथगत्वातदातत्रविदेहाधिप
तिःसुतम् ॥४९॥ धरायान्ददृशेकान्त्याचन्द्रार्कज्वलनोपमम् ॥ रुदन्तम्बहुशःस्निग्धञ्चलद्धस्तपदद्वयम्॥५०॥वपुष्मन्तंश्रियादीप्तंकार्त्तिकेय
मिवापरम् ॥ उद्गच्छन्तसरुदन्बालोयज्ञभूमिंव्यतीत्यच ॥ ५१ ॥ कियद्दूरञ्जगामाशूत्तानशायीमहाद्युतिः ॥ मनुष्यस्यशिरस्तत्रमृतस्यप्राप्य
बालकः ॥ ५२ ॥ स्वशिरस्तत्रविन्यस्यरुदँस्तस्थौक्षणन्तदा ॥ ततोविदेहराजोपिमार्गमाणःक्षितेःसुतम् ॥ ५३ ॥ व्यतीत्ययज्ञभूमिन्तमास
सादाञ्जसावहिः ॥ आसाद्यबालकन्दीप्तम्प्रदीप्तमिवपावकम् ॥ ५४ ॥ कान्त्याचन्द्रमसस्तुल्यन्तेजोभिर्भास्करोपमम् ॥ शरमध्यगतम्पूर्व
म्पावकिम्पावकोयथा ॥ ५५ ॥ स्वयञ्जग्राहतंराजापृथिव्याःसमयंस्मरन् ॥ उद्गृह्णन्तच्छिरोदेशेददृशेमानुषंशिरः ॥ ५६ ॥ शशंसचाचिरं
शीर्षम्मानुषङ्गौतमायसः ॥ अथबालंसमादायप्रविश्यान्तःपुरंस्वकम् ॥५७॥ महिष्यैकथयामासप्राप्तम्पुत्रंगुहोपमम् ॥ सातन्दृष्ट्वाविशालाक्षं
सिंहस्कन्धम्महाभुजम् ॥ ५८ ॥ विस्तीर्णहृदयंकान्तन्नीलोत्पलदलच्छविम् ॥ मुमोदपालनीयोयम्मयेतिन्यवदन्नृपम् ॥ ५९ ॥ तांराजा

पिततःग्राहपुत्रोयम्ममसुन्दरि ॥ यज्ञभूमौसमुत्पन्नःस्वच्छन्दम्पालयतामयम् ॥ ६० ॥ यत्पृथिव्यारहःप्रोक्तन्नतद्देव्यैन्यवेदयत् ॥ सत्यसन्धो
नृपश्रेष्ठःप्रियायाअपिभाषितम् ॥ ६१ ॥ ममसुतसुतवंशान्पालयित्रीधरेयमितिनरपतिवर्योमोदवाँस्तादिनेच ॥ सुरतनयसमानम्पुत्रमासाद्यदे
वीजितरिपुरतिधीमान्स्यादयञ्चेत्यमोदत् ॥ ६२ ॥ इतिश्रीकालिकापुराणेअष्टत्रिंशोध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ मार्कण्डेयउ
वाच ॥ ॥ अथतस्यनृपश्रेष्ठोगौतमेनमहर्षिणा ॥ संस्कारंकारयामासविधिनामानुषेणतु ॥ १ ॥ नरस्यशीर्षेस्वशिरोनिधायस्थितवान्यतः ॥
तस्मात्तस्यमुनिश्रेष्ठोनरकन्नामवैव्यधात् ॥ २ ॥ अपरान्बालसंस्कारान्क्षात्रेणविधिनामुनिः ॥ केशान्तावधिसञ्चक्रेऋग्यजुःसाममन्त्रकैः ॥
॥ ३ ॥ ववृधेतस्यसदनेनरकोनामभूसुतः ॥ दिनान्दिनन्धृतान्यश्रीःशरदीवनिशाकरः ॥ ४ ॥ सराजातंसदाभावैर्मानुषैर्योजयन्स्वयम् ॥
गौतमस्यसुतेनाथशतानन्देनधीमता ॥ ५ ॥ ग्राहयामासतन्नित्यंक्षात्रंभावञ्चमानुषम् ॥ तथैवपृथिवीदेवीधात्रीवेषेणतंसुतम् ॥ ६ ॥ नियतंग्राहया
मासमानुषञ्चरितंशुभम् ॥ यदैवपुत्रउत्पन्नस्तदैवपृथिवीस्वयम् ॥ ७ ॥ मायामानुषरूपेणनृपान्तःपुरमाविशत् ॥ प्रविश्यतत्रसादेवीनृपस्यानु
मतेभवत् ॥ ८ ॥ धात्रीतस्यद्विजश्रेष्ठाःकात्यायन्याह्यवस्थया ॥ यावत्षोडशवर्षाणितस्यबालस्यभाविनी ॥ ९ ॥ तावत्स्वयम्पालयन्तीग्रा
हयामाससन्नयम् ॥ सवर्द्धमानोनुदिनन्नरकःपृथिवीसुतः ॥ १० ॥ अत्यक्रामत्सुतान्त्सर्वाञ्जनकस्यमहात्मनः ॥ शरीरेणाथवीर्येणरूपेणबल
वत्तया ॥ ११ ॥ धनुषागदयावीरोह्यत्यक्रामन्नृपात्मजान् ॥ सशास्त्रवादकुशलोधनुर्वेदेचकोविदः ॥ १२ ॥ वर्षैःषोडशभिर्भूतोवीरैरन्यैर्दुरा

१ अर्द्धवृद्धया ।

सदः ॥ विदेहाधिपतिर्दृष्ट्वामहाबलपराक्रमम् ॥ १३ ॥ ततोन्यूनान्स्वपुत्रांश्चनातिहृष्टमनाभवत् ॥ निरस्यासौचमत्पुत्रान्ममराज्यंग्रहीष्यति॥
॥ १४ ॥ कालेप्राप्तेमहावीरोमतिस्तस्याभवत्पुरा ॥ अन्तःपुरेयदापुत्रान्सर्वान्नमयतेनृपः ॥ १५ ॥ तदातुनरकंवीक्ष्यहर्षम्प्राप्नोतिनाधिकम् ॥
तस्यतद्बुबुधेदेवीनृपस्याथवसुन्धरा ॥ १६ ॥ महिषीविस्मयञ्चक्रेतस्मिन्भावेतुभूभृतः ॥ अथैकदामहादेवीजनकस्यमहात्मनः ॥ १७ ॥
पप्रच्छनृपतिश्रेष्ठंविदेहाधिपतिम्पतिम् ॥ नाथपृच्छामितेकिञ्चिद्रहस्यंयदिनोतव ॥ १८ ॥ तदामान्तद्वदस्वत्वंकृपाचेद्विद्यतेमयि ॥ यदैवत
नयाः सर्वे विहरन्तिपुरस्तव ॥ १९ ॥ तदैवनरकन्दृष्ट्वाविशीर्णइवलक्ष्यसे ॥ तन्मेरात्रिन्दिवम्बाढंविस्मयःप्रतिवर्द्धते ॥ २० ॥ संशयश्चभ
यश्चैवनजहातिचमांसदा ॥ रूपवान्वीर्यवानेषनयेचाविनयेतथा ॥ २१ ॥ कुशलः प्रतिबुद्धश्चपुत्रस्तवमहाबलः ॥ नसभाजयसेकस्मात्पुत्रम
न्यैर्दुरासदम् ॥ २२ ॥ तद्दहञ्ज्ञातुमिच्छामियदितथ्यंवदस्वमे ॥ ॥ मार्कण्डेय उवाच ॥ ॥ इतितस्यावचःश्रुत्वाप्रियायाःपृथिवीपतिः ॥
॥ २३ ॥ तूष्णींभूत्वाक्षणन्देवीमिदंवचनमब्रवीत् ॥ ॥ राजोवाच ॥ ॥ कथयिष्येप्रियेतत्त्वंयत्पृष्टोहन्त्वयाधुना ॥ २४ ॥ मासत्रयेव्य
तीतेतुसमयम्प्रतिपालय ॥ निगूढःकश्चिदत्रास्तिदेवस्यसमयोमम ॥ २५ ॥ तेनाधुनानकिञ्चित्तेकथयिष्यामितद्रहः ॥ ॥ मार्कण्डेयउ
वाच ॥ ॥ राज्ञोह्ययंसभार्यस्यसंवादोभवदन्तिके ॥२६॥ मानुषीपृथिवीधात्रीतंशुश्रावयदातदा॥श्रुत्वातयोस्तुसंवादम्महिषीभूपयोःक्षितिः
॥२७॥मासत्रयेणसमयन्दत्तन्देव्यैधराभृता॥तत्कालेविमनस्कञ्चभूपन्नरकसञ्ज्ञया ॥२८॥ त्रिभिर्म्मासैर्व्यतीतैःस्यादस्यषोडशवत्सरः॥ततो

१. दीर्घआर्षः ।

नृपोमहिष्यास्तुकथयिष्यतितद्रहः॥२९॥ततोममरहस्यन्तुविदितंसम्भविष्यति ॥ चिन्तयित्वेतिसादेवीजगद्धात्रीसुतम्प्रति ॥३०॥ निश्चित्ये
दन्तदाकृत्यम्प्राप्तकालमचेष्टत॥ततोरहसिभपन्तंसमासाद्यसगौतमम् ॥३१॥ इदमाहजगद्धात्रीस्वपुत्रार्थेयशस्विनी ॥ योमयासमयोदत्तःपा
लितःसत्वयानघ॥३२॥पुत्रश्चपालितोमेयन्नरकोविनयैर्युतः ॥ सम्प्राप्तयौवनःपुत्रोयोजितश्चत्वयानयैः ॥३३॥ तवप्रसादात्पुत्रोमेसुखीवृद्धो
गृहेतव ॥ तमहम्पूर्वसमयान्नयिष्यामिस्वमात्मजम् ॥ ३४ ॥ अनुजानीहिभद्रन्तेनरकस्यगतिम्प्रति ॥ रक्षितव्यश्चभवतासमयःसपुरोधसा ॥
॥३५॥ छन्नमेवनयिष्यामिभूपतेमाकृथाव्यथाम् ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्त्वाजगतान्धात्रीविदेहाधिपतिन्नृपम् ॥३६॥ तत्रैवप
श्यतान्तेपामन्तर्द्धानमुपागमत् ॥ नृपोपितस्यास्तद्वाक्यमंगीकृत्यक्षितिम्प्रति॥३७॥तस्याःप्रत्यक्षतःस्थानञ्जगामसपुरोहितः॥ अथैकदाधरा
देवीमायामानुषरूपिणी ॥३८॥ उपांशुनरकम्प्राहधात्रीतस्यमहात्मनः॥त्वयासमम्महाबाहोगंगांयातुंमनोमम ॥३९॥ यदित्वंयासियास्यामि
रथेनाद्यैवपुत्रक ॥ ॥ नरकउवाच ॥ ॥ नपितुर्वचनंयास्येविनामातस्त्वयासमम् ॥ ४० ॥ अनुज्ञाप्यमहाराजंकारिष्यामितवोप्सि
तम् ॥ गुरुश्चतनयन्तस्यशतानन्दोद्विजोत्तमम् ॥ ४१ ॥ अनुज्ञाप्यरथेनाहंयास्येगंगान्त्वयासमम् ॥ धात्र्युवाच ॥ नतेपितायज्ञन
कोयःसर्वजगताम्प्रभुः ॥ ४२ ॥ सतेपितातङ्गंगायाम्पश्यगत्वामयासह ॥ अयम्पितापालकस्तेनराज्यंसम्प्रदास्यति ॥ ४३ ॥ यस्तेवर्द्ध
यितातातमासादयपुत्रक ॥ अत्रयद्यद्रहस्यंतद्गंगायामेवपुत्रक ॥ ४४ ॥ कथयिष्याम्यहंसर्वंरहोभंगस्ततोन्यथा ॥ ॥ मार्कण्डेय
उवाच ॥ ॥ जातसम्प्रत्ययोधात्र्यावचसानरकस्तथा ॥ ४५ ॥ विहाययानञ्छन्देनपद्भ्यांगंगांययौतदा ॥ अथगंगांसमासाद्यसंस्ना

प्यविधिवत्सुतम् ॥ ४६ ॥ आत्मानन्दर्शयामासपृथिवीस्वसुतायवै ॥ मायामानुषमूर्तिन्तांविहायजगताम्प्रसूः ॥ ४७ ॥ नीलोत्पलदल
श्यामंसर्वलक्षणसंयुतम् ॥ सर्वांगसुन्दरञ्चारुनानालंकारभूषितम् ॥ ४८ ॥ पुत्रायदर्शयामासनरकायवसुन्धरा ॥ कथामेताञ्चपूर्वस्मिन्बुद्ध
ताम्पृथिवीतदा ॥ ४९ ॥ कथयामासपुत्रायप्रतीतिर्जायतेयथा ॥ ममगर्भेयथापुत्रवर्द्धसेत्वन्दिनेदिने ॥ ५० ॥ ब्रह्मादयस्तदादेवाआलो
क्यस्वयमेवते ॥ मलिनीक्षितिसञ्जातःपुत्रोविष्णोर्महात्मनः ॥ ५१ ॥ आसुरम्भावमास्थायसर्वानस्मान्हनिष्यति ॥ इतिचिन्तापरा
देवाःकुमन्त्रञ्चक्रिरेतदा ॥ ५२ ॥ अयन्नोत्पद्यतांगर्भाद्गर्भेतिष्ठत्वयंसदा ॥ ततोममभवान्गर्भेसुबहूनियुगान्यथ ॥ ५३ ॥ अवसद्दुःखवान्पु
त्रदेवानाञ्चकुमन्त्रतः ॥ मृतकल्पाभवमहम्भवतोधारणात्सुत ॥ ५४ ॥ ततोहंशरणंयाताभगवन्तंसनातनम् ॥ नारायणस्यवाक्यात्तुभ
वानुत्पन्नवाँस्ततः ॥ ५५ ॥ इतिसत्यम्ममवचःपुत्रजानीहिनिश्चितम् ॥ अथयावन्नपुत्रस्यविस्मयःसमपद्यत ॥ ५६ ॥ यावदेवस्वयन्देवी
प्रोचेपुत्रमिदंवचः ॥ अहन्तेजननीतातमयाज्ञातोसिपुत्रक ॥ ५७ ॥ पृथिव्यहञ्जगद्धात्रीमद्रूपम्मृन्मयन्त्विदम् ॥ पितातवमहाबाहोप्रभु
र्नारायणोऽव्ययः ॥ ५८ ॥ अच्युतोजगतान्धातामहात्माशूकरात्मधृक् ॥ तेनाहितस्त्वम्मद्गर्भेसुचिरन्त्वम्पुरावसः ॥ ५९ ॥ सम्प्राप्तेस
मयेजातःपालितश्चेहभूभृता ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इतितस्यावचःश्रुत्वाहर्षशोकाकुलस्तदा ॥ ६० ॥ नरकःपृथिवीन्देवीमिदमा
हधनुर्द्धरः ॥ नमातावित्तापूर्वम्माताहामितिभाषसे ॥ ६१ ॥ विष्णुःपितेतिचवचोनपितावित्तोमम ॥ जानामिपितरञ्चाहंविदेहाधिपतिन्नृ
पम् ॥ ६२ ॥ तस्यभार्यासुमत्याख्यामहञ्जानामिमातरम् ॥ भ्रातरस्तत्सुताःसर्वेसीतामेभगिनीशुभा ॥ ६३ ॥ सुमतिर्ममतातेतिलोको

जानातिसन्ततम् ॥ कात्यायनीचधात्रीमेयाधुनैवकृतात्वया ॥ ६४ ॥ एतत्सर्वन्त्वयामिथ्याशंसितम्ममसाम्प्रतम् ॥ यथातवाहन्तनयःसत्य
माख्याहितन्मम ॥ ६५ ॥ ॥ मार्कण्डेयउवाच ॥ पुत्रस्यवचनञ्चेतिश्रुत्वासर्वंसहातदा ॥ सर्वन्तत्पूर्ववृत्तान्तन्तनयायन्यवेदयत् ॥ ६६ ॥
यथामलिन्यासन्भोगोवराहस्याभवत्पुरा ॥ यथागर्भेधृतोदेवैर्येनवाकारणेनसः ॥ ६७ ॥ यथाचगर्भदुःखार्त्तामाधवंशरणंगता ॥ यथातेन
प्रदत्तश्चसमयोजननम्प्रति॥६८॥यथाविदेहराजस्ययज्ञभूमावसूयत ॥ विदेहराजेनसमंयादृशःसमयोभवत्॥६९॥यथामानुषरूपेणधात्रीसा
समपद्यत ॥ तत्सर्वंकथयामासनरकायमहात्मने ॥ ७० ॥ ऋषयऊचुः ॥ किमर्थंसमयोदत्तोविष्णनाप्रभविष्णुना ॥ निहतेरावणेवीरेरामेण
सुमहात्मना ॥ ७१ ॥ भविष्यतिसुतस्तेवैतत्रनःसंशयोमहान् ॥ एतत्त्वंसंश[illegible]च्छन्धिगुरोशास्तासिनःसदा ॥ ७२ ॥ ॥ मार्कण्डेयउवाच ॥
भारार्त्तारावणादीनाम्पृथिवीमांसभोगिनाम् ॥ ७३ ॥ अधोगतायोजनानिपञ्चवैद्विजसत्तमाः ॥ अयंवराहवीर्येणजातोगर्भेक्षितेःपुनः ॥७४॥
असावपिमहाराजोदशग्रीवोयथाभवत् ॥ अधोयास्यतिभारार्त्तासातीवपृथिवीत्विति ॥ ७५ ॥ समयन्दत्तवन्विष्णूरावणेनिहतेसति ॥ धरा
यैभारविहतिव्याजेनाद्विजसत्तमाः ॥ ७६ ॥ अथैनाम्पृथिवीम्प्राहनरकःपुनरेवहि ॥ पृथिव्यावचनंश्रुत्वास्वल्पसंशयसंयुतः ॥ ७७ ॥ यद्यैव
म्मेपिताविष्णुर्मातात्वम्पृथिवीशुभे ॥ आगच्छतुजगन्नाथोममैवाभ्युपपत्तये ॥ ७८ ॥ सएवसर्वलोकेशोयदिमाम्भाषतेच्युतः ॥ पिताहन्ते
त्वियम्माताश्रद्दधेतदहंशुभे ॥ ७९ ॥ त्वयामानुषरूपेणधात्र्याहम्प्रतिपालितः ॥ तद्रूपंद्रष्टुमिच्छामियदितेरूपमीदृशम् ॥ ८० ॥ त्वत्पूर्वरू

१ आमभोगिनामितिवा पाठः ।

पन्दृष्ट्वैवचनाच्चजगद्गुरोः ॥ जातश्रद्धोमहाभागेस्थास्यामिसमयेतव ॥ ८१ ॥ मार्कण्डेयउवाच ॥ पुत्रस्यवचनंश्रुत्वापृथिवीप्रथमन्तदा ॥
मायामानुषरूपन्तत्प्रतिजग्राहतत्पुरः॥८२॥तथाकात्यायनीरूपंयेनरूपेणपालितः॥नरकःसातुतद्गृह्यतत्याजपृथिवीतनुम् ॥८३॥ अथदृष्ट्वैवन
रकोधात्रींकात्यायनीन्तदा॥पप्रच्छपूर्ववृत्तान्तंयद्वृत्तंनृपमन्दिरे॥८४॥ सातथाकथयामासयथासंप्रतिपालितः ॥ यद्वृत्तम्पूर्वतोगेहेनृपस्यजनक
स्यतु॥८५॥जातसम्प्रत्ययस्तत्रनरकःसमपद्यत॥पृथिवीचपुनर्देवीरूपंस्वञ्जगृहेतदा॥८६॥अथसस्मारपृथिवीजगन्नाथंहरिम्प्रभुम् ॥ समयेपूर्व
विहितेप्रणम्यशिरसामुहुः॥८७॥स्मृतमात्रस्तदाक्षित्यामाधवोगरुडध्वजः ॥ प्रसन्नोजगतान्नाथःप्रत्यक्षत्वंगतस्तदा ॥८८॥ तन्दृष्ट्वापृथिवीदेवी
देवंगरुडवाहनम्॥नीलोत्पलदलश्यामंशंखचक्रगदाधरम् ॥८९॥ पीताम्बरञ्जगन्नाथंश्रीवत्सोरस्कमव्ययम्॥प्रणनाममहाभक्त्यापस्पर्शशिरसा
मही॥९०॥परमेशजगन्नाथजगत्कारणकारण ॥ प्रसीदेतिवचश्चापितदाप्रोचेजगत्प्रभुः ॥९१॥ नरकस्तुहरिन्दृष्ट्वानिमील्यनयनद्वयम् ॥ तत्ते
जसाचाभिभूतस्तदाभूमावुपाविशत् ॥९२॥ उपविष्टेतदादेवीतनयेनरकाह्वये ॥ प्रसादयामासतदापुत्रार्थेवरवर्णिनी ॥९३॥ प्रसाद्यमानोधरया
हरिर्नारायणोव्ययः ॥ शंखाग्रेणतदापुत्रम्पस्पर्शनरकाह्वयम्॥९४॥ स्पृष्टमात्रोऽथहरिणानरकोऽभूत्सुदर्शनः॥ हृष्टश्चोत्साहवाँश्चैवबलवान्त्सम
पद्यत ॥ ९५ ॥ ततउत्थायनरकोहरिन्नारायणम्प्रभुम् ॥ भक्त्याप्रणम्यगोविन्दंसाष्टांगञ्चमुहुर्मुहुः ॥ ९६ ॥ ननामपृथिवींवीरोजातसम्प्रत्य
यस्तदा ॥ प्रणम्यचमहाभागान्भक्त्यापरमयायुतः ॥ ९७ ॥ प्राञ्जलिःपुरतस्तस्थौनोक्त्वाकिञ्चनवैभिया ॥ ततस्तदर्थेपृथिवीमाधवंसम
याचत ॥ ९८ ॥ प्रसीददेवदेवेशसमयम्प्रतिपालय ॥ त्वयायन्तनयोदत्तोममसर्वञ्जगत्पते ॥ ९९ ॥ एतदर्थेप्रतिज्ञातंयद्दत्तम्प्रतिपालय ॥

॥ १०० ॥ ॥ भगवानुवाच ॥ ॥ भवतीयत्सुपुत्रार्थेमामयाचत्पुरामया ॥ तत्सर्वन्तवदत्तंवैराज्यन्दत्तञ्चत्वत्सुते ॥ १ ॥ इत्युक्त्वाभगवा
न्विष्णुरादायनरकाह्वयम् ॥ सार्द्धम्पृथिव्यागंगायांममज्जजगताम्प्रभुः ॥ २ ॥ निमज्यक्षणमात्रेणप्राग्ज्योतिषपुरंगतः ॥ मध्यगङ्गामरूपस्य
कामाख्यायत्रनायिका ॥ ३ ॥ सचदेशःस्वराज्यार्थेपूर्वंगुप्तश्चशम्भुना ॥ किरातैर्बलिभिःक्रूरैरङ्गैरपिचवासितः ॥ ४ ॥ रुक्मस्तम्भनिभाँस्त
त्रकिराताञ्ज्ञानवर्जितान् ॥ अनर्थमुण्डितान्मद्यमांसाशनैकतत्परान् ॥ १०५ ॥ ददर्शविष्णुःकुपितान्विष्णुन्दृष्ट्वाद्विजर्षभाः ॥ तेषामधिप
तिस्तत्रघाटकोनामवीर्यवान् ॥ ६ ॥ रुक्मस्तंभनिभस्तुङ्गःप्रदीप्तइवपावकः ॥ सक्रोधाच्चतुरङ्गेनबलेनमहतायुतः ॥ ७ ॥ आससादजग
न्नाथन्नरकञ्चमहाबलम् ॥ आसाद्यशरवर्षेणववर्षप्रभुमव्ययम् ॥ ८ ॥ किरातैःसहितोराजाघाटकाख्यःकिरातराट् ॥ माधवोपितदापुत्रन्नरकंवी
र्यवत्तरम् ॥ ९ ॥ प्रेषयामासयुद्धायकिरातनृपतेस्तदा ॥ नरकोधनुरादायसहतैर्बलवत्तरैः ॥ ११० ॥ युयुधेसुचिरन्तत्रशस्त्रास्त्रैर्बहुधेरितैः ॥
ततोऽसौभल्लमादाययोजयित्वाधनुर्गुणैः॥११॥शिरःकिरातराजस्यचिच्छेदनरकोबली॥ मुख्यान्मुख्यान्किराताँश्चबहून्सेनाधिपाँस्तथा॥१२॥
जघानकुपितोवीरःकेशरीवमतंगजान् ॥ हतेथनृपतौकेचित्पलायनपरायणाः ॥१३॥ किराताःकेचनपुर्ननरकंशरणंगताः॥निहत्ययुद्ध्यमानाँ
स्तुसंरक्ष्यशरणंगतान् ॥१४॥ नरकःपितरंगत्वाप्रणम्याथन्यवेदयत् ॥ हतस्ताताकिरातानामधिपोघाटकोमया ॥११५॥ सेनाधिपाँश्चतस्या
न्यान्किमन्यत्करवाण्यहम् ॥ ॥ भगवानुवाच ॥ ॥ किराताञ्जहियावत्त्वन्देवींदिक्करवासिनीम् ॥ १६ ॥ पलायमानान् विद्राव्य
पालयञ्छरणंगतान् ॥ ॥ मार्कण्डेयउवाच ॥ ॥ ततःसनरकोवीरःसमारुह्यासितंगजम् ॥ १७ ॥ चतुर्दन्तम्महाकायंकिराताधिपवा

हनम् ॥ ऐरावतसमंवीर्येवेगेनगरुडोपमम् ॥ १८ ॥ किरातान्द्रावयामासयावद्विक्करवासिनीम् ॥ पितरम्पुनरागत्यवचनञ्चेदमब्रवीत् ॥
॥ १९ ॥ विद्राविताःकिरातास्तेसागरान्तंसमाश्रिताः ॥ हतश्चघाटकाख्योहिंकिराताधिपतिर्महान् ॥ १२० ॥ वेगिनंगजमारुह्यऐरावत
समंगुणैः ॥ यदन्यत्करणीयम्मेतदाज्ञापयसम्प्रति ॥ २१ ॥ भगवानुवाच ॥ ॥ करतोयासदागंगापूर्वभागावधिश्रया ॥ यावल्ललित
कान्तास्तितावदेवपुरन्तव ॥ २२ ॥ अत्रदेवीमहामायायोगनिद्राजगत्प्रसूः ॥ कामाख्यारूपमास्थायसदातिष्ठतिशोभना ॥ २३ ॥ अत्रा
स्तिनदराजोयंलौहित्योब्रह्मणःसुतः ॥ अत्रैवदशदिक्पालाःस्वेस्वेपीठेव्यवस्थिताः ॥ अत्रस्वयम्महादेवोब्रह्माचाहंव्यवस्थितः ॥ २४ ॥
चन्द्रःसूर्यश्चसततंवसतोत्रचपुत्रक ॥ सर्वेक्रीडार्थमायातारहस्यन्देशमुत्तमम् ॥ १२५ ॥ अत्रश्रीर्वसतेभद्राभोग्यमत्रतथाबहु ॥ अस्यमध्ये
स्थितोब्रह्माप्राङ्नक्षत्रंससर्जह ॥२६॥ ततःप्राग्ज्योतिषाख्येयम्पुरीशक्रपुरीसमा ॥ अत्रत्वंवसभद्रन्तेह्यभिषिक्तोमयास्वयम् ॥ २७ ॥ कृत
दारःसहामात्यैराजाभूत्वामहाबलः ॥ ॥ मार्कण्डेयउवाच ॥ ॥ एवमुक्त्वास्वयंविष्णुःशम्भोरनुमतेतदा ॥ २८ ॥ सर्वान्किरातान्पूर्व
स्यांसागरान्तेन्यवेशयत् ॥ पूर्वंललितकान्तायाःसमादायावधिम्पुनः ॥ २९ ॥ यावत्सागरपर्य्यन्तंकिरातास्तावदावसन् ॥ पश्चाल्ललि
तकान्तायादेशंकृत्वावधिम्पुनः ॥१३०॥ ॥ करतोयानदींयावत्कामाख्यानिलयन्तुतत् ॥ तस्मात्किरातानुत्सार्यवेदशास्त्रातिगान्बहून् ॥
॥ ३१ ॥ द्विजातीन्वासयामासतत्रवर्णान्त्सनातनान् ॥ वेदाध्ययनदानानिसततंवर्त्ततेयथा ॥ ३२ ॥ तथाचकारभगवान्मुनिभिर्वासय
न्विभुः ॥ वेदवादरताःसर्वेदानधर्मपरायणाः ॥ ३३ ॥ नचिरादभवद्देशःकामरूपाह्वयस्तदा ॥ ततोविदर्भराजस्यपुत्रीम्मायाह्वयांहरिः॥३४॥

पुत्राथवरयामासनरकस्यसमगुणैः ॥ तामुद्वाह्यहृषीकेशस्तस्मिन्पुरवरेस्वयम् ॥ १३५ ॥ तयासमंस्वतनयंराजत्वेनाभ्यषेचयत् ॥
सुगुप्ताश्चपुरीश्चक्रेगिरिदुर्गेणमाधवः ॥ ३६ ॥ तद्दुर्गंसर्वतोभद्रन्देवैरपिदुरासदम् ॥ ततःकिरातराजस्यचतुर्दन्ताःसुदन्तिनः ॥ ३७ ॥ पञ्च
विंशतिसाहस्रामहामात्रकुथैर्युताः ॥ यानिरत्नान्यनेकानिसैन्यानिविविधानिच ॥ ३८ ॥ अश्वाश्चाभरणाश्चैवतत्सर्वन्नरकोऽग्रहीत् ॥
यद्यत्सुभूषणंराज्ञोध्वजाश्चाभरणानिच ॥ ३९ ॥ तानितानिस्वयंविष्णुस्तनयस्यददौतदा ॥ रथञ्चप्रददौतस्मैत्रिषुलोकेषुदुर्लभम् ॥१४०॥
लोहाष्टचक्रसञ्छन्नमर्द्धयोजनविस्तृतम् ॥ युक्तमश्वसहस्रैश्चतथाष्टाभिर्मनोजवैः ॥ ४१ ॥ रत्नकाञ्चनचित्राढ्यंवेदिकाभागविस्तरम् ॥ वज्र
ध्वजेनमहताकाञ्चनेनविराजितम् ॥४२॥ हेमदण्डपताकाढ्यंवैदूर्यमणिकूबरम् ॥ सिंहव्याघ्रसमुद्भूतैश्चर्मभिश्छादितंसदा ॥४३॥ लोहताम्रै
श्चसञ्छन्नंकिंकिणीजालमालिनम् ॥ सर्वप्रहरणैर्युक्तम्बहुमायासमन्वितम्॥४४॥ शक्तिञ्चप्रददौतस्मैसर्वशत्रुविशातनीम्॥ज्वालामालाभिदी
प्तांगींरिपुकक्षाग्निरूपिणीम् ॥१४५॥ इमञ्चसमयम्प्रोचेनरकायमहात्मने ॥ नरकस्यहितायेशोवसुधायाःसमक्षतः ॥४६॥ इमांशक्तिन्नहिभवा
न्प्राणस्यसंशयंविना ॥ प्रयोक्ष्यतिकदाचित्तुमानुषेषुविशेषतः ॥४७॥ एषामायाचवैदर्भीभवतःसदृशीगुणैः ॥ भवतोजीवनंयावत्तावत्स्थास्य
तिशोभना ॥४८॥ त्वंतुप्रजायैत्रेतायांयत्नवान्वैभविष्यसि ॥ द्वापरान्तेतुसम्प्राप्तेप्रजातवभविष्यति ॥४९॥ विरोधोमुनिभिःसार्द्धम्ब्राह्मणैरपिपु
त्रक॥नकदाचित्त्वयाकार्यश्चिरञ्जीवितुमिच्छता ॥१५०॥ नराजभिर्नदैवैश्चविरोधोयुज्यतेतव ॥ महादुर्गस्यवैमध्येवसतोह्यपराजिते ॥५१॥

दिव्ययोषिद्गणैःसार्द्धंवसमानोतिभोगवान् ॥ स्वपर्वतेकामरूपेचिरन्त्वन्तिष्ठपुत्रक ॥ ५२ ॥ महादेवीम्महामायाञ्जगन्मातरमम्बिकाम् ॥
कामाख्यान्त्वंविनापुत्रनान्यदेवंयजिष्यासि ॥ ५३ ॥ इतोन्यथात्वंविहरन्गतप्राणोभविष्यसि ॥ तस्मान्नरकयत्नेनसमयम्प्रतिपालय ॥
॥ ५४ ॥ मार्कण्डेयउवाच ॥ इत्युक्त्वाभगवान्विष्णुर्नरकन्तनयंस्वकम् ॥ तमपास्यरहस्येनाम्पृथिवींवाक्यमब्रवीत् ॥ ५५ ॥ यद्यत्पूर्व
म्मयाप्रोक्तंकर्त्तव्यन्तवसुन्दरि ॥ तत्सर्वन्नरकायाशुभूत्यैसमुपदेशय ॥ ५६ ॥ यदैनन्त्वंस्वयंहन्तुम्माञ्जगद्धात्रिभाषसे ॥ तदातुमानुषःक
श्चिन्नरकन्निहनिष्यति ॥ ५७ ॥ ॥ पृथिव्युवाच ॥ ॥ प्रजार्थमेषयत्नोमेनिन्द्यःस्यात्सन्ततिंविना ॥ तस्मान्नाथप्रयत्नान्मेसन्ततिम्पाल
यिष्यसि ॥५८॥ ॥ मार्कण्डेयउवाच ॥ ॥ एवमस्त्वितितांविष्णुःपृथिवीम्प्रतिपावनः ॥ नरकञ्चसमाभाष्यतत्रान्तर्द्धिमगात्क्षणात्॥५९॥
गतेहरौनिजस्थानम्पृथिवीतनयंस्वकम् ॥ यत्पूर्वंहरिणाप्रोक्तन्तत्रतंव्यनयत्स्वयम् ॥ १६० ॥ नरकोपितदाधीमान्वेदशास्त्रार्थपारगः ॥
ब्रह्मण्यनीतिकुशलोवदान्योदानतत्परः ॥ ६१ ॥ कामाख्यापूजनरतोनीलकूटेमहागिरौ ॥ महाभोगीमहाश्रीमान्हीनबाधश्चशत्रुभिः ॥ ६२ ॥
सुचिरंराज्यमकरोच्छक्रवत्त्रिदशालये ॥ ततोविदेहराजोपिश्रुत्वैवनरकाश्रियम् ॥ ६३ ॥ सपुत्रभार्यःसगणोनरकन्द्रष्टुमभ्यगात् ॥ प्राग्ज्यो
तिषम्पुरंगत्वाकामरूपान्तरस्थितम् ॥६४॥ ददर्शनरकंराजाशरच्चन्द्रसमंश्रिया ॥ प्राग्ज्योतिषम्पुरम्मेनेसराजात्वमरावतीम् ॥६५॥ देवेन्द्रन्नर
कम्मेनेसत्परिच्छदभूषणम् ॥ ततोमहिष्यैतत्सर्वञ्जनकोवाक्यमब्रवीत् ॥ ६६ ॥ एषतेपालितसुतःश्रीमान्नरकसंज्ञकः ॥ पृथिव्यादायितःपुत्रः

१ रममाणः इ० पा० ।

महतीसम्प्रति ॥४७॥ यएवमानुषःपृथ्व्यामसाधारणभूतिभिः॥ वर्द्धतेदानवोवापिदैत्योवाप्यथवासुरः ॥४८॥ राक्षसःकिन्नरोवापिशक्रस्तान्त्स
हतेनहि ॥ सकौटिल्यन्देवगणैःसार्द्धंकुर्वन्नितस्ततः ॥ ४९ ॥ यथातथाप्रकारेणभ्रंशयत्येवतांश्रियः ॥ तस्यचेष्टतमोदेवोविष्णुर्नित्यंसनातनः॥
॥५०॥ सनशक्तस्यकुरुतेमनोऽनिष्टम्मनागपि ॥ यःसमाराधयेद्विष्णुंशक्रस्यानिष्टकारकः॥५१॥ तस्मैवरन्तुसच्छिद्रन्दत्त्वातंशातयत्वितः ॥
चिरमाराधितोविष्णुरिष्टान्कामान्प्रयच्छति ॥५२॥ महताकायदुःखेनपूजितःसन्प्रसीदति ॥ विनेष्टदेवतापूजांविभूतिमतुलाम्पुमान् ॥५३॥
कः प्राप्नोतिश्रुतःपूर्वन्नवापूर्वतरःक्वचित् ॥ त्वयानाराधितःपूर्वम्ब्रह्मावाविष्णुरीश्वरः ॥ ५४ ॥ तेनतेद्यमहाविघ्नाउत्पन्नाविषयेतव ॥ योवाविष्णुः
पालकस्तेननिसर्गानुकम्पकः ॥ ५५ ॥ किन्तुतेसक्षितेर्वाक्यात्तयाचाराधितोमुहुः ॥ दत्तञ्छिद्रञ्चतेविष्णुर्नापराध्यास्त्वयाद्विजाः ॥
॥ ५६ ॥ इतोन्यथात्वम्भविताहतश्रीरितिनःश्रुतम् ॥ अपराध्यस्त्वयाभूपवशिष्ठःपरमोमुनिः ॥ ५७ ॥ तेनस्मरणमात्रेणनायातौक्षिति
माधवौ ॥ तस्मात्त्वम्मित्रबुध्यस्वकौटिल्यंहरिमेधसः ॥ ५८ ॥ नाधुनायुज्यतेभौमतवौदासीनताकृतिः ॥ यत्तेमनसितातोयमितिसम्प्र
त्ययः सते ॥ ५९ ॥ वराहएवतेतातःसचलोकान्तरङ्गतः ॥ वराहोपिहरेरंशइतियच्छ्यतेत्वया ॥ ६० ॥ तस्यांशइत्यनुक्रोशः केनवाक्रिय
तेवद ॥ तस्मात्त्वङ्कुरुशम्भोर्वाब्रह्मणोवाधुनार्चनम् ॥६१॥ सतेप्रसन्नः परमामिष्टकामम्प्रदास्यति ॥ विघ्नोवामुनिशापोवामहेतिर्वातिपीडकः ॥
॥ ६२ ॥ विधौप्रसन्नेशम्भौवानचिरात्क्षयमेष्यति ॥ ॥ मार्कण्डेयउवाच ॥ ॥ जातसम्प्रत्ययोभौमोबाणस्यवचनात्तदा ॥ ६३ ॥

१ महतीचासावीतिरितिकर्म्मधारयः ।

सुप्रीतः समुवाचेदन्धीरघर्घरनिःस्वनः ॥ भौमउवाच ॥ यत्त्वयागदितम्बाणहितम्मेमित्रवत्सल ॥ ६४ ॥ तत्कार्यमचिरादेवतपश्चरण
मुत्तमम् ॥ विष्णुर्नाराधनीयोमेतत्रहेतुस्त्वयोदितः ॥ ६५ ॥ नैवाराध्यस्तथाशम्भुरन्तर्गुप्तः समेपुरे ॥ तस्माद्ब्रह्मासमाराध्योवचनात्तवमि
त्रक ॥ ६६ ॥ तत्पुत्रस्यमहाबाहोलौहित्यस्याम्बुसन्निधौ ॥ भवताध्यापितश्चाहंशिष्योऽथगुरुणायथा ॥ ६७ ॥ मित्रम्मित्रयथाधीरसाम्ना
परमवल्गुना ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्त्वासमहाबाहुर्बाणंवज्रध्वजस्तदा ॥ ६८ ॥ यथावत्पूजयामासतान्मित्रम्मित्रवत्सलः ॥
अर्चयित्वायथायोग्यंप्रस्थाप्यचबलेःसुतम् ॥ ६९ ॥ ब्रह्माराधनमत्युग्रङ्कर्त्तुमिच्छन्क्षितेःसुतः ॥ सतीरेनदराजस्यलौहित्यस्यमहात्मनः ॥
॥ ७० ॥ ब्रह्माचलंसमारुह्यतपस्तप्तुमुपस्थितः ॥ समानुषेणमानेनक्षितिपुत्रःशतंसमाः ॥ ७१ ॥ जलाहारव्रतेनैवसमानर्चपितामहम् ॥
सन्तुष्टःशतवर्षान्तेब्रह्मालोकपितामहः ॥ ७२ ॥ प्रत्यक्षीभूयनरकस्याग्रतःसमुपस्थितः ॥ प्रीतोऽस्मितेवरन्दास्येवरंवरयसुव्रत ॥ ७३ ॥
इतिचोवाचनरकंसतदा कमलासनः ॥ सदृष्ट्वासर्वलोकेशम्प्रत्यक्षङ्कमलासनम् ॥ ७४ ॥ प्रणम्यप्राञ्जलिःप्रोचेविनयानतकन्धरः ॥ देवाऽसु
रेभ्योरक्षोभ्यःसर्वेभ्योदेवयोनितः ॥ ७५ ॥ अवध्यत्वंसुरश्रेष्ठवरमेकम्प्रयच्छमे ॥ अविच्छिन्नासन्ततिर्मेयावच्चन्द्रोरविस्तपेत् ॥ ७६ ॥
तावद्भवतुलोकेशद्वितीयोयंवरोमम ॥ तिलोत्तमाद्यायादेव्यः सद्रूपगुणसंयुताः ॥ ७७ ॥ तास्तामेदयिताः सन्तुसहस्राणितुषोडश ॥ अजे
यत्वंसदाश्रीर्मान्नजहातुकदाचन ॥ ७८ ॥ इतिपञ्चवरामेद्यवृतास्त्वत्तःपितामह ॥ ॥ मार्कण्डेयउवाच ॥ ॥ माययामोहितोभौमोमुनि
शापंविस्मृत्यच ॥ ७९ ॥ अन्यद्वरान्तरंवव्रेमुनिशापस्तथास्थितः ॥ एवमस्त्वितितान्सर्वान्वरान्दत्त्वापितामहः ॥ ८० ॥ उवाचेदन्द्रा

परान्तेसंध्यायांसुरकन्यकाः ॥ तिलोत्तमाद्यास्तेजायाःसम्भविष्यन्तिभूतले ॥ ८१ ॥ नयावन्नारदोयातिवज्रध्वजपुरस्तव ॥ तावन्नमैथुने योज्याभवताताःक्षितेःसुत ॥ ८२ ॥ इत्युक्त्वासर्वलोकेशःक्षणादन्तर्हितोभवत् ॥ मुदमासाद्यपरमांस्वस्थानन्नरकोभ्यगात् ॥ ८३ ॥ ततोमु दितलोकन्तन्नगरंश्रीनिषेवितम् ॥ सदासोत्साहसम्पूर्णमीतिविघ्नविवर्जितम् ॥ ८४ ॥ अभवत्पशुसङ्घैश्चवाजिवारणकुम्भकैः ॥ सम्पूर्णन्देव राजस्यदयितेवामरावती ॥ ८५ ॥ उत्तीर्णतपसंश्रुत्वाबाणोदत्तवरन्तथा ॥ स्वयम्पुनरुपातिष्ठद्भौमंवज्रध्वजन्तदा ॥ ८६ ॥ सगत्वाभौमनग रंबाणःप्राग्ज्योतिषाह्वयम् ॥ पप्रच्छनरकम्मित्रन्तपसःसन्निवेशनम् ॥ ८७ ॥ कुत्रत्वयातपस्ततांकिंवाचीर्णन्त्वयाव्रतम् ॥ कीदृशोवावरो लब्धस्तन्ममाख्यातुमर्हसि ॥ ८८ ॥ दृष्टन्तवपुरंसर्वम्प्रहृष्टजनसंकुलम् ॥ वाजिवारणरत्नौघैःपूरितम्मङ्गलस्वनैः ॥ ८९ ॥ दृश्यतेद्यत्वया पाल्यंसस्यपूर्णमनामयम् ॥ कथ्यतांवाकथम्ब्रह्मावरन्तुभ्यम्प्रदत्तवान् ॥ ९० ॥ भौमउवाच ॥ ॥ ब्रह्मास्वयम्पर्वतरूपधारीकामेश्वरीन्धर्त्तु मिहाऽवतीर्णः ॥ तत्रस्वयंसम्प्रतिघस्रमेतिपुरानयावच्छपतेवाशिष्टः ॥ ९१ ॥ सोयम्पुरेमेबलिपुत्रराजतेदेवौघसेव्योप्यमरोत्तमांशः ॥ तत्राह मेकोवरतोयभोजनोवर्षाण्यकार्षञ्चतपःशतानिवै ॥ ९२ ॥ लौहित्यतीरेघनवायुसेवितेमनोहरेप्राणभृतांसुखप्रदे ॥ तपःप्रवृत्तस्यसुखंसमागम च्छरद्यथैकाशरदांशतानिमे ॥ ९३ ॥ ततःसतुष्टश्चतुराननोभवत्प्रत्यक्षतोमान्यगदच्चमद्धितम् ॥ तवप्रसन्नोस्मिवरंयथेप्सितन्दास्येगृहा णेतिपुरोऽथभूत्वा ॥ ९४ ॥ अवध्यतामेसुरयोनितःसुरादच्छिन्नसन्तानमजेयतातथा ॥ सदाविभूतिर्नजहातुमामितिवराश्चनायोंनवयौवना न्विताः ॥ ९५ ॥ एतेवराःपञ्चमयाततोवृताःसोपिप्रतिश्रुत्यगतोनिजास्पदम् ॥ ९६ ॥ ततोहमभ्येत्यपुरान्निजम्मुदामन्त्रिप्रवीरैःसहितःपुन

स्तान् ॥ पौरान्सबन्धून्सगणानमोदयन्दानेनमानेनचभोजनेन ॥९७॥ मार्कण्डेयउवाच ॥ ॥ इतीरितन्तस्यबलेःसुतस्तदाभौमस्यश्रुत्वा
मुमुदेनतत्क्षणात् ॥ इदन्तदोचेवचनङ्क्षितेःसुतन्तत्कालयुक्तन्नचसूनृतोद्भवम् ॥ ९८ ॥ नतेसुनेःशापमतीत्यगन्तुम्भूतामतिर्मित्रतदाविधेः
पुरः ॥ कथन्तुभद्रम्भवितातवेह भावीत्यवश्यंक्षितिपुत्रनित्यम् ॥ ९९ ॥ कृतस्यकरणन्नास्तिदैवाधिष्ठितकर्म्मणः ॥ भावीत्यवश्यंयद्भाव्यन्त
त्रब्रह्माप्यबाधकः ॥ १०० ॥ तस्मात्त्वंसुमहावीरानसुरान्पावकोपमान् ॥ सन्धायचपुरस्कृत्यसाचिव्येविनियोजय ॥ १ ॥ द्वारिसं
स्थाप्यवैवीरान्देवैरापिदुरासदान् ॥ अतिक्रमस्वदेवेशंयादिलब्धवरोभवान् ॥ २ ॥ विधिनायोवरोदत्तोभवतेतत्परीक्षणम् ॥ कर्त्तुमर्हसि
जायायामपुत्रोजनयात्मजम् ॥ ३ ॥ इत्युक्त्वाप्रययौबाणोयथावत्तेनपूजितः ॥ नरकोमित्रवचनंकर्त्तुंसमुपचक्रमे ॥ १०४ ॥ ॥ इति
कालिकापुराणेचत्वारिंशत्तमोध्यायः ॥ ४० ॥ ॥ छ ॥ मार्कण्डेयउवाच ॥ ॥ ऋतुमत्यान्तुजायायांकालेसनरकःक्रमात् ॥ भगद
त्तम्महाशीर्षम्मदवन्तंसुमालिनम् ॥ १ ॥ चतुरोजनयामासपुत्रानेतान्क्षितेःसुतः ॥ महासत्त्वान्महावीर्यान्वीरैरन्यैर्दुरासदान् ॥ २ ॥
ततोबाणस्यवचनाद्धयग्रीवन्तथामुरुम् ॥ सन्धायाथसमानीयसैनापत्येभ्यपेचयत् ॥ ३ ॥ मुरुंसन्निहितंश्रुत्वाहयग्रीवश्चभौमिना ॥
येयेक्षितौतदाह्यासन्नसुरास्तेऽपिसंगताः ॥ ४ ॥ हयग्रीवम्मुरुंश्रुत्वानरकेणसमागतम् ॥ निसुन्दसुन्दनामानावसुरौसैनिकैःसह ॥
॥ ५ ॥ विरूपाक्षस्तदादैत्यःसर्वेतेनसमागमन् ॥ ततःसपश्चिमद्वारिनरकःसेनयासह ॥ ६ ॥ मुरुन्द्वाराधिपश्चक्रेहयग्रीवन्तथोत्तरे ॥ पूर्वद्वा
रिनिसुन्दन्तुविरूपाक्षन्तुदक्षिणे ॥ ७ ॥ मध्येपञ्चजनंसुन्दंसैनापत्येभ्यपेचयत् ॥ मुरुःक्षुरान्तान्पाशांश्चषट्सहस्राण्ययोजयत् ॥ ८ ॥ द्वारि

तत्पुररक्षार्थंसत्कृतःक्षितिसूनुना ॥ एवम्पूर्वान्पूर्वतरानवमत्यसुमन्त्रिणः ॥ ९ ॥ असुरैरेवसततंसोऽसुरोमुदितोभवत् ॥ पूर्वंगृहीतम्भावंसप
रित्यज्यक्षितेःसुतः ॥ १० ॥ आसुरम्भावमासाद्यबाधतेत्रिदिवौकसः ॥ नदेवान्नमुनीन्त्सर्वान्नचजानातिकाँश्चन ॥ ११ ॥ सुरेश्वरञ्जिगाया
शुहयग्रीवसहायवान् ॥ एवंसचासुरम्भावन्तन्वानोविचरन्क्षितौ ॥ १२ ॥ बाणस्यवचनाच्छक्रंबाधयत्येववैमुनीन् ॥ देवेश्वरन्त्रिधाजित्वा
हयग्रीवसहायवान् ॥ १३ ॥ अदित्याःकुण्डलयुगन्त्रिषुलोकेषुविश्रुतम् ॥ सर्वरत्नाऽमृतस्राविदुःखविघ्नहरम्परम् ॥ १४ ॥ जहारनरकोभौ
मोनिर्भीतोदैवशापतः ॥ एवन्देवान्बाधमानोमुनीन्विप्रान्क्षितेःसुतः ॥ १५ ॥ पञ्चवर्षसहस्राणिराज्यंप्राग्ज्योतिषेकरोत् ॥ एतस्मिन्नन्तरेदे
वीमहाभारार्दिताक्षितिः॥१६॥ब्रह्मविष्णुमुखान्देवान्रक्षार्थंशरणंगता ॥ इदञ्चोवाचधातारम्प्रणम्योर्वीसमाधवम् ॥१७॥ दानवाराक्षसादैत्याह
रिणायेचसूदिताः ॥ तेराज्ञाम्मन्दिरेजाताअधुनाबलगर्विताः ॥ १८॥ तेषाम्भारमहंसोढुन्नशक्नोमिमहत्तरम् ॥ असंख्याताश्चतेसर्वेतान्संख्या
तुन्नचोत्सहे ॥ १९ ॥ अष्टौशतसहस्राणितेषाम्मुख्यामहाबलाः ॥ तेष्वप्यतिबलान्वोढुन्नताञ्छक्नोमिचाधुना ॥ २० ॥ बाणम्बलेःसुतंवीरंकं
सन्धेनुकमेवच ॥ अरिष्टञ्चप्रलम्बञ्चसुनामानम्मुरंशलम् ॥ २१ ॥ चाणूरमुष्टिकौमल्लौजरासन्धम्महाबलम् ॥ नरकञ्चहयग्रीवन्निसुन्दंसुन्द
मेवच ॥ २२ ॥ विरूपाक्षम्पञ्चनदंहिडिम्बञ्चबकम्बलम् ॥ जटासुरञ्चकिर्मीरम्मलायुधमलम्बुषम् ॥२३॥ सौभाख्यञ्चजरासन्धन्द्विविदञ्चा
पिवानरम् ॥ श्रुतायुधम्महादैत्यंशतायुधमथाऽपरम् ॥२४॥ ऋष्यशृंगसुतञ्चैवसुबाहुमतिबाहुकम् ॥ कालकञ्चाँस्तथादैत्यान्हिरण्यपुरवासि
नः ॥ २५ ॥ एतेषान्तुपदक्षोभैर्विशीर्णाहन्दिनेदिने ॥ लोकान्वोढुन्नशक्नोमितान्निघ्नन्तुसुरोत्तमाः ॥ २६ ॥ नचेद्रक्षाम्प्रकुर्वन्तिभवन्तःसु

रसत्तमाः ॥ तदाविशीर्णायास्यामिपातालमवशाधुना ॥ २७ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ ततस्तस्यावचः श्रुत्वा ब्रह्मविष्णुमहेश्वराः॥
इत्यूचुस्तेकरिष्यामः क्षिते भारविमोक्षणम् ॥ २८ ॥ विसृज्यपृथिवीन्देवींसर्वेदेवाःसनातनम् ॥ माधवन्तोषयामासुर्भारावतरणम्प्रति ॥२९॥
संतुतुष्टःसुरान्त्सर्वान्त्स्वांशैरवतरन्तुवै ॥ क्षितौभारावतारायेत्युक्त्वास्वयमिहंप्रभुः ॥ ३० ॥ अवतीर्णोऽथदेवक्यागर्भेभारावतारणे ॥ विष्णु
श्चावतरिष्यन्तंज्ञात्वादेवाःसनातनम् ॥ ३१ ॥ रम्भातिलोत्तमाद्याश्चदेव्योरूपगुणान्विताः ॥ क्षितावुत्पादयामासुःसहस्राणितुषोडश ॥३२॥
ताःसर्वाहिमवत्पृष्ठेक्रीडमानावरस्त्रियः ॥ अपश्यन्नरकोभौमस्ताजहारतदाहठात् ॥३३॥ तेनताधर्षितादेव्योनीताः प्राग्ज्यौषितम्प्रति ॥ नर
कम्प्रार्थयामासुः समयम्मैथुनम्प्रति ॥ ३४ ॥ नारदोयावदायातिनगरम्प्रतिभौमते ॥ अस्माकंकुरुरक्षाञ्चतावन्नोमुञ्चमैथुने ॥ ३५ ॥ ससमे
ष्यतिवीरत्वान्नचिरान्नोह्यनुग्रहात् ॥ तेनदृष्टावयंसार्द्धमेष्यामः संगमन्त्वया ॥ ३६ ॥ इतिसम्प्रार्थितस्ताभिर्नरकोभूमिनन्दनः ॥ ब्रह्मवाक्य
न्तदास्मृत्वाएवमस्तूचिवान्मुहुः ॥ ३७ ॥ एतस्मिन्नन्तरेदेवोभगवाँल्लोकभावनः ॥ देवक्याजठराज्जातोवृद्धोनन्दगृहेभवत् ॥ ३८ ॥ कंसके
शिप्रलम्बादीन्हत्वादैत्याननेकशः ॥ अकरोद्द्वारकावासंसागरेसलिलान्तरे ॥ ३९ ॥ तत्राष्टौकन्यकास्तेनस्वधर्मेणचस्वीकृताः ॥ कालिन्दी
मानुपीरूपारुक्मिणीरमणीततः ॥ ४० ॥ नग्नजित्तनयासत्यालक्ष्मणाचारुहासिनी ॥ सुशीलाशीलसम्पन्नातथाजाम्बवतीसती ॥ ४१ ॥
एतासुस्त्रीषुचततोह्यनुरक्तस्यतस्यवै ॥ षट्त्रिंशद्वत्सराजाताबलदेवसहायिनः ॥ ४२ ॥ प्रद्युम्नसाम्बप्रमुखाःपुत्रास्तस्यमहाबलाः ॥ जाता
स्तत्रद्विजश्रेष्ठाःशास्त्रेशस्त्रेचकोविदाः ॥४३॥ अनेकेनिहतादैत्याभारभूतास्तदाक्षितेः ॥ प्रहृष्टःक्रीडमानश्चद्वारकायामुवाससः ॥४४॥ अथश

क्रस्तदायातोनरकेणार्दितोभृशम् ॥ द्वारकाम्प्रतिकृष्णस्यदर्शनायगणैःसह ॥४५॥तत्रगत्वापरिष्वज्यकृष्णंल्लोकनमस्कृतम् ॥ पूजितस्तेनब
हुशआसनेकाञ्चनेस्थितः ॥ ४६ ॥ कथयामासहरयेनरकस्यविचेष्टितम् ॥ शक्रोयथापूर्ववृत्तंयथावावर्त्ततेऽधुना ॥ ४७ ॥ ॥ शक्रउवाच ॥
शृणुकृष्णमहाबाहोयदर्थमहमागतः ॥ कथयिष्यामितत्सर्वन्तत्रशंकान्नसंकुरु ॥ ४८ ॥ भूमिपुत्रोऽसुरोनाम्नानरकःसुरमर्दनः ॥ चिरंजीवीपु
राविष्णुक्षितिभ्याम्परिपालितः॥४९॥अधुनासक्षितिंविष्णुमवज्ञायदुरासदः ॥ बाणस्यवचनाद्भौमोब्रह्माणम्पर्यतोषयत् ॥५०॥ ब्रह्मणःसवरा
ल्लब्ध्वाह्यतीवाऽभूत्प्रदर्पितः ॥ माधवम्पृथिवींवापिसस्मारनकदाचन ॥ ५१ ॥ पूर्वमासीत्सधर्मात्माह्याराधितसुरोव्रती ॥ अधुनाबाधतेस
र्वानासुरम्भावमाश्रितः ॥ ५२ ॥ अदितेःकुण्डलेमोहाज्जहारामृतसम्भवे ॥ देवानृषीन्बाधमानोविप्राणामप्रियेरतः ॥ ५३ ॥ माञ्चापिबाधते
नित्यंकामगामीदुरासदः ॥ जेतातुसुरदैत्यानामवध्यःसर्वदेहिनाम् ॥ ५४ ॥ तवचाप्यन्तरप्रेक्षीतम्पापञ्जहिभूतये ॥ त्वदर्थंसर्वदेवैर्या
देवगन्धर्वकन्यकाः ॥ ५५ ॥ पुरापर्वतमुख्येतुहिमवत्यवतारिताः ॥ चतुर्दशसहस्राणिसहस्रेद्वेशताधिके ॥ ५६ ॥ ताःसर्वाःकन्यकाःपापः
प्रसह्यवरदर्पितः ॥ जहारसदुराधर्षोहयग्रीवसहायवान् ॥ ५७ ॥ सागरेयानिरत्नानिपृथिव्याञ्चत्रिविष्टपे ॥ तानिसर्वाणिसंहृत्यप्रमथ्यसु
रमानुषान् ॥ ५८ ॥ तीरेलौहित्यतीर्थस्यसोकरोन्मणिपर्वतम् ॥ तस्मिन्गिरौपुरींरम्याङ्कारयित्वालकाह्वयाम् ॥ ५९ ॥ ताःसर्वावास
यामासदेवगन्धर्वयोषितः ॥ एकवेणीधराःसर्वाःसम्भोगपरिवर्जिताः ॥ ६० ॥ त्वामेवताःप्रतीक्षन्तेसनाथाःकुरुकृष्णताः ॥ यावदा
गच्छतिपुरम्भवतोनारदोमुनिः ॥ ६१ ॥ तावन्नमैथुनेयत्नम्भौमत्वंसङ्करिष्यसि ॥ इतिताःसमयञ्चक्रुर्नरकस्यदुरात्मनः ॥ ६२ ॥ नारदश्चतदा

यातःप्राग्ज्योतिषपुरम्प्रति ॥ यदात्वन्नरकंहन्तुंगन्तातत्पुरमुत्तमम् ॥ ६३ ॥ तस्मात्त्वम्पापकर्माणन्नरकन्नरकोपमम् ॥ जहिदेवमनुष्याणां
कण्टकन्त्वन्दुरासदम् ॥ ६४ ॥ वधात्तस्यक्षितिर्देवीपुत्रशोकन्नचाप्स्यति ॥ स्वयमेववधन्तस्यदेवेभ्योयदयाचत ॥ ६५ ॥ तस्मात्तञ्जहिपा
पिष्ठन्नरकम्पापपूरुषम् ॥ स्त्रीरत्नान्यपिरत्नानितान्निहत्यसमुद्धर ॥ ६६ ॥ इत्युक्तोजगतान्नाथः शक्रेणसुमहात्मना ॥ प्रतिजज्ञेक्षितिसुतंहन्तुम्प्र
तितदैवहि ॥ ६७ ॥ प्रतिज्ञायवधन्तस्यशक्रेणसहकेशवः ॥ तदैवयात्रामकरोत्प्राग्ज्योतिषपुरम्प्रति ॥ ६८ ॥ आरुह्यगरुडङ्कृष्णःसत्यभा
माद्वितीयकः ॥ प्राग्ज्योतिषमुखोगच्छद्वासवस्त्रिदिवंययौ ॥६९॥ दिवमाक्रम्यगच्छन्तौकृष्णशक्रौमहाद्युती ॥ यादवादृदृशुस्तत्रसूर्याचन्द्र
मसौयथा ॥ ७० ॥ संस्तूयमानौगन्धर्वैर्देवरप्सरसांगणैः ॥ कृष्णःशक्रःक्षणादेवगतौखेतावदृश्यताम् ॥ ७१ ॥ ततःक्षणेनगरुडेनाससाद
जगत्पतिः ॥ पुरम्प्राग्ज्योतिषंरम्यन्नरकेणवशीकृतम् ॥ ७२ ॥ सदुर्गमैरवैःपाशैःषट्सहस्रैर्भयङ्करैः ॥ क्षुरान्तैर्वेष्टितम्पार्श्वेमृत्युपाशैरिवोच्छ्रि
तम् ॥ ७३ ॥ निर्गच्छन्तम्पुरात्तस्मान्नारदश्चददर्शसः ॥ सतुदेवमुनिःश्रीमान्यदागान्नरकम्प्रति ॥ ७४ ॥ तदाप्राग्ज्योतिषंगत्वासत्कृतस्तेन
नारदः ॥ संगमेसमयम्प्रोचेनरकायसयोषिताम् ॥ ७५ ॥ प्रवर्त्ततेद्यचैत्रस्यशुक्लपक्षस्यपञ्चमी॥नवम्यान्तुधरापुत्रप्राप्नोतिमहदापदम् ॥७६॥
तदायदिचतुर्दश्यांसुस्नातायोषितस्त्विमाः ॥ सुरतेषुत्वयातत्रप्रयोक्तव्यायथासुखम् ॥ ७७ ॥ नारदस्यवचःश्रुत्वानरकोभयमोहितः ॥ आसा
रश्चप्रसारश्चनगरेसन्न्यवेदयत् ॥ ७८ ॥ रक्षिभीरक्षितंराज्यंरक्षितञ्चसमन्ततः ॥ भयहर्षयुतोभौमःसमयंसमवैक्षत ॥ ७९ ॥ तस्मिन्नवसरेप्रा

१ प्राग्ज्योतिषंगत्वायदानरकम्प्रत्यगादित्यन्वयः । २ भवान्प्राप्स्यतीत्यर्थः । ३ आसारःसैन्यानांसर्व्वतोव्याप्तिःप्रसारःसैन्यानांतृणकाष्ठादिहेतवेइतस्ततोगमनम् ।

पकृष्णःप्राग्ज्योतिषम्पुरम् ॥ प्रथमम्पश्चिमन्द्वारमासाद्यगरुडध्वजः ॥ ८० ॥ पाशानांषट्सहस्राणिक्षुरान्तसञ्छिद्यनैकधा ॥ जघानसमुरु
न्दैत्यंसानुगञ्चसबान्धवम् ॥ ८१ ॥ षट्सहस्रामहावीरादानवाद्वारिसंस्थिताः ॥ हताश्चक्रेणहरिणातदैवमुरुणासह ॥ ८२ ॥ मुरुंहत्वासहस्रा
णिपुत्राँस्तस्यापराँश्चषट् ॥ जघानचक्रेणतदाखण्डशोन्याँश्चदानवान् ॥ ८३ ॥ ततोऽनेकशिलासंघानातिक्रम्यजनार्दनः ॥ सगणंसानुगञ्चैव
निसुन्दंसमपोथयत् ॥ ८४ ॥ एकोयोयोधयेद्देवान्त्सहस्रंवत्सरान्पुरा ॥ शक्रञ्चसमतिक्रम्यमहावीरपराक्रमः ॥ ८५ ॥ तञ्जघानहयग्री
वंसमतिक्रम्यकेशवः ॥ मध्येलौहित्यसंज्ञस्यभगवान्देवकीसुतः ॥ ८६ ॥ औदकायांविरूपाक्षंसुन्दंहत्वामहाबलः ॥ ततःपञ्चजनंवी
रञ्जघानपरमेश्वरः ॥ ८७ ॥ एतान्हत्वामहाकायान्महावीर्यान्दुरासदान् ॥ आससादजगन्नाथःपुरम्प्राग्ज्योतिषाह्वयम् ॥ ८८ ॥
वियत्स्थैर्दैवतैःसर्वैर्नारदेनमहात्मना ॥ जयशब्दैःस्तूयमानःप्रविवेशयथेश्वरः ॥ ८९ ॥ श्रियायुक्तान्दीप्यमानाम्प्राकाराट्टालभू
षिताम् ॥ समेनेनगरींविष्णुःकिमिन्द्रस्यामरावती ॥ ९० ॥ तत्रयुद्धम्महद्भूतन्नानाप्रहरणोद्यतम् ॥ भीरूणान्त्रासजननंशूराणां
हर्षवर्द्धनम् ॥ ९१ ॥ यथादेवाऽसुरंयुद्धन्तथैवसमपद्यत ॥ ततःशार्ङ्गविनिर्मुक्तैर्बाणैस्तान्दानवान्बहून् ॥ ९२ ॥ निजघानमहावा
हुर्गरुडस्थोजनार्दनः ॥ अष्टौशतसहस्राणिअष्टौशतशतानिच ॥ ९३ ॥ हत्वाऽसुरान्महावाहुर्नरकन्तंसमासदत् ॥ ९४ ॥ ततःश्रुत्वा
सनरकःपतितानसुरान्बहून् ॥ दृष्ट्वाकृष्णम्महावाहुंगरुडस्थम्महाबलम् ॥ ९५ ॥ वशिष्ठशापंसस्मारसमयम्माधवस्यच ॥ नारदस्यवचश्चा
पिवरच्छिद्रन्तथाविधेः ॥ ९६ ॥ सम्प्राप्तकालश्चतदाकेशवेनसमागतः ॥ युद्धमेवपरम्मेनेस्मरन्बाणवचस्तदा ॥ ९७ ॥ सकाञ्चनंसमा

रुह्यरथंवज्रध्वजंवरम् ॥ लोहचक्राष्टसंयुक्तन्त्रिनल्वप्रमितंरथम् ॥ ९८ ॥ युक्तमश्वसहस्रैस्तुवज्रध्वजविराजितम् ॥ नानाप्रहरणोपेतम्व
हुतूणीरसंयुतम् ॥ ९९ ॥ अगच्छत्समरायाशुनरकःपृथिवीसुतः ॥ सगच्छन्त्समरायाशुमानुषम्भावमर्चितम् ॥ १०० ॥ निन्द्यन्तथाऽ
सुरम्मेनेस्मरन्पूर्ववचोहरेः ॥ क्षणान्कृष्णंसददर्शगरुडोपरिसंस्थितम् ॥ १०१ ॥ शंखचक्रगदाशार्ङ्गवरासिधरमच्युतम् ॥ किरीटकुण्डल
युतंश्रीवत्सवक्षसंहारिम् ॥ १०२ ॥ कौस्तुभोद्भासितोरस्कम्पीताम्बरधरम्परम् ॥ सतेनयुयुधेवीरोविष्णुनाप्रभविष्णुना ॥ ३ ॥ प्राग्ज्योति
षाधिपोभौमोनरकःपृथिवीसुतः ॥ सयुध्यत्कृष्णनिकटेकालिकांकालिकोपमाम् ॥ ४ ॥ रक्तास्यनयनान्दीर्घांखड्गशक्तिधरान्तदा ॥
अपश्यज्जगतान्धात्रींकामाख्यामपिमोहिनीम् ॥ ५ ॥ सविस्मितस्तदाभीतस्तान्दृष्ट्वाजगताम्प्रसूम् ॥ योद्धव्यमित्येवतदायुयुधेनरकोऽ
सुरः ॥ ६ ॥ तेनसार्द्धन्तदाकृष्णःकृत्वासुमहदद्भुतम् ॥ युद्धंयादृक्पुराभूतन्नदेवेनचमानुषे ॥ ७ ॥ ततस्तेनाथभौमेनयुद्धकेलिसमाधवः ॥
चिरंकृत्वाजघानाथदेवेन्द्रम्प्रतिहर्षयन् ॥ ८ ॥ सुदर्शनेनचक्रेणमध्यदेशेतदाहरिः ॥ द्विधाचिच्छेदनरकंसहतोभ्यपतद्भुवि ॥ ९ ॥ विभक्त
न्तच्छरीरन्तुभूमौनिपतितन्तदा ॥ विराजतेवज्रभिन्नोयथागैरिकपर्वतः ॥ ११० ॥ पतितेतनयेदेवीपृथ्वीदृष्ट्वाशरीरकम् ॥ शोकवेगन्तदासेहे
ज्ञात्वाकालन्तदागतम् ॥ ११ ॥ अदितेःकुण्डलयुगंस्वयमादायकाश्यपी ॥ उपातिष्ठतगोविन्दंवचनञ्चेदमब्रवीत् ॥ १२ ॥ त्वयावराहरूपे
णयदाहञ्चोद्धृतापुरा॥तदात्वद्गात्रसंस्पर्शात्पुत्रोमेनरकःस्थितः॥१३॥सोयन्त्वयापालितश्चपातितश्चाधुनासुतः ॥ गृहाणकुण्डलेचेमेअदितेः
सर्वकामदे॥१४॥सन्ततिञ्चास्यगोविन्दप्रतिपालयनित्यदा ॥ श्रीभगवानुवाच ॥ भारावतरणेदेविनरकस्यवधःपुरा ॥११५॥ त्वयैवप्रार्थितोय

स्मात्तेनासौनिहतोमया॥पालयिष्येस्यसन्तानन्देवित्वद्वचनादहम्॥१६॥प्राग्ज्योतिषेभिषेक्ष्यामिनप्तारम्भगदत्तकम्॥ एवमुक्त्वामहाबाहुर्भग
वान्मधुसूदनः॥१७॥ अन्तःपुरंविवेशाथनरकस्यधनालयम्॥सतत्रददृशेवीरोरत्नानिविविधानिच॥ १८॥ राशीभूतानिशुद्धानिपर्वतानिव
राजतः॥ मुक्तामणिप्रवालानांवैदूर्यस्यचपर्वतम्॥ १९॥ तथारजतकूटानिवज्रकूटानिमाधवः॥ सुवर्णसञ्चयान्युक्तमदण्डान्रत्नमयध्वजान्
॥ १२०॥ वाहनानिविचित्राणियानानिशयनानिच॥ खचितानिस्वर्णरत्नैर्म्महार्हाणिमहान्तिच॥ २१॥ यद्यदृष्टञ्चयावच्चधनंरत्नम्मणि
स्तथा॥ भुवितादृक्चनोदृष्टमन्यत्रनरकालयात्॥ २२॥ नकुबेरस्यनेन्द्रस्यनयमस्याप्यपाम्पतेः॥ तावन्तिधनरत्नानियावन्तिनरकालये
॥ २३॥ केशवोप्यथतत्रैवनारदेनचसङ्गतः॥ अवेक्ष्यान्तःपुरधनंसारंसारतरन्ततः॥ २४॥ तेषांसमाददेयाह्यम्प्रभूतम्परवीरहा॥ यादत्ता
वैष्णवीशक्तिर्विष्णुनाप्रभविष्णुना॥ हत्वाभौमन्तुतांशक्तिञ्जगृहेदेवकीसुतः॥ १२५॥ पृथिव्यानारदेनैवसहितःकेशवस्तदा॥ भगदत्तम्भौ
मसुतम्प्राग्ज्योतिषपुरोत्तमे॥ २६॥ अभिषिच्यतदाभूतम्पुरमध्येन्यवेशयत्॥ अभिषिक्तन्तुतन्दृष्ट्वाभगदत्तन्तथाक्षितिः॥ २७॥ नमुर
थेंऽथतांशक्तिंकेशवंसमयाचत॥ केशवोपिक्षितेर्वाक्यान्नारदानुमतेनच॥ २८॥ तांशक्तिम्भगदत्तायसुप्रीतमनसाददौ॥ यच्छत्रंवरुणञ्जि
त्वाकाञ्चनस्राविसंज्ञकम्॥२९॥ समानयत्पुराभौमस्तच्छत्रंहरिराददे॥ अष्टभारसुवर्णानियत्संस्रवतिचान्वहम्॥ यत्क्रोशमात्रविस्तीर्णमर्द्ध
योजनमुच्छ्रितम्॥ १३०॥ रत्नोत्तमानिसर्वाणिचतुर्दन्ताँस्तथागजान्॥ चतुर्दशसहस्राणिपूजिताःप्रमदास्तथा॥ ३१॥ द्वारकाम्प्रतिदैत्यौ
घैर्वाहयामासकेशवः॥ ३२॥ यादवकन्यकाःपूर्वन्नरकेणहृताबलात्॥ तासांकृत्वाहृषीकेशोवेणीबन्धविमोक्षणम्॥ ३३॥ वासोभिर्भूष

णैर्दिव्यैस्ताःसत्कृत्यमुहुर्मुहुः ॥ आरोप्यचविमानेतुरक्षिभिर्बलिभिर्दृढैः ॥ ३४ ॥ नारदाधिष्ठिताःसर्वाद्वारकाम्प्रत्यवाहयत् ॥ यःकृतःसुरक
न्यार्थेभौमेनमणिपर्वतः ॥ १३५ ॥ मणिरत्नौघसंम्पूर्णोदिवाकरसमप्रभः ॥ उत्पाट्यतञ्जगन्नाथस्तार्क्ष्यपृष्ठेन्यवापयत् ॥ ३६ ॥ तथैववारुणं
ञ्छत्रंगरुडोपरिमाधवः ॥ आरोप्यसत्ययासार्द्धमासीनःसुमनाहरिः ॥ ३७ ॥ भगदत्तंसमाभाष्यपृथिवीञ्चजगत्पतिः ॥ प्रतस्थेद्वारकांवीरोवि
यन्मार्गेणवैद्रुतम् ॥ ३८ ॥ सुपर्णःकाञ्चनस्राविच्छत्रंसमणिपर्वतम् ॥ केशवंसत्ययासार्द्धंहेलयाखेवहन्ययौ ॥३९॥क्षणेनद्वारकाम्प्राप्यकेशवः
परवीरहा॥मुदञ्चलेभेसकलैर्बान्धवैश्चतथागणैः॥१४०॥एवंकालीमहामायाकालिकाख्याजगन्मयी ॥ विष्णुञ्चजगतान्नाथम्परापरपतिंहरिम् ॥
॥४१॥जगत्कारणकर्तारंज्ञानगम्यंजगन्मयम्॥सम्मोहयत्येवतथाह्यनुरागविरागवान्॥४२॥अनुगृह्णातिमित्राणिह्यमित्राणिनिहन्तिच ॥ नारी
पुमूढोरमतेद्वन्द्वेनापिचमुह्यते ॥४३॥ इतिवःकथितंविप्रायथाभून्नरकोऽसुरः ॥ यथाचवरलाभोभूद्यथाचास्यविचेष्टितम् ॥ ४४ ॥ आराधितो
यथाब्रह्मावाणबुद्ध्याथभौमिना ॥ किमन्यदुचितंवास्तितद्ब्रवन्तुद्विजोत्तमाः ॥१४५॥ इतिकालिकापुराणेनरकोपाख्यानेएकचत्वारिंशत्तमो
ध्यायः ॥ ४१ ॥ ऋषयऊचुः ॥ कथंगिरिसुताकालीबभूवजगताम्प्रसूः ॥ दाक्षायणीत्यक्ततनुःकथमापहरम्पतिम् ॥ १ ॥ कथमर्धशरीरंसाज
हारचपिनाकिनः ॥ एतन्नः पृच्छतांसम्यक्कथयस्वमहामते ॥ २ ॥ ॥ मार्कण्डेय उवाच ॥ ॥ शृणुध्वम्मुनिशार्दूलायथादाक्षायणीसती ॥
भूतागिरिसुतापूर्वंयथार्धमहरत्तनुम् ॥३॥ यदात्यजत्तनुन्देवीपूर्वन्दाक्षायणीसती ॥ तदैवमनसागच्छन्मेनकांहिमवद्गिरिम् ॥४॥ यदाहरेणस
हितादक्षकन्याहिमाचले ॥ चिक्रीडचतदातस्यामेनकाभूद्धितैषिणी ॥ ५ ॥ तस्याःसुतास्यामितिचआधायमनसिद्विजाः ॥ त्यक्तप्राणातदा

देवीभूताहिमवतः सुता ॥ ६ ॥ यदादाक्षायणीप्राणान्दक्षकोपाज्जहौपुरा ॥ तदैवमेनकादेवीआरिरावयिषुः शिवाम् ॥ ७ ॥ महामयाञ्जग
द्धात्रींयोगनिद्रांसनातनीम् ॥ मोहिनींसर्वभूतानांशरणंसर्वनाकिनाम् ॥ ८ ॥ अष्टम्यामुपवासन्तुकृत्वासानवमीतिथौ ॥ मोदकैर्बलिभिःपिष्टैः
पायसैर्गन्धपुष्पकैः ॥ ९ ॥ चैत्रेमासिसमारभ्यसप्तविंशतिवासरान् ॥ यावत्सम्पूजयामासपुत्रार्थिन्यन्वहंशुचिः ॥ १० ॥ गंगायामो
पधिप्रस्थेकृत्वामूर्तिम्महीमयीम् ॥ कदाचित्सानिराहाराकदाचित्साधृतव्रता ॥ ११ ॥ शिवाविन्यस्तमनसासप्तविंशतिवत्सरान् ॥
निनायमेनकादेवीपरमाम्भूतिमिच्छती ॥ १२ ॥ सप्तविंशतिवर्षान्तैर्जगन्माताजगन्मयी ॥ सुप्रीताभवदत्यर्थम्प्राहप्रत्यक्षताङ्गता ॥ १३ ॥
देव्युवाच ॥ ॥ यत्प्रार्थितन्त्वयादेविमत्तस्तत्प्रार्थयाधुना ॥ दास्येतवाहन्तत्सर्वंवाञ्छितंयद्धदाभवेत् ॥ १४ ॥ ततःसामेनकादेवीप्रत्य
क्षङ्कालिकांगताम् ॥ दृष्ट्वैवप्रणनामाथवचनंचेदमब्रवीत् ॥ १५ ॥ देविप्रत्यक्षतोरूपन्तवदृष्टम्मयाधुना ॥ त्वामहंस्तोतुमिच्छामिप्रसन्नायादि
मेशिवे ॥ १६ ॥ ततःसामांतरित्युक्त्वाकालिकासर्वमोहिनी ॥ बाहुभ्याञ्चारुवृत्ताभ्याम्मेनकाम्परिषस्वजे ॥ १७ ॥ ततःसामेनकादेवीकालि
काम्परमेश्वरीम् ॥ तुष्टाववाग्भिरिष्टाभिःशिवाम्प्रत्यक्षतः स्थिताम् ॥ १८ ॥ मेनकोवाच ॥ प्रेरयन्तीञ्जगद्धामचण्डिकाल्लँलोकधारिणीम् ॥ प्र
णमामिजगद्धात्रींसर्वकामार्थसाधिनीम् ॥ १९ ॥ नित्यानन्दांज्ञानमयींयोगनिद्राञ्जगत्प्रसूम् ॥ प्रणमामिशिवांशुद्धांविधिशौरिशिवात्मि
काम् ॥ २० ॥ मायामयीम्महामायाम्भक्तशोकविनाशिनीम् ॥ कामस्यवनिताम्भद्रान्नमामित्वाञ्चितिंशिवाम् ॥२१॥ सत्त्वोद्रेकाद्याभवित्रीह
नित्यानित्याचापिप्राणिनाम्बुद्धिरूपा॥सात्वम्बन्धच्छेदहेतुर्यतीनाङ्कस्तेगद्योमादृशीभिःप्रभावः ॥ २२ ॥ यात्वंसाम्नांसिद्धिरुक्तिस्तथार्चाया

वृत्तिर्यायजुपान्दीर्घरूपा ॥ हिंसायावाथर्ववेदस्यसात्वन्नित्यंकामन्त्वम्ममेष्टंविधेहि ॥ २३ ॥ नित्यानित्यैर्भागहीनैःपुरस्थैस्तन्मात्रैर्यैर्यत्यते
भूतवर्गः ॥ तेषांशक्तिस्त्वंसदानित्यरूपाकातेयोपायोग्यंवक्तुंसमर्था ॥२४॥ क्षितिर्धरित्रीजगतान्त्वमेवत्वमेवनित्याप्रकृतिस्वरूपा ॥ यथाव
शःक्रियतेब्रह्मरूपःसात्वन्नित्यामेप्रसीदाद्यमातः ॥ २५ ॥ त्वञ्जातवेदोगतशक्तिरूपात्वन्दाहिकासूर्यकरस्यशक्तिः ॥ आह्लादिकात्वम्बहुच
न्द्रिकायास्तान्त्वामहंस्तौमिनमामिचाम्बिकाम् ॥ २६ ॥ योषायोषित्प्रियाणांत्वंविद्यात्वञ्चोर्द्धरेतसाम् ॥ वाञ्छात्वंसर्वजगताम्मायाचत्व
न्तथाहरेः ॥ २७ ॥ यानेकरूपाणिविधायनित्यंसृष्टिंस्थितिंहानिमपीहकर्त्री[1] ॥ ब्रह्माच्युतस्थाणुशरीरहेतुःसात्वम्प्रसीदाद्यपुनर्नमस्ते
॥ २८ ॥ मार्कण्डेयउवाच ॥ ॥ ततःसाजगताम्माताकालिकापुनरेवहि ॥ उवाचमेनकान्देवींवाञ्छितंवरयेत्युत ॥ २९ ॥ ततःसाप्रेथ
मम्पुत्रशतंवव्रेयशस्विनी ॥ वीर्यवच्चायुषायुक्तमृद्धिसिद्धिसमन्वितम् ॥ ३० ॥ पश्चात्तथैकान्तनयांसुरूपाङ्गुणशालिनीम् ॥ कुलद्वयानन्द
करीम्भुवनत्रयदुर्लभाम् ॥ ३१ ॥ ततोभगवतीप्राहमेनकाम्मुनिसन्निभाम् ॥ स्मितपूर्वन्तदातस्याःपूरयन्तीमनोरथम् ॥ ३२ ॥ देव्युवाच ॥
शतम्पुत्राः सम्भवन्तुभवत्यावीर्यसंयुताः॥तत्रैकोबलवान्मुख्यःप्रथमंसम्भविष्यति ॥ ३३ ॥ सुताचतवदेवानाम्मानुषाणाञ्चरक्षसाम् ॥
हितायसर्वजगताम्भविष्याम्यहमेवते ॥ ३४ ॥ त्वंसुखप्रसवानित्यन्तथानित्यम्पतिव्रता ॥ अम्लानारूपसम्पन्नासुभगाचभविष्यसि ॥३५॥
एवमुक्त्वाजगद्धात्रीतत्रैवान्तरधीयत ॥ मेनकाचमुदंलब्ध्वास्वस्थानम्प्रविवेशह ॥ ३६ ॥ ततः कालेतुसम्प्राप्तेमैनाकमचलोत्तमम् ॥ यक्षेण

१ कर्त्रीति ताच्छील्यादिषुतृन् ।

सहयोद्यापिसिन्धुमध्येप्रवर्त्तते ॥ ३७ ॥ मेनकासुपुवेदेवीदेवेन्द्रंस्पर्द्धयागतम् ॥ अन्यानूनशतम्पुत्रान्क्रमात्सासुपुवेसती ॥ ३८ ॥ महावी
र्यान्महासत्त्वान्त्सम्पन्नान्त्सर्वतोगुणैः ॥ ततःसाकालिकादेवीयोगनिद्राजगन्मयी ॥ ३९ ॥ पूर्वत्यक्तसतीरूपाजन्मार्थम्मेनकांययौ ॥
समयस्यानुरूपेणमेनकाजठरेशिवा॥४०॥समुद्भूयसमुत्पन्नासालक्ष्मीरिवसागरात् ॥ वसन्तसमयेदेवीनवम्यामृक्षयोगतः ॥ ४१ ॥ अर्धरात्रे
समुत्पन्नागंगेवशशिमण्डलात् ॥ ततस्तस्यान्तुजातायाम्प्रसन्नाअभवन्दिशः ॥४२॥ अनुकूलोववौवायुर्गम्भीरोगन्धवाञ्छुभः ॥ बभूवपुष्पवृ
ष्टिश्चतोयवृष्टिस्तथापरा ॥ ४३ ॥ जज्वलुश्चाग्नयःशान्ताजगर्जुश्चघनाघनम् ॥ तस्यान्तुजातमात्रायांसर्वेस्वास्थमपद्यत ॥ ४४ ॥ तान्तु
दृष्ट्वातथाजातान्नीलोत्पलदलानुगाम् ॥ श्यामांसामेनकादेवीमुदमापातिहर्षिता ॥ ४५ ॥ देवाश्चहर्षमतुलम्प्रापुस्तत्रमुहुर्मुहुः ॥ तुष्टुवुश्चा
न्तरिक्षस्थागन्धर्वाप्सरसांगणाः ॥ ४६ ॥ तान्तुनीलोत्पलदलश्यामांहिमवतःसुताम् ॥ कालीतिनाम्नाहिमवानाजुहावकृतोदिने ॥ ४७ ॥
बान्धवैस्तुसमस्तैस्तन्नाम्नासापार्वतीतिच ॥ कालीतिचतथानाम्नाकीर्तितागिरिनन्दिनी ॥ ४८ ॥ ततःसाववृधेदेवीगिरिराजगृहेशुभा ॥
गङ्गेववर्षासमयेशरदीवाथचन्द्रिका ॥ ४९ ॥ एधमानानुदिवसञ्चावैगीचारुताम्मुहुः ॥ दध्रेसानुदिनंकालीचन्द्रबिम्बंकलामिव ॥ ५० ॥
सावालभावमापन्नाक्रीडन्तीकालिकामुदम् ॥ सखीभिःप्रापविपुलांकालिन्दीवसरिद्भजैः ॥ ५१ ॥ षड्गुणास्तांस्वयन्देवीम्पूर्वजन्मवशी
कृताः ॥ स्वयमीयुर्द्विजश्रेष्ठाःप्रावृषंकालिकायथा ॥ ५२ ॥ अतिचक्रामस्वगुणैःसादेवीदेवकन्यकाः ॥ रूपैरप्सरसःसर्वागीतैर्गन्धर्वक
न्यकाः ॥ ५३ ॥ सावाल्यएवसततम्बन्धुवर्गप्रियाशुभा ॥ गुणैःस्वबन्धून्पितरम्मातरञ्चाप्यतोषयत् ॥ ५४ ॥ मातुःस्तुतिकरीनित्याम्पि

तृपूजनतत्परा ॥ सर्वदाभ्रातृसहिताजगन्माताभवत्तदा ॥ ५५ ॥ सर्वदासाजगन्माताकन्यासासमुपस्थिता ॥ पितुःसमीपेवसतिकालि
न्दीवविभावसोः ॥ ५६ ॥ अथैकदातान्निकटेनिधायहिमवद्गिरिः ॥ तनयैःसहसंगम्यस्थितःपरमकौतुकात् ॥ ५७ ॥ अथागतस्तत्रमु
निर्नारदोदेवलोकतः ॥ हिमवन्तंसुखासीनंसुतैःसार्द्धन्ददर्शसः ॥ ५८ ॥ अपश्यन्निकटेकालींकालिकामिवसूर्यतः ॥ ज्योत्स्नामिवसुधां
शोस्तुसम्यग्वृद्धांशरन्निशि ॥ ५९ ॥ पूजितस्तेनगिरिणाकृतासनपरिग्रहः ॥ नारदःप्रथमंशैलंवृत्तान्तम्पर्यपृच्छत ॥ ६० ॥ ततोविदित
वृत्तान्तोनारदोमेनकाम्प्रति ॥ उवाचहर्षयन्वाक्यम्मुनिर्वाक्यविशारदः ॥ ६१ ॥ एषातेतनयारुच्याशुद्धांशोरिववर्द्धिता ॥ आद्याकलाशै
लराजसर्वलक्षणशालिनी ॥ ६२ ॥ शम्भोर्भवित्रीदयितासानुकूलासदाहरेः ॥ तस्यचित्तंवशेचैषाकरिष्यतितपस्विनी ॥ ६३ ॥ सचाप्ये
नामृतेजायान्नान्यामुद्वाहयिष्यति ॥ एतयोर्यादृशःप्रेमाकयोश्चिन्नैवतादृशः ॥ ६४ ॥ भूतोवाभवितावापिनाधुनाचप्रवर्त्तते ॥ अनयासुरका
र्याणिकर्त्तव्यानिबहूनिच ॥ ६५ ॥ अनयैवगिरिश्रेष्ठअर्द्धनारीश्वरोहरः ॥ भविष्यतिचसौहार्दाज्ज्योत्स्नयैवामृतात्मनः ॥ ६६ ॥ शरी
रार्द्धहरस्यैषाकरिष्यतिनिजास्पदे ॥ स्वर्णगौरीसुवर्णाभातपसातोषितेहरे ॥ ६७ ॥ विद्युद्गौरीत्वियंकालीतवपुत्रीभविष्यति ॥ गौरीतिनाम्ना
पश्चात्तुख्यातिमेषागमिष्यति ॥ ६८ ॥ नान्यस्मैत्वमिमान्दातुम्मनःकर्त्तुमिहार्हसि ॥ इदञ्चोपांशुदेवानान्नप्रकाश्यङ्करिष्यसि ॥ ६९ ॥
मार्कण्डेयउवाच ॥ ॥ इतितस्यवचःश्रुत्वादेवर्षेर्नारदस्यच ॥ उवाचहिमवान्वाक्यंमुनिम्प्रतिविशारदः ॥ ७० ॥ श्रूयतेत्यक्तसंगः
समहादेवोयतात्मवान् ॥ तपश्चोपांशुतपतिदेवानामप्यगोचरः ॥ ७१ ॥ सकथन्ध्यानमार्गस्थःपरब्रह्मार्पितम्मनः ॥ भ्रंशयिष्यतिदेवर्षे

तत्रमेसंशयोमहान् ॥ ७२ ॥ अक्षरम्परमम्ब्रह्मप्रदीपकलिकोपमम् ॥ सोन्तःपश्यतिसर्वत्रनतुबाह्यान्निरीक्षते ॥ ७३ ॥ इतिस्मश्रूयतेनित्यं
किन्नराणाम्मुखाद्द्विज ॥ सकथन्तादृशंस्वान्तंशक्तोभ्रंशयितुंहरः ॥ ७४ ॥ विशेषतःश्रूयतेस्मदाक्षायण्यासमंहरः ॥ समयंज्ञातवान्पूर्वन्तन्मे
निगदतःशृणु ॥ ७५ ॥ त्वामृतेन्यान्नवनितान्दाक्षायणिसतिप्रिये ॥ भार्यार्थेसंग्रहीष्यामिसत्यमेतद्ब्रवीमिते ॥ ७६ ॥ इतिसत्यासमन्तेनपु
रैवसमयःकृतः ॥ तस्याम्मृतायांसकथंस्त्रियमन्यांग्रहीष्यति ॥ ७७ ॥ ॥ नारदउवाच ॥ ॥ नात्रकार्यात्वयाचिन्तागिरिराजभवत्सुता ॥
एषासतीसमुत्पन्नाहरायैवनसंशयः ॥ ७८ ॥ मार्कण्डेयउवाच ॥ इत्युक्त्वासतुदेवर्षिर्नारदस्तुयथासती ॥ मेनकायांसमुत्पन्नासर्वन्तत्प्रोक्तवा
न्गिरौ ॥७९॥ तत्सर्वम्पूर्ववृत्तान्तन्नारदस्यमखाद्गिरिः॥ श्रुत्वासपुत्रदारःसतदानिःसंशयोभवत् ॥ ८० ॥ ततःकालीकथांश्रुत्वानारदस्यमुखा
त्तदा ॥ लज्जयाधोमुखीभूत्वास्मितविस्तारितानना ॥ ८१ ॥ करेणतान्तुसंगृह्यप्रोन्नमय्यमुखंगिरिः ॥ मूर्ध्निसम्यगुपाघ्रायस्वासनेसन्न्यवेश
यत् ॥८२॥ ततस्ताम्पुनरेवाहनारदःशैलपुत्रिकाम् ॥ हर्षयन्गिरिराजन्तुमेनकान्तनयैःसह॥८३॥ सिंहासनेनकिन्त्वस्याःशैलराजभवेत्तव ॥
शम्भोरूरुःसदैवास्याआसनन्तुभविष्यति ॥८४॥ हरोरुमासनम्प्राप्यतनयातवसन्ततम् ॥ नान्यत्रक्वत्रचित्तुष्टिमासनेप्राप्यतेगिरे ॥ ८५ ॥
इतिवचनमुदारन्नारदः शैलराजन्त्रिदिवमगमदुच्चातत्क्षणाद्देवयानैः ॥ गिरिपतिरपिचिन्ताहर्षसम्मोहयुक्तः प्रविशदचलयासौस्वान्तरम्पद्मग
र्भम् ॥ ८६ ॥ इतिश्रीकालिकापुराणेद्वाचत्वारशोध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ एतस्मिन्नन्तरेशम्भुःक्षिप्रन्त्य
क्त्वातदासरः ॥ गङ्गावतारमगमद्धिमवत्प्रस्थमुत्तमम् ॥१॥ यत्रगङ्गानिपतितापुरात्रह्मपुरात्सृता ॥ औषधीप्रस्थनगरस्यादूरेसानुरुत्तमः ॥२॥

तत्रभर्गः स्वमात्मानमक्षरम्परमात्परम् ॥ चेतोज्ञानमयंन्नित्यञ्ज्योतीरूपन्निराकुलम् ॥ ३ ॥ जगन्मयम्प्रदीपाभन्द्वैतहीनाविशेषकम् ॥
एकाग्रश्चिन्तयामासभगवान्वृषभध्वजः ॥ ४ ॥ हरेध्यानपरेतस्मिन्प्रमथाध्यानतत्पराः ॥ अभवन्केचिदपरेनन्दिभृङ्ग्यादयोगणाः ॥ ५ ॥
द्वाःस्थाभूतामहाभागायेपूर्वद्वारियोजिताः ॥ तावन्तोपिगणास्तत्रनैवकिञ्चनकूजितम् ॥ ६ ॥ तेषांसंश्रूयतेसर्वेनिःशब्दाःसंस्थितास्ततः ॥
अन्येतुतत्रक्रीडन्तिगणादूरान्तरस्थिताः ॥ ७ ॥ कुसुमैश्चदलैर्भक्तैर्गिरिप्रस्रवणोदकैः ॥ रत्नानिचाविचिन्वन्तोभूषितागैरिकैस्तथा ॥ ८ ॥
सगणन्तुतथादृष्ट्वागिरिराजोगतंहरम् ॥ स्वस्थानमोषधिप्रस्थन्निःसृत्यसहितोगणैः ॥ ९ ॥ पूजार्थमुपतस्थे स यथायोग्यन्तथार्चयत् ॥
सचापिशम्भुस्तस्यार्चाम्परयाश्रद्धयायुतः ॥ १० ॥ प्रतिजग्राहकूटस्थोगङ्गाशीर्षेयथापुरा ॥ पूजितस्तेनसहसागिरिराजंवृषध्वजः ॥ ११ ॥
उवाचध्यानयोगस्थः स्मयन्निवजगत्पतिः ॥ ॥ ईश्वरउवाच ॥ ॥ तवप्रस्थेतपस्तप्तुंरहस्यमहमागतः ॥ १२ ॥ नयथाकोपिनिकटंस
मायातितथाकुरु ॥ त्वम्महात्माजगद्धाममुनीनाञ्चसदाश्रयः ॥ १३ ॥ देवानांराक्षसानाञ्चयक्षाणांकिन्नरस्यच ॥ सदावासोद्विजातीनांगंगा
पूतश्चनित्यदा ॥ १४ ॥ त्वत्पुरस्यास्यनिकटेप्रस्थंगंगावतारणम् ॥ आश्रितोहंगिरिश्रेष्ठतद्योग्यंकुरुसाम्प्रतम् ॥ १५ ॥ इत्युक्त्वाजगतान्ना
थस्तूष्णीमासवृषध्वजः ॥ गिरिराजस्तदाशम्भुम्प्रणयादिदमब्रवीत् ॥ १६ ॥ पूतोस्मिजगतान्नाथत्वयाहम्परमेश्वर ॥ आगतेनाद्यविषयमि
तःकृत्यङ्किमस्तिमे ॥ १७ ॥ तपसामहतात्वंहिदेवैर्यत्नपरस्थितैः ॥ नप्राप्यसेजगन्नाथसत्वंस्वयमुपस्थितः ॥ १८ ॥ मत्तोधन्यतरोनास्तिन
मत्तोन्योस्तिपुण्यवान् ॥ यद्भवान्हिमवत्प्रस्थेतपसेसमुपस्थितः ॥ १९ ॥ देवेन्द्रादधिकम्मन्येआत्मानम्परमेश्वर ॥ सगणेनत्वयाप्राप्तोयद

हङ्कामचारतः ॥ २० ॥ इत्युक्त्वागिरिराजोथस्वेवेश्मपुनरागमत् ॥ नियमायपरीवारान्गणानप्यवदत्स्वकान् ॥ २१ ॥ अद्यप्रभृतिनो
गन्ताकोपिगंगावतारणम् ॥ मच्छासनन्नहिविनायोगन्तादण्डयेह्यहम् ॥ २२ ॥ इतिस्वान्त्सनियम्याशुतिलपुष्पकुशान्फलम् ॥ समादाया
शुतनयासहितोगाद्धरान्तिकम् ॥ २३ ॥ अथगत्वाजगन्नाथंहरन्ध्यानपरन्तदा ॥ नमयामासतनयांकालींसर्वगुणान्विताम् ॥ २४ ॥ तिल
पुष्पादिकंयद्यत्तत्तदग्रेनिधायसः ॥ अग्रेकृत्वासुतांशम्भमिदमाहसशैलराट् ॥ २५ ॥ भगवँस्तनयेयम्मेत्वामाराधयितुम्प्रति ॥ समादिष्टास
मानीतात्वदाराधनकांक्षिणी ॥ २६ ॥ सखिभ्यांसहनित्यन्त्वांसेवतामीशशंकर ॥ अनुजानीहिसेवायैमयितेयद्यनुग्रहः ॥ २७ ॥ अथतां
शङ्करोपश्यत्प्रथमारूढयौवनाम् ॥ फुल्लेन्दीवरपत्राभाम्पूर्णचन्द्रनिभाननाम् ॥ २८ ॥ समग्रनीलकेशौघप्राप्तवेशविजृम्भिकाम् ॥ कम्बुग्रीवां
विशालाक्षीञ्चारुकर्णयुगोज्ज्वलाम् ॥ २९ ॥ मृडालायतपर्य्यन्तबाहुयुग्ममनोरमाम् ॥ राजीवकुण्डलप्रख्यघनपीनोन्नतस्तनौ ॥ ३० ॥
बिभ्रतींक्षीणसन्मध्यांरक्तपाणितलद्वयाम् ॥ स्थलपद्मप्रतीकाशपादयुग्ममनोरमाम् ॥ ३१ ॥ मध्यक्षीणाम्महासत्त्वांवृत्तस्थूलघनोज्ज्वला
म् ॥ सुजंघान्नागनासोरुन्निम्ननाभिविभूषिताम् ॥ ३२ ॥ सुवृत्तचारुजंघायान्त्रिगम्भीरांपङ्कजताम् ॥ सर्वलक्षणसम्पूर्णान्त्रिषुलोकेषुदुर्ल्ल
भाम् ॥ ३३ ॥ ध्यानपञ्जरनिर्बन्धमुनिमानसमप्यरम् ॥ दर्शनाद्भ्रंशितुंशक्तांयोषिद्गणशिरोमणिम् ॥ ३४ ॥ तान्दृष्ट्वातपसेनित्यन्ध्यानि
नाञ्चमनोहराम् ॥ विघ्नहेतुश्चानुरागवर्द्धिनींकामरूपिणीम् ॥ ३५ ॥ गिरिराजस्यवचनात्तनयान्तस्यशंकरः ॥ पर्येषणायैजगृहेगौरवादपि
गोरथः ॥ ३६ ॥ उवाचेदन्तवसुतासखिभ्यांसहशैलराट् ॥ नित्यम्मेसेवयायत्तानिर्भीताह्यत्रतिष्ठतु ॥ ३७ ॥ एवमुक्तातुतान्देवींसेवायैजगृहे

हरः ॥ इदमेवमहद्धैर्यंयद्विघ्नोनहिविघ्नयेत् ॥ ३८ ॥ निर्विघ्नंस्थानमासाद्ययत्तपःक्रियतेद्विजैः ॥ ३९ ॥ सविघ्नोविघ्नहेतुंयःपरिभूयप्रवर्त्तते ॥
तन्महत्त्वञ्चतपसान्धीरताचतपस्विनाम् ॥ ४० ॥ ततःस्वपुरमायातोगिरिराट्परिचारकैः ॥ हरश्चध्यानयोगेनपराश्चिन्तयितुंस्थितः ॥
॥ ४१ ॥ कालीसखिभ्यांसहिताप्रत्यहञ्चन्द्रशेखरम् ॥ सेवमानामहादेवंगमनागमनेस्थिता ॥ ४२ ॥ कदाचित्सहिताकालीसखिभ्यांशंक
राग्रतः ॥ वितन्वतीशुभंगीतम्पञ्चमञ्चातनोत्तदा ॥ ४३ ॥ कदाचित्कुशपुष्पादिसमिद्धारिहरायसा ॥ सखिभ्यांस्नानसत्कारंकुर्वतीन्यवसत्त
दा ॥ ४४ ॥ कदाचिदग्रेनियतास्थिताचन्द्रभृतोमुखम् ॥ वीक्षन्तीचिन्तयामाससकामाचन्द्रशेखरम् ॥ ४५ ॥ यदाकार्येषुसाव्यग्रात
दातत्कर्म्मचेष्टते ॥ कृत्यहीनायदासातुतदैवाचिन्तयद्धरम् ॥ ४६ ॥ कदामामेषभूतेशःकर्त्तापाणिगृहीतिकाम् ॥ कदामयासमंरन्तानानास
द्भावभावनैः ॥ ४७ ॥ इतिचिन्तापराकालीस्वप्नेपिपरमेश्वरम् ॥ अर्चयत्येवपरमंसदाचिन्तनतत्परा ॥ ४८ ॥ अग्रङ्गतायदाकालीप्रध्या
यतिमहेश्वरम् ॥ तदातद्वेदभूतेशस्तान्निसर्गपरिस्थिताम् ॥ ४९ ॥ किन्तुगर्भगतैर्बीजैर्द्धृतदेहेतितान्तदा ॥ नाग्रहीद्गिरिशःकालीम्भा
र्यार्थेह्यधृतव्रताम् ॥ ५० ॥ महादेवोपितान्दृष्ट्वातदैवेदमचिन्तयत् ॥ कथमेषातपश्चर्याव्रतंकुर्याद्गिरेःसुता ॥ ५१ ॥ कृतव्रतांग्रही
ष्यामिगर्भबीजविवर्जिताम् ॥ कालीम्भार्यांस्वदयितांयोनिजामतिदूषिताम् ॥ ५२ ॥ व्रतेनचाथसंस्कारैर्गर्भबीजंविमुच्यते ॥
तस्माद्व्रतंयथाकालीकुर्यात्तद्युज्यतेकथम् ॥ ५३ ॥ इतिश्रीकालिकापुराणेत्रिचत्वारिंशोध्यायः ॥ ४३ ॥ ॥ छ ॥ ॥ मार्कण्डेयउवाच ॥
॥ इतिसञ्चिन्त्यभूतेशस्तदाध्यानमनाःस्थितः ॥ ध्यानासक्तस्यतस्याथनान्यचिन्ताव्यजायत ॥ १ ॥ कालीत्वनुदिनंशम्भुम्भक्त्याभृशम

सेवत ॥ विचिन्तयन्तीसततन्तस्यरूपम्महात्मनः ॥ २ ॥ हरोध्यानपरःकालीन्नित्यम्प्रत्यक्षतःस्थिताम् ॥ विस्मृत्यपूर्ववृत्तान्तम्पश्यन्नपिनप
श्यति ॥ ३ ॥ एतस्मिन्नंतरेदेवास्तारकोनामदैत्यराट् ॥ बबाधेसर्वलोकाँश्चब्रह्मणोवरदर्पितः ॥ ४ ॥ वशीकृत्यसलोकाँस्त्रीन्त्स्वयमि
न्द्रोबभूवह ॥ विद्राव्यसकलान्देवान्दैत्यान्त्स्वाँस्तत्पदेषुच ॥ ५ ॥ स्वयन्नियोजयामासदेवयोनिषुचाप्यसौ ॥ नयमःस्वेच्छयालो
कांस्तस्मिन्नाज्ञिनियच्छति ॥ ६ ॥ नस्वेच्छयातथामूर्योलोकाँस्तपतितद्भयात् ॥ चन्द्रस्तुनर्मसाचिव्यन्तस्यकुर्वन्त्सराश्मिभिः ॥ ७ ॥
वायुना सहसंगम्यतत्सेवांविदधेनिशम् ॥ सदासौगन्ध्यगाम्भीयशत्यास्निग्धत्वसंयुतः ॥ ॥ तम्वीजयन्ववौवायुःशासनात्तस्यभूभृतः ॥ धन
दोपियथासारन्धनमादाययत्नतः ॥ ९ ॥ सावधानस्तस्यसेवामकरोत्तारकेच्छया ॥ अग्निस्तस्याभवत्सूदःशासनात्तारकस्यतु ॥ १० ॥
व्यञ्जनान्यथभोज्यानिचक्रेतस्येच्छयातदा ॥ निर्ऋतिस्तस्यसततंसहितः सर्वराक्षसैः ॥ ११ ॥ अश्वान्गजान्वाहनानिकारयामाससाध्वसा
त् ॥ नृत्यद्भिरप्सरोभिश्चस्तुवद्भिःसूतमागधैः ॥ १२ ॥ गायमानैश्चगन्धर्वैःसाश्चिक्रीडसुरान्द्विषन् ॥ एवंससर्वलोकाँस्तुत्रिष्वप्यथविलोडयन्
॥ १३ ॥ लोकेषुसारान्त्साराँश्चदेवानामप्यथाग्रहीत् ॥ तेनाभिबाधिताःसर्वेदेवाःशक्रपुरोगमाः ॥ १४ ॥ ब्रह्माणंशरणञ्जग्मुरनाथानाथमु
त्तमम् ॥ तेप्रणम्यसुराःसर्वेपुरुहूतपुरोगमाः ॥ १५ ॥ इदमूचुर्महात्मानंसर्वलोकपितामहम् ॥ ॥ देवाऊचुः ॥ ॥ लोकेशतारकोदैत्योव
रेणतवदर्पितः ॥ १६ ॥ निरस्यास्मान्हठादस्मद्विषयान्त्स्वयमग्रहीत् ॥ रात्रिन्दिवम्बाधतेस्मान्यत्रतत्रस्थितावयम् ॥ १७ ॥ पलायिताश्च
पश्यामःसर्वकाष्ठासुतारकम् ॥ अग्निर्यमोथवरुणोनिर्ऋतिर्वायुरेवच ॥ १८ ॥ तथामनुष्यधर्माचसर्वैः परिकरैर्युतः ॥ एतेतेनार्दितात्रह्मन्देवा

स्तस्यैवशासनात् ॥ १९ ॥ अनिच्छाकार्यनिरताःसर्वेतस्यानुजीविनः ॥ यादेववनिताःस्वर्गेयेचाप्यप्सरसांगणाः ॥ २० ॥ तान्त्सर्वानग्रही
दैत्यःसारल्लोकेषुयच्चयत् ॥ नयज्ञाः सम्प्रवर्त्तन्तेनतपस्यन्तितापसाः ॥ २१ ॥ दानधर्मादिकंकिञ्चिन्नलोकेषुप्रवर्त्तते ॥ तस्यसेनापतिः
पापः क्रौञ्चोनामास्तिदानवः ॥ २२ ॥ सपातालतलंगत्वाबाधतेहर्निशम्प्रजाः ॥ तस्मात्तुतारकेनेदंसकलम्भुवनत्रयम् ॥ २३ ॥ हृतंसर्वञ्च
गत्राहिपापात्तस्मात्पितामह ॥ वयञ्चयत्रस्थास्यामस्तत्स्थानंविनिदेशय ॥ २४ ॥ स्वस्थानाच्च्यावितास्तेनलोकनाथजगद्गुरो ॥ त्वन्नोगति
श्चशास्ताचत्वन्नस्त्रातापिताप्रभुः ॥ २५ ॥ त्वमेवभुवनानाञ्चस्थापकः पालकः कृती ॥ तस्माद्यावत्तारकाख्येवह्नौदग्धाः प्रजापते ॥ २६ ॥
नभवामस्तथाकर्त्तुम्भवतायुज्यतेधुना ॥ ॥ मार्कण्डेयउवाच ॥ ॥ सुराणांवचनंश्रुत्वाब्रह्मालोकपितामहः ॥ २७ ॥ प्रत्युवाचसुरान्त्स
र्वांस्तत्कालसदृशंवचः ॥ ॥ ब्रह्मोवाच ॥ ॥ ममैववरदानेनतारकाख्यः समेधितः ॥ २८ ॥ नमत्तस्तस्यमरणंयुज्यतेत्रिदिवौकसः ॥
युष्माकञ्चप्रतीकारः कर्त्तव्यः प्रतिकर्मणि ॥ २९ ॥ किन्तुसम्यङ्नशक्नोमिप्रतिकर्त्तुम्प्रचोदितः ॥ तस्माद्यथातारकाख्यःस्वयमेष्यतिसंक्षय
म् ॥ ३० ॥ तथायूयंसंविदध्वमुपदेशकरस्त्वहम् ॥ नमयातारकोवध्योनतथावनमालिना ॥ ३१ ॥ नहरेणतथावध्योनान्यैरपिसुरैर्नरैः ॥
एषएववरोदत्तोमयातस्मैतपस्यते ॥ ३२ ॥ उपायश्चिन्तितश्चास्तितत्कुर्वन्तुसुरोत्तमाः ॥ सतीदाक्षायणीपूर्वन्त्यक्तदेहास्वजन्मने ॥ ३३ ॥
अगच्छन्मेनकान्देवीशैलराजस्ययोषितम् ॥ तांसमुत्पादयामासमेनकाजठरेगिरिः ॥ ३४ ॥ लक्ष्मीमिवपुराख्यात्याम्भृगुःस्वतनयोमम ॥
तामवश्यम्महादेवःकुर्यात्पाणिग्रहीतिकाम् ॥ ३५ ॥ यथासनचिरात्तस्यामनुरक्तोभवेत्सुराः ॥ तथाविदध्वंसुतरांतत्तेजःप्रतिकर्तृवः ॥ ३६ ॥

तमूर्द्धरेतसंशम्भुंसैवप्रच्युतरेतसम् ॥ कर्त्तुंसमर्थानान्यास्तिकाचिदप्यबलापरा ॥३७॥ तस्यतेजश्चुतंयच्चतस्माद्योजायतेसुतः ॥ सएवतार
काख्यस्यहन्तानान्यस्तुविद्यते ॥ ३८ ॥ सासुतागिरिराजस्यसाम्प्रतंरूढयौवना ॥ तपस्यन्तांगिरिप्रस्थेनित्यम्पर्येषतेहरम् ॥ ३९ ॥ वाक्या
द्धिमवतःसातुकालीनाम्नानिषेवते ॥ सखिभ्यांसहसर्वज्ञन्ध्यानस्थम्परमेश्वरम् ॥ ४० ॥ तामग्रतोवर्तमानान्त्रिलोकवरवर्णिनीम् ॥ ध्याना
सक्तोमहादेवोमनसापिनचेच्छति ॥ ४१ ॥ यथासमीहतेभार्याकालींसचन्द्रशेखरः ॥ तथाकुरुध्वन्त्रिदशानाचिरादेवयत्नतः ॥ ४२ ॥ स्वस्था
नम्भवतांस्वर्गस्तस्मात्तारकमप्यहम् ॥ निर्वर्तयिष्येसंगम्यगच्छध्वंविगतज्वराः ॥४३॥ इत्युक्त्वासर्वलोकेशस्तारकाख्यमुपस्थितः ॥ उपसं
गम्यवचनंसमाभाष्येदमब्रवीत् ॥ ४४ ॥ भोभोतारकमास्वर्गराज्यन्त्वम्परिशाधिभोः ॥ तदर्थन्नतपस्तप्तंसमयेभवतापुरा ॥ ४५ ॥ वरोना
पिमयादत्तोनमयास्वर्गराजता ॥ तस्मात्स्वर्गम्परित्यज्यक्षितौराज्यंसमाचर ॥४६॥ देवभोग्यानितत्रैवसम्भविष्यन्तितेऽसुर ॥ इत्युक्त्वासर्व
लोकेशस्तत्रैवान्तरधीयत ॥४७॥ सतारकःपरित्यज्यस्वर्गंक्षितिमथाभ्ययात् ॥ तत्रैवसंस्थितोदेवान्बाधतेस्मसनित्यशः ॥४८॥ इन्द्रंकरप्रद
श्चक्रेनिदेशस्थम्महाबलम् ॥ तामिन्द्रःसततन्देवभोग्यानिवितरन्मुहुः ॥ ४९ ॥ सेवमानः क्षमोनाभूत्सन्तोषयितुमीश्वरम् ॥ एवन्तेनार्दितादे
वामन्युनापरिपीडिताः ॥ ५० ॥ विधातुरुपदेशेनयत्नञ्चक्रुर्हरान्वये ॥ ततइन्द्रोथगुरुणासंगम्यकृतनिश्चयः ॥ ५१ ॥ कुसुमेषुंसमाहूय
वचनञ्चेदमब्रवीत् ॥ ॥ इन्द्रउवाच ॥ ॥ त्वयेदम्पाल्यतेविश्वन्त्वयाविश्वम्प्रसूयते॥५२॥त्वम्ब्रह्मविष्णुरुद्राणाम्प्रीतिहेतुःपुराभवः ॥ ब्रह्मा
प्रीत्यायथापूर्वमगृह्णाच्चरितव्रताम् ॥ ५३॥ सावित्रीम्माधवोलक्ष्मींसतींदाक्षायणींहरः ॥ताःप्रीतयेपुरातेषान्देवेशानांयथकृताः ॥५४॥तथैवकु

रुमेप्रीतिङ्गामप्राणभृतांसदा ॥ नत्वन्नकस्यचित्स्वर्गेपातालेवाथभूतले ॥ ५५ ॥ प्रियःप्राणभृताङ्गामसततञ्जगताम्मतः ॥ देवदानवयक्षाणां
रक्षसाम्मानुपस्यच ॥ ५६ ॥ त्वम्पालकश्चकर्त्ताचहृदयेचप्रवर्त्तसे ॥ तस्मात्त्वंसर्वजगतांहितायकुरुचेष्टितम् ॥ ५७ ॥ देवदानवयक्षाणा
म्मानुपाणाम्महात्मनाम् ॥ ॥ मार्कण्डेय उवाच ॥ ॥ एतच्छ्रुत्वावचस्तस्यशक्रस्यमकरध्वजः ॥ ५८ ॥ देवराजमुवाचेदंसुप्रीतस्तद्वचो
मृतैः ॥ यत्राहमीशिताशक्रतत्कर्मविदितन्त्वया ॥ ५९ ॥ तस्मान्ममोचितंशक्रयङ्करिष्येतन्निदेशय ॥ पञ्चैवबाणामृदवस्तेचपुष्पमयामम ॥
॥ ६० ॥ चापस्तथापुष्पमयःसिञ्जिनीभ्रमरात्मिका ॥ रतिर्मेदयिताजायावसन्तः सचिवोमम ॥ ६१ ॥ यन्तामलयजोवायुर्मित्रम्ममसुधा
निधिः ॥ सेनाधिपोमेशृङ्गारोहावाभावाश्चसैनिकाः ॥ ६२ ॥ सर्वेमेमृदवोऽक्रराअहञ्चापितथाविधः ॥ यद्येनयुज्यतेकार्यंधीमाँस्तत्तेनयोजये
त् ॥ ६३ ॥ ममयोग्यन्तुयत्कर्मतस्मात्तस्मिन्नियोजय ॥ ॥ इन्द्रउवाच ॥ ॥ यत्कारयितुमिच्छामिभवतातन्मनोभव ॥ ६४ ॥ तत्ते
समुचितंकर्मतस्मिन्परिवृतोभवान् ॥ कृतकर्मापितत्रत्वङ्कृतीचापिमनोभव ॥ ६५ ॥ त्वदन्यैःकिन्तुदुःसाध्यन्तत्त्वान्तत्रनियोजये ॥ श्रूयते
हितपस्यन्तन्ध्यानस्थंवृषभध्वजम् ॥ ६६ ॥ गिरेर्हिमवतःप्रस्थेनिराकाङ्क्षम्त्र्यूकृतौ ॥ तम्पितुर्वचनात्कालीतपस्यन्तन्निषेवते ॥ ६७ ॥
सखिभ्यांसहितानित्यंहरस्यानुमतेऽधुना ॥ आरूढयौवनान्तान्तुस्त्रीरत्नमपिसुन्दरीम् ॥ ६८ ॥ ध्यानासक्तोमहादेवोनेहतेमनसापिच ॥ सा
नुरागोयथातस्याज्ञायतेवृषभध्वजः ॥ ६९ ॥ तथाविधत्स्वदेवानांहितायजगतामपि ॥ सहसत्यायथारेमेसानुरागोवृषध्वजः ॥ ७० ॥ तथै
तयागिरिजयारमतान्तत्कृतेनवै ॥ तस्याःकृतेतुयत्तेजःप्रच्युतंस्याद्धरस्यवै ॥ ७१ ॥ ततोयोजायतेसोऽस्माँस्तारकादुद्धरिष्यति ॥ मार्कण्डे

यउवाच ॥ ॥ ततःसदेवराजस्यवचःश्रुत्वामनोभवः ॥ ७२ ॥ प्राप्तकालञ्चसस्मारशापम्ब्रह्मकृतम्पुरा ॥ सन्ध्याम्प्रतिविधातारंयदाशक्त्र
म्परीक्षितुम् ॥ ७३ ॥ कामोहनत्पुष्पबाणैस्तदातमशपद्विधिः ॥ शम्भुनेत्राग्निदग्धस्त्वम्भविष्यसिद्विजोत्तमाः ॥ ७४ ॥ यदाकुर्याद्गिरिसुतांह
रःपाणिगृहीतिकाम् ॥ तदाभवाञ्छरीरेणागमिष्यतिसमग्रताम् ॥ ७५ ॥ इतिस्मृत्वाविधेःशापम्भीतोपिमकरध्वजः ॥ अंगीचक्रेशक्रवाक्या
त्काल्यायोजयितुंहरम् ॥ ७६ ॥ इदञ्चवचनम्प्रोचेतत्कालसदृशम्पुनः ॥ ॥ मदनउवाच ॥ ॥ करिष्येत्वद्वचःशक्रहरंसंगमयाम्यहम् ॥
॥ ७७ ॥ काल्यागिरिजयासार्द्धन्दाक्षायण्यायथापुरा ॥ किन्त्वेकम्ममसाहाय्यंकर्त्तात्वंहरमोहने ॥ ७८ ॥ यदासम्मोहनेनाहंहरंसम्मोह
यामिच ॥ तदाकुरुसहायंत्वंस्वःस्थमाप्याययस्वमाम् ॥ ७९ ॥ प्रविश्याहंसुरभिणानचिराच्छंकराश्रमम् ॥ विधायपूर्वम्मनसोविकारंहर्षणेन
तु ॥ ८० ॥ सम्मोहनेनसुदृढम्मोहयिष्येवृषध्वजम् ॥ स्मरिष्यसित्वंसम्प्राप्तेकालेमाम्ममपालने ॥ ८१ ॥ अहंगच्छामिसहितन्तत्कर्तुम्बल
सूदन ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्त्वासजगामाथमदनःशंकराश्रमम् ॥ ८२ ॥ शक्रोपित्रिदशान्त्सर्वानिदमाहवचस्तदा ॥ यूयंकु
रुध्वंसाहाय्यंयत्रयातिमनोभवः ॥ ८३ ॥ तत्रतत्रानुगम्यैवसमयेमाञ्चबोधत ॥ यदासम्मोहनेनायंसम्मोहयतिशंकरः ॥ ८४ ॥ तदाहमपि
यास्यामितत्रबोधतमांसुराः ॥ इत्युक्तास्तेनशक्रेणदेवाजग्मुर्मनोभवम् ॥ ८५ ॥ सोपिगत्वायत्रहरोगंगावतरणेगिरेः ॥ हिमभारभृतःसानौसुर
भिञ्चन्ययोजयत् ॥ ८६ ॥ ततस्तत्रगतेसम्यक्सुरभौतस्यलक्षणम् ॥ अभवन्नचिरादेवतरुगुल्मलतासुच ॥ ८७ ॥ पुष्पिताःकिंशुकास्तत्रम
ञ्जुलाःकेतकास्तथा ॥ सरांसिचसपद्मानिसविकाराश्चजन्तवः ॥ ८८ ॥ ववौवायुश्चगम्भीरोगन्धिलःपुष्परेणुभिः ॥ शनैःशनैःसुखकरःकर्ष

अमराःशक्रसहितास्तदासर्वेवियद्गताः ॥ सम्यङ्मनोभवम्मेनेसुरकृत्येनिवेशितम् ॥ ८ ॥ अथसंस्मृत्यसंयम्यनिगृह्यविकृतिन्तदा ॥ इन्द्रियस्यमहादेवःसहसेदंव्यचिन्तयत् ॥ ९ ॥ योनिजांगिरिजांकालीन्तपोव्रतविवर्जिताम् ॥ कथंसंगमकामोहन्धर्तुमिच्छामिवैहठात् ॥ ॥ ११० ॥ तपोव्रतपवित्रांगीन्तपश्चरणसत्कृताम् ॥ स्वयमेवग्रहीष्यामिसतीन्दाक्षायणीमिव ॥ ११ ॥ कथंविकृतकामोहमनिच्छन्निवसाम्प्रतम् ॥ केनापिचाकृष्टइवचिकीर्षुः संगमोद्भवम् ॥ १२ ॥ एवंविकारहेतुंसनिश्चिन्वन्निन्द्रियस्यतु ॥ पुरोवलोकयामाससंहितेषुम्मनोभवम् ॥ १३ ॥ एतस्मिन्नन्तरेब्रह्माविज्ञातसमयःसुरान् ॥ दृष्ट्वास्थानादाजगामतत्समाजमनुग्रहात् ॥ १४ ॥ ततःसकुपितोदृष्ट्वासन्धितेषुं मनोभवम् ॥ जज्ज्वालज्वलनप्रख्यस्तन्दिधक्षुःप्रसह्यतु ॥ ११५ ॥ कामोयंसमयञ्ज्ञात्वामाम्मोहयितुमिच्छति ॥ मनोमेस्ववशंकर्तुन्तन्नयामियमक्षयम् ॥ १६ ॥ एवंविचिन्त्यमानस्यनेत्रोद्भावितितेजसा ॥ वर्द्धितोज्वलनोभूत्वाक्रोधन्नेत्रात्ससर्जह ॥ १७ ॥ तंक्रोधन्निःसरिष्यन्तञ्जातवेदःस्वरूपिणम् ॥ ज्ञात्वाकामस्यतान्बाणान्पौष्पचापनिषण्णकान् ॥ १८ ॥ शक्तिम्प्राणाँस्तथात्मानमाकृष्यापालयद्विधिः ॥ उत्सारयामासतदावसन्तंसपितामहः ॥ १९ ॥ निजशक्त्यातदाशम्भुक्रोधाद्रक्षन्मनोभवम् ॥ अथाकाशगतादेवाःक्रुद्धन्दृष्ट्वामहेश्वरम् ॥ १२० ॥ प्रसीदजगतान्नाथकामेक्रोधम्परित्यज्य ॥ त्वयायथापुरासृष्टःशम्भुरूपेणकर्मणा ॥ २१ ॥ येनचायोजितंकर्मतत्करोतिमनोभवः ॥ तस्मात्त्वम्मदनेशम्भोक्रोधाग्निमुपसंहर ॥ २२ ॥ प्रसीदसर्वभूतेशभक्त्यात्वाम्प्रणतावयम् ॥ इतिस्मवदतान्तेषाममराणान्तदानलः ॥ २३ ॥ ललाटचक्षुःसम्भूतोभस्माकार्षीन्मनोभवम् ॥ दग्ध्वाकामन्तदावह्निर्ज्ज्वालामालातिदीपितः ॥ २४ ॥ संस्तम्भितोथ

विधिनाहरंगन्तुंशशाकन ॥ महादेवोपितद्भस्ममनोभवशरीरजम् ॥ १२५ ॥ आदायसर्वगात्रेषुभूतिलेपन्तदाकरोत् ॥ लेपशेषाणिभस्मा
निसमादायतदाहरः ॥ २६ ॥ सगणोन्तर्द्दधेकालींविहायविधिसम्मते ॥ ब्रह्माक्रोधानलंशम्भोर्दहन्तंसकलान्त्सुरान् ॥ २७ ॥ वडवारू
पिणञ्चक्रेदेवानाम्पुरतस्तदा ॥ वडवान्तान्तदादेवाःसौम्याञ्ज्वालामुखींशुभाम् ॥ २८ ॥ दृष्ट्वानिर्विघ्नमनसोबभूवुःपूर्वपीडिताः ॥ वडवा
न्तांसमादायतदाज्वालामुखींविधिः ॥ २९ ॥ सागरम्प्रययौलोकाहितायजगताम्पतिः ॥ गत्वाथसागरम्ब्रह्माप्रोवाचपरिपूजितः ॥ १३० ॥
यथावत्तेनविप्रेन्द्राःसमयश्चनिवेदयन् ॥ अयंक्रोधोमहेशस्यवडवारूपधृक्त्वया ॥ ३१ ॥ ज्वालामुखस्सदाधार्य्योयावन्नविनयाम्यहम् ॥
यदात्वामहमागम्यवदामिसारिताम्पते ॥ ३२ ॥ तदात्वयापरित्याज्यःक्रोधोयंवडवामुखः ॥ भोजनम्भवतस्तोयमतस्यतुभविष्यति ॥
॥ ३३ ॥ यत्रदेवंविधार्योयंयथानोयातिचान्तरम् ॥ इत्युक्तोब्रह्मणासिन्धुरंगीचक्रेतदाक्रुधम् ॥३४॥ ग्रहीतुंवडवावक्त्रंशम्भोश्चाशक्यमप्य
रम् ॥ ततः प्रविष्टोजलधौपावकोवडवामुखः ॥ १३५ ॥ वार्योवान्निदहन्त्सम्यग्ज्वालामालातिदीपितः ॥ यदाभवच्छम्भुनेत्राद्दाहमदन
न्तदा ॥३६॥ अभवत्सुमहाशब्दोयेनाकाशःप्रपूरितः ॥ तेनशब्देनमहताकामदाहेक्षणेनच॥३७॥सखीभ्यांसहभीताभूत्कालीशोकयुतातदा ॥
तेनशब्देनहिमवाँश्चकितोविस्मितस्तदा ॥३८॥ सुतामेवजगामाशुगतांकालींहराश्रमम् ॥ तान्तत्रकालिन्तनयांभयशोकाकुलांशुभाम् ॥३९॥
रुदन्तींशम्भुविरहादाससादाचलेश्वरः ॥ आसाद्यपाणिनातस्यामार्जयन्नयगद्वयम् ॥ १४० ॥ माभैषीःकालिमारोदीरित्युक्तातान्तदाग्रहीत् ॥
क्रोडीकृत्यसुतान्तान्तुहिमवानचलेश्वरः ॥ ४१ ॥ स्वमालयंमथानिन्येसान्त्वयामासचार्दिताम् ॥ अन्तर्हितेहरेकालीविरहात्तस्यसन्त

तम् ॥४२॥ निवसन्तीपितुर्गेहेशुशोचचमुमोहच ॥४३॥ शैलाधिराजोप्यथमेनकापिमैनाकमुख्योपिसखीद्वयश्च ॥ तांसान्त्वयाञ्चक्रुरदीनस
त्वांहरंविसस्मारतथापिनोमा ॥ १४४ ॥ इतिकालिकापुराणेचतुश्चत्वारिंशोध्यायः ॥ ४४ ॥ ॥ छ ॥ मार्कण्डेयउवाच ॥ ॥
अथदेवमुनिर्यातोहिमवन्मन्दिरन्तदा ॥ नियोजितोबलभिदानारदः कामगः परम् ॥ १ ॥ सगतःपूजितस्तेनधरेशेनमहात्मना ॥ तंसमुत्सृ
ज्यरहसिकालीन्तामाससादह ॥२॥ आसाद्यकालींसमुनिः सम्बोध्यज्ञानशालिनीम् ॥ उवाचेदंवचस्तथ्यंसर्वेषाञ्जगतांहितम् ॥ ३ ॥ ॥
नारदउवाच ॥ ॥ शृणुकालिवचोमह्यंसत्यन्तदवधारय ॥ सेवितःसमहादेवस्त्वयेहतपसाविना ॥ ४ ॥ अनुरक्तोपितेनत्वाम्महादेवोवि
सृष्टवान् ॥ त्वामृतेशंकरोनान्यांद्वितीयांसंग्रहीष्यति ॥ ५ ॥ त्वञ्चापिनान्यन्दयितंग्रहीष्यसिविनेश्वरम् ॥ तस्मात्त्वन्तपसायुक्ताचिरमाराधये
श्वरम् ॥ ६ ॥ तपसासंस्कृतान्त्वान्तुसद्वितीयांकरिष्यति ॥ मन्त्रोयन्तस्यसुभगेशृणुत्वंयेनसोचिरात् ॥ ७ ॥ आराधितस्तेप्रत्यक्षोभविष्य
तिमहेश्वरः ॥ ॐनमःशिवायेतिचसर्वदाशंकरप्रियः ॥८॥ चिन्तयन्तीतुतद्रूपन्नियमस्थाषडक्षरम् ॥ मन्त्रंजपत्वंगिरिजेतेनतुष्टोभवेद्धरः ॥९॥
एवमुक्तातदाकालीनारदेनमहात्मना ॥ कर्तव्यमनुमेनेसाहितन्तथ्यञ्चतद्वचः ॥ १० ॥ अनुमान्यतपस्तप्तुन्तदाकालीञ्चनारदः ॥ स्वर्गञ्जगा
मतस्याञ्चनिश्चिताभून्मतिर्व्रते ॥ ११ ॥ अथयातेदेवमुनौकालीसासाद्यमेनकाम् ॥ तपःश्रद्धांसमाचख्येचात्मनोहरसंगमे ॥ १२ ॥
काल्युवाच ॥ ॥ तपस्तप्तुंगमिष्यामिमातःप्राप्तुम्महेश्वरम् ॥ अनुजानीहिमांगन्तुन्तपसेद्यतपोवनम् ॥ १३ ॥ तपःकरणयत्नम्मेपितुरावेदयद्धु
तम् ॥ यावन्नदह्येजननिभूतेशाविरहाग्निना ॥१४॥ इतितस्यावचःश्रुत्वामेनकाशोककर्शिता ॥ आलिंग्यस्वसुतामूचेमातपःकुरुवल्लभे ॥१५॥

मृदुदेहासिपुत्रित्वम्मातपोयाहिकर्कशम्॥तपःसोढुम्मुनेर्गात्रंशक्तन्तेनकलेवरम् ॥१६॥ वनवासश्चतेपुत्रिनेष्टःशत्रुगणैरपि॥तस्मात्त्वंसम्परित्य
ज्यवनवासोद्भवन्तपः॥१७॥आत्मनोह्यनुरूपेणतपस्तत्कुरुयद्धितम्॥मार्कण्डेयउवाच॥मातुःसावचनंश्रुत्वागिरिजादीनमानसा॥१८॥ इत्यूचे
चतदावाक्यन्तपोयत्नपराप्रसूम्॥मानिषेधयमांयास्येतपसेद्यतपोवनम्॥१९॥ प्रच्छन्नमपियास्यामि नानुज्ञाताप्यहन्त्वया॥मेनकोवाच ॥ गृहेषु
देवाःसततम्ब्रह्मविष्णुशिवादयः॥२०॥तस्माद्गृहेपुत्रिदेवानर्च्चयत्वंयथेप्सितान्॥स्त्रीणान्तपोवनगतिर्न्नश्रुतास्वामिनाविना॥२१॥तस्मान्नयुज्यते
पुत्रितपोयात्रावनम्प्रति ॥ यंतोनिरस्तातपसेवनंगन्तुञ्चमेनया ॥ २२ ॥ उमेतितेनसोमेतिनामप्रापतदासती ॥ अवज्ञायतदामातुर्वचनंहिमव
त्सुता ॥ २३ ॥ सखीभ्यांज्ञापयामासपितरन्तपसोद्यमम् ॥ सतुज्ञात्वागिरिपतिस्तपसेचरितोद्यमम् ॥ २४ ॥ दुहितुश्चानुमेनेचनानिहृष्ट
मनाइव ॥ सानुज्ञाप्यतदातातंयत्रदग्धोमनोभवः ॥ २५ ॥ शम्भुनाप्रययौतत्रगंगावतरणम्प्रति ॥ गंगावतरणन्नामप्रस्थोहिमवतःसच ॥२६॥
हरशून्योथददृशेकाल्यातच्चिन्तयातदा ॥यत्रस्थित्वापुराशम्भुर्ध्यानवानभवद्वृशम् ॥२७॥तत्रक्षणन्तुसास्थित्वाबभूवविरहार्दिता॥हाहरेतिक्षण
न्तत्ररोदमानागिरेःसुता ॥२८॥ विललापातिदुःखार्त्ताचिन्ताशोकसमन्विता ॥ क्षणंविलप्यसाकालीस्मृत्वापूर्वोद्भवन्तदा ॥ २९ ॥ हार्दहर
स्यसामोहमवापकमलेक्षणा॥ततश्चिरेणसामोहन्धैर्य्यात्संस्तभ्यभामिनी॥३०॥नियमायाभवत्तत्रदीक्षिताहिमवत्सुता ॥ प्रथमान्नियमस्तस्याबभू
वफलभोजनम्॥३१॥चर्यापश्चातपाचिन्ताशाम्भवीशाम्भवोजपः ॥ यज्ञियैर्दारुभिःशुष्कैश्चतुर्दिक्षुचतुष्कृतम्॥३२॥वह्निसंस्थापनंग्रीष्मेतीव्रां
शुस्तत्रपञ्चमः ॥ हस्तान्तरेचतुर्वह्नीन्कृत्वावैश्वानरेष्टिना ॥ ३३ ॥ तन्मध्यस्थासूर्यबिम्बंवीक्षन्तीवलकलांशुका ॥ ग्रीष्मन्निन्येवह्निमध्येशि

शिरेतोयवासिनी ॥ ३४ ॥ प्रथमम्फलभोगेनद्वितीयन्तोयभोजनम् ॥ तृतीयन्तुस्वयम्पातिवृक्षपल्लवभोजनम् ॥ ३५ ॥ क्रमेणतुतदापर्णान्नि
रस्याहिमवत्सुता ॥ निराहारव्रताभूत्वातपश्चरणखिन्निका ॥ ३६ ॥ आहोरात्यक्तपर्णाभूद्यस्माद्धिमवतः सुता ॥ तेनदेवैरपर्णेतिकथितापृथिवी
तले ॥ ३७ ॥ पञ्चातपत्रेनैवतोयानाञ्चप्रवेशनैः ॥ एकपादस्थितासातुवसन्तेहिमवत्सुता ॥ ३८ ॥ षडक्षरञ्जपन्तीसाचिरन्तेपेतपोमहत् ॥
चीरवल्कलसंवीताजटासंघातधारिणी ॥ ३९ ॥ कृशाङ्गीचिन्तयेशक्तांजिगायतपसामुनीन् ॥ तान्तपश्चरणेशक्तांररक्षशङ्करःस्वयम् ॥४०॥
आप्यायतिस्मसतदाभयाद्रक्षतिहर्षितः ॥ एवन्तस्यास्तपस्यन्त्याश्चिन्तयन्त्यामहेश्वरम् ॥ ४१ ॥ त्रीणिवर्षसहस्राणि जग्मुः कालयास्तपो
वने ॥ षट्त्रिवर्षसहस्राणिसंस्कृतावीक्षणात्स्वयम् ॥ ४२ ॥ दैवेनविधिनादेवीहरयोग्यातदाभवत् ॥ षट्त्रिवर्षसहस्रान्तेयत्रतेपेतपोहरः ॥
॥ ४३ ॥ तत्रक्षणमथोपित्वाचिन्तयामासभामिनी ॥ नियमस्थाम्महादेवः किम्माञ्जानातिनाधुना ॥ ४४ ॥ येनाहंसुचिरन्तेननानुज्ञातातपो
रता ॥ लोकेनास्त्यत्रगिरिशःकिन्तत्रमुनिभिःस्तुतः ॥ ४५ ॥ सर्वज्ञः सर्वगोदेवोहरोदेवैर्निगद्यते ॥ ससर्वगस्तुसर्वज्ञः सर्वात्मासर्वहृद्गतः ॥
॥ ४६ ॥ सर्वभूतिप्रदोदेवः सर्वभावनभावनः ॥ सतीचमेनकामातायदिचाहंवृषध्वजे ॥ ४७ ॥ सानुरक्तानचान्यस्मिन्सप्रसीदतुशंकरः ॥
यदिनारदवक्त्रोत्थोमन्त्रोयंस्यात्षडक्षरः ॥ ४८ ॥ यदिभक्त्यामयाजप्तंहरस्तेनप्रसीदतु ॥ सत्यंयदितपस्तप्तंसत्यञ्चाराधितोहरः ॥ ४९ ॥
सत्यम्भवेद्यदितपोहरस्तेनप्रसीदतु ॥ ॥ मार्कण्डेयउवाच ॥ ॥ एवंचिन्तयन्तीसायदातिष्ठद्धराश्रमे ॥ ५० ॥ अधोमुखीदीनवेषाज
टावल्कलमण्डिता ॥ तदैवब्राह्मणः कश्चिद्ब्रह्मचारीधृतव्रतः ॥ ५१ ॥ कृष्णाजिनोत्तरीयेगधृतदण्डकमण्डलुः ॥ ब्राह्म्याश्रियादीप्यमानःस्व

र्णगौरःसुशोभनः ॥ ५२ ॥ जटाभिःपरिवीताभिरुद्रिक्तस्तनुदेहभृत् ॥ उपस्थितस्तदाकालींशम्भुर्ब्राह्मणरूपधृक् ॥ ५३ ॥ आसाद्यप्रथम
ङ्कालींसमाभाष्यतदाद्विजः ॥ ज्ञातुम्प्रत्यक्षतोरागंश्रोतुमिच्छँश्चतद्वचः ॥ ५४ ॥ वाग्मीविचित्रवाक्येनपप्रच्छगिरिजान्तदा ॥ ॥ ब्राह्मण
उवाच ॥ ॥ कात्वंकस्यासिकल्याणिकिमर्थंविजनेवने ॥ ५५ ॥ तपश्चरसिदुर्द्धर्षम्मुनिभिःप्रयतात्मभिः ॥ नबालात्वन्नापिवृद्धातरुणीचा
तिशोभना ॥ ५६ ॥ कथम्पतिंविनाभीक्ष्णन्तपश्चरसिसाम्प्रतम् ॥ किंवातपस्विनीभद्रेकस्यचित्सहचारिणी ॥ ५७ ॥ तपस्विनःसपुष्पादि
समाहर्त्तुंगतोन्यतः ॥ एतन्ममसमाचक्ष्वयदिगुह्यम्भवेन्नते ॥ ५८ ॥ यदितेहृदयेमन्युःकश्चिद्वसतिसम्प्रति ॥ तदाचक्ष्वसमर्थोस्मितमहञ्चा
पिवारितुम् ॥ ५९ ॥ इत्युक्तातेनविप्रेणगिरिजाथनिजांसखीम् ॥ तस्योत्तरप्रदानायकटाक्षेणन्ययोजयत् ॥ ६० ॥ सासखीविजयातस्या
वचनाद्ब्राह्मणन्तदा ॥ प्रोवाचेदंयथातथ्यंवीक्षन्तीगिरिजामुखम् ॥ ६१ ॥ एतस्यगिरिराजस्यतनयेयन्द्विजोत्तम ॥ ख्याताचपार्वतीनाम्नाका
लीतिचसुशोभना ॥ ६२ ॥ ऊचेयन्नचकेनापिशंकरंवृषभध्वजम् ॥ वाञ्छन्तीदयितन्तीव्रन्तपश्चरतिवैपतिम् ॥ ६३ ॥ त्रीणिवर्षसहस्राणित
पस्तपतिभामिनी ॥ नशंकरोगिरिसुतामद्याप्यभ्युपपद्यते ॥ ६४ ॥ शंकरोगिरिशोदेवःसर्वगःपरमेश्वरः ॥ इतिस्मगद्यतेदेवैर्मुनिभिश्चतपोध
नैः ॥ ६५ ॥ किमेनांसनजानातिकिंसानौनास्तिवागिरेः ॥ इतिचिन्ताविषण्णेयमद्यनोलभतेसुखम् ॥६६ ॥ अप्रार्थितस्त्वमनयादयसेयदि
वासुखम् ॥ तदैनांशंकरेणाद्यत्वंसंगमयसुव्रत ॥ ६७ ॥ इतितस्यावचःश्रुत्वाब्रह्मचारीतदाद्विजः ॥ स्मयमानइदंवाक्यंहेलयोवाचपार्व
तीम् ॥ ६८ ॥ ब्राह्मणउवाच ॥ ॥ अमोघदर्शनश्चास्मिहरश्चानायितुंक्षमः ॥ किन्त्वेकन्निगदाम्यद्यनिश्चितम्मन्मतंशृणु ॥ ६९ ॥

जानाम्यहम्महादेवन्तंवदामिशृणुष्वमे ॥ वृषध्वजोमहादेवोभूतिलेपीजटाधरः ॥ ७० ॥ व्याघ्रचर्मांशुकश्चैकःसंवीतोगजकृत्तिना ॥ कपाल
धारीसर्पौघैःसर्वगात्रेषुवेष्टितः ॥ ७१ ॥ विषदग्धगलस्त्र्यक्षोविरूपाक्षोविभीषणः ॥ अव्यक्तजन्मासततंगृहभोग्यविवर्जितः ॥ ७२ ॥
ज्ञातिभिर्बान्धवैर्हीनोभक्ष्यभोज्यविवर्जितः ॥ स्मशानवासीसततंसत्संगपरिवर्जितः ॥ ७३ ॥ गर्जद्भिर्विकटैस्तीक्ष्णैर्भूतोघैःपरिवारितः ॥
शृंगाररसहीनश्चभार्यापुत्रविवर्जितः ॥ ७४ ॥ केनवाकारणेनत्वम्भर्त्तारन्तंसमीहसे ॥ पूर्वंश्रुतंमयाचैवतस्यापरमिदङ्कृतम् ॥ ७५ ॥
शृणुतेनिगदाम्यद्ययदितेगृह्णरोचते ॥ दक्षस्यदुहितासाध्वीसतीवृषभवाहनम् ॥ ७६ ॥ वव्रेपतिम्पुरादैवात्सम्भोगपरिवर्जितम् ॥ कपा
लिजायेतिसतीदक्षेणपरिवर्जिता ॥ ७७ ॥ यज्ञभागप्रदानायशम्भुश्चापिविवर्जितः ॥ साथतेनापमानेनभृशंशोकाकुलासती ॥ ७८ ॥
तत्याजस्वान्प्रियान्प्राणाँस्तयात्यक्तश्चशंकरः ॥ त्वंस्त्रीरत्नन्तवपिताराजानिखिलभूभृताम् ॥ ७९ ॥ तथाविधम्पतिंकस्माद्दुःखेगतपसे
हसे ॥ देवेन्द्रोवाधनेशोवापवनोवाप्यपाम्पतिः ॥ ८० ॥ अग्निर्वान्यःसुरोवापिस्वर्वैद्यावश्विनावपि ॥ विद्याधरोवागन्धर्वोनागोवामानु
षोथवा ॥ ८१ ॥ रूपयौवनसम्पन्नःसमस्तगुणसंयुतः ॥ सतेयोग्यःपतिः श्रीमानुदारकुलसम्भवः ॥ ८२ ॥ येनत्वम्बहुरत्नौघपूरितेनर्च
विस्तृते ॥ माल्यप्रवरसंयुक्तेधूपचूर्णैःसुवासिते ॥ ८३ ॥ मृद्वास्तरणसंयुक्तेविस्तृतेसुमनोहरे ॥ चारुप्रासादगर्भस्थेजाम्बूनदविचित्रिते ॥
॥ ८४ ॥ शय्यातलेसमासाद्यसयोग्यस्तेभवेत्पतिः ॥ एवञ्ज्ञात्वाद्यसुभगेयदिवाञ्छसिशंकरम् ॥ ८५ ॥ किन्तेतपोभिःसुतरामहन्तंयो
जयेत्वया ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इतिश्रुत्वातदाकालीब्राह्मणस्योत्तरन्तदा ॥ ८६ ॥ मितन्तथ्यञ्जगादैनम्ब्राह्मणंकोपसं

युता ॥ ॥ काल्युवाच ॥ नजानासिहरन्देवन्त्वञ्जानामीतिभाषसे ॥ ८७ ॥ बहिर्यद्दृश्यतेतत्तेकथितन्द्विजनन्दन ॥ यस्यभावन्नजानन्तिसेन्द्राब्रह्मादयःसुराः ॥ ८८ ॥ तस्यत्वंविप्रतनयशिशुर्ज्ञास्यसिकिम्भवम् ॥ यच्छ्रुतम्भवतानीचवदनाद्भाषितलँघु ॥ ८९ ॥ इतस्ततस्तुश्रुत्वैवभाषसेत्वन्नदृष्टवान् ॥ तस्मात्त्वत्तोवरन्नाहंवाञ्छयेनापिवापतिम् ॥ ९० ॥ अन्यद्वदनचत्वत्तोवाञ्छयेहरसंगमम् ॥ इत्युक्त्वागिरिजाविप्रमवलोक्यसखीमुखम् ॥ ९१ ॥ इदमाहतदाकालीसंशयारूढचेतना ॥ महताचिन्तनेनेहतपसाराधितोहरः ॥ ९२ ॥ तन्ममाग्रेविप्रसुतोनिन्दितुंवाक्यमुक्तवान् ॥ तदहञ्चापनेष्यामिस्तुतिवाक्येनसाम्प्रतम् ॥ ९३ ॥ महात्मनाञ्चयोनिन्दांशृणोतिकुरुतेथवा ॥ तयोरागःसमम्पूर्वम्मयातातमुखाच्छ्रुतम् ॥ ९४ ॥ तस्मात्तदपनेष्येहन्तन्निषेधयविप्रकम् ॥ इत्युक्त्वासासखींकालीशम्भुसंगतमानसा ॥ ॥ ९५ ॥ आगःसम्मार्जनायाशुहरंस्तोतुमुपाक्रमत् ॥ काल्युवाच ॥ नमःशिवायशान्तायकारणत्रयहेतवे ॥ निवेदयामिचात्मानन्त्वंगतिःपरमेश्वर ॥ ९६ ॥ विज्ञानसौभाग्यसुहृद्गतायतेप्रपञ्चहीनायहिरण्यवाहवे ॥ नमोस्तुनारायणपद्मसम्भवप्रधानबीजायजगद्धितायते ॥ ॥ ९७ ॥ इतिस्तुवन्तीम्पुनरेवसद्द्विजस्तदावचःकिञ्चिदुदीरितुम्पुनः ॥ समीक्ष्यकालीमकरोत्सयत्नकम्बुद्धासमाचष्टसखीङ्गिरेःसुता ॥ ॥ ९८ ॥ अयन्द्विजःकिञ्चनवक्तुमिच्छत्युग्रंहरञ्चापिनसंविदानः ॥ निन्दन्नहिप्राणहरींहरस्यनिंदामहंश्रोतुमिहक्षमामि ॥ ९९ ॥ यावद्धूरिवचोऽस्याहन्नशृणोम्यधुनासखि ॥ गच्छामितावदूरायसमुत्तिष्ठामिमत्प्रिये ॥ १०० ॥ इत्युक्त्वासातयासख्यासहिताहिमवत्सुता ॥ प्रत

१ तेइति त्वयेत्यर्थः कर्तुः शेषत्वाविवक्षायांषष्ठी । २ आगः पापापराधयोः ।

स्थेथसमुत्थायतमुत्सृज्याद्विजंहठात् ॥ १ ॥ अथशम्भुर्निजंरूपमास्थायहिमवत्सुताम् ॥ तंसमुत्सृज्यगच्छन्तींहरःस्मेरमुखोन्वयात् ॥
॥ २ ॥ अहंहरोमहादेवोमांसंस्तौपिनचाधुना ॥ सम्मुखीभवहेकालिसमाश्वासयशांकरि ॥ ३ ॥ इत्युक्तासमहादेवोगच्छन्त्याःपुरतोगतः ॥
प्रसार्यहस्तौकाल्यास्तुगतिन्तस्याविरोधयन् ॥ सावीक्ष्यशम्भुवदनन्तत्क्षणादभवद्धठात् ॥ ४ ॥ अधोमुखीताडिद्धातचकितेवगिरेःसुता ॥
मन्दाक्षम्प्रीतिलज्जाभिःसाजडेवतदाभवत् ॥ १०५ ॥ वक्तुञ्चनाशकत्किञ्चिद्विक्षुरपिभामिनी ॥ मनोरथानांसिद्ध्यातुसुधाभिरिवपूरितम् ॥
॥ ६ ॥ शरीरमभवत्तस्यामुदापूर्णन्द्विजोत्तमाः ॥ षट्त्रिवर्षसहस्रैस्तुतपःक्लेशमविन्दत ॥ ७ ॥ यत्तंक्षणात्समुत्सृज्यसम्मोदमुदिताभवत् ॥
ताञ्चवीक्ष्यतथाभूताम्प्रणयाद्वृषभध्वजः ॥ ८ ॥ कामेनभस्मरूपेणगात्रस्थेनचमोहितः ॥ अथतांविरहोद्विक्तःसमेत्यवृषभध्वजः ॥ ९ ॥
सम्बोधयन्निदञ्चाटुवचनम्प्रोक्तवान्मुदा ॥ नतेसुन्दरिमांवक्तुंकिञ्चनापित्वमीहसे ॥ ११० ॥ तपःक्लेशंस्मरन्तीकिम्मह्यंकुप्यसिसाम्प्रतम् ॥
अहञ्चपरितप्यामित्वामृतेसुभगेमम ॥ ११ ॥ समयाद्यत्समारब्धन्तपस्तमुन्त्वयासमम् ॥ सानुरक्तोथसंस्कृत्यभविष्यामित्वयाप्रिये ॥
॥ १२ ॥ अधुनासमतीतोमेयःकृतःसमयोमया ॥ तपसेभवतीचापितपसैवसुसंस्कृता ॥ १३ ॥ सञ्चिन्तनेनजप्येनतीव्रेणतपसातदा ॥
मूल्येनमहताक्रीतोदासोहम्मान्नियोजय ॥ १४ ॥ त्वदंगानांसंस्करणेजटानाञ्चप्रसाधने ॥ प्रमुच्यवल्कलंगात्राच्चार्वंशुकनिवेशने ॥ ११५ ॥
हारनूपुरकेयूरकाञ्च्यादिपरिधापने ॥ द्रुतन्नियोजयशुभेयदिस्नेहोस्तिमादृशि ॥ १६ ॥ निर्दग्धोयोमयाकामोभस्मरूपेणमत्तनौ ॥

स्थितोमाम्प्रतिकृत्येवत्वदग्रेदग्धुमिच्छति ॥ १७ ॥ तस्मादुद्धरमांकामादग्नेरिवमनोहरे ॥ त्वदंगामृतदानेनप्रसीददयितेमम ॥ ११८ ॥
इतिश्रीकालिकापुराणेपञ्चचत्वारिंशोध्यायः ॥ ४५ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ अथश्रुत्वावचःशम्भोर्गिरिजातीवहर्षिता ॥ मेनेप्राप्त
न्तदाशम्भुंसुन्दरन्दयितम्पतिम् ॥ १ ॥ अथप्राहतदाकालीसखीवक्रेणशंकरम् ॥ यथासश्रृणुतेवाक्यंश्रोतुमिच्छँश्चशंकरः ॥ २ ॥ नसन्धा
वतिभेदेनप्रवर्त्तन्तेत्रसज्जनाः ॥ मर्यादयाहरस्तन्मेपाणिंगृह्णातुशंकरः ॥ ३ ॥ पितृदत्ताभवेत्कन्यातपोदत्ताभवेन्नहि ॥ तपसाचेत्प्रदत्ताह
म्मान्तातश्चप्रदास्यति ॥ ४ ॥ तस्मात्सम्प्रार्थ्यपितरंहिमवन्तन्नगेश्वरम् ॥ वैवाहिकेनविधिनापाणिङ्गृह्णातुमेहरः ॥ ५ ॥ ॥ मार्कण्डेय
उवाच ॥ ॥ इत्युक्त्वाविररामाथकालीलज्जासमन्विता ॥ हरोपितद्वचःसत्यन्तथ्यंयोग्यन्तदाग्रहीत् ॥ ६ ॥ ततःससगणःशम्भुस्तत्रवास
न्तदाकरोत् ॥ गङ्गावतरणेसानौयथापूर्वन्तथाधुना ॥ ७ ॥ कालीपितुर्गृहंयातासखीभिःपरिवारिता ॥ नालोकयन्तीसादीनागुरूणांवदनं
सती ॥ ८ ॥ एतस्मिन्नन्तरेसप्तमरीचिप्रमुखान्मुनीन् ॥ चिन्तयामासशशिभृत्कालीम्प्रार्थयितुन्तदा ॥ ९ ॥ चिन्तिताः सप्तमुनयस्त
त्क्षणान्मदनारिणा ॥ आकृष्टाइवकेनापितत्सकाशमुपागताः ॥ १० ॥ तान्मुनीन्ददृशेशम्भुः सप्ताग्नीनिवदीपितान् ॥ अरुन्धतींवशि
ष्ठस्यसकाशेददृशेसतीम् ॥ ११ ॥ अरुन्धतीन्ततोदृष्ट्वावशिष्ठस्यसमीपतः ॥ मेनेयोषिद्वहन्धर्म्यम्मुनिभिश्चाप्यवर्जितम् ॥ १२ ॥ ततस्ते
मुनयः सर्वेसम्पूज्यवृषभध्वजम् ॥ इदमूचुःप्रहर्षेणस्मरणाकर्षिताःप्रियम् ॥ १३ ॥ ॥ ऋषयऊचुः ॥ ॥ यत्प्रत्यक्षन्दृश्यतेशुद्धरूपञ्च
न्द्रप्रख्यञ्चन्द्रखण्डोपशोभि॥अन्तःप्रज्ञम्भावितन्तन्मुनीनाम्भाग्यन्दृष्टम्भागधेयेनमुक्तैः ॥ १४ ॥ प्रज्ञातन्त्रन्ध्यानतन्त्रम्पुरस्तान्नित्यन्ध्येय

१ ध्यानयन्त्रंध्यानयुक्तंध्यानगम्यंमितिवापाठः।

न्ध्यायिनांस्वप्रकाशम् ॥ पुञ्जीभूतम्बाह्यतत्त्वेनशश्वद्योगप्राप्यन्धामशम्भोरुदारम् ॥ १५ ॥ दृष्ट्वायस्यैकत्रभागंसनेत्रन्त्राणायस्यादर्शनंसु
र्यतुल्यम् ॥ तद्धामेदंस्थानसर्वस्यनित्यम्भक्त्यास्तुत्यंतंनमःशम्भुदेहम्॥१६॥प्रकाशतेयःप्रथमादिभागतःस्थितःसवामेयइहैवनेता ॥ सोस्मा
कमस्तुप्रथमंस्वसिद्ध्यैहरस्यशक्त्याविधृतोललाटे ॥ १७ ॥ यःप्रधानात्मकःसत्त्वरजोभ्यान्तमसान्वितः ॥ पुरुषःसर्वजगतांसहरोनःप्रसीद
तु ॥ १८ ॥ इतिसंस्तुत्यदेवेशम्मुनयोविनयानताः ॥ ऊचुःकिमर्थम्भवतास्मृतास्तन्नोनिगद्यताम् ॥ १९ ॥ तेषान्तद्वचनंश्रुत्वाशंकरःप्रहस
न्निव ॥ जगादतान्मुनीन्सर्वानाभाष्यचपृथक्पृथक् ॥ २० ॥ ॥ ईश्वरउवाच ॥ ॥ हितायसर्वजगतांसम्भोगायात्मनस्तथा ॥ दारा
न्ग्रहीतुमिच्छामितथासन्तानवृद्धये ॥ २१ ॥ सहायन्तत्रकुर्वन्तुभवन्तोममसाम्प्रतम् ॥ मदर्थेचततःकालींयाचन्तान्तुहिनाचलम् ॥२२॥
महतातपसाकालीमाम्पार्तिलघुविन्दताम् ॥ किन्तुग्रहिष्येविधिनातस्माद्याचन्तुताङ्गिरिम् ॥ २३ ॥ यथायथास्वयंकालींशैलोदातुंसमुत्सहेत्॥
तथातथाविदध्वंहियूयंवाग्विभवान्विताः ॥ २४ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ हरंसम्बोध्यमुनयोह्यगच्छन्गिरिराड्गृहम् ॥ तेनप्रपूजिता
स्तेतुप्रोचुस्तम्मुनयोगिरिम् ॥ २५ ॥ यश्चन्द्रशेखरोदेवोदेवदेवश्चयोमतः ॥ शापानुग्रहणेशक्तोयएकोजगताम्पतिः ॥ २६ ॥ यःसंहरतिसर्वा
णिजगन्तिप्रलयोद्भवे ॥ योविभूतिप्रदोभक्तेनानारूपोमनोहरः ॥ २७ ॥ सतेदुहितरंकालीम्भार्यामादातुमिच्छति ॥ यदिपश्यसित्वंयोग्यंवर
न्तन्दुहितुःसमम् ॥ २८ ॥ तदाप्रयच्छतनयांकालींशशिभृतेगिरे ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्युक्तस्तैर्गिरिपतिश्चिरंस्वहृदयस्थितम्
॥ २९ ॥ दुहितुश्चप्रियंज्ञात्वाप्राप्यसद्वचनान्मुदम् ॥ आहचेदम्प्रकाशेनयुष्माभिस्त्वहमागतैः ॥ ३० ॥ पावितोमुनिशार्दूलैःपूरितश्चमनोर

थः ॥ दास्यामिशम्भवेपुत्रींयुष्माभिःप्रार्थितस्त्वहम् ॥ ३१ ॥ पूर्वमेवतपस्तप्त्वातयेशःपतिरीहितः ॥ धातुर्नियोजनामिदंकोन्यथाकर्त्तुमुत्सहे
त् ॥ ३२ ॥ कोन्यःप्रार्थयितुंशक्तःसुताम्ममविनाहरात् ॥ हरेणावगृहीतायातामन्यःकःसमुत्सहेत् ॥ ३३ ॥ हरंगृहीत्वामनसानान्यंसापीह
वाञ्छति ॥ इत्युक्तामेनयासार्द्धंसुतान्दातुञ्चशम्भवे ॥ ३४ ॥ अङ्गीकृत्यविसृष्टास्तेह्यनुप्रापुर्महेश्वरम् ॥ तेगत्वामुनयःसर्वेमरीचिप्रमुखाद्वि
जाः ॥ ३५ ॥ शैलराजोयदाचष्टतदूचुर्मदनारये ॥ हिमवाँस्तनयान्दातुन्तुभ्यमुत्सहतेहर ॥३६॥ यदिदानींत्वयाकर्त्तुंयुज्यतेक्रियतान्तुतत् ॥
अस्माँश्चाप्यनुजानीहिहरगन्तुन्निजास्पदम् ॥ ३७ ॥ सिद्धञ्ज्ञात्वाहरःसाध्यम्मुदितस्तान्विसृष्टवान् ॥ यथायोग्यंसमाभाष्यक्रमादेकैकशो
मुनीन् ॥ ३८ ॥ कालीविवाहावसरेयूयमायातमाम्प्रति ॥ इतितेवैहरेणोक्तम्प्रतिश्रुत्यर्षयोययुः ॥ ३९ ॥ अथान्योन्यप्रियतयाकृत्वाकृत्वा
गतागतम् ॥ समयंकारयामासविवाहायहरोगिरिम् ॥ ४० ॥ माधवेमासिपञ्चम्यांसितेपक्षेगुरोर्दिने ॥ चन्द्रेचोत्तरफल्गुन्याम्भरण्यादौ
स्थितेरवौ ॥ ४१ ॥ आगतामुनयस्तत्रमरीचिप्रमुखामुहुः ॥ हरेणचिन्तिताःसर्वेतथाब्रह्मादयःसुराः ॥ ४२ ॥ तथाचसर्वेदिक्पालामुनय
श्चतपोधनाः ॥ शच्यासहतथाशक्रोब्रह्माण्याद्यास्तुमातरः ॥ ४३ ॥ नारदश्चगतस्तत्रदेवर्षिर्ब्रह्मणःसुतः ॥ एतैःपरिचरैःसार्द्धंगणैराप्या
यितःस्वकैः ॥ ४४ ॥ वैवाहिकेनविधिनागिरिपुत्रींहरोग्रहीत् ॥ विवाहेगिरिजाशम्भोःसर्पायेष्टौतनौस्थिताः ॥ ४५ ॥ तेजाम्बूनदस
न्नद्धाअलंकारास्तदाभवन् ॥ द्विभुजोभून्महादेवोजटाः केशत्वमागताः ॥ ४६ ॥ शिरःस्थितश्चन्द्रखण्डःसोर्चिषाज्वलितोभवत् ॥
ललाटनेत्रमभवत्तदारत्नमहार्घकम् ॥ ४७ ॥ विचित्रवसनंव्याघ्रकृत्तिरासीत्तदाद्विजाः ॥ विभूतिलेपोह्यस्याभूत्सुगन्धिमलयोद्भवः ॥ ४८ ॥

गौररूपोहरस्तत्रबभूवाद्भुतदर्शनः ॥ ततोदेवाःसगन्धर्वाःसिद्धविद्याधरोरगाः ॥ ४९ ॥ विस्मयम्परमञ्जग्मुर्हरन्दृष्ट्वातथाविधम् ॥ हिमवान्मुदितश्चासीत्सहपुत्रैश्चमेनया ॥ ५० ॥ ज्ञातयश्चास्यमुमुदुर्हरन्दृष्ट्वातथाविधम् ॥ इदम्ब्रह्मातत्रजगौहरन्दृष्ट्वामनोहरम् ॥ ५१ ॥ सर्वैशिवकरंयस्मात्सुवेशमभवत्सुराः ॥ तस्माच्छिवोयंलोकेषुनामाख्यातोधिकःशिवः ॥ ५२ ॥ महेश्वरमुमायुक्तमीदृशंयःस्मरेद्धृदा ॥ सततन्तस्यकल्याणंवाञ्छितञ्चभविष्यति ॥ ५३ ॥ एवंकालीमहामायायोगनिद्राजगत्प्रसूः ॥ पूर्वन्दाक्षायणीभूत्वापश्चाद्गिरिसुताभवत् ॥ ५४ ॥ स्वयंसमर्थापिसतीकालीसम्मोहितुंहरम् ॥ तथाप्युग्रन्तपस्तेपेहितायजगतांशिवा ॥ ५५ ॥ एवंसम्मोहयामासकालिकाचन्द्रशेखरम् ॥ इत्येतत्कथितंसर्वन्त्यक्तदेहासतीयथा ॥५६॥ हिमवत्तनयाभूत्वापुनःप्रापमहेश्वरम् ॥ इदंयःकीर्तयेत्पुण्यंकालिकाचरितन्द्विजाः॥५७॥नाधयोव्याधयस्तस्यदीर्घायुःसचजायते ॥ इदम्पवित्रम्परमामिदंकल्याणवर्द्धनम् ॥ ५८ ॥ श्रुत्वापिसकृदेवेदंशिवलोकायगच्छति ॥ यःश्राद्धेश्रावयेद्विप्रान्कालिकाचरितम्महत् ॥ ५९ ॥ पितरस्तस्यकैवल्यमाप्नुवन्तिनसंशयः ॥ यःश्रावयेद्ब्राह्मणानांसन्निधौवासभागतः ॥ ६० ॥ तत्रस्वयंहरोगत्वाशृणोतिसहमायया ॥ इतिवःकथितम्पुण्यंसर्वपापप्रणाशनम् ॥ युष्मभ्यंरोचतेचान्यद्यत्तत्पृच्छन्तुसत्तमाः ॥ ६१ ॥ इतिश्रीकालिकापुराणेकालीहरसमागमोनामषट्चत्वारिंशत्तमोध्यायः ॥ ४६ ॥ ॥ ऋषयऊचुः ॥ ॥ विचित्रमिदमाख्यातम्ब्रह्मन्कालीहरागमम् ॥ पुण्यम्पापहरन्नित्यंश्रुतिसौख्यप्रदंवरम् ॥ १ ॥ भूयःकथयशर्वस्यकालीतन्वर्धमुत्तमम् ॥ कथञ्जहारगौरीवाकथम्भूताथकालिका ॥ २ ॥ केनवाकारणेनाशुकृष्णागौरीत्वमागता ॥ तन्नःकथयतत्त्वेनमुनिश्रेष्ठद्विजोत्तम ॥ ३ ॥ मार्कण्डेयउवाच ॥ इदन्तुमहदाख्यानंकथयिष्यामिवोधु

ना ॥ महर्षयस्तच्छृण्वन्तुतत्त्वेनशुभदम्पंरम् ॥ ४ ॥ एतदौर्वम्पुराराजासगरःपृष्टवान्मुनिम् ॥ सतंयथासमाचष्टतद्बोधनिगदाम्यहम् ॥ ५ ॥
पुराभूत्सोमवंशेचसगरोनामपार्थिवः ॥ सश्रीमान्बलवान्दक्षःसर्वशास्त्रार्थपारगः ॥ ६ ॥ सोभूदेकरथेनैवजित्वासर्वान्महीभुजः ॥ सा
र्वभौमोनरपतिःसर्वराजगुणैर्युतः ॥ ७ ॥ तम्प्राप्तराज्यंराजानंसागरम्पार्थिवोत्तमम् ॥ सभाजयितुमत्यर्थम्मुनयःसमुपागताः ॥ ८ ॥ प्राच्यो
दीच्यामहात्मानोदाक्षिणात्यास्तथोत्तराः ॥ मुनयोब्राह्मणाश्चैवनृपन्द्रष्टुंसमागमन् ॥ ९ ॥ आगतेष्वथसर्वेषुमहात्माज्वलनोपमः ॥ और्वोना
ममुनिः श्रीमानागतोनन्दितुन्नृपम् ॥ १० ॥ तमागतम्मुनिन्दृष्ट्वाज्वलन्तमिवपावकम् ॥ सपर्य्ययामहत्यातुसगरस्तमपूजयत् ॥ ११ ॥
पाद्यमाचमनीयञ्चदत्त्वैवार्घपुरोगमम् ॥ निवेशयामासचतम्मुनिश्रेष्ठंवरासने ॥ १२ ॥ उवाचचमहात्मानमौर्वंससगरोनृपः ॥ प्रणम्यचयथा
योग्यङ्कुशलन्तइतिद्विजम् ॥ १३ ॥ सचप्राहमुनिश्रेष्ठोनरराजसदामम ॥ सर्वत्रकुशलन्त्वान्तुद्रष्टुङ्कुशलमुत्सहे ॥ १४ ॥ त्वत्तःकोन्योस्ति
कुशलीपृथिव्यांसर्वराजसु ॥ यएकःसञ्जिगायाशुभत्रान्तसकलपार्थिवान् ॥१५ ॥ कुशलंवर्द्धतान्नित्यन्तवराजवरोत्तम ॥ यथानीत्यासदाचारैः
पृथिवींशाधिभूपते॥१६॥तत्रवृद्धौजगद्वृद्धिर्वृद्धौचेष्टान्ततःकुरु ॥ शुभ्रांशुवृद्धौसततंसागरस्येववर्द्धनम् ॥१७॥प्रथमंसद्गुणैरात्माक्रियतान्नृपयो
जनम् ॥ ततःस्वभार्यामहिषीक्रियतान्तद्गुणैर्युता ॥ १८ ॥ नित्यासंयोजिताचेत्स्याद्वनितास्वयमेवहि ॥ स्वगुणेषुप्रवेक्ष्यन्तीमहत्यपिधृतत्र
ता ॥ १९ ॥ श्रूयतेहिमवत्पुत्रीशम्भुसंगतमानसा ॥ क्रियाभ्युपायैर्बहुभिःशम्भुनासाप्रयोजिता ॥ २० ॥ ततोतिमहताप्रेम्णाशंकरस्याथपार्वे

१ आत्मनइत्यर्थः ।

ती ॥ शरीरमर्द्धमहरत्तस्यैवानुमतेसती ॥ २१ ॥ अर्द्धनारीश्वरस्तेनतदाप्रभृतिशंकरः ॥ अभवन्नृपशार्दूलनान्याम्भार्यांजुहीतवान् ॥ २२ ॥
तस्मात्त्वमपिराजेन्द्रस्वजायामात्मनोत्तरे ॥ गुणैःसंयोजयलघुंसंयोजयततःसुतम् ॥ २३ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्यौर्वभाषि
तंश्रुत्वासगरोपिमुदान्वितः ॥ इदम्मुनिमपृच्छत्सनृपतिःस्मितसन्ततः ॥ २४ ॥ सगरउवाच ॥ कथंसागिरिजादेवीकायार्द्धमहरत्सती ॥
शंकरस्याद्विजश्रेष्ठतदहंश्रोतुमुत्सहे ॥ २५ ॥ नीत्याययावायोक्तव्यास्वात्माभार्यासुतोऽथवा ॥ तान्नीतिश्चसदाचारसंहितांश्रोतुमुत्सहे ॥२६॥
राजनीतिंसतान्नीतिमन्येषाञ्चकृतात्मनाम् ॥ पृथक्पृथक्छ्रोतुमिच्छुरहन्त्वान्नाथयोद्विज ॥ २७ ॥ यदिगुह्यमिदम्ब्रह्मन्नतदाश्रोतुमुत्सहे ॥ तथा
नाज्ञापयामित्वांश्रोतुमिच्छुश्चतत्समम् ॥ २८ ॥ कृपयाकथनीयश्चेत्तदाकथयतन्मुने ॥ ॥ मार्कण्डेयउवाच ॥ ॥ इत्येवंसगरेणोक्तऔ
र्वोपिद्विजसत्तमः ॥ २९ ॥ प्रत्युवाचमहात्मानङ्कृपालुस्तत्रभूपतौ ॥ ॥ और्वउवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामियद्यत्पृष्टमिहत्वया॥३०॥
यथाहरस्यतन्वर्द्धम्भूभृत्पुत्रीपुराहरत् ॥ यथानीतिस्त्वयाकार्यायत्रयत्रनृपोत्तम ॥ ३१ ॥ सर्वेषाञ्चसदाचारंक्रमाद्वक्ष्यामितच्छृणु ॥ यदोढा
हिमवत्पुत्रीशंकरेणमहात्मना ॥ ३२ ॥ कियन्तंसतदाकालन्तत्रानिन्येसहोमया ॥ रममाणस्तयासार्द्धंसानौकुञ्जेदरीषुच ॥ ३३ ॥ विजहार
चिरन्तत्रपार्वतीम्मोदयन्हरः ॥ अथकालेतुसम्प्राप्तेशम्भुःकैलासपर्वतम् ॥ ३४ ॥ सगणोभार्ययासार्द्धमगच्छात्रिदिवोपमम् ॥ सतयाक्रीडमा
नश्चत्यक्तध्यानात्मचिन्तनः ॥ ३५ ॥ तद्वक्त्रचन्द्रनेत्राणिचकोरानिवचाकरोत् ॥ पुष्पाणिक्वचिदाहृत्यगिरिजाम्प्रतिशंकरः ॥ ३६ ॥ सर्वा
गसंगिनाम्मालांविदधेतिमनोहराम् ॥ कदाचिदादर्शतलेयुगपद्वात्मनोमुखम् ॥ ३७ ॥ मुखन्तथैवापर्णायावीक्षाञ्चक्रेवृषध्वजः ॥ कदाचि

न्मृगनाभीनांविलेपैर्गन्धपत्रकम् ॥ ३८ ॥ तस्याघनस्तनयुगेविलिलेखस्मरान्तकः ॥ गन्धसारविलेपेनातिलकान्यम्बिकातनौ ॥ ३९ ॥
ललाटेचाकरोच्चारुचन्द्रबद्धनसन्निभम् ॥ उमानिर्यासमंसक्तकेशपाशेषुचित्रकम् ॥४०॥ चन्दनाद्यगुरुकस्तूरीकुङ्कुमैस्सविलेपनः ॥ चकारथे
नतस्यास्तुकेशपाशोव्यराजत ॥ ४१ ॥ नर्त्तनायावकीर्गस्यशीखिपुच्छस्यसाम्यधृक् ॥ जाम्बूनदमयाञ्छुद्रान्कुण्डलाद्यान्मनोहरान्॥४२॥
अलंकारानुमादेहेसमाकार्षीद्वृषध्वजः ॥ तैर्जाम्बूनदसम्भूतैर्योजितैर्गिरिजातनुः ॥ ४३ ॥ विभातिजलदापूर्णेकालिकेवतडिद्गणैः ॥ सौर्दिव्यै
रलंकारैर्नानारत्नैःसदंशुकैः ॥ ४४ ॥ सम्पूर्णमण्डिताकालीसादृश्यम्प्रकृतेर्दधौ ॥ एवंसदासानुरागस्तस्यांशम्भुर्जगत्पतिः ॥४५॥ जगद्धिता
यचिक्रीडकाल्यादयितयासह ॥ कालीचजगतामम्मातामहामायाजगन्मयी ॥ ४६ ॥ योगनिद्राजगद्धात्रीविद्याविद्यात्मिकाखिला ॥ प्रकृतिः
परमामूर्तिःसर्गान्तस्थितिकारिणी ॥ ४७ ॥ सम्मोह्यशंकरंयत्नाज्जगताञ्चहितैषिणी ॥ रेमेतेनसमन्देवीचन्द्रिकेवसुधांशुना ॥ ४८ ॥ अथै
कदास्मरहरःकैलासाग्रेसहोमया ॥ रममाणोमुदायुक्तोददृशेप्सरसःशुभाः ॥४९॥ रूपयौवनसम्पन्नाः सर्वलक्षणसंयुताः ॥ तासाम्मध्यगतांवि
श्याउर्वशीचमनोहरा॥५०॥ताःसर्वारक्तगौरांग्यःसर्वालंकारभूषिताः ॥ मुनीनाञ्चमनोत्यर्थंशक्तामोहयितुंहठात्॥५१॥ताः प्रणम्यहरन्दृष्ट्वागि
रिजाञ्चमनोरमाम् ॥ अग्रेग्राञ्जलयस्तस्थुस्तद्गीतिनतमस्तकाः ॥ ५२ ॥ अथप्राहतदाभर्गः पार्वतीमिदमद्भुतम् ॥ तासांसमक्षन्तस्यान्तु भा
वितंस्याद्यदप्रियम् ॥ ५३ ॥ कालिभिन्नाञ्जनश्यामेउर्वश्याद्यप्सरोगणैः ॥ त्वयेहह्रीस्वभावेनसँल्लापः क्रियतामिति ॥ ५४ ॥ तच्छ्रुत्वावच
नन्तस्ययथायोग्यञ्चसोर्वशी ॥ अप्सरसःसमाभाष्यविसृष्टागिरिजातया ॥ ५५ ॥ अथसाक्रोधवशगापार्वतीभर्गभावितात् ॥ कालिभिन्ना

ञ्जनश्यामेत्युदिताह्यभवत्क्षणात् ॥ ५६ ॥ साचाप्सरसाम्पुरतोवर्णोद्देशविकत्थनम् ॥ नसेहेमन्युनायुक्तागिरिजेन्दुकलाभृतः ॥ ५७ ॥ अथ
सारोपसंयुक्तात्यक्त्वावृषभवाहनम् ॥ अपह्नुतेशैलसानौरोषापह्नुतिमागता ॥ ५८ ॥ मार्गमाणोथविरहव्याकुलोवृषवाहनः ॥ नाससाद
कियत्कालम्पार्वतीम्पर्वतोत्तमे ॥ ५९ ॥ विरहव्याकुलंज्ञात्वास्वयंसापार्वतीहरम् ॥ आत्मानन्दर्शयामासगिरिसानापवह्नुते ॥ ६० ॥
तामासाद्यततःशम्भुःकिमर्थमभजःप्रिये ॥ मानम्मनोनुदन्देविविशीर्णइवचाब्रवीत् ॥ ६१ ॥ भर्त्तुरागःपुरन्ध्रीणाम्मानग्रहणकारणम् ॥
तद्विनाग्रहणात्तस्यभीरुप्राप्नोतिवाच्यताम् ॥ ६२ ॥ तस्मात्किमर्थमकरोरोषंत्वञ्जलजानने ॥ तदाचक्ष्वद्रुतंकान्तेमनोमेनप्रसीदति
॥ ६३ ॥ इत्युक्त्वाशंकरोदेवीन्तामालिंगितुमुद्यतः ॥ कालीतंवारयामासवचनञ्चाब्रवीदिदम् ॥ ६४ ॥ नदृष्टपूर्वाकिमहंयेनभिन्नाञ्जनो
पमा ॥ क्रियतेमयिभूतेशभवताप्सरसाम्पुरः ॥ ६५ ॥ जातिहीनंवृत्तिहीनंरूपहीनमदक्षिणम् ॥ हीनांगमतिरिक्तांगन्तेनदोषेणनाक्षिपेत् ॥
॥ ६६ ॥ इतिब्रह्मापुराप्राहवेदौघार्थविनिश्चयम् ॥ तच्चावमन्यभवतापरिहासोभ्यभाष्यते ॥ ६७ ॥ यावन्नमेशरीरस्यभवित्रीस्वर्णगौरता ॥
नसमेष्येत्वयातावदितिसत्यम्ब्रवीमिते ॥ ६८ ॥ शरीरगौरतांशम्भोनसमेष्येत्वयाविना ॥ तत्रमेशृणुसन्धायआत्मनःशिरसाशपे ॥ ६९ ॥
इत्युक्त्वासातदादेवीतस्यैवपुरतोययौ ॥ महाकोपीप्रपाताख्यंहिमवत्सानुमुत्तमम् ॥ ७० ॥ महादेवोपितम्भाव्यञ्ज्ञानेनकृतनिश्चयम् ॥ अर्थ
ञ्ज्ञात्वातदापर्णीसर्वज्ञोनाप्यवारयत् ॥ ७१ ॥ सागत्वापूर्ववत्तत्रशम्भुसंगतमानसा ॥ शतमाराधयामासवर्षाणिवृषभध्वजम् ॥ ७२ ॥
एकम्पादंसमुत्क्षिप्यवामेनाक्रम्यसाक्षितिम् ॥ उत्तराभिमुखीभूत्वानिराहारानिरन्तरम् ॥ ७३ ॥ वैयाघ्रचर्मवसनासोर्द्धमूर्द्धाननासती ॥ ज्यो

तिर्मयम्परंशान्तंशिवंशिवकरंवरम् ॥ ७४ ॥ आत्मस्वरूपतत्त्वज्ञातत्त्वेनाराधयद्वरम् ॥ ताश्चिन्तयन्तीम्परमन्निश्चलान्तत्त्वमानसाम् ॥
॥ ७५ ॥ मेनेमुनिगणःस्थाणुर्योनजानातितत्त्वतः ॥ एवन्तस्यास्तपस्यन्त्याजग्मुर्वर्षाणिवैशतम् ॥ ७६ ॥ अन्येपाञ्चयथाशत्रदेकनृपति
सत्तम ॥ ततस्तांशतवर्षान्तेशङ्करोयोगतत्परः ॥ ७७ ॥ आत्मानन्दर्शयामासक्रमादेकंससंत्रपम् ॥ प्रथमन्दर्शयामासब्रह्माणञ्चहरिन्ततः ॥
॥ ७८ ॥ ततस्तुशाम्भवन्देहन्ततस्तेषामथैकताम् ॥ ज्योतिर्मयत्वंशुद्धत्वंसर्वेषांहेतुतान्तथा ॥ ७९ ॥ ततस्तुशम्भुरूपंसदर्शयामासशंकरः॥
योगनिद्राम्महामायांयोगिनींकालिकाम्बिकाम् ॥ ८० ॥ प्रथमन्दर्शयित्वातुतस्याःप्रकृतिरूपताम् ॥ पश्चात्सापार्वतीत्येवक्रमात्तस्याअदर्श
यत् ॥८१॥ तपसासम्भृतेनाशुज्ञानमासाद्यपार्वती ॥ अन्तर्दृष्ट्याबहिर्दृष्ट्यातत्त्वञ्ज्ञात्वायथातथम् ॥८२॥ शम्भुञ्जगन्मयम्मेनेतथात्मान
ञ्जगन्मयीम् ॥ ब्रह्माविष्णुर्हरश्चापिततःसर्वमिदञ्जगत् ॥८३॥ अहंसमस्तप्रकृतिर्योगनिद्रातथासती ॥ इतिध्यानेनसादेवीप्राप्यध्यानन्तदात्य
जत् ॥ ८४ ॥ उन्मील्यनयनद्वन्द्वम्बहिश्शम्भुंददर्श च ॥ सादृष्ट्वाशंकरन्देवन्देवदेवमुमापतिम् ॥ ८५ ॥ तुष्टाववाग्भिरिष्टाभिर्योमेनंयोगतत्प
रम् ॥ पार्वत्युवाच ॥ नमस्तेजगतान्नाथनमस्तेकेशवाव्यय॥८६॥प्रधानपुरुषातीतकारणत्रयकारण ॥ योगमोहमनोरागधर्माधर्ममयस्तथा॥
॥८७॥ विद्याऽविद्यास्वरूपश्चशाम्भवःकायएषते ॥ त्वन्निःश्रेयश्श्रेयसायुज्यमानोदृश्योऽदृश्योयोगमूर्तिर्मनीषी ॥८८॥ सम्यक्छ्रद्धापौरुषेत
त्त्वरूपन्त्वंवैज्योतिःशान्तिरूपम्पुरस्तात्॥ब्रह्माविष्णुस्त्वंहरस्त्वम्महेन्द्रःसूर्यःसोमोवायुरग्निर्द्धनेशः॥८९॥ त्वन्तोयेशःशमनोराक्षसश्चशेषस्त्व

१ ससत्त्वकंद्र०पा० ।

तोभिद्येतकोपिनास्मिन्॥त्वम्भूमिर्द्यौर्द्युसदाश्चापिपन्थास्त्वंस्थावरोजङ्गमोभूर्बलस्थः ॥९०॥ ज्ञानञ्ज्ञेयन्ध्यानगम्यश्चतत्त्वम्परात्परंव्यक्तरूप
म्परेषाम् ॥ त्वम्पूरुषःपरमात्माप्रधानन्त्वंहिज्यायानागमोज्ञानगम्यः ॥ ९१ ॥ भावःकृत्यम्पञ्चरूपासमस्तैरासाद्यस्तेगोचरास्तद्भवाय ॥
कीर्त्तिःकीर्त्यस्तुत्यरूपीस्तुतिश्चद्रष्टादृश्यः स्थैर्यधृक्स्थावरश्च ॥९२॥ नित्योनित्योमुक्तयोगोवियोगोदानादानेभेदसामप्रयोगः॥नीतिर्नेयो
दीक्षितोदक्षिणाश्चसारात्सारः संविधातावितेयः ॥ ९३ ॥ आर्योनार्योरूपधृग्रूपहीनोदिव्योदेवोमानुषोमानुषश्च ॥ सृज्यः स्रष्टापालकःपाल्य
रूपश्चेताचेयोनोर्मिमुक्तस्तथोर्मिः ॥ ९४ ॥ विद्याविद्यावेदवादैकरूपोरूपारूपस्तीक्ष्णसौम्यैकरूपः ॥ भावाभावःशोभनःशुद्धरूपीशश्च
दान्तःशान्तिरुग्रामुनीनाम् ॥ ९५ ॥ द्वन्द्वोऽद्वन्द्वः सर्वगोपर्वगश्चभ्रान्तोभ्रान्तःसिद्धसिद्धिप्रदश्च ॥ एकस्थस्त्वंसर्वगोतासुदेहोनिर्दे
हस्त्वन्देहएकः सुराणाम् ॥ ९६ ॥ स्थूलःसूक्ष्मोनिर्विकारःशरीरीविश्वात्मात्वन्नास्तिभिन्नोभवत्तः ॥ कार्याकार्येयस्यरूपेसमस्तेव्याप्या
व्याप्येभागहीनोतिपूर्णः ॥ ९७ ॥ योगज्ञानस्थात्मकंयस्यनित्यंरूपंयस्यश्रीदतस्मैनमस्ते ॥ प्रधानपुंसोरपिपोविधातायःकालरूपीपुरुषः
परेशः ॥ ९८ ॥ तमीशमुग्रंवरदंवरेण्यन्नमामिचिन्नीतिविनानकन्त्वाम् ॥ अक्षयोयोव्ययःसाक्षीक्षेत्रज्ञःक्षेत्रधृग्वरः ॥ ९९ ॥ तस्मैनमस्ते
विश्वात्मन्वृषध्वजमहेश्वर ॥ ज्ञानामृतविनिस्यन्दियस्यविश्वेन्द्रमाःसदा ॥ १०० ॥ तद्रूपम्मेकंयज्ज्ञेयम्भक्तिमात्रप्रमोस्तुते ॥ ॥ और्व
उवाच ॥ ॥ इतिस्तुतोमहादेवः सर्वभूतानुकम्पकः ॥ १ ॥ प्रसन्नवदनः प्राहपार्वतीम्प्रतिहर्षयन् ॥ ईश्वरउवाच ॥ प्रीतोस्मिदेविभद्र
न्तेवरंवरयवाञ्छितम् ॥ २ ॥ तपसाप्यायितश्चाहन्त्वयावज्ञातथाहरिः ॥ तपसात्वत्समोनास्तिशीलेनचगुणेनच ॥ ३ ॥ त्वांविनान

हितृप्यामिप्रियेकुरुयथेप्सितम् ॥ ततः सामोहिताप्राहमाययाहिमवत्सुता ॥ ४ ॥ जाम्बूनदाभगौरोमेदेहोभवतुसाम्प्रतम् ॥ अनन्यकां
तस्त्वञ्चापिभूयामत्तोविनाहर ॥ १०५ ॥ एवमुक्तो महादेवः पार्वत्यापार्वतीन्ततः ॥ आकाशगंगातोयौघेमज्जयामासभामिनीम् ॥ ६ ॥
सानिमज्ज्यसमुत्तीर्णाविद्युद्गौरीव्यजायत ॥ सिताम्भोमध्यगादेवीशारदाभ्रेताडिद्यथा ॥ ७ ॥ शम्भुश्चांगीचकाराशुनाहन्त्वत्तोविनाप्रिये ॥
मनसापिग्रहीष्यामिनान्यांसत्यम्ब्रवीमिते ॥ ८ ॥ ॥ और्वउवाच ॥ ॥ अथतोयात्समुत्तीर्णापार्वतीमोदसंयुता ॥ तपःक्लेशपरि
त्यक्ताचन्द्रिकेवविधोर्यथा ॥ ९ ॥ अथताम्पार्वतीन्देवीमादायवृषभध्वजः ॥ जगामशैलंकैलासंस्वमाश्रमपदल्लँघु ॥ ११० ॥ तदाग
त्वाहरोदेवीमधिवास्यविभूष्यच ॥ पूर्ववन्मोदयामासनर्महासकथादिभिः ॥ ११ ॥ सापिसौवर्णगौरांगीवीक्ष्यरूपम्मनोहरम् ॥ गृहीतस
मयंशम्भुम्प्राप्यातीवमुमोदह ॥ १२ ॥ एवन्तयोस्तुशिवयोरन्योन्यरममाणयोः ॥ जगामसुचिरंकालंकैलासेपर्वतोत्तमे ॥ १३ ॥ अथैक
दामहादेवसमीपेहिमवत्सुता ॥ आसीनादृष्टशेतस्यस्वाञ्छायामुरसिस्थिताम् ॥ १४ ॥ स्फटिकाभ्रसमेस्वच्छेहृदिशम्भोर्मनोहरे ॥ योगि
ज्ञानादर्शतलेचार्वंगीम्प्रतिविम्बिताम् ॥ ११५ ॥ आत्मच्छायांगिरिसुतावामभागेमनोहरे ॥ ददर्शवनितारूपांस्मितवक्त्राम्मनोहरा
म् ॥ १६ ॥ भ्रान्त्यादृष्ट्याथपार्वत्यास्तदाज्ञानमजायत ॥ कृतसत्योपिगिरिशःकिमन्यांवनितान्दधौ ॥ १७ ॥ माययास्थापितांगात्रेवीक्ष
न्तींकुटिलभ्रुमाम् ॥ इतितस्यास्तदावक्त्रम्मलिनम्भ्रुकुटीयुतम् ॥ १८ ॥ बभूववृषकेतुश्चश्यामउत्पातकोयथा ॥ सादृष्ट्वाथतदाछायांविष्णु

१ उत्पतति अकस्मादागच्छतीत्युत्पातकः ।

मायाविमोहिता ॥ १९ ॥ अपह्नुतांगिरेःशृंगम्मानाद्रोषाद्विवेशह ॥ अथताम्मार्गमाणस्तुशंकरोविरहाकुलः ॥ १२० ॥ चिरादपह्नुतान्देवीमा
ससादततोहरः ॥ तामासाद्यमहादेवोविवर्णवदनाम्प्रियाम् ॥ २१ ॥ उवाचरोषणेहेतुञ्ज्ञातुमिच्छुर्यथातथम् ॥ ॥ ईश्वरउवाच ॥ ॥
किमर्थन्त्वंवरारोहेमह्यंकुप्यसिकोपने ॥ २२ ॥ रोषहेतुमहंवक्तुन्तवेच्छामीहवल्लभे ॥ नतुभ्यमपराध्यामिवाचावामनसाथवा ॥ २३ ॥ का
येनवाकथंकोपंकर्त्तुमर्हसिभामिनि ॥ ॥ देव्युवाच ॥ ॥ समयेनमयापूर्वन्तथासम्प्रार्थितोभवान् ॥ २४ ॥ कथन्तम्परिहायत्वमन्याम्भार्यां
समीहसे ॥ प्रत्यक्षेणमयादृष्टातवह्यन्तरेहर ॥ १२५ ॥ चार्वंगीवनिताकाचित्तोयनिर्यातभस्मनि ॥ भवान्सर्वज्ञानमयःसर्वगःपरमेश्वरः ॥
॥ २६ ॥ तोषितोमेतपोव्रातैर्न्नतुष्टस्त्वम्महेश्वर ॥ तस्मादहन्तपस्तप्तुंशश्वद्गन्तुंसमुत्सहे ॥ २७ ॥ अनुजानीहिमांशम्भोमाविलम्बंवृथाकृ
थाः ॥ इतिश्रुत्वावचस्तस्याःस्मितविस्तारिताननः ॥ २८ ॥ शंकरःपार्वतीम्प्राहसन्दिग्धमिवभामिनीम् ॥ ॥ ईश्वरउवाच ॥ ॥ नाह
मन्यांस्त्रियंवोढानाहंसमयभेदकः ॥ २९ ॥ तवमिथ्यामतिर्जातामुग्धेमूढतयाधुना ॥ त्वमिच्छसियदिश्रोतुन्तत्रहेतुञ्चपार्वति ॥ १३० ॥
तदहङ्कथयेतत्त्वम्मानम्मानिनिमाकृथाः ॥ ममवक्षसिविस्तीर्णेदर्पणस्वच्छभासिनि ॥ ३१ ॥ तवैववपुषश्छायाबिम्बितालोकितात्वया ॥
इदानीमेवबुध्यस्वत्वामृतेनास्तिसामयि ॥ ३२ ॥ नात्रमानस्त्वयाकार्योहृदयान्तरसंस्थिते ॥ ॥ देव्युवाच ॥ ॥ मयिस्थितायांछा
यास्तिमामृतेनास्तिसापुनः ॥ ३३ ॥ कथमेतन्मयाज्ञेयन्तन्मेवदवृषध्वज ॥ ॥ ईश्वरउवाच ॥ ॥ गवाक्षाभ्यन्तरेस्थित्वातज्जालेनमनो
हरे ॥ ३४ ॥ पश्यतोयौघनिर्यातभूतिलेपमुरोमम ॥ तथात्वम्मण्डितन्देहंवीक्ष्यादर्शतलेपुनः ॥ १३५ ॥ मद्भृदासन्नमासाद्यतादृक्छायांवि

लोकय ॥ यथाद्रक्ष्यसिदेहेस्वन्तत्कुरुत्वन्तथामम ॥ ३६ ॥ आलोकयनिजाञ्छायान्त्वांविनानास्तितत्पुनः ॥ त्वमेवज्ञास्यसिच्छायाम्मद्व
क्षसिमनोहरे ॥ ३७ ॥ ज्ञात्वाविसृज्यमानन्तुमान्त्वञ्चाप्युपपत्स्यसि ॥ ॥ और्वउवाच ॥ एवमुक्ताहरेणाथपार्वतीन्दुकलाभृतः ॥३८॥
तोयैर्निर्द्धाव्यहृदयंस्वाञ्छायाम्पुनरैक्षत॥दृष्ट्वादर्शतलेवक्त्रन्निजन्देहञ्चपार्वती॥३९॥आलोकयामासतदाशश्वच्छंकरवक्षसि ॥ यथासाकुरुतेदेवी
कापत्यन्नेत्रविभ्रमम्॥१४०॥तथासाकुरुतेछायाकरकम्पादिकन्तथा॥ततःपुनर्गवाक्षस्यजालेस्थित्वाहिमाद्रिजा ॥४१॥ तथाव्यलोकयच्छम्भो
र्हृदयंवीतभूतिकम् ॥ तयातत्रतुपार्वत्यावृषभध्वजवक्षसि ॥ ४२ ॥ नकापिदृष्टावनितादृष्टञ्चालस्यमण्डलम् ॥ एवम्बहुविधैर्देवीतदोपायैस्त
थेतरैः ॥ ४३ ॥ निर्यातसंशयाभूत्वालज्जाम्प्रापवरांगना ॥ ताल्लँज्जितांगिरिसुतामीषद्धीतामधोमुखीम् ॥ ४४ ॥ शम्भुरालिंग्यपाणिभ्या
म्मुखञ्चास्याश्चुचुम्बच ॥ सतामाहमहादेवोदेवीमाश्वासयन्मुहुः ॥ १४५ ॥ मात्रीडस्वमहाभागे भ्रान्तिः कस्य नजायते ॥ मानस्त्वयिवर
स्त्रीभिःकार्यःप्रेमकरोयतः ॥ ४६ ॥ त्वयापिविरलःकार्योमानोदेविनसर्वदा ॥ इत्युक्तादेवदेवेनमैनाकसहजाम्बिका ॥ ४७ ॥ शङ्करम्प्रणया
त्प्राहसूनृतम्मधुरंवचः ॥ ॥ देव्युवाच ॥ ॥ यथातवाहंसततञ्छायेवानुगताहर ॥ ४८ ॥ भवेयंसाहचर्येणतथामाङ्कर्त्तुमर्हसि ॥ सर्व
गात्रेणसंस्पर्शन्नित्यालिंगनविभ्रमम् ॥ ४९ ॥ अहमिच्छामिभवतस्तत्त्वञ्चेत्कर्त्तुमर्हसि ॥ ॥ भगवानुवाच ॥ ॥ १५० ॥ रोचतेतन्म
ह्यमपियत्त्वमिच्छसिभामिनि ॥ तत्रोपायमहंवक्ष्येयदिशक्नोषितंकुरु ॥ ५१ ॥ अर्धम्ममगृहाणत्वंशरीरस्यमनोहरे ॥ अर्द्धम्भवतुमेनारीतथै
वार्द्धम्पुमानिति ॥ ५२ ॥ यदित्वन्नहिशक्नोषिकर्त्तुन्तन्वर्द्धमीदृशम् ॥ तदाहन्तेहरिष्यामिशरीरार्द्धंवरानने ॥ ५३ ॥ तवैवार्द्धन्तथानारीह्यर्द्धं

म्भवतुपूरुषः ॥ विद्यते तत्रशक्तिर्मेत्वमनुज्ञातुमर्हसि ॥ ५४ ॥ ॥ देव्युवाच ॥ ॥ तवैवाहंहरिष्यामिशरीरार्द्धंवृषध्वज ॥ किन्त्वहन्त्वेक
मिच्छामितच्चेत्त्वंकर्त्तुमिच्छसि ॥ १५५ ॥ यदाहमर्द्धम्भवतोभूत्वातिष्ठामितावता ॥ त्यजाम्यहंयदातेर्धंसम्पूर्णस्यात्तदाद्वयम् ॥ ५६ ॥ इत्य
र्द्धभागहरणम्भवेद्यदि यथेप्सितम् ॥ तवैवाहन्तदाशम्भोशरीरार्द्धंहराम्यहम् ॥ ५७॥ ईश्वरउवाच ॥ ॥ एवमस्तुभवेन्नित्यंयथार्द्धंहर्त्तुमर्हसि॥
शरीरस्यार्द्धहरणम्भूयस्तवयथेप्सितम् ॥ ५८ ॥ और्वउवाच ॥ अथगौरीतदापूर्वमनुभूतन्तपःस्थितौ ॥ भोगनिद्रास्वरूपन्तदात्मनोचिन्तय
द्धिया ॥ हरम्प्रणम्यप्रथमम्ब्रह्माणञ्चततःपरम् ॥ ५९ ॥ ततस्त्रिजगतामीशंहरिन्नारायणम्प्रभुम् ॥ चिन्तयित्वातदातेषामेकतांसाजगन्मयी ॥
॥ १६० ॥ आत्मानंयोगनिद्राञ्चचिन्तयित्वातपस्विनी ॥ ६१ ॥ दक्षिणेस्वशरीरस्यभागार्द्धंशशभृद्धृतः ॥ शरीरस्यतदावाममतिप्रेम्णानिजं
हरे ॥ ६२ ॥ हरोपिस्वशरीरार्द्धंगौरीकायेतदास्वयम् ॥ प्रेम्णान्यवेशयत्तस्याश्चिकीर्षुःप्रियमद्भुतम् ॥ ६३ ॥ अथस्थित्वातदाभर्गःकाल्यास
हचिरन्तदा ॥ परित्यज्यशरीरार्द्धम्पृथगेवबभौरुचा ॥ ६४ ॥ कालीभूत्वास्वर्णगौरीशरीरार्द्धञ्चशंकरम् ॥ प्राप्तमोदातदात्मानंसन्तुष्टाचजग
न्मयी ॥ १६५ ॥ एवंयदाशरीरार्द्धमादायपरमेश्वरी ॥ रहस्येतिष्ठतितदाराजतेतीवशोभना ॥ ६६ ॥ अर्द्धन्धम्मिल्लसंयुक्तञ्जटाजूटार्द्धयोजित
म् ॥ एकस्मिञ्छ्रवणेभोगीभागेजाम्बूनदार्चितम् ॥ ६७ ॥ कुण्डलंश्रवणेन्यस्मिञ्छीर्षेतस्याव्यराजत ॥ अर्द्धम्मृगाक्षिचान्यार्द्धंवृषभाक्षिव्य
जायत ॥६८॥अर्द्धंस्थूलनसञ्चारुतिलपुष्पनसम्परम् ॥ दीर्घश्मश्रुतथैवार्द्धमर्द्धंश्मश्रुविवर्जितम् ॥६९॥ आरक्तचारुदशनंरक्तौष्ठमेकतस्तथा॥
अपरंशुक्लविपुलन्दीर्घाकृतिरदम्परम् ॥ १७० ॥ अर्द्धनीलगलञ्चार्द्धमपरंहारसंयुतम् ॥ अर्द्धंकंकणकेयूरयुक्तबाहुतथापरम् ॥ ७१ ॥ नाग

केयूरसंयुक्तंस्थूलबाहुनिर्ऊर्मिकम् ॥ अर्द्धविलोलसुभुजंकरिहस्तभुजम्परम् ॥ ॥ ७२ ॥ एकत्रसोर्मिकांशाखाकरस्यान्यत्रताम्विना ॥ एकस्त
नन्तुहृदयंरोमावल्यर्द्धसंयुतम् ॥ ७३ ॥ रम्भास्तम्भसमानोरुसुपार्ष्णिमृदुपादकम् ॥ एकन्तथापरंस्थूलंसंहतोरुपदाम्बुजम् ॥ ७४ ॥ एकश्चा
रुमृदुस्थूलजघनंसुमनोहरम् ॥ तथापरन्दृढकटिसंहतोर्द्ध्वपदान्वयम् ॥१७५॥ एकंवैयाघ्रचर्मौघयुक्तम्भूतिविलेपनम् ॥ अपरम्मृदुकौशेयव
सनञ्चन्दनोक्षितम् ॥ ७६ ॥ एवमर्द्धंतथाजातंयोषिल्लक्षणसंयुतम् ॥ अपरम्बलवद्भूरिसुगूढम्पुरुषाकृति ॥ ७७ ॥ एवमर्द्धंस्मररिपोर्जहार
गिरिजासती ॥ हितायसर्वजगतांकालिकाकालिकोपमा ॥ ७८ ॥ तस्याःशरीरंराजेन्द्रहरतन्वर्द्धसंयुतम् ॥ येनोपमेयन्तन्नास्तिमार्गितम्भु
वनत्रये ॥ ७९ ॥ सन्तानः पारिजातोवाएकान्तविशदस्तरुः ॥ अमोघयायथावल्ल्यातौचापिययतुर्ब्रूहि ॥ १८० ॥ बहुधाचपृथक्केनतौरे
मातेनरेश्वर ॥ अर्द्धनारीश्वरोभूत्वासतुरेमेकदाचन ॥ ८१ ॥ इतियद्यपिभूतेशः स्वयंशक्नोतिकालिकाम् ॥ गौरींकर्तुन्तदासर्वम्भूतकारणका
रणः ॥ ८२ ॥ तथापितांगिरिसुतांसंयोज्यविविधैः पुरा ॥ तपस्ययोजयद्देवःक्रियोपायैरनेकशः ॥ ८३ ॥ तपोनिर्द्धूतसर्वांगीम्पश्चाद्गौरीमथा
करोत् ॥ अर्द्धञ्चप्रददौतस्यैशरीरस्यमहेश्वरः ॥ ८४ ॥ नैवास्यतत्त्वञ्जानन्तिशक्राद्याः सकलाः सुराः ॥ शरीरार्द्धप्रदानस्यतपसेयोजनस्यच
॥ १८५ ॥ एतस्यतत्त्वञ्जानन्तिमहात्मानोमहाबलाः ॥ नन्दीभृंगीमहाकालीवेतालोभैरवस्तथा ॥ ८६ ॥ अंगभूतामहेशस्यवीतभीतास्तपो
धनाः ॥ येमानुषशरीरेणप्रापिरेतपसोबलात् ॥ ८७ ॥ गणानामाधिपत्यन्तुतेजानन्तिहरम्परम् ॥ एवंसदात्वयायोज्याःसानुगानृपसत्तम

१ अंगुलीयकरहितम् । २ ऊर्मिकाअंगुलीयकम् तत्साहितम् अंगुलीयकमूर्मिकाइत्यमरः ।

॥ ८८ ॥ वनिताः सत्क्रियोपायैस्ततोभद्रमवाप्स्यासि ॥ यइदंशृणुयान्नित्यमद्भुतम्पुण्यदायकम् ॥ ८९ ॥ शिवयोःप्रीतिकरणंशरीरार्द्धग्रहन्त
था ॥ गौरीत्वसाधनञ्चैवकालिकायाःशुभावहम् ॥ १९० ॥ नतस्यविघ्नाजायन्तेसचपुण्यतमोमतः ॥ दीर्घायुःससुखीभूयात्पुत्रपौत्रसमन्विं
तः ॥ ९१ ॥ सततम्परिशृण्वानःशिवयोश्चरितम्महत् ॥ शिवलोकमवाप्नोतिसुचिरंशिववल्लभः ॥ १९२ ॥ इतिश्रीकालिकापुराणेअर्द्धनारी
श्वरचरितेसप्तचत्वारिंशोध्यायः ॥ ४७ ॥ ॥ छ ॥ ॥ सगरउवाच ॥ ॥ कोसौभैरवनामाभूत्कोवावेतालसञ्ज्ञकः ॥ कथंवातौशरीरे
णमानुषेणगणाधिपौ ॥ १ ॥ अभूतान्द्विजशार्दूलतन्मेवदमहामुने ॥ जानामिनन्दिनंविप्रसहायंशशभृद्धृतः ॥ २ ॥ यथाभवद्गणाध्य
क्षस्तन्नारदमुखाच्छ्रुतम् ॥ यथाभृंगिमहाकालौविश्रुतौहिहरात्मजौ ॥ ३ ॥ कथंवातौसमुत्पन्नौत्वत्तःश्रोतुंसमुत्सहे ॥ योसौशरभरूपस्यमहादे
वस्यवैपुरा ॥ ४ ॥ कायभागःश्रुतःपूर्वंसमहाभैरवाह्वयः ॥ सएवकिम्भैरवाख्यःकिंवान्योद्विजसत्तम ॥ ५ ॥ वेत्तुन्तत्त्वेनतत्सर्वं
मिच्छामिद्विजसत्तम ॥ कस्यवातनयौभत्वागणाध्यक्षत्वमागतौ ॥ ६ ॥ तच्चापिकथयस्वाद्ययथातौवानराननौ ॥ और्व उवाच ॥
शृणुराजन्प्रवक्ष्यामिमहाकालस्यभृङ्गिणः ॥ ७ ॥ भैरवस्यापिचरितंवेतालस्यमहात्मनः ॥ योसौभृंगीहरसुतोमहाकालोपिभर्गजः ॥ ८ ॥
तावेवगौरीशापेनसम्भूयनरयोनिजौ ॥ वेतालभैरवौजातौपृथिव्यान्नृपवेश्मनि ॥ ९ ॥ यथाभृंगिमहाकालावुत्पन्नौप्राक्तथाशृणु ॥ योसौम
हाभैरवाख्यःसकायःशरभोहरः ॥ १० ॥ भैरवःपृथगेवायंगणाध्यक्षोहरात्मजः ॥ ऊढायांहिमवत्पुत्र्याम्भर्गेणसुमहात्मना ॥ ११ ॥ तारकस्य
वधार्थायदेवैःशक्रपुरोगमैः ॥ स्तुतिभिर्नतिभिःशम्भुंसन्ततिर्याचितापुरा ॥ १२ ॥ सयाचितोदेवगणैर्भगवान्वृषभध्वजः ॥ महामैथुनमारेभे

सन्तानायोमयासह ॥ १३ ॥ आरब्धेमैथुनेतेननस्वर्येणवैययुः ॥ द्वात्रिंशद्वत्सरराजन्क्षणवच्चन्द्रधारिणः ॥ १४ ॥ समहामैथुनंकुर्वस्तृप्तिन्ना
पमहेश्वरः ॥ नाप्यस्यप्रच्युतन्तेजोनतृप्तिम्प्रापपार्वती ॥ १५ ॥ तन्महासंगसमयेचकम्पेवसुधास्फुटम् ॥ आकुलाःसकलादेवाःस्युःस्वर्ग
स्थाश्चयेपरे ॥ १६ ॥ सर्वञ्जगत्तदाभूतमाकुलंशिवयोस्तयोः ॥ ततोनिवृत्तिजातेनमहामैथुनकर्मणा ॥ १७ ॥ अथसेन्द्राःसुराःसर्वेब्रह्माण
ञ्जगताम्पतिम् ॥ शरण्यंशरणञ्जग्मुर्भीताःशङ्करकेलिभिः ॥ १८ ॥ तेसम्भूयाथधातारम्प्रणम्यचसुरोत्तमाः ॥ आकुलंसर्वमाचक्षुर्हरमैथुनक
र्म्मणा ॥ १९ ॥ ततःसर्वान्देवगणान्पश्चात्कृत्वैववृत्रहा ॥ स्वयमाहविधातारन्तत्कालभयभाषितम् ॥ २० ॥ ॥ इन्द्रउवाच ॥ ॥
आकुलाःसकलालोकाहरमैथुनकर्मणा ॥ अहम्महद्भयम्प्राप्यशरणन्त्वामिहागतः ॥२१॥ एवम्भूतेसङ्गमेचशङ्करस्योमयासह ॥ यःपुत्रोजाय
तेब्रह्मन्समांमाभिभविष्यति ॥ २२ ॥ तत्क्रियादर्शनादेवसूत्पन्नादपितत्सुतात् ॥ भयम्मेजायतेब्रह्मँस्तारकादपिचाधिकम् ॥ २३ ॥ तस्मा
देवंत्वंविधेहितत्सुतोमांसुरान्यथा ॥ नबाधेततथायत्नात्तारयास्मान्महाभयात् ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ उमायाञ्जायतेपुत्रोयदिशंक
रतेजसा ॥ अशक्यःसर्वलोकेशैःसेन्द्रैरपिसुरासुरैः ॥ २५ ॥ तस्माद्धरोयथोमायान्नप्रसूतोभविष्यति ॥ तथाहंसंविधास्यामिगत्वादेवैर्हरान्तिक
म् ॥ २६ ॥ तारकस्यविघातश्चयथास्याद्धरतेजसा ॥ तच्चाप्यहंकरिष्यामिव्येतुतेमानसोज्वरः ॥ २७ ॥ इत्युक्त्वासहदेवौघैःकैलासाद्रिम्प्रजा
पतिः ॥ जगामरेमेगिरिशोगिरिपुत्र्यासमम्भृशम् ॥ २८ ॥ तत्रगत्वामहादेवम्ब्रह्मालोकपितामहः ॥ सर्वैःसुरगणैःसार्द्धन्तुष्टावृषभध्वजम् ॥
॥ २९ ॥ ॥ देवाऊचुः ॥ ॥ प्रीतयेयस्यनरतिर्नकामोयन्मनोभवः ॥ नयस्यजन्मनोहेतुस्तस्मैतुभ्यन्नमोनमः ॥३०॥ यस्यलोकहिता

१ अयंकामोपियस्यप्रीतयेनभवतियतोमनोभवः तवतुमनोविकारशून्यत्वमेवेतिभावः ।

यैवजातोजायापरिग्रहः ॥ त्र्यम्बकायनमस्तस्मैसशिवोनःप्रसीदतु ॥ ३१ ॥ यस्मन्मथंविनादेवंशृंगाराद्याविशान्तिच ॥ स्वबलेनैवतन्देवन्त्वां
वयम्प्रणताहरम् ॥ ३२ ॥ हिरण्यरेताःस्वर्णाभोयोहिरण्यभुजाह्वयः ॥ सत्वंसर्गहरोदेवोनित्यन्नोभिप्रसीदतु ॥ ३३ ॥ जगन्मयीयोगनिद्राविष्णुमायाबलीयसी ॥ यस्याभवत्स्वयञ्जायातस्मैतुभ्यन्नमोनमः ॥ ३४ ॥ पञ्चभूतमयंयस्यपञ्चशीर्षंविराजते ॥ तम्पञ्चवदनन्देवम्भक्त्यात्वाम्प्रणमामहे ॥ ३५ ॥ सद्योजातमघोरञ्चवामदेवमुमापतिम् ॥ ईशानम्प्रणमामोद्ययन्तत्पुरुषमाहवै ॥ ३६ ॥ योसतामशिवोनित्यंयोवाभक्तिमतांशिवः ॥ शिवाशिवस्वरूपायनमस्तस्मैशिवायते ॥ ३७ ॥ रूपैस्त्रिभिर्यःस्थितिसृष्टिनाशंविष्ण्वात्मभःशम्भुरितिप्रसिद्धैः ॥ करोतिशश्वज्जगतांनुमस्तंशिवंविरूपाक्षमसुंशिवेशम् ॥ ३८ ॥ यःशूलखट्वांगमृगांकधारीयोगोध्वजःशक्तिमान्पञ्चरूपी ॥ तस्मैतुभ्यञ्जातवेदःप्रभायभूयोभूयोनोनमःशंकराय ॥ ३९ ॥ ब्रह्मार्चिष्मान्भोगभृद्दैत्यहन्तायन्तायोद्धावीतगर्भोजगत्याः ॥ सत्वंस्तुतोनःप्रसीदत्वनन्तोनित्योद्रेकीमुक्तरूपःप्रधानः ॥ ४० परब्रह्मरूपीनियतैकमुक्तःपरज्योतिरूपीनियतस्त्वनन्तः ॥ परःपाररूपीनियतात्मभागीसनोभर्गरूपीगिरिशोस्तुभूत्यै ॥ ४१ ॥ उमापतिम्महामायम्महादेवञ्जगत्पतिम् ॥ शिवंशिवकरंशान्तन्नमामःसप्रसीदतु ॥ ४२ ॥ इतिस्तुतोमहादेवःशक्राद्यैस्त्रिदशैःस्वयम् ॥ उमासंगम्परित्यज्यभर्गोगात्रिदिवौकसः ॥ ४३ ॥ येनभावेनसतदामहामैथुनतत्परः ॥ आसीत्तेनैवभावेनब्रह्मादीनांससादह ॥ ४४ ॥ अथतान्ससुरान्प्राहमहादेवस्त्वरन्निव ॥ किमर्थमागतायूयन्तन्मेवदतनिर्जराः ॥ ४५ ॥ तमूचुस्त्रिदशाःसर्वेब्रह्मशक्रपुरोगमाः ॥ त्वन्महामैथुनाद्भर्गव्याकुलंसकलञ्जगत् ॥ ४६ ॥ पृथिवीकम्पतेतीवसशैलवनकानना ॥ सागराःक्षुभिताःसर्वेनदानद्यश्चशंकर ॥ ४७ ॥ देवाश्चसर्वे

दिक्पालानशान्तिम्प्राप्नुवन्तिवै ॥ तस्मात्त्वंसर्वलोकेशसकलाननुकम्पय ॥ ४८ ॥ त्यक्त्वामहामैथुनन्तुरतिमात्रन्नियोजय ॥ एतच्छ्रुत्वावच
स्तस्यब्रह्मणःपरमात्मनः ॥ ४९ ॥ उवाचशंकरोदेवोनातिहृष्टमनाइव ॥ ॥ ईश्वरउवाच ॥ ॥ इयम्प्रवृत्तिर्भवतांशिवायामरसत्तमाः ॥
॥ ५० ॥ त्यक्तेमहामैथुनेतुरतिमात्रंप्रयोजिते ॥ नोमायाम्भवितापुत्रस्तदर्थमयमुद्यमः ॥ ५१ ॥ उमाशरीरजःपुत्रोयोभवेन्ममतेजसा ॥ स
एवतुरिपून्हत्वात्रिदशान्वर्द्धयिष्यति ॥५२॥ तस्मान्महामैथुनेमेतीवभीताःसुरोत्तमाः ॥ स्वंस्वंस्थानम्प्रगच्छन्तुअहन्तदनुचिन्तये ॥ ५३ ॥
देवाऊचुः ॥ ॥ उमाशरीरजःपुत्रोयथानभविताहर॥तथाकुरुजगन्नाथतन्महामैथुनन्त्यज ॥ ५४ ॥ ईश्वरउवाच ॥ ॥ रतिमात्रेणनो
मायाम्मत्पुत्रःसम्भविष्यति ॥ महामैथुनसन्त्यागात्स्यादपुत्रीतुपार्वती ॥ ५५ ॥ तस्मादहन्तुदेवानांवचनाद्ब्रह्मणस्तथा ॥ त्यक्ष्येमहामै
थुनन्तुकिन्त्वेकंकुरुतामराः ॥ ५६ ॥ येनमेप्रसृतन्तेजोमहामैथुनकारणात् ॥ धार्यन्तेजस्विनन्देवमानयन्त्वमरास्तुतम् ॥ ५७ ॥
योनिःकम्पोनिर्विकारोभूत्वातेजोग्रहीष्यति ॥ तम्मेवदन्तुत्रिदशास्त्यक्ष्येतेजःशरीरजम् ॥ ५८ ॥ ॥ और्वउवाच ॥ ॥ वृषध्वजवचः
श्रुत्वादेवाब्रह्मपुरोगमाः ॥ हरतेजोग्रहायाथवीतिहोत्रंययुर्द्धिया ॥ ५९ ॥ अथब्रह्माणमामन्त्र्यतथानुज्ञाप्यपावकम् ॥ सेन्द्रादेवगणाः
सर्वेहरमूचुरिदंवचः ॥ ६० ॥ ॥ देवाऊचुः ॥ ॥ एषवैश्वानरःश्रीमान्भूरितेजोमयोबली ॥ महामैथुनबीजन्तुत्वत्तेजःसंग्रही
ष्यति ॥ ६१ ॥ इत्युक्त्वात्रिदशाःसर्वेवीतिहोत्रम्पुरःस्थितम् ॥ तस्मैनिदेशयामासुः शम्भवेसर्वहेतवे ॥ ६२ ॥ ततःषडंगस्त्वंरेतो
व्यादितेदहनानने ॥ उत्ससर्जमहाबाहुर्महामैथुनकारणम् ॥ ६३ ॥ अग्नावुत्सृज्यमानस्यतेजसःशशभृद्भृतः ॥ अणुद्वयमतिस्वल्पंगिरिप्र

स्थेपपातह ॥ ६४ ॥ तयोस्तुकणयोःसद्यःसम्भूतौशंकरात्मजौ ॥ एकोभृंगसमःकृष्णोभिन्नाञ्जननिभोपरः ॥ ६५ ॥ भृंगाभस्यतदा
ब्रह्मानामभृंगीतिचाकरोत् ॥ महाकृष्णैकरूपस्यमहाकालेतिलोकभृत् ॥ ६६ ॥ ततस्तौपालयामासशंकरःप्रमथोत्करैः ॥ अपर्णयाचा
पितथाक्रमात्तावतिवर्द्धितौ ॥ ६७ ॥ प्रवृद्धौतौमहात्मानौहरोमाप्रतिपालितौ ॥ क्रमाद्गणेशौकृत्वातौहरोद्वारिन्ययोजयत् ॥ ६८ ॥ ॥
सगरउवाच ॥ ॥ उत्सृष्टमग्नौयत्तेजस्तत्किंवृत्तन्द्विजोत्तम ॥ तदप्यहंश्रोतुमिच्छुःसंक्षेपात्तद्वदस्वमे ॥ ६९ ॥ ॥ और्वउवाच ॥ ॥
अग्नावुत्सृज्यतेजांसितावत्कालंवृषध्वजः ॥ आकाशगंगामुद्दिश्यदेवानिदमुवाचह ॥ ७० ॥ एतत्तेजोदुराधर्षंस्त्रीभिरन्यैःसुरोत्तमाः ॥ योग
निद्रामृतेदेवींशैलपुत्रीमृतेथवा ॥ ७१ ॥ तस्मादहम्प्रवक्ष्यामियथेदन्तेजसासुतः ॥ यत्रवाभवितादेवोयाचवातद्ग्रहीष्यति ॥ ७२ ॥ इयन्त्वा
काशगागंगाशैलराजसुतापरा ॥ उमायाभगिनीज्येष्ठाततोपत्यंहुताशनात् ॥ ७३ ॥ जनिष्यत्यात्मवीर्येणतेजसानुपमद्युतिः ॥ भविष्य
तिसवःश्रीमान्सेनापतिरारिन्दमः ॥ ७४ ॥ सतारकंवःपुरतोविजेष्यतिशिखिध्वजः ॥ अमोघयामहाशक्त्यामयैवप्रतिवर्द्धितः ॥ ७५ ॥
इत्युक्त्वासमहादेवोविसृज्यसकलान्सुरान् ॥ पार्वतीमभिसम्मन्त्र्यशौचार्थंगतवाँस्तदा ॥ ७६ ॥ पार्वतीवचनंश्रुत्वादेवानामप्रियंसती ॥
॥ ७७ ॥ चुकोपत्रिदशौघायपुत्राशापरिवर्जिता ॥ मन्युनादह्यमानेवस्फुरदोष्ठाधरातदा ॥ ७८ ॥ इदमाहसुरान्दृष्ट्वाहरञ्चत्यक्तमैथुनम् ॥
देव्युवाच ॥ ॥ यस्माद्वियोजितःशम्भुर्युष्माभिर्ममैथुने ॥ ७९ ॥ अजातपुत्राचकृतावारस्त्रीवाहमर्दिता ॥ तस्मात्सर्वेसुरगणाअ
द्यावधिनिरन्तरम् ॥ १८० ॥ महामैथुनविभ्रष्टाभवन्तुनिजयोषिति ॥ तेषामपितथापुत्रानजनिष्यन्तिमेयथा ॥ ८१ ॥ भार्याश्चसन्त्वपत्ये

नहीनादेव्योवरांगनाः ॥ यथाहम्परितप्यामिपुत्राशापरिवर्जिता ॥ ८२ ॥ तथासन्तुसमस्तास्तादेव्यःपुत्राशयाच्युताः ॥ और्वउवाच ॥
एवंसुरान्गिरिसुताशशापकुपिताभृशम् ॥ ८३ ॥ तत्कालावधिनस्वर्गेजायन्तेदेवपुत्रकाः ॥ नाद्यापिसम्प्रजायन्तेपुत्रास्तासुसुधाशिनाम्
॥ ८४ ॥ दहनोपितथाकालेप्राप्तेगंगोदरेस्वयम् ॥ रेतःसंक्रामयामासशाम्भवंस्वर्णसन्निभम् ॥ ८५ ॥ सातेनरेतसादेवीसर्वलक्षणसंयुतम् ॥
पूर्णकालेथसुषुवेपुत्रयुग्मम्मनोहरम् ॥ ८६ ॥ एकःस्कन्दोविशाखाख्योद्वितीयश्चारुरूपधृक् ॥ शक्तिद्वयधरौद्वौतौतेजःकान्तिविवर्द्धितौ
॥ ८७ ॥ तावेकत्वञ्जगामाशुविशाखःस्कन्दएवच ॥ शिशुश्चाप्यभवद्यातोयथान्यस्यसुतस्तथा ॥८८॥ ततस्तन्तनयञ्जातन्तथादृष्ट्वातिवि
स्मिता ॥ मध्येशरवणस्याशुगंगातंव्यसृजद्धठात् ॥८९॥ विसृज्यगर्भन्तंगंगाबहुलायैस्वयन्तदा ॥ गर्भवृत्तान्तमाचख्यौजातञ्चव्यसृजद्यथा
॥ ९० ॥ तच्छ्रुत्वाबहुलाज्ञात्वामहादेवतनूद्भवम् ॥ परिगृह्यसुतन्तन्तुपालयामासकृत्तिका ॥ ९१ ॥ उमायाःशंकरस्यापिविज्ञाप्यानुमते
तयोः ॥ ततोनीत्वाददौदेव्यैतम्पुत्रमरिमर्दनम् ॥ ९२ ॥ सोतिवृद्धःशक्तिधरोमहाबलपराक्रमः ॥ वर्द्धितःशंकरेणाशुदेवसेनाधिपोभवत् ॥
॥ ९३ ॥ ततःसुरारिसगणन्तारकञ्छोकतारकम् ॥ शक्तिहस्तोहरसुतःप्रममाथमहाबलम् ॥ ९४ ॥ एवमग्नौससुत्सृष्टन्तेजोभर्गेणसंगतम् ॥
यथावृत्तन्तथातेद्यकथितन्नृपसत्तम ॥ ९५ ॥ साम्प्रतम्प्रस्तुतंश्राव्यम्महाकालस्यभृंगिणः ॥ वृत्तान्तंशृणुराजेन्द्रतौभूतौमनुजौयथा ॥
॥ ९६ ॥ ॥ इतिकालिकापुराणेष्टचत्वारिंशोध्यायः ॥ ४८ ॥ और्वउवाच ॥ ॥ हरोयावज्जगत्यर्थेदेववर्गैःप्रसादितः ॥ तावन्महामै
थुनेनहीनोभूदुमयासह ॥ १ ॥ वर्त्ततेरतिमात्रेणस्वेच्छांसम्पूरयन्सदा ॥ यथामनोरथन्देव्याःसततम्पूरयन्मृडः ॥ २ ॥ अथैकदोमयासार्द्धं

न्निगूढेरतिमन्दिरे ॥ नर्माकरोन्महादेवोमोदयुक्तोरतिप्रियः ॥ ३ ॥ यदासानर्म्मणेयातागौरीस्मरहरान्तिकम् ॥ तदाभृंगिमहाकालौद्वाःस्थौद्वा
रिप्रतिष्ठितौ ॥ ४ ॥ नर्मावसानेसादेवीमुक्तधम्मिल्लबन्धना ॥ बन्धहीनंगलद्वात्राद्वस्त्रमालम्ब्यपाणिना ॥५॥ व्यस्तहारागन्धपुष्पैराकुलैर्ना
तिशोभना ॥ विलुप्तकुंकुमादष्टदशनच्छदविभ्रमा ॥ ६ ॥ निःसृतारतिसंकेलिनिलयाज्जलजानना ॥ ईषदाघूर्णनयनानिचितास्वेदबिन्दुभिः
॥ ७ ॥ तान्निःसरन्तींसदनात्तथाभूतामनिन्दिताम् ॥ अयोग्यांवीक्षितुञ्चान्यैर्वृषध्वजमृतेपतिम् ॥ ८ ॥ ददर्शतुर्महात्मानौनातिहृष्टात्ममा
नसौ ॥ भृंगीचापिमहाकालःप्राप्तकालञ्चुकोपतुः ॥ ९ ॥ दृष्ट्वाताम्मातरन्दीनौतथाभूतावधोमुखौ ॥ चिन्ताञ्चजग्मतुस्तीव्रान्निशश्वसतु
रुत्तमौ ॥ १० ॥ तौपश्यन्तौतदादेवीददर्शाहिमवत्सुता ॥ चुकोपचतदापर्णावाक्यञ्चैतदुवाचह ॥ ११ ॥ एवम्भूताञ्चमांकस्मादसम्बद्धाव
पश्यताम् ॥ भवन्तौतनयौशुद्धौह्रीमर्यादाविवर्जितौ ॥ १२ ॥ यस्मादिमाममर्यादाम्भवन्तौनिरपत्रपौ ॥ अकुर्वतान्ततोभूयाद्भवतोर्जन्म
मानुषे ॥ १३ ॥ मानुषींयोनिमासाद्यमदवेक्षणदोषतः ॥ भविष्यतोभवन्तौतुशाखामृगमुखौभुवि ॥ १४ ॥ इतितावुमयाशप्तौहरपुत्रौ
महामती ॥ भृंगीचैवमहाकालःस्वमातुरन्तिकन्तदा ॥ १५ ॥ तौप्राप्तदुःखौतुतदादुर्मनस्कौहरात्मजौ ॥ शापन्तस्यानसेहातेप्रोचतुश्चेदम
द्विजाम् ॥ १६ ॥ अनागसौसदैवावाम्भवत्याहिमवत्सुते ॥ कथंशप्तौत्वयामातर्हठादेवम्प्रकोपितौ ॥ १७ ॥ नियोजितौयथाद्वा
रिमहेशेनत्वयासह ॥ तथानियोगंकुर्वन्तौतिष्ठावोद्वारिसंयतौ ॥ १८ ॥ हठान्निःसरणंगेहात्तवैवनहियुज्यते ॥ आगच्छन्त्या
भवत्यातुदृष्टावावांसुसंयतौ ॥ १९ ॥ तस्मान्निरर्थकःकोपःकोदोषस्तत्रचावयोः ॥ तस्मात्तत्रप्रतीकारंशृणुमातरनिन्दिते ॥ २० ॥

त्वम्मानुषीक्षितौभूयाहरोभवतुमानुषः ॥ मानुषस्यहरस्याथजायायांहरतेजसा ॥ २१ ॥ भवत्याश्चापिमानुष्याभविष्यावस्तथो
दरे ॥ यदिसत्यंहरसुतावावांयदिनिरागसौ ॥ २२ ॥ तदावयोरिदंवाक्यंसत्यमस्तुगिरेःसुते ॥ इत्यन्योन्यमथोशापन्दत्तवादत्त्वासु
दारुणम् ॥ २३ ॥ विविशुर्नृपशार्दूलगौरीहरसुतौचतौ ॥ अथकालेव्यतीतेतुसर्वज्ञोवृषभध्वजः ॥ २४ ॥ तद्भाविकर्मज्ञात्वैवमानुषो
ह्यभवत्स्वयम् ॥ ब्रह्मणोदक्षिणांगुष्ठाद्दक्षोब्रह्मसुतोभवत् ॥ २५ ॥ अदितिस्तत्सुताजाताततःपूषाह्वयोभवत् ॥ पूष्णःपुत्रोभवत्पौष्यः
सर्वशास्त्रार्थपारगः ॥ २६ ॥ यस्यतुल्योनृपोभूमौनभूतोनभविष्यति ॥ सपुत्रहीनोराजाभूत्पौष्योनृपतिसत्तमः ॥ २७ ॥ शेषेवयसिसम्प्राप्ते
भार्याभिस्तिसृभिःसह ॥ पौष्यःपरमयाभक्त्यात्रह्माणम्पर्यतोषयत् ॥ २८ ॥ तस्यप्रसन्नोभगवान्ब्रह्मालोकपितामहः ॥ तमुवाचचराजानं
किमिच्छसिवदस्वमे ॥ २९ ॥ प्रसन्नोस्मिनृपश्रेष्ठप्रदास्यामियथेप्सितम् ॥ यदिष्टंतवजायानान्तद्वदिष्यसिसाम्प्रतम् ॥ ३० ॥ ॥ पौष्य
उवाच ॥ ॥ हिरण्यगर्भपुत्रोहम्पुत्रार्थीत्वामुपास्महे ॥ त्वयिप्रसन्नेपुत्रोमेभूयाल्लक्षणसंयुतः ॥ ३१ ॥ एतदर्थेसभार्योहम्भक्त्यात्वांसमु
पस्थितः ॥ यथामेजायतेपुत्रस्तथाकुरुजगत्पते ॥३२॥ पुन्नाम्नोनरकात्पुत्रस्त्रायतेपितरम्प्रसूम् ॥ अतस्तस्माद्भयम्ब्रह्मँस्त्वन्नाशयितुमर्हसि ॥
॥ ३३ ॥ ब्रह्मोवाच ॥ शृणुपौष्ययथाभावीपुत्रस्तवकुलोद्वहः ॥ तदहन्तेवदाम्यद्यभार्याभिस्तत्समाचर ॥ ३४ ॥ इदम्फलंगृहाणत्वम्मयाद
त्तन्नृपोत्तम ॥ अजीर्णम्बहुलेकालेप्राप्तेपिसुरसंसदा ॥ ३५ ॥ फलमेतत्समादाययावत्संवत्सरत्रयम् ॥ आराधयमहादेवंसप्रन्नोभविष्यति ॥
॥ ३६ ॥ यथासम्भापतेभर्गःफलमेतत्तथाभवान् ॥ करिष्यतिफलंराजन्भार्याभिस्तिसृभिःसह ॥ ३७ ॥ ततस्तेलक्षणोपेतस्तनयःकुलव

र्द्धनः ॥ भविष्यतिस्वयंशास्ताचक्रवर्तीवसुन्धराम्॥३८॥इत्युक्त्वाप्रययौब्रह्माराजापिसहभीरुभिः ॥ हरंयष्टुंसमारेभेभक्त्यापरमयायुतः॥३९॥
निराशीःसंयताहारःकदाचित्फलभोजनः ॥ दृषद्वतीनदीतीरेफलंसंस्थाप्यचाग्रतः॥४०॥पुष्पार्घदीपधूपैश्चवृषध्वजमतर्पयत् ॥ सतुवर्षत्रयेती
तेमहादेवोजगत्पतिः॥४१॥पौष्यस्यनृपतेःसम्यक्प्रससादार्थसिद्धये ॥ प्रसन्नःप्राहनृपतिम्महादेवोहसन्निव ॥४२॥ उपाससेकिमर्थम्मान्तन्मे
वदददामिते ॥ पौष्यउवाच ॥ अपुत्रोहम्पुत्रकामस्तच्छृणुष्ववृषध्वज ॥ ४३ ॥ यथाहम्पुत्रवान्वैस्यांवृषध्वजतथाकुरु ॥ इतिसन्यगदद्राजा
भार्याभिःसहहर्षितः॥४४॥प्रणम्यस्तुतिपूर्वेणभक्तिनम्रात्ममानसः ॥ ततःपुत्रार्थिनम्भूपम्प्रसन्नोवृषभध्वजः॥४५॥ब्रह्मदत्तफलंहस्तेकृत्वेदन्त
मुवाचह ॥ ॥ ईश्वरउवाच ॥ ॥ इदम्फलम्ब्रह्मदत्तंविभज्यनृपतेत्रिधा ॥ ४६ ॥ भोजयेथाःस्वजायास्त्वम्प्रहृष्टःसुस्थमानसः ॥ ततःप्रवृत्ते
भवतएतासुऋतुसंगमे ॥४७॥ आधास्यन्तितुगर्भांस्तुभार्यास्तेयगपन्नृप ॥ कालेप्राप्तेचयुगपत्प्रसवोयोषितान्तव॥४८॥भविष्यतिनृपश्रेष्ठतत्रे
त्थन्त्वंकारिष्यासि ॥ एकस्याजठरेशीर्षभागस्तेसम्भविष्यति ॥४९॥ अपरस्यास्तदाकुक्षेर्मध्यभागोभविष्यति ॥ अधोनाभ्यास्तुयोभागस्सो
परस्याम्भविष्यति ॥ ५० ॥ तच्चखण्डत्रयम्भूपयथास्थानम्पृथक्पृथक् ॥ योजयिष्यसिपश्चात्तेपुत्रएकोभविष्यति ॥५१॥ तस्यशीर्षेचन्द्ररे
खासहजासम्भविष्यति ॥ तेनैवनाम्नासख्यातिंगमिष्यतिचभूतले ॥ इत्युक्त्वासमहादेवस्तासांगर्भान्स्वयन्तदा ॥५२॥ संस्कर्तुंजाह्नवीतोयमा
त्मवासायवैन्यधात् ॥ ततःफलेस्वयन्देवःप्रविवेशवृषध्वजः ॥५३॥ तत्क्षणात्तत्फलम्भूतन्त्रिभागंस्वयमेवहि ॥ पौष्यस्तत्फलमादायमुदितः
सहभार्यया ॥५४॥ प्रययौमन्दिरंहृष्टोअनुज्ञाप्यवृषध्वजम् ॥ ततःसमुचितेकालेप्राप्तेताभिस्तुभक्षितम् ॥५५॥ तत्फलंनृपशार्दूलगर्भांश्चार्प्या

हिताःशुभाः ॥ सम्पूर्णेगर्भकालेतुगर्भेभ्यःसमजायत ॥ ५६ ॥ खण्डत्रयम्पृथग्राजन्यथाभर्गेणभाषितम् ॥ तच्चखण्डत्रयम्पौष्योयथा
स्थानन्नियोज्यच ॥ ५७ ॥ एकपिण्डञ्चकाराशुतत्रपुत्रोव्यजायत ॥ तस्यशीर्षंतदाराजन्सहजेन्दुकलाशुभा ॥ ५८ ॥ विराजयथाख
स्थाशरत्कालेकलाविधोः ॥ तंसर्वलक्षणोपेतम्पीनोरस्कंसुनासिकम् ॥ ५९ ॥ सिंहग्रीवंविशालाक्षन्दीर्घायतभुजन्तदा ॥ दृष्ट्वापौष्यो
थभार्याभिस्तिसृभिःसहसम्मुदम् ॥ १६० ॥ लेभेदरिद्रःसत्कोषंप्राप्येवविपुलन्ततः ॥ तस्यनामाकरोद्राजाब्राह्मणैःस्वैःपुरोहितैः ॥ ६१ ॥
चन्द्रशेखरइत्येवकान्त्याचन्द्रमसःसमः ॥ ववृधेसमहाभागःप्रत्यहञ्चन्द्रवत्सुतः ॥ ६२ ॥ कलाभिरिवतेजस्वीशरदीवनिशाकरः ॥ एवन्तिसृ
णामम्बानांगर्भेजातोयतोहरः ॥ ६३ ॥ अतस्त्र्यम्बकनामाभूत्प्राथितोलोकवेदयोः ॥ सराजपुत्रःकौमारीमवस्थाम्प्रापयत्तदा ॥ ६४ ॥
सर्वशास्त्रार्थतत्त्वज्ञोविष्णोस्तुल्योबभूवह ॥ बलेवीर्यप्रहरणेशास्त्रेशीलेचतत्समः ॥ ६५ ॥ नान्योभून्नृपशार्दूलनोवाभूमौभविष्यति ॥ अभि
षिच्याथतंराज्येकुमारंबलवत्तरम् ॥ ६६ ॥ दशपञ्चैकवर्षीयंसर्वराजगुणैर्युतम् ॥ तिसृभिःसहभार्याभिर्वनम्पौष्योविवेशह ॥ ६७ ॥ वृद्धो
चिताक्रियांकर्त्तुराजापरमधार्मिकः ॥ गतेपितरिराजासवनवासम्महाबलः ॥ ६८ ॥ सर्वांक्षितिंवशेचक्रेसामात्यैश्चन्द्रशेखरः ॥ सार्वभौ
मोनृपोभूत्वाराजाभिःपरिसेवितः ॥ ६९ ॥ अमरैरिवदेवेन्द्रोविजहाराश्रियायुतः ॥ एवम्पौष्यसुतोभूत्वात्र्यम्बकःपुण्यनिर्वृतः ॥ १७० ॥
ब्रह्मावर्त्ताह्वयेरम्येकरवीराह्वयेपुरे ॥ दृषद्वतीनदीतीरेराजाभूत्वासुमोदह ॥ ७१ ॥ अथैकदासापितरंवनवासगतंस्वयम् ॥ मातृश्चापिनृपश्रेष्ठद्रष्टु
कामोभवन्नृपः ॥७२॥ सएकस्यन्दनेनैवएकाकीचन्द्रशेखरः ॥ विपुलन्धनुरादायसमार्गणगणंतदा ॥ ७३ ॥ तपोवनम्पुण्यमयंविषयान्तेव्यव

स्थितम् ॥ आससादादिदृक्षुःसतातंवृद्धंसमातृकम् ॥७४॥ सगच्छन्पितुरभ्याशन्नृपतिश्चन्द्रशेखरः ॥ ददर्शनमुचन्नामतपस्यन्तम्महामुनिम् ॥
॥७५॥कृष्णाजिनोत्तरीयेणसंवीतंसूर्यसन्निभम्॥ऊर्ध्वगाभिर्जटाभिश्चसंयुतन्ध्यानिनंकृशम् ॥७६॥ तपसाद्योतिततनुन्निश्चलंकुशजासनम् ॥
तन्दृष्ट्वादूरतोवीरोरथोपस्थादवातरत्॥७७॥उपतस्थेचविप्रेन्द्रंविनयानतकन्धरः॥प्रणनामसुनिन्तञ्चवाक्यमेतदुदीरयन्॥७८॥पौष्यस्यतनयो
ब्रह्मन्नाम्नाहञ्चन्द्रशेखरः॥प्रणमामिमहाभक्त्याभवन्तम्मुनिसत्तमम्॥७९॥इत्युक्त्वाप्राञ्जलिस्तस्थौमुनेस्तस्याग्रतोनृपः ॥ नमुचस्यमुखंवीक्ष्यभ
क्तिनम्रात्ममानसः॥पूर्वमेवयदाराजाप्राविशत्तपसेवनम्॥८०॥तदैवसहभार्याभिस्तम्मुनिम्प्रत्यपूजयत्॥८१॥ चिरमाराध्यनमुचम्पौष्यःपरमप
ण्डितः॥प्रसादयामासमुनिम्पुत्रार्थेसूनृताक्षरैः॥८२॥विषयान्तेतपःकुर्वन्मुनिश्रेष्ठेहतिष्ठसि॥एकन्तुप्रार्थयेत्वत्तोयदिमान्दयसेमुने॥८३॥शिशुं
मेतनयोराजाचन्द्रशेखरसंज्ञकः॥सहजेन्दुकलायुक्तोबालभावाच्चचञ्चलः ॥८४॥ सचेद्भवन्तमासाद्यकदाचिदपराध्यति ॥ तदाक्षमिष्यासिमुने
मयैतत्प्रार्थितन्त्वयि ॥ ८५॥ पौष्यस्यवचनंश्रुत्वामुनिश्चांगीचकारह ॥ दृष्ट्वातत्तनयंविप्रःपौष्यवाक्यमथास्मरत् ॥८६॥ स्मृत्वाग्रतःस्थित
न्नम्रंसुचिरञ्चन्द्रशेखरम् ॥ इदम्प्रोवाचसमुनिर्दयावान्नमुचाह्वयः ॥ ८७ ॥ विनयेनाद्यतुष्टोस्मिभवतश्शन्द्रशेखर ॥ वरंवरयदास्यामिवाञ्छित
म्मेमहत्तरम् ॥ ८८ ॥ तस्यश्रुत्वाततोवाक्यन्नृपतिश्चन्द्रशेखरः ॥ पुनःप्रणम्यनमुचमिदमाहातिसूनृतम् ॥ ८९ ॥ कायेनमनसावाचाय
दत्यर्थन्द्विजोत्तम ॥ तत्सर्वंविषयेमेस्तित्वादृशायस्यदक्षिणाः ॥ ९० ॥ मनोगतम्मेदुष्प्रापंवाञ्छनीयन्नविद्यते ॥ तदेववरणीयम्मेयद्ददाति
स्वयम्भवान् ॥ ९१ ॥ ॥ नमुचउवाच ॥ ॥ त्वंसप्तदशवर्षाणाम्प्राप्तेसंवत्सरेपरे ॥ भविष्यसिनृपश्रेष्ठवररामापतिःस्वयम् ॥ ९२ ॥

यथागिरिसुताशम्भोर्यथालक्ष्मीर्गदाभृतः ॥ यथासुरेशस्यशचीतथातेपिभविष्यति ॥ ९३ ॥ इत्युक्त्वासमुनिर्भूपन्नमुचस्तपसान्निधिः ॥ विस
र्जयामासतदासचापिमुदितोययौ ॥ ९४ ॥ सगत्वापितरंप्राप्यमातृश्चचन्द्रशेखरः ॥ अपूजयद्यथार्हन्तुतैरप्याश्वासितःसुतः ॥ ९५ ॥ अथा
गतोनृपःस्वीयांकरवीरपुरीम्प्रति ॥ मुदितःसचिवैःसार्द्धंरेमेदेवेन्द्रसन्निभः ॥ ९६ ॥ इतिकालिकापुराणेनवचत्वारिंशत्तमोध्यायः ॥ ४९ ॥
और्वउवाच ॥ अवतीर्णेमहादेवेपौष्यजायासुखेच्छया ॥ मानुषेणप्रमाणेनगतेसंवत्सरत्रये ॥ १ ॥ गिरिजापिककुत्स्थस्यराज्ञोभार्यास्वजा
यत ॥ मेनकायांयथापूर्वंस्वेच्छयापरमेश्वरी ॥ २ ॥ अथार्यावर्त्तविषयेब्रह्मण्यःशूरसत्तमः ॥ इक्ष्वाकुवंशजोराजाककुत्स्थोनामधार्मिकः ॥
॥ ३ ॥ भोगवत्याह्वयायान्तुपुर्यांरिपुनिषूदनः ॥ सर्वलक्षणसम्पन्नोभूपालगुणसंयुतः ॥ ४ ॥ तस्यभार्यामहाभागाभर्गदेवस्यपुत्रिका ॥
सामनोन्मथिनीनाम्नापूजितापातिवल्लभा ॥ ५ ॥ तस्याःपुत्रशतञ्जज्ञेदेवगर्भाभमच्युतम् ॥ बलवीर्यसमायुक्तंककुत्स्थनृपसत्तमात् ॥ ६ ॥
पुत्रीनविद्यतेतस्यास्तदर्थंसागृहान्तरे ॥ निभृतंस्थण्डिलंकृत्वाचण्डिकांसमपूजयत् ॥ ७ ॥ पूज्यमानामहादेवीचण्डिकाराजभार्यया ॥ प्रसन्ना
सात्रिभिर्वर्षैस्तांस्वप्नेचाब्रवीदिदम् ॥ ८ ॥ योषिल्लक्षणसम्पन्नासार्वभौमस्यभामिनी ॥ नक्षत्रमालयायुक्तापुत्रीतवभविष्यति ॥ ९ ॥ साधि
स्वप्नेवरम्प्राप्यमुदिताभून्नृपांगना ॥ पार्वत्यपिस्वयन्तस्यागर्भेकालेविवेशह ॥ १० ॥ सामनोन्मथिनीदेवीप्रवृत्तेभानुसंगमे ॥ गर्भन्दधौम
हासत्त्वश्चन्द्रिकेवामृतोत्करम् ॥ ११ ॥ सम्पूर्णेतुततःकालेप्राप्तेनक्षत्रमालिनिम् ॥ सामनोन्मथिनीदेवीसुषुवेतनयांशुभाम् ॥ १२ ॥ तान्दृष्ट्वा
हारसयुक्तांशरज्योत्स्नोपमांशुभाम् ॥ ककुत्स्थोभार्ययासार्द्धमत्यर्थमुदितोभवत् ॥ १३ ॥ सहजेनाथहारेणभूषितातुककुत्स्थजा ॥ ववृधेमन्दि

रेतस्यवर्षास्विवसुरापगा ॥१४॥ तेनवहाराचिह्नेनतस्यास्तारावतीतिवै ॥ नामाकरोत्पिताकालेयथोक्तेनृपसत्तम ॥१५॥ कालक्रमेणसाबाल्यं
व्यतीतावरवर्णिनी ॥ मञ्जुलंयौवनोद्भेदम्प्रापश्रीरिवमाधवे ॥ १६ ॥ साश्रियाश्रियमन्वेतिशौचेनाथसतीशुभा ॥ सुशीलांशीलचरितैःस्वरू
पेणचपार्वतीम् ॥ १७ ॥ तस्यास्तुयौवनोद्भेदन्दृष्ट्वाराजासुतैःसह ॥ ककुत्स्थःकारयामाससमयेऽथस्वयम्वरम् ॥ १८ ॥ माधवेमासिसम्प्राप्ते
चन्द्रवृद्धौशुभेदिने ॥ स्वयंवरसभाञ्चक्रेतारावत्याःपितासुतैः ॥ १९ ॥ वार्त्तिकाँस्तुबहून्राजावडवाभिक्रमेणवै ॥ तूर्णम्प्रस्थापयामासनाना
देशनृपान्प्रति ॥ २० ॥ तेराजानस्तदाश्रुत्वावार्त्तांवैवार्तिकाननात् ॥ तूर्णमेवसमाजग्मुस्तारावत्याःस्वयंवरम् ॥ २१ ॥ तंश्रुत्वापौष्यतनय
श्चतुरंगबलैर्युतः ॥ स्वयंवरञ्जगामाशुदिव्यालंकारसंयुतः ॥ २२ ॥ तत्रगत्वानृपश्रेष्ठाःककुत्स्थेनविनिर्मिते ॥ स्वयंवरसभामध्येयथायोग्यमुप
स्थिताः ॥ २३ ॥ आसीनेष्वथभूपेषुककुत्स्थस्तनयांस्वकाम् ॥ शुभेमुहूर्त्तेसम्प्राप्तेसभान्नेतुम्मनोकरोत् ॥ २४ ॥ एतस्मिन्नन्तरेराज्ञःकुमारी
वरवर्णिनी ॥ वृद्धान्धात्रीन्निजांसम्यक्सम्पूर्णज्ञानशालिनीम् ॥ २५ ॥ स्वयंवरसभान्द्रष्टुम्प्राहिणोत्सदसम्प्रति ॥ उवाचचतदाधात्रींराजपु
त्रीसुमंगलाम् ॥ २६ ॥ स्वयंवरसभांगत्वाचारुरूपंसुलक्षणम् ॥ नृपान्निरूप्यभोधात्रिसमक्षम्मेनिवेदय ॥ २७ ॥ त्वम्मातर्ममकल्याणंसौभा
ग्यमपिवाञ्छसि ॥ यथासौभाग्यदःस्वामीममस्यात्त्वन्तथाकुरु ॥ २८ ॥ एवन्ताम्प्रेषयित्वाथधात्रीन्नृपतिपुत्रिका ॥ सामनोन्मथिनीयत्र
प्राराधयतिचण्डिकाम् ॥ २९ ॥ तत्रप्रायान्महाभागाशुभातारावतीतदा ॥ तत्रगत्वामहादेवीम्प्रणम्यकालिकाह्वयाम् ॥ ३० ॥ मानुषेणाथ
भावेनतांज्ञात्वात्मानमात्मना ॥ प्रणनाममहाभक्त्यावाक्यञ्चैतदुवाचह ॥ ३१ ॥ प्रणमामिमहामायांयोगनिद्राञ्जगन्मयीम् ॥ सामेप्रसीदतां

गौरीचण्डिकाभक्तवत्सला ॥ ३२ ॥ यदिसत्यञ्जनन्यामेमदर्थेत्वम्प्रपूजिता ॥ तेनसत्येनसुभगःपतिर्ममनृपोत्तमः ॥ ३३ ॥ स्वयंवरेद्य
भवतुप्रसीदहरवल्लभे ॥ इतितस्यावचःश्रुत्वाचण्डिकाहरमोहनी ॥ ३४ ॥ मोहयन्तीनृपसुतांयथात्मानन्नवेत्तिच ॥ तथाप्राहादृश्यमूर्तिरिदं
सासूनृतंवचः ॥ ३५ ॥ देव्युवाच ॥ ॥ पौष्यस्यतनयोयोसौनाम्नाभूच्चन्द्रशेखरः ॥ समनोहररूपस्तेप्रियःस्वामीभविष्यति ॥ ३६ ॥
तामिन्दुकलयाशीर्षेचिह्नितन्नृपसत्तमम् ॥ वरयस्ववरारोहेपार्वतीववृषध्वजम् ॥ ३७ ॥ इत्युक्ताविररामाशुपार्वतीनृपपुत्रिकाम् ॥ सापिन
त्वातथादृश्यांहर्षोत्फुल्लविलोचना ॥ ३८ ॥ जगाममंगलगृहञ्जनन्यायत्रवासिता ॥ अथाजगामसाधात्रीनिरूप्यसदृशम्पतिम् ॥ ३९ ॥
तारावत्यास्तदाचष्टरहस्यन्नृपसत्तम ॥ दृष्ट्वातामग्रतोधात्रीम्प्रहृष्टान्नृपतेःसुता ॥ ४० ॥ पप्रच्छनिभृतंकीदृक्कोवादृष्टस्त्वयानृपः ॥
साप्राहधात्रीवचनात्तवभूपाविलोकिताः ॥ ४१ ॥ चारुरूपाःकुलीनाश्चशास्त्रेशस्त्रेचपारगाः ॥ तेषामहन्नशक्नोमिप्रवक्तुंसुबहून्गुणान् ॥
॥ ४२ ॥ येषुमेरोचतेताँस्तुकथयामिशुभप्रभे ॥ चारुरूपामयातेषुचत्वारःपुरुषाःशुभे ॥ ४३ ॥ दृष्टास्तत्रापिनासत्यौदेवौद्वावपरौ नरौ ॥
देवयोःकथनेकृत्यंकिञ्चिन्नापिनविद्यते॥४४॥यौपुनः पृथिवीपालौतयोरेकः सदारकः ॥ नाम्नासर्वांगकल्याणोथापरश्चन्द्रशेखरः ॥४५॥ नास
त्ययोरेतयोस्तुविशेषोनास्तिकश्चन ॥ रूपेशरीरसौभाग्येसर्वेचातिमनोहराः ॥ ४६ ॥ नृपौपुनर्महासत्त्वौसिंहस्कन्धौमहाभुजौ ॥ आरक्तपा
णिनयनमुखपादकरोद्भवौ ॥४७ ॥ पीनोरस्कौविशालाक्षौलग्नभ्रुयुगलावुभौ ॥ सर्वलक्षणसम्पूर्णौदेवालंकारमण्डितौ ॥ ४८ ॥ तयोरपिव

यःस्थत्वात्प्रशस्तश्चन्द्रशेखरः ॥ सुशीलःसूनृतवचाःशास्त्रेशस्त्रेचसम्मतः ॥ ४९ ॥ ईषदुद्भिन्नरोम्णातुनीलेनचारुनिर्मलम् ॥ राजतेवदनंस्त
स्यलक्ष्मणेवनिशाकरः ॥ ५० ॥ दीप्तिमत्यापिकलयाराजतेसनिशापतेः ॥ सहजेनशिरःस्थेनसाक्षात्सचन्द्रशेखरः ॥ ५१ ॥ सएवतेपति
र्योग्यश्चिह्नेनानेनसुन्दरि ॥ तन्त्वंवरयराजानन्तवयोग्यंशुभोदयम् ॥ ५२ ॥ धात्र्याश्चैवंवचःश्रुत्वाराजपुत्रीजगादताम् ॥ मत्पार्श्वचारिणी
भूत्वानिदेशयनृपोत्तमम् ॥ ५३ ॥ धात्रिस्वयंवरसभाप्रवेशसमयेमम ॥ तयोरायात्तदाराजात्वन्योन्यम्भाषमाणयोः ॥ ५४ ॥ सुतांस्वयंवर
सभान्नेतुंकालेशुभोदये ॥ स्वयन्तदाककुत्स्थस्तुसुतायामंगलालये ॥ ५५ ॥ आसाद्यपुत्रीन्दयितांयोषिद्भिःकृतमंगलाम् ॥ माल्यंसुगन्धि
पुष्पाणांकरेणादायतत्करे ॥ ५६ ॥ दत्त्वाचेदमुवाचाशुप्रापयन्मंगलालयात् ॥ प्रविश्यसमितौमातर्माल्येनान्येनसत्तमम् ॥ ५७ ॥ यन्त्व
मिच्छसिराजानन्द्विजंवातंवरिष्यसि ॥ एवमुक्त्वाशिविकयास्वातैर्वृद्धैश्चपूरुषैः ॥ ५८ ॥ प्रवेशयामाससुतांककुत्स्थःसमितिम्मुदा ॥ तामा
गतांसभान्दृष्ट्वाशक्राद्यास्त्रिदशास्तदा ॥ ५९ ॥ अन्येदिक्पतयश्चापिसभान्तत्क्षणमागताः ॥ सावतीर्यतदावाप्ययानात्तारावतीमुदा ॥ ६० ॥
धात्र्याचानुगयायुक्ताव्यचरत्सदसोन्तरे ॥ सभामध्येचिरंसातुविहृत्यवरवर्णिनी ॥ ६१ ॥ भावित्वान्नियतेर्योगाच्चाण्डिकायाःप्रसादतः ॥
तयोःसमत्वादेकत्वात्तयाधात्र्याविबोधिता ॥ ६२ ॥ गतिखेदजघर्माम्भःकणिकानिचिताननाः ॥ पतिम्पूर्वतरम्पुत्रीराज्ञस्तारावतीसती ॥६३॥
स्वयंसापार्वतीदेवीवत्रेचचन्द्रशेखरम् ॥ वृतन्दृष्ट्वातदातन्तुब्राह्मणाःसामगीतिभिः ॥ ६४ ॥ तयोर्वैवाहिकञ्चक्रुर्मंगलंयतमानसाः ॥ वैतालि

१ मातः हेवरपरिच्छदे कचित्यातेतिपाठः । २ ततस्सदः आअवाप्यतारावतीयानादवतीर्य्येत्यन्वयः ।

कागायकाश्चतथातौर्यत्रिकानृप ॥ ६५ ॥ प्रशंसन्तिस्मगायन्तिवादयन्तिचकौतुकात् ॥ सर्वेचत्रिदशामोदमवापुश्चन्द्रशेखरे ॥ ६६ ॥
तारावत्यावृतेचाथककुत्स्थोप्यतिहर्षितः ॥ वृत्तान्तंवीक्ष्ययेभूपाःसुबाहुप्रमुखाःपरे॥ ६७ ॥ रुष्टास्तान्वारयामाससमितौचन्द्रशेखरः ॥ ततो
यातेषुदेवेषुत्रिदिवम्प्रतिस्वेच्छया ॥ ६८ ॥ भूपेषुचप्रयातेषुककुत्स्थेनार्चितेषुच ॥ वैवाहिकेनविधिनासराजाचन्द्रशेखरः ॥ ६९ ॥ ताराव
तीन्तदाभार्याककुत्स्थानुमतेपुनः ॥ संस्कृत्यज्ञापयामासदेवेभ्योवैदिकैर्मखैः ॥ ७० ॥ पाणिग्रहणसंस्कारान्कृत्वातांसहचारिणीम् ॥ करवी
रपुरायाशुप्रययौचन्द्रशेखरः ॥ ७१ ॥ द्वाविंशत्तुसहस्राणिदासीनाम्प्रददौपुनः ॥ ककुत्स्थाख्योविट्पतयेतस्मिन्नुद्वाहकर्मणि ॥ ७२ ॥ गवां
षष्टिसहस्राणिसौरभीणान्तथैवच ॥ दुहित्रेप्रददौदायन्दासान्दासीःप्रमाणतः॥७३॥अपरायानिजापुत्रीककुत्स्थाख्यस्यभूपतेः॥नाम्नाचित्रांग
दाख्याताऽपैस्तारावतीसमा ॥ ७४ ॥ दासीनामधिपाभूत्वास्वयञ्चानुययौतदा ॥ तारावतीम्भूपसुताञ्ज्येष्ठांस्वाम्भगिनींशुभाम् ॥ ७५ ॥
तान्दासान्त्सुसमादायककुत्स्थतनयोमहान् ॥ ज्येष्ठोविश्वावसुर्नामगच्छन्तञ्चन्द्रशेखरम् ॥७६॥ तारावत्याचसाहितंस्यन्दनेनाशुगामिना ॥
धीमाननुययौपश्चात्करवीरपुरम्प्रति ॥ ७७ ॥ तारावत्यासमंराजापौष्यजश्चन्द्रशेखरः ॥ करवीरपुरेरम्येरेमेनृपतिशेखरः ॥ ७८ ॥
इतिस्वयम्महादेवोमानुषींयोनिमाश्रितः ॥ पार्वतीचस्वयञ्जातानरयोनिमनिन्दिता ॥ ७९ ॥ तथाभृंगीमहाकालएतयोरभवत्सुतः ॥ तथा
त्वंशृणुराजेन्द्रकथयामिसमुद्भवम् ॥ ८० ॥ ॥ इतिकालिकापुराणेपञ्चाशत्तमोध्यायः ॥ ५० ॥ ॥ मार्कण्डेयउवाच ॥ ॥ अथका
लेव्यतीतेतुककुत्स्थतनयासती ॥ विधातुमार्त्तवंस्नानंयोषिद्भिःपरिवारिता ॥ १ ॥ शीतामलजलांह्यान्नदीम्प्राप्ताद्दृषद्वतीम् ॥ प्रभिन्नाञ्जनसं

काशांकलुषध्वंसकोविदाम् ॥ २ ॥ कृतस्नानामनुत्तीर्णामर्द्धमग्नाम्महासतीम् ॥ ददृशेस्वर्णगौरांगींकापोतोमुनिसत्तमः ॥ ३ ॥ कापोतंवपुरा
स्थायप्राणिनांवधशंकया ॥ विचचारयतःपूर्वंकापोतस्तेनसस्मृतः ॥ ४ ॥ तान्दृष्ट्वाहेमगर्भाभाञ्चन्द्रिकांशारदीमिव ॥ कापोतःकामयामास
कामबाणार्दितोभृशम् ॥ ५ ॥ कामाग्निपरितप्तःसककुत्स्थतनयाम्मुनिः ॥ अभिगम्याथकल्याणीमिदंवचनमब्रवीत् ॥ ६ ॥ कात्वंकस्यासि
वनितापुत्रीवाकस्यसुन्दरि ॥ कस्मात्समागतावात्वमुपांशुतटिनीजलम् ॥ ७ ॥ रूपन्तेसौम्यमाह्लादिपूर्णचन्द्रनिभम्मुखम् ॥ तिलपुष्पप्रती
काशन्नासिकायुगलन्तव ॥ ८ ॥ वातकम्पितनीलाब्जसदृशेलोचनेतव ॥ बाहूमनोहरौवृत्तौमृणालमृदुलायतौ ॥ ९ ॥ ऊरूगजकरप्रख्यौ
मध्यंवेदिविलग्नकम् ॥ ईदृशेनतुरूपेणनत्वम्मानुषभामिनी ॥ १० ॥ देवीवादानवीवात्वमप्सरोगुणशालिनी ॥ अथवाभाग्यभोगायश्रीस्त्व
न्नारीत्वमागता ॥ ११ ॥ अपर्णावाशचीवात्वन्तन्मेवदमनोहरे ॥ और्वउवाच ॥ इतिवाक्यम्मुनेः श्रुत्वाजलादुत्तीर्यभामिनी ॥ १२ ॥ प्रण
म्यतम्मुनिन्नम्रावचनञ्चेदमब्रवीत् ॥ अहन्तारावतीनाम्नाककुत्स्थस्यसुतासती ॥ १३ ॥ चन्द्रशेखरभूपस्यभार्याञ्जानीहिमाम्मुने ॥
नाहन्देवीनगन्धर्वीनयक्षीनचराक्षसी ॥ १४ ॥ मानुष्यहन्नृपसुताचारित्रव्रतधारिणी ॥ कापोतउवाच ॥ ॥ त्वान्दृष्ट्वामांस्वयंकामःसंगतः
संगमायते ॥ १५ ॥ पीडितश्चातितेनाहन्त्वयाशक्त्यासमक्षया ॥ स्मरसागरकल्लोलपतितम्मान्निराकुलम् ॥ १६ ॥ त्वदूरुतारिणात्रा
हितूर्णन्त्वंमृदुभाषिणी ॥ मत्तःपुत्रद्वयञ्चारुरूपलक्षणसंयुतम् ॥ १७ ॥ भविष्यतिमहाभागेबलवीर्ययुतम्महत् ॥ कापोतस्यवचःश्रु
त्वाभयदुःखसमाकुला ॥ १८ ॥ जगादगद्गदंवाक्यंवाग्मिन्यथककुत्स्थजा ॥ वाक्यमन्यन्मयाकार्यन्नकार्यमतिनिन्दितम् ॥ १९ ॥

तस्मान्मावदमामित्थम्प्रणम्यत्वाम्प्रसादये ॥ तवापिनैतद्योग्यंस्यान्मुनेरिहतपोधन ॥ २० ॥ तपःक्षयकरंगर्ह्यंसतीत्वभ्रंशकम्मम ॥
॥ कापोतउवाच ॥ ॥ तपोव्ययोवाचान्यद्वादूषणन्तन्ममास्तित्वह ॥ २१ ॥ तथापित्वामहन्त्यक्तुन्नेच्छामिसुरतौशुभे ॥ अवश्यम्ममकामे
भ्यस्त्राणङ्कर्त्तुमिहार्हसि ॥ २२ ॥ अन्यथाकामदग्धोहन्त्वयात्यक्तोमनोहरे ॥ भवतीञ्चकरिष्यामिशापदग्धांसबान्धवाम् ॥ २३ ॥ ततस्त
द्वचनंश्रुत्वादेवीतारावतीतदा ॥ ऋषिशापभयात्साध्वीनकिञ्चिच्चोत्तरन्ददौ ॥ २४ ॥ सम्भाषयेहंस्वसखीरिहातिष्ठमहामुने ॥ एवमुक्तातदा
देवीदासीनाम्मध्यमागता ॥ २५ ॥ चित्राङ्गदांसमाहूयवचनञ्चेदमब्रवीत् ॥ चित्रांगदेमुनिरसौमांवैकामयतेभृशम् ॥ २६ ॥ किंकरिष्ये
सतीभावान्नभ्रष्टास्यामहंकथम् ॥ पतिंबन्धूँश्चकापोतःसद्यःशापाग्निनादहेत् ॥ २७ ॥ नाहम्मुनिंकामयेचेत्संशयेपतितात्वहम् ॥ ततश्चित्रां
गदाप्राहमाभैस्त्वंसत्यभाषिणि ॥ २८ ॥ तत्रोपायमहंवक्ष्येयत्कृत्वात्वम्प्रमोक्ष्यसे ॥ नजहातिमुनिश्चेत्त्वान्दासीमेकाम्मनोहराम् ॥ २९ ॥
सुभूषणैर्भूषयित्वामुनयेत्वान्नियोजय ॥ कामातुरोमुनिर्मोहात्कृपणोज्ञास्यतेनहि ॥३०॥ दासींत्वद्भूषणाच्छन्नाञ्ज्योत्स्नाच्छन्नाम्मृगीमिव ॥
एवंकुरुमहाभागेमात्वञ्चिन्तांगमःशुभे ॥ ३१ ॥ त्वञ्चेत्सतीतिनियतन्नज्ञास्यतितदामुनिः ॥ ततस्तारावतीप्राहतांरूपगुणशालिनीम् ॥३२ ॥
चित्रांगदाम्भूषपुत्रींशश्वद्विनयसूनृताम् ॥ त्वमेवगच्छभगिनिकापोताख्यमनिंदिते ॥ ३३ ॥ मद्भूषणैर्भूषायित्वास्वशरीरम्मनास्विनि ॥
अन्याम्प्रस्थापितांविप्रः सम्बुध्यक्रोधवह्निना ॥ ३४ ॥ धक्ष्यत्यवश्यंसकुलाम्मान्तस्माद्गच्छसुन्दरि ॥ त्वम्मत्समासर्वगुणैः सर्वभूषणभूषि
ता ॥ ३५ ॥ मुनिंसंगमयस्वाद्यरक्षमांसकुलांशुभे ॥ ततस्तस्यावचः श्रुत्वाविनयञ्चसकातरम् ॥ ३६ ॥ तूष्णीम्भूत्वाक्षणन्तस्थौनातिहृष्ट

मनाइव ॥ जगादचमहाभागाश्चित्रांगदाककुत्स्थजाम् ॥ ३७ ॥ करिष्येवचनन्तेद्यसमयेमांस्मरिष्यसि ॥ मदर्थेपितरञ्चेमम्भूपञ्चचन्द्रशेख
रम् ॥ ३८ ॥ आश्वासयिष्यतितथासमस्तांश्चसखीगणान् ॥ एवमुक्त्वाभूषणानितारावत्याः पिधायसा ॥ ३९ ॥ चित्रांगदाजगामाशुमुनेः
कामोत्सवायच ॥ तारावतीतदादीनावस्त्रालंकारवर्जिता ॥ ४० ॥ दासीमध्यगताभूत्वातामेवानुययौप्रियाम् ॥ तामायान्तीन्ततोदृष्ट्वाकापो
तःकाममोहितः ॥ ४१ ॥ मुनीनाम्परजायासुसस्मारसंगमन्तदा ॥ प्रम्लोचाकामितापूर्ववतण्डस्यसुतेनवै ॥ ४२ ॥ यथावाकामितापद्मा
भरद्वाजेनधीमता ॥ तथाहंकामयिष्यामिसाम्प्रतंवरवर्णिनीम् ॥४३॥ पश्चात्तपोबलात्तद्वज्जायापापाद्विमोक्षये ॥ इतिचिन्तयतस्तस्यतदाचि
त्रांगदाशुभा॥४४॥ समेत्यतम्मुनिंलज्जायुक्ताचैषाहकिञ्चन ॥ तामासाद्यमहाभागःकापोतोमुनिसत्तमः ॥४५॥ शृंगारवेषभावायमदनम्मन
सास्मरत् ॥ स्मृतमात्रोथमदनःस्वयमेत्यमहामुनिम् ॥ ४६ ॥ गन्धमाल्यैःसुवासोभिरध्युवासातिहर्षितः ॥ तेनाधिवासितोविप्रःकापोत
श्चारुरूपधृक् ॥ ४७ ॥ जज्वालतेजसाचापिद्वितीयइवभास्करः ॥ मनोहरन्तथादृष्ट्वाकापोतम्मदनोपमम् ॥ ४८ ॥ तारावतीमृतेसर्वाःसका
माश्चाभवनन्नस्त्रियः ॥ तारावतीमुनिन्दृष्ट्वासुन्दरम्मदनोपमम् ॥ ४९ ॥ विस्मयम्परमम्प्राप्तामुनिंकाममममन्यत॥ अथचित्राङ्गदांविप्रःकामुकः
कामसंगमे ॥ ५० ॥ तदानियोजयामाससुप्रीतश्चाभवत्क्षणात् ॥ ततस्तस्यांसमुत्पन्नंसद्योजातंसुतद्वयम् ॥ ५१ ॥ देवगर्भोपमन्दीप्तज्ज्व
लनार्कसमप्रभम् ॥ जातेसुतद्वयेतान्तुमुनिःसम्मृज्यपाणिना ॥ ५२ ॥ निनायपूर्ववद्भावंवचनञ्चेदमब्रवीत् ॥ मत्सङ्गमेकियत्कालम्प्रियेतिष्ठ
शुभानने ॥ ५३ ॥ ममेच्छयायास्यसित्वम्भयन्तेनास्तिराजतः ॥ एममस्त्वितिसाप्राहऋषिंशापभयात्सती ॥ ५४ ॥ ततोविसर्जयामास

मुनिरन्याश्चयोपितः ॥ ततस्तारावतीदेवीदासीभिः परिवारिता ॥ ५५ ॥ भगिनीमनुशोचन्तीजगामभवनान्निजम् ॥ गत्वातंसर्ववृत्तान्तंकापो
तकृतमद्भुतम् ॥ ५६ ॥ ब्रह्मावर्त्ताधिपायाशुशशंसाथककुत्स्थजा ॥ सश्रुत्वानृपशार्दूलः क्षणमात्रंविचिन्त्यच ॥५७॥चित्रांगदायाः साहाय्यं
कापोतानुमतेऽकरोत् ॥ कापोतोपितदातस्याभ्रातयोःसुतयोस्तयोः ॥ ५८ ॥ यथोक्तेनाथविधिनासंस्कारमकरोत्तदा ॥ सगरउवाच ॥
चित्राङ्गदाकथम्पुत्रीककुत्स्थस्याभवत्तदा ॥ ५९ ॥ तदहंश्रोतुमिच्छामिकथयस्वद्विजोत्तम ॥ और्वउवाच ॥ एकदातुककुत्स्थोसौहिमवन्त
म्महागिरिम्॥६०॥मृगयायैजगामाथमृगाश्चापिनिपातिताः ॥ लम्बन्तींसुरलोकात्तुभूमिम्प्रतितदोर्वशीम् ॥६१॥ विश्रामायोपविष्टस्तुसानौवे
श्यान्ददर्शह ॥ तामासाद्यमहाराजःकामबाणप्रपीडितः ॥ ६२ ॥ अवतीर्णाङ्गिरौशश्वदंगसंगमयाचत ॥ साज्ञात्वानृपशार्दूलंककुत्स्थंशक्र
सन्निभम् ॥ ६३ ॥ उर्वशीरमयामासगिरिकुञ्जेयथेप्सितम् ॥ ततोराज्ञःककुत्स्थस्यस्ववेश्यायान्तदासुता ॥ ६४ ॥ अभवन्नृपशार्दूलात्स
द्योजातामनोहरा ॥ अथकामेनसन्तुष्टंककुत्स्थंसातदोर्वशी ॥ ६५॥ यथेष्टदेशंविज्ञाप्यगन्तुमैच्छदनिन्दिता ॥ तामाहराजातनयाम्पारित्यज्य
कथंशुभे ॥ ६६ ॥ गन्तुमिच्छसिचार्वाङ्गिसुतामेनान्तुपालय ॥ साप्राहाहंस्वर्गणिकामायिकस्यनचाभवत् ॥ ६७ ॥ तनयस्तनयावापिसद्यो
जातानृपात्मजा ॥ स्वतेजसाशरीरस्यविकारोमेनविद्यते॥६८॥सुताश्चापिनपाल्यन्तेवेश्याभावात्स्वभावतः ॥ दयास्तियदितेपुत्र्यान्नीत्वैनांवर्द्ध
यस्वयम्॥६९॥गन्तुंमामनुजानीहिसत्यमेतद्ब्रवीमिते॥इत्युक्त्वासाजगामाशुयथेष्टंसोर्वशीनृपः ॥७०॥पुत्रीन्तांसमुपादायनगरंस्वंविवेशह ॥
तस्याश्चित्रांगदानामसचकारनृपःस्वयम्॥७१॥ मनोन्मथिन्यैचादात्ताम्भार्यायैपुत्रिकांशुभाम् ॥ इदञ्चवचनन्देवीन्तदाप्राहनृपोत्तमः ॥७२॥

देविपुत्रीममेयन्त्वमेनाम्पालयसद्गुणाम्॥मयानीतांशैलजाताम्माहेलांकर्त्तुमर्हसि॥७३॥इत्युक्ताराजपुत्रीसापालनेचाकरोन्मतिम् ॥ भर्तुराज्ञा
म्पुरस्कृत्यनान्यत्किञ्चिदुवाचह ॥७४॥ साचैकदाबाल्यभावादष्टावक्रम्महामुनिम् ॥ व्रजन्तंजिह्मभेवाशुजहासोपजहासच ॥ ७५ ॥ सचुको
पमुनिस्तस्यैशापम्परमदारुणम् ॥ ददौदासीस्ववंशस्यभवितेतिककुत्स्थजे ॥ ७६ ॥ दासीभूत्वास्ववंशस्यह्यनूढैवसुतद्वयम् ॥ जनयिष्यसि
पापिष्ठेततोभद्रमवाप्स्यसि ॥७७॥ एवंककुत्स्थतनयाजाताचित्रांगदानृप ॥ दासीचभूतासातेनतारावत्यानिवासिता ॥ ७८ ॥ अनूढाप्यलभ
त्पुत्रयुग्मम्मुनिवराच्छभा ॥ तौचपुत्रौमहाभागौमहाकार्यंकरिष्यतः ॥ ७९ ॥ इतितेकथितंराजन्यथाचित्रांगदाभवत् ॥ ककुत्स्थस्यसुता
साध्वीप्रस्तुतंशृणुसाम्प्रतम् ॥ ८० ॥ इतिकालिकापुराणेएकपञ्चाशत्तमोध्यायः ॥ ५१ ॥ छ ॥ ॥ और्वउवाच ॥ ॥ अथकाले
व्यतीतेतुपुनस्तारावतीशुभा ॥ आर्त्तवंविहितंस्नानन्नदीम्प्राप्तादृषद्वतीम् ॥ १ ॥ दासीसहस्रैःसंयुक्तानानालंकारमण्डिता ॥ रम्भादिभिर्यथे
न्द्राणीतथासाप्रत्यदृश्यत ॥ २ ॥ सावतीर्णाजलेदेवीगौरांगीतडिदुज्ज्वला ॥ नदीमुज्ज्वलयामासाभिन्नाञ्जनसमाम्भसम् ॥ ३ ॥ स्थलींकाच
मयींस्वच्छांकाञ्चनीप्रतिमायथा ॥ स्वभासाज्वलयामासप्रतिबिम्बेनसातथा ॥ ४ ॥ अथताम्पुनरेवाथकापोतोमुनिसत्तमः ॥ आनाभिमग्ना
न्तोयौघैर्ददर्शसुमनोहराम् ॥ ५ ॥ दृष्ट्वातामथपप्रच्छतदाचित्रांगदाम्मुनिः ॥ केयञ्जलेदृषद्वत्याअवतीर्णासखीशतैः ॥ ६ ॥ श्रियाज्वलन्ती
श्रीतुल्याकिमपर्णागिरेःसुता ॥ अतीवभ्राजतेरूपैर्न्नसंस्तौषिचतांकिमु ॥ ७ ॥ अथतस्यवचःश्रुत्वामुनेश्चित्रांगदातदा ॥ ऋषिशापभयात्सा
ध्वीसंस्तौमीतितदाब्रवीत् ॥ ८ ॥ इयन्तागवतीनामककुत्स्थस्यसुतासती ॥ चन्द्रशेखरभूपालभार्यातिदयिताशुभा ॥ ९ ॥ एषात्वयाका

मितातुकामार्थम्पूर्वतोमुने ॥ स्वालंकारैरलंकृत्यमान्दत्त्वातेगृहंगता ॥ १०॥ सेयम्पुनर्न्नर्दीस्नातुम्भगिनीमेसमागता ॥ ज्येष्ठान्तान्तुमुनेवक्तु
न्नतेकिञ्चिच्चयुज्यते ॥ ११ ॥ त्वमत्रतिष्ठविप्रेन्द्रज्येष्ठान्ताम्भगिनीम्प्रियाम् ॥ समाभाष्यसमेष्येत्वामनुजानासिचेद्गतौ ॥ १२ ॥ इतिश्रुत्वा
वचस्तस्यामुनिःस्नेहेनवञ्चनाम् ॥ तारावत्याकृताम्पूर्वम्मुनिस्तस्यैचुकोपह ॥ १३ ॥ इयम्पापीयसीरामावञ्चनामकरोन्मयि ॥ तस्याःसंकाल
नञ्चाहंकरिष्याम्यद्यनिश्चितम् ॥ १४ ॥ इत्युक्त्वासतयासार्द्धम्मुनिश्चित्रांगदाख्यया ॥ जगामयत्रसादेवीस्थितातारावतीशुभा ॥ १५ ॥ गत्वा
तान्तुसमासाद्यकापोतोमुनिसत्तमः ॥ इदन्तारावतीम्प्राहकुपितःप्रहसन्निव ॥ १६ ॥ कामार्थम्प्रार्थितापूर्वन्त्वम्मयाच्छद्मनात्वया ॥ वञ्चि
तोस्मिदुराधर्षेफलन्तस्यसमाप्नुहि ॥ १७ ॥ ममापिपुरतःपापेत्वंसतीतिविकत्थसे ॥ सतीत्वभ्रंशकम्मांत्वन्नैवंकामितवत्यसि ॥ १८ ॥ तस्मा
द्वीभत्सवेषस्त्वांकपालीपलितोहरः ॥ विरूपोधनहीनश्चकामयिष्यतिवैहठात् ॥ १९ ॥ सद्योजातम्पुत्रयुगंसश्रीकंवानराननम् ॥ भविष्यति
चतेपापेत्वेकाब्दाभ्यन्तरेधुना ॥ २० ॥ एतच्छ्रुत्वामुनेर्वाक्यम्प्राहतारावतीमुनिम् ॥ कोपाद्भयाच्चसादेवीस्फुरदोष्ठपुटातदा ॥ २१ ॥ यदि
सापूजयित्वातुचण्डिकांप्रापमाम्प्रसुः ॥ यद्यहंव्रतिनीनित्यम्भूपतौचन्द्रशेखरे ॥ २२ ॥ ककुत्स्थस्यसुतासत्यंयद्यहान्द्विजसत्तम ॥ तेनस
त्येनमेदेवान्नान्योमांकामयिष्यति ॥ २३ ॥ यदिसत्यम्महादेवोनित्यमाराध्यतेमया ॥ तेनसत्येनमेदेवादाराध्याच्चन्द्रशेखरात् ॥ २४ ॥ स्व
प्नेपिमुनिशार्दूलनान्योमांकामयिष्यति ॥ इत्युक्त्वासामुनिन्नत्वास्वामिविन्यस्तमानसा ॥ २५ ॥ ययौतारावतीदेवीस्वस्थानामितिभामिनी ॥
तस्यांगतायान्देव्यान्तुचिन्तयामासताम्मुनिः ॥२६॥ ममैवपुरतश्चैपानिर्भीतातिप्रवल्गते ॥ अत्रान्तर्विनिगूढन्तुबीजंशुद्धम्भविष्यति ॥२७॥

एवंविचिन्त्यसमुनिर्ध्यानसंयुक्तमानसः ॥ दिव्यज्ञानपरोभूत्वासर्ववृत्तान्तमाददे ॥ २८ ॥ यथाभृंगिमहाकालौदेव्याशप्तौसुतावुभौ ॥ प्रति
शापंयथातौतुददतुःपार्वतींहरम् ॥ २९ ॥ यथावतीर्णौमानुष्ययोनौतौतुयदर्थतः ॥ चित्रांगदायथाजातायदर्थन्देवकन्यका ॥ ३० ॥
दिव्यज्ञानेनतज्ज्ञात्वामुनिःकिञ्चननाकरोत् ॥ चित्रांगदामादरेणसमादायमुनिस्ततः ॥ ३१ ॥ स्वस्थानंगतवान्विप्रःपूजयामासताम्मुनिः ॥
तारावतीचतत्सर्वञ्चन्द्रशेखरभूपतेः ॥ ३२ ॥ वृत्तान्तम्मुनिशापस्यकथयामासभामिनी ॥ तत्सर्वम्पौष्यजोराजास्वगतश्चिन्तयायुतः ॥३३॥
आश्वास्यदयिताम्भार्याम्माभैर्देवीतिसोचिरात् ॥ सततंसेवयापत्युर्द्धर्मार्थपरिसेवनैः ॥ ३४ ॥ वर्जनादप्रशस्तानाम्मुनिशापोपनीयते ॥ त
स्मात्त्वन्देविसुभगेचारित्रव्रतधारिणी ॥ ३५ ॥ कल्याणभागिनीनित्यन्नापदंसमवाप्स्यसि ॥ एवमुक्तासराजातुकरवीरपुराधिपः ॥ ३६ ॥
प्रासादङ्कारयामासउच्चैरश्रांशकम्बहु ॥ उच्चैश्चतुःशतंव्यामन्त्रिंशद्योजनविस्तृतम् ॥ ३७ ॥ रत्नस्फटिकभूम्यन्तःखचितंरत्नकर्बुरैः ॥ वैदूर्यपट
लैःशुभ्रैश्छादितंसुमनोहरम् ॥ ३८ ॥ स्वर्णरत्नतुलास्तम्भंविश्वकर्म्मविनिर्मितम् ॥ रक्षार्थंकारयामासतारावत्याःप्रियंकरम् ॥ ३९ ॥ रत्नसो
पानसंयुक्तंवैदूर्यवलभीयुतम् ॥ सौवर्णनीपसम्बद्धसुधर्मासदृशंगुणैः ॥ ४० ॥ तस्यांसमस्तभोग्यानिस्वादूनिचमृदूनिच ॥ आप्तैरासादयामा
सपुरुषैश्चन्द्रशेखरः ॥ ४१ ॥ ततस्तारावतीन्देवीमादायचन्द्रशेखरः ॥ नित्यम्प्रासादपृष्ठन्तमारुह्यरमतेनृपः ॥ ४२ ॥ एवंसंवत्सरंयावद
न्यैरप्राप्यवेश्मनि ॥ आप्तैरधिष्ठितद्वारितान्देवींसमरक्षत ॥ ४३ ॥ एकदातुविमानेनकरवीराधिपेनतु ॥ उच्चैःप्रासादमारुह्यास्थितातारावती
सदा ॥ चिन्तयन्तीनृपन्तन्तुदयितञ्चन्द्रशेखरम् ॥ ४४ ॥ तत्पदेन्यस्तमनसासावित्रीवपतिव्रता ॥ आराध्यचमहादेवम्पार्वत्यासहितन्त

दा ॥ ४५ ॥ इष्टान्देवीश्चसादेवीचिन्तयन्तीस्मचस्थिता ॥ तत्रसाचिन्तयन्तीतुत्र्यम्बकश्चन्द्रशेखरम् ॥४६॥ विवेदभेदन्नतयोश्चन्द्रशेखरयो
र्द्वयोः ॥ एवंप्रासादपृष्ठेतुस्थितातारावतीसती ॥ ४७ ॥ सुधर्मामध्यगादेवीशक्रश्रीरिवभूपिता ॥ अथोमयासमन्देवोवियतश्चन्द्रशेखरः ॥
॥ ४८॥ आजगामतदागच्छन्प्रासादम्प्रतितंनृप ॥ दृष्टशेसूत्तरन्तीसाउमायाःसदृशीगुणैः ॥४९॥ सर्वलक्षणसम्पूर्णामाधवस्येवमाधवी ॥ ता
न्दृष्ट्वान्यगदद्देवीङ्गौरींवृषभकेतनः ॥ ५० ॥ स्मितप्रसन्नवदनःप्रहसन्निवभामिनीम् ॥ ईश्वरउवाच ॥ इयन्तेमानुषीमूर्त्तिःप्रियेतारावतीति
या ॥ ५१ ॥ भृंगीमहाकालयोस्तेजन्मनेविहितास्वयम् ॥ त्वत्तोह्यनन्यकान्तोहन्नान्यांगन्तुमिहोत्सहे ॥५२॥ त्वमिदानींस्वयञ्चास्याम्मूर्त्या
म्प्राविशभामिनि ॥ ततउत्पादयिष्यामिमहाकालञ्चभृंगिणम् ॥ ५३ ॥ देव्युवाच ॥ ममैवमानुषीमूर्त्तिरस्यांवृषभकेतन ॥ विशामितेत्रवचना
दुत्पादयसुतद्वयम् ॥ ५४ ॥ ममभृङ्गिमहाकालकापोतानाञ्चशापतः ॥ एवम्मोक्षोभवेद्भर्गतस्मात्त्वंकुरुमत्प्रियम् ॥ ५५ ॥ और्वउवाच ॥
प्रविवेशततोदेवीस्वयन्तारावतीतनौ ॥ महादेवोऽपितस्यान्तुकामार्थंसमुपस्थितः ॥ ५६ ॥ ततःसापर्णयाविष्टादेवीतारावतीसती ॥ कामया
नम्महादेवंस्वयमेवाभजन्मुदा ॥ ५७ ॥ तस्मिन्कालेभवद्भर्गःकपालीचास्थिमाल्यधृक् ॥ बीभत्सवेशोदुर्गन्धःपलितोऽतिविरूपधृक् ॥५८॥
कामावसानेतस्यान्तुसद्योजातंसुतद्वयम् ॥ अभवन्नृपशार्दूलतथाशाखामृगाननम् ॥५९॥ तद्देहान्निःसृतापर्णाजातयोःसुतयोस्तयोः ॥ मोह
यित्वायथात्मानन्नजानातिककुत्स्थजा ॥ ६० ॥ अहंगौरीतथाभर्गोभावेनमानुषेणतु ॥ अथतारावतीदेवीसुतौदृष्ट्वाक्षितिस्थितौ ॥ ६१ ॥
पातिव्रत्यात्परिभ्रष्टाआत्मानंवीक्ष्यभामिनी ॥ तथाबीभत्सवेशन्तुहरन्दृष्ट्वाग्रतःस्थितम् ॥ ६२ ॥ मुनिशापन्तदामेनेप्राप्तंकालान्तकोपमम् ॥

इतिशोकविमूढाचनिनिन्दचसतीव्रतम् ॥ ६३ ॥ इदञ्चोवाचतंवीक्ष्यमहादेवन्त्रिशूलिनम् ॥ मुनिव्रतादपिवरन्नारीणाञ्चसतीव्रतम् ॥ ६४ ॥
इतिस्मसततन्धीराव्याहरन्तिपुराविदः ॥ नतत्सत्यमहम्मन्येयत्प्रवृत्तम्ममेदृशम् ॥ ६५ ॥ इत्युक्त्वासातदादेवीशुशोचचमुमोहच ॥ तामाहा
थमहादेवोमाकार्षीस्त्वंवरानने ॥ ६६ ॥ शोकंसतीव्रतञ्चापिमानिन्दत्वंसुचेतने ॥ कापोतेनयदाशप्तात्वन्तदैवतदग्रतः ॥६७॥ उक्तवत्यसिदी
र्घाक्षियत्तद्भूतन्तवाधुना ॥ यदिसत्यम्महादेवोनित्यमाराध्यतेमया ॥ ६८ ॥ तेनसत्येनमेदेवादाराध्याच्चन्द्रशेखरात् ॥ स्वप्नेपिमुनिशार्दूल
नान्योमांकामयिष्यति ॥ ६९ ॥ सोहमेवमहादेवआराध्यश्चन्द्रशेखरः ॥ त्वम्मयाकामिताचापिमाकार्षीःशोकमंगने ॥ ७० ॥ इत्युक्त्वासम
हादेवस्तत्रैवान्तरधीयत ॥ माययामोहितादेवीतत्रतारावतीसती ॥ ७१ ॥ भूमौमलिनवेशेनमन्युनासमुपाविशत् ॥ सुतौचपतितौभूमौ
सादेवीनासभाजयत् ॥ ७२ ॥ भर्त्तुरागमनंशश्वत्काङ्क्षन्तीभर्गभाषितम् ॥ नरराजगृहेचापिमुक्तकेशीतथास्थिता ॥ ७३ ॥ अथक्षणा
न्महाभागःसराजाचन्द्रशेखरः ॥ प्रासादपृष्ठमागच्छद्दृष्ट्वतारावतीन्तदा ॥ ७४ ॥ सतंप्रासामारुह्यजायान्तारावतीन्तदा ॥ ददर्शपतिता
म्भूमौमुक्तकेशीन्निरुत्सवाम् ॥ श्यामाननांश्वसन्तीञ्चसत्यगर्हणतत्पराम् ॥ ७५॥ सुतौचपतितौभूमौसूर्यचन्द्रसमौतदा ॥ वानरास्यौसदृशे
पदक्षोभंवृषस्यच ॥ ७६ ॥ इतिसर्वमवेक्ष्याथसराजाचन्द्रशेखरः ॥ भीतश्चविस्मितश्चैवभार्यांम्पप्रच्छसम्भ्रमात् ॥७७ ॥किंकिन्तारावतितव
प्रवृत्तन्निर्जनेगृहे ॥ कोवाधर्षितवाँस्त्वांहिशिवःसिंहवधूमिव ॥७८॥ कस्यवापृथुकावेतौप्रोद्दीप्तौवानराननौ ॥ तन्मेद्रुतंसमाचक्ष्वकोवात्वांका
मितोपरः ॥ ७९ ॥ ॥ और्वउवाच ॥ ॥ एवमुक्तातुभूपेनतदातारावतीसती ॥ वृत्तातङ्कथयामाससकलञ्चन्द्रशेखरे ॥८०॥ यथासमाग

तोभर्गउत्तरञ्चयथोक्तवान् ॥ तत्सर्वंकथयामासबाष्पकण्ठासगद्गदा॥८१॥तस्यास्तद्वचनंश्रुत्वाचिन्तयँश्चन्द्रशेखरः ॥ किंवृत्तमितिविज्ञातुंभूत
लेसमुपाविशत्॥८२॥स्वगतञ्चिन्तयन्राजाचकारेमांविचारणाम् ॥ अनन्यकान्तोगिरिशःसनान्याम्पार्वतीमृते ॥८३॥कामयिष्यतितस्मात्स
नभर्गःपरमेश्वरः ॥ ऋषिशापोहिबलवाँस्तच्छापादेवराक्षसः ॥८४॥कोपिमायाबलोपेतःशंकरच्छद्मनागतः ॥ एषासतीप्रियाभार्याराक्षसेनापि
दूषिता ॥८५॥कथञ्चेयम्मयाग्राह्यापूर्ववत्सर्वकर्मसु॥एतौचतनयौतस्यसद्योजातौचराक्षसौ॥८६॥अन्यथावाकथम्भूतौशाखामृगमुखौसुतौ ॥
एवञ्चिन्तयतस्तस्यदेवौघविनियोजिता ॥८७॥ सरस्वतीवियत्स्थातुराजानमितिचाब्रवीत्॥नत्वयासंशयःकार्यस्तारावत्यान्नृपोत्तम ॥८८॥
सत्यमेवमहादेवोभार्यान्तवसमेयिवान् ॥ एतौचतनयौतस्यराजँस्त्वम्परिपालय॥८९॥योन्यस्तेसंशयोत्रास्तिनारदस्तंविनेष्यति ॥ इत्युक्त्वा
विररामाशुवाग्देवीप्रियवादिनी॥९०॥ जातसम्प्रत्ययोराजाभार्यामाश्वासयत्तदा ॥ सुतौतुदेवदेवस्यसंस्कृत्यविधिनातदा ॥९१॥ पालयामा
सनृपतिराकांक्षन्नारदागमम् ॥ अथाजगामदेवर्षिर्नारदस्तस्यमंदिरम् ॥९२॥ पूजाभिर्बहुभिस्तन्तुप्रत्यगृह्णात्सभूपतिः ॥ पूजयित्वायथान्याय
न्तारावत्यासमन्नृपः ॥९३॥ उच्चैःप्रासादमतुलंसुरेशभवनोपमम् ॥ आरोहयामासतदातम्मुनिश्चन्द्रशेखरः ॥९४॥ तत्रोपांशुतदाराजासभार्य
श्चन्द्रशेखरः ॥ पूर्वप्रवृत्तवृत्तान्तमपृच्छच्चन्द्रशेखरः ॥ ९५ ॥ पूतोस्म्यनुगृहीतोस्मिभवताब्रह्मसूनुना ॥ अन्तर्बहिश्चविप्रेन्द्रतुंगप्रा
सादगामिना ॥ एकम्मेसंशयब्रह्मंश्छेत्तुमर्हसिहृद्गतम् ॥ ९६ ॥ त्वदन्यःसंशयस्यास्यच्छेत्तानैवास्तिकुत्रचित् ॥ ऋषिशापेनभार्येयम्मम
तारावतीसती ॥ ९७ ॥ बीभत्सवेशाकृतिनाधार्पिताकृत्तिवाससा॥तस्यात्मजौसमुत्पन्नौसद्योजाताविमौपुनः ॥ ९८ ॥ तत्रमेसंशयःशश्वन्नित्य

श्चित्तेप्रवर्त्तते ॥ अनन्यकान्तोगिरिशोगिरिजाम्पार्वतीमृते॥९९॥कथंसंगमयामासमानुषींहीनजन्मजाम् ॥ कथमुत्पादयामासमनुष्यौतनयौ
स्वकौ ॥ १०० ॥ एतत्सर्वंसमाचक्ष्वयदिगुह्यन्नतेभवेत् ॥ ॥ और्वउवाच ॥ ॥ इतिपृष्टःसतुमुनिश्चन्द्रशेखरभूभृता ॥ १०१ ॥ कथयामासत
त्सर्वन्नारदोमुनिसत्तमः ॥ यथाभृंगिमहाकालौसमुत्पन्नौपुरातनौ ॥१०२॥ यथाशप्तौचपार्वत्यातौचोदाहरतांयथा ॥यथापौष्यसुतोजातोभर्गः
सचन्द्रशेखरः ॥ १०३ ॥ तारावतीककुत्स्थस्यगृहेगौरीयथाभवत् ॥ तत्सर्वङ्कथयामासनारदश्चन्द्रशेखरे॥१०४॥इदञ्चपरमाख्यानंकथया
मासनारदः ॥ ॥ नारदउवाच ॥ ॥ व्याजहारयदापर्णाकालीतिवृषभध्वजः ॥ १०५ ॥ तदोमातपसेयातावपुर्गौरत्वकांक्षया ॥ अमर्ष
युक्तावचनाच्छंकरस्यगिरेःसुता ॥ १०६ ॥ विनीयमानाभर्गेणसानुंहिमवतोगिरेः ॥ तस्यांगतायाम्पार्वत्यांशंकरोविरहार्दितः ॥ १०७ ॥
कैलासाद्रिम्परित्यज्यमेरुपृष्ठन्तदाययौ ॥ तत्रापिशर्मनोलेभेपार्वत्याचविनाकृतः ॥ ८ ॥ मोहितःकामदेवेनतथावैयोगनिद्रया ॥ अथैकदा
मेरुपृष्ठेचरन्तींसुमनोहराम् ॥ ९ ॥ सावित्रीन्ददृशेशम्भुःपार्वत्याःसदृशींगुणैः ॥ तान्दृष्ट्वामदनाविष्टःपार्वत्याविरहार्दितः ॥ ११० ॥ अविद्य
यासमाविष्टोवभूवप्राकृतोयथा ॥ अथताम्पार्वतीभ्रान्त्याचरन्तीमन्वधावत ॥ ११ ॥ एहिमाम्पार्वतिशुभेभवद्विरहपीडितम् ॥ प्रहरेत्यषमां
कामःपूर्ववैरमनुस्मरन् ॥ १२ ॥ ममतत्रप्रतीकारंकुरुसम्प्रतिवल्लभे ॥ इत्युक्त्वाविमुखींयान्तींसावित्रींवृषभध्वजः ॥ १३ ॥ स्कन्धेहस्तेनप
स्पर्शसाचुकोपततोभृशम् ॥ अथसासम्मुखीभूत्वासावित्र्यतिपतिव्रता ॥ १४ ॥ इदमाहमहादेवंगर्हयन्तीवृषध्वजम् ॥ किन्त्वम्पशुपतेमूर्ख
मानुषःप्राकृतोयथा ॥ ११५ ॥ निरस्यकलहैर्भार्यामनुनेतुमिहार्हसि ॥ विमूढचेतनःकामैर्नसंस्तौषिपरस्त्रियम् ॥ १६ ॥ असंस्तुत्वापिसं

स्प्रष्टुम्माद्दर्शीयुज्यतेतव ॥ किमहम्पार्वतीमूढयेनमत्स्कन्धदेशतः ॥ १७ ॥ हस्तन्ददास्यविज्ञायसावित्रींविद्धिमांसतीम् ॥ यस्मान्मानुषव
न्मान्त्वमनुजानासिवर्वर ॥ १८ ॥ तस्मात्त्वम्मानुषीयोन्यांसुरतंसंविधास्यसि ॥ गौरीमृतेनान्यकान्तस्त्वमन्यान्तुसमीहसे ॥ १९ ॥ तस्यै
तत्फलितम्भर्गगच्छमान्त्वम्परित्यज ॥ इत्युक्त्वासागतादेवीस्वमाश्रमपदंसती ॥ १२० ॥ लज्जाविस्मयसंयुक्तोहरोप्यायान्निजास्पदम् ॥
अतोयम्मानुषीयोनौसुरतंशंकरोकरोत् ॥ २१ ॥ तस्मान्निःसंशयंराजन्निमान्तारावतींसतीम् ॥ दयस्वतनयावेतौभर्गस्यप्रतिपालय ॥२२॥
और्वउवाच ॥ ततःसराजाश्रुत्वैवनारदस्यमुखात्तदा ॥ आत्मनःशम्भुरूपत्वंगौरीतारावतीतिच ॥ २३ ॥ मनुष्ययोनावुत्पन्नावुमावृषभकेत
नौ ॥ श्रुत्वातिहर्षितोराजाविस्मितोनारदम्पुनः ॥ २४ ॥ पप्रच्छमुनिशार्दूलंविज्ञातुमितिचात्मनः ॥ शंकरत्वञ्चगौरीत्वन्तारावत्याःसमक्ष
तः ॥ १२५ ॥ यथाहन्तन्नपश्यामितन्माज्ञापयनिश्चितम् ॥ नारदउवाच ॥ अंकेतारावतींकृत्वाअक्षिणीत्वन्निमीलय ॥ २६ ॥ क्षणन्तारा
वतीचापिनिमीलयतुचक्षुषी ॥ निमील्यपश्चाद्राजेन्द्रउन्मीलयततोद्रुतम् ॥ २७ ॥ ततस्तेशाम्भवञ्ज्ञानंरूपञ्चापिभविष्यति ॥ इत्युक्तोना
रदेनाथसराजाचन्द्रशेखरः ॥ २८ ॥ वामेनपाणिनाधृत्वादेवींतारावतींसतीम् ॥ चक्षुषीचतयासार्द्धंन्निमील्योन्मील्यतत्क्षणात् ॥२९॥ तन्नि
मीलनकालेतुतस्याभूच्छम्भुरूपता ॥ गौरीरूपाभवद्देवीततस्तारावतीसती ॥ १३० ॥ अहंशम्भुरहंगौरीतिविज्ञानन्तयोरभूत् ॥ ततःप्रोवाच
तंशम्भुन्नारदःप्रहसन्निव ॥ ३१ ॥ शम्भुःसाक्षाद्भवान्गौरीदेवीतारावतीस्वयम् ॥ प्रत्यक्षन्तेमहाभागसम्पश्यात्मानमात्मना ॥३२॥ ततोराजा
भवत्वेवमित्युक्त्वाथस्वकान्तनुम्॥व्याघ्रचर्म्मपरीधानान्दशाभिर्बाहुभिर्युताम् ॥३३॥त्रिशूलखड्गांगधराशक्त्यादिधृतहस्तकाम्॥वृषभोपरिसंस्था

न्तुजटाजूटाविभूषिताम् ॥ ३४ ॥ ताराश्चविद्युद्गौराङ्गीम्पद्महस्तांशुभाननाम् ॥ वीक्ष्यसम्प्रत्ययम्प्रापज्ञानेनापितदात्मनि ॥१३५॥ ततस्तु
नारदःप्राहशृणुराजन्वचोमम ॥ नृयोनौवैष्णवीमायायुवाम्पूर्वमोहयत् ॥ ३६ ॥ तेनतेनशरीरेणशम्भुत्वन्नेक्षितन्त्वया ॥ अधुनादर्शितातेद्य
शम्भुनाशम्भुरूपता ॥ ३७ ॥ निमील्यनयनद्वन्द्वम्पुनस्त्वंयाहिमर्त्यताम् ॥ आसाद्यमानुषम्भावमादेहान्तंस्थिरोभव ॥ ३८ ॥ तथातारा
वतीदेवीतूर्णम्भवतुमानुषी ॥ और्वउवाच ॥ आत्मनोदेवरूपत्वञ्ज्ञात्वादृष्ट्वाथचक्षुषा ॥ ३९ ॥ जातसम्प्रत्ययोराजान्यमीलयतलोचने ॥
ततस्तारावतीदेवीन्यमीलयतचक्षुषी ॥ पुनस्तौमानवौजातौमहिषीनृपतिस्तथा ॥ १४० ॥ उन्मील्यतौतुनेत्राणिमानुषत्वन्तदात्मनोः ॥
दृष्ट्वाआवान्तथामर्त्यावितिज्ञानमभूत्तयोः ॥ ४१ ॥ ततोविमोहितौतौतुदम्पतीविष्णुमायया ॥ अहंराजाचमहिषीअहमित्यभवन्मतिः ॥
॥ ४२ ॥ तस्यांसुतौतुजायायान्देवांशावितितन्मती ॥ आवांस्थिताकलामूर्ध्निअभूताञ्जातचिह्नितौ ॥ ४३ ॥ ततःसराजान्यगदत्तम्मुनिन्ना
रदम्मुदा ॥ सत्यमेतत्त्वयाप्रोक्तंकरिष्येवचनन्तव ॥ ४४ ॥ पालयिष्येशम्भुपुत्रौसत्यलभ्येसदैवहि ॥ किन्त्वेतौमुनिशार्दूलत्वंसंस्कुरुयथा
विधि ॥ १४५ ॥ ॥ और्वउवाच ॥ ॥ ततस्तयोर्न्नामचक्रेनारदोवचनान्नृप ॥ ज्येष्ठोभैरवनामाभूद्भीरोःपुत्रोभयंकरः ॥ ४६ ॥ वेतालसदृशः
कृष्णोवेतालोभूत्तथापरः ॥ इतिचक्रेतयोर्न्नामदेवर्षिर्ब्रह्मणःसुतः ॥ ४७ ॥ अन्याँश्चसर्वान्तंसंस्कारान्नारदोमुनिसत्तमः ॥ चकारक्रमशोवाक्या
च्चन्द्रशेखरभूभृतः ॥ ४८ ॥ एवंसर्वान्तंसंशयांस्तुसञ्छिद्यमुनिसत्तमः ॥ संस्कृत्यभर्गतनयौविसृष्टस्तेनभूभृता ॥ ४९ ॥ ययावाकाशमार्गे
णनाकपृष्ठंसनारदः ॥ नारदेतुगतेराजामुदितश्चन्द्रशेखरः ॥ १५० ॥ तारावत्यासमंरेमेकरवीराह्वयेपुरे ॥ शम्भोरंशोहमित्येवंगौर्यास्तारा

वतीतिच ॥ ५१ ॥ जातश्चद्धस्तदाराजाशशासमुचिरंक्षितिम् ॥ तनयौचहरस्याथतदावेतालभैरवौ ॥ ५२ ॥ ववृधातेमहात्मानौशरच्चन्द्रा
विवोद्यतौ ॥ चन्द्रशेखरभूपस्यतारावत्यान्नृपोत्तम ॥५३॥ त्रयःपुत्रामहावीर्यारूपसम्पत्समन्विताः ॥ ज्येष्ठस्तत्रोपरिचरोदमनोऽलर्कएवच ॥
॥ ५४ ॥ वेतालभैरवाभ्यान्तुज्यायांसस्तेभवंस्त्रयः ॥ एवमेतेत्रयःपुत्राश्चन्द्रशेखरभूभृतः ॥ १५५ ॥ वेतालभैरवौचापिसद्योजातौहरात्म
जौ ॥ समानभोगाववृधुश्चन्द्रशेखरभूभृतः ॥ पालितास्तुसभार्येणसमानासनवाहनाः ॥ ५६ ॥ इतिपञ्चसुतामहाबलाःपञ्चभूतसदृशाःकृता
विधेः ॥ ववृधिरेप्रथमंसकलञ्जगत्समतीत्यमुदाबलदर्पिताः ॥ १५७ ॥ इतिकालिकापुराणेद्विपञ्चाशत्तमोध्यायः ॥ ५२ ॥ और्वउवाच ॥
अथकालक्रमेणैवप्रवृद्धास्तेमहाबलाः ॥ शस्त्रास्त्रज्ञानकुशलाः शास्त्रार्थपरिनिष्ठिताः ॥१॥ सम्प्राप्तयौवनादीप्तादुर्द्धर्षाःपरिपन्थिभिः ॥ धर्मा
र्थज्ञानकुशलाब्रह्मण्याःसत्यवादिनः॥२॥सदासहचरौतत्रप्रीत्यावेतालभैरवौ॥ अलर्कोदमनश्चैवतथोपरिचरस्त्रयः ॥३॥ सदासहचरानित्यम्भ्रा
तरश्चान्द्रशेखराः ॥ त्रिष्वात्मजेषुनृपतेःसदोपरिचरादिषु ॥ ४ ॥ ममत्वमधिकन्नित्यम्प्रीतिस्नेहौतथाधिकौ ॥ वेतालेभैरवेचापिचन्द्रशेखर
भूभृतः ॥५॥ नास्त्येवतादृशीप्रीतिर्यादृशीतेषुजायते ॥ नतौदृष्ट्वासुनृपतिःकदाचिच्चन्द्रशेखरः॥६॥अत्याह्लादयतेऽजस्रम्पुत्रबुद्धेचष्यतेथवा ॥
तौवीरौधर्मकुशलौमहाबलपराक्रमौ ॥ ७ ॥ त्रैलोक्यविजयेदक्षौशस्त्रास्त्रग्रामपारगौ ॥ ताभ्याम्बिभेतिचनृपःकदाकिंवाकरिष्यतः ॥ ८ ॥
वेतालभैरवावेतौमांसुताम्राज्यमेववा ॥ इतिचिन्तापरोराजानित्यमेवनिरीक्षते ॥ ९ ॥ प्रणतावपितत्पुत्रौसम्यग्वेतालभैरवौ ॥ अथोपरिचरं
राजायौवराज्येभ्यषेचयत् ॥ १० ॥ ज्यायांसमौरसम्पुत्रंसर्वराजगुणैर्युतम् ॥ यःपश्चात्सर्वभूपालान्योजयिष्यातिनीतिभिः ॥ ११ ॥ राजो

परिचरोनामसर्वशास्त्रार्थपारगः ॥ दमनायददौदायंतथालर्कायभूमिभृत् ॥ १२ ॥ प्रभूतधनरत्नानितथासनरथान्बहून् ॥ तावंतिनददौताभ्या
न्दायवित्तानिभागशः ॥ १३ ॥ वेतालभैरवाभ्यान्तुततस्तौमन्युराविशत् ॥ मन्युनाभिपरीतौतौविचरन्तावितस्ततः ॥ १४ ॥ नभोगमी
प्सतांवीरौतपसेचकृतोद्यमौ ॥ अनूढभार्यौसततन्निर्जनेवसतःसदा ॥ १५ ॥ तथाभूतौतदापुत्रौदेवौवैतालभैरवौ ॥ बुबुधेचिन्तयाक्रान्ता
देवीतारावतीतदा ॥ १६ ॥ राजोपरिचराद्भीतापत्युश्चचन्द्रशेखरात् ॥ नोवाचकिञ्चित्सुदतीछन्नन्तौबोधयत्यपि ॥ १७ ॥ एतस्मिन्नन्तरे
विद्वान्कापोतोमुनिसत्तमः ॥ चित्रांगदासंगभोगीसन्तुष्टःसुरतोत्सवैः ॥ १८ ॥ चित्रांगदाम्परित्यज्यसपुत्रांसहचारिणीम् ॥ इयेषगन्तुंस
प्रोचेतदाचित्रांगदांवचः ॥ १९ ॥ मुनिरुवाच ॥ चित्रांगदेतपस्तप्तुंगमिष्यामितपोवनम् ॥ किन्तेप्रियंकरोमीहतन्मेवदमनोहरे ॥ २० ॥
चित्रांगदोवाच ॥ तुम्बुरुश्चसुवर्चाश्चतनयौतवसुव्रत ॥ एतयोस्त्वम्मुनिश्रेष्ठप्रियंकुरुयथोचितम् ॥ २१ ॥ माञ्चापिभगिनीगेहेसंस्थाप्याद्विज
सत्तम ॥ तदातपोवनंगच्छयदितेरोचतेनघ ॥२२॥ इतिश्रुत्वावचस्तस्याःकापोतोमुनिसत्तमः ॥ हिरण्यार्थान्तामालोच्यकुबेरसदनंययौ ॥
॥ २३ ॥ प्रार्थयित्वाकुबेरन्तुसुवर्णानांशतानिषट् ॥ निष्काणान्तुसहस्राणिसलेभेमुनिसत्तमः ॥ २४ ॥ शतम्भाराँश्चरत्नानामानीयचसवी
र्वधैः ॥ पुत्राभ्याम्प्रददौविप्रोभार्यायैचविशेषतः ॥ २५ ॥ ततस्तांसहपुत्राभ्यान्तैर्द्धनैरपिभूरिभिः ॥ चित्रांगदामतेनाथपुत्रयोरपिसम्मते ॥
॥ २६ ॥ सुवर्चसन्तुम्बुरुञ्चतथाचित्रांगदामपि ॥ आमन्त्र्यमुनिशार्दूलःकरवीरपुरंययौ ॥ २७ ॥ तत्रगत्वासकापोतोराजानञ्चन्द्रशेखरम् ॥

१ विषधीवपद्मन्दौउभयतोवद्धशिक्येस्कन्धौलेकाष्ठवर्तेतेइतिदीक्षितः ।

राजोपरिचरश्चैववाक्यमेतदुवाचह ॥ २८ ॥ इयंककुत्स्थजाभूपतवैवविदितापुरा ॥ सद्योजातौतथैवास्यामेतौमेतनयौशुची ॥ २९ ॥ एभि
र्वित्तैःसमम्पुत्रौममत्वम्प्रतिपालय ॥ राजोपरिचरश्चापिपालयत्विहमेसुतौ ॥ ३० ॥ अपुत्रस्यनृपःपुत्रोनिर्धनस्यधनन्नृपः ॥ अमातुर्जननी
राजाह्यतातस्यपितानृपः ॥ ३१ ॥ अनाथस्यनृपोनाथोह्यभर्तुःपार्थिवःपतिः ॥ अभृत्यस्यनृपोभृत्योनृपएवनृणांसखा ॥ ३२ ॥ सर्वदेवमयो
राजातस्मात्त्वामर्थयेनृप ॥ ॥ और्वउवाच ॥ ॥ ततःसराजातम्प्राहमुनिमेवन्द्विजोत्तमम् ॥ ३३ ॥ करिष्येत्वद्वचश्चाहंराजोपरिचर
श्चसः ॥ अथचित्रांगदांराजाजग्राहमुनिसम्मते ॥ ३४ ॥ सुतौचतस्यसधनौज्यायसेसूनवेददौ ॥ सचोपरिचरःप्रादाद्राज्यमर्द्धंसुवर्चसे ॥
॥ ३५ ॥ तथैवसचिवाध्यक्षमकरोत्तुम्बुरुन्तदा ॥ कापोतश्चापिसुप्रीतःपुत्रर्द्धिंसमवेक्ष्यच ॥ ३६ ॥ जगामामन्त्र्यनृपतिंतपसेचतपोवनम् ॥
पथिगच्छन्त्सकापोतःशम्भुपुत्रौमनोहरौ ॥ ३७ ॥ एकाकिनौचरन्तौतुसूर्याचन्द्रमसाविव ॥ तयोर्ददर्शचतदावदनेवानराकृती ॥ ३८ ॥
स्मृत्वापूर्वकथान्दृष्ट्वातावपृच्छत्तपोधनः ॥ कौयुवांदेवगर्भाभौचरन्तौविजनेपथि ॥ ३९ ॥ एकाकिनौनरश्रेष्ठौतन्मेवदतमीरितम् ॥ अथतौ
प्रणिपत्यैनंसम्भाष्यचसमञ्जसम् ॥ ४० ॥ कापोताख्यम्मुनिश्रेष्ठमूचतुःशंकरात्मजौ ॥ चन्द्रशेखरपुत्रौनौतारावत्यांसमुद्भवौ ॥ ४१ ॥
विद्धित्वम्मुनिशार्दूलप्रणमावःपदन्तव ॥ अवज्ञांवीक्ष्यनृपतेरावयोःसततम्मुने ॥४२॥ एकाकिनौनिर्जनेषुभ्रमावोमन्युनासदा ॥ किमर्थमात्म
जौपुत्रौप्रणतौसततन्नृपः ॥ ४३ ॥ अवज्ञायमहामागदायमात्रन्नदित्सति ॥ तस्मादावान्तपस्तप्तुमिच्छावोद्विजसत्तम ॥ ४४ ॥ उपदेश
प्रदानेनचानुगृह्णातिचेद्भवान् ॥ ततस्तयोर्वचःश्रुत्वाप्रहस्यमुनिसत्तमः ॥ ४५ ॥ भूतभव्यभवज्ज्ञानस्ताविदम्मुनिरब्रवीत ॥ ॥ मुनिरुवा

च ॥ ॥ नयुवान्तनयौतस्यचन्द्रशेखरभूपतेः ॥ ४६ ॥ तारावत्यांसमुत्पन्नौभवन्तौशंकरात्मजौ ॥ सद्योजातौमहावीर्यौवेतालत्वेचसम्मतौ ॥ ४७ ॥ भृंगिमहाकालसंज्ञौशापाद्धरणिमागतौ ॥ युवयोरत्रतेनैवनदायन्दित्सतिप्रियम् ॥ ४८ ॥ गच्छतंशरणन्तातंशंकरंवृषभध्वजम् ॥ सएवयुवयोःसर्वंकरिष्यतिमहेश्वरः ॥ ४९ ॥ किंवात्युग्रेणतपसाचिरकालफलेनवै ॥ इत्युक्त्वामुनिशार्दूलःकापोतःपरमात्मधृक् ॥ ५० ॥ भूतभव्यभवज्ज्ञानस्ताभ्यांसर्वमथोचिवान् ॥ यथाभृंगिमहाकालौशप्तावत्रनिमागतौ ॥ ५१ ॥ यथाहरश्चगौरीचपृथिवीमागतौनृप ॥ तारावती यथाशप्तातेनैवमुनिनापुरा ॥ ५२ ॥ यथातौचसमुत्पन्नौतारावत्युदरेपुरा ॥ यथावानारदेनैवसंशयच्छेदनन्नृपे ॥ ५३ ॥ तत्सर्वंकथया मासपुत्राभ्यांगिरिशस्यतु ॥ तच्छ्रुत्वातौमहात्मानौतदावेतालभैरवौ ॥ ५४ ॥ मुदापरमयायुक्तौबभूवतुरनिन्दितौ ॥ मोदपूर्णौतदाभूत्वा सिक्ताविवसुधारसैः ॥ ५५ ॥ पुनःपप्रच्छकापोतंवेतालोभैरवोपिच ॥ पितावयोर्महादेवस्त्वयासत्यमितीरितम् ॥ ५६ ॥ सोर्चनीयो यथावाभ्यांसिद्ध्येमुनिसत्तम ॥ आवाभ्यांचयथाराध्योयत्रवाराधितोहरः ॥ ५७ ॥ प्रसादमेष्यत्यचिरात्तन्नौवदमहामते ॥ धन्याव नुगृहीतौनौयत्त्वयामुनिसत्तम ॥ ५८ ॥ विज्ञापितमिदंसर्वंहृच्छल्यञ्चोद्धृतंचनौ ॥ पुनरावान्दयस्वत्वंकृपामयमुनीश्वर ॥ ५९ ॥ प्राप्स्यावोनचिराद्भर्गंयथावदतथैवनौ ॥ ॥ मुनिरुवाच ॥ ॥ शृणुतंकथयाम्यद्ययत्रचाराधितोहरः ॥ ६० ॥ नचिरादेवभवतोराया स्यतिसमक्षताम् ॥ नित्यंयत्रमहादेवोवसन्भवतितुष्टये ॥ ६१ ॥ युवान्तत्सम्प्रवक्ष्यामिस्थानंगुह्यम्प्रकाशितम् ॥ वाराणसीना मपुरीगङ्गातीरेमनोहरे ॥ ६२ ॥ वरणायास्तथाचासेर्मध्येचापाकृतिःसदा ॥ स्वयंवृषध्वजस्तत्रनित्यंवसतियोगिनाम् ॥ ६३ ॥ सदाप्रीतिक

रोयोगीस्वयञ्चाप्यात्माचिन्तकः ॥ वियत्स्थासापुरीनित्यन्भर्गयोगबलाद्धृता ॥ ६४ ॥ दिव्यज्ञानन्ददात्येषातत्रयोम्रियतेनरः ॥ तस्मैस्वय
म्महादेवःसंसारग्रन्थिमुक्तये ॥ ६५ ॥ सभूत्वापरमोयोगीमृतस्तत्रभवान्तरे ॥ सुलभेनैवनिर्वाणमाप्नोतिहरसम्मतः ॥ ६६ ॥ योगयुक्तोमहा
देवःपार्वत्यासहितःसदा ॥ देवगन्धर्वयक्षाणाम्मानुषाणाञ्चनित्यशः ॥ ६७ ॥ ज्ञेयोहरःप्रकाशश्चक्षेत्रन्तच्चप्रकाशितम् ॥ नतत्रकामदोदेवो
नाचिराच्चप्रसीदति ॥ ६८ ॥ आराधितश्चिरम्प्रीत्यानिर्वाणायप्रसीदति ॥ गौर्य्याविवर्जितासातुपुरीतत्रनगच्छति ॥६९॥ योगस्थानम्महाक्षे
त्रंकदाचिदपिशांकरी ॥ आसन्नंयुवयोःक्षेत्रमिदंवाराणसीतुयत् ॥ ७० ॥ कथितन्नातिदूरेचवर्त्ततेनरसत्तमौ ॥ अपरन्तुप्रवक्ष्यामिगुह्यम्पीठं
सदार्च्चितम् ॥ ७१ ॥ हरगौरीसमायुक्तम्परन्धर्मार्थकामदम् ॥ तपसाचातितीव्रेणचिराद्भवतिमोक्षदम् ॥ ७२ ॥ नचिरात्कामदम्पुण्यंक्षेत्र
म्पीठन्निगद्यते ॥ चिरात्तुकामदोदेवोनाचिराद्यत्रज्ञानदः ॥ ७३ ॥ तत्क्षेत्रमितिलोकेषुगद्यतेपूर्ववन्दिभिः ॥ कामरूपम्महापीठंगुह्याद्गुह्यतमम्प
रम् ॥ ७४ ॥ सदासन्निहितस्तत्रपार्वत्यासहशंकरः ॥ नचिरात्पूजितोदेवस्तस्मिन्पीठेप्रसीदति ॥ ७५ ॥ पार्वतीचानुगृह्णातिभर्गभक्तन्तुतत्र
वै ॥ ददातिनचिरात्कामम्भक्तायपरमेश्वरः ॥७६॥ तत्तुपीठम्प्रवक्ष्यामिशृणुतंसाम्प्रतंयुवाम् ॥ करतोयानदीपूर्वंयावद्दिक्करवासिनीम् ॥७७॥
त्रिंशद्योजनविस्तीर्णंयोजनैकशतायतम् ॥ त्रिकोणंकृष्णवर्णञ्चप्रभूताचलपूरितम् ॥ ७८ ॥ नदीशतसमायुक्तंकामरूपम्प्रकीर्तितम् ॥
शम्भुनेत्राग्निनिर्दग्धःकामःशम्भोरनुग्रहात् ॥७९॥ तत्ररूपंयतःप्रापकामरूपन्ततोभवत् ॥ तस्यपीठस्यवायव्यान्नैर्ऋत्याम्मध्यभागतः ॥८०॥
ऐशान्याञ्चतथाग्नेय्याम्मध्येपार्श्वेचशंकरः ॥ स्वमाश्रमपदंकृत्वापट्सुस्थानेषुशोभनम् ॥ ८१ ॥ नित्यंवसतितत्रापिपार्वत्यासहनर्मभिः ॥

मध्येदेवीगृहन्तत्रतदधीनस्तुशंकरः ॥ ८२ ॥ नीलाख्येपर्वतश्रेष्ठेपार्वतीतत्रतिष्ठति ॥ ऐशान्यान्नाटकेशैलेशंकरस्यमहाश्रमः ॥ ८३ ॥ नि
त्यंवसतितत्रेशस्तदधीनाचपार्वती ॥ अपरेचाश्रमाःसन्तिहरगौर्योःसदातनाः ॥ ८४ ॥ नैतयोःसदृशःकोपिविद्यतेशंकराश्रमः ॥ यत्राराध्यो
महादेवोभवद्भ्यान्नरसत्तमौ ॥ ८५ ॥ तत्स्थानम्मनसादायप्रसादयवृषध्वजम् ॥ वेतालभैरवावूचतुः ॥ कामरूपङ्गमिष्यावोरहस्यन्नाटकाचल
म् ॥ ८६ ॥ गौरीहरौस्थितौयत्रनित्यंसन्निहितौमुने ॥ आराधनीयोभूतेशोह्यवश्यमिहचावयोः ॥ ८७ ॥ यथैवाराधयिष्यावस्तथाचक्ष्वद्वि
जोत्तम ॥ येनमन्त्रेणवादेवोनचिरात्तुप्रसीदति ॥ ८८ ॥ तत्त्वंवदमहाभागानुग्रहोस्त्यावयोर्यदि ॥ ॥ ऋषिरुवाच ॥ ॥ नाटकम्पर्वत
श्रेष्ठंगच्छतन्नरसत्तमौ ॥ ८९ ॥ तत्रनित्यम्महादेवोरमतेऽपर्णयासह ॥ सन्ध्याचलेतत्रमुनिराराधयतिशंकरम् ॥ ९० ॥ वशिष्ठोब्रह्मणःपुत्र
स्तंयुवामनुगच्छतम् ॥ सचमन्त्रंसतन्त्रञ्चहराराधनकर्माणि ॥ ९१ ॥ ज्ञापयिष्यतिवाम्पृष्टःकिलवेतालभैरवौ ॥ तपसेगन्तुमिच्छामिनेदा
नीङ्कालयापना ॥ ९२ ॥ युज्यतेममतस्मान्मान्त्यजतंवीरसत्तमौ ॥ एवमुक्त्वामुनिश्रेष्ठःकापोतः प्रययौवनम् ॥ ९३ ॥ तौतम्मुनिन्नमस्कृ
त्यजग्मतुर्भवनान्निजम् ॥ अथतौसमयंकृत्वादीक्षितौतपसेतदा ॥९४॥ पितरावप्यनुज्ञाप्यभ्रातॄनन्यांश्चबान्धवान् ॥ प्रस्थानंकामरूपायचक्र
तुस्तौमहामती ॥ ९५ ॥ तौगच्छन्तौपरिज्ञायशंकरोपिसहोमया ॥ देवान्त्सर्वानुवाचेदंसान्त्वयन्निवसेन्द्रकान् ॥ ९६ ॥ ईश्वरउवाच ॥ ॥
पुत्रौमेतपसेयातःसाम्प्रतंसुरसत्तमाः ॥ ममाराधनचित्तौतुतौदयध्वंसुरेश्वराः ॥ ९७ ॥ संस्कृत्यतपसाचैतौपुत्रौवेतालभैरवौ ॥ गाणपत्ये
नियोक्ष्यामितौसंस्कुर्वन्तुनिर्जराः॥९८॥ अनेनैवशरीरेणतौगणेशत्वमाप्स्यतः ॥ तपसातुतयोःकायौभावन्त्यक्त्वातुमानुषम् ॥९९॥यथाप्रुतः

सौरभावंविधास्यामिह्यहन्तथा ॥ इत्युक्त्वावामदेवोपिपार्वत्यासहपुत्रकौ ॥१००॥ गच्छन्तौवियतास्नेहात्पश्चादनुययौशिवः ॥ शक्राद्यास्त्रिद
शाःसर्वेदिक्पालाश्चतथापरे ॥ १ ॥ सर्वेहरश्चानुजग्मुरनुगच्छन्तमात्मजौ ॥ अथतौतुनदीम्प्राप्यकृष्णाजिनधरौतदा ॥ २ ॥ आदायतापस
म्भावंगंगातुल्यान्दृषद्वतीम् ॥ तपस्विनौतौदेवेनत्र्यम्बकेनाथपालितौ ॥३॥ देवैःसहतदायातौकामरूपाह्वयाश्रमम् ॥ आसाद्यकामरूपन्तु
करतोयानदीजले ॥ ४ ॥ उपस्पृश्यततस्तौतुनन्दिकुण्डन्नृपोत्तम ॥ तत्रस्नात्वाप्युपस्पृश्यनदीङ्गत्वाजटोद्भवाम् ॥ १०५ ॥ तत्राप्युपस्पृश्य
चतौनन्दिनन्तपसाधृतम् ॥ प्रणम्यजल्पिपन्देवञ्जग्मतुर्नाटकाचलम् ॥ ६ ॥ नाटकाचलमासाद्यप्रणम्यवृषभध्वजम् ॥ आराधनोपदेशा
यकापोतकवचःस्मरौ ॥ ७ ॥ जग्मतुर्दक्षिणांकाष्ठांयत्रसन्ध्याचलःस्थितः ॥ कान्तानामनदीतत्रवशिष्ठेनावतारिता ॥ ८ ॥ तस्यास्तीरे
महाशैलःस्निग्धच्छायलतातरुः ॥ सन्ध्यांवशिष्ठःकृतवाँस्तत्रयस्माद्विधेःसुतः ॥ ९ ॥ अतःसन्धाचलन्नामतस्यगायन्तिदेवताः ॥ तत्रासा
द्यवशिष्ठन्तुसाक्षादिवहुताशनम् ॥ ११० ॥ आराधयन्तांगिरिशंध्यानसंयुक्तमानसम् ॥ तपःश्रियादीप्यमानन्द्वितीयमिवभास्करम् ॥ ११ ॥
प्रणम्यपुरतस्तस्यतदावेतालभैरवौ ॥ प्राञ्जलीतस्थतुर्भूपविनयातकन्धरौ ॥ १२ ॥ इदञ्चाप्यूचतुस्तौतुप्रणमन्तौविधेःसुतम् ॥ तारावत्यांस
सुतपन्नौचन्द्रशेखरभूभृतः ॥ १३ ॥ क्षेत्रेभर्गस्यतनयावावाञ्जानीहिमानुषौ ॥ आराधयितुमिच्छावोहरंकार्यस्यसिद्धये ॥ १४ ॥ वाञ्छित
स्ययदित्वन्नावनुगृह्णासिसुव्रत ॥ तयोस्तद्वचनंश्रुत्वावाशिष्ठोमुनिसत्तमः ॥ ११५ ॥ उवाचेतियुवाञ्ज्ञातौमयासत्यंहरात्मजौ ॥ हरस्याराध
नंकार्यंयुवयोर्नरसत्तमौ ॥१६॥ तत्रास्तिममकृत्यंकिन्तद्वापतमनिन्दितौ॥वृषध्वजाराधनायुवयोस्तुप्रयोजनम् ॥१७॥ विद्यतेतन्निमित्तंयत्त

सौरभावंविधास्यामिह्यहन्तथा ॥ इत्युक्त्वावामदेवोपिपार्वत्यासहपुत्रकौ ॥१००॥ गच्छन्तौवियतास्नेहात्पश्चादनुययौशिवः ॥ शक्राद्यास्त्रिद
शाःसर्वेदिक्पालाश्चतथापरे ॥ १ ॥ सर्वेहरश्चानुजग्मुरनुगच्छन्तमात्मजौ ॥ अथतौतुनदीम्प्राप्यकृष्णाजिनधरौतदा ॥ २ ॥ आदायतापस
म्भावंगंगातुल्यान्दृषद्वतीम् ॥ तपस्विनौतौदेवेनत्र्यम्बकेनाथपालितौ ॥३॥ देवैःसहतदायातौकामरूपाह्वयाश्रमम् ॥ आसाद्यकामरूपन्तु
करतोयानदीजले ॥ ४ ॥ उपस्पृश्यततस्तौतुनन्दिकुण्डन्नृपोत्तम ॥ तत्रस्नात्वाप्युपस्पृश्यनदीङ्गत्वाजटोद्भवाम् ॥ १०५ ॥ तत्राप्युपस्पृश्य
चतौनन्दिनन्तपसाधृतम् ॥ प्रणम्यजलिपपन्देवञ्जग्मतुर्नाटकाचलम् ॥ ६ ॥ नाटकाचलमासाद्यप्रणम्यवृषभध्वजम् ॥ आराधनोपदेशा
यकापोतकवचःस्मरौ ॥ ७ ॥ जग्मतुर्दक्षिणांकाष्ठांयत्रसन्ध्याचलःस्थितः ॥ कान्तानामनदीतत्रवशिष्ठेनावतारिता ॥ ८ ॥ तस्यास्तीरे
महाशैलःस्निग्धच्छायलतातरुः ॥ सन्ध्यांवशिष्ठःकृतवाँस्तत्रयस्माद्विधेःसुतः ॥ ९ ॥ अतःसन्धाचलन्नामतस्यगायन्तिदेवताः ॥ तत्रासा
द्यवशिष्ठन्तुसाक्षादिवहुताशनम् ॥ ११० ॥ आराधयन्तांगिरिशंध्यानसंयुक्तमानसम् ॥ तपःश्रियादीप्यमानन्द्वितीयमिवभास्करम् ॥ ११ ॥
प्रणम्यपुरतस्तस्यतदावेतालभैरवौ ॥ प्राञ्जलीतस्थतुर्भूपविनयातकन्धरौ ॥ १२ ॥ इदञ्चाप्यूचतुस्तौतुप्रणमन्तौविधेःसुतम् ॥ तारावत्यांस
मुत्पन्नौचन्द्रशेखरभूभृतः ॥ १३ ॥ क्षेत्रेभर्गस्यतनयावावाञ्जानीहिमानुषौ ॥ आराधयितुमिच्छावोहरंकार्यस्यसिद्धये ॥ १४ ॥ वाञ्छित
स्ययादित्वन्नावनुगृह्णासिसुव्रत ॥ तयोस्तद्वचनंश्रुत्वावशिष्ठोमुनिसत्तमः ॥ ११५ ॥ उवाचेतियुवाञ्ज्ञातौमयासत्यंहरात्मजौ ॥ हरस्याराध
नंकार्ययुवयोर्नरसत्तमौ ॥१६॥ तत्रास्तिममकृत्यंकिन्तद्भापतमनिन्दितौ॥वृषध्वजाराधनाययुवयोस्तुप्रयोजनम् ॥१७॥ विद्यतेतन्निमित्तंयत्त

त्सिद्धमितिचिन्त्यताम्॥वेतालभैरवावूचतुः॥येनमन्त्रेणनचिरात्सम्यगाराधितोहरः ॥१८॥ प्रसादमेष्यत्यवनौतन्नौवदमहामुने॥ यथाचाराध
यिष्यावस्तन्त्रंयद्यादृशःक्रमः ॥१९॥ तत्सर्वम्मुनिशार्दूलवक्तुमर्हसिचोत्तरम् ॥ यथात्वदुपदेशेनप्राप्स्यावोनचिराद्धरम् ॥ १२० ॥ तथाचावा
म्मुनिश्रेष्ठह्यनुशाधिनतौत्वयि ॥ ॥ वशिष्ठउवाच ॥ ॥ प्रसन्नएवभवतोर्वृषकेतुःसहोमया ॥ २१ ॥ नचिरात्स्वयमेवात्रप्रसादश्चसमे
प्यति ॥ सर्वैर्देवगणैःसार्द्धंसभार्योवृषभध्वजः ॥२२॥आकाशमार्गेणायातःपालयन्तस्वसुतौगृहात् ॥ किन्तुमानुषदेहौवामाधिवास्यतपोव्रतैः॥
॥ २३ ॥ स्वयन्नेष्यतिकैलासंगाणपत्येनियोज्यवाम् ॥ अहञ्चाप्युपदेक्ष्यामियथाभर्गयुवान्द्रुतम् ॥ २४ ॥ प्राप्स्यथःपार्वतीपुत्रावेकाग्रंशृणु
तन्तुतत् ॥ चिरात्प्रसीदतिध्यानान्नचिराद्ध्यानपूजनात् ॥ १२५॥ तस्माद्ध्यानम्पूजनञ्चकथयाम्यद्यतत्त्वतः ॥ तेजोमयःसदाशुद्धोज्ञानामृ
ताविवर्द्धितः ॥ २६ ॥ जगन्मयश्चिदानन्दःशौरिब्रह्मस्वरूपधक् ॥ महादेवोमहामूर्त्तिर्महायोगयुतःसदा ॥ २७ ॥ जगन्तितस्यरूपाणिता
निकोगदितुंक्षमः ॥ किन्तुयैरिहरूपैस्तुविचरत्येषशंकरः ॥ २८ ॥ तेषांयन्मेज्ञानगम्यन्तत्रेष्टन्निगदामिवाम् ॥ प्रथमंशृणुतम्मन्त्रन्ततोनुध्या
नगोचरम् ॥ २९ ॥ ततःक्रमन्तुपूजायाःक्रमाद्वृत्तन्नरर्षभौ ॥ समस्तानांस्वराणान्तुदीर्घाःशेषाःसबिन्दुकाः ॥ १३० ॥ ऋलृशून्याःसार्द्ध
चन्द्राउपान्तेनाभिसंहिताः ॥ एभिःपञ्चाक्षरैर्मन्त्रम्पञ्चवक्त्रस्यकीर्तितम् ॥ ३१ ॥ क्रमात्सम्मदसन्दोहनादगौरवसञ्ज्ञकाः ॥ प्रासादस्तुभवे
च्छेषःपञ्चमन्त्राःप्रकीर्त्तिताः ॥ ३२ ॥ एकैकेनतथैकैकंवक्त्रम्मन्त्रेणपूजयेत् ॥ एकंसमुदितंकृत्वापञ्चभिर्वाप्रपूजयेत् ॥ ३३ ॥ प्रासादेनाथ
वापञ्चवक्त्रन्देवम्प्रपूजयेत् ॥ सम्मदादिषुमन्त्रेषुप्रासादस्तुप्रशस्यते ॥ ३४॥ शम्भोःप्रसादनैनैषयस्माद्वृत्तस्तुमन्त्रकः ॥ तेनप्रासादसंज्ञोयं

कथ्यतेमुनिसत्तमैः ॥ १३५ ॥ तस्मात्सर्वेषुमन्त्रेषुप्रासादःप्रीतिदःपरः ॥ आमोदकारकःशम्भोर्मन्त्रःसम्मदउच्यते ॥ ३६ ॥ मनःप्रपूरणा
च्चापिसन्दोहःपरिकीर्त्तितः ॥ आकर्षकोभवेन्नादोगुरुत्वाद्गौरवाह्वयः ॥ ३७ ॥ एतद्व्यस्तंसमस्तञ्चमन्त्रंशम्भोःप्रकीर्त्तितम् ॥ पञ्चाक्षरन्तुयन्म
न्त्रम्पञ्चवक्त्रस्यकीर्त्तितम् ॥ ३८ ॥ युवान्तेनैवमन्त्रेणआराधयतमीश्वरम् ॥ ध्यानंवक्ष्यामिशृणुतंसम्यग्वेतालभैरवौ ॥ ३९ ॥ पञ्चवक्त्रम्म
हाकायञ्जटाजूटविभूषितम् ॥ चारुचन्द्रकलायुक्तम्मूर्ध्निव्यालौघभूषितम् ॥ १४० ॥ बाहुभिर्दशभिर्युक्तंव्याघ्रचर्मवराम्बरम् ॥ कालकूटधर
ङ्कण्ठेनागहारोपशोभितम् ॥ ४१ ॥ किरीटबन्धनम्बाहुभूषणञ्चभुजंगमान् ॥ बिभ्रतंसर्वगात्रेषुज्योत्स्नार्पितसुरोचिषम् ॥ ४२ ॥
भूतिसंलिप्तसर्वांगमेकैकत्रित्रिभिस्त्रिभिः ॥ नेत्रैस्तुपञ्चदशभिर्ज्योतिष्मद्भिर्विराजितम् ॥ ४३ ॥ वृषभोपरिसंस्थन्तुगजकृत्तिपरिच्छदम् ॥
सद्योजातंवामदेवमघोरञ्चततःपरम् ॥ ४४ ॥ तत्पुरुषन्तथेशानम्पञ्चवक्त्रम्प्रकीर्त्तितम् ॥ सद्योजातम्भवेच्छुक्लंशुद्धस्फटिकसन्निभम् ॥
॥ १४५ ॥ पीतवर्णन्तथासौम्यंवामदेवम्मनोहरम् ॥ नीलवर्णमघोरन्तुदंष्ट्राभीतिविवर्द्धनम् ॥ ४६ ॥ रक्तन्तत्पुरुषन्देवन्दिव्यमूर्त्तिम्मनो
हरम् ॥ श्यामलञ्चतथेशानंसर्वदैवशिवात्मकम् ॥ ४७ ॥ चिन्तयेत्पश्चिमेत्वाद्यन्द्वितीयन्तुतथोत्तरे ॥ अघोरन्दक्षिणेदेवम्पूर्वंतत्पुरु
षन्तथा ॥ ४८ ॥ ईशानंमध्यतोज्ञेयाश्चिन्तयेद्भक्तितत्परः ॥ शक्तित्रिशूलखट्वाङ्गवरदाभयदंशिवम् ॥ ४९ ॥ दक्षिणेष्वथहस्तेषुवामेष्व
पिततःशुभम् ॥ अक्षसूत्रम्बीजपूरम्भुजगण्डमरूत्पलम् ॥ १५० ॥ अष्टैश्वर्यसमायुक्तन्ध्यायेत्तुहृद्गतंशिवम् ॥ एवंविचिन्तयेद्ध्यानेमहा

१ दधानमितिशेषः ।

देवञ्जगत्पतिम् ॥ ५१ ॥ चिन्तयित्वाद्वारपालान्गणेशादीन्प्रपूजयेत् ॥ विशुद्धिम्पञ्चभूतानाञ्चिन्तयित्वाततोमुहुः ॥ ५२ ॥ अष्टमूर्तीस्ततः
पश्चात्पूजयेदष्टनामभिः ॥ आसनानिचतस्याथपूजयेत्सकलानितु ॥ ५३ ॥ भावादीन्यष्टपुष्पाणिहृद्देवविनियोजयेत् ॥ नाराचमुद्रयातस्य
ताडनम्परिकीर्तितम् ॥ ५४ ॥ विसर्जनन्धेनुमुद्रान्दर्शयित्वाविधानतः ॥ निर्माल्यधारिणङ्कुर्य्यात्सदाचण्डेश्वरन्धिया ॥ १५५ ॥ प्रत्ये
कम्पञ्चभिर्मन्त्रैरङ्गादीनिप्रमार्जयेत् ॥ सम्मंदादिभिरेतस्यपूर्वोक्तैर्न्नरसत्तमौ ॥ ५६ ॥ बालाञ्ज्येष्ठान्तथारौद्रीङ्कालीञ्चतदनन्तरम् ॥ कल
विकरिणीन्देवीम्बलप्रमाथिनीन्तथा ॥ ५७ ॥ दमनींसर्वभूतानाम्मनोन्मथिनीन्तथैवच ॥ अष्टौताःपूजयेद्देवीःक्रमाच्छम्भोश्चप्रीतये ॥ ५८ ॥
एवंशिवम्पूजयित्वाध्यानतत्परमानसः ॥ जपेन्मालांसमादायमन्त्रन्ध्यात्वातथागुरुम् ॥ ५९ ॥ एकम्पञ्चाक्षरम्मन्त्रमेकम्प्रासादमेववा ॥
तत्सक्तमनसौजप्त्वाशीघ्रांसिद्धिमवाप्स्यथ ॥ १६० ॥ इतिवाङ्कथितम्मन्त्रन्ध्यानपूजाक्रमन्तथा ॥ गच्छतन्नाटकंशैलन्तत्राराधयतंहरम् ॥
॥ ६१ ॥ वेतालभैरवावूचतुः ॥ पञ्चाक्षरस्तुमन्त्रोयन्धृतस्त्वत्सम्मतेमुने ॥ अनेनैवहरन्देवम्पूजयिष्यावहेमुदा ॥ ६२ ॥ इत्युक्त्वा
तन्नमस्कृत्यतदावेतालभैरवौ ॥ जग्मतुर्न्नाटकंशैलंवशिष्ठानुमतेनृप ॥ ६३ ॥ तत्रास्तिसरसीरम्यासुसम्पूर्णमनोहरा ॥ सर्वदास्वच्छसलिलाप्र
फुल्लकमलोत्पला ॥ ६४ ॥ तस्यास्तीरेतुविपुलःसुमनोज्ञोहराश्रमः ॥ सर्वदादानवैर्द्देवैः किन्नरैःप्रमथैस्तथा ॥ १६५ ॥ रक्ष्यतेनृपशार्दूलनृत्य
वादनतत्परैः ॥ यस्मान्नटतितत्रेशोनित्यङ्कौतुकतत्परः ॥ ६६ ॥ तस्मान्नाटकनाम्नासौशैलराजःप्रगीयते ॥ छत्राकारन्तुतंशैलम्मनोज्ञंशङ्कर
प्रियम् ॥ ६७ ॥ आसाद्ययत्रसरसीतत्रगत्वातुतौतदा ॥ नचैवापश्यतान्तत्रहराश्रममनुत्तमम् ॥ ६८ ॥ गन्तुञ्चैवाश्रमस्थानंतौनैवाशकता

नृप ॥ ततोहरम्प्रणम्याशुतस्यैवसरसस्तटे ॥ ६९ ॥ निर्मायस्थण्डिलञ्चारुवशिष्ठोक्तक्रमेणतु ॥ हरमारादुमारेभेवेतालोभैरवोपिच ॥ १७० ॥
आराधयन्तौभूतेशन्तौतदाशंकरात्मजौ ॥ दृष्ट्वाहरोदेवगणैःसार्द्धन्तस्मिंस्तुपर्वते ॥ ७१ ॥ अधित्यकायांन्यवसत्स्वाश्रमेऽपर्णयासह ॥
अधोभागेसरस्तीरेतपस्यन्तौहरात्मजौ ॥ ७२ ॥ स्थितौदृष्ट्वादेवगणैःसहितःशंकरःस्थितः ॥ नृत्यमर्दलशब्दोयोहरस्यसततम्भवेत् ॥
॥ ७३ ॥ शृणुतस्तौतदाशब्दंगन्तुन्द्रष्टुन्नलभ्यते ॥ हरेणाधिष्ठितः शैलःसर्वदेवगणैःसह ॥ ७४ ॥ राजतेस्मतदाभूपसुधर्मावासवी
यथा ॥ ध्यायतोस्तुतदातत्रभगवान्वृषभध्वजः ॥ १७५ ॥ नचिरादेवतस्याभूद्ध्यानमार्गेषुनिश्चलः ॥ तौपूजयन्तौगच्छन्तौ
स्थितौवाचन्द्रशेखरम् ॥ ७६ ॥ नैवतत्यजतुश्चित्तैःकदाचिदपिभूमिप ॥ पञ्चाक्षरेणमन्त्रेणपूजयन्तौवृषध्वजम् ॥ ७७ ॥ व्यति
चक्रमतुस्तौतुसहस्रम्परिवत्सरान् ॥ निराहारौयताहारौहरसंसक्तमानसौ ॥ ७८ ॥ तपसानिन्यतुर्वर्षान्त्सहस्रञ्चैकवर्षवत् ॥ गतेवर्ष
सहस्रेतुस्वयमेववृषध्वजः ॥ ७९ ॥ प्रसन्नस्तुतयोर्भूत्वाप्रत्यक्षत्वमुपागतः ॥ तन्तुप्रत्यक्षतोदृष्ट्वातदावेतालभैरवौ ॥ १८० ॥ वृषध्व
जन्तुष्टुवतुर्ध्यानगम्यम्पुरः स्थितम् ॥ हररूपंयथाध्यातंदृद्गतन्तेजसोज्ज्वलम् ॥ ८१ ॥ तथादृष्ट्वाततस्ताभ्यांवशिष्ठोमनसानुतः ॥ वेता
लभैरवावूचतुः ॥ पञ्चवक्त्रम्महाकायंसर्वज्ञानमयम्परम् ॥ ८२ ॥ संसारसागरत्राणम्प्रणमावोवृषध्वजम् ॥ त्वम्परःपरमात्माचपरेशःपुरुषो
त्तमः ॥ ८३ ॥ त्वंकूटस्थोजगद्व्यापीप्रधानः परमेश्वरः ॥ रूपात्मात्वम्महातत्त्वन्तत्त्वज्ञानालयःप्रभुः ॥ ८४ ॥ सांख्ययोगालयःशुद्धो
गुणत्रयविभागवित् ॥ त्वन्नित्यस्त्वमनित्यश्चजगत्कर्त्तालयःस्मृतः ॥ १८५ ॥ एकोनेकस्वरूपश्चशान्तचेष्टोजगन्मयः ॥ निर्विकारोनिराधा

रोनित्यानन्दःसनातनः ॥ ८६ ॥ त्वंविष्णुस्त्वम्महेन्द्रस्त्वम्ब्रह्मात्वञ्जगताम्पतिः ॥ योरूपरूपेश्वररत्नमालःसम्भूतिभूतोनिरवग्रहश्च
॥ ८७ ॥ कांक्ष्यावतीर्णावगतप्रमाथीयोगेश्वरोज्ञानगतिस्त्वगम्यः ॥ प्रमेयरूपात्मधराधराभोभोगीन्द्रबद्धामृतभोगतन्त्रः ॥ ८८ ॥ सूक्ष्मा
क्षरस्तत्त्वविदप्रमाथीत्वन्देवदेवःशरणंसुराणाम् ॥ विकल्पमानापरिहीनदेहःशुद्धान्तधामानुगतैकविद्यः ॥ ८९ ॥ वर्द्धिष्णुरुग्रःपुरुषः
परात्मात्वमिन्द्रियौघस्यविचारबुद्धिः ॥ त्वन्नाथनाथःप्रभवःपरेषांगतिर्मुनीनाम्परयोगिगम्यः ॥ १९० ॥ त्वम्भूधरोभागधरोह्यनन्तोविश्वा
त्मनस्तेवहवःप्रपञ्चाः ॥ ज्ञानामृतस्यन्दकपूर्णचन्द्रोमोहान्धकारस्यपरःप्रदीपः ॥ ९१ ॥ भक्तात्मजानाम्परमःपितात्वंकामेचपञ्चाननरूप
धारी ॥ शास्ताखिलानाम्प्रथमोविवस्वाँस्तनूनपात्त्वन्तनुपेगुणौघान् ॥ ९२ ॥ त्वम्ब्रह्मरूपेणकरोपिसृष्टिंविष्णुस्वरूपैःसततंस्थितिञ्च ॥ त्वं
रुद्ररूपीकुरुपेतथान्तन्त्वत्तोनचान्यज्जगतीहवस्तु ॥ ९३ ॥ त्वंरात्रिनाथोदिवसेश्वरश्चत्वमग्निरापःपवनोधरित्री ॥ नभस्तथात्वंक्रतुतन्त्रहो
तात्वमष्टमूर्त्तिर्भवतोनचान्यत् ॥९४॥अनन्तमूर्त्तिस्त्विहमुख्यभावान्निगद्यतेचाष्टमयीत्रिमूर्त्तिः ॥ अनन्तमूर्तेःकथमन्यथातेसंख्यास्तिरूपस्य
यदष्टमूर्त्तिः॥१९५॥त्वन्त्र्यम्बकस्त्वन्त्रिपुरान्तकश्चत्वंशम्भुरीशःशमनोविधाता॥सहस्रबाहुश्चहिरण्यबाहुःसहस्रमूर्त्तिस्त्विहपञ्चवक्त्रः ॥९६॥प्र
भूतनेत्रस्तुपडर्धनेत्रःप्रभूतबाहुर्दशबाहुरीशः॥प्रभूतभोगीमितभोगयुक्तोभोग्यानुसारोनिरवग्रहश्च ॥९७॥ नित्यानित्यस्वरूपायनित्यधामस्वरू
पिणे॥परतत्त्वस्वरूपायनमस्तुभ्यंशिवात्मने ॥९८॥ नान्तंलिङ्गस्ययस्यात्तंविष्णुनाब्रह्मणातव॥तस्यावांकिंविधास्यावःस्तुतिवाक्यंवृषध्वज ॥
॥९९॥स्वरूपंयस्यजानन्तिनदेवानापिदानवाः ॥ बालावावांकथन्तुत्वांस्तोष्यावःपरमेश्वर ॥ २०० ॥ भक्तिमात्रेणदेवेशतवावांवृषभध्वज ॥

कुर्वःप्रणामंगौरीशभूयस्तुभ्यन्नमोनमः ॥१॥ और्वउवाच ॥ इतिस्तुतोमहादेवोवेतालेनमहात्मना ॥ भैरवेणापिराजेन्द्रप्रसन्नःप्राहतौतदा॥२॥
भगवानुवाच ॥ ॥ तुष्टोस्मियुवयोः पुत्रौवृणुतंवाञ्छितंवरम् ॥ दास्यामियुवयोरिष्टम्प्रसन्नोहन्तपोव्रतैः ॥ ३ ॥ स्तुतिभिश्चदमैश्चापितथैका
न्तानुचिन्तनैः ॥ मुहुर्म्मुहुःसुप्रसन्नइष्टन्दास्यामिवांसुतौ ॥ ४ ॥ वेतालभैरवावूचतुः ॥ तुष्टोसियदिसत्यन्नौसत्यमावांसुतौयदि ॥ वृषध्वज
तवैवेहतदेष्टन्देहिनौवरम् ॥ २०५ ॥ सुतभावेनपितरम्भवन्तंजगताम्पतिम् ॥ नित्यंयथावगच्छावस्तथादेहिवरन्तुनौ ॥ ६ ॥ नराज्यमभि
कांक्षावोनधनन्नान्यदेववा ॥ त्वद्भक्त्यासेवनंकर्त्तुतवेच्छावोवृषध्वज ॥ ७ ॥ त्वत्पादपंकजद्वन्द्वेनित्यम्मधुकरात्मताम् ॥ त्वयिप्रसन्नेनेत्राणां
युगलेप्राप्तुतांसदा ॥ ८ ॥ इतोन्यथात्वच्चिन्ताभिस्त्वद्ध्यानैस्त्वत्प्रपूजनैः ॥ कल्पकोटिसहस्राणियान्तुसम्यक्तथावयोः ॥ ९ ॥ ततस्तद्वच
नंश्रुत्वामहादेवोहसन्निव ॥ सर्वैर्देवगणैःसार्द्धन्देवत्वमकरोत्तयोः ॥ २१० ॥ देवेन्द्रसम्मतेनैवसुधामानीयनाकतः ॥ वेतालभैरवौतान्तुपा
ययामासशङ्करः ॥ ११ ॥ पीतेमृतेततस्तौतुमर्त्त्यतान्नरसत्तमौ ॥ अमर्त्यताम्परित्यज्यप्रापतुःशिवशक्तितः ॥ १२ ॥ तस्मिन्कालेस्वपन्तौ
तुदिव्यज्ञानबलान्वितौ ॥ दिव्यरूपोपसम्पन्नौबभूवतुरिन्द्रमौ ॥१३॥ अभिन्नेनैवदेहेनदेवत्वंगतयोस्तयोः ॥ प्राह शम्भुस्तदातौतुसुतौपरमह
र्षितौ ॥ १४ ॥ ॥ भगवानुवाच ॥ ॥ अहन्तुष्टस्तुयुवयोःपार्व्वतीन्दयिताम्मम ॥ मद्दत्तंकाममिच्छन्तावाराधयतमीश्वरीम् ॥ २१५ ॥
तामृतेतुनशक्नोमिदातुमिष्टंसनातनम् ॥ सैवितुश्चसुतौनित्यंशरणंव्रजतंशिवाम् ॥ १६ ॥ अचिराद्येनभावेनप्रीतिन्देवीगमिष्यति ॥ अत्रवा
तत्रवागत्वातेनभावेनचार्च्यताम् ॥ २१७ ॥ इतिकालिकापुराणेत्रिपञ्चशत्तमोध्यायः ॥ ५३ ॥ ॥ और्वउवाच ॥ ॥ एवंवदतिभूतेशे

तदावेतालभैरवौ ॥ प्राहतुर्व्योमकेशन्तौहर्षोत्फुल्लविलोचनौ ॥ १ ॥ वेतालभैरवावूचतुः ॥ पार्वत्यानहिजानीवोध्यानम्मन्त्रंविधिन्तथा ॥
कथमाराधयिष्यावोभगवन्त्सम्यगुच्यताम् ॥ २ ॥ श्रीभगवानुवाच ॥ महामायाविधिम्मन्त्रंकल्पञ्चभवतोःसुतौ ॥ उपदेक्ष्यामितत्त्वेनयेनसर्वं
म्भविष्यति ॥ ३ ॥ और्वउवाच ॥ इत्युक्त्वासमहामायाध्यानम्मन्त्रंविधिन्तथा ॥ कथयामासगिरिशस्तयोःसम्यङ्नृपोत्तम ॥ ४ ॥ यदष्टादश
भिःपञ्चात्पटलैश्चसभैरवः ॥ सनिर्णयविधिंकल्पन्निबबन्धशिवामृते ॥५॥ सगरउवाच ॥ कीदृङ्मन्त्रम्पुराशम्भुरवोचदुभयोस्तयोः ॥ येना
राध्यमहामायान्तौगणेशत्वमापतुः ॥ ६ ॥ सकल्पंसरहस्यञ्चसांगन्तच्छ्रोतुमुत्सहे ॥ और्वउवाच ॥ दशाष्टपटलैर्यत्तुनिबबन्धसभैरवः ॥७॥
बहुत्वाद्वदितुन्तस्यचिरेणैवतुशक्यते ॥ तस्मात्सद्यःसमुद्धृत्ययन्महादेवभाषितम् ॥८॥ संक्षेपात्कथयेतत्त्वन्तच्छृणुष्वनृपोत्तम॥पृच्छन्तौपार्व
तीमन्त्रन्तदावेतालभैरवौ ॥९॥ जगादसमहादेवःशृणुतम्मन्त्रकल्पकौ ॥ श्रीभगवानुवाच ॥ शृणुमन्त्रम्प्रवक्ष्यामिगुह्याद्गुह्यतमम्परम् ॥१०॥
अष्टाक्षरन्तुवैष्णव्यामहामायामहोत्सवम् ॥ अस्यश्रीवैष्णवीमन्त्रस्यनारदऋषिःशम्भुर्देवताअनुष्टुप्छन्दःसर्वार्थसाधनेविनियोगः ॥ हान्ता
न्तपूर्वोरान्तश्चनान्तोणान्तस्तथैवच ॥ ११ ॥ कैकादशाष्टादिषष्ठःखान्तोबिन्दुपुरःसरः ॥ एभिरष्टाक्षरैर्मन्त्रंशोणपत्रसमप्रभम् ॥ १२ ॥
ॐकारम्पूर्वतःकृत्वाजप्यंसर्वैस्तुसाधकैः ॥ महामन्त्रमिदंगुह्यंवैष्णवीमन्त्रसंज्ञकम् ॥१३॥ मन्त्रंकलेवरगतन्तस्मादंगम्प्रकीर्त्तितम् ॥ महादे
वस्योर्द्धमुखम्बीजमेतत्प्रकीर्त्तितम् ॥ १४ ॥ ओंकाराक्षरबीजञ्चयकारःशक्तिरुच्यते ॥ सबीजंकथितम्मन्त्रङ्कल्पञ्चशृणुभैरव ॥ १५ ॥ तीर्थे
नद्यान्देवखातेगर्त्तप्रस्रवणादिके ॥ परकीयेतरेतोयेस्नानम्पूर्वंसमाचरेत् ॥ १६ ॥ आचान्तःशुचिताम्प्राप्तःकृतासनपरिग्रहः ॥ उत्तराभिमुखो

भूत्वास्थण्डिलम्मार्जयेत्ततः ॥१७॥ करेणानेनमन्त्रेणोयूंसः क्षित्याइतिस्वयम् ॥ ओंयूंसइतिमन्त्रेणआशापूरणकेनच ॥ १८ ॥ तोयैरभ्युक्षये
त्स्थानम्भूतानामपसारणे ॥ ततःसव्येनहस्तेनगृहीत्वास्थण्डिलंशुचिः ॥ १९ ॥ मन्त्रांलिखेत्सुवर्णेनयाज्ञिकेनकुशेनवा ॥ ॐवैष्णव्यैनमइ
तिअस्त्रराजमथापिवा ॥ २० ॥ ततस्त्रिमण्डलंकुर्यात्तेनैवसमरेखया ॥ नित्यासुनहिपूजासुरजोभिर्मण्डलंलिखेत् ॥ २१ ॥ पुरश्चरणकार्येषु
तत्काम्येषुप्रयोजयेत् ॥ रेखामुदीच्याम्प्रथमम्पश्चिमेतदनन्तरम् ॥ २२ ॥ दक्षिणेतुततःपश्चात्पूर्वभागेतुशेषतः ॥ वर्णानाञ्चसहद्वारैरेवमेव
क्रमोभवेत् ॥ २३ ॥ ॐह्रीश्रींसइतिमन्त्रेणमण्डलम्पूजयेत्ततः ॥ हस्तेनमण्डलंकृत्वाकुर्याद्दिग्बन्धनन्ततः ॥ २४ ॥ आशाबन्धनमन्त्रेण
पूर्वोक्तेनयथाक्रमम् ॥ फडन्तेनात्मनाप्यत्रकरेणैवनिबन्धयेत् ॥ २५ ॥ यवानान्तण्डुलैरेकमंगुलञ्चाष्टभिर्भवेत् ॥ अदीर्घयोजितैर्हस्तैश्चतु
र्विंशतिरंगुलैः ॥ २६ ॥ तत्प्रमाणेनहस्तेनहस्तैकन्तस्यमण्डलम् ॥ पद्मंवितस्तिमात्रंस्यात्कर्णिकारन्तदर्द्धकम् ॥ २७ ॥ दलान्यन्योन्य
सक्तानिह्यायतानिनियोजयेत् ॥ नन्यूनाधिकभागानिसबाहिर्वेष्टितानिच ॥ २८ ॥ मध्यभागेन्यसेद्वारन्नन्यूनेनाधिकेतथा ॥ सुबद्धम्मण्डल
न्तच्चरक्तवर्णंविचिन्तयेत् ॥ २९ ॥ इतोन्यथामण्डलमुग्रमस्याःकरोतियोलक्षणभागहीनम् ॥ फलन्नचाप्नोतिनकाममिष्टन्तस्मादिदम्मण्ड
लमत्रलेख्यम् ॥ ३० ॥ इतिश्रीकालिकापुराणेमहामायाकल्पेऽष्टादशपटलेचतुःपञ्चाशत्तमोध्यायः ॥ ५४ ॥छ॥ श्रीभगवानुवाच ॥ ॥
ततोलमितिमन्त्रेणअर्घपात्रस्यमण्डलम् ॥ चतुष्कोणंविधायाशुद्धारपद्मविवर्जितम् ॥ १ ॥ ॐह्रींश्रीमितिमन्त्रेणअर्घपात्रन्तुमण्डले ॥ वि
न्यसेत्प्रथमन्तत्र पूजयित्वासामिध्याति ॥ २ ॥ ॐह्रींक्रींमितिमन्त्रेणगन्धपुष्पेतथाजलम् ॥ अर्घपात्रेक्षिपेत्तत्रमण्डलंविन्यसेत्ततः ॥ ३ ॥

पूर्ववन्मण्डलंकृत्वाअर्घपात्रेततोजलैः ॥ त्रिभागैःपूरयेत्पात्रम्पुष्पन्तत्रविनिःक्षिपेत् ॥ ४ ॥ ततोऽहीमितिमन्त्रेणआसनम्पूजयेत्स्वकम् ॥
ततःक्षौमितिमन्त्रेणआत्मानम्पूजयेद्बुधः ॥५॥ गन्धैःपुष्पैःशिरोदेशेततःपूजांसमाचरेत् ॥ ॐक्रींसइतिमन्त्रेणपुष्पहस्ततलस्थितम् ॥ ६ ॥
सम्मृज्यसव्यहस्तेनग्रात्वावामकरेणतु ॥ ७ ॥ ऐशान्यान्निक्षिपेदेतत्पूर्वमन्त्रेणकोविदः ॥ रक्तपुष्पंगृहीत्वातुकराभ्याम्पाणिकच्छपम् ॥ ८ ॥
बद्धाकुर्यात्ततःपश्चाद्दहनप्लवनादिकम् ॥ वामहस्तस्यतर्जन्यान्दक्षिणस्यकनिष्ठिकाम् ॥ ९ ॥ तथादक्षिणतर्जन्यांवामांगुष्ठन्नियोजयेत् ॥
उन्नतन्दक्षिणांगुष्ठंवामस्यमध्यमादिकाः ॥ १० ॥ अंगुलीर्योजयेत्पृष्ठेदक्षिणस्यकरस्यच ॥ वामस्यपितृतीर्थेनमध्यमानामिकेतथा ॥ ११ ॥
अधोमुखेतुतेकुर्यादक्षिणस्यकरस्यच ॥ कूर्मपृष्ठसमम्पृष्ठंकुर्यादक्षिणहस्ततः ॥ १२ ॥ एवम्बद्धःसर्वसिद्धिन्ददातिपाणिकच्छपः ॥ कुर्यात्तद्द
दयासन्नन्निमील्यनयनद्वयम् ॥ १३ ॥ समं कायशिरोग्रीवंकृत्वास्थिरमनाबुधः ॥ ध्यानंसमारभेद्देव्यादाहप्लवनपूर्वकम् ॥ १४ ॥ अग्निंवायौ
विनिःक्षिप्यवायुन्तोयेजलंहृदि ॥ हृदयन्निश्चलेदत्त्वाआकाशेनिःक्षिपेत्स्वनम् ॥ १५ ॥ ॐहूंफडितिमन्त्रेणभित्त्वारन्ध्रन्तुमस्तके ॥ शब्देन
सहितञ्जीवमाकाशेस्थापयेत्ततः ॥ १६ ॥ वाय्वग्नियमशक्राणाम्बीजेनवरुणस्यच ॥ परास्थानपराश्चैतैःसार्द्धचन्द्रैःसबिन्दुकैः ॥ १७ ॥
शोपन्दाहन्तथोत्सादम्पीयूषासेचनम्परम् ॥ यथाक्रमेणकर्त्तव्यश्चिन्तामात्रंविशुद्धये ॥ १८ ॥ ततस्तुदेव्याबीजन्तुशुद्धजाम्बूनदाकृति ॥
तत्रासाद्यद्विधाकुर्यात् ह्रींक्रींश्रींमितिमन्त्रकैः ॥ १९ ॥ तदूर्द्धभागेविधिनालोकंस्वर्गञ्चखन्तथा ॥ निष्पाद्यशेषभागेतुभुवम्पातालधारिणीम् ॥
॥ २० ॥ चिन्तयेत्तत्रसर्वाणिसप्तद्वीपाश्चमेदिनीम् ॥ तत्रेक्षुसागरान्तःस्थंस्वर्णद्वीपंविचिन्तयेत् ॥ २१ ॥ तन्मध्येरत्नपर्यंकरत्नमण्डलसं

स्थितम् ॥ आकाशगंगातोयौघैःसदैवासेवितंशुभम् ॥ २२ ॥ तत्पर्यंकेरत्नपद्मम्प्रसन्नंसर्वदाशिवम् ॥ चिन्तयेत्स्वर्णमालांकंसप्तपाताल
नालकम् ॥ २३ ॥ आत्रह्मभुवनस्पर्शिस्वर्णवर्णककर्णिकम् ॥ तत्रस्थिताम्महामायान्ध्यायेदेकाग्रमानसः ॥ २४ ॥ शोणपद्मप्रतीकाशाम्मु
क्तमूर्द्धजलम्बिनीम् ॥ चलत्काञ्चनसम्बद्धकुण्डलोज्ज्वलशालिनीम् ॥ २५ ॥ सुवर्णरत्नसम्बद्धकिरीटत्रयधारिणीम् ॥ शुक्लकृष्णारुणैर्ने
त्रैस्त्रिभिश्चारुविभूषिताम् ॥ २६ ॥ संध्याचन्द्रसमप्रख्यकपोलांलोललोचनाम् ॥ विपक्वदाडिमीबीजदन्तांसुभ्रूयुगोज्ज्वलाम् ॥ २७ ॥ बन्धू
कदन्तवसनांशिरीषप्रभनासिकाम् ॥ कम्बुग्रीवांविशालाक्षींसूर्यकोटिसमप्रभाम् ॥ २८ ॥ चतुर्भुजांविवसनाम्पीनोन्नतपयोधराम् ॥ दक्षिणो
र्द्धेननिस्त्रिंशम्परेणसिद्धसूत्रकम् ॥ २९ ॥ बिभ्रतींवामहस्ताभ्यामभीतिवरदायिनीम् ॥ निम्ननाभिंक्रमायातक्षीणमध्याम्मनोहराम् ॥ ३० ॥
आनम्रनागनासोरुंगुप्तगुल्फांसुपार्ष्णिकाम् ॥ बद्धपर्यंकसंकल्पनिबिडासनराजिताम् ॥३१॥ गात्रेणरत्नस्तम्भञ्चसम्यगालम्ब्यसंस्थिताम् ॥
किमिच्छसीतिवचनंव्याहरन्तीम्मुहुर्म्मुहुः ॥ ३२॥ पञ्चाननम्पुरःसंस्थन्निरीक्षन्तींस्ववाहनम् ॥ मुक्तावलीस्वर्णरत्नकेयूरकंकणादिभिः॥३३॥
सर्वैरलंकारगणैरुज्ज्वलांसस्मिताननाम् ॥ ३४ ॥ सूर्यकोटिप्रतीकाशांसर्वलक्षणसंयुताम् ॥ नवयौवनसम्पन्नान्तथासर्वांगसुन्दरीम् ॥
॥ ३५ ॥ ईदृशीमम्बिकान्ध्यात्वोंनमःफडितिमस्तके ॥ स्वकीयेसुमनोदद्यात्साहमेवंविचिन्तयन् ॥ अंगन्यासकरन्यासौततःकुर्यात्क्रमेणतु
॥ ३६ ॥ एभिर्मन्त्रैःस्वरैःसंघैराशीभूतैःक्रमान्वितैः ॥ ॐमुचैते (?) सप्रणवांरक्तवर्णाम्मनोहराम् ॥ ३७ ॥ अंगुष्ठादिकनिष्ठान्तम्मन्त्रसंवे
ष्टनञ्चफट् ॥ प्रान्तेनकुर्याद्विन्यासम्पूर्वंकरतलद्वयोः ॥ ३८ ॥ हृच्छिरःशिखाकवचनेत्रेषुतत्क्रमान्न्यसेत् ॥ ततस्तुमूलमन्त्रस्यवक्त्रेपृष्ठेतथो

दरे ॥ ३९ ॥ बाह्वोर्गुह्येपादयोश्चजंघयोर्जघनेक्रमात् ॥ विन्यसेदक्षराण्यष्टौओंकारश्चतथास्मरन् ॥ ४० ॥ एभिःप्रकारैरभिशुद्धदेहःपूजां
सदैवार्हतिनान्यथाहि ॥ शरीरशुद्धिम्मनसोनिवेशम्भूतप्रसादंकुरुतेनृणान्तत् ॥ ४१ ॥ इतिकालिकापुराणेपञ्चपञ्चाशत्तमोध्यायः ॥ ५५ ॥
॥ ॥ श्रीभगवानुवाच ॥ ॥ ततोर्घपात्रेतन्मन्त्रमष्टधावृत्यसञ्जपेत् ॥ तेनतोयेनपुष्पाणिस्वमण्डलमथासनम् ॥ १ ॥ आसेचयेत्ततः
पश्चात्पूजोपकरणंसमम् ॥ ॐ ऐं क्रींश्रीमितिमन्त्रेणशब्दप्रांशुविवर्जितम् ॥ २ ॥ द्वारपालन्ततोदेव्याआसनानिचपूजयेत् ॥ नन्दिभृंगिमहा
कालगणेशाद्वारपालकाः ॥ ३ ॥ उत्तरादिक्रमात्पूज्याआसनानिचमध्यतः ॥ आधारशक्तिप्रभृतिहेमाद्र्यन्तान्प्रपूजयेत् ॥ ४ ॥ प्रसिद्धा
न्त्सर्वतन्त्रेषुपूजाकल्पेषुभैरव ॥ दशदिक्पालसहितान्धर्म्माधर्म्मादिकाँस्तथा ॥ ५ ॥ मण्डलाग्न्यादिकोणेषुपूजयेत्पार्श्वदेशतः ॥ सूर्याग्नि
सोममरुताम्मण्डलानिचपद्मकम् ॥ ६ ॥ रजस्तथातमःसत्त्वंयोगपीठंगुरोःपदम् ॥ सारादीन्भद्रपीठान्तान्त्सांगोपांगान्प्रपूजयेत् ॥ ७ ॥
ब्रह्माण्डंस्वर्णडिम्बञ्चब्रह्मविष्णुमहेश्वरान् ॥ ससागरान्त्सप्तद्वीपान्स्वर्णद्वीपंसमण्डपम् ॥ ८ ॥ रत्नपद्मंसपर्यंकंरत्नस्तम्भन्तथैवच ॥ पञ्चा
ननम्मण्डलस्यमध्येवश्यम्प्रपूजयेत् ॥९॥ क्रींमन्त्रेणततःकूर्मपृष्ठम्पाण्योर्निबध्यच ॥ ध्यायेच्चपूर्ववद्देवीमासाद्यासनमुत्तमम् ॥ १० ॥ हृन्म
ध्येचिन्तयेत्स्वर्णद्वीपम्पर्यंकसम्भृतम् ॥ पश्यन्निवततोदेवीमेकाग्रमनसास्मरेत् ॥ ११ ॥ प्रत्यक्षीकृत्यहृदयेमानसैरुपचारकैः ॥ षोडशाना
म्प्रकारैस्तुहृदिस्थाम्पूजयेच्छिवाम् ॥ १२ ॥ ततस्तुवायुबीजेनदक्षिणेनपुटेनच ॥ नासिकायाविनिःसार्यक्रींमन्त्रेणचभैरव ॥ १३ ॥ स्थाप
येत्पद्ममध्येतुतद्धस्तन्नवियोजयेत् ॥ कृतोवियोगेहस्तस्यपुष्पात्तस्माच्चभैरव ॥ १४ ॥ गन्धर्वैःपूज्यतेदेवीपूजकैर्नाप्यतेफलम् ॥ आवाहनन्त

तःकुर्याद्गायत्र्याशिरसासह ॥ १५ ॥ महामायायैविद्महेत्वाश्चण्डिकाख्यान्धीमहि ॥ एतदुक्त्वाततःपश्चाद्धियोयोनःप्रचोदयात् ॥ १६ ॥
स्नानीयन्देवितेतुभ्यंओंक्रींश्रींनमइत्यतः ॥ स्नानीयञ्चततोदेव्यैदद्याल्लक्षणलक्षितम् ॥ १७ ॥ ततस्तुमूलमन्त्रेणगन्धपुष्पंसदीपकम् ॥ धूपा
दिकम्प्रदद्यात्तुमोदकम्पायसन्तथा ॥ १८ ॥ सितांगुडन्दधिक्षीरंसर्पिर्नानाविधैःफलैः ॥ रक्तपुष्पंपुष्पमालांसुवर्णरजतादिकम् ॥ १९ ॥
नैवेद्यमुत्तमन्देव्यालांगलम्मोदकंसिताम् ॥ शाण्डिल्यकरताम्राख्यकूष्माण्डानाम्फलानिच ॥ २० ॥ हरीतकीफलञ्चापिनागरंगकमेलका ॥
बालप्रियञ्चयद्द्रव्यंकसेरुकबिसादिकम् ॥ २१ ॥ तोयञ्चनारिकेलस्यदेव्यैदेयम्प्रयत्नतः ॥ रक्तंकौशेयवस्त्रञ्चदेयन्नीलंकदापिन ॥ २२ ॥
देव्याःप्रियाणिपुष्पाणिबकुलंकेशरन्तथा ॥ माध्यंकह्लारवज्राणिकरवीरकुरुण्टकान् ॥ २३ ॥ अर्कपुष्पंशाल्मलकन्दूर्वाकुरंसुकोमलम् ॥
कुशमञ्जरिकादर्भाबन्धूककमलेतथा ॥ २४ ॥ मालूरपत्रम्पुष्पञ्चत्रिसन्ध्यारक्तपर्णके ॥ सुमनांसिप्रियाण्येतान्यम्बिकायाश्चभैरव ॥ २५ ॥
बन्धूकमुकुलम्मध्यम्बिल्वपत्राणिसन्ध्यकम् ॥ उत्तमंसर्वपुष्पेषुद्रव्येपायसमोदकौ ॥२६॥ माल्यम्बन्धूकपुष्पस्याशिवायैबकुलस्यवा ॥ कर
वीरस्यमाध्यस्यसहस्राणान्ददातियः ॥ २७ ॥ सकामान्प्राप्यचाभीष्टान्ममलोकेप्रमोदते ॥ चन्दनंशीतलञ्चैवकालीयकसमन्वितम् ॥२८॥
अनुलेपनमुख्यन्तुदेव्यैदद्यात्प्रयत्नतः ॥ कर्पूरंकुंकुमंकूर्च्चम्मृगनाभिःसुगन्धिकम् ॥ २९ ॥ कालीयकंसुगन्धेषुदेव्याःप्रीतिकरम्परम् ॥ यक्ष
धूपःप्रतीवाहःपिण्डधूपःसगोलकः ॥ ३० ॥ अगुरुःसिन्धुवारश्चधूपाःप्रीतिकरामताः ॥ अंगरागेषुसिन्दूरन्देव्याःप्रीतिकरम्परम् ॥ ३१ ॥
सुगन्धिशालिजञ्चान्नम्मधुमांससमन्वितम् ॥ अपूपंपायसंक्षीरमन्नन्देव्याःप्रशस्यते ॥ ३२ ॥ रत्नोदकंसकर्पूरम्पिण्डीलिककुमारकौ ॥ रोचन

म्पुष्पकन्देव्याःस्नानीयम्परिकीर्तितम् ॥ ३३ ॥ घृतप्रदीपोदीपेषुप्रशस्तःपरिकीर्तितः ॥ पुष्पाञ्जलित्रयन्दद्यान्मूलमंत्रेणशोभनम् ॥३४॥
दत्त्वोपचारानखिलान्मध्येचैताःप्रपूजयेत् ॥ कामेश्वरींगुप्तदुर्गांविन्ध्यकन्दरवासिनीम् ॥ ३५ ॥ कोटेश्वरीन्दीर्घिकाख्याम्प्रकटीम्भुवने
श्वरीम् ॥ आकाशगंगांकामाख्यान्तथादिक्करवासिनीम् ॥ ३६ ॥ मातंगींललितान्दुर्गाम्भैरवींसिद्धिदान्तथा ॥ बलप्रमथिनीञ्चण्डीञ्चण्डो
ग्राञ्चण्डनायिकाम् ॥ ३७ ॥ उग्राम्भीमांशिवांशान्ताञ्जयन्तींकालिकान्तथा ॥ मङ्गलाम्भद्रकालीञ्चशिवान्धात्रींकपालिनीम् ॥ ३८ ॥
स्वाहांस्वधामपर्णाञ्चपञ्चपुष्करिणीन्तथा ॥ ३९ ॥ दमनींसर्वभूतानाम्मनःप्रोत्साहकारिणीम् ॥ दमनींसर्वभूतानाञ्चतुःषष्टिञ्चयोगिनीः ॥
॥ ४० ॥ एताःसम्पूज्यमध्येतुमन्त्रेणांगानिपूजयेत् ॥ हृच्छिरस्तुशिखावर्म्मनेत्रबाहुपदानिच ॥ ४१ ॥ मूलमंत्राद्यक्षरैस्तुत्रिभिराद्यंगपूज
नम्॥एकैकंवर्द्धयेत्पश्चान्मन्त्राण्यंगौघपूजने॥४२॥ सिद्धसूत्रञ्चखड्गञ्चखड्गमन्त्रेणपूजयेत्॥ततोष्टपत्रमध्येतुपूजयेदष्टयोगिनीः ॥४३॥शैलपु
त्रीञ्चण्डघण्टांस्कन्दमातरमेवच॥कालरात्रिञ्चपर्वादिचतुर्दिक्षुप्रपूजयेत्॥४४॥चण्डिकामथकूष्माण्डीन्तथाकात्यायनींशुभाम् ॥ महागौरींचा
शिकोणेनैर्ऋत्यादिषुपूजयेत्॥४५॥महामायांक्षमस्वेतिमूलमन्त्रेणचाष्टधा॥पूजयेत्पद्ममध्येतुबलिदानन्ततःपरम् ॥४६॥ एवंयदाकल्पविधान
मानैःसम्पूज्यतेभैरवकामदेवी॥तदास्वयम्मण्डलमेत्यदेयंगृह्णातिकामञ्चददातिसम्यक्॥४७॥इतिश्रीकालिकापुराणेषट्पञ्चाशत्तमोऽध्यायः ॥
॥५६॥श्रीभगवानुवाच॥बलिदानन्ततःपश्चात्कुर्याद्देव्याःप्रमोदकम् ॥ मोदकैर्गजवक्त्रञ्चहविषातोषयेद्भविम् ॥१॥तौर्यैस्त्रिकैश्चनियमैःशंकरन्तो

१ पुष्पकरीतिपुष्पंकुसुमांजनंकुसुमाकाररीतिमलसम्भवमंजनमित्यर्थः । २ तौर्यत्रिकैर्हरंनियमैर्हरिन्तोषयेदितियथासंख्येनान्वयः ।

पयेद्धरिम् ॥ चण्डिकाम्बलिदानेनतोषयेत्साधकःसदा ॥ २ ॥ पक्षिणःकच्छपाग्राहाश्छागलाश्चवराहकाः ॥ महिषोगोधिकाशोपातथानव
विधामृगाः ॥ ३ ॥ चामरःकृष्णसारश्चशशःपञ्चाननस्तथा ॥ मत्स्याःस्वगात्ररुधिरैश्चाष्टधावलयोमताः ॥ ४ ॥ अभावेचतथैवैषांकदा
चिद्धयहस्तिनौ ॥ छागलाःशरभाश्चैवनरश्चैवयथाक्रमात् ॥५॥ बलिर्महाबलिरितिबलयःपरिकीर्तिताः ॥ स्नापयित्वाबलिन्तत्रपुष्पचन्दन
धूपकैः ॥ ६ ॥ पूजयेत्साधकोदेवीम्बलिमन्त्रैर्मुहुर्मुहुः ॥ उत्तराभिमुखोभूत्वाबलिम्पूर्वमुखन्तथा ॥ ७ ॥ निरीक्ष्यसाधकः पश्चादिम
म्मन्त्रमुदीरयेत् ॥ वरस्त्वम्बलिरूपेणममभाग्यादुपस्थितः ॥ ८ ॥ प्रणमामिततःसर्वरूपिणम्बलिरूपिणम् ॥ चण्डिकाप्रीतिदानेनदातुरा
पद्विनाशन ॥ ९ ॥ वैष्णवीबलिरूपायबलेतुभ्यन्नमोनमः ॥ यज्ञार्थेपशवःसृष्टाःस्वयमेवस्वयम्भुवा ॥ १० ॥ अतस्त्वांघातयाम्यद्यतस्मा
द्यज्ञेवधोऽवधः ॥ ऐं क्रीं श्रीं इतिमन्त्रेणतम्बलिंकामरूपिणम् ॥ ११ ॥ चिन्तयित्वान्यसेत्पुष्पम्मूर्ध्नितस्यचभैरव ॥ ततोदेवींसमुद्दिश्य
काममुद्दिश्यचात्मनः ॥ १२ ॥ अभिषिच्यबलिम्पश्चात्करवालम्प्रपूजयेत् ॥ रसनात्वञ्चण्डिकायाः सुरलोकप्रसाधक ॥ १३ ॥ ऐं श्रींक्रींइ
तिमन्त्रेणध्यात्वाखड्गम्प्रपूजयेत् ॥ १४ ॥ कृष्णम्पिनाकंपाणिञ्चकालरात्रिस्वरूपिणम् ॥ उग्ररक्तास्यनयनंरक्तमाल्यानुलेपनम् ॥ १५ ॥
रक्ताम्बरधरञ्चैकम्पाशहस्तंकुटुम्बिनम् ॥ पीयमानञ्चरुधिरम्भुञ्जानंक्रव्यसंहतिम् ॥ १६ ॥ असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः ॥
श्रीगर्वोविजयश्चैवधर्मपालनमोस्तुते ॥ १७ ॥ पूजयित्वाततःखड्गं ॐ क्रींफडितिमन्त्रकैः ॥ गृहीत्वाविमलंखड्गञ्छेदयेद्बलिमुत्तमम् ॥
॥ १८ ॥ ततोबलीनांरुधिरन्तोयसैन्धवसत्फलैः ॥ मधुभिर्गन्धपुष्पैश्चअधिवास्यप्रयत्नतः ॥ १९ ॥ ॐ ऐं क्रीं श्रींकौशिकीतिरुधिर

न्दापयामिते ॥ स्थानेनियोजयेद्रक्तांशिरश्चसप्रदीपकम् ॥ २० ॥ एवन्दत्वाबलिम्पूर्णम्फलम्प्राप्नोतिसाधकः ॥ हीनंस्याद्धीनतामूलंनि
ष्फलंस्याद्विपर्ययात् ॥ २१ ॥ बलिदानेतुदुर्गायाअन्यत्रापिविधिःसदा ॥ अयमेवप्रयोक्तव्यःसद्भिर्वेतालभैरवौ ॥ २२ ॥ जपंसमारभेत्प
श्चात्पूर्ववद्ध्यानमास्थितः ॥ हस्तेनस्रजमादायचिन्तयेन्मनसाशिवाम् ॥ २३ ॥ चिन्तयित्वागुरुम्मूर्ध्नियथावर्णादिकम्भवेत् ॥ मन्त्रश्चकण्ठ
तोध्यात्वासितवर्णंहिरण्मयम् ॥ २४ ॥ महामायाञ्चहृदयेआत्मानंगुरुपादयोः ॥ आचक्षेततःपश्चाद्गुरोर्मन्त्रस्यचात्मनः ॥ २५ ॥
देव्याश्चाप्येकतान्ध्यात्वासुषुम्नावर्त्मनाततः ॥ तत्त्वस्वरूपमेकन्तुषट्चक्रम्प्रतिलम्बयेत् ॥ २६ ॥ षट्चक्रोपिमहामायांक्षणन्ध्यात्वा
प्रयत्नतः ॥ लम्बयेन्मूलमात्रेणवादिषोडशचक्रकम् ॥ २७ ॥ आदिषोडशचक्रस्थांसाधकानन्दकारिणीम् ॥ चिन्तयन्त्साधकोदेवी
ञ्जपकर्मसमारभेत् ॥ २८ ॥ भ्रुवोरुपरिनाडीनान्त्रयाणाम्प्रान्तउच्यते ॥ तत्प्रान्तन्त्रिपथस्थानंषट्कोणंचतुरंगुलम् ॥ २९ ॥ र
क्तवर्णन्तुयोगज्ञैराज्ञाचक्रमितीर्यते ॥ कण्ठेत्रयाणांनाडीनां वेष्टनंविद्यतेनृणाम् ॥ ३० ॥ सुषुम्नेडापिंगलानांषट्कोणन्तत्षडंगुलम् ॥ तत्षट्
चक्रमितिप्रोक्तंशुक्लंकण्ठस्यमध्यगम् ॥ ३१ ॥ त्रयाणामथनाडीनांहृदयेचैकताभवेत् ॥ तत्स्थानंषोडशारंस्यात्सप्तांगुलप्रमाणतः ॥ ३२ ॥
तत्प्रयुक्तन्तुयोगज्ञैरादिषोडशचक्रकम् ॥ ध्यानानामथमन्त्राणाञ्चिन्तनस्यजपस्यच ॥ ३३ ॥ यस्मादाद्यन्तुहृदयन्तस्मादादीतिगद्यते ॥
जपादौपूजयेन्मालान्तोयैरभ्युक्ष्ययत्नतः ॥ ३४ ॥ निधायमण्डलस्यान्तःसव्यहस्तगताञ्चवा ॥ ॐमालेमालेमहामायेसर्वशक्तिस्वरू

पिणि॥ ३५ ॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव ॥ पूजयित्वाततोमालांगृह्णीयाद्दक्षिणेकरे ॥३६॥मध्यमायामध्यभागेवर्जयित्वाथ
तर्जनीम् ॥ अनामिकाकनिष्ठाभ्यांयुतायानम्रभागतः ॥ ३७ ॥ स्थापयित्वातत्रमालामंगुष्ठाग्रेणतद्गतम् ॥ प्रत्येकम्बीजमादायजप्याद्वर्ध्वे
नभैरव ॥ ३८ ॥ प्रतिवारम्पठेन्मन्त्रंशनैरोष्ठञ्चचालयेत् ॥ मालाबीजन्तुजप्तव्यंस्पृशेन्नहिपरस्परम् ॥ ३९ ॥ पूर्वजापप्रयुक्तेननैवांगुष्ठेनभै
रव ॥ पूर्वबीजञ्जपन्यस्तुपरबीजञ्चसंस्पृशेत् ॥ ४० ॥ अंगुष्ठेनभवेत्तस्यनिष्फलस्तस्यतज्जपः ॥ मालांस्वहृदयासन्नेधृत्वादक्षिणपाणिना
॥ ४१ ॥ देवींविचिन्तयञ्जप्यंकुर्याद्वामेननस्पृशेत् ॥ स्फटिकेन्द्राक्षरुद्राक्षैःपुत्रञ्जीवसमुद्भवैः ॥ ४२ ॥ सुवर्णमणिभिःसम्यक्प्रवालैरथवा
व्जजैः ॥ अक्षमालातुकर्त्तव्यादेवीप्रीतिकरीपरा ॥ ४३ ॥ जपेदुपांशुसततंकुशग्रन्थ्याथपाणिना ॥ मालाबीजेषुसर्वेषुरुद्राक्षोमत्प्रियाप्रियः
॥ ४४ ॥ रुद्रप्रीतिकरीयस्मात्तेनरुद्राक्षरोचनी ॥ प्रवालैरथवाकुर्यादष्टाविंशतिबीजकैः ॥ ४५ ॥ पञ्चपञ्चाशतावापिनन्यूनैराधिकैश्चया ॥
रुद्राक्षैर्यदिजप्येतइन्द्राक्षैःस्फाटिकैस्तथा ॥ ४६ ॥ नान्यम्मध्येप्रयोक्तव्यम्पुत्रञ्जीवादिकञ्चयत्॥यद्यन्यत्तुप्रयुज्येतमालायाञ्जपकर्मणि ॥४७॥
तस्यकामञ्चमोक्षञ्चददातिनाप्रियंकरी ॥ मिश्रीभावन्ततोयातिचाण्डालैःपापकर्मभिः ॥ जन्मान्तरेजायतेनवेदवेदांगपारगः ॥ ४८ ॥ एकोमे
रुस्तत्रदेयःसर्वेभ्यःस्थूलसम्भवः ॥ आद्यंस्थूलन्ततस्तस्मान्यनंन्यूनतरन्तथा ॥ ४९ ॥ विन्यसेत्क्रमतस्तस्मात्सर्वाकाराहिसायतः ॥ ब्रह्मग्र
न्थियुतंकुर्यात्प्रतिबीजंयथास्थितम् ॥ ५० ॥ अथवाग्रन्थिरहितन्दृढरज्जुसमन्वितम् ॥ द्विरावृत्त्याथमध्येनचार्द्धावृत्त्यान्तदेशतः ॥ ५१ ॥
ग्रन्थिःप्रदक्षिणावर्तःसब्रह्मग्रन्थिसंज्ञकः ॥ आत्मनायोजयेन्मालान्नामन्त्रोयोजयेन्नरः ॥ ५२ ॥ दृढंसूत्रन्नियुञ्जीतजपेन्नुत्यतिनोयथा ॥ यथा

हस्तान्नच्यवेतजपतःस्वकृतथाचरेत् ॥ ५३ ॥ हस्तच्युतायांविघ्नंस्याच्छिन्नायाम्मरणम्भवेत् ॥ एवंयःकुरुतेमालाञ्जपञ्चजपकोविदः ॥ ५४ ॥
सप्राप्नोतीप्सितंकामंहीनेस्यात्तुविपर्ययः ॥ अन्यत्रापिजपेन्मालाञ्जप्यन्देवमनोहरम् ॥ ५५ ॥ तादृशःसाधकःकुर्यान्नान्यथातुकदाचन ॥
यथाशक्तिजपंकुर्यात्संख्ययैवप्रयत्नतः ॥ असंख्यातञ्चयज्जप्तन्तस्यतन्निष्फलम्भवेत् ॥ ५६ ॥ जप्त्वामालांशिरोदेशेप्रांशुस्थानेथवान्यसेत् ॥
स्तुतिपाठन्ततःकुर्य्यादिष्टंकामन्निवेद्यच॥५७॥स्तुतिश्चापिमहामन्त्रंसाधनंसर्वकर्म्मणाम् ॥ वक्ष्येयुवाम्महाभागौसर्वसिद्धिप्रदायकम्॥५८॥
सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके ॥ शरण्येत्र्यम्बकेगौरिनारायणिनमोस्तुते ॥ ५९ ॥ सप्तधावर्त्तनंकृत्वास्तुतिमेनांचसाधकः ॥ पञ्चप्रणा
मान्कृत्वाथऐंह्रींश्रीमितिमन्त्रकैः ॥ ६० ॥ अन्येषाम्पुरतश्चैवअधिकंवायथेच्छया ॥ योनिमुद्रांन्ततःपश्चाद्दर्शयित्वाविसर्ज्जयेत् ॥ ६१ ॥
द्वौपाणीप्रसृतीकृत्यकृत्वाचोत्तानमञ्जलिम् ॥ अंगुष्ठाग्रद्वयन्न्यस्यकनिष्ठाग्रद्वयोस्ततः ॥६२॥ अनामिकायांवामस्यतत्कनिष्ठांपुरोन्यसेत् ॥
दक्षिणस्यानामिकायांकनिष्ठान्दक्षिणस्यच ॥ ६३ ॥ अनामिकायाःपृष्ठेतुमध्यमेद्वेनिवेशयेत् ॥ द्वेतर्ज्जन्यौकनिष्ठाग्रेतदग्रेणैवयोजयेत्॥६४॥
योनिमुद्रासमाख्यातादेव्याःप्रीतिकरीमता ॥ ६५ ॥ त्रिवारन्दर्शयेत्तान्तुमूलमन्त्रेणसाधकः ॥ ताम्मुद्रांशिरसिन्यस्यमण्डलंविन्यसेत्ततः
॥ ६६ ॥ ऐशान्यामग्रहस्तेनद्वारपद्मविवर्ज्जितम् ॥ तत्रनत्वारक्तचण्डांह्रींह्रींमन्त्रेणसाधकः ॥ ६७ ॥ रक्तचण्डायैनमइतिनिर्म्माल्यन्तत्रनि
क्षिपेत् ॥ उदकेतरुमूलेवानिर्म्माल्यन्तत्रसन्त्यजेत् ॥ ६८ ॥ एवंयःपूजयेद्देवींविधानेनाशिवांनरः ॥ सोचिरेणलभेत्कामान्त्सर्वानेवमनोगता
न् ॥ ६९ ॥ अर्द्धलक्षजपञ्जप्त्वाप्रथमश्चैवसाधकः ॥ पुरश्चरेद्विशेषेणनानानैवेद्यवेदनैः ॥ ७० ॥ कुण्डम्मण्डलवत्कृत्वाचाष्टम्यांसमुपोषि

तः ॥ नवम्यांशुक्लपक्षस्यरजोभिःपञ्चभिर्नरः ॥ ७१ ॥ पूर्ववन्मण्डलंकृत्वागुरुपित्रोश्चसंनिधौ ॥ अनेनैवविधानेनपूजयित्वातुचण्डिकाम् ॥
॥ ७२ ॥ सहितैर्बिल्वपत्रैश्चअष्टोत्तरशतत्रयम् ॥ तिलैर्होमंचरेत्तस्यांसहस्रत्रितयञ्जपेत् ॥ ७३ ॥ नैवेद्यंगन्धपुष्पेचवस्त्रन्दद्याच्चयत्प्रियम् ॥
पूर्वोक्तञ्चान्यदप्यस्यैप्रदद्यात्पायसन्तथा ॥ ७४ ॥ पूजावसानेदेयंस्यात्तज्जातीयम्बलित्रयम् ॥ सिन्दूरंस्वर्णरत्नानियद्यत्स्त्रीणांविभूषणम् ॥
॥७५॥ निवेदयेद्यथाशक्त्यापुष्पमालाञ्चभूरिशः ॥ महाशुल्कंसशाल्यन्नंगव्यव्यञ्जनसंयुतम् ॥७६॥ देव्यैनवम्यांसम्पूर्णम्बलिन्दद्याद्घृता
दिभिः ॥ दक्षिणांगुरवेदद्यात्सुवर्णंगान्तथातिलम् ॥७७॥ अभिशप्तमपुत्रञ्चसावद्यंकितवन्तथा ॥ क्रियाहीनमकल्पज्ञंवामनंगुरुनिन्दकम् ॥
॥ ७८ ॥ सदामत्सरसंयुक्तंगुरुम्मन्त्रेषुवर्ज्जयेत् ॥ गुरुर्मन्त्रस्यमूलंस्यान्मूलशुद्धौतदुद्गतम् ॥ ७९ ॥ सफलञ्जायतेयस्मान्मन्त्रंयत्नात्परी
क्षयेत् ॥ शाठ्यात्क्रोधात्तुमोहाद्वानासम्मत्यागुरोर्मुखात् ॥ ८० ॥ कल्पेषुदृष्ट्वावामन्त्रंगृह्णीयाच्छ्रद्धनाथवा ॥ सब्रह्मस्तेयपापेनतामिस्रेनरके
नरः ॥ ८१ ॥ मन्वन्तरत्रयंस्थित्वापापयोनिषुजायते ॥ शठेक्रूरेचमूर्खेचच्छद्मकारिण्यभक्तिके ॥ ८२ ॥ मन्त्रन्नदूषितेदद्यात्सुबीजंविपिने
तथा ॥ लक्षेणसाधयेत्कामम्पुरश्चरणपूर्वकम् ॥८३॥ पापक्षयोभवेद्यस्मात्पुरश्चरणकर्म्मणा॥लक्षद्वयेनमन्त्रस्यजपेननरसत्तमौ ॥८४॥ त्रि
सन्ध्यासुप्रतिदिनम्बीजसङ्घातकेनच॥कविर्वाग्मीपण्डितश्चयशस्वीचप्रजायते ॥८५॥ साधकःसाधकश्रेष्ठपूजास्थानन्ततःशृणु ॥यत्रयत्रन
रः पूजान्निर्ज्जनेकुरुतेचयः ॥ ८६ ॥ तस्यादत्तेस्वयन्देवीपत्रम्पुष्पम्फलञ्जलम् ॥ शिलाप्रशस्तापूजायांस्थण्डिलन्निर्ज्जनन्तथा ॥ ८७ ॥
जपश्चोपांशुसर्वेषामुत्तमःपरिकीर्तितः ॥ अशुचिर्नमहामायाम्पूजयेत्तुकदाचन ॥ ८८ ॥ अवश्यन्तुस्मरेन्मन्त्रंयोतिभक्तियुतोनरः ॥ दन्त

रक्तेसमुत्पन्नेस्मरणञ्चनविद्यते ॥ ८९ ॥ सर्वेषामेवमन्त्राणांस्मरणान्नरकंव्रजेत् ॥ जानूर्ध्वेक्षतजेजातेनित्यंकर्मनचाचरेत् ॥ ९० ॥ नैमित्ति
कञ्चतदधःस्रवद्रक्तोनचाचरेत् ॥ सूतके चसमुत्पन्नेक्षुरकर्मणिमैथुने ॥ धूमोद्गारेतथावान्तेनित्यकर्माणिसन्त्यजेत् ॥ ९१ ॥ द्रव्येभुक्तेत्वजी
र्णेचनैवभुक्ताचकिञ्चन ॥ कर्मकुर्य्यान्नरोनित्यंसूतकेमृतकेतथा ॥ ९२ ॥ पत्रंपुष्पञ्चताम्बूलम्भेषजत्वेनकल्पितम् ॥ कणादिपिप्पल्यंतंचफ
लम्भुक्तानचाचरेत् ॥ ९३ ॥ जलस्यापिनरश्रेष्ठभोजनाद्भेषजादृते ॥ नित्यक्रियानिवर्तेतसहनैमित्तिकैःसदा ॥ ९४ ॥ जलौकांगूढपादञ्चकृ
मिगंडूपदादिकम् ॥ कामाद्धस्तेनसंस्पृश्यनित्यकर्माणिसन्त्यजेत् ॥ ९५ ॥ विशेषतःशिवापूजाम्प्रमीतपितृकोनरः ॥ यावद्वत्सरपर्य्यन्त
म्मनसापिनचाचरेत् ॥९६॥ महागुरुनिपातेतुकाम्यंकिञ्चिन्नचाचरेत् ॥ आर्त्विज्यम्ब्रह्मयज्ञञ्चश्राद्धन्देवयजञ्चयत् ॥९७॥ गुरुमाश्रिप्यविप्रञ्च
प्रह्वत्यैवचपाणिना ॥ नकुर्य्यान्नित्यकर्म्माणिरेतःपातेचभैरव॥९८॥आसनञ्चार्घपात्रञ्चभग्नमासादयेन्नतु ॥ ऊषरेकृमिसंयुक्तेस्थानेमृष्टेपिनार्च्च
येत् ॥९९॥ नीचैरासनमासाद्यशुचिःप्रयतमानसः ॥ अर्चयेच्चण्डिकान्देवीन्देवमन्यञ्चभैरव ॥१००॥ दिग्विभागेतुकौबेरीदिक्छिवाप्रीतिदा
यिनी ॥ तस्मात्तन्मुखआसीनःपूजयेच्चण्डिकांसदा ॥ १ ॥ पुष्पञ्चकृमिसम्मिश्रंविशीर्णम्भग्नमृद्गते ॥ संकेशम्मूषिकोद्धूतंयत्नेनपरिवर्ज्जयेत् ॥
॥ २ ॥ याचितम्परकीयञ्चतथापर्य्युषितञ्चयत् ॥ अन्त्यस्पृष्टम्पदास्पृष्टंयत्नेनपरिवर्जयेत् ॥ ३ ॥ इदंशिवायाःपरमम्मनोहरंकरोतियोनेनतदीय
पूजनम् ॥ सर्वाञ्छितार्थसमवाप्यचण्डिकागृहम्प्रयातानाचिरेणभैरव ॥१०४॥ इतिकालिकापुराणेऔर्वसगरसंवादेसप्तपञ्चाशोध्यायः॥५७॥

१ कणाजीरकमितिमेदिनी ।

श्रीभगवानुवाच ॥ ॥ अस्यमंत्रस्यकवचंशृणुवेतालभैरव ॥ वैष्णवीतन्त्रसञ्ज्ञस्यवैष्णव्याश्चविशेषतः ॥१॥ तत्रगन्त्राद्यक्षरन्तुवासुदेवस्व
रूपधृक् ॥ वर्णोद्वितीयोब्रह्मैवतृतीयश्चन्द्रशेखरः ॥२॥ चतुर्थोगजवक्त्रश्चपञ्चमस्तुदिवाकरः ॥ शक्तिःस्वयम्पकारश्चमहामायाजगन्मयी॥३॥
यकारस्तुमहालक्ष्मीःशेषवर्णःसरस्वती ॥ योगिनीपूर्ववर्णस्यशैलपुत्रीप्रकीर्तिता ॥४॥ द्वितीयस्यतुवर्णस्यचंडिकायोगिनीमता ॥ चण्डघण्टा
तृतीयस्यकूष्माण्डीतत्परस्यच ॥ ५ ॥ स्कन्दमातातकारस्यपस्यकात्यायनीस्वयम् ॥ कालरात्रिः सप्तमस्यमहादेवीतिसंस्थिता ॥ ६ ॥
प्रथमंवर्णकवचंयोगिनीकवचन्तथा ॥ देवौघकवचम्पश्चाद्देवीदिक्कवचन्तथा ॥ ७ ॥ ततस्तुपार्श्वकवचन्द्वितीयान्ताव्ययस्यच ॥ कवच
न्तुततःपश्चात्पड्णर्कवचन्तथा ॥ ८ ॥ अभेद्यकवचञ्चेतिसर्वत्राणपरायणम् ॥ इमानिकवचान्यष्टौयोजानातिनरोत्तमः ॥९॥ सोहमेवमहा
देवोदेवीरूपश्चशक्तिमान् ॥ अस्यवैष्णवीतन्त्रकवचस्यनारायणऋषिरीश्वरोदेवताऽनुष्टुप्छन्दःकात्यायनीदेवीसर्वकामार्थसाधनेविनियोगः ॥
अःपातुपूर्वकाष्ठायामाग्नेय्याम्पातुकःसदा ॥१०॥ पातुचोयमकाष्ठायाण्टोनैर्ऋत्याञ्चसर्वदा ॥ माम्पातुतोऽसौपाश्चात्येशक्तिर्व्वायव्यदिग्गता ॥
॥ ११ ॥ यःपातुमाञ्चोत्तरस्यामैशान्यांशस्तथावतु ॥ मूर्द्धानंरक्षतुमांसोसौबाहौमान्दक्षिणेतुकः ॥ १२ ॥ मांवामबाहौचःपातुहृदिटोमांस
दावतु ॥ तःपातुकण्ठदेशेमांकट्योःशक्तिस्तथावतु ॥ १३ ॥ यःपातुदक्षिणेपादेशोमांवामपदेतथा ॥ शैलपुत्रीतुपूर्वस्यामाग्नेय्याम्पातुचण्डि
का ॥ १४ ॥ चण्डघण्टापातुयाम्यांयमभीतिविवर्द्धिनी ॥ नैर्ऋत्येत्वथकूष्माण्डीपातुमाञ्जगताम्प्रसूः ॥ १५ ॥ स्कन्दमातापश्चिमायाम्मां
रक्षतुसदैवहि ॥ कात्यायनीमांवायव्येपातुलोकेश्वरीसदा ॥ १६ ॥ कालरात्रीतुकौबेर्य्यांसदारक्षतुमांस्वयम् ॥ महागौरीतथैशान्यांसततम्पा

तुपावनी॥१७॥ नेत्रयोर्वासुदेवोमाम्पातुनित्यंसनातनः ॥ ब्रह्मामाम्पातुवदनेपद्मयोनिरयोनिजः॥१८॥नासाभागेरक्षतुमांसर्वदाचन्द्रशेखरः॥
गजवक्त्रःस्तनयुग्मेपातुनित्यंहरात्मजः ॥ १९ ॥ वामदक्षिणपाण्योर्मान्नित्यम्पातुदिवाकरः ॥ महामायास्वयन्नाभौमाम्पातुपरमेश्वरी ॥ २० ॥
महालक्ष्मीःपातुगुह्येजानुनोश्चसरस्वती ॥ महामायापूर्वभागेनित्यंरक्षतुमांशुभा ॥ २१ ॥ अग्निज्वालातथाग्नेय्याम्पायान्नित्यंवरासिनी ॥
रुद्राणीपातुमांयाम्यान्नैर्ऋत्याञ्चण्डनायिका॥२२॥उग्रचण्डापश्चिमायाम्पातुनित्यम्महेश्वरी॥प्रचण्डापातुवायव्येकौबेर्य्यांघोररूपिणी॥२३॥
ईश्वरीचतथैशान्याम्पातुनित्यंसनातनी ॥ ऊर्द्ध्वंपातुमहामायापातवधःपरमेश्वरी ॥ २४ ॥ अग्रतःपातुमामुग्रापृष्ठतोवैष्णवीतथा ॥ ब्रह्माणी
दक्षिणेपार्श्वेनित्यंरक्षतुशोभना ॥ माहेश्वरीवामपार्श्वेनित्यम्पायाद्वृषध्वजा॥२५॥ कौमारीपर्वतेपातुवाराहीसलिलेचमाम् ॥ नारसिंहीदंष्ट्रिभये
पातुमांविपिनेषुच ॥ २६ ॥ ऐन्द्रीमाम्पातुचाकाशेतथासर्वजलेस्थले ॥ सेतुःसर्वांगुलीःपातुदेवादिःपातुकर्णयोः ॥ २७ ॥ देवान्तश्चिबुके
पातुपार्श्वयोःशक्तिपञ्चमः ॥ हापातुमान्तथैवोर्वोर्मायारक्षतुजंघयोः ॥ २८ ॥ सर्वेन्द्रियाणिमेपातुरोमकूपेषुसर्वदा ॥ त्वचिमांवैसदापातुमांश
म्भुःपातुसर्व्वदा ॥ २९ ॥ नखदन्तकरोष्ठादौरोमाम्पातुसदैवहि ॥ देवादिःपातुमाम्बस्तौदेवान्तःस्तनकक्षयोः ॥ ३० ॥ एतदादौतुयःसेतुर्बा
ह्वोमाम्पातुदेहतः ॥ आज्ञाचक्रेसुषुम्नायांषट्चक्रेहृदिसन्धिषु ॥३१॥आदिषोडशचक्रेचललाटाकाशएवच ॥ वैष्णवीतन्त्रमन्त्रोमान्नित्यंरक्षंश्च
तिष्ठतु ॥३२॥ कर्णनाडीषुसर्वासुपार्श्वकक्षाशिखासुच ॥ रुधिरस्नायुमज्जासुमस्तिष्केषुचपर्वसु ॥३३॥ द्वितीयाष्टाक्षरोमन्त्रःकवचंपातुसर्वतः ॥
रेतोवायौनाभिरन्ध्रेपृष्ठसन्धिषुसर्वतः ॥ षडक्षरस्तृतीयोयम्मन्त्रोमाम्पातुसर्वदा ॥३४॥ नासारन्ध्रेमहामायाकण्ठरन्ध्रेतुवैष्णवी ॥ सर्वसन्धि

पुमाम्पातुदुर्गादुर्गार्तिहारिणी ॥ ३५ ॥ श्रोत्रयोर्हूंम्फडित्येवंनित्यंरक्षतुकालिका ॥ नेत्रबीजत्रयन्नेत्रेसदातिष्ठतुरक्षितुम् ॥ ३६ ॥ ॐ ऐंह्रींह्रौं
नासिकायांरक्षन्तीचास्तुचण्डिका ॥ ॐह्रींहूँमांसदातारा।जिह्वामूलेतुतिष्ठतु॥३७॥ हृदितिष्ठतुमेसेतुर्ज्ञानंरक्षितुमुत्तमम्॥ॐक्षौंफट्चमहामारी
पातुमांसर्वतःसदा ॥ ३८ ॥ ॐ यूँसःप्राणान्कौशिकीमाम्प्राणात्रक्षतुरक्षिका ॥ ॐह्रींहूँमाम्भर्गदयितादेहशून्येपुपातुमाम् ॥ ३९ ॥ ॐमः
सदाशैलपुत्रीसर्वाव्रोगान्प्रमृज्यताम् ॥ ॐह्रींसःस्फेंसःफडस्त्रायसिंहव्याघ्रभयाद्रणात् ॥ ४० ॥ शिवदूतीपातुनित्यंह्रींसर्व्वास्त्रेषुतिष्ठतु ॥ ॐ
ह्राँह्रींसिश्चण्डघण्टाकर्णाच्छिद्रेपुपातुमाम् ॥४१॥ ॐह्रींसःकामेश्वरीकामानभितिष्ठतुरक्षतु॥ॐआँहूँफडुग्रचण्डारिपून्विघ्नान्विमर्द्दताम् ॥४२॥
ॐअँलापातुमान्नित्यंवैष्णवीजगदीश्वरी ॥ ॐकँब्रह्माणीपातुचक्रात् ॥ ॐचंरुद्राणीतुशक्तितः ॥ ४३ ॥ ॐटंकौमारीपातुवज्रात्ॐतंवाराहीतुका
ण्डतः ॥ ॐपंपातुनारसिंहीमांक्रव्यादेभ्यस्तथास्त्रतः ॥ ४४ ॥ शस्त्रास्त्रभ्यःसमस्तेभ्योयन्त्रेभ्योनिष्टमंत्रतः ॥ चण्डिकामांसदापातुॐयँसँ
देव्यैनमोनमः ॥ ४५ ॥ विश्वासघातकेभ्योमामैन्द्रीरक्षतुमन्मनः ॥ ॐनमोमहामायायैॐवैष्णव्यैनमोनमः ॥ रक्षमांसर्व्वभूतेभ्यःसर्व्वत्रपर
मेश्वरि ॥४६॥ आधारेवायुमार्ग्गेहृदिकमलदलेचन्द्रवत्स्मेरसूर्य्येबस्तौवह्नौसमिद्धेविशतुवरदयामन्त्रमष्टाक्षरन्तत् ॥ यद्ब्रह्मामूर्ध्निधत्तेहारिरव
तिगलेचन्द्रचूडोहृदिस्थन्तन्माम्पातुप्रधानान्निखिलमतिशयम्पद्मगर्भाभबीजम् ॥ ४७ ॥ आद्याःशेषाःस्वरौघैर्न्नमयबलवरेरस्वरेणापियुक्तैः
सानुस्वारावसिगैर्हरिहरविदितंयत्सहस्रञ्चसाष्टम् ॥ मन्त्राणांसेतुबन्धन्नित्रसतिसततंवैष्णवीतन्त्रमन्त्रेतन्माम्पायात्पवित्रम्परमपरमजम्भूतल
व्योमभागे ॥४८॥ अङ्गान्यष्टौतथाष्टौवसवइहतथैवाष्टमूर्त्तिर्दलानिप्रोक्तान्यष्टौतथाष्टौमधुमतिरचिताःसिद्धयोष्टौतथैव ॥ अष्टावष्टाष्टसंख्या

जगतिरतिकलाःक्षिप्रकाष्ठांगयोगामय्यष्टावक्षराणिक्षरतुनाहिगणोयद्धदोयस्त्वमूषाम् ॥ ४९ ॥ इतितत्कवचम्प्रोक्तन्धर्म्मकामार्थसाधकम् ॥
॥ ५० ॥ इदंरहस्यम्परमामिदंसर्वार्थसाधकम् ॥ यःसकृच्छृणुयादेतत्कवचम्मयकोदितम् ॥ ५१ ॥ ससर्वाँल्लँभतेकामान्परत्रशिवरूपताम् ॥
सकृद्यस्तुपठेदेतत्कवचम्मयकोदितम् ॥५२॥ ससर्वयज्ञस्यफलल्लँभतेनात्रसंशयः॥ संग्रामेषुजयेच्छत्रून्मातंगानिवकेसरी ॥ ५३ ॥ दहेत्तृणं
यथावह्निस्तथाशत्रून्दहेत्सदा ॥ नास्त्राणितस्यशस्त्राणिशरीरेप्रविशन्तिवै ॥५४॥ नतस्यजायतेव्याधिर्न्नचदुःखंकदाचन॥गुटिकाञ्जनपाताल
पादलेपरसाञ्जनम्॥५५॥उच्चाटनाद्यास्ताःसर्वाःप्रसीदन्तिचसिद्धयः॥वायोरिवगतिस्तस्यभवेदन्यैरवारिता ॥५६॥ दीर्घायुःकामभोगीचधन
वानभिजायते॥अष्टम्यांसँयतोभूत्वानवम्यांविधिवच्छिवाम्॥५७॥पूजयित्वाविधानेनविचिन्त्यमनसाशिवाम् ॥ योन्यसेत्कवचन्देहेतस्यपुण्य
फलंशृणु॥५८॥जितव्याधिःशतायुश्चरूपवान्गुणवान्सदा॥धनरत्नौघसम्पूर्णोविद्यावान्सचजायते॥५९॥नाग्निर्दहतितत्कायन्नापःसंक्लेदयंति
च॥नशोषयतितंवायुःक्रव्यात्तन्नहिनस्तिच॥शस्त्राणिनैनञ्छिन्दन्तिनतापयतिभास्करः ॥६०॥ नतस्यजायतेविघ्नोनास्तितस्यचसञ्ज्वरः ॥
वेतालाश्चपिशाचाश्चराक्षसागणनायकाः ॥६१॥ सर्वेतस्यवशंयान्तिभूतग्रामाश्चतुर्विधाः॥नित्यम्पठतियोभक्त्याकवचंहरनिर्मितम् ॥६२॥
सोहमेवमहादेवोमहामायाचमातृका ॥ धर्मार्थकाममोक्षाश्चतस्यनित्यंकरेस्थिताः ॥ ६३ ॥ अन्यस्यवरदःसोथैनित्यम्भवतिपण्डितः ॥
कवित्वंसत्यवादित्वंसततन्तस्यजायते ॥ ६४ ॥ वदेच्छ्लोकसहस्राणिभवेच्छ्रुतिधरस्तथा ॥ लिखितंयस्यगेहेतुकवचंभैरवस्थितम् ॥ ६५ ॥
नतस्यदुर्गतिःक्वापिजायतेतस्यदूषणम् ॥ ग्रहाश्चसर्वेतुष्यन्तिवशङ्गच्छन्तिभूमिपाः ॥६६॥ यद्राज्येकवचज्ञोस्तिजायन्तेतत्रनेतयः ॥ सेतुर्दे
वःशक्तिबीजम्पञ्चमोहायनेनमः ॥ ६७ ॥ वायुर्बलेनचैतायैद्वितीयाष्टाक्षरन्त्विदम् ॥ सेतुर्देवोथवैष्णव्यैषडक्षरमिदंस्मृतम् ॥ ६८ ॥ एतद्वयन्तु

जिह्वाग्रेसततंयस्यवर्त्तते ॥ तस्यदेवीमहामायाकायेतिष्ठतिवैसदा ॥ ६९ ॥ मन्त्राणाम्प्रणवःसेतुस्तत्सेतुःप्रणवःस्मृतः ॥ क्षरत्यनोङ्कृतः
पूर्वंपरस्ताच्चविशीर्य्यते ॥ ७० ॥ नमस्कारोमहामन्त्रोदेवइत्युच्यतेसुरैः ॥ द्विजातीनामयंमन्त्रःशूद्राणांसर्वकर्मणि ॥ ७१ ॥ अकारश्चाप्यु
कारश्चमकारश्चप्रजापतिः ॥ वेदत्रयात्समुद्धृत्यप्रणवन्निर्म्ममेपुरा ॥ ७२ ॥ सउदात्तोद्विजातीनांराज्ञांस्यादनुदात्तकः ॥ प्रचितश्चोरुजाता
नाम्मनसापितथास्मरेत् ॥ ७३ ॥ चतुर्दशस्वरोयोसौशेषओकारसञ्ज्ञकः ॥ सचानुस्वारचन्द्राभ्यांशूद्राणांसेतुरुच्यते ॥ ७४ ॥ निःसेतु
चयथातोयंक्षणान्निम्नम्प्रसर्पति ॥ मन्त्रस्तथैवानिःसेतुःक्षणात्क्षरतियज्वनाम् ॥७५॥ तस्मात्सर्वत्रमन्त्रेषुचतुर्वर्णाद्विजातयः ॥ पार्श्वयोःसेतुमा
दायजपकर्मसमारभेत्॥७६॥शूद्राणामादिसेतुर्वाद्विःसेतुर्वायथेच्छतः॥द्विःसेतवःसमाख्याताःसर्वदैवद्विजातयः॥७७॥ और्वउवाच ॥ ॥ एत
त्तेसर्वमाख्यातंकवचन्त्र्यम्बकोदितम् ॥ अभेद्यंकवचन्तत्तुकवचाष्टकमुत्तमम्॥७८॥महामायामन्त्रकल्पंकवचंमंत्रसंयुतम् ॥ षडक्षरसमायुक्त
न्त्रिषुलोकेषुदुर्लभम्॥७९॥एतत्त्वन्नृपशार्दूलनित्यम्भक्तियुतःपठन् ॥ जपन्मन्त्रञ्चवैष्णव्याःसर्वासिद्धिमवाप्स्यसि॥८०॥इतिश्रीकालिकापुरा
णेमहामायामन्त्रकल्पोनामाष्टपञ्चाशत्तमोऽध्यायः ॥५८॥ ॥ मार्कण्डेयउवाच ॥ ॥ श्रुत्वेमंसगरोराजासंवादम्भैरवेणवै ॥ वेतालेनापिभ
र्गस्यपुनरौर्वमपृच्छत ॥१॥ सगरउवाच ॥ ॥ मन्त्रंकलेवरगतंसांगम्प्रोक्तन्त्वयाद्विज ॥ अंगमन्त्राणिमेदेव्याःकथ्यन्ताम्भोद्विजोत्तम ॥२॥
तथामन्त्राणिसर्वाणिपूजास्थानानिसर्वशः ॥ तथैवोत्तरमन्त्रानिकवचानिपृथक्पृथक् ॥ ३ ॥ कामाख्यायाश्चमाहात्म्यंसरहस्यंसमन्त्रकम् ॥
यथाशशंसभगवान्महादेवउमापतिः ॥ ४ ॥ वेतालभैरवाभ्यान्तत्समाचक्ष्वसविस्तरात् ॥ शृण्वतोनहिमेतृप्तिर्जायतेमहदद्भुतम् ॥ ५ ॥

भवताकथ्यमानंहिपरङ्कौतूहलम्मम ॥ और्वउवाच ॥ शृणुत्वंराजशार्दूलयत्पुत्राभ्यामुमापतिः ॥६॥ उवाचमहदाख्यानन्तन्मोनिगदतोधुना ॥
एतद्रहस्यम्परमम्मावित्रम्पापनाशनम् ॥ परंस्वस्त्ययनम्पुंसांगर्भेपुंसवनंस्मृतम् ॥ ७ ॥ कल्याणकारकम्भद्रञ्चतुर्व्वर्गफलप्रदम् ॥ शठायच
लचित्तायनास्तिकायाजितात्मने ॥ ८ ॥ देवद्विजगुरूणाञ्चमिथ्यानिर्बन्धकारिणे ॥ नपापायाभिशस्तायखञ्जकाणादिरोगिणे ॥ ९ ॥ नक
थ्यंन्नचवादेयंश्रद्धाविरहितायच ॥ महामायामन्त्रकल्पम्प्रोक्ताताभ्यामुमापतिः ॥ १० ॥ वेतालभैरवाभ्यान्तुपुनरेवाभ्यभाषत ॥ भगवा
नुवाच ॥ अंगमन्त्रम्प्रवक्ष्यामिप्रोक्तवान्तन्त्रमुत्तमम् ॥ ११ ॥ तदेवप्रथमंविद्धिसर्व्वपूजासुसंगतम् ॥ आचान्तःशुचिताम्प्राप्तःसुस्नातोदे
वपूजने ॥ १२ ॥ पूजावेद्यावहिःस्थित्वाचतुर्हस्तान्तरेधिया ॥ गृहेवाद्वारदेशस्थःप्रणम्यशिरसागुरुम् ॥ १३ ॥ प्रणमेदिष्टदेवंस्वान्दिक्पालान
पिचेतसा ॥ यत्पूर्वमर्जितम्पापन्तद्दिनेन्यदिनेपिवा ॥ १४ ॥ प्रायश्चित्तैर्नापनुन्नन्तच्चपापंस्मरेद्धिया ॥ तत्पापस्यापनोदायमन्त्रद्वयमुदीर
येत् ॥ १५ ॥ देवित्वम्प्राकृताश्चित्तंपापाक्रान्तमभून्मम ॥ तन्निःसारयचित्तान्मेपापंहूँफट्चतेनमः ॥ १६ ॥ सूर्यःसोमोयमःकालोमहाभूता
निपञ्चवै ॥ एतेशुभाशुभस्येहकर्मणोनवसाक्षिणः ॥ १७ ॥ ततःपुनर्हूँफडितिपार्श्वमूर्द्धमधस्तथा ॥ आत्मानंक्रोधदृष्ट्याथनिरीक्ष्यसुमना
भवेत् ॥ १८ ॥ एवंकृतेप्रथमतःपापोत्सारणकर्मणि ॥ यत्स्याद्दृढतरम्पापन्तद्दूरेचावतिष्ठते ॥ १९ ॥ अतीतेपूजनेस्थानंस्वम्प्रयातिपुनश्चय
त् ॥ यत्स्यादल्पतरम्पापन्तन्नाशमुपगच्छति ॥ २० ॥ ॐअःफडितिमन्त्रेणपूजादेवीन्ततोविशेत् ॥ पूजनेत्यक्तपापस्यकामभिष्टंक्षणाद्भवे
त् ॥ २१ ॥ नाराचमुद्रयादृष्ट्वासमयासमलोकयत् ॥ पुष्पनैवेद्यगन्धादिह्रींह्रींफडितिमन्त्रकैः ॥ २२ ॥ यदात्मनानवज्ञातंसम्यक्पुष्पा

दिदूषणम् ॥ अस्पृश्यस्पर्शनंवापियदन्यायार्जितञ्चवा ॥ २३ ॥ तथानिर्माल्यसंसृष्टकीटाद्यारोहणञ्चयत् ॥ तत्सर्वन्नाशमायातिनैवेद्याद्यवलो
कनात् ॥ २४ ॥ ततोरामितिमन्त्रेणाशिखान्दीपस्यसंस्पृशेत् ॥ सतस्यसुभगोदीपोभवेत्स्पर्शनमात्रतः ॥ २५ ॥ पतंगकीटकेशादिदाहात्क
व्यादसंहतः ॥ २६ ॥ वसामज्जास्थिसम्पूतिर्यज्ञादावुपयोजनम् ॥ अज्ञातरूपन्तत्सर्वन्दोषंस्पर्शाद्विनाशयेत् ॥ २७ ॥ नारसिंहेनमन्त्रेणदेव
तीर्थेनसंस्पृशेत् ॥ पानीयङ्घटमध्यस्थंवीक्षन्नभ्युक्ष्ययाजकः ॥२८ ॥ वामेनपाणिनाधृत्वावामपार्श्वेस्थितन्तदा ॥ पात्रमाधारमन्त्रेणसंस्कुर्व
न्त्संस्पृशेज्जलम्॥२९॥यदज्ञानादपेयादिसंसृष्टिरिहसंगता ॥ यदन्यदूषणम्पात्रेतोयेवाज्ञानतोभवेत्॥३०॥जलाशयंशवस्पर्शाज्जलंस्नानाच्चसं
गतम् ॥ दूषणानिविनश्यन्तितानिवैदेवपूजने ॥ ३१ ॥ प्रजापतिसुतोहान्तप्रान्तःस्वरसमन्वितः॥ चन्द्रार्द्धबिन्दुसहितोमन्त्रोयन्नारसिंहकः॥
॥ ३२ ॥स्वसञ्ज्ञाद्यक्षरम्बिन्दुचन्द्रार्द्धपरियोजितम् ॥ आधारमन्त्रञ्जानीयात्साधकःकार्य्यसिद्धये॥३३॥ततआधारमन्त्रेणपाणिभ्यामासनं
स्वकम् ॥ आदायविनिधायाशुपुनःसंस्पृश्यपाणिना ॥ ३४ ॥ आत्ममन्त्रेणोपविशेत्तदातस्मिन्वरासने ॥ दुःशिल्पिरचितत्वादियद्वान्या
सनभूषणम् ॥ ३५ ॥ अज्ञातंविलयंयातिउपवेशात्समन्त्रकात् ॥ आहूयस्वाक्षरम्पूर्वंसोमसामिसमन्वितम् ॥ ३६ ॥ सबिन्दुकंविजानी
यादात्ममन्त्रन्तुसाधकः ॥ ततस्तुमातृकान्यासन्नादबिन्दुसमन्वितम् ॥ ३७ ॥ कुर्यात्तुमातृकामन्त्रैःस्वशरीरेविचक्षणः ॥ कल्पेषुचयदज्ञा
तम्मन्त्रोच्चारणकर्म्मणि ॥ ३८ ॥ यद्दुष्टंवातथास्पृष्टम्मात्राभ्रष्टादिदूषणम् ॥ तन्न्यस्तामातृकामन्त्रानाशयन्तिसदैवहि ॥ ३९ ॥ व्यञ्जनानि

१ प्रजापतिसुतोऽग्निस्तद्बीजंरमित्यपिप्रजापतिसुतशब्देनाभिधीयते । २ सोमसामीति सोमार्द्धसमन्वितमित्यर्थः ।

चसर्वाणितथाविष्ण्वादयःस्वराः ॥ सर्वेतेमातृकामन्त्राश्चन्द्रबिन्दुविभूषणाः ॥ ४० ॥ सर्वेयुगान्तबन्धेषुन्यस्तेषुन्यूनपूरणम् ॥ मन्त्रेकल्पे
चकुर्वन्तिविन्यस्तामातृकाःस्वयम् ॥४१॥एकमात्रोभवेद्ध्रस्वोद्विमात्रोदीर्घउच्यते ॥ प्लुतस्त्रिमात्रोविज्ञेयोवर्णाएतेव्यवस्थिताः॥४२॥सर्वेषामे
ववर्णानाम्मात्रादेव्यस्तुमातृकाः ॥ शिवदूतीप्रभृतयस्तन्यासास्तत्तनुस्थिताः ॥ ४३ ॥ पूरयन्तिचतान्यूनाँश्चतुर्वर्गन्तथाचिरात् ॥ ददत्ये
वसदारक्षांकुर्वन्तिसुरपूजने ॥ ४४ ॥ चतुर्वर्गप्रदश्चायंसर्वकामफलप्रदः ॥ सर्वदामातृकान्यासस्तुष्टिपुष्टिप्रदायकः ॥ ४५ ॥ यःकुर्यान्मातृ
कान्यासंविनापिसुरपूजनात् ॥ तस्माद्बिभेतिसततम्भूतग्रामश्चतुर्विधः ॥ ४६ ॥ तन्द्रष्टुमपिदेवाश्चस्पृहयन्तिमहौजसम् ॥ ससर्वञ्चवशंकु
र्यान्नचयातिपराभवम् ॥ ४७ ॥ कुसुमंविष्णुमन्त्रेणअंगुल्यग्रेणसाधकः ॥ विमर्द्दनार्थंगृह्णीयात्करशोधनकर्मणि ॥ ४८ ॥ उपान्तःसामि
चन्द्रेणराञ्जितःशून्यसंयुतः ॥ रुद्रान्तोपरिसंसृष्टोमन्त्रोयंवैष्णवोमतः ॥ ४९ ॥ प्रासादेनतुमन्त्रेणअंगुल्यग्रेणसाधकः ॥ गृहीत्वाचततः
कुर्यात्कराभ्याम्पुष्पमर्दनम् ॥ ५० ॥ निर्मथेत्कामबीजेनजिघ्रेद्ब्राह्मेणतत्पुनः ॥ प्रासादेनपरित्यागोदिश्यैशान्यांविशेषतः ॥ ५१ ॥ एवंकृ
तेतुकरयोर्विशुद्धिरतुलाभवेत् ॥ जलौकागूढपादादिस्पर्शाच्छुद्धिर्विशोधनात् ॥ ५२ ॥ दुर्गन्ध्युच्छिष्टसंस्पशाद्दूषणंकरयोस्तुयत् ॥ अज्ञात
रूपन्तत्सर्वंत्राशयेत्सुविधानतः ॥ ५३ ॥ अंगुल्यग्राणिशुद्धानिपुष्पाणांग्रहणाद्भवेत् ॥ तलद्वयम्मर्दनात्तुविशुद्धमभिजायते ॥ ५४ ॥
निर्मन्थनात्पाणिपृष्ठंघ्राणान्नासाग्रमुत्तमम् ॥ तीर्थानिचसमायान्तिनासिकायांकरम्प्रति ॥ ५५ ॥ तस्माद्यत्नेनकार्याणिकर्माण्येतानि

१ शिवदूतीप्रभृतयोयादेव्यस्तदभिन्नाएवाकारादिमातृकाःसर्व्वेषांव्यञ्जनवर्णानांमात्रारूपाभवन्तीत्यर्थः। २ ताइति शिवदूतीप्रभृतयइत्यर्थः।

भैरव ॥ प्रान्तादिर्वासुदेवेनवर्णेनापिचसंहितः ॥ ५६ ॥ शम्भुचूडाबिन्दुयुक्तःप्रासादश्चसउच्यते ॥ कामबीजन्तुविज्ञेयंवासुदेवेन्दुबिन्दुभिः ॥
॥ ५७ ॥ व्यञ्जनञ्चाद्यदन्तञ्चप्रान्तदन्त्यातुपूर्वकम् ॥ आद्यदन्त्यद्वयम्पश्चाव्यञ्जनम्प्रणवोत्तरम् ॥ ५८ ॥ ब्रह्मबीजमिदम्प्रोक्तंसर्वपापप्रणा
शनम् ॥ प्रणवन्दीर्घमुच्चार्यप्रथमम्मुखशुद्धये ॥ ५९ ॥ वासुदेवस्यबीजेनप्राणायामंसमाचरेत् ॥ यस्यदेवस्ययद्रूपंयथाभूषणवाहनम् ॥
॥ ६० ॥ तदेवपूजनेतस्याचिन्तयेत्पूरकादिभिः ॥ वैष्णवीतन्त्रमन्त्रस्यकण्ठाद्यंयत्पुरःसरम् ॥ ६१ ॥ तद्बीजंवासुदेवस्यपूर्णचन्द्रनिभंस
दा ॥ गंगावतारबीजेनप्रथमन्धेनुमुद्रया ॥ ६२ ॥ अमृतीकरणंकुर्यादर्घपात्राहितेजले ॥ शशिखण्डयुतःकण्ठ्यःपञ्चमीबलबीजकः ॥
॥ ६३ ॥ गंगावतारमन्त्रोयंसर्वपापप्रणाशकः ॥ मात्राद्वययुतोविष्णुर्बलबीजमुदाहृतम् ॥ ६४ ॥ अमृतीकरणेवृत्तेतोयंयद्दीयतेमृतम् ॥
भूत्वाप्रयातिदेवस्यप्रीतयेसुरपूजने ॥ ६५ ॥ गंगापिस्वयमायातिपूजापात्रजलम्प्रति ॥ अमृतीकरणंकुर्याद्धेमकामार्थसिद्धये ॥ ६६ ॥
स्वस्तिकंगोमुखम्पद्ममर्द्धस्वस्तिकमेवच ॥ पर्यंकमासनंशस्तमभीष्टसुरपूजने ॥ ६७ ॥ पादयन्त्रमिदम्प्रोक्तंसर्वमन्त्रोत्तमोत्तमम् ॥ तद्बल्ली
याद्वराहस्यबीजेनप्रथमंबुधः ॥ ६८ ॥ मायादिरग्निबीजस्यचतुर्थःसमवातिकः ॥ षष्ठस्वरोपरिचरोवाराहम्बीजमुच्यते ॥ ६९ ॥ वाराहबीज
संशुद्धम्मन्त्रपादद्वयेकृतम् ॥ पश्यन्नभीष्टदेवन्तुपाददोषन्नपश्यति ॥ ७० ॥ नयुक्तमन्यथापाददर्शनंसुरपूजने ॥ मन्त्रेणलभतेभीष्टांस्तस्मा
न्मन्त्रपरोभवेत् ॥ ७१ ॥ पाणिकच्छपिकांकुर्यात्कूर्ममन्त्रेणसाधकः ॥ तत्रसंस्कृतपुष्पेणपूजयेदात्मनोवपुः ॥ ७२ ॥ पूजितेतेनपुष्पेणदेव
त्वंस्वस्यजायते ॥ द्वितीयंवैष्णवीतन्त्रम्बीजम्बिन्द्विन्दुसंयुतम् ॥ ७३ ॥ षष्ठस्वरोपरिचरंकर्मबीजम्प्रकीर्त्तितम् ॥ दहनप्लवनस्यादौरन्ध्र

स्यदशमस्यतु ॥ ७४ ॥ भेदनंसाधकःकुर्यान्मन्त्रेणप्रणवेनतु ॥ बीजेनवासुदेवस्यआकाशेविनिधापयेत् ॥ ७५ ॥ प्राणेनसहितम्बीजन्त
त्पूर्वम्प्रतिपादितम् ॥ अज्ञाताप्रयतानान्तुमण्डलस्थानमार्जनात् ॥ ७६ ॥ द्रव्याणांविप्रकारःस्यात्संसर्गाणान्तथैवच ॥ मधुकैटभयोर्मेदः
संघातैर्दृढतांगता ॥७७॥ मेदिनीसर्वदाशुद्धासुरपूजासुसर्वतः ॥ अद्यापिसर्वेत्रिदशानस्पृशन्तिपदाक्षितिम् ॥ ७८ ॥ नचस्वीयतनुच्छायांयो
जयन्तिचभूतले ॥ तस्यदोषस्यमोक्षार्थम्मन्त्रराजंलिखेत्क्षितौ ॥ ७९ ॥ प्रोक्षणाद्वीक्षणाद्वापिशुद्धाभवतिमेदिनी ॥ वीक्षणन्धर्मबीजेनस्थ
ण्डिलस्यसमाचरेत् ॥ ८० ॥ दान्तोबलेनसंयुक्तश्चूडाबिन्दुसमन्वितः ॥ धर्मबीजमितिप्रोक्तन्धर्मकामार्थसाधनम् ॥ ८१ ॥ आदानन्धा
रणञ्चैवतथासंस्थानपूजने ॥ पूरणंसलिलेनैवनिःक्षेपोगन्धपुष्पयोः ॥ ८२ ॥ मण्डलस्याथविन्यासःपुनःपुष्पस्यसंश्रयः ॥ अमृतीकरण
म्पात्रप्रतिपत्तिरियन्नरः ॥ ८३ ॥ आनिरुद्धेनचादायअस्त्रमन्त्रेणधारणम् ॥ पात्रेतुमण्डलाभ्याशंवाग्बीजाग्रेणयोजयेत् ॥ ८४ ॥ आनिरुद्ध
म्भवेद्बीजमाद्यम्बिन्दुद्वयोत्तरम् ॥ फडन्तेनानिरुद्धन्तुअस्त्रमन्त्रम्प्रकीर्तितम् ॥ ८५ ॥ शम्भुराद्यम्बलःप्रान्तःसम्पूर्णःसहिताइमे ॥ परतः
परतःपूर्वंसमाप्यन्ताःसबिन्दुकाः ॥ ८६ ॥ तृतीयंवाग्भवम्बीजंसकलान्निष्कलाह्वयम् ॥ स्वरश्चतुर्थःसकलःसंसृष्टौबिन्दुनेन्दुना ॥ ८७ ॥
वर्गाद्यादिर्द्वितीयन्तुवाग्भवम्बीजमुच्यते ॥ कामराजाह्वयश्चैतद्धर्मकामार्थसाधनम् ॥८८॥ मनोभवस्यबीजन्तुकुण्डलीशक्तिसंयुतम् ॥ वासुदे
वेनसम्पृक्तमाद्यंवाग्भवमुच्यते ॥ ८९ ॥ इदंसारस्वतन्नामयदाद्यंवाग्भवंस्मृतम् ॥ एकैकंकामबीजादित्रिभिस्तुत्रिपुरामहः ॥९०॥ आद्यंतृतीयं
सामिन्दुविन्दुभ्यःसमलंकृतम् ॥ मदनस्यतुमन्त्रोयंकामभोगफलप्रदः॥९१॥ औदेतोरूपविन्यस्तंयत्तुभास्करसन्निभम् ॥ तद्वक्ष्येकुण्डलीश

क्तिमभेदात्तुनिगद्यते ॥ ९२ ॥ भूतापसारणंकुर्यान्मन्त्रेणानेनयाजकः ॥ यस्मिन्कृतेस्थानभूतादरंयान्तिसुरार्चने ॥ ९३ ॥ स्थितेषुतत्रभू
तषुनैवेद्यमण्डलन्तथा ॥ विलुम्पन्तिसदालुब्धानगृह्णन्तिचदेवताः ॥ ९४ ॥ तस्माद्यत्नेनकर्त्तव्यम्भूतानामपसारणम् ॥ अस्त्रमन्त्रेणसहित
न्तस्यमन्त्रमिदंस्मृतम् ॥ ९५ ॥ अपसर्पन्तुतेभूतायेभूताभूमिपालकाः ॥ भूतानामविरोधेनपूजाकर्मकरोम्यहम् ॥ ९६ ॥ अनेनस्थण्डिला
द्भूतानपसार्यार्थसाधकः ॥ ततोदिग्बन्धनंकृत्वादिग्भ्यस्तानपसारयेत् ॥ ९७ ॥ विष्णुबीजम्फडन्तेतुमन्त्रन्दिग्बन्धनेस्थितम् ॥ करेणछो
टिकापूर्वंवेष्टनम्बन्धनन्दिशः ॥९८॥ आत्मनःपूजनेनाथकर्मारम्भाधिकारिता ॥ पूजितश्चासनंयोगपीठस्यसदृशम्भवेत् ॥९९॥स्वभावतःस
दाशुद्धम्पञ्चभूतात्मकंवपुः ॥ मलपूतिसमायुक्तश्लेष्मविण्मूत्रपिच्छिलम् ॥ १०० ॥ रेतोनिष्ठीवमालाभिःस्रवद्भिरपरिष्कृतम् ॥ बीजभूतानि
चतस्यमहाभूतानिपञ्चवै ॥ १ ॥ तेषान्तुसर्वभूतानाम्बीजानान्देहसङ्गिनाम् ॥ वायुतेजःपृथिव्यम्भोवियतांशुद्धयेक्रमात् ॥ २ ॥ शोषण
न्दहनम्भस्मप्रोत्सादोमृतवर्षणम् ॥ आप्लावनञ्चकर्त्तव्यञ्चिन्तामात्रविशुद्धये ॥ ३ ॥ अण्डस्यचिन्तनाद्भेदात्तन्मध्येदेवचिन्तनात् ॥ स्वकी
यस्येष्टदेवस्यचिन्तासर्वात्मनाभवेत् ॥ ४ ॥ सोहमित्यस्यसततश्चिन्तनादेवरूपता ॥ आत्मनोजायतेसम्यक्संस्कृतिःपुष्पदानतः ॥१०५॥
अहन्देवोथनैवेद्यम्पुष्पगन्धादिकञ्चयत् ॥ पूजोपकरणार्थञ्चदेवत्वमिहजायते ॥ ६ ॥ देवाधारोह्यहन्देवोदेवंदेवाययोजयेत् ॥ सर्वेषान्दे
वतासृष्ट्याजायतेशुद्धतापिच ॥७॥ मनोजीवात्मनोःशुद्धिःप्राणायामेनजायते ॥ अन्तर्गतंयच्चमलन्तच्चशुद्धम्प्रजायते ॥८॥ गृहेचेत्पूजयेदे
वन्तदातस्यविलोकनम् ॥ कुर्यादादित्यबीजेनचतुःपार्श्वेष्वपिक्रमात् ॥९॥ हान्तःसमाप्तिसहितोवह्निबीजेनसंहितः ॥ उपान्तःसचतुर्थस्तुस

तथासबलोग्रतः॥११०॥ आदित्यबीजंकथितंसर्वरोगविनाशनम् ॥ धर्मार्थकाममोक्षाणांकारणन्तोषदायकम् ॥११॥ अशुद्धपक्षिसंयोगपक्षि
विष्ठाप्रसेचने ॥ मूषिकानान्तथास्पर्शःकृमिकीटादिसङ्गमः ॥१२॥ एवमादीनिनश्यन्तिलोकनाद्बहुदूषणम् ॥ ततस्तुयोगपीठस्यध्यानम्प्रथम
तश्चरेत्॥१३॥ध्यानमात्रंयोगपीठम्प्रविशत्येवमण्डलम् ॥ योगपीठेस्मृतेसर्वंयोगपीठमयंसमम् ॥१४॥ नयोगपीठादधिकंविद्यतेपरमासनम्॥
यस्यध्यानाज्जगद्व्याप्तंसचराचरमानुषम् ॥ ११५ ॥ तच्चिन्तनस्यमाहात्म्यंकोवावक्तुंसमुत्सहेत् ॥ चिन्तामात्रेणमानुष्यम्पश्यशोकविनाश
नम् ॥ १६ ॥ धारणाद्योगपीठन्तुचतुर्वर्गफलप्रदम् ॥ शुद्धस्फटिकसंकाशञ्चतुष्कोणञ्चतुर्वृतिम् ॥ १७ ॥ आधारशक्त्याविहितम्प्रत्यहंसूर्य
सन्निभम् ॥ आग्नेयादिषुकोणेषुचतुर्षुक्रमतःस्थितम् ॥ १८ ॥ धर्मोज्ञानन्तथैश्वर्यंवैराग्यंक्रमतःसदा ॥ पूर्वादिदिक्षुचैतानिस्थितानिक्रमतोय
था ॥ १९ ॥ अधर्मश्चतथाज्ञानमनैश्वर्यन्ततःपरम् ॥ अवैराग्यम्परन्तस्माद्धारणार्थंव्यवस्थितम् ॥ १२० ॥ तस्योपरिजलौघस्तुतस्मिन्ब्र
ह्माण्डमास्थितम् ॥ ब्रह्माण्डाभ्यन्तरेतोयंकूर्मस्तस्योपरिस्थितः॥२१॥कूर्मोपरितथानन्तः पृथ्वीतस्योपरिस्थिता॥ अनन्तगात्रसंयुक्तन्नालम्पा
तालगोचरम्॥२२॥पृथ्वीमध्येस्थितम्पद्मन्दिक्पत्रङ्गिरिकेशरम् ॥ तस्याष्टदिक्षुदिक्पालाःस्वर्गोमध्येव्यवस्थितः ॥२३॥ कर्णिकायाम्ब्रह्मलो
कोमहर्लोकादयोह्यधः ॥ स्वर्गेज्योतींषिदेवाश्चचतुर्वेदास्तदन्तरे ॥ २४ ॥ सत्त्वंरजस्तमइतिगुणाःप्रकृतिसम्भवाः ॥ सदास्थिताःपद्ममध्येप
रन्तत्त्वन्तथैवच ॥ १२५ ॥ आत्मतत्त्वन्तत्रसंस्थमूर्ध्वच्छदनमूर्ध्वतः ॥ अधोधश्छदनन्तत्रकेशराग्रेस्थितम्पुनः ॥ २६॥ सूर्याग्निचन्द्रमरु
ताम्मण्डलानिक्रमात्ततः॥शावासनंयोगपीठेसुखासनमतःपरे॥२७॥आराध्यासनमस्माच्चततश्चविमलासनम्॥मध्येविचिन्तयेत्सर्वञ्जगद्वैसच

राचरम् ॥ २८ ॥ ब्रह्मविष्णुशिवाँश्चैवभागत्रयाविनिश्चितान् ॥ आत्मानञ्चिन्तयेत्तत्रपूजनेसमुपस्थितम् ॥ २९ ॥ मण्डलंयोगपीठन्तुपद्मेप
द्मन्तुचिन्तयेत् ॥ शावादीन्यासनानीहचत्वार्यपिविचिन्तयेत् ॥ १३० ॥ योगपीठम्पृथग्ध्यात्वामण्डलेनसहैकताम् ॥ पुनर्ध्यात्वाततःपश्चा
त्पूजयेदासनन्ततः ॥ ३१ ॥ ध्यानेनयोगपीठस्ययथायद्दीयतेजलम् ॥ नैवेद्यपुष्पधूपादितत्स्वयञ्चोपतिष्ठते ॥ ३२ ॥ सर्वेदेवाःसगन्धर्वाः
सचराचरगुह्यकाः ॥ चिन्तिताःपूजिताश्चस्युर्योगपीठस्यपूजने ॥ ३३ ॥ अभीष्टदेवतापूजांविनायस्याविचिन्तनात् ॥ लभतेवैचतुर्वर्ग
न्तुष्टिःपुष्टिश्चजायते ॥ ३४ ॥ आवाहनानन्तरतःपाणिभ्यामवतारयेत् ॥ प्रागुत्तानौकरौकृत्वाऊर्ध्वमुत्क्षिप्यसान्तरौ ॥ १३५ ॥ निरन्त
रावधःकुर्यान्नामयन्पूजकस्तथा ॥ हेरम्बस्यतुबीजेनतस्मादवतरेतिच ॥ ३६ ॥ आम्रेडितेनचाभीष्टदेवानाङ्लम्बनायवै ॥ नासिकावायुनिः
साराद्धियत्स्थादेवताभवेत् ॥ ३७ ॥ एवंकृतेमण्डलेतुस्थितिस्तस्यप्रजायते ॥ खान्तःशुद्धांशुबिन्दुभ्यां हेरम्बम्बीजमुच्यते ॥ ३८ ॥ ना
शनम्विघ्नबीजानान्धर्मकामार्थसाधनम् ॥ गन्धपुष्पेतथाधूपदीपौनैवेद्यमेवच ॥ ३९ ॥ यदन्यद्दीयतेवस्त्रमलंकारादिकञ्चयत् ॥ तेषान्दैवत
मुच्चार्यकृत्वाप्रोक्षणपूजने ॥ १४० ॥ उत्सृज्यमूलमन्त्रेणप्रतिनाम्नानिवेदयेत् ॥ वरुणस्यतुबीजेनतेषाम्प्रोक्षणमाचरेत् ॥ ४१ ॥ इष्टेनमू
लमन्त्रेणतथोत्सर्गनिवेदने ॥ लपरश्चन्द्रबिन्दुभ्याम्बीजंवारुणमुच्यते ॥ ४२ ॥ विलोकनम्पूजनञ्चतथादानम्पृथक्पृथक् ॥ जपकर्मणिमा
लायाःप्रतिपत्तिरिदन्त्रयम् ॥ ४३ ॥ इष्टमन्त्रेणमालायाःप्रोक्षणम्परिकीर्तितम् ॥ बीजंगाणपतम्पूर्वमुच्चार्यतदनन्तरम् ॥ ४४ ॥ अविघ्नंकुरुमाले
त्वंगृह्णीयादित्यनेनच ॥ जपान्तेशिरसिन्यासोमालायाःपरिकीर्त्तितः ॥ १४५ ॥ स्रजमादायपाणिभ्यांश्रीबीजेनतथार्चयेत् ॥ अन्त्यदन्त्यान्तमा

त्राभ्याञ्चादिवर्गतृतीयकौ ॥४६॥ परतःपरतःपूर्वश्रीबीजम्बिन्दुनेन्दुना ॥ मालायाअवतारस्तुशिरसःक्रियतेयदा ॥४७॥ तांसमादायपाणि
भ्यांकुर्यात्सारस्वतेनवै ॥ श्रीबीजानामाद्यमाद्यंबिन्दुचन्द्रार्द्धसंयुतम् ॥ ४८ ॥ एतच्चतुष्टयम्बीजंसारस्वतमुदीरितम् ॥ पौराणिकैर्वैदिकैश्च
मूलमन्त्रेणचैवहि ॥४९॥ प्रदक्षिणाम्प्रणामञ्चकुर्याद्धर्मार्थसाधकम् ॥ भूमिंवीक्ष्यतथाभ्युक्ष्यक्षितिबीजेनपूर्वतः॥१५०॥स्पृशंस्तांशिरसाभूमि
म्प्रणमेदिष्टदेवताः ॥ समातिहीनंवाराहम्बीजम्बिन्द्विन्दुसंयुतम् ॥ ५१॥ क्षितिबीजंविजानीयाच्चतुर्वर्गप्रदायकम् ॥ दर्प्पणंव्यजनंघण्टाञ्चाम
रम्प्रोक्षयेत्पुनः ॥ ५२ ॥ नैवेद्यालोकमन्त्रेणपूर्वप्रोक्तेनभैरव ॥ ५३ ॥ नामाक्षराणिचाद्यानिचैतेषान्बिन्दुनेन्दुना ॥ ५४ ॥ तस्मैनमइति
प्रान्तेग्रहणेमन्त्रउच्यते ॥ निवेदनमथैतेषामिष्टमन्त्रेणचाचरेत् ॥ १५५ ॥ वाग्भवस्यद्वितीयेनकामबीजेनभैरव ॥ मुद्रायाबन्धनंकार्यम्मूल
मन्त्रेणदर्शनम् ॥ ५६ ॥ परित्यागन्तुमुद्रायास्ताराबीजेनचाचरेत् ॥ प्रान्तादिश्चन्द्रविन्दुभ्यांषष्ठस्वरसमन्वितः॥५७॥ ताराबीजमितिप्रोक्त
न्धर्मकामार्थसाधनम् ॥ मुदंददातियस्मात्सामुद्रातेनप्रकीर्तिता ॥ ५८ ॥ दर्शितायान्तुमुद्रायान्भवेत्पूजासमापनम् ॥ कामंमोक्षन्तथाधर्म
मर्थमोदयुतास्वयम् ॥ ५९ ॥ ददातिसाधकायाशुदेवतागन्तुमुत्सुका ॥ मुद्रान्तेतुमहामन्त्रान्पाडिमान्तसमुदीरयेत् ॥ १६० ॥ यद्दत्तंभक्ति
मात्रेणपत्रम्पुष्पम्फलञ्जलम् ॥ आवेदितञ्चनैवेद्यन्तद्गृहाणानुकम्पया ॥ ६१ ॥ आवाहनन्नजानामिनजानामिविसर्जनम् ॥ पूजाभावन्नजाना
मित्वंगतिःपरमेश्वरि ॥ ६२ ॥ कर्मणामनसावाचात्वत्तोनान्यागतिर्मम ॥ अन्तश्चरेणभूतानान्त्वंगतिःपरमेश्वरि ॥ ६३ ॥ मातर्योनिसहस्रे
षुयेषुयेषुव्रजाम्यहम् ॥ तेषुतेष्वच्युताभक्तिरच्युतेस्तुसदात्वयि ॥६४॥ देवीदात्रीचभोक्त्रीचदेवीसर्वमिदञ्जगत् ॥ देवीजयतिसर्वत्रयादेवीसोहमे

वच ॥ १६५ ॥ यदक्षरपरिभ्रष्टम्मात्राहीनञ्चयद्भवेत् ॥ तत्सर्वंक्षम्यतान्देविकस्यनस्खलितम्मनः॥६६॥ मन्त्रेषुपठितेष्वेषुस्वयमेवप्रसीदति॥
दातुन्देवीचतुर्वर्गन्नाचिरादेवभैरव ॥६७॥ ऐशान्याम्मण्डलंकुर्याद्वारपद्मविवर्जितम् ॥ विसर्जनार्थन्निर्माल्यधारिण्याःपूजनायवै ॥६८॥पाद्या
दिभिःपूजयित्वाध्यात्वानिर्माल्यधारिणीम् ॥ निःक्षिप्यतास्मिन्निर्माल्यन्मन्त्रेणतुविसर्जयेत्॥६९॥गच्छगच्छपरंस्थानंस्वस्थानम्परमेश्वरि ॥
यत्रब्रह्मादयोदेवानविदुःपरमम्पदम् ॥ १७० ॥ विसृज्यमन्त्रेणानेनततःपूरकवायुना ॥ ध्यायँस्तुमन्त्रेणानेननत्वातांस्थापयेद्धृदि ॥ ७१ ॥
तिष्ठदेविपरेस्थानेस्वस्थानेपरमेश्वरि ॥ यत्रब्रह्मादयस्सर्वेसुरास्तिष्ठन्तिमेहृदि ॥ ७२ ॥ ततएकजटाबीजैरिष्टदेवींधियास्मरन् ॥ निर्माल्य
म्मूर्ध्निगृह्णीयाद्धर्मकामार्थसाधनम् ॥ ७३ ॥ मण्डलप्रतिपत्तिन्तुततःकुर्याद्विभूतये ॥ सर्वांगुलीनामग्रौघैःपद्ममष्टदलान्वितम् ॥ ७४ ॥
निर्मन्थेत्क्षितिबीजेनमण्डलञ्चापिभैरव ॥ ततस्तुमूलमन्त्रेणसर्ववश्येनवापुनः॥१७५॥अनामिकानामग्रेणललाटमपिसंस्पृशेत् ॥ समाप्तिस
हितःप्रान्तस्ताराबीजन्ततःपरम् ॥ ७६ ॥ स्मरबीजंविसर्गेणपरतःपरतःपरम् ॥ भवेदेकजटाबीजन्धर्मकामार्थसाधनम् ॥ ७७ ॥
ततोभास्करबीजेनसहितेनात्मनापुनः ॥ मन्त्रेणभास्करायार्घ्यमच्छिद्रार्थन्निवेदयेत् ॥ ७८ ॥ नमोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे ॥
जगत्सवित्रेशुचयेसवित्रेकर्मदायिने ॥ ७९ ॥ ततः कृताञ्जलिर्भूत्वापठित्वामन्त्रमीरितम् ॥ एकाग्रमनसावाग्भिरच्छिद्रमवधारयेत् ॥
॥ १८० ॥ यज्ञाच्छिद्रन्तपश्छिद्रंयच्छिद्रम्पूजनेमम ॥ सर्वन्तदाच्छिद्रमस्तुभास्करस्यप्रसादतः ॥ ८१ ॥ ततस्तुपुष्पनैवेद्यतोयपत्रादिक
ञ्चयत् ॥ देवीबीजेनतत्सर्वम्पुनरेवविलोकयेत् ॥ ८२ ॥ हस्तेनचक्षुषावापियत्रयत्रकृतःपुरा ॥ मन्त्रन्यासस्तत्रतत्रविसृष्टिरमुनाभवेत् ॥

॥ ८३ ॥ प्रान्तादिपञ्चमोवह्निबीजषष्ठस्वराहितः ॥ तथोपान्तंवाग्भवाद्यन्दुर्गाबीजम्प्रचक्षते ॥ ८४ ॥ स्थण्डिलेज्वलदग्नौचतोयेसूर्यमरीचिषु ॥ प्रतिमासुचशुद्धासुशालग्रामशिलासुच ॥ १८५ ॥ शिवलिंगशिलायान्तुपूजाकार्याविभूतये ॥ सर्वत्रमण्डलन्यासंकुर्यादेकाग्रमानसः॥ ८६ ॥ योगपीठस्यबीजेनस्थण्डिलादिषुसाधकः ॥ वासुदेवस्यरुद्रस्यब्रह्मणोमिहिरस्यच ॥ ८७ ॥ कुर्यात्सर्वत्रपूजासुप्रतिपत्तिमिमाम्बुधः ॥ एवंयःपूजयेद्विष्णुममीभिःप्रतिपत्तिभिः ॥ ८८ ॥ चतुर्वर्गप्रदस्तस्यनचिराज्जायतेहरिः ॥ शिवोवामिहिरोवापियेन्येलम्बोदरादयः ॥ ८९ ॥ प्रसीदन्तिसुराःसर्वेपूजायाविधिनामुना ॥ विशेषतोमहादेवीमहामायाजगन्मयी ॥१९०॥ प्रतिपत्तिमिमान्नित्यंस्पृहयत्येवपूजने ॥ एवंयःकुरुतेपूजांसम्यक्सफलभाग्भवेत्॥९१॥ एतैर्विहीनायापूजाततोल्पाल्पम्फलम्भवेत् ॥ अंगहीनस्तुपुरुषोनसम्यग्याज्ञिकोयथा ॥९२॥ अंगैर्हीनातथापूजानसम्यक्फलभाग्भवेत् ॥ इदंरहस्यम्परमामिदंस्वस्त्ययनम्परम् ॥ ९३ ॥ मन्त्रवेदमयंशुद्धंसर्वपापप्रणाशनम् ॥ यः श्रावयेद्ब्राह्मणसन्निधानेश्राद्धेषुयज्ञेसुरपूजनेषु॥९४॥ सम्यक्फलन्तस्यलभेत्सकर्मणोविनापिपूजान्तदनन्तमश्नुते ॥ १९५ ॥ इति श्रीकालिकापुराणेउत्तरतन्त्रेएकोनषष्टितमोध्यायः ॥ ५९ ॥ श्रीभगवानुवाच ॥ देव्यास्तन्त्रंविशेषेणशृणुतंसाम्प्रतंयुवाम् ॥ येनचाराधितादेवीनचिराद्वरदाभवेत् ॥ १ ॥ पूर्वतन्त्राद्विशेषेणतथावैतन्त्रमुत्तरम् ॥ विशेषेणचसामान्यात्कथितम्भवतोःपुरा ॥ २ ॥ पुनर्देव्याविशेषेणपूजायांभक्तिकर्माणि ॥ यानितन्त्राणिशेषाणितानिवक्ष्याम्यहंपुनः ॥ ३ ॥ यः कुर्यात्तुमहामायाभक्तिमेकाग्रमानसः ॥ अंगिनावाङ्गिमन्त्रेणतेनकार्यमिदंशुभम् ॥ ४ ॥ फलम्पुष्पञ्चताम्बूलमन्नपानादिकञ्चयत् ॥ अदत्त्वातुमहादेव्यैनभोक्तव्यंकदाचन ॥ ५ ॥ पथिवापर्वताग्रेवासभायाम

पिसाधकः ॥ यथातथानिवेद्यैवस्वमर्थमुपकल्पयेत् ॥६॥ दृष्ट्वैवमदिराभाण्डंरक्तवर्णास्तथास्त्रियः ॥ सिंहंशवंरक्तपद्मंव्याघ्रवारणसंगमम् ॥७॥
गुरुंराजानमथवामहामायान्ततोनमेत ॥ पतिव्रतायाम्भार्यायांसदैवऋतुसंगमः ॥८॥ क्रियतेचण्डिकान्ध्यात्वातदाकार्य्योविभूतये॥शान्तिक
म्पौष्टिकम्चापितथेष्टापूर्तकर्मणी ॥९॥ यदाकुर्यात्तदानत्वादेवीयात्रांसमाचरेत् ॥ तौर्यत्रिकंयदापश्येत्केवलंगीतमेववा ॥ १० ॥ तच्चदेव्यैनिवेद्यै
वकर्त्तव्यंस्वोपयोजनम् ॥ यदेवभूषणंवासोमलयोद्भवमेववा ॥११॥ स्वकायेपरियुञ्जीततत्रमन्त्रन्धियान्यसेत् ॥ व्यायामेचविधानेचसभायां
वाजलेस्थले ॥ १२ ॥ यत्रयत्रस्वयंगच्छेत्तत्रदेवींसदास्मरेत् ॥ यद्यत्कर्मतुपूजांगंतत्तन्मंत्रेणचाचरेत् ॥ १३ ॥ मंत्रहीनम्पूजनांगंकर्मयत्तत्तु
निष्फलम् ॥ यस्मिन्कर्मणियोद्दिष्टोमंत्रःपूजासुभैरव ॥ १४ ॥ नैवेद्यालोकमंत्रेणतत्तत्कर्मसमाचरेत् ॥ देव्यास्तुमण्डलन्यासमिष्टमंत्रेण
चाचरेत् ॥ १५ ॥ पूजांतेमण्डलंलिप्त्वातिलकंतेनकारयेत् ॥ सर्ववश्येनमंत्रेणधर्मकामार्थदायिना ॥ १६ ॥ बलिदानेबलिंच्छित्त्वाखड्ग
स्थैरुधिरैःस्वकैः ॥ सर्ववश्येनमंत्रेणललाटेतिलकन्न्यसेत् ॥ १७ ॥ जगद्वशेभवेत्तस्यचतुर्थःकस्यवाह्निना ॥ षष्ठस्वरेणसंयुक्तःकलाबिन्दुसम
न्वितः ॥१८॥ अथोपांतस्थकारांतःसपरोपितथापुनः ॥ द्विर्मोहीतिहकारस्यतुर्योद्विस्वरसंयुतः ॥१९॥तृतीयवर्गप्रान्तेनतृतीयस्वरसंज्ञिना ॥
पूरितान्तोद्विधावर्णस्तथावादिचतुर्थकः ॥ २० ॥ स्वरोद्वितीयश्चतथाक्षोभशब्दःपुरःसरः ॥ पुरेतिसहितःसोपिमित्रंशत्रुश्चराक्षसः ॥ २१ ॥
दक्षप्रजातथाराजासर्वशास्त्रइतिश्रुतः ॥ विनापिपूजनंकुर्याद्घोरहस्तिलकन्नरः ॥ २२ ॥ मंत्रेणानेनसततंसर्वन्तस्यवशेभवेत् ॥ राजावाराजपु
त्रोवास्त्रियोवायक्षराक्षसाः ॥ २३ ॥ सर्वेतस्यवशंयांतिभूतग्रामाश्चतुर्विधाः ॥ प्रवासेपथिवादुर्गेस्थानाप्राप्तौजलेपिवा ॥ २४ ॥ कारागारे

निवद्धोवाप्रायोवेशगतोपिवा ॥ कुर्यात्तत्रमहामायापूजांवैमानसीम्बुधः ॥ २५ ॥ मनोभयेसमुत्पन्नेसिंहव्याघ्रसमाकुले ॥ परचक्रागमेवापि
कुर्यान्मानसपूजनम् ॥ २६ ॥ मनसाहृदयस्यान्तर्ध्यात्वायोगाख्यपीठकम् ॥ तत्रैवपृथिवीमध्येपूजांतत्रसमाचरेत् ॥ २७ ॥ मैत्रंप्रसाधनं
स्नानन्दन्तधावनकर्मवै ॥ अन्यच्चसर्वम्मनसाकृत्वाकुर्याच्चपूजनम् ॥ २८ ॥ पश्चात्पुष्पादिभिःपूजाबाहिर्देशेविधीयते ॥ तथाहृद्यपिकर्त्तव्या
सर्वाश्चप्रतिपत्तयः ॥ २९ ॥ अष्टम्यांसततन्देवीयाजकःस्यात्सदाव्रती ॥ नवम्यान्तुतथापूजाकर्त्तव्यानिजशोणितैः ॥ ३० ॥ लिङ्गस्थाम्पू
जयेद्देवीम्पुस्तकस्थान्तथैवच ॥ स्थण्डिलस्थाम्महामायाम्पादुकाप्रतिमासुच ॥ ३१ ॥ चित्रेचत्रिंशिखेखड्गेजलस्थांवापिपूजयेत् ॥ पञ्चा
शदंगुलंखड्गंत्रिशिखञ्चत्रिशूलकम् ॥ ३२ ॥ शिलायाम्पर्वतस्याग्रेतथापर्वतगह्वरे ॥ देवींसम्पूजयेन्नित्यम्भक्तिश्रद्धासमन्वितः ॥ ३३ ॥
वाराणस्यांसदापूजासम्पूर्णफलदायिनी ॥ ततस्तद्विगुणाप्रोक्तापुरुषोत्तमसन्निधौ ॥ ३४ ॥ ततोपिद्विगुणाप्रोक्ताद्वारवत्यांविशेषतः ॥ सर्व
क्षेत्रेषुतीर्थेषुपूजाद्वारवतीसमा ॥ ३५ ॥ विन्ध्येशतगुणाप्रोक्तागंगायामपितत्समा ॥ आर्यावर्त्तेमध्यदेशेब्रह्मावर्त्तेतथैवच ॥ ३६ ॥ विन्ध्यव
त्फलदापूजाप्रयागेपुष्करेतथा ॥ ततश्चतुर्गुणाप्रोक्ताकरतोयानदीजले ॥ ३७ ॥ तस्माच्चतुर्गुणफलानान्दिकुण्डेचभैरव ॥ ततश्चतुर्गुणाप्रो
क्ताजल्पिपेश्वरसन्निधौ ॥ ३८ ॥ तत्रसिद्धेश्वरीयोनौततोपिद्विगुणास्मृता ॥ ततश्चतुर्गुणाप्रोक्तालौहित्यनदपाथसि ॥ ३९ ॥
तत्समाकामरूपेतुसर्वत्रैवजलेस्थले ॥ सर्वश्रेष्ठोयथाविष्णुर्लक्ष्मीःसर्वोत्तमायथा ॥ ४० ॥ देवीपूजातथाशस्ताकामरूपेसुरालये ॥ देवीक्षेत्रं
कामरूपम्विद्यतेऽन्यन्नतत्समम् ॥ ४१ ॥ अन्यत्रविरलादेवीकामरूपेगृहेगृहे ॥ ततःशतगुणाप्रोक्तानीलकूटस्यमस्तके ॥ ४२ ॥ ततोपिद्वि

गुणाप्रोक्ताहेरुकेशिवलिंगके ॥ ततोपिद्विगुणाप्रोक्ताशैलपुत्र्यादियोनिषु ॥ ४३ ॥ ततःशतगुणाप्रोक्ताकामाख्यायोनिमण्डले ॥ कामाख्या
याम्महामायापूजांयः कृतवान्त्सकृत् ॥ ४४ ॥ सचेहलभतेकामान्परत्रशिवरूपताम् ॥ नतस्यसदृशोन्योस्तिकृत्यन्तस्यनविद्यते ॥ ४५ ॥
वाञ्छितार्थमवाप्येहचिरायुराभिजायते ॥ वायोरिवगतिस्तस्यभवेदन्यैरबाधिता ॥ ४६ ॥ संग्रामेशास्त्रवादेवादुर्जयःसचजायते ॥ वैष्णवी
तन्त्रमन्त्रेणकामाख्यायोनिमण्डले ॥ ४७ ॥ सकृत्तुपूजनंकृत्वाफलंशतगुणंलभेत् ॥ मूलमूर्तिर्महामायायोगनिद्राजगन्मयी ॥ ४८ ॥
तस्यास्तुवैष्णवीतन्त्रम्मन्त्रंप्राक्प्रतिपादितम् ॥ अन्यायामूर्तयःप्रोक्ताःशैलपुत्र्यादयोपराः॥४९॥तस्याएवविभागास्तास्तच्छरीरविनिर्गताः॥
निःसरन्तियथानित्यंसूर्यबिम्बान्मरीचयः ॥ ५० ॥ देव्यास्तथोग्रचण्डाद्यामहामायाशरीरतः ॥ तासामेवांगरूपाणिवक्तव्यानिमयातव ॥
॥ ५१ ॥ एकैवतुमहामायाकार्यार्थम्भिन्नतांगता ॥ कामाख्यातुमहामायामूलमूर्तिःप्रगीयते ॥ ५२ ॥ पीठैर्भिन्नाह्वयासातुमहामायाप्रगी
यते ॥ एकएवयथाविष्णुर्नित्यत्वाद्धिसनातनः ॥ जनानामर्दनात्सोपिजनार्दनइतिश्रुतः ॥ ५३ ॥ तथैवसामहामायाकामार्थसंगतागिरौ ॥
कामाख्येतिसदादेवैर्गद्यतेसततन्त्रैः ॥ ५४ ॥ यथाहिपुरुषःकोपिच्छत्रीछत्रग्रहाद्भवेत् ॥ स्नापकःस्नानकालेवैकामाख्यापितथाह्वया ॥ ५५ ॥
महामायाशरीरन्तुकामार्थसमुपस्थितम् ॥ लोहितैःकुंकुमैःपीतंकामार्थमुपयोजितैः ॥५६ ॥ खड्गन्त्यक्त्वाकामकालेसागृह्णातिस्रजंस्वयम् ॥
यदातुत्यक्तकामासातदास्यादसिधारिणी ॥ ५७ ॥ कामकालेशिवप्रेतेन्यस्तलोहितपंकजे ॥ रमतेत्यक्तकामातुसितप्रेतोपरिस्थिता ॥
॥५८॥ तथैवेतस्ततोगत्यासिंहस्थाकामदाभवेत् ॥ कदाचित्सासितप्रेतेकदाचिद्रक्तपंकजे ॥ कदाचित्केसरीपृष्ठेरमतेकामरूपिणी ॥ ५९ ॥

यदालोहितपद्मस्थातदाग्रेकेशरीचरः ॥ यदाप्रेतगतादेवीतदाग्रेन्यन्निरीक्षते ॥ ६० ॥ महामायास्वरूपेणयदासावरदाभवेत् ॥ पूजाकालेतदा
प्रेतपद्मसिंहोपरिस्थिता ॥ ६१ ॥ रक्तपद्मेयदाध्यायेत्तदाग्रेचिन्तयेद्धरिम् ॥ यदाध्यायेद्धरौचान्यद्वयमग्रेविचिन्तयेत् ॥ ६२ ॥ त्रिषुध्यातेषु
युग पत्प्रेतपद्महरौक्रमात्॥ स्थितेषुकामदादेवीतेषुध्यायेतकामदाम् ॥६३॥ एकैकस्मिन्नपितथायथावच्चिन्तयेच्छिवाम्॥एकासमस्ताजगताम्प्र
कृतिःसायतस्ततः ॥६४॥ विष्णुब्रह्मशिवैर्देवैर्द्धियतेसाजगन्मयी ॥ सितप्रेतोमहादेवोब्रह्मालोहितपंकजम् ॥ ६५ ॥ हरिर्हरिस्तुविज्ञेयोवाहना
निमहौजसः ॥ स्वमूर्त्यावाहनत्वन्तुतेषांयन्मान्नयुज्यते ॥ ६६ ॥ तस्मान्मूर्त्यन्तरंकृत्वावाहनत्वंगतास्त्रयः ॥ यस्मिन्यस्मिन्महामायाप्रीणा
तिसततांशिवा ॥६७॥ तेनतेनैवरूपेणआसनान्यभवँस्त्रयः॥ सिंहोपरिस्थितम्पद्मंरक्तन्तस्योर्द्धगःशवः॥६८॥ तस्योपरिमहामायावरदाभयदा
यिनी ॥ एवंरूपेणयोध्यात्वापूजयेत्सततांशिवाम् ॥ ६९ ॥ ब्रह्मविष्णुशिवास्तेनपूजिताःस्युरसंशयम् ॥ एवंसदामहामायाकामाख्याचैकरू
पिणी॥७०॥ ध्यानतोरूपतोभिन्नातस्मात्तान्तत्रपूजयेत् ॥ एवंविशेषतन्त्राणिदुर्गायाःकथितानिवाम् ॥७१॥अंगमन्त्राणितस्यास्तुश्रूयताम्नर
सत्तमौ॥७२॥ इतिश्रीकालिकापुराणेषष्टितमोध्यायः॥६०॥ श्रीभगवानुवाच ॥ अंगमन्त्राण्यहंवक्ष्येचण्डिकायाविशेषतः ॥ यैःसमाराधिता
देवीचतुर्वर्गप्रदाभवेत् ॥ १ ॥ तालव्यान्तोयुतःषष्ठस्वरबिन्द्विन्दुवह्निभिः ॥ तथोपान्तोयुतस्त्वेतैराद्यंवाग्भवमेवच ॥ २ ॥ नेत्रबीजञ्चण्डि
कायास्त्रयमेतत्प्रकीर्त्तितम् ॥ वामलालाटदाक्षिण्यनेत्रेषुत्रितयंक्रमात् ॥ ३ ॥ धर्मार्थकाममोक्षाणांसर्वदाकारणम्परम् ॥ मंत्रमेतन्महागुह्यन्दु
र्गाबीजमितिस्मृतम् ॥ ४ ॥ यदाकात्यायनमुनेराश्रमेषुदिवौकसाम् ॥ तेजोभिर्द्धृतकायाभूद्देवीदेवौघसंस्तुता ॥ तदानेत्रत्रयाद्देव्यामूलमू

र्त्तिर्विनिःसृता ॥ ५ ॥ तेजोमयीजगद्धात्रीमहिषासुरघातिनी ॥ तेजोभिःसर्वदेवानांसाधृत्वावपुरुत्तमम् ॥ ६ ॥ अस्त्राण्यनेकान्यादायदेवै
र्दत्तानिभागशः ॥ सगणंसानुबन्धञ्चसामात्यबलवाहनम् ॥ ब्रह्माद्यैःसंस्तुतादेवीजघानमहिषासुरम् ॥ ७ ॥ हतेतुमहिषेदेवीपूजिताऽत्रिदशै
स्ततः ॥ अनेनैवतुमन्त्रेणलोकेख्यातिञ्चसागता ॥ ८ ॥ ततःप्रभृतिसामूर्त्तिःसर्वैःसर्वत्रपूज्यते ॥ मूलमूर्त्तिःसुगुप्ताभूत्स्वमूर्त्त्याख्याऽतिमा
गता ॥ ९ ॥ देवानांवरदानेनब्रह्माद्यैरुपयोजनात् ॥ यन्मूर्त्तिःपूज्यतेसर्वैस्ताम्मूर्तिंशृणुभैरव ॥ १० ॥ जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखरा
म् ॥ लोचनत्रयसंयुक्ताम्पत्रेन्दुसदृशाननाम् ॥ ११ ॥ तप्तकाञ्चनवर्णाभांसुप्रतिष्ठांसुलोचनाम् ॥ नवयौवनसम्पन्नांसर्वाभरणभूषिताम् ॥
॥ १२ ॥ सुचारुदशनान्तीक्ष्णाम्पीनोन्नतपयोधराम् ॥ त्रिभंगस्थानसंस्थानांमहिषासुरमर्दिनीम् ॥ १३ ॥ मृडालायतसंस्पर्शदशबाहुसम
न्विताम् ॥ त्रिशूलन्दक्षिणेदेयङ्खड्गञ्चक्रंक्रमादधः ॥ १४ ॥ तीक्ष्णबाणन्तथाशक्तिम्बाहुसंघेषुसंगताम् ॥ खेटकम्पूर्णचापञ्चपाशञ्चांकुश
मूर्ध्वतः ॥ १५ ॥ घण्टाञ्चपरशुञ्चापिवामेधःप्रतियोजयेत् ॥ अधस्तान्महिषन्तद्वद्विशिरस्कम्प्रदर्शयेत् ॥ १६ ॥ शिरश्छेदोद्भवन्तद्वद्दानवंख
ड्गपाणिनम् ॥ हृदिशूलेननिर्भिन्नन्तिर्यग्दन्ताविभूषितम् ॥ १७ ॥ रक्तरक्तीकृतांगञ्चरक्तविस्फुरितेक्षणम् ॥ वेष्टितन्नागपाशेनभृकुटीकुटि
लाननम् ॥ १८ ॥ सपाशवामहस्तेनधृतकेशञ्चदुर्गया ॥ वमद्रुधिरवक्त्रञ्चदेव्याःसिंहंप्रदर्शयेत् ॥ १९ ॥ देव्यास्तुदक्षिणम्पादंसमंसिंहोपरि
स्थितम् ॥ किञ्चिदर्द्धन्तथावाममङ्गुष्ठम्महिषोपरि ॥ २० ॥ उग्रचण्डाप्रचण्डाचचण्डोग्राचण्डनायिका ॥ चण्डाचण्डवतीचैवचामुण्डाच
ण्डिकातथा ॥ २१ ॥ आभिश्शक्तिभिरष्टाभिःसततम्परिवेष्टिताम् ॥ चिन्तयेत्सततन्देवीन्धर्मकामार्त्थमोक्षदाम् ॥ २२ ॥ एतस्याश्चांगम

न्त्रन्तुदुर्गातन्त्रमितिश्रुतम् ॥ शृणुष्वैकमनाभूत्वाधर्मकामार्थसाधनम् ॥ २३ ॥ वह्निभार्यास्वरःषष्ठोहान्तःप्रान्तोग्निरेवच ॥ दुर्गाद्विरितिसो
ङ्गारन्दुर्गामन्त्रमितिश्रुतम् ॥ २४ ॥ रवौमकरराशिस्थेयाभवेत्सितपंचमी ॥ तस्यामनेनमन्त्रेणसम्पूज्यविधिवाच्छिवाम् ॥२५॥ शुक्लाष्टम्या
म्पुनर्देवीम्पूजयित्वायथाविधि ॥ नवम्यांबलिदानानिप्रभूतानिसमाचरेत् ॥ २६ ॥ सन्ध्यायांचबलिंकुर्यान्निजगात्रासृगुक्षितम् ॥ एवङ्कृतेतु
कल्याणैर्युक्तोनित्यम्प्रमोदते ॥ २७ ॥ पुत्रपौत्रसमृद्धस्तुधनधान्यसमृद्धिभिः ॥ दीर्घायुःसर्वसुभगोलोकेस्मिन्त्सचजायते ॥ २८ ॥ सिता
ष्टम्यान्तुचैत्रस्यपुष्पैस्तत्कालसम्भवैः ॥ अशोकैरपियःकुर्यान्मन्त्रेणानेनपूजनम् ॥ २९ ॥ नतस्यजायतेशोकोरोगोवाप्यथदुर्गतिः ॥ ज्येष्ठे
तुशुक्लपक्षस्यअष्टम्यांसमुपोषितः ॥ ३० ॥ नवम्यांसतिलैरन्नैर्यावकैरथमोदकैः ॥ क्षीरैराज्यैस्तथाक्षौद्रैःशर्कराभिःसपिष्टकैः ॥ ३१ ॥ ना
नापशूनांरुधिरैर्मांसैरपिचपूजयेत् ॥ ततोदशम्यांशुक्लायामद्भिस्तुतिलमिश्रितैः ॥ ३२ ॥ दुर्गातन्त्रेणमन्त्रेणदातव्यमञ्जलित्रयम् ॥ एवंकृते
दशम्यान्तुयत्पापन्दशजन्मभिः ॥ ३३ ॥ कृतन्तत्प्रलयंयातिदीर्घायुरपिजायते ॥ आषाढेशुक्लपक्षस्ययाष्टमीश्रावणस्यच ॥ ३४ ॥ पवि
त्रारोपणंकुर्याद्देवीप्रीतिकरम्परम् ॥ दुर्गातन्त्रेणमन्त्रेणदुर्गाबीजेनभैरव ॥३५॥ वैष्णवीतन्त्रमन्त्रेणपवित्रारोपणंचरेत् ॥ विशेषाच्छ्रावणम्प्रा
प्यदेव्याःकुर्यात्पवित्रकम् ॥ ३६ ॥ सर्वेषामेवदेवानाम्पवित्रारोपणंचरेत् ॥ आषाढेश्रावणेवापिसंवत्सरफलप्रदम् ॥ ३७ ॥ प्रतिपद्धनदस्यो
क्तापवित्रारोपणेतिथिः॥द्वितीयातुश्रियोदेव्यास्तिथीनामुत्तमास्मृता॥३८॥तृतीयाभवभाविन्याश्चतुर्थीतत्सुतस्यच पञ्चमीसोमराजस्यषष्ठीप्रो
क्तागुहस्यच ॥३९॥ सप्तमीभास्करस्योक्तादुर्गायाश्चतथाष्टमी ॥ मातॄणान्नवमीप्रोक्तात्रासुकेर्दशमीमता ॥ ४० ॥ एकादशीऋषीणांचद्वादशी

चक्रपाणिनः ॥ त्रयोदशीत्वनंगस्यममचैवचतुर्दशी ॥ ४१ ॥ ब्रह्मणोदिक्पतीनांचपौर्णमासीतिथिर्मता ॥ पवित्रारोपणंयोवैदेवा
नान्नसमाचरेत् ॥४२॥ तस्यसांवत्सरीपूजाफलंहरतिकेशवः ॥ तस्माद्यत्नेनकर्त्तव्यम्पवित्रारोपणम्परम् ॥ ४३ ॥ कृतेबहुफलप्राप्तिस्तत्पूजास
फलाभवेत् ॥ पवित्रंयेनसूत्रेणयथाकार्यंविजानता॥४४॥तच्छृणुष्वप्रमाणन्तुवचनान्ममभैरव ॥ प्रथमन्दर्भसूत्रंचपद्मसूत्रन्ततःपरम् ॥४५॥
ततःक्षौमंसुपुण्यंस्यात्कार्पासकमतःपरम् ॥ पट्टसूत्रन्तथान्येनपवित्राणिनकारयेत् ॥ ४६ ॥ विचित्राणिपवित्राणिकर्त्तव्यानितुयत्नतः ॥
गन्धमाल्यैःसुरभिभीराचितानियथोदितम् ॥ ४७ ॥ कन्याचकर्त्तयेत्सूत्रम्प्रमदाचपतिव्रता ॥ विधवासाधुशीलावादुःशीलानाहिकर्त्तयेत् ॥
॥ ४८ ॥ यत्सूचिभिन्नन्दग्धंचभस्मधूमाभिगुण्ठितम् ॥ तद्वर्जनीयंयत्नेनसूत्रमस्मिन्पावित्रके ॥ ४९ ॥ उपयुक्तंचाखुजग्धम्मद्यरक्तादिदू
षितम् ॥ मलिनंनीलरक्तंचप्रयत्नेनविवर्जयेत् ॥ ५० ॥ सूत्रैःपवित्रंकुर्वीतकनिष्ठोत्तममध्यमम् ॥ कनिष्ठंयत्पवित्रन्तुसप्तविंशतितन्तुभिः
॥ ५१ ॥ मर्त्यलोकेयशःकीर्तिः सुखसौभाग्यवर्द्धनम् ॥ चतुःपंचाशताप्रोक्तन्तन्तूनाम्मध्यमंपरम् ॥ ५२ ॥ दिव्यभोगावहम्पुण्यं
स्वर्गमोक्षप्रदायकम् ॥ उत्तमञ्चैवतन्तूनामष्टोत्तरशतेनवै ॥ ५३ ॥ तद्दत्वातुमहादेव्यैशिवसायुज्यमाप्नुयात् ॥ उत्तमम्वासुदेवाय
दद्याद्यादिपवित्रकम् ॥ ५४ ॥ तदायातिहरेर्लोकंसाधकोनात्रसंशयः ॥ अष्टोत्तरसहस्रन्तुरत्नमालेतिगीयते ॥ ५५ ॥ पवित्रन्तुमहादेव्याभु
क्तिमुक्तिप्रदायकम् ॥ रत्नमालान्तुयोयच्छेन्महादेव्यैपवित्रकम् ॥ ५६ ॥ कल्पकोटिसहस्राणिस्वर्गेस्थित्वाशिवोभवेत् ॥ एतत्तुनागहाराख्यं
शङ्करस्यपवित्रकम् ॥ ५७ ॥ अष्टोत्तरसहस्रेणतन्तुनासुमनोहरम् ॥ यःप्रयच्छतिमह्यन्तुसयावाँस्तन्तुसञ्चयः ॥ ५८ ॥ तावत्कल्पसहस्राणि

ममलोकेप्रमोदते ॥ अष्टोत्तरसहस्रेणवनमालाहरेःस्मृता ॥ ५९ ॥ तन्तूनान्तस्यदानेनाविष्णुसायुज्यमाप्नुयात् ॥ यत्कनिष्ठम्पवित्रन्तुना
भिमात्रम्भवेत्तुतत् ॥ ६० ॥ द्वादशग्रन्थिसंयुक्तमात्ममानेनयोजयेत् ॥ ऊरुप्रमाणम्मध्यंस्याद्ग्रन्थीनान्तत्रयोजयेत् ॥ ६१ ॥ चतुर्विंशति
मप्यस्यमानमात्मनएवच ॥ पवित्रमुत्तमंप्रोक्तञ्जानुमात्रञ्चभैरव ॥ ६२ ॥ षट्त्रिंशत्तत्तुग्रन्थीनांयोजयेदात्ममानतः ॥ शतमष्टोत्तरंकार्यंग्र
न्थीनांसुविधानतः ॥ ६३ ॥ नागहाराह्वयन्तद्वदन्येषुचाविधानतः ॥ पवित्रंक्रियतेयेनसूत्रेणग्रन्थयःपुनः ॥ ६४ ॥ तदन्यवर्णसूत्रेण
कर्त्तव्यालक्षणान्विता ॥ ग्रन्थिस्तुसप्ताभिःकुर्याद्वेष्टनैस्तुकनिष्ठके ॥ ६५ ॥ द्विगुणैर्मध्यमेकुर्यात्त्रिगुणैरुत्तमेतथा ॥ अधिवास्यपवित्राणिपूर्व
स्मिन्दिवसेततः ॥ ६६ ॥ मन्त्रन्यासम्पवित्रेतुकुर्यात्तत्रापरेहनि ॥ दुर्गाबीजेनमंत्रेणमन्त्रन्यासन्द्विजश्चरेत् ॥ ६७ ॥ वैष्णवी
तन्त्रमन्त्रेणकुर्युरन्येचभैरव ॥ प्रतिग्रन्थिस्वयंकुर्यान्मन्त्रन्यासम्विचक्षणः ॥ ६८ ॥ अंगुष्ठाग्रेणजपनम्मालायामिहभैरव ॥ यावन्तो
ग्रन्थयश्चात्रतावन्त्येवचसन्न्यसेत् ॥ ६९ ॥ मन्त्राणितस्यतेनस्यादेवांगोपनियोजनम् ॥ दुर्गातन्त्रेणमन्त्रेणतत्त्वन्यासन्तुकारये
त् ॥ ७० ॥ एकत्रन्यस्यसकलंयज्ञपात्रेपवित्रकम् ॥ तस्मिन्निधायगन्धादिपुष्पाणिचसुशोभनम् ॥ ७१ ॥ तत्त्वन्यासन्ततःकुर्यादंगु
ल्यग्रेणभैरव ॥ विष्णोस्तुमूलमन्त्रेणतत्त्वन्यासन्तुकारयेत् ॥ इदंविष्णुरितिप्रोक्तम्मन्त्रन्यासन्द्विजस्यहि ॥ ७२ ॥ शूद्राणांमन्त्रविन्यासे
मन्त्रोवैद्वादशाक्षरः ॥ प्रासादेनतुमन्त्रेणतत्त्वन्यासोममस्मृतः ॥ ७३ ॥ अनेनमन्त्रन्यासश्चदानञ्चानेनकारयेत् ॥ कुंकुमोशीरखर्जूरैश्चन्दना
दिविलेपनैः ॥ ७४ ॥ पवित्राणिविलिप्याथतत्त्वन्यासन्तुयोजयेत् ॥ सम्पूज्यमण्डलेदेवींविधिवत्प्रयतोनरः ॥ ७५ ॥ वैष्णवीतन्त्रमन्त्रेण

दुर्गातन्त्रेणभैरव ॥ दुर्गाबीजेनदद्यात्तुदेव्यामूर्ध्निपवित्रकम् ॥ ७६ ॥ यस्यदेवस्ययःप्रोक्तस्तस्यतेनैवमण्डलम् ॥ यस्ययस्यतुयोमन्त्रोयथा
ध्यानादिपूजनम् ॥ ७७ ॥ तत्तत्तेनैवमन्त्रेणपूजयित्वाप्रयत्नतः ॥ तस्यैवबीजमन्त्राभ्याम्मूर्ध्निदद्यात्पवित्रकम् ॥ ७८ ॥ पवित्रम्ममयोदद्या
द्देवेभ्यश्चपवित्रकम् ॥ सर्वेषामेवदेवानांसम्पूर्णार्त्थश्चभैरव ॥ ७९ ॥ अग्निर्ब्रह्माभवानीचगजवक्त्रोमहोरगः ॥ स्कन्दोभानुर्मातृगणोदिक्पाला
श्चनवग्रहाः ॥ ८० ॥ एतान्घटेषुप्रत्येकम्पूजयित्वायथाविधि ॥ पवित्रम्मूर्ध्निचैकैकन्दद्यादेभ्यःसमाहितः ॥ ८१ ॥ पञ्चगव्यचरुंकृत्वादे
व्यैदत्त्वाहुतित्रयम् ॥ तेनैवविष्णवेदत्त्वाशम्भवेचयथाविधि॥८२॥आज्यैरष्टोत्तरशतंतिलैराज्यैस्तथैवच ॥ अष्टोत्तरशतन्दद्यान्महादेव्यैचसा
धकः ॥ ८३ ॥ एवमेवविधानेनविष्णवादीनांचसाधकः ॥ पवित्रारोपणंकुर्याद्धर्म्मकामार्थसिद्धये ॥८४॥ नैवेद्यैर्विविधैःपेयैर्वटपिष्टकमोदकैः ॥
कूष्माण्डैर्नारिकेलैश्चखर्जूरैःपनसैस्तथा ॥ ८५ ॥ आम्रदाडिमकर्कारुद्राक्षादिविविधैःफलैः ॥ भक्ष्यभोज्यादिभिःसर्वैर्मत्स्यैर्म्मांसैस्तथौदनैः॥
॥ ८६ ॥ गन्धैःपुष्पैस्तथाधूपैर्दीपैश्चसुमनोहरैः ॥ वासोभिर्भूषणैश्चैवभवानीसाधकोजपेत् ॥ ८७ ॥ नटनर्त्तकसंघैश्चवेश्याभिश्चैवभैरव ॥
नृत्यगीतैःसमुदितोजागरंकारयेन्निशि ॥ ८८ ॥ भोजयेद्ब्राह्मणाँश्चापिज्ञातीनापिद्विजातिभिः ॥ पवित्रारोपणेवृत्तेदक्षिणामुपदापयेत् ॥ ८९॥
हिरण्यङ्गान्तिलघृतंवासोवाशाकमेववा ॥ इमम्मन्त्रन्ततःपश्चात्साधकःसमुदीरयेत् ॥ ९० ॥ मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ॥
इयंसांवत्सरीपूजातवास्तुपरमेश्वरि ॥ ९१ ॥ ततोविसर्जयेद्देवीम्पूजाभिःप्रतिपत्तिभिः ॥ एवंकृतेपवित्राणान्दानेदेव्यायथाविधि ॥ ९२ ॥
संवत्सरस्ययापूजासंपूर्णावत्सराद्भवेत् ॥ कल्पकोटिशतंयावद्देवीगेहेवसेन्नरः ॥ ९३ ॥ तत्रापिसुखसौभाग्यसमृद्धिरतुलाभवेत् ॥ ९४ ॥

इतिश्रीकालिकापुराणेएकषष्टितमोध्यायः ॥ ६१ ॥ ॥ श्रीभगवानुवाच ॥ ॥ दुर्गातन्त्रेणमन्त्रेणकुर्याद्दुर्गामहोत्सवम् ॥ महानवम्यांशर
दिबलिदानन्नृपादयः ॥ १ ॥ आश्विनस्यतुशुक्लस्यभवेद्याअष्टमीतिथिः ॥ महाष्टमीतिसाप्रोक्तादेव्याःप्रीतिकरीपरा ॥२॥ ततोनुनवमीयास्या
त्सामहानवमीस्मृता ॥ सातिथिःसर्वलोकानाम्पूजनीयाशिवप्रिया ॥ ३ ॥ अनयोर्वत्सपूजायांविशेषंशृणुभैरव ॥ सम्पूज्यमण्डलेदेवींविधिव
त्प्रयतोनरः ॥ ४ ॥ वैष्णवीतन्त्रमन्त्रेणदुर्गातन्त्रेणभैरव ॥ मूर्तिभेदेयथादेवीपूजांगृह्णातिभूतये ॥५॥ कन्यासंस्थेरवौवत्सशुक्लामारभ्यनन्दि
काम् ॥ अयाचिताशीनक्ताशीएकाशीत्वथचापदः ॥ प्रातःस्नायीजितद्वन्द्वस्त्रिकालंशिवपूजकः ॥ ६ ॥ जपहोमसमायुक्तोभोजयेच्चकुमा
रिकाः ॥ बोधयेद्बिल्वशाखासुषष्ठ्यान्देवीफलेषुच ॥ सप्तम्यांबिल्वशाखान्तामाहृत्यप्रतिपूजयेत् ॥ ७ ॥ पुनःपूजान्तथाष्टम्यांविशेषेण
समाचरेत् ॥ जागरञ्चस्वयंकुर्याद्बलिदानम्महानिशि ॥ ८ ॥ प्रभूतबलिदानन्तुनवम्यांविधिवच्चरेत् ॥ ध्यायेद्दशभुजान्देवींदुर्गा
तन्त्रेणपूजयेत् ॥ ९ ॥ विसर्जनन्दशम्यान्तुकुर्याद्वैसाधकोत्तमः ॥ कृत्वाविसर्जनन्तस्यान्तिथौनक्तंसमाचरेत् ॥ १० ॥ यदातुषो
डशभुजाम्महामायाम्प्रपूजयेत् ॥ दुर्गातन्त्रेणमन्त्रेणविशेषन्तत्रवैशृणु ॥ ११ ॥ कन्यायांकृष्णपक्षस्यएकादश्यामुपोषितः ॥
द्वादश्यामेकभक्तन्तुनक्तंकुर्यात्परेहनि ॥ १२ ॥ चतुर्दश्याम्महामायाम्बोधयित्वाविधानतः ॥ गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः ॥
॥ १३ ॥ अयाचितम्बुधःकुर्यादुपवासम्परेहनि ॥ एवमेवव्रतंकुर्याद्यावद्वैनवमीभवेत् ॥ १४ ॥ ज्येष्ठायाञ्चसमभ्यर्च्यमूलेन
प्रतिपूजयेत् ॥ उत्तरेणार्चनङ्कृत्वाश्रवणान्तोविसर्जयेत् ॥ १५ ॥ यदात्वष्टादशभुजांमहामायाम्प्रपूजयेत् ॥ दुर्गातन्त्रेणमन्त्रेणतत्रापिशृणुभै

रव ॥ १६ ॥ कन्यायांकृष्णपक्षस्यपूजयित्वार्द्धभेदिवा ॥ नवम्याम्बोधयेद्देवींगीतवादित्रनिस्वनैः ॥ १७ ॥ शुक्लपक्षेचतुर्थ्यान्तुदेवीकेशवि
मोचनम् ॥ प्रातरेवतुपञ्चम्यांस्नापयेत्तुशुभैर्जलैः ॥ १८ ॥ सप्तम्याम्पत्रिकापूजाअष्टम्याश्चाप्युपोषणम् ॥ पूजाजागरणञ्चैवनवम्यांविधिवद्ब
लिः ॥ १९ ॥ सम्प्रेषणन्दशम्यान्तुक्रीडाकौतुकमंगलैः ॥ नीराजनन्दशम्यान्तुबलवृद्धिकरम्महत् ॥ २० ॥ यदावैवैष्णवीन्देवीम्महामाया
ञ्जगन्मयीम् ॥ पूजयेत्तत्रचतदाविशेषंशृणुभैरव ॥ २१ ॥ कन्यासंस्थेरवौपूजायाशुक्लातिथिरष्टमी ॥ तस्यांरात्रौपूजितव्यामहाविभवविस्तरैः
॥ २२ ॥ नवम्याम्बलिदानन्तुकर्त्तव्यंवैयथाविधि ॥ जपंहोमञ्चविधिवत्कुर्यात्तत्रविभूतये ॥ २३ ॥ सम्पूजयेन्महादेवीमष्टपुष्पिकयानरः ॥
रामस्यानुग्रहार्थायरावणस्यवधायच ॥ २४ ॥ रात्रावेवमहादेवीब्रह्मणाबोधितापुरा ॥ ततस्तुत्यक्तनिद्रासानन्दायामाश्विनेसिते ॥ २५ ॥
जगामनगरींलङ्कांयत्रासीद्राघवःपुरा ॥ तत्रगत्वामहादेवीतदातौरामरावणौ ॥२६॥युद्धेनियोजयामासस्वयमन्तर्हिताम्बिका॥रक्षसांवानराणा
ञ्चजग्ध्वासामांसशोणिते ॥ २७ ॥ रामरावणयोर्युद्धंसप्ताहंसान्ययोजयेत् ॥ व्यतीतेसप्तमेरात्रौनवम्यांरावणन्ततः ॥ २८ ॥ रामेणघातया
मासमहामायाजगन्मयी ॥ यावत्तयोःस्वयन्देवीयुद्धकेलिमुदैक्षत ॥ २९ ॥ तावत्तुसप्तरात्राणिसर्वैर्देवैःसुपूजिता ॥ निहतेरावणेवीरेनवम्यां
सकलैःसुरैः ॥ ३० ॥ विशेषपूजान्दुर्गायाश्चक्रेलोकपितामहः ॥ ततःसम्प्रेषितादेवीदशम्यांशाबरोत्सवैः ॥ ३१ ॥ शक्रोपिदेवसेनायानीराज
नमथाकरोत् ॥ शान्त्यर्थंसुरसैन्यानान्देवराज्यस्यवृद्धये ॥ ३२ ॥ रामरावणबाणेनयुद्धञ्चावेक्ष्यभीतिदम् ॥ तृतीयायान्तुलंकायाःपूर्वोत्तरदि
शिस्थितम् ॥ ३३ ॥ स्वातीनक्षत्रयुक्तायाम्भीतिंसुरबलम्महत् ॥ शान्त्यर्थंवरयामासदेवेन्द्रोवचनाद्धरेः ॥ ३४ ॥ ततस्तुश्रवणेनाथदशम्याञ्च

ण्डिकांशुभाम् ॥ विसृज्यचक्रेशान्त्यर्थम्बलनीराजनंहरिः ॥ ३५ ॥ नीराजितबलःशक्रस्तत्रारामश्चराघवम् ॥ सम्प्राप्यप्रययौस्वर्गंसहदेवैः
शचीपतिः ॥ ३६ ॥ इतिवृत्तम्पुराकल्पेमनोःस्वायम्भुवेन्तरे ॥ प्रादुर्भूतादशभुजादेवीदेवाहितायवै ॥ ३७ ॥ नृणान्त्रेतायुगस्यादौजगतांहि
तकाम्यया ॥ पुराकल्पेयथावृत्तम्प्रतिकल्पन्तथातथा॥३८॥ प्रवर्त्ततेस्वयन्देवीदैत्यानान्नाशनायवै ॥ प्रतिकल्पम्भवेद्रामोरावणश्चापिराक्षसः
॥ ३९ ॥ तथैवजायतेयुद्धन्तथात्रिदशसंगमः ॥ एवंरामसहस्राणिरावणानांसहस्रशः ॥ ४० ॥ भवितव्यानिभूतानितथादेवीप्रवर्त्तते ॥ पूज
यन्तिसुरास्सर्वेबलन्नीराजयन्त्यपि ॥ ४१ ॥ तथैवचनराःसर्वेकुर्य्युःपूजांयथाविधि ॥ बलनीराजनंराजाकुर्याद्बलविवृद्धये ॥ ४२ ॥ दिव्या
लंकारयुक्ताभिर्वारुणीभिःप्रवर्त्तनम् ॥ कर्त्तव्यंनृत्यगीतानिक्रीडाकौतुकमंगलैः ॥ ४३ ॥ मोदकःपिष्टकैःपेयैर्भक्ष्यभौज्यैरनेकशः ॥ कूष्मा
ण्डैर्नारिकेलैश्चखर्जूरैःपनसैस्तथा ॥ ४४ ॥ द्राक्षामलकशाण्डिल्यैःप्लीहैश्चकरुणैस्तथा ॥ कशेरुक्रमुकैर्मूलैःसजम्बूतिन्दुकादिभिः॥४५॥
गव्यैर्गुडैस्तथामांसैर्मद्यैर्म्मधुभिरेवच ॥ बालप्रियैश्चनैवेद्यैर्लाजाक्षतफलादिभिः ॥ ४६ ॥ इक्षुदण्डैःसिताभिश्चलवलीनागरंगकैः ॥ अजा
भिर्महिषैर्मेषैरात्मशोणितसञ्चयैः ॥ ४७ ॥ पक्ष्यादिबलिजातीयैस्तथानानाविधमृगः ॥ पूजयेच्चजगद्धात्रीम्मांसशोणितकर्दमैः ॥ ४८ ॥
रात्रौस्कन्दविशाखस्यकृत्वापिष्टकपुत्रिकाम् ॥ पजयेच्छत्रुनाशायदुर्गायाःप्रीतयेतथा ॥ ४९ ॥ होमश्चसतिलैराज्यैर्मांसैरपितथाचरेत् ॥
उग्रचण्डादिकाःपूज्यास्तथाष्टौयोगिनीःशुभाः ॥ ५० ॥ योगिन्यश्चचतुःषष्टिस्तथावैकोटियोगिनीः ॥ नवदुर्गास्तथापज्यादेव्याःसन्निहिताः
शुभाः ॥ ५१ ॥ जयन्त्यादिर्गन्धपुष्पैस्तादेव्यामूर्त्तयोयतः ॥ देव्याःसर्वाणिचास्त्राणिभूषणानितथैवच ॥ ५२ ॥ अंगप्रत्यंगयुक्तानिवाहनं

सिंहमेवच ॥ महिषासुरमर्दिन्याःपजयेद्भूतयेसदा ॥ ५३ ॥ पुराकल्पेमहादेवीमनोःस्वायम्भुवेन्तरे ॥ नृणांकृतयुतस्यादौसर्वदेवैःस्तुतासदा॥
॥ ५४ ॥ महिषासुरनाशायजगतांहितकाम्यया ॥ योगनिद्रामहामायाजगद्धात्रीजगन्मयी ॥ भुजैःषोडशभिर्युक्ताभद्रकालीतिविश्रुता ॥
॥ ५५ ॥ क्षीरोदस्योत्तरेतीरेबिभ्रतीविपुलान्तनुम् ॥ अतसीपुष्पवर्णाभाज्वलत्काञ्चनकुण्डला ॥ ५६ ॥ जटाजूटसखण्डेन्दुमुकुटत्रयभूषि
ता ॥ नागहारेणसहितास्वर्णहाराविभूषिता ॥ ५७ ॥ शूलञ्चक्रञ्चखड्गञ्चशंखम्बाणन्तथैवच ॥ शक्तिंवज्रञ्चदण्डञ्चनित्यन्दक्षिणबाहुभिः ॥
॥ ५८ ॥ बिभ्रतीसततन्देवीविकाशिदशनोज्वला ॥ खेटकञ्चर्मचापञ्चपाशञ्चांकुशमेवच ॥ ५९ ॥ घण्टाम्पर्शुञ्चमुशलम्बिभ्रतीवामपाणि
भिः ॥ सिंहस्थानयनैरक्तवर्णैस्त्रिभिरतिज्वला ॥ ६० ॥ शूलेनमहिषम्भित्त्वातिष्ठन्तीपरमेश्वरी ॥ वामपादेनचाक्रम्यतत्रदेवीजगन्मयी ॥
॥ ६१ ॥ तान्दृष्ट्वासकलादेवाःप्रणम्यपरमेश्वरीम् ॥ नोचुःकिञ्चनतन्दृष्ट्वानिहतम्महिषासुरम् ॥ ६२ ॥ ततःप्रोवाचदेवाँस्तान्ब्रह्मादीन्परमे
श्वरी ॥ स्मितप्रभिन्नवदनाविकाशिवदनोज्ज्वला ॥ ६३ ॥ गच्छन्तुभोःसुरगणाजम्बूद्वीपान्तरम्प्रति ॥ हिमवत्पर्व्वतासन्नेवरंकात्यायनाश्रम
म् ॥६४॥तत्रैवभवतांसाध्यम्भविष्यतिनसंशयः ॥ इत्युक्त्वासामहादेवीतत्रैवान्तरधीयत ॥ ६५ ॥ देवाअपितदाजग्मुःकात्यायनमुनेःपुरम् ॥
आश्रमम्प्रतितेगत्वाविस्मयाविष्टमानसाः ॥ ६६ ॥ निहतोमहिषोदेव्यादिष्टोस्माभिर्यदर्थतः ॥ स्तुताचैषामहादेवीजगद्धात्रीजगन्मयी
॥ ६७ ॥ किमर्थमाहसादेवीगन्तुंकात्यायनाश्रमम् ॥ किमन्यद्वाञ्छितंकार्यमस्माकंवाभविष्यति ॥ ६८ ॥ इतिब्रुवन्तस्तेसर्वेग
च्छन्तिस्मपरस्परम् ॥ हिमवत्पर्वतासन्नम्मुनिङ्कात्यायनाश्रमम् ॥ ६९ ॥ तत्रसेन्द्राः सदिक्पालाब्रह्मविष्णुशिवास्तथा ॥ निषे

दुःसुचिरम्प्रीतादुर्गादर्शनलालसाः ॥ ७० ॥ ततोरुद्रगणाःसर्वेमहिषासुरचेष्टितम् ॥ आगत्यकथयामासुर्देवलोकपराभवम् ॥ ७१ ॥
ततस्तत्रमहाकोपम्ब्रह्माविष्णुशिवादयः ॥ चक्रुःकोन्योस्तिमहिषोहतोदेव्यासदानवः ॥ ७२ ॥ पुनर्येनेहक्रियतेजगद्विध्वंसनम्भृशम् ॥
इतिप्रकुप्यतान्तेषांशरीरेभ्यःपृथक्पृथक् ॥ ७३ ॥ निश्चक्रमुश्चतेजाँसिशक्तिरूपाणितत्क्षणात् ॥ तत्तेजोभिर्द्धृतवपुर्देवीकात्यायनेनवै ॥
॥ ७४ ॥ सन्धुक्षितापूजिताचतेनकात्यायनीस्मृता ॥ ततस्तैर्नवमन्त्रेणदशबाहुयुतेनवै ॥ ७५ ॥ पश्चाज्जघानमहिषञ्जगद्धात्रीजगन्मयी ॥ यदास्तुतामहादेवीबोधिताचाश्विनस्यच ॥ ७६ ॥ चतुर्दशीकृष्णपक्षेप्रादुर्भूताजगन्मयी ॥ देवानान्तेजसाम्मूर्तिःशुक्लपक्षेसुशोभने ॥ ७७ ॥ सप्तम्यांसाकरोद्देवीअष्टम्यान्तैरलंकृता ॥ नवम्यामुपहारैस्तुपूजितामहिषासुरम् ॥ ७८ ॥ निजघानदशम्यान्तुविसृष्टान्तर्हिताशिवा ॥ ७९ ॥ ॥ मार्कण्डेयउवाच ॥ श्रुत्वेमांसगरोराजादेव्याःसंगतिमुत्तमाम् ॥ संशयालुश्चतद्रूपेपुनरौर्वमपृच्छत ॥ ८० ॥
सगरउवाच ॥ यदिपश्चान्महादेवीजघानमहिषासुरम् ॥ कथम्पूर्वम्भद्रकालीरूपाभून्महिषासुरम् ॥ ८१ ॥ तथाहिदर्शनंतस्याःपादाक्रान्तश्चकारच ॥ हृदिशूलेननिर्भिन्नन्ददृशुःसकलाःसुराः ॥ ८२ ॥ एवन्तुसंशयञ्छिन्धिमुनिश्रेष्ठममाधुना ॥ ॥ और्वउवाच ॥ शृणुत्वन्नृपशार्दूलभद्रकालीयथापुरा ॥ ८३ ॥ प्रादुर्भूतामहामायामहिषेणसहैवतु ॥ महिषासुरएवासौनिद्रायान्त्रिशिपर्वतः ॥ ८४ ॥ स्वप्नम्प्रददृशेवीरोदारुणंघोरदर्शनम् ॥ महामायाभद्रकालीछित्त्वाखड्गेनमेशिवम् ॥ ८५ ॥ पपौतस्यचरक्तानिव्यादितास्यातिभीषणा ॥ ततःप्रातर्भयुतःसदैत्योमहिषासुरः ॥ ८६ ॥ तामेवपूजयामाससुचिरंसानुगस्तदा ॥ आराधितातदादेवीमहिषेणासुरेणवै ॥ ८७ ॥ प्रादुर्भूताभद्रकाली

भुजैःषोडशभिर्युता ॥ ततःप्रणम्यमहिषोमहामायाञ्जगन्मयीम् ॥ ८८ ॥ उवाचेदंवचोनम्रमूर्तिर्भक्तियुतोसुरः ॥ ॥ महिषउवाच ॥
देविखड्गेनसञ्छिद्यशोणितानिशिरोमम ॥ ८९ ॥ त्वयाभुक्तानिदृष्टानिमयास्वप्नेननिश्चितम् ॥ अवश्यन्तुत्वयाकार्यम्मयाज्ञातम्प्रमाणतः ॥
॥ ९० ॥ एतद्रुधिरपानम्मेतत्रैकन्देहिमेवरम् ॥ वद्ध्यस्तवाहन्नात्रास्तिसंशयःपरमेश्वरि ॥ ९१ ॥ ममापितत्रनोदुःखन्नियतिःकेनलंघ्यते ॥
किन्तुत्वयैवसहितःशम्भुराराधितःपुरा ॥ ९२ ॥ ममपित्रामदर्थेनजातःपश्चादहन्ततः ॥ मयाप्याराधितःशम्भुःप्राप्ताश्चेष्टास्तथाविधाः ॥ ९३ ॥
मन्वन्तरत्रयंयावदासुरंराज्यमुत्तमम् ॥ अकंटकम्मयाभुक्तमनुतापोनविद्यते ॥ ९४ ॥ कात्यायनेनमुनिनाशप्तोहंशिष्यकारणात् ॥ सीमन्ति
नीविनाशन्तेकरिष्यतिनसंशयः ॥ ९५ ॥ पुरामुनिन्तपस्यन्तंरौद्राश्वन्नामसत्तमम् ॥ मुनेःकात्यायनाख्यस्याशिष्यंहिमवदन्तिके ॥ ९६ ॥
दिव्यस्त्रीरूपमतुलंकृत्वाहंकौतुकात्तदा ॥ मयासम्मोहितोविप्रोत्यजत्सद्यस्तदातपः ॥ ९७ ॥ नदूरात्संस्थितेनाहम्मुनिनाकात्यमुनुना ॥ ज्ञात्वामा
यान्तदाशप्तःशिष्यार्थेक्रोधवह्निना ॥ ९८ ॥ यस्मात्त्वयामेशिष्योयम्मोहितस्तपसश्च्युतः ॥ कृतस्त्वयास्त्रीरूपेणतत्त्वांस्त्रीनिहनिष्यति ॥
॥ ९९ ॥ इतिमांशप्तवान्पूर्वम्मुनिःकात्यायनःस्वयम् ॥ तस्यशापस्यकालोयमागत्यसमुपस्थितः ॥ १०० ॥ देवेन्द्रत्वंमयाप्राप्तम्भुक्तंत्रिभुवनंसमम् ॥
किंञ्चिन्नशोच्यम्मेत्रास्तिवाञ्छनीयंहियन्मया ॥ १ ॥ तस्मात्त्वाम्वैप्रपन्नोहम्प्रार्थ्यंशेषंहियन्मम ॥ तद्देहिदेविदुर्गेत्वम्भूयस्तुभ्यन्नमोनमः ॥ २ ॥
देव्युवाच ॥ ॥ प्रार्थनीयोवरोयस्तेतम्वृणुष्वमहाऽसुर ॥ दास्यामितेवरम्प्रार्थ्यंसंशयोनात्रविद्यते ॥ ३ ॥ ॥ महिषउवाच ॥ ॥ यज्ञ
भागमहम्भोक्तुमिच्छामित्वत्प्रसादतः ॥ यथामखेषुसर्वेषुपूज्योहंस्यांतथाकुरु ॥ ४ ॥ त्वत्पादसेवान्नत्यक्ष्येयावत्सूर्यःप्रवर्त्तते ॥ एवम्वरद्वयन्देहि

यदिदेयोवरोमम ॥ ५ ॥ देव्युवाच ॥ यज्ञभागाःसुरेभ्यस्तुकल्पितावैपृथक्पृथक् ॥ भागोनविद्यतेचान्योयन्दास्यामितवाऽधुना ॥ ६ ॥
किन्तुत्वयिमयायुद्धेनिहतेमहिषासुर ॥ नैवत्यक्षसिमत्पादंसततन्नात्रसंशयः ॥ ७ ॥ ममप्रवर्त्ततेपूजायत्रयत्रचतत्रते ॥ पूज्याश्चिन्त्यश्चतत्रैवका
यायत्तवदानव ॥ ८ ॥ इतिश्रुत्वावचस्तस्याःप्रत्यूषेमहिषासुरः ॥ वरम्प्राप्येहमुदितःप्रसन्नवदनस्तदा ॥ ९ ॥ उग्रचण्डेभद्रकालिदुर्गेदेवि
नमोस्तुते ॥ प्रभूतामूर्त्तयोदेविभवत्यांसकलात्मिकाः ॥ ११० ॥ काभिस्तेमूर्तिभिःपूज्योयज्ञेहम्परमेश्वरि ॥ तत्समाचक्ष्वयादिमेभवत्येहकृपा
कृता ॥ ११ ॥ ॥ देव्युवाच ॥ ॥ यानिनामानिप्रोक्तानित्वयेहमहिषासुर ॥ तासुमूर्त्तिषुसंपृष्टःपूज्योलोकेभविष्यति ॥ १२ ॥ उग्रच
ण्डेतियामूर्तिर्भद्रकालीह्यहम्पुनः ॥ ययामूर्त्त्यात्वांहनिष्येसाद्दुर्गेतिप्रकीर्त्तिता ॥ १३ ॥ एतासुमूर्तिषुसदापादलग्नोनृणाम्भवान् ॥ पूज्यो
भविष्यतिस्वर्गेदेवानामपिरक्षसाम् ॥ १४ ॥ आदिसृष्टावुग्रचण्डामूर्त्त्यात्वान्निहतःपुरा ॥ द्वितीयसृष्टौतुभवान्भद्रकाल्यामयाहतः ॥ १५ ॥
दुर्गारूपेणाधुनात्वांहनिष्यामिसहानुगम् ॥ किन्तुपूर्वन्नगृहीतस्त्वम्मयापादयोस्तले ॥ १६ ॥ अधुनाप्रार्थितवरोगृहीतःपूर्वकामयोः ॥ गृहीत
व्यश्चपश्चात्वंयज्ञभागोपभुक्तये ॥१७॥ और्वउवाच ॥ इत्युक्त्वासामहामायाउग्रचण्डाह्वयांतनुम् ॥ दर्शयामासचतदामहिषायासुरायवै ॥१८॥
यामूर्तिःषोडशभुजाभद्रकालीतिविश्रुता ॥ तथैवमूर्तिम्बाहुभ्यांअपराभ्यान्तुबिभ्रती ॥ १९ ॥ दक्षिणाधोगदांवामपाणिनापानपात्रकम् ॥
सुरापूर्णंचशिरसामुण्डमालंबिलेशयम् ॥ १२० ॥ भिन्नाञ्जनचयप्रख्याप्रचण्डासिंहवाहिनी ॥ रक्तनेत्रामहाकायायुक्ताष्टादशबाहुभिः॥२१॥
उग्रचण्डाभद्रकालीदेव्यामूर्त्तीद्वयन्तथा ॥ महिषःप्रणनामाशुदृष्ट्वाविस्मयमागतः ॥ २२ ॥ ततोयथापदाक्रम्यनिहतोमाहिषासुरः ॥ तथैवज

गृहेपादतलेदेवीद्वियंतुतम् ॥ २३ ॥ हृदिशूलेननिर्भिन्नम्माहिषंविशिरस्ककम् ॥ गृहीतकेशन्देव्यातुनिर्यदन्त्रविभूषितम् ॥ २४ ॥ वमद्रक्त
म्महाकायन्दृष्ट्वापूर्वतनुंस्वकम् ॥ भयम्प्राप्यासुरःसोथशुशोचचमुमोहच ॥ २५ ॥ ततस्तुक्षणमात्मानंसंस्तभ्यसतुदानवः ॥ प्रणम्यवचन
न्देवीमिदमाहसगद्गदम् ॥ २६ ॥ ॥ माहिषउवाच ॥ ॥ यदिदेविप्रसन्नासियज्ञभागाश्चकल्पिताः ॥ तदाममान्यदानाशएवमेतद्ध
वेन्नहि ॥ २७ ॥ यथाहन्नसुरैःसार्द्धङ्करिष्येवैरमद्भुतम् ॥ तथामांकुरुभोदेविनजन्मप्रलभेयथा ॥ २८ ॥ ॥ देव्युवाच ॥ आराधि
ताहम्भवतावरोदत्तोमयातव ॥ वध्यश्चत्वम्ममैवेहनात्रकार्याविचारणा ॥ २९ ॥ यत्त्वयाप्रार्थितञ्चापिसर्वैःसुरगणैःसह ॥ विरोधीमेस
दामाभूदितिचापिभविष्यति ॥ १३० ॥ मत्पादतलसंस्पर्शाच्छरीरन्तवदानव ॥ यज्ञभागोपभोगायविशीर्णन्नभविष्यति ॥ ३१ ॥ तवजी
वात्मभिःप्राणाःसर्वएवमहासुर ॥ हरस्यपादसंयोगाच्चिरंस्थास्यतिकेवलम् ॥ ३२ ॥ कल्पकोटिसहस्राणित्रिंशत्त्वंमहिषासुर ॥ शतानिचाष्टा
वन्यानिजन्मतेनभविष्यति ॥३३॥ इतिदेवीवरन्दत्त्वामहिषायासुरायवै ॥ प्रणतातेनशिरसातत्रैवान्तरधीयत ॥ ३४ ॥ महिषोपिनिजस्थान
म्पुनःप्रायात्समोहितः ॥ माययाचासुरम्भावमादायनृपपूर्ववत् ॥३५॥ ॥ सगरउवाच ॥ अनेकेनिहतादैत्यामाययालोकभूतये ॥३६॥ तैनेवा
कारणेनायंःप्रगृहीतोवराःकथम्॥ दत्तास्तस्मैसमाचाक्ष्वममसम्यग्द्विजोत्तम ॥ ३७ ॥ और्वउवाच ॥ आराधितोमहादेवोरम्भेणासुरवैरिणा ॥
चिरेणसचसुप्रीतस्तपसातस्यशङ्करः ॥ ३८ ॥ अथतुष्टोमहादेवःप्रत्यक्षंरम्भमूचिवान् ॥ प्रीतोस्मितेवरंरम्भवरयस्वयथेप्सितम् ॥ ३९ ॥
एवमुक्तःप्रत्युवाचरम्भस्तञ्चन्द्रशेखरम् ॥ अपुत्रोहन्महादेवयदितेमय्यनुग्रहः ॥ १४० ॥ ममजन्मत्रयेपुत्रोभवान्भवतुशंकर ॥ अवध्यःसर्व

भूतानाञ्जेताचत्रिदिवौकसाम् ॥ ४१ ॥ चिरायुश्चयशस्वीचलक्ष्मीवान्त्सचशङ्कर ॥ एवमुक्तस्तुदैत्येनप्रत्युवाचवृषध्वजः ॥ ४२ ॥ भवत्वे
तद्वाञ्छितन्तेभविष्यामिसुतस्तव ॥ इत्युक्त्वासमहादेवस्तत्रैवान्तरधीयत ॥ ४३ ॥ रम्भोपियातःस्वस्थानंहर्षोत्फुल्लविलोचनः ॥ पथिग
छन्त्सरम्भोथददर्शमहिषींशुभाम् ॥ ४४ ॥ त्रिहायणीञ्चित्रवर्णांसुन्दरीमृतुशालिनीम् ॥ सताम्दृष्ट्वाथमहिषींरम्भःकामेनमोहितः ॥ ४५ ॥
दोर्भ्याङ्गृहीत्वाचतदाचकारसुरतोत्सवम् ॥ तयोःप्रवृत्तेसुरतेतदासातस्यतेजसा ॥४६॥ दधारमहिषीगर्भन्तदाभून्महिषासुरः ॥ तस्यांस्वांशेन
गिरिशस्तत्पुत्रत्वमवाप्तवान् ॥४७॥ ववृधेसतदाराम्भिःशुक्लपक्षसमुद्रवत् ॥ तञ्चकात्यायनमुनिःशप्तवान्महिषासुरम् ॥ ४८ ॥ दुर्णयंवीक्ष्य
शिष्यार्थेशिष्यानुग्रहकारकः ॥ कात्यायनेनशप्तन्तंविज्ञायमहिषासुरम् ॥ ४९ ॥ प्राहप्रणामपूर्वन्तुचण्डिकाञ्चन्द्रशेखरः ॥ ॥ ईश्वर
उवाच ॥ ॥ देविकात्यायनेनार्यशप्तोद्यमहिषासुरः ॥ १५० ॥ योषिद्विनाशकर्त्रीतिभवितेतिजगन्मये ॥ निःसंशयमृषेर्वाक्यम्भ
विष्यतिनसंशयः ॥ ५१ ॥ मदीयोमहिषःकायस्तवयादेविजगन्मयि ॥ हन्तव्यःसततंयोगयुक्तःपूर्वेपरेपिच ॥ ५२ ॥ हरिर्हरिस्वरू
पेणनत्वाम्वोढुंक्षमोधुना ॥ ममायम्माहिषःकायस्तववोढाभविष्यति ॥ इतिपूर्वम्महादेवोदेवीम्प्रार्थितवान्पुरा ॥ ५३ ॥ तेनदेवीमहादे
वञ्चग्राहमहिषासुरम् ॥ त्रिपुजन्मसुपुत्रोभूद्रम्भस्यभगवान्हरः ॥५४॥ सृष्टित्रयेसरम्भोपिरम्भएवव्यजायत ॥ आसुरन्तादृशन्तेपेतपःपरमदा
रुणम् ॥ ५५ ॥ तथैवाराधितःशम्भुःपुत्रार्थेप्रददौवरम् ॥ तथैवमहिषीम्भेजेप्रथमंसुरतायसः ॥ ५६ ॥ तस्यान्तथाभवद्वीरोदानवोमहिषा
सुरः ॥ तथैवशेपेभगवान्मुनिःकात्यायनस्तुतम्॥५७॥इतिप्रवृत्तेपूर्वेस्मिन्परस्मिन्सतुजन्मनि ॥ महिषःपूजयित्वाथदेवींवरमयाचत ॥५८॥

तृतीयेजन्मनिवरम्प्राप्यकल्पानशेषतः ॥ नेहमेजन्मभवितेत्येवम्वरमयाचत् ॥ ५९ ॥ तेनदेवीपादतलेतिष्ठत्येषोसुरोधुना ॥ नोत्प
त्तिरपितस्याथसंवर्त्तान्तादभून्नृप ॥ १६० ॥ एवन्देवीप्रसादेनमहादेवाँशसम्भवः ॥ परामवापसततम्प्रतिपत्तिम्महासुरः ॥ ६१ ॥
इतितेकथितंराजन्यथासमहिषासुरः ॥ देवीपादतलम्प्राप्ययथासोद्यापिमोदते ॥ ६२ ॥ प्रस्तुतंशृणुभोराजन्कथयामिनृपोत्तम ॥ ६३ ॥
॥ मार्कण्डेयउवाच ॥ ॥ इतिवःकथितंराजासगरःसहितोयथा ॥ और्वेणचक्रेसंवादन्देवीमहिषयोजने ॥ ६४ ॥ पुनर्यदाहभूयोपिसगराय
महात्मने ॥ तच्छ्रण्वन्तुमुनिश्रेष्ठागुह्याद्गुह्यतरम्परम् ॥ १६५ ॥ इतिश्रीकालिकापुराणेमहिषासुरोपाख्यानोद्विषष्टितमोध्यायः ॥ ६२ ॥
और्वउवाच ॥ ॥ यथाहभगवान्देवोभैरवायमहात्मने ॥ वेतालायनृपश्रेष्ठतथात्वम्प्रस्तुतंशृणु ॥ १ ॥ ॥ भगवानुवाच ॥ ॥ उग्रच
ण्डाचयामूर्त्तिरष्टादशभुजाभवत् ॥ सानवम्याम्पुराकृष्णपक्षेकन्यांगतेरवौ ॥ २ ॥ प्रादुर्भूतामहामायायोगिनीकोटिभिःसह ॥ आषाढस्यतु
पूर्णायांसत्रन्द्वादशवार्षिकम् ॥ ३ ॥ दक्षःकर्तुंसमारेभेवृताःसर्वेदिवौकसः ॥ ततोहन्नवृतस्तेनदक्षेणसुमहात्मना ॥४ ॥ कपालीतिसतीचापित
ज्यायेतिचनोवृता ॥ ततोरोषसमायुक्ताप्राणाँस्तत्याजसासती ॥ ५ ॥ त्यक्तदेहासतीचापिचण्डमूर्त्तिस्तदाभवत् ॥ ततःप्रवृत्तेयज्ञेपितस्मिं
न्द्वादशवार्षिके ॥ ६ ॥ नवम्यांकृष्णपक्षेतुकन्यायाञ्चाणुमूर्तिधृक् ॥ योगनिद्रामहामायायोगिनीकोटिभिःसह ॥ ७ ॥ सतीरूपम्परित्यज्य
यज्ञभंगमथाकरोत् ॥ शंकरस्यगणैःसर्वैःसहिताशंकरेणच ॥ ८ ॥ स्वयंबभञ्जसादेवीमहासत्रम्महात्मनः ॥ ततोदेव्यामहाक्रोधेव्यतीतेत्रिदि
वौकसः॥९॥ पूजयांचक्रुरतुलान्देवीम्पूर्वोदितेनवै ॥ पूर्वोदितविधानेनपूजामस्यादिवौकसः॥१०॥कृत्वैवपरमामापुर्निर्वृतिन्दुःखहानये॥एवम

न्यैरपिसदाकार्यन्देव्याःप्रपूजनम् ॥ ११ ॥ विभूतिमतुलाम्प्राप्तुश्चतुर्वर्गप्रदायिकाम् ॥ योमोहादथवालस्याद्देवीन्दुर्गाम्महोत्सवे ॥ १२ ॥
नपूजयतिदम्भाद्वाद्वेषाद्वाप्यथभैरव ॥ क्रुद्धाभगवतीतस्यकामानिष्टान्निहन्तिवै ॥ १३ ॥ परत्रचमहामायाबलिम्भूत्वाप्रजायते ॥ अष्टम्यांरु
धिरैश्चैवमहामांसैःसुगन्धिभिः ॥ १४ ॥ पूजयेद्बहुजातीयैर्बलिभिर्भोजनैःशिवाम् ॥ सिन्दूरैःपट्टवासोभिर्नानाविधविलेपनैः ॥ १५ ॥ पुष्पै
रनेकजातीयैःफलैर्बहुविधैरपि ॥ उपवासम्महाष्टम्याम्पुत्रवान्नसमाचरेत् ॥ १६ ॥ यथातथैवपूतात्मात्रतीदेवीम्प्रपूजयेत् ॥ पूजायित्वामहाष्ट
म्यान्नवम्याम्बलिभिस्तथा ॥ १७ ॥ विसर्जयेद्दशम्यान्तुश्रवणेशावरोत्सवैः ॥ अन्त्यपादोदिवाभागेश्रवणस्ययदाभवेत् ॥ १८ ॥ तदा
सम्प्रेषणन्देव्यादशम्यांकारयेद्बुधः ॥ सुवासिनीभिःकुमारीभिर्वेश्याभिर्नर्त्तकैस्तथा ॥ १९ ॥ शंखतूर्यनिनादैश्चमृदंगैःपटहैस्तथा ॥ ध्व
जैर्वस्त्रैर्बहुविधैर्लाजपुष्पप्रकीर्णकैः ॥ २० ॥ धूलिकर्दमविक्षेपैःक्रीडाकौतुकमंगलैः ॥ भगलिंगाभिधानैश्चभगलिंगप्रगीतकैः ॥ २१ ॥ भग
लिंगादिशब्दैश्चक्रीडयेयुरलञ्जनाः ॥ परैर्न्नाक्षिप्यतेयस्तुयःपरान्नाक्षिपेद्यदि ॥ २२ ॥ क्रुद्धाभगवतीतस्यशापन्दद्यात्सुदारुणम् ॥ आदिपादो
निशाभागेश्रवणस्ययदाभवेत् ॥२३॥ तदादेव्याःसमुत्थानन्नवम्यान्नपुनर्दिवा ॥ अन्त्यपादोनिशाभागेश्रवणस्ययदाभवेत्॥२४॥तदादेव्याः
समुत्थानन्नवम्यान्दिनभागतः ॥ विसर्जनमनेनैवमन्त्रेणवत्सभैरव॥२५॥कर्त्तव्यमम्भसिस्थाप्यविसृज्यचविभूतये ॥ उत्तिष्ठदेविचण्डेशेशु
भाम्पूजाम्प्रगृह्यच ॥२६॥ कुरुष्वममकल्याणमष्टभिःशक्तिभिःसह॥ गच्छगच्छपरंस्थानंस्वस्थानन्देविचण्डिके॥२७॥यत्पूजितम्मयादेविप
रिपूर्णन्तदस्तुमे ॥ व्रजत्वंस्रोतसिजलेतिष्ठगेहेचभूतले ॥२८॥ निमज्याम्भसिसन्त्यज्यपात्रिकावार्जितेजले ॥ पुत्रायुर्द्धनवृद्ध्यर्थंस्थापितासि

जलेमया ॥ २९ ॥ इत्यनेनतुमन्त्रेणदेवींसंस्थापयेज्जले ॥ सर्वलोकहितार्थायसर्वलोकविभूतये ॥ ३० ॥ दुर्गातन्त्रेणमन्त्रेणपूजितव्येउभे
अपि ॥ भद्रकालीमुग्रचण्डांमहामायाम्महोत्सवे ॥ ३१ ॥ नेत्रबीजन्तुसर्वासाम्पूजनेपरिकीर्त्तितम् ॥ योगिनीनान्तुसर्वासांमूलमूर्त्तेस्तथै
वच ॥३२॥ मन्त्रन्तथोग्रचण्डायाःपृथक्त्वंशृणुभैरव ॥ आद्यद्वयन्नेत्रबीजम्मन्त्रस्योपान्तमन्तरे ॥३३॥ वह्निनान्तःस्वरेणेन्दुबिन्दुभ्यान्तंत्र
मौग्रकम् ॥ नेत्रबीजन्द्वितीयन्तुद्विधावर्त्तितमुच्यते ॥३४॥ भद्रकाल्यास्तुमन्त्रोयन्धर्मकामार्थसिद्धये ॥ यदातुवैष्णवीदेवीमहामायाजगन्म
यी ॥ ३५ ॥ पूज्यतेवैष्णवीदेवीतन्त्रोक्ताअष्टयोगिनीः ॥ ताःप्रोक्ताःशैलपूर्व्याश्चपूर्वकल्पेचभैरव ॥ ३६ ॥ उग्रचण्डादयश्चाष्टौदुर्गातन्त्रस्य
कीर्तिताः॥ भद्रकाल्यास्तुमन्त्रेणभद्रकालीम्प्रपूजयेत् ॥३७॥ पूजयेद्भूतिवृद्ध्यर्थमेताएवाष्टयोगिनीः॥जयन्तीम्मङ्गलाङ्कालीम्भद्रकालींकपा
लिनीम् ॥३८॥ दुर्गाशिवाङ्क्षमान्धात्रीन्दलेष्वष्टसुपूजयेत् ॥ यदोग्रचण्डातन्त्रेणसादेवीतत्रपूज्यते ॥३९॥योगिन्यस्तत्रपूज्याःस्युरष्टावन्या
श्चभैरव ॥ कौशिकीशिवदूतीचउमाहैमवतीश्वरी ॥४०॥ शाकम्भरीचदुर्गाचसप्तमीचमहोदरी ॥ उमायाःसौम्यमूर्त्तेस्तुतन्त्रन्त्वंशृणुभैरव ॥
॥ ४१ ॥ पादिःसमाप्तिसहितःफडन्तोनान्तएवच ॥ एकाक्षरस्त्र्यक्षरश्चउमातंत्रइतिस्मृतः ॥ ४२ ॥ सुवर्णसदृशीङ्गौरींभुजद्वयसमन्विताम् ॥
नीलारविन्दंवामेनपाणिनाबिभ्रतींसदा ॥ ४३ ॥ शुक्लन्तुचामरन्धृत्वाभर्गस्यांगेथदक्षिणे ॥ विन्यस्यदक्षिणंहस्तन्तिष्ठन्तीम्परिचिन्तयेत् ॥
॥ ४४ ॥ विनापिशम्भुंरुद्राणीम्भक्तस्तुपरिचिन्तयेत् ॥ द्विभुजांस्वर्णगौरांगीम्पद्मचामरधारिणीम् ॥ ४५ ॥ व्याघ्रचर्म्मास्थितेपद्मेपद्मास
नगतासदा ॥ एतस्याःपूजनेप्रोक्ताअष्टौवेतालभैरव ॥ ४६ ॥ योगिन्योनायिकाश्चापिपृथक्त्वेनव्यवस्थिताः ॥ जयाचविजयाचैवमातंगील

लितातथा ॥ ४७ ॥ नारायण्यथसावित्रीस्वधास्वाहातथाऽष्टमी ॥ पूर्वंशुंभोनिशुम्भश्चदानवौभ्रातरावुभौ ॥ ४८ ॥ बभूवतुर्महासत्त्वौमहा
कायौमहाबलौ ॥ अन्धकस्यसुतौद्वौतौदन्तिनाविवदुर्म्मदौ ॥ ४९ ॥ मयाविनिहितेतस्मिन्नन्धकाख्येमहाबले ॥ ससैन्यवाहनौतौतुपाताल
तलमाश्रितौ ॥ ५० ॥ बभूवतुर्महाकायौमहासत्त्वौमहाबलौ ॥ ततस्तस्वातपस्तीव्रंब्रह्माणन्तौमहासुरौ ॥ ५१ ॥ सम्यक्तदातोषयतांससुप्री
तोवरन्ददौ ॥ तौब्रह्मवरदत्तौतुसमासाद्यजगत्त्रयम् ॥ ५२ ॥ इन्द्रत्वमकरोच्छुम्भश्चन्द्रत्वञ्चनिशुम्भकः ॥ सर्वेषामेवदेवानांयज्ञभागानुपाह
रत् ॥ ५३ ॥ स्वयंशुम्भोनिशुम्भश्चदिक्पालत्वञ्चतौगतौ ॥ सर्वेसुरगणाःसेन्द्रास्ततोगत्वाहिमाचलम् ॥ ५४ ॥ गंगावतारनिकटेमहामा
याम्प्रतुष्टुवुः ॥ अनेकशःस्तुतादेवीतदासर्वामरोत्करैः ॥ ५५ ॥ मातंगवनितामूर्त्तिर्भूत्वादेवानपृच्छत ॥ युष्माभिरमरैरत्रस्तूयतेकाचभामिनी
॥ ५६ ॥ किमर्थमागतायूयम्मतंगस्याश्रमम्प्रति ॥ एवम्ब्रुवन्त्यामातंगचास्तस्यास्तुकायकोपतः ॥५७॥ समुद्भूताब्रवीद्देवीमांस्तुवन्तिसुरा
इति ॥ शुम्भोनिशुम्भोह्यसुरौबाधेतेसकलान्सुरान् ॥५८॥तस्मात्तयोर्वधायाहंस्तूयेतैःसकलैःसुरैः ॥ विनिःसृतायान्देव्यान्तुमातंगचाःकाय
कोपतः ॥५९॥ भिन्नाञ्जननिभाकृष्णासाभूद्गौरीक्षणादपि॥ कालिकाख्याभवत्सापिहिमाचलकृताश्रया॥६०॥तामुग्रतारामृषयोवदन्तीहमनी
षिणः ॥ उग्रादपिभयात्त्रात्रीयस्माद्भक्तान्सदाम्बिका ॥६१॥ एतस्याःप्रथमम्बीजंकथितन्त्रयमेवच ॥ एषैवैकजटाख्यातुयस्मात्तस्माज्जटैकि
काम् ॥ ६२ ॥ शृणुतश्चिन्तनञ्चास्याःसम्यग्वेतालभैरवौ ॥ यथाध्यात्वामहादेवीम्भक्तःप्राप्नोत्यभीप्सितम् ॥६३॥चतुर्भुजांकृष्णवर्णाम्मुण्ड
मालाविभूषिताम् ॥ खड्गन्दक्षिणपाणिभ्याम्बिभ्रतीन्दीवरन्त्वधः॥६४॥कर्त्रीञ्चखर्परञ्चैवकमाद्वामेनबिभ्रताम्॥ व्यालिखन्तींजटामेकांबिभ्रतीं

शिरसास्वयम् ॥ ६५ ॥ मुण्डमालाधरांशीर्षंग्रीवायामपिसर्वदा ॥ वक्षसानागहारन्तुबिभ्रतींरक्तलोचनाम् ॥६६॥ कृष्णवस्त्रधरांकट्यांव्याघ्रा
जिनसमन्विताम् ॥ वामपादंशवहृदिसंस्थाप्यदक्षिणम्पदम् ॥ ६७ ॥ विन्यस्यसिंहपृष्ठेतुलेलिहानांशवंस्वयम् ॥ साट्टहासाम्महाघोरांदाव
युक्तातिभीषणाम् ॥६८॥ चिन्त्याग्रतारासततम्भक्तिमद्भिःसुखेप्सुभिः ॥ एतस्याःसम्प्रवक्ष्यामियाअष्टौयोगिनीःस्मृताः ॥६९॥ महाकालाथ
रुद्राणीउग्राभीमातथैवच ॥ घोराचभ्रामरीचैवमहारात्रिश्चसप्तमी ॥७०॥ भैरवीचाष्टमीप्रोक्तायोगिनीस्ताःप्रपूजयेत् ॥ याकायकोपान्निःसृता
कालिकायास्तुभैरव॥७१॥साकौशिकीतिविख्याताचारुरूपामनोहरा ॥ निसृताहृदयाद्देव्यारसनाग्रेणचण्डिका ॥७२॥ नैतस्याःसदृशीमूर्त्या
चारुरूपेणविद्यते ॥ त्रिषुलोकेषुकान्त्यावानास्यास्तुल्याभविष्यति ॥७३॥ योगनिद्रामहामायायामूलप्रकृतिर्मता॥तस्याःप्राणस्वरूपेयंदेवी
याकौशिकीस्मृता॥७४॥नेत्रबीजंतथैतस्याःबीजन्तुपरिकीर्तितम्॥तन्त्रमस्याःप्रवक्ष्यामिमूर्तिरूपञ्चभैरव ॥७५॥ समाप्तिनान्त्यदन्त्यस्तुपड्
र्गादिसविन्दुभिः॥षष्ठस्वरेणसंस्पृष्टोविन्दुनासमलंकृतः॥७६॥कौशिकीमन्त्रतन्त्रोयंसर्वकामार्थदायकः॥तस्यास्तुसम्प्रवक्ष्यामियामूर्तिरिहभै
रव॥७७॥शृणुष्वैकमनाभूत्वाजगदाह्लादकारकम् ॥ धम्मिल्लसंयतकचांविधोश्चाधोमुखींकलाम् ॥ ७८ ॥ केशान्तेतिलकस्योर्द्धेदधतीसुमनो
ह र ॥मणिकुण्डलसंघृष्टगण्डासुकुटमण्डिता॥७९॥सज्ज्योतिःकर्णपूराभ्यांकर्णमापूर्यसंगता ॥ सुवर्णमणिमाणिक्यनागहारविराजिता॥८०॥
सदासुगन्धिभिःपद्मैरम्लानैरतिसुन्दरी ॥ मालाम्बिभर्त्तिग्रीवायांरत्नकेयूरधारिणी ॥ ८१ ॥ मृडालायतवृत्तैस्तुबाहुभिःकोमलैःशुभैः ॥ राज
न्तीकञ्चुकोपेतपीनोन्नतपयोधरा ॥ ८२ ॥ क्षीणमध्यापीतवस्त्रात्रिवलीप्रख्यभूषिता ॥ शूलंवज्रञ्चबाणञ्चखड्गंशक्तिन्तथैवच ॥८३॥ दक्षि

णैःपाणिभिर्देवीगृहीत्वातुविराजिता ॥ गदांघण्टाञ्चचापंचचर्मशंखन्तथैवच ॥८४॥ ऊर्द्धादिक्रमतोदेवीदधतीवामपाणिभिः॥सिंहस्योपरितिष्ठ
न्तीव्याघ्रचर्माणिकौशिकी॥८५॥बिभ्रतीरूममतुलंससुरासुरमोहनम् ॥ एतस्याःशृणुवत्सत्वंयाःपूज्याअष्टयोगिनीः॥८६॥ताःपूजिताश्चकुर्व
न्तिचतुर्वर्गन्नृणांसदा ॥ ब्रह्माणीप्रथमाप्रोक्ताततोमाहेश्वरीमता ॥ ८७ ॥ कौमारीचैववाराहीवैष्णवीपञ्चमीतथा ॥ नारसिंहीतथैवैन्द्रीशिवदू
तीतथाष्टमी ॥ ८८ ॥ एताःपूज्यामहाभागायोगिनीःकामदायिनीः ॥ देव्याललाटनिःक्रान्तायाकालीतिचविश्रुता ॥ ८९ ॥ तस्यामन्त्रम्प्रव
क्ष्यामिकामदंशृणुभैरव ॥ समाप्तिसहितोदन्त्यःप्रान्तस्तस्मात्पुरःसरः ॥९०॥ षष्ठस्वराग्निबिन्द्विन्दुसहितःसादिरेवच ॥ कालीतन्त्रमितिप्रो
क्तन्धर्मकामार्थदायकम् ॥ ९१ एतन्मूर्त्तिम्प्रवक्ष्यामिवत्सैकाग्रमनाःशृणु ॥ नीलोत्पलदलश्यामाचतुर्बाहुसमन्विता ॥ ९२ ॥ खट्वांगञ्च
न्द्रहासञ्चबिभ्रतीदक्षिणेकरे ॥ वामेचर्मचपाशञ्चऊर्ध्वाधोभागतःपुनः ॥ दधतीम्मुण्डमालाञ्चव्याघ्रचर्मधराम्बराम्॥९३॥कृष्णांगीदीर्घदंष्ट्राच
अतिदीर्घातिभीषणा ॥ लोलजिह्वानिम्नरक्तनयनानादभैरवा ॥ ९४ ॥ कबन्धवाहनापीनाविस्तारश्रवणानना ॥ एषातारान्नयादेवीचामु
ण्डेतिचगीयते ॥ ९५ ॥ एतस्यायोगिनीश्चाष्टौपूजयेच्चिन्तयेद्यदि ॥ त्रिपुराभीषणाचण्डीकर्त्रीहर्त्रीविधानिका ॥ ९६ ॥ करालाशूलिनीचेति
अष्टौताःपरिकीर्त्तिताः ॥ एषातिकामदादेवीजाड्यहानिकरीसदा ॥ ९७ ॥ एतस्याःसदृशीकाचित्कामदानहिविद्यते ॥ कौशिक्याहृदयादेवी
निःसृताध्यायतोहरेः ॥ ९८ ॥ शिवदूतीतिसाख्यातायाचदेवशतैर्वृता ॥ मन्त्रमस्याःप्रवक्ष्यामिधर्मकामार्थदायकम् ॥९९॥ यच्छ्रुत्वासाधको
यातिदुर्लभंशिवमन्दिरम् ॥ यामाराध्यमहादेवींशिवदूतींशिवात्मिकाम् ॥ १०० ॥ नचिराल्लभतेकामान्नरःसर्वजयीभवेत् ॥ अन्तःसमाप्ति

सहितोविन्द्विन्दुभ्यांदशावरः ॥१॥ स्वरेणोपान्तदन्त्येनसंस्पृष्टोन्तेनपूर्वशः ॥ सएवाबिन्दुयुगलपूर्वस्थोपान्तपावकः ॥२॥ षष्ठस्वरकलाशू
न्यैःसहितःप्रथमस्थितः ॥ मन्त्रोयंशिवदूत्यास्तुशिवदूतीजयप्रदः ॥ ३ ॥ रूपमस्याःप्रवक्ष्यामिशृणुवत्सैकसम्मतः ॥ चतुर्भुजम्महाकायं
सिन्दूरसदृशद्युति ॥४॥ रक्तदन्तम्मुण्डमालाजटाजूटार्द्धचन्द्रधृक् ॥ नागकुण्डलहाराभ्यांशोभितन्नखरोज्ज्वलम् ॥ १०५ ॥ व्याघ्रचर्मप
रीधानन्दक्षिणेशूलखड्गधृक् ॥ वामेपाशन्तथाचर्मबिभ्रद्दृद्धार्पपरक्रमात् ॥ ६ ॥ स्थूलवक्रश्चपीनौष्ठन्तुंगमूर्तिंभयंकरम् ॥ निःक्षिप्यदक्षिणम्पादं
सन्तिष्ठत्कुणपोपरि ॥ ७ ॥ वामपादंशृगालस्यपृष्ठेफेरुशतैर्वृतम् ॥ ईदृशींशिवदूत्यास्तुमूर्तिन्ध्यायेद्विभूतये ॥ ८ ॥ ध्यानमात्रादथैतस्या
नरःकल्याणमाप्नुयात् ॥ पूजनादचिराद्देवीसर्वान्कामान्ददातिच ॥ ९ ॥ यःशिवाविरुतंश्रुत्वाशिवदूतींशुभप्रदाम् ॥ प्रणमेत्साधकोभक्त्या
तस्यकामाःकरेस्थिताः ॥ ११० ॥ यदाजघानजगतांरक्तबीजंहितायवै ॥ महादेवीमहामायातदास्याःकायतःसृताः ॥ ११ ॥ दूतम्प्रस्था
पयामासशिवंशुम्भायसाम्बिका ॥ तेनसाशिवदूतीतिदेवैःसर्वैःप्रगीयते ॥ १२ ॥ क्षेमंकरीचशान्ताचवेदमातामहोदरी ॥ करालाकामदादेवी
भर्गस्यभगशालिनी ॥ १३ ॥ भगोदरीभगाहाराभगजिह्वाभगातथा ॥ एताद्वादशयोगिन्यःपूजनेपरिकीर्तिताः ॥ १४ ॥ एताद्वादशयो
गिन्यःशिवदूत्याःसदैवहि ॥ विचरन्तीस्वयन्देवीयत्रतत्रैवगच्छति ॥ ११५ ॥ योगिन्योह्यथसख्यःस्युर्यथान्यासान्तथा पुनः ॥ चण्डिका
यास्तुयोगिन्यःसख्योत्रप्रकीर्तिताः ॥ १६ ॥ इतितेत्वंगमन्त्राणिकथितानिसमासतः ॥ कामख्यायाश्चमाहात्म्यंकल्पतंत्रंवदामिवाम् ॥
॥ ११७ ॥ इति श्रीकालिकापुराणेकामाख्यामाहात्म्येत्रिषष्टितमोध्यायः ॥ ६३ ॥ ॥ भगवानुवाच ॥ कामार्थमागतायस्मान्मया

सार्द्धम्महागिरौ ॥ कामाख्याप्रोच्यतेदेवीनीलकूटेरहोगता ॥ १ ॥ कामदाकामिनीकामाकान्ताकामांगदायिनी ॥ कामांगनाशिनीयस्मा
त्कामाख्यातेनचोच्यते ॥ २ ॥ एतस्याःशृणुमाहात्म्यंकामाख्यायाविशेषतः ॥ यासाप्रकृतिरूपेणजगत्सर्वन्नियोजयेत् ॥ ३ ॥ मधुकैटभ
नाशायमहामायाविमोहितः ॥ यदासंयुयुधेविष्णुस्तदैषामोहयद्दृढम् ॥ ४ ॥ दैनन्दिनेतुप्रलयेप्रसुप्तेगरुडध्वजे ॥ तस्यश्रवणविड्जाताव
सुरौमधुकैटभौ ॥५॥ कूर्मपृष्ठेस्थितादेवीविशीर्णेवाभवज्जलैः ॥ तांविशीर्णायोगनिद्रामहामायाव्यलोकयत् ॥६॥ तांवैदृढतराम्पृथ्वींकर्त्तुम्प्रति
तदेश्वरी ॥ उपायञ्चिन्तयामासकथम्पृथ्वीभवेद्दृढा ॥ ७ ॥ इदानीमाज्यवत्पृथ्वीप्रवृत्ताकोमलाजलैः ॥ सृष्टिकालेजनान्सोढुंकथंशक्ताभवि
ष्यति ॥ ८ ॥ इतिसञ्चिन्त्यसामायाजगतांसृष्टिरूपिणी ॥ उपगम्यतदाविष्णुमाससादसनिद्रितम् ॥ ९ ॥ तन्तुसुप्तंसमासाद्यजगन्नाथञ्जग
त्पतिम् ॥ वामहस्तकनिष्ठाग्रन्तस्यकर्णेन्यवेशयत् ॥ १० ॥ निवेश्यनखराग्रेणप्रोद्धृत्यश्रावणम्मलम् ॥ चूर्णीचकारसादेवीयोगनिद्राजग
त्प्रभूः॥११॥ तत्कर्णमलचूर्णेभ्योमधुर्न्नामासुरोभवत् ॥ ततोदक्षिणहस्तस्यकनिष्ठाग्रन्तुदक्षिणे ॥ १२ ॥ कर्णेन्यवेशयद्देवीतस्मादप्युधृतम्मं
लम्॥तच्चापिक्षोदयामासकरशाखाद्वयेनतु ॥१३॥ततोभूत्कैटभोनामबलवान्सोऽसुरोमहान्॥उत्पन्नःसचपानार्थंयस्मान्मृंगितवान्मधु ॥१४॥
ततस्तस्यमहादेवीमधुनामाकरोत्तदा ॥ उत्पन्नःकीटवद्भ्रातिमहामायाकरेयतः ॥ १५ ॥ ततोस्यकैटभन्नाममहामायातदाकरोत् ॥ महामाया
मोहितौतौविष्णुगात्रन्तदागतौ ॥ १६ ॥ भ्रममाणौदृदृशतुर्न्नाभिपद्मेस्थितांविधिम् ॥ तमूचतुस्तौधातारंहनिष्यावोद्यत्वामिह ॥ १७ ॥
त्वञ्जागरयवैकुण्ठंयदिजीवितुमिच्छसि ॥ ततोब्रह्मामहामायांयोगनिद्राञ्जगत्प्रसूम् ॥ १८ ॥ प्रसादयामासतदास्तुतिभिर्बहुभिर्भयात् ॥

चिरंस्तुताऽथसादेवीब्रह्मणाजगदात्मना ॥ १९ ॥ प्रसन्नातरसाव्यग्रमुवाचचयथाविधिम् ॥ किमर्थंसंस्तुताचाहङ्किङ्करिष्याम्यहन्तव ॥२०॥
तद्वदत्वम्महाभागकरिष्याम्यहमद्यते ॥ ततस्तेनमहामायाप्रोक्ताधात्रामहात्मना ॥ २१ ॥ प्रबोधयजगन्नाथंयावन्नोमांहनिष्यतः ॥ सम्मो
हयदुराधर्षावसुरौमधुकैटभौ ॥ २२ ॥ इत्युक्तासातदादेवीब्रह्मणाजगदात्मना ॥ बोधयामासवैकुण्ठम्मोहयामासतौतदा ॥ २३ ॥ ततःप्रबु
द्धःकृष्णस्तुददर्शभयशालिनम् ॥ ब्रह्माणन्तौतदाघोरावसुरौमधुकैटभौ ॥ २४ ॥ ततस्ताभ्यांसयुयुधेह्यसुराभ्याञ्जनार्दनः ॥ नाशकद्धारितुंवी
रावसुरौमधुकैटभौ ॥ २५ ॥ अनन्तोपिफणाग्रेणतान्नोधर्त्तुंक्षमोभवत् ॥ युद्धयमानान्महावीरान्वैकुण्ठम्मधुकैटभान् ॥ २६ ॥ अथब्रह्मा
शिलारूपांस्थितिशक्तिन्तदाकरोत् ॥ अर्द्धयोजनविस्तीर्णामर्द्धयोजनमायताम् ॥ २७ ॥ तस्यांशिलायाङ्गोविन्दोयुयुधेनृपसत्तम ॥ सहता
भ्यांशिलासातुप्रविवेशजलान्तरम् ॥ २८ ॥ तस्यान्तुशक्त्यांमग्नायान्तोयेसयुयुधेहरिः ॥ पञ्चवर्षसहस्राणिबाहुयुद्धैर्निरन्तरम् ॥२९॥ यदा
वैनाशकद्धंतुन्तौविष्णुर्जगताम्पतिः ॥ पराश्चिन्तान्तदावापविधानापिभयात्ततः ॥ ३० ॥ ततस्तावेवतंविष्णुमूचतुर्बलदर्पितौ ॥ पुनःपुनर्ज
गन्मातृमहामायाविमोहितौ ॥ ३१ ॥ तुष्टौस्वस्त्वन्नियुद्धेनवरम्वरयमाधव ॥ तवेष्टंसम्प्रदास्यावःसत्यमेतद्ब्रुवोधुना ॥ ३२॥ तयोस्तद्वचनं
श्रुत्वामाधवोजगताम्पतिः ॥ उवाचतौयुवांवध्यौभवताम्मेमहाबलौ ॥ ३३ ॥ इतिदेहिवरम्मह्यन्दातव्यंयदीविद्यते ॥ तौतदाप्राहतुर्न्नाशस्त्व
त्तोनौशोभनोऽधुना ॥३४॥ तत्रावाञ्जहिनोयत्रतोयंसम्प्रतिविद्यते ॥ तयोस्तद्वचनंश्रुत्वामाधवोजगताम्पतिः ॥ ब्रह्माणम्माञ्चशीघ्रेणप्राहेदञ्चा
त्मसंज्ञया ॥ ३५ ॥ ब्रह्मशक्तिशिलांशीघ्रमुत्धृत्यध्रियतांयथा ॥ तत्रस्थित्वामहाघोरौहनिष्यामिमहाबलौ ॥ ३६ ॥ ततोब्रह्माह्यहञ्चैवउद्धधा

राशिलान्तुताम् ॥ तस्याम्मध्येपूर्वभागेह्यहम्पर्वतरूपधृक् ॥ ३७ ॥ ऊर्ध्वेस्थित्वाशिलाम्भित्वाप्रविवेशरसातलम् ॥ ऐशान्यामभवत्कूर्मःपर्वत
श्चाग्रहीच्छिलाम् ॥ ३८ ॥ वायव्याञ्चतथानन्तोनैर्ऋत्याञ्चसुरेश्वरी ॥ महामायाजगद्धात्रीशैलरूपप्रधारिणी ॥ ३९ ॥ आग्नेय्याञ्चतथा
विष्णुरेकरूपेणसंस्थितः ॥ ब्रह्मशक्तिशिलांगृह्णन्भगवान्परमेश्वरः ॥ ४० ॥ मध्येब्रह्मात्वहञ्चैववराहश्चतथापरः ॥ ततोवराहपृष्ठास्यचरमे
जगताम्पतिः ॥ ४१ ॥ स्थित्वाशिलामवष्टभ्यब्रह्मशक्तिमथोगताम् ॥ वामोरुजघनेयत्नादारोप्यशिरसीतयोः ॥ ४२ ॥ जगदाधारभूतः
ससर्वयत्नेनसंयुतः ॥ सर्वैर्बलैःसमाक्रम्यचिच्छेदचपृथक्पृथक् ॥ ४३ ॥ मधुकैटभयोःसम्यग्ग्रीवयोःपृथिवीभृते ॥ तस्यचाक्रमतस्थेम्ना
ब्रह्मशक्तिरधोगता ॥ ४४ ॥ ध्रियमाणापिदेवौघैर्यत्नादपिमुहुर्मुहुः ॥ ततस्तयोस्तुमृतयोःशरीरेजगताम्पतिः ॥ ४५ ॥ ब्रह्मशक्तिंसमुद्धृत्यन्य
धात्तस्याम्प्रयत्नतः ॥ उद्धृतायाम्पृथिव्यान्तुतयोर्मेदोविलेपनैः ॥ ४६ ॥ सुदृढामकरोत्पृथ्वींछेदितान्तोयराशिभिः ॥ मेदोविलेपनाद्यस्माद्गी
यतेमेदिनीचसा ॥ ४७ ॥ अद्यापिपृथिवीदेवीदेवराक्षसमानुषैः ॥ अथकालेबहुतिथेव्यतीतेप्राणिसर्ज्जने ॥ ४८ ॥ अगृह्णाम्दक्षतनयाम्भार्या
र्थेहम्बधूम्बराम् ॥ सामेभूत्प्रेयसीभार्याप्रादायसमयाम्पितुः ॥ ४९ ॥ अनिष्टकारीत्वञ्चेत्स्याःप्राणाँस्त्यक्ष्येतदात्वहम् ॥ ततोयज्ञेसमस्ताँस्तु
सचवत्रेचराचरम् ॥ ५० ॥ नमान्नापिसतीवत्रेतदनिष्टान्मृतातुसा ॥ ततोमोहंसमात्रस्तामादायमृतामहम् ॥ ५१ ॥ प्रातःपीठवरन्तन्तुभ्रम
माणइतस्ततः ॥ तस्यास्त्वंगनिपर्यायात्पतितानियतोयतः ॥ ५२ ॥ तत्तत्पुण्यतमञ्जातंयोगनिद्राप्रभावतः ॥ तस्मिँस्तुकुब्जिकापीठेसत्या
स्तद्योनिमण्डलम् ॥ ५३ ॥ पतितन्तत्रसादेवीमहामायाव्यलीयत ॥ लीनायांयोगनिद्रायाम्मायिपर्वतरूपिणी ॥ ५४ ॥ सनीलवर्णःशैलो

भूत्पतितेयोनिमण्डले ॥ सतुशैलोमहातुंगःपातालतलमाविशत् ॥ ५५ ॥ तस्याआक्रमणाद्गाढंह्यन्तस्थंद्रुहिणोह्यधात् ॥ सतुपूर्वम्ब्रह्मश
क्तिशिलान्धर्त्तुंश्चतुर्मुखः ॥ ५६ ॥ शैलरूपोभवत्तेनशैलरूपेणमामधात् ॥ ब्रह्मापर्वतरूपीसमयिपर्वतरूपिणी ॥ ५७ ॥ सशक्तोऽधोगमद्गा
ढमाक्रान्तोमाययाविधेः ॥ ततोवराहःसंशक्तोमयिमांसतुमाधव ॥ ५८ ॥ शैलरूपःशैलरूपन्धर्त्तुंसमुपचक्रमे ॥ सोप्यधोयान्मयासार्द्धन्तदा
पर्वतरूपिणा ॥ ५९ ॥ आक्रम्यदेवीम्पृथिवींस्थितोभुविनिखान्धतः॥शतंशतंयोजनानान्तुंगमासीद्गिरित्रयम्॥६०॥तदाक्रान्तम्महादेव्यासर्व
मेवह्यधोगतम् ॥ क्रोशमात्रस्थितन्तुंगशेपन्तत्रितयस्यतु ॥ ६१ ॥ एकासमस्तजगतांप्रकृतिःसायतस्ततः ॥ ब्रह्मविष्णुशिवैर्देवैर्द्धृतासाजगता
म्प्रसूः ॥ ६२ ॥ तत्रपूर्वोब्रह्मशैलःश्वेतइत्युच्यतेसुरैः ॥ मद्रूपधारीशैलस्तुनीलइत्युच्यतेतथा ॥ ६३ ॥ सतुमध्यगतःपीठस्त्रिकोणोलूखला
कृतिः ॥ विभ्राजमानःसततम्मध्येब्रह्मवराहयोः ॥ ६४ ॥ वराहःशलरूपोयःसचित्रइतिकथ्यते ॥ सर्वेषांसंस्थितःपश्चाद्दीर्घःसर्वेभ्यएवतु ॥
॥ ६५ ॥ ऐशान्यांयोभवत्कूर्मःशैलरूपोमहाद्युतिः ॥ मणिकर्णःसनाम्नातुख्यातोदेवौघसेवितः ॥ ६६ ॥ योऽनन्तरूपःशैलस्तुवायव्यांसमव
स्थितः ॥ मणिपर्वतसंज्ञोसौपर्वतोमाधवप्रियः॥६७॥महामायागिरेर्यस्तुनैर्ऋत्यांसमवस्थितः॥सगन्धमादनोनाम्नासर्वदाशंकरप्रियः ॥ ६८॥
वराहपृष्ठचरमेयतश्छिन्नौमहासुरौ ॥ हरिणातत्रसंयातःपाण्डुनाथइतिस्मृतः॥६९॥ ब्रह्मशक्तिशिलायास्तुपूर्वभागेतुमध्यतः ॥ यस्तुपर्वतरूपो
हंसतुभस्माचलाह्वयः॥७०॥एवम्पुण्यतमेपीठेकुब्जिकापीठसंज्ञके॥नीलकूटेमयासार्द्धन्देवीरहसिसंस्थिता ॥७१॥ सत्यास्तुपतितन्तत्रविशी
र्णयोनिमण्डलम्॥ शिलात्वमगमच्छैलेकामाख्यातत्रसंस्थिता॥७२॥संस्पृश्यतांशिलाम्मर्त्योह्यमरत्वमवाप्नुयात् ॥ अमर्त्योब्रह्मसदनंतत्स्थो

मोक्षवाप्नुयात् ॥ तस्याःशिलायामाहात्म्यंयत्रकामेश्वरीस्थिता॥७३॥अद्भुतंयस्यगुह्येतुलोहम्भस्मभवेद्गतम् ॥ साचापिप्रत्यहन्तत्रपञ्चमूर्तिध
राभवत् ॥ ७४ ॥ मोहार्थंसर्वलोकानाम्ममापिप्रीतयेशिवा ॥ अहम्पञ्चमुखेनाशुपञ्चभागेव्यवस्थितः ॥ ७५ ॥ ईशानःपूर्वभागस्थःकामेश्व
र्याःप्रधानतः ॥ ऐशान्याम्वैतत्पुरुषोह्यघोरस्तस्यसन्निधौ ॥ ७६ ॥ सद्योजातोऽथवायव्यांवामदेवस्तुसंगतः ॥ देव्याश्चापिनरश्रेष्ठपञ्च
रूपाणिभैरव ॥ ७७ ॥ शृणुवेतालगुह्यानिदेवैरपिसदैवहि ॥ कामाख्यात्रिपुराचैवतथाकामेश्वरीशिवा ॥ ७८ ॥ शारदाऽथमहालोकाकाम
रूपगुणैर्युता ॥ मयिलिंगत्वमापन्नोशिलायांयोनिमण्डले ॥ ७९ ॥ सर्वेशिलात्वमगमञ्छैलरूपाश्चनिर्जराः ॥ यथाहन्निजरूपेणरेमेवैसह
कामया ॥ ८० ॥ शिलारूपप्रतिच्छन्नास्तथासर्वास्तुदेवताः ॥ शिलारूपप्रतिच्छन्नाःशैलेशैलेव्यवस्थिताः ॥ ८१ ॥ रमन्तेचस्वरूपेणनित्यं
रहसिसंगताः ॥ ब्रह्माविष्णुर्हरश्चात्रदिक्पालाःसर्वएवते ॥ ८२ ॥ अन्येप्यत्रस्थितादेवाःसानुकूलाःसदामयि ॥ उपासितुन्तदादेवींकामा
ख्यांकामरूपिणीम् ॥ ८३ ॥ नीलशैलस्त्रिकोणस्तुमध्यनिम्नःसदाशिवः ॥ तन्मध्येमण्डलञ्चारुत्रिंशच्छक्तिसमन्वितम् ॥ ८४ ॥
योनिस्तस्याञ्छिलायान्तुशिलारूपामनोहरा ॥ वितस्तिमात्रविस्तीर्णाएकविंशांगुलीयुता ॥ ८५ ॥ क्रमसूक्ष्मविनम्रासाभस्मशैला
नुगामिनी ॥ सिन्दूरकुंकुमारक्तासर्वकामप्रदायिनी ॥ ८६ ॥ तस्यांयोनौपञ्चरूपानित्यंक्रीडतिकामिनी ॥ महामायाजगद्धात्रीमूल
भूतासनातनी ॥ ८७ ॥ तत्राष्टौयोगिनीर्नित्यानूतनूताःसनातनीः ॥ पूर्वोक्ताःशैलपुत्र्याद्याःस्थितादेव्याःसमन्ततः ॥ ८८ ॥ तासान्तु
पीठनामानिशृणुचैकत्रभैरव ॥ गुप्तकामाचश्रीकामातथान्याविन्ध्यवासिनी ॥ ८९ ॥ कोटीश्वरीवनस्थातुपादुर्गातथापरा ॥ दीर्घेश्वरी

क्रमादेवप्रकटाभुवनेश्वरी॥९०॥ स्वयोगिन्यःपीठनाम्नाख्याताअष्टौचदेवताः ॥ सर्वतीर्थानिचैकत्रजलरूपाणिभैरव ॥९१॥ स्थितानिनाम्ना
सौभाग्यसरस्यल्पापिपुण्यदा ॥ विष्णुस्तुतीरेतस्यास्तुनाम्नाकमलइत्युत ॥ ९२॥ कामुकाख्यस्तुबटुकःकामाख्याभ्यर्णसंस्थितः॥ लक्ष्मीः
सरस्वतीदेव्योदेव्याःसंगेव्यवस्थितेः ॥९३॥ ललिताख्याभवल्लक्ष्मीर्मातंगीतुसरस्वती ॥ गणाध्यक्षःपूर्वभागेतस्यशैलस्यसंस्थितः ॥९४॥
सिद्धःसनाम्नाविख्यातोद्वारेदेव्याःप्रियःसुतः ॥ कल्पवृक्षःकल्पवल्लीतिन्तिडीचापराजिता ॥ ९५ ॥ भूत्वातस्मिन्महाशैलेस्थितोदेव्याधृतः
प्रिये॥वराहःपाण्डुनाथाख्यःस्थितस्तत्रहरिर्यतम्॥९६॥जघनेशिरसीकृत्वा जघानमधुकैटभौ॥तस्यासन्नेब्रह्मकुण्डम्ब्रह्मणानिर्मितम्पुरा॥९७॥
ईशानाख्यःशिवोयत्रतत्सिद्धेश्वरसंज्ञकम् ॥ शिलारूपंसिद्धकुण्डम्मध्यस्थंविद्धिभैरव ॥९८॥ तस्यासन्नेगयाक्षेत्रङ्क्षेत्रंवाराणसीतथा॥योनिम
ण्डलसङ्काशङ्कुण्डम्भूत्वाव्यवस्थितः॥॥९९॥तत्रैवाऽमृतकुण्डंतुसुधासंघप्रपूरितम्॥ममप्रियार्थमिन्द्रेणस्थापितंसहनिर्जरैः॥१००॥ वामदेवा
ह्वयंशीर्षंश्रीकामेश्वरसंज्ञकम् ॥ कामकुण्डम्महापुण्यन्तस्यासन्नेव्यवस्थितम्॥१॥ केदारसंज्ञकंक्षेत्रम्मध्यस्थंसिद्धकामयोः ॥ दीर्घञ्चतुर्दशव्या
मच्छायाक्षेत्राह्वयन्तुतत् ॥२॥ तस्यासन्नेशैलपुत्रीगुप्तकामाह्वयातुसा ॥ गुप्तकुण्डस्यमध्यस्थाकामेशग्राव्णिसंगता ॥ ३ ॥ कामेश्वरशिलाश
क्ताकामाख्यासंज्ञितासदा ॥ पूर्वभागेणसंसक्तायोनेस्तुपरमार्गतः ॥ ४ ॥ कामकामाख्ययोर्मध्येकालरात्रिर्व्यवस्थिता ॥ पीठेदीर्घेश्वरीनाम्ना
सीमाभागेप्रचण्डिका ॥ ५ ॥ कामाख्याग्रस्तरप्रान्तेकूष्माण्डीनामयोगिनी ॥ पीठेकोटीश्वरीनाम्नायोनिरूपेणसंस्थिता ॥ ६ ॥ यच्चाघोरा
ह्वयंशीर्षन्तत्कामायास्तुदक्षिणे ॥ पिठेभैरवनामातुगयितेपरमार्थिभिः ॥७॥ चामुण्डाभैरवीनाम्नाभैरवासन्नसंस्थिता ॥ नायिकाकामदाभक्ते

चण्डमुण्डविनाशिनी ॥ ८ ॥ कामाभैरवयोर्मध्येस्वयन्देवीसुरापगा ॥ हितायसर्वजगतान्देव्यास्तुप्रीतयेसदा ॥ ९ ॥ सद्योजाताह्वयंशीर्ष
म्पीठेत्वाम्रातकेश्वरम् ॥ भैरवाख्येगह्वरेतुस्थितन्देवर्षिसेवितम् ॥ ११० ॥ विद्धितत्रैवदुर्गाख्यान्नायिकांयोगरूपिणीम् ॥ सिद्धकामेश्वरीनाम्ना
ख्यातादेवेषुनित्यशः ॥ ११ ॥ अजीर्णपत्रःसुच्छायोवृक्षस्तत्रसुसंस्थितः ॥ आम्रातकःकल्पवृक्षःकल्पवल्लीसमन्वितः ॥ १२ ॥ पीठेतुसि
द्धगंगाख्यास्वयंगंगासमुत्थिता ॥ आम्रातकस्यनिकटेममप्रीतिविवृद्धये ॥ १३ ॥ पुष्कराख्यन्तुतत्क्षेत्रम्पीठेत्वाम्रातकाह्वयम् ॥ ऐशान्या
न्तत्पुरुषाख्यम्ममशीर्षंव्यवस्थितम् ॥ १४ ॥ भुवनेश्वरनम्नातुपीठेख्यातश्चभैरव ॥ गह्वरम्भुवनेशस्यभुवनानन्दसंज्ञकम् ॥ १५ ॥ तस्या
सन्नेतुसुराभिःशिलारूपेणसंस्थिता ॥ कामधेनुरितिख्यातापीठेकामप्रदायिनी ॥ १६ ॥ योसौशरभमूर्तिर्मेमध्यखण्डप्रचण्डकः ॥ महाभैरव
नामाभूत्कोटिर्लिंगाह्वयस्तुसः ॥ १७ ॥ मूर्त्तिभिःपञ्चभिःपञ्चभागेषुसमवस्थितः ॥ अहम्पश्चादतिप्रीत्याभैरवाख्यःस्थितोऽधरे ॥ १८ ॥
महागौरीतुयादेवीयोगिनीसिद्धरूपिणी ॥ साब्रह्मपर्वतेचास्तेशिलारूपेणचोर्द्धतः ॥ १९ ॥ अतीवरूपसम्पन्नानाम्नासाभुवनेश्वरी ॥
यत्रब्रह्मातुसंशक्तोमयिपर्वतरूपिणि ॥ १२० ॥ कल्पवल्लीतुतत्रास्तेनाम्नासात्वपराजिता ॥ कामधेनोरदूरस्थापूर्वभागेमहेश्वरी ॥ २१ ॥
श्रीकामाख्यायोनिरूपाचण्डिकासातुयोगिनी ॥ आग्नेय्यांविद्धितांसंस्थांसर्वकामप्रदांशुभाम् ॥ २२ ॥ योगिनीचन्द्रघण्डाख्यापी
ठेभूर्द्विध्यवासिनी ॥ योगिनीस्कन्दमातातत्पीठेभूद्वनवासिनी ॥ २३ ॥ कात्यायनीपीठनाम्नापाददुर्गेतिगद्यते ॥ नैर्ऋत्यान्नीलशै
लस्यप्रान्तेसासंस्थिताशिवा ॥ २४ ॥ योसौनन्दीममतनुःसतुपाषाणरूपधृक् ॥ संस्थितःपश्चिमद्वारिहनूमान्पीठनामतः ॥ २५ ॥

और्वउवाच ॥ ॥ इतितस्यवचःश्रुत्वाशम्भोरमिततेजसः ॥ भैरवस्तन्तुपप्रच्छवेतालोऽपिसमुत्सुकः ॥ १२६ ॥ ॥ इति श्रीकालिकापुराणेचतुष्षष्टितमोऽध्यायः ॥ ६४ ॥ वेतालभैरवावूचतुः ॥ श्रुतःपीठक्रमस्तातदेव्याःपूजाक्रमस्तथा ॥ श्रोतुमिच्छामिमूर्त्तीनाम्पञ्चानामपिशंकर ॥ १ ॥ रूपाणिपञ्चमूर्तीनाम्मन्त्राणिचसमन्ततः ॥ तत्रमन्त्राणितन्त्राणिवदनौवृषभध्वज ॥ २ ॥ ॥ ईश्वरउवाच ॥ शृणुवक्ष्यामिवेतालमन्त्रन्तन्त्रम्पृथक्पृथक् ॥ कामाख्यापञ्चमूर्त्तीनांरूपंकल्पञ्चभैरव ॥ ३ ॥ कामस्थंकाममध्यस्थंकामदायपुटीकृतम् ॥ कामेनकामयेत्कामीकामंकामेनियोजयेत् ॥ ४ ॥ ज्येष्ठन्तुव्यञ्जनम्ब्रह्मन्परःशान्तंतदुच्यते ॥ प्रथमंक्रमतःकुर्यात्तसंशक्तंसुधामयम् ॥ ५ ॥ प्रजापतिस्तथाशक्रबीजंसंस्थादिसंयुतम् ॥ चन्द्रार्द्धसहितम्बीजंकामाख्यायाःप्रचक्ष्यते ॥ ६ ॥ इदन्धर्मप्रदंकाममोक्षार्थानाम्प्रदायकम् ॥ इदंरहस्यम्परममन्यत्रतुसुदुर्ल्लभम् ॥ ७ ॥ श्रोत्रेणोदंम्यशृणुयाद्गुरुवक्त्रान्नरोत्तमः ॥ सकामानखिलान्प्राप्यशिवलोकेमहीयते ॥ ८ ॥ श्रुतिसकलितसारन्देवकण्ठौघहारंसकलकलुषहारिश्रीधरानन्दकारि ॥ सुनयशुभयोभिर्भ्राजयेद्यद्यशोभिस्तदिहशिवसमस्तंविघ्नहन्त्रींगितार्थम् ॥ ॥ ९ ॥ नयनकरभकारिध्यानिनाञ्चोपकारिप्रणयिसुनयसंस्थन्देवसत्यात्त्रिकस्थम् ॥ परमपदविशीर्णंशर्वदौर्भाग्यजीर्णंशृणुशिवपदरूपंकामदेव्याःस्वरूपम् ॥ १० ॥ श्रवणगगनमात्राचार्द्धितंयस्यनामप्रभवतिबहुभूत्यैगीतिमार्गैकधाम ॥ सुरगणगणनायांकुण्डलीयस्यशक्तिस्तादिहपरमरूपञ्चिन्तनीयंकृतीशैः ॥ ११ ॥ रविशशियुतकर्णाकुंकुमापीतवर्णामणिकनकविचित्रालोलकर्णात्रिनेत्रा ॥ अभयवरदहस्तासाक्षसूत्रप्रशस्ताप्रणतसुरनरेशासिद्धकामेश्वरीसा ॥ १२ ॥ अरुणकमलसंस्थारक्तपद्मासनस्थानवतरुणशरीरामुक्तकेशीसुहारा ॥ शवहृदिपृथुतुंगन्यस्तयुग्मा

मनोज्ञाशिशुरविसमवस्त्रासिद्धकामेश्वरीसा ॥ १३ ॥ विपुलविभवदात्रीस्मेरवक्त्रासुकेशीदलितकरकदत्तासामिचन्द्रावनम्रा ॥ मनसिजह
पदिस्थायोनिमुद्रालसन्तीसकलगगनशक्तासंश्रुतस्तालभागा ॥ १४ ॥ चिन्त्याचैवंविद्युदग्निप्रकाशाधर्म्मार्थाद्यंसाधकैर्व्वांछितार्थैः ॥ क
ल्प्यन्तत्राण्यस्तदंसम्यगर्धंवेतालत्वम्भैरवश्रीप्रतिष्ठम् ॥ १५ ॥ तस्मिन्नर्धम्मण्डलंयद्विपश्चात्कार्यश्चैतच्चन्दनैःपुष्पयुक्तैः ॥ पर्यायोयोलेखने
पूर्व्वयुक्तोदेवीतन्त्रेसोत्रपूर्वंव्विधेयः ॥ १६ ॥ इतिकालिकापुराणेपञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ ईश्वरउवाच ॥ ॥ वैष्णवीतन्त्रमन्त्र
स्ययथापूर्वम्मयोदितम् ॥ मण्डलम्प्रतिपत्पातुपर्यायोमण्डलस्ययः ॥ १ ॥ सएवम्प्रथमंकार्यःशिलायाम्पुष्पचन्दनैः ॥ पात्रादीनाम्प्रतिष्ठा
नन्तथैवात्रापियोजयेत् ॥२॥ वैष्णवीतन्त्रमन्त्रस्यप्रोक्तायाप्रतिपत्तयः ॥ अत्रताःसकलायोज्याआसनाद्यैश्चपूजनम् ॥३॥ तेभ्योन्योयोविशे
षोत्रतद्वक्ष्येशृणुभैरव ॥ प्रथमम्भास्करायार्घ्यम्प्रदद्याच्छ्वेतसर्षपैः॥४॥पुष्पचन्दनसंवीतैःसगणायमाहात्मने ॥ आसनार्च्चनशेषेतुपीठोक्ताःसर्व
देवताः ॥ ५ ॥ पीठनाम्नातुसंयुज्यामण्डलस्यतुमध्यतः ॥ ध्यानस्वरूपम्भिन्नन्तद्वैष्णव्यासहभैरव॥६॥कामायाःसर्वमन्यत्तुमहामायास्तवो
दितम्॥योगिनीस्तुचतुःषष्टिःपूजयेच्चपृथक्पृथक्॥७॥गुहाम्मनोभवाञ्चापिमहत्सोहन्तथासखीम्॥अनन्तरम्पूजयेत्तुदिक्पालांश्चनवग्रहान् ८॥
रूपतस्तान्तसमुद्दिश्यपूजयेदिष्टसिद्धये ॥ पूर्वद्वारेगणपतिंप्रथमन्तुप्रपूजयेत् ॥ ९ ॥ नन्दिनञ्चहनूमन्तम्पश्चिमद्वारिपूजयेत् ॥ भृंगीचोत्तर
रतःपूज्योमहाकालस्तुदक्षिणे ॥१०॥ एतेममद्वारपालादेव्याद्वारेप्रपूजयेत् ॥ पात्रामृतीकृतिविधौकुर्याद्वैकामसुद्रया ॥११॥ भूतापसारणंकुर्या
त्पूर्वन्तालत्रयेणतु ॥ वामहस्तेदक्षिणेनपाणिनातालमाहरेत् ॥ १२ ॥ हुँहुँफडितिमन्त्रेणवेतालादींश्चसारयेत् ॥ सर्वमुत्तरतन्त्रोक्तन्तन्त्रं

कुर्यात्तुसाधकः ॥१३॥ अत्रोक्तेनस्वरूपेणप्राणायामंतथाचरेत् ॥ स्नापयेत्प्रथमन्देवीम्मूलमन्त्रेणपूजकः ॥१४॥ मधुक्षीराज्यदधिभिर्गोमूत्रे
र्गोमयैस्तथा ॥ रत्नोदकैःशर्कराभिर्गुडरत्नकुशोदकैः॥१५॥सितसर्षपयुक्ताभ्यान्तिलक्षीरैस्तथायवैः॥रक्तचन्दनपुष्पैश्चदूर्वाभीरोचनायुतैः॥
॥१६॥ नवभिर्वितरेदर्घ्यंशिलायांयोनिसान्निधौ ॥आसनम्पाद्यमर्घ्यञ्चततआचमनीयिकम् ॥१७॥मधुपर्कस्नानजलंवस्त्रञ्चन्दनभूषणम् ॥ पुष्पं
धूपञ्चदीपञ्चनेत्राञ्जनमतःपरम् ॥ १८॥ नैवेद्याचमनीयेचप्रदक्षिणनमस्कृती॥एतेषोडशनिर्दिष्टाउपचारास्तुपीठतः ॥ १९ ॥ आवाहयेन्महा
देवींगायत्र्याकामयोगया ॥ तामेवविद्धिवेतालगुह्यम्भैरवदैवतम् ॥२०॥ कामाख्येत्वमिहागच्छयथावन्ममसन्निधौ ॥ पूजाकर्म्मणिसान्निध्य
मिहकल्पयकामिनि ॥२१॥ कामाख्यायैचविद्महेकामेश्वर्यैतुधीमहि॥ततःकुर्यान्महादेवीततश्चानुग्रचोदयात् ॥२२॥ एषातुकामगायत्रीपूजयेद
नयाशुभाम् ॥ पूजावसानेचबलीन्देव्याःप्रीत्यैनिवेदयेत् ॥ २३ ॥ रुद्राक्षमालयाजाप्यमादायैवसमाचरेत् ॥ नाक्षरैर्म्मूलमन्त्रस्यात्रिधावृत्तः
प्रपूजयेत् ॥२४॥ कामाख्यायापडङ्गानिआह्वानानन्तरेतथा ॥ वैष्णवीतन्त्रमंत्रस्यकराङ्गन्यासयोश्चये ॥२५॥ सुराःप्रोक्तास्तैःसुरैस्तुसार्द्धंच
न्द्रैःसविन्दुकैः ॥ मूलमन्त्राद्यक्षराभ्यांयुगपत्तुनियोजितैः ॥२६॥ कनिष्ठादिक्रमेणैवह्यङ्गन्यासंसमाचरेत्॥ अंगन्यासकरन्यासौकृत्वापश्चात्तु
साधकः ॥२७॥ हृच्छिरस्तुशिखावर्मनेत्रस्योदरपृष्ठतः ॥ बाह्वोःपाण्योर्जङ्घयोश्चपादयोश्चापिविन्यसेत् ॥ २८ ॥ अभयंवरदंहस्तमक्षमालां
चसूत्रकम् ॥ पूजयेच्छशिनंसूर्यंशिरश्चान्द्रकलान्तथा ॥ २९ ॥ रक्तपद्मंशवञ्चैवलौहित्यम्ब्रह्मपुत्रकम् ॥ मनोभवंशिलान्तत्रशक्तिस्थां
शवमध्यतः ॥३०॥ देव्याःप्रपूजयेद्भक्तःकरवालञ्चपार्श्वतः ॥ पीठादिदेवतास्तत्रयजेत्कामेश्वरींशुभाम् ॥३१॥ त्रिपुराम्पूजयेन्मध्येपीठप्रत्य

धिदेवताम् ॥ शारदाश्चमहोत्साहांमध्यएवप्रपूजयेत् ॥३२॥ चण्डेश्वरीमहादेवीदेव्यानिर्माल्यधारिणी ॥ योनिमुद्रासमाख्याताकामाख्याया
विसर्जने ॥ ३३ ॥ इदन्द्रव्यन्तुसिन्दूरचन्दनागुरुकंकुमैः ॥ इतियोहिमयाप्रोक्तोविशेषःपरिपूजने ॥ ३४ ॥ एभिर्विशेषैःसहितंवैष्णवीत
न्त्रगोचरम् ॥ सर्वकल्यंसमासाद्यकामाख्याम्परिपूजयेत् ॥ ३५ ॥ अनेनैवविधानेनकामाख्यांयस्तुपूजयेत् ॥ मनोभवगुहामध्येसयातिपरमां
गतिम् ॥ ३६ ॥ ब्रह्माणीचण्डिकारौद्रीगौरीन्द्राणीतथैवच ॥ कौमारीवैष्णवीदुर्गानारसिंहीचकालिका ॥ ३७ ॥ चामुण्डाशिवदूतीचवाराही
कौशिकीतथा ॥ माहेश्वरीशांकरीचजयन्तीसर्वमंगला ॥३८॥ कालीकपालिनीमेधाशिवाशाकम्भरीतथा ॥ भीमाशान्ताभ्रामरीचरुद्राणीचा
म्बिकातथा ॥ ३९ ॥ क्षमाधात्रीतथास्वाहास्वधापर्णामहोदरी ॥ घोररूपामहाकालीभद्रकालीभयङ्करी ॥ ४० ॥ क्षेमंकरीचोग्रचण्डाचण्डो
ग्राचण्डनायिका ॥ चण्डाचण्डवतीचंडीमहामोहाप्रियंकरी ॥ ४१ ॥ कलविकरिणीदेवीबलप्रमाथिनीतथा ॥ मदनोन्मथिनीदेवीसर्वभूतस्य
दामनी ॥ ४२ ॥ उमातारामहानिद्राविजयाचजयातथा ॥ पूर्वोक्ताःशैलपुत्र्याद्यायोगिन्यष्टौचयाःक्रमात् ॥ ४३ ॥ ताभिरेभिश्चसहिता
चतुःषष्टिश्चयोगिनीः ॥ पूजयेन्मण्डलस्यान्तःसर्वकामार्थसिद्धये ॥ ४४ ॥ नानाविधन्तुनैवेद्यंपानम्पायसमेवच ॥ मोदकापूपपिष्टादिदेव्यै
सम्यक्प्रदापयेत् ॥ ४५ ॥ एवन्तुपूजयेद्देवींकामाख्यांवरदायिनीम् ॥ भक्तियुक्तोनरोयस्तुससर्वाल्लँभतेप्रियान् ॥ ४६ ॥ महोत्साहातुयादेवी
महामायातुसास्मृता ॥ वैष्णवीतन्त्रमन्त्रेणसापूज्यायोनिमण्डले ॥ ४७ ॥ तदेवमण्डलञ्चास्यह्यङ्गन्यासन्तथैवच ॥ साएवपूजापर्यायैत
द्ध्यानंसैवदेवता ॥ ४८ ॥ तन्त्रन्तदेवमुक्तन्तुतस्मान्नान्यंतुकिञ्चन ॥ मण्डलादिविसृष्टयर्थंमहामायामहोत्सवे ॥ ४९ ॥ यत्प्रोक्तन्तेनतान्दे

र्वीमहोत्साहान्तुमण्डले ॥ स्नानपूर्वम्पूजयेत्तुमध्वाज्यादिभिरासवैः ॥५०॥ शृणुतान्त्रिपुरामूर्त्तेःकामाख्यायाःम्प्रपूजनम् ॥ एतस्यामूलमन्त्र
न्तुपूर्वमुत्तरतन्त्रके ॥ ५१ ॥ युवयोरिष्टयोःसम्यक्क्रमात्तत्प्रतिपादितम् ॥ वाग्भवंकामराजन्तुडामरश्चेतितत्त्रयम् ॥ ५२ ॥ सर्वधर्मार्थकामा
दिसाधकंकुण्डलीयुतम् ॥ त्रीण्यस्मात्पुरतोदद्याद्दुर्गाध्यातामहेश्वरी ॥ ५३ ॥ त्रिपुरेतिततःख्याताकामाख्याकामरूपिणी ॥ तस्यास्तुस्ना
पनंयाद्दक्कामाख्यायाःप्रकीर्त्तितम् ॥ ५४ ॥ तेनैवस्नापनंकुर्यान्मूलमन्त्रेणपूजकः ॥ त्रिगुणम्मण्डलञ्चास्यात्त्रिपुरन्तुत्रिरेखकम् ॥ ५५ ॥
मन्त्रन्तुत्र्यक्षरञ्ज्ञेयन्तथारूपन्त्रयम्पुनः ॥ त्रिविधाकुण्डलीशक्तिस्त्रिदेवानाञ्चसृष्टये ॥ ५६ ॥ सर्वन्त्रयन्त्रयंयस्मात्त्रिपुरातेनसास्मृता ॥ उदी
च्याद्यथपूर्वान्तारेखाःकार्यास्तुमण्डले ॥ ५७ ॥ ॥ त्रिस्त्रिरेखास्तुकर्त्तव्यास्ताएवपुष्पचन्दनैः ॥ ऐशान्यामथनैर्ऋत्याम्मन्त्रंकृत्वातुसल्लिखे
त् ॥ ५८ ॥ नैर्ऋत्याञ्चैववायव्यान्ततोह्यैशान्यगाम्पुनः ॥ एवंत्रिकोणंविलिखेन्मण्डलम्यान्तरेपुनः ॥ ५९ ॥ ऐशान्याद्यास्तुयारेखासातुश
क्तिर्निगद्यते ॥ नैर्ऋत्यांवायवींयातातततोह्यैशान्यगातुया ॥ ६० ॥ सातुशम्भुस्समाख्याताशक्त्याशम्भुंविभेदयेत ॥ शक्त्याविभिन्नम्भूतेशं
वेष्टयेत्कमलेनतु ॥ ६१ ॥ अष्टपत्रेणतान्ध्यात्वात्रिवर्णाम्प्राक्प्रपूजयेत् ॥ त्रिभिस्त्रिभिस्त्रिरेखाभिःशक्तिशम्भुञ्चवेष्टयेत् ॥ ६२ ॥ स्थानस्या
भ्युक्षणंसम्यङ्मार्जनञ्चिखँनन्तथा ॥ अस्त्रमन्त्रप्रयोगाणाम्भूतानामपसारणम् ॥ ६३ ॥ वैष्णवीतन्त्रमन्त्रोक्तन्तथैवोत्तरतन्त्रके ॥ यत्प्रोक्त
न्तत्तुसामान्यम्प्राकुर्यात्साधकोनरः ॥ ६४ ॥ त्रिपुरायाविशेषेणसहितम्पूजनक्रमम् ॥ एतात्रिकोणन्देवानान्त्रयाणांस्थानमिष्यते ॥ ६५ ॥
ऐशान्यांतुतथेशानोनैर्ऋत्याञ्चतुराननः ॥ वायव्यान्तुतथाब्रह्माषट्कोणेषुप्रकीर्त्तिताः ॥ ६६ ॥ दलन्त्वेकपुरम्प्रोक्तंकेशरञ्चापरम्पुरम् ॥ पुरं

शेषन्त्रिकोणन्तुत्रिपुरम्मण्डलंस्मृतम् ॥ ६७ ॥ दलेषुकेशरेचापित्रिकोणेचत्रिधात्रिधा ॥ रेखास्तुविहिताःसम्यक्कुर्यात्तत्रपुनःपुनः ॥ ६८ ॥
उत्तरन्तद्भवेद्वारन्तस्यवैधनुराकृतिः ॥ पूर्वद्वारन्तुषट्कोणश्चतुःकोणन्तुदक्षिणे॥६९॥पश्चिमन्तोरणाकारंयथाचान्यत्रमण्डले॥ ऐशान्याम्पञ्च
बाणाँस्तुलिखेद्वह्नौचतद्धनुः ॥ ७० ॥ नैर्ऋत्यांपुस्तकञ्चापिवायव्यामक्षमालिकाम् ॥ एवंकृत्वामण्डलन्तुधृत्वावामेनपाणिना ॥ ७१ ॥
वाग्वेश्मनेनमइतिमण्डलम्पूजयेत्ततः ॥ पूजयित्वाततोभूतान्कालिकात्रितयेनतु ॥ ७२ ॥ मूलमन्त्रेणपूर्वोक्तैर्मन्त्रैरपिसमाचरेत् ॥ नवाभि
श्छोटिकाभिस्तुत्रिधाकृत्वातुवेष्टनम् ॥ ७३ ॥ अभ्युक्षणन्ततःकुर्याद्भूतानामपसारणम् ॥ प्रतिपत्तिस्तुपात्रस्यअर्घार्थन्नवधापुनः ॥ ७४ ॥
पूर्ववत्साधकःकुर्याद्दहनंप्लवनन्तथा ॥ अमृतीकरणंकुर्यात्प्रथमन्धेनुमुद्रया ॥ ७५ ॥ योनिमुद्रान्ततःकुर्यात्पात्रतोयन्तुत्रिःस्पृशेत् ॥ मार्त
ण्डभैरवायार्घ्यन्दूर्वाभिःसिद्धसर्षपैः ॥ ७६ ॥ रक्तपुष्पैश्चन्दनैश्चसगणायनिवेदयेत् ॥ पाणिकच्छपिकान्त्यक्त्वाचिन्तनंयोनिमुद्रया ॥
॥ ७७ ॥ आदौमध्येचकर्त्तव्यंक्रमाद्वेतालभैरव ॥ अस्त्रमन्त्रेणपात्रस्यस्थापनार्थन्तुमण्डलम् ॥ ७८ ॥ षट्कोणन्तुलिखेत्पूर्वन्तन्मन्त्रस्था
पनेपिच ॥ ऐँआँह्रीँइँतिमन्त्रेणत्रिधापात्रेजलांक्षिपेत् ॥ ७९ ॥ त्रिधागन्धश्चपुष्पश्चत्रिधादूर्वाक्षतम्पुनः ॥ ऐँहाँक्रीँहूँहुँक्रोँअगुष्ठादिक्रमान्न्यसे
त् ॥ ८० ॥ ऐँक्राइत्यस्त्रमन्त्रेणपाणिपृष्ठतलेतथा ॥ हृदयादिक्रमात्पश्चान्न्यासंकुर्यात्त्रिधात्रिधा ॥ ८१ ॥ संयोज्यपाण्योःक्रमतश्चांगु
ष्ठादिद्वयन्द्वयम् ॥ त्रिधात्रिधापृथक्कुर्याच्छेषांगानिचविन्यसेत् ॥ ८२॥ कर्णरन्ध्रेतथात्रह्मद्वारकंशतलन्तथा ॥ नासिकारन्ध्रयुगलञ्जानुयुग्म
म्पदद्वयम् ॥ ८३ ॥ त्रिधात्रिधान्यसेदेभिःषड्भिर्मन्त्रैःपृथक्पृथक् ॥ प्राणायामन्ततःकुर्यात्पूरकैस्तम्भकैस्तथा ॥ ८४ ॥ रेचकेनापित्रिपुरा

मूर्तिन्देवींविचिन्तयेत् ॥ दहनपुवनंकृत्वाआद्याम्मूर्त्तिंविचिन्तयेत् ॥ ८५ ॥ त्रिधाहृत्याथहृदयेताम्मूर्तिंशृणुभैरव ॥ सिन्दूरपुञ्जसंकाशान्त्रि
नेत्रान्तुचतुर्भुजाम् ॥ ८६ ॥ वामोर्द्धेपुष्पकोदण्डन्धृत्वाधःपुस्तकन्तथा ॥ दक्षिणोर्द्धेपञ्चबाणानक्षमालान्दधात्यधः ॥८७॥ चतुर्णांकुणपाना
न्तुपृष्ठेन्यंकुणपान्तरम् ॥ निधायतस्यपृष्ठेतुसमपादेनसंस्थिताम् ॥८८ ॥ जटाजूटार्द्धचन्द्रेणसमाबद्धशिरोधराम् ॥ लग्नान्त्रिवलिभेदेनचारुम
ध्याम्मनोहराम् ॥८९॥ सर्वालंकारसम्पूर्णांसर्वांगसुन्दरींशुभाम् ॥ स्रवद्रविणसन्दोहांसर्वलक्षणसंयुताम् ॥ ९० ॥ एनान्तुप्रथमन्ध्यात्वात्रिधा
त्मानन्तुचिन्तयेत्॥सद्रूपञ्चततःपश्चात्पुष्पन्तद्वाग्भवेनतु॥९१॥ स्वमस्तकेपुनर्दद्यादंगन्यासम्पुनस्तथा॥मन्त्रद्वयंत्रिधाजप्त्वावाग्भवाद्यंतुसा
धकः॥९२॥अर्घ्यपात्रस्यतोयेषुतैस्तोयैःसेचयेच्छिरः ॥ पूजोपकरणञ्चापित्रिरभ्युक्ष्यतथैवतु ॥ ९३ ॥ कामपीठंततोध्यात्वापूजयेत्क्रमतस्त्वि
मान्॥गणेशञ्चगणाध्यक्षंगणनाथन्तथैवच॥९४॥ गणक्रीडञ्चपूर्वादिद्वारेमन्त्रेणपूजयेत् ॥ हैरम्बबीजमेतेषांमन्त्रस्तुपरिकीर्त्तितः॥९५॥विद्या
शान्तिर्निवृत्तिश्चप्रतिष्ठाद्वारपालकाः ॥ कलान्ताःपूजयेत्सम्यक्पूर्वादिक्रमतस्तथा ॥९६॥ सिद्धपुत्रञ्ज्ञानपुत्रन्तथासहजपुत्रकम् ॥ शेषंसम
मपुत्रन्तुपूजयेद्वटुकानिमान् ॥ ९७ ॥ प्रत्येकन्तुश्रियंदेवींबटुकानांपरेवरे ॥ श्रीमित्यनेनमन्त्रेणपूर्वादौपूजयेत्क्रमात् ॥९८॥ सिद्धस्यसहज
स्याथज्ञानस्यसमयस्यच ॥ कुमारींपूजयेत्कोणेऐशान्यादौतुमण्डले ॥ ९९ ॥ गोरटण्डामरञ्चैवलोहजंघन्तथैवच ॥ भूतनाथंक्षेत्रपालमी
शानादौप्रपूजयेत् ॥ मण्डलस्यचमध्येतुपञ्चबाणान्प्रपूजयेत् ॥ १०० ॥ इतिश्रीकालिकापुराणेषट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ श्रीभ
गवानुवाच ॥ ॥ द्रावणंशोषणञ्चैवबन्धनम्मोहनन्तथा ॥ आकर्षणञ्चमध्येनमन्त्रेणैवप्रपूजयेत् ॥ १ ॥ ततस्त्रिष्वथकोणेषुपूजयेत्तुत्रि

योगिनीः ॥ भगश्चभगजिह्वांचभगास्यामुत्तरादिकम् ॥ २ ॥ क्रमात्तुपूज्यास्तिस्रोन्याअन्यामध्येतुकोणयोः ॥ भगमालिनीन्तुप्रथमेद्वितीयेतुभगोदरीम् ॥ ३ ॥ तृतीयेभगहारान्तुयोगिनींकामरूपिणीम् ॥ अनंगकुसुमान्देवीन्तथैवानंगमेखलाम् ॥ ४ ॥ अनंगमदनाञ्चैवह्यनंगमदनोद्भवाम् ॥ अनंगवेशाञ्चानंगमालिनीम्मदनोद्भवाम् ॥ ५ ॥ दलकेशरमध्येतुह्यष्टमीम्मदनांकुशाम् ॥ शैलपुत्र्यादयश्चाष्टौत्रिपुरापूजनक्रमे ॥ ६ ॥ एतन्नामभिरव्यग्राबभूवुःकामयोगिनीः ॥ वाग्भवेनतथादुर्गान्नेत्रबीजान्तुकेनतु ॥ ७ ॥ अंगन्यासंसमन्त्रैस्तुपड्भिरष्टाविमान्पुनः ॥ पूजयेत्क्षेत्रपालाँस्तुमध्येकिञ्जल्कपत्रयोः ॥ ८ ॥ हेतुकन्त्रिपुरघ्नश्चअग्निजिह्वंतथैवच ॥ अग्निवेतालसंज्ञश्चकालश्चाऽथकरालकम् ॥ ९ ॥ एकपादम्भीमनाथमुत्तरादिक्रमेणतु ॥ एभिरेवाष्टभिर्म्मन्त्रैःकामराजेनसंयुतैः ॥ १० ॥ नवैतानसितांगादीन्नायकान्पूजयेत्क्रमात् ॥ मण्डलस्यचतुर्दिक्षुद्वौद्वौपूर्वादिषुक्रमात् ॥ ११ ॥ पद्ममण्डलयोर्मध्येशेषमेकन्तुपूजयेत् ॥ असितांगोरुरुश्चण्डःक्रोधोन्मत्तोभयंकरः ॥ १२ ॥ कपालीभीषणश्चैवसंरीतिश्चेतिवैनव ॥ ऐशान्यादिक्रमाद्वेद्वेनायिकंपूजयेन्नरः ॥ १३ ॥ पद्ममण्डलयोर्मध्येअग्रौद्वेचप्रपूजयेत् ॥ ब्रह्माणीम्भैरवीञ्चैवतथामाहेश्वरीमपि ॥ १४ ॥ कौमारींवैष्णवीञ्चैवनारसिंहीन्तथैवच ॥ वाराहीञ्चतथेन्द्राणीञ्चामुण्डाञ्चण्डिकान्तथा ॥ १५ ॥ आधारशक्तिप्रभृतीन्मण्डलस्यतुमध्यतः ॥ वैष्णवीतन्त्रकल्पोक्तान्सर्वान्भैरवपूजयेत् ॥ १६ ॥ शिवस्यपञ्चयाःप्रोक्ताःसद्योजातादयःपुरा ॥ मूर्त्तयस्ताःपद्ममध्येपञ्चप्रेतत्वमागताः ॥ १७ ॥ ताःपञ्चपूजयेन्मध्येरक्तपद्मंशवन्तथा ॥ सिंहञ्चपूजयेत्तत्रजगदाधारसंज्ञितम् ॥ १८ ॥ जयन्तीम्मंगलांकालीम्भद्रकालींकपालिनीम् ॥ दुर्गांक्षमांशिवान्धात्रींस्वधांस्वाहाञ्चपूजयेत् ॥ १९ ॥ उग्र

चण्डाप्रचण्डाचचण्डोग्राचण्डनायिका ॥ चण्डाचण्डवतीचैवचण्डोग्राचण्डनायिका ॥ २० ॥ एताःसम्पूजयेन्मध्येमण्डलस्याविशेषतः ॥
आदित्यादीन्ग्रहान्सर्वान्नृपतोह्यस्त्रसंयुतान् ॥ २१ ॥ क्रमात्प्रत्येकमुद्दिश्यपार्श्वेपार्श्वेप्रपूजयेत् ॥ दिक्पालानान्तुमन्त्रेणतथासर्वांस्तुदिक्
पतीन् ॥ २२ ॥ अस्त्रमन्त्रैस्तुतान्सर्वांस्तेषाम्मंत्राणिभैरव ॥ नाथंकामेश्वरन्तत्रएकवक्त्रञ्चतुर्भुजम् ॥ २३ ॥ भस्मश्वेतम्मध्यहृदिरक्तपुष्पै
स्तुकुंकुमैः ॥ त्रिशूलञ्चपिनाकञ्चवामहस्तद्वयेस्थितम् ॥ २४ ॥ उत्पलम्बीजपूरञ्चदक्षिणंद्वितयेतथा ॥ श्वेतपद्मोपरिस्थञ्चध्यात्वामध्ये
प्रपूजयेत् ॥ २५ ॥ कामाख्यांमूर्त्तितोध्यात्वाकामाख्यामपिपूजयेत् ॥ कामेश्वरीन्तत्रदेवीम्पूजयेत्परमेश्वरीम् ॥ २६ ॥ वक्ष्यमाणेनरूपे
णतत्रवेतालभैरवौ ॥ करालंक्षेत्रपालञ्चकर्त्रिकर्परधारिणम् ॥ २७ ॥ पूजयेदीशमत्यर्थन्दंष्ट्राभिन्नाधरम्भवम् ॥ तिन्तिडींकल्पवृक्षञ्चसु
च्छायंरत्नभूषितम् ॥ २८ ॥ त्रिकुठङ्कृष्णवर्णञ्चनीलशैलम्महाद्युतिम् ॥ मनोभवांगुहान्तत्रपञ्चव्यामायतांशुभाम् ॥ २९ ॥ रत्नमण्डलसं
युक्तांरक्तवर्णांसुवर्त्तुलाम् ॥ अपराजिताञ्चवल्लीञ्चव्यामत्रयसुविस्तृताम् ॥ ३० ॥ आरक्तवर्णांसततंकुसुमैरुपशोभिताम् ॥ बटुकंकम्बला
ख्यन्तुस्वर्णगौरंगजासनम् ॥ ३१ ॥ द्विभुजन्दक्षिणेदण्डपार्णिवामेकपालकम् ॥ बिभ्रतम्पुरतोदेव्याःपूज्योविघ्नविपत्तये ॥ ३२ ॥ भैरवः
पाण्डुनाथश्चरक्तगौरश्चतुर्भुजः ॥ गदाम्पद्मञ्चशक्तिञ्चचक्रञ्चापिकरेषुच ॥ ३३ ॥ बिभ्रद्देव्याःपुरोभागेपूज्योयंविष्णुरूपधृक् ॥ श्मशानं
हेरुकाख्यञ्चरक्तवर्णम्भयंकरम् ॥ ३४ ॥ असिचर्मधरंरौद्रम्भुञ्जानम्मनुजामिषम् ॥ तिसृभिर्मुण्डमालाभिर्गलद्रक्ताभिराजितम् ॥ ३५ ॥
अग्निनिर्दग्धविगलद्दन्तप्रेतोपरिस्थितम् ॥ पूजयेच्चिन्तनेनैवशस्त्रवाहनभूषणम् ॥ ३६ ॥ महोच्छ्वासांयोगिनीन्तुमहामायास्वरूपिणीम् ॥

ध्यानतोरूपतस्तान्तुदेव्याअग्रेप्रपजयेत् ॥ ३७ ॥ पुरीश्चन्द्रवतीन्देव्यानीलपर्वतपूर्वतः ॥ योजनद्वयविस्तीर्णामर्द्धयोजनमायताम् ॥
॥ ३८ ॥ उच्चैरनेकप्रासादसौधसङ्घविभूषिताम् ॥ मणिरत्नसुवर्णोघजातप्रासादविस्तृताम् ॥ ३९ ॥ क्रीडासरोवरैःसद्भिःसञ्छन्नांविकचैः
कचैः ॥ संयुक्ताम्पूजयेत्तत्रदेव्याअग्रेसमन्त्रकम् ॥ ४० ॥ लौहित्यंरक्तगौरांगन्नीलवस्त्रविभूषितम् ॥ रत्नमालासमायुक्तञ्चतुर्बाहुसमान्वि
तम् ॥ ४१ ॥ पुस्तकंश्वेतपद्मञ्चबिभ्रतन्दक्षिणेकरे ॥ वामेशक्तिध्वजञ्चैवशिशुमारस्थितंशुभम् ॥ ४२ ॥ पीठेश्वरानिमान्मध्येमन्त्रैरे
तैःप्रपजयेत् ॥ नाथंकामेश्वरन्देवम्प्रासादेनप्रपजयेत् ॥ ४३ ॥ कामेश्वर्यास्तुमन्त्रेणयजेत्कामेश्वरींशुभाम् ॥ द्वावुपान्तौबलेनैवमदना
न्तेचतत्क्रमात् ॥ ४४ ॥ योजयेन्नादबिन्दुभ्यामासाकारममन्त्रकम् ॥ चण्डिकानेत्रबीजस्ययच्छेषमक्षरन्तुतत् ॥ ४५ ॥ कल्पान्तिन्ति
डिकावृक्षमन्त्रमेतत्प्रकीर्त्तितम् ॥ उग्रायामध्यबीजन्तुनीलशैलस्यमन्त्रकम् ॥ ४६ ॥ मनोभवस्यबीजन्तुमहादेवेनसंहितम् ॥ चन्द्रबिन्दु
समायुक्तन्तन्मन्त्रञ्चापराजितम् ॥ ४७ ॥ हयग्रीवस्वरूपस्याविष्णोर्यद्बीजमुत्तमम् ॥ कम्बलस्यतुतन्मन्त्रम्पूजनंपरिकीर्त्तितम् ॥
॥ ४८ ॥ केवलःसप्ररोहादिपष्ठस्वरसमन्वितः ॥ चन्द्रबिन्दुसमायुक्तंहयग्रीवस्यबीजकम् ॥ ४९ ॥ भैरवम्पाण्डुनाथञ्चवनमालिस्व
रूपिणम् ॥ वाराहेनतुबीजेनपूजयेत्तुविधानतः ॥ ५० ॥ सपरौद्वावनुस्वारविसर्गाभ्यांतुसंयुतौ ॥ महाभैरवमन्त्रेणभैरवान्तेनपूजयेत् ॥
॥ ५१ ॥ महोच्छ्वासाम्महामायान्द्वितीयाष्टाक्षरेणतु ॥ देवीतन्त्रोदितेनैवपूजयेद्भूतिवृद्धये ॥ ५२ ॥ आद्याक्षरन्तुसामीन्दुबिन्दुभ्यां
समलंकृतम् ॥ स्वनाम्नश्चन्द्रवत्यास्तुपूजामन्त्रम्प्रकीर्तितम् ॥ ५३ ॥ सर्वलक्षणसम्पूर्णसर्वालंकारभूषितम् ॥ लौहित्यनदराजस्यत्रह्म

पुत्रस्यभूतिदम् ॥ ब्रह्मबीजन्तुमन्मन्त्रंवह्निभार्यान्तमिष्यते ॥ ५४ ॥ द्वितीयन्त्रिपुरारूपन्तथैवतुतृतीयकम् ॥ आवाहनार्थन्देव्यास्तु
चिन्तयेद्योनिमुद्रया ॥ ५५ ॥ बन्धूकपुष्पसंकाशाञ्जटाजूटेन्दुमण्डिताम् ॥ सर्वलक्षणसम्पूर्णासर्वालंकारभूषिताम् ॥ ५६ ॥ उद्यद्रवि
प्रभाम्पद्मपर्यंकेषुसुसंस्थिताम् ॥ मुक्तारत्नावलीयुक्ताम्पीनोन्नतपयोधराम् ॥ ५७ ॥ वलीविभंगचतुरामासवामोदमोदिताम् ॥ नेत्राह्लाद
करींशुभ्रांक्षोभणीञ्जगतान्तथा ॥ ५८ ॥ त्रिनेत्रांयोनिमुद्रायामीषद्धासमायुताम् ॥ नवयौवनसम्पन्नाम्मृडालाभचतुर्भुजाम् ॥ ५९ ॥
वामार्द्धेपुस्तकंधत्तेअक्षमालान्तुदक्षिणे ॥ वामेनाभयदान्देवीन्दक्षिणाधोवरप्रदाम् ॥ ६० ॥ स्रवद्रक्तौघसूर्याभांशिरोमालान्तुबिभ्रतीम् ॥
आपादलम्बिनींकल्पद्रुममासाद्यसंस्थिताम् ॥ ६१ ॥ कदंबोपवनान्तस्थांकामाह्लादकरींशुभाम् ॥ द्वितीयान्त्रिपुरान्ध्यायेदेवंरूपाम्मनो
हराम्॥६२॥ तृतीयन्त्रिपुरारूपंशृणुवेतालभैरव ॥ जपाकुसुमसंकाशाम्मुक्तकेशींशुभाननाम् ॥६३॥ सदाशिवंहसन्तन्तुप्रेतवद्विनिधायवै ॥
हृदयेतस्यदेवस्यह्यर्द्धपद्मासनस्थिताम् ॥ ६४ ॥ रक्तोत्पलैर्मिश्रितान्तुमुण्डमालाम्पदानुगाम् ॥ ग्रीवायान्धारयन्तीन्तुपीनोन्नतपयोधराम्
॥ ६५ ॥ चतुर्भुजान्तथानग्नान्दक्षिणार्द्धेक्षमालिनीम् ॥ वरदान्तदधोवामेजगन्मायान्तथाभयाम् ॥ ६६ ॥ अधस्तुपुस्तकन्धत्तेत्रिनेत्रां
हसिताननाम् ॥ स्रवद्रुधिरभोगार्त्तांतथासर्वांगसुन्दरीम् ॥ ६७ ॥ एवंविधन्तृतीयन्तुरूपन्ध्यायेत्तुपूजकः ॥ आद्यन्तुवाग्भवंरूपंद्वितीयंका
मराजकम् ॥ ६८ ॥ डामरम्मोहनञ्चापितृतीयम्परिकीर्त्तितम् ॥ एकैकन्तुत्रिरूपाणिप्राग्विचिन्त्यार्थसाधकः ॥ ६९॥ मन्त्रद्वयेनप्रत्येकंहृदि
षोडशकैस्तथा ॥ पूजयेदुपचारैस्तुबहिर्यद्वत्तथैवच ॥ ७० ॥ मन्त्रत्रयन्तथैकत्रकृत्वाचमनमूर्त्तयः ॥ कर्त्तव्याएकतस्तत्रमध्यरूपेनिवेश

येत् ॥ ७१ ॥ नासापुटेनानिःसार्यदक्षिणेनाथताम्पुनः ॥ अवतार्यकराभ्यान्तुदेवीमावाहयेत्त्रिधा ॥ ७२ ॥ गायत्रीत्रयमुच्चार्यस्नापयेत्प्रथ
मन्तुताम् ॥ आवाहनेतुमन्त्रोयम्पठितव्यश्चसाधके ॥ ७३ ॥ एहिदेविशुभावर्त्तेयज्ञेस्मिन्ममसन्निधौ ॥ अव्युच्छिन्नान्ततःशुभ्रांवाचंकण्ठस्यदे
हिमे ॥ ७४ ॥ एह्येहिभगवत्यम्बत्रिपुरेकामदायिनि ॥ इमंभागबलिम्गृह्यसान्निध्यमिहकल्पय ॥ ७५ ॥ नारायिण्यैविद्महेवाग्वादिन्यैधी
महि ॥ एवमुक्काततःपश्चात्तन्नोदेवीप्रचोदयात् ॥ ७६ ॥ नारायण्यैविद्महेत्वांचण्डिकायैचधीमहि ॥ शेषभागेप्रयुञ्जीततन्नःकुब्जिप्रचो
दयात् ॥ ७७ ॥ महामायायैविद्महेत्वांसम्मोहिन्यैचधीमहि ॥ पश्चादेवम्प्रयुञ्जीततन्नश्चण्डिप्रचोदयात् ॥ ७८ ॥ एतास्तुत्रिपुरादेव्यागा
यंत्र्यःपरिकीर्त्तिताः ॥ प्रत्येकंस्नापनंकुर्यात्त्रिपुराणाञ्चतिसृभिः ॥ ७९ ॥ वाग्भवेनतुमन्त्रेणप्रथमम्पूजयेच्छिवाम् ॥ कामराजेनवैपश्चाड्डा
मरेणापिपूजयेत् ॥ ८० ॥ शेषन्तुमूलमन्त्रेणचाष्टांगानाम्प्रपूजनम् ॥ एकैकम्प्रक्रमम्पूज्यत्रिपुरायैसमन्ततः ॥ ८१ ॥ नवधापूजयेद्देवीन्त्रि
पुराम्कामरूपिणीम् ॥ उत्तरादिचतुःपत्रेपद्मस्यैतान्प्रपूजयेत् ॥ ८२ ॥ ब्रह्माणम्माधवंशम्भुम्भास्करञ्चतथैवच ॥ ऐशान्यादिषुतेष्वेवंक्रमाद्दे
व्याःप्रपूजयेत् ॥ ८३ ॥ जयन्तीम्प्रथमम्पश्चाद्वायव्यामपराजिताम् ॥ नैर्ऋत्यांविजयाञ्चैवतथाग्नेय्याञ्जयाह्वयाम् ॥ ८४ ॥ त्रिकोणेकेसर
स्यान्तेकामम्प्रीतिंरतिन्तथा ॥ पूजयेत्पञ्चबाणांश्चपुष्पञ्चापञ्चपुस्तिकाम् ॥ ८५ ॥ अक्षमालांश्चवद्यत्नासद्मपर्यङ्कमेवच ॥ प्रेतसद्मशिरश्चै
वसम्यक्तत्रैवपूजयेत् ॥ ८६ ॥ सम्पूज्यपूर्ववन्मालांस्फाटिकामेवभैरव ॥ आदायाथोत्तरीयेणतामाच्छाद्यप्रयत्नतः ॥ ८७ ॥ पूर्वोद्धृतञ्जपे
त्सम्यक्साधकस्त्रिपुरामहः ॥ जप्त्वास्तुतिम्पठित्वाचप्रणम्यचमुहुर्मुहुः ॥ ८८ ॥ त्रिपुरायैबलिन्दद्यात्सम्भवात्तत्रिजातिकम् ॥ सफेनैस्तोय

संयुक्तैःशर्करामधुसैन्धवैः ॥ ८९ ॥ अभ्युक्ष्यरुधिरेन्दद्यात्कामराजेनभैरव ॥ छेदयेद्वाग्भवेनैवडामरैर्विहरेच्छिरः ॥ ९० ॥ यत्रयत्रबलीन्द
द्यात्साधकोदेवतार्चने ॥ वैष्णवीतन्त्रकल्पोक्तमादद्यात्पूजनेबलिम् ॥ ९१ ॥ ततोदेव्यैबलीन्दद्यादेतद्वर्णक्रमात्पुनः ॥ गोक्षीरम्ब्राह्मणोदद्या
द्द्रव्यमाज्यन्तुराजजः ॥ ९२ ॥ वैश्यस्तुमाक्षिकन्दद्याच्छूद्रःपुष्पासवाटिकाम् ॥ घ्रात्वापुष्पमथैशान्याद्भिर्म्माल्यान्निःक्षिपेद्बुधः ॥ ९३ ॥
निर्माल्यधारिणीचास्यादेवीत्रिपुरचण्डिका ॥ विसृज्यादौयोनिमुद्रांपद्ममुद्रान्तथैवच ॥ ९४ ॥ अर्द्धमुद्रांत्रिमुद्राश्चप्रत्येकमपिदर्शयेत् ॥ नि
र्माल्यमथगृह्णीयात्कामराजाह्वयेनतु ॥ ९५ ॥ एवंयःपूजयेद्देवीन्त्रिपुरांकामरूपिणीम् ॥ सकामानखिलान्प्राप्यदेवीलोकमवाप्नुयात् ॥९६॥
इतिकालिकापुराणेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ ईश्वरउवाच ॥ ॥ देव्याःकामेश्वरीम्मूर्त्तिंशृणुवक्ष्यामिभैरव ॥ यस्याश्चिन्तन
मात्रेणसाधकोलभतेप्रियान् ॥१॥ तन्त्रन्तस्याःप्रथमतस्ततोनुध्यानगोचरम् ॥ ततःपूजाक्रमंवक्ष्येक्रमाद्वेतालभैरव ॥२॥ प्रजापतिस्ततोव
ह्निरिन्द्रवीजन्ततःपरम् ॥ चूडाचन्द्रार्द्धसहितश्चतुर्थस्वरसंयुतम् ॥ ३ ॥ इदंकामेश्वरम्बीजमन्त्रंसर्वार्थसाधनम् ॥ स्थानाभ्युक्षणयन्त्रादि
पात्रन्यासादिकन्तथा ॥ ४ ॥ भूतापसारणादींश्चवैष्णवीतन्त्रभाषितान् ॥ तथोक्तानुत्तरेतन्त्रेगृह्णीयात्साधकोत्तमः ॥ ५ ॥ प्राणायामत्रयं
कुर्याद्दहनंप्लवनन्तथा ॥ विशेषमण्डलञ्चास्याःशृणुवेतालभैरव ॥ ६॥ षट्कोणम्मण्डलंकुर्याद्रक्तवर्णन्तुचिन्तयेत् ॥ विभेद्यशक्त्याशम्भुन्तु
त्रिपुरातन्त्रवद्बुधः ॥ ७ ॥ ततःशक्तिंशम्भुनापिभेदयेत्क्रमतःसुधीः ॥ ऐशान्यादिनैर्ऋतान्तांरेखांकृत्वाथदक्षिणे ॥८॥ पश्चिमात्पूर्वगांरेखा
म्पूर्वादपितथोत्तराम् ॥ उत्तरात्पश्चिमान्तान्तुकृत्वारेखास्तुयोजयेत् ॥९॥ धनुस्तोरणसंकाशंद्वारेचोत्तरपश्चिमे ॥ दक्षिणंतुत्रिकोणंस्यात्षट्को

णम्पूर्वमुच्यते ॥ १० ॥ जालन्धरंलिखेत्पीठमुत्तरेपश्चिमेलिखेत् ॥ ओष्ठपीठन्दक्षिणेतुकामरूपन्तुपूर्वतः ॥ ११ ॥ देव्याद्वादशगुह्यानिया
निद्वादशभिःकरैः ॥ लिखेन्मण्डलकोणेषुतानिदिक्षुत्रयन्त्रयम् ॥१२॥ षड्भिःषड्भिस्तुरेखाभिःकर्त्तव्योमण्डलक्रमः ॥ अन्यदुत्तरतन्त्रोक्तं
वैष्णवीतन्त्रभाषितम् ॥ १३ ॥ मण्डलस्यक्रमंसर्वंविद्धिवेतालभैरव ॥ ॐक्लींमण्डलतत्त्वायनमइत्यत्रमण्डलम् ॥ १४ ॥ पूजयेत्प्रथम
न्ध्यात्वामण्डलंयोगपीठकम् ॥ पीठेशिलायांविलिखेन्मण्डलंयोनिमण्डले ॥ १५ ॥ त्रिकोणंविलिखेत्पश्चाद्वेष्टयेत्कमलेनतु ॥ रूपन्तुचि
न्तयेद्देव्याःकामेश्वर्यामनोहरम् ॥ १६ ॥ प्रभिन्नाञ्जनसङ्काशान्नीलस्निग्धशिरोरुहाम् ॥ षडक्रान्द्वादशभुजामष्टादशविलोचनाम् ॥ १७ ॥
प्रत्येकंषट्सुशीर्षेषुचन्द्रार्द्धकृतशेखराम् ॥ मणिमाणिक्यमुक्तादिकृतमालामुरःस्थले ॥ १८ ॥ कण्ठेचबिभ्रतींनित्यंसर्वाऽलंकारमण्डिताम् ॥
पुस्तकंसिद्धसूत्रञ्चपञ्चबाणन्तुतन्तथा ॥ १९ ॥ खड्गंशक्तिञ्चशूलञ्चबिभ्रतीन्दक्षिणैःकरैः ॥ अक्षमालाम्महापद्मंकोदण्डञ्चाभयन्तथा ॥२०॥
चर्मपश्चात्पिनाकञ्चबिभ्रतीम्वामपाणिभिः ॥ शुक्लंरक्तञ्चपीतञ्चहरितंकृष्णमेवच ॥ २१ ॥ विचित्रंक्रमतःशीर्षमैशान्याम्पूर्वमेवच ॥ दक्षिण
म्पश्चिमञ्चैवतथैवोत्तरशीर्षकम् ॥ २२ ॥ मध्यञ्चेतिमहाभागक्रमाच्छीर्षाणिवर्णतः ॥ शुक्लम्माहेश्वरीवक्त्रंकामाख्यारक्तमुच्यते ॥ २३ ॥
त्रिपुरापीतसंकाशाशारदाहरितातथा ॥ कृष्णंकामेश्वरीवक्त्रंचण्डायाश्चित्रमिष्यते ॥ २४ ॥ धम्मिल्लसंयुतकचम्प्रतिशीर्षम्प्रकीर्त्तितम् ॥ सिं
होपरिसितप्रेतन्तस्मिँल्लोहितपंकजम् ॥ २५ ॥ कामेश्वरीस्थितातत्रईषत्प्रहसिताननना ॥ विचित्रांशुकसंवीतांव्याघ्रचर्म्माम्बरान्तथा॥२६॥
एवंकामेश्वरीन्ध्यायेद्धर्मकामार्थसिद्धये ॥ पीठेन्यत्राऽथवादेव्यापूजायांकथ्यतेक्रमः ॥ २७ ॥ पीठेविशेषोवक्तव्यःसामान्येत्वन्यदिष्यते ॥

अंगुष्ठादिक्रमादेवसंयोज्याथयुगंयुगम् ॥ २८ ॥ मूलमन्त्रस्याक्षरेणदीर्घस्वरयुतेनच ॥ षड्भिराद्यैर्न्यसेत्पूर्वमंगुलीयकमेवच ॥ २९ ॥
हृच्छिरस्तुशीर्षवर्मनेत्रास्त्राणिपुनस्तथा ॥ न्यसेद्दक्षिणहस्तेनषड्भिर्मन्त्रैस्तथाक्रमात् ॥३०॥ आस्यंबाहुयुगंकुक्षिगुह्यजानुयुगन्तथा ॥ पा
दयुग्मंक्रमात्तैस्तुषड्भिर्मन्त्रैर्न्यसेत्तथा ॥ ३१ ॥ अष्टधामूलमन्त्रन्तुजप्त्वाऽथार्घाहितेजले ॥ तेनोपकरणन्देयञ्चाभ्युक्ष्यक्रममारभेत् ॥
॥ ३२ ॥ दैशिकःपूजयेद्देवीम्पीठेनादैशिकःक्वचित् ॥ तस्यैवहिकरस्पर्शाद्देवीनोद्विजतेशिवा ॥ ३३ ॥ यदिदेशान्तराद्यातपीठन्दे
शान्तरम्प्रति ॥ तद्दैशिकोपदेशेनतदापूजांसमारभेत् ॥ ३४ ॥ यद्यन्यतःसमायाताकामरूपाद्वतेनरः ॥ तद्देशजोपदेशेनसम्पूज्य
फलमाप्नुयात् ॥ ३५ ॥ यस्मिन्देशेतुयःपीठओडपाञ्चालकादिषु ॥ तद्देशजोपदेशेनपूज्यः पीठेसुरोनरैः ॥ ३६ ॥ इतोन्यथापूजनेनसम्यक्
फलमवाप्नुयात् ॥ महाविभवसम्पूर्णैर्विहितेनैवभैरव ॥ ३७ ॥ अनुक्तोयःक्रमश्चात्रवैष्णवीतन्त्रगोचरे ॥ तथैवोत्तरतन्त्रेऽपिप्रोक्तो
ग्राह्यस्तुसाधकैः ॥ ३८ ॥ पूर्वद्वारिप्रथमतःकामतत्वम्प्रपूजयेत् ॥ दक्षिणेप्रीतितत्वन्तुरतितत्वञ्चपश्चिमे ॥ ३९ ॥ उत्तरेमोहनन्तत्वंक्रमादे
तानिपूजयेत् ॥ ऐशान्याम्पूजयेद्देवींगणेशन्द्वारपालकम् ॥ ४० ॥ अग्नौतुचाग्निवेतालंनैर्ऋत्यांकालमेवच ॥ वायव्यान्नन्दिनञ्चापिपूजये
त्क्रमतास्त्विमान् ॥ ४१ ॥ चतुःकम्पञ्चकंपट्कंचतुःकम्पञ्चकञ्चतुः ॥ षट्कारञ्चैवयोवेदसयोग्यःपीठपूजने ॥ ४२ ॥ ओड्राख्यम्प्रथमम्पीठं
द्वितीयञ्जालशैलकम् ॥ तृतीयम्पूर्णपीठन्तुकामरूपञ्चतुर्थकम् ॥ ४३ ॥ओ ड्रपीठम्पाश्चिमेतुतथैवोड्रेश्वरींशिवाम् ॥ कात्यायनीञ्जगन्नाथमो
ड्रेशञ्चप्रपूजयेत् ॥ ४४ ॥ उत्तरेपूजयेत्पीठंम्प्रशस्तञ्जालशैलकम् ॥ जालेश्वरम्महादेवञ्चण्डीञ्जालेश्वरीन्तथा ॥ ४५ ॥ दीर्घकाञ्चो

अचण्डाञ्चतत्रैवपरिपूजयेत् ॥ दक्षिणेपूर्णेशैलन्तुतथापूर्णश्वरींशिवाम् ॥ ४६ ॥ पूर्णेनाथम्महानाथंसरोजामथचाण्डिकाम् ॥ पूजयेद्दमनीन्दे
वींशान्तामपितथाशिवाम् ॥ ४७ ॥ कामरूपम्महापीठन्तथाकामेश्वरींशिवाम् ॥ नीलञ्चपर्वतश्रेष्ठंनाथंकामेश्वरन्तथा ॥ ४८ ॥ पूजयेद्वारि
पूर्वेतुक्रमादेतास्तुभैरव ॥ ओड्रादीनान्तुपीठानांक्षेत्रपालान्गुरूंस्तथा ॥ ४९ ॥ अन्याँस्तुद्वारपालादीन्स्वेस्वेस्थानेप्रपूजयेत् ॥ विशेषात्काम
रूपस्यकामेश्वरीम्प्रपूजयन् ॥ ५० ॥ तानेवनीलशैलस्थाञ्छृणुवेतालभैरव ॥ नाथःकामेश्वरोदेवोदेवीकामेश्वरीतथा ॥ ५१ ॥ करालः
क्षेत्रपालश्चचिञ्चावृक्षस्तथैवच ॥ त्रिकुटेनीलशैलस्तुगुहाचापिमनोभवा ॥ ५२ ॥ बटुकःकम्बलोनामवल्लीचैवापराजिता ॥ भैरवःपाण्डु
नाथश्चश्मशानेहरुकाह्वयम् ॥ ५३ ॥ योगिनीचमहोच्छ्वासातथाचन्द्रवतीपुरी ॥ लौहित्योनदराजश्चप्रान्तादिक्करवासिनी ॥ ५४ ॥ जल्पी
शाख्यस्तुवायव्यांकेदाराख्योऽथराक्षसे ॥ एतान्सम्पूजयेद्वारितथादेव्यास्तुमण्डले ॥ ५५ ॥ द्वारपालोयोगिनीचबटुकाद्यायथातथा ॥
कामरूपेपीठवरेओड्रादिष्वथतत्तथा ॥ ५६ ॥ मध्येतुमण्डलस्याथद्रावणंशोषणन्तथा ॥ बन्धनंमोहनञ्चैवतथैवार्षकणाह्वयम् ॥५७॥ मनो
भवस्यबाणाँस्तुपञ्चैतान्परिपूजयेत् ॥ षट्कोणाग्रेषूत्तरादौभगादिषट्कमेवच ॥५८॥त्रिपुरातन्त्रमन्त्रोक्तम्पूजयेत्क्रमतःसुधीः ॥ गणान्क्रीडा
दिकन्तद्वत्तथाविद्याकलादिकान् ॥ ५९ ॥ बटुकान्तिसद्धपुत्रादीन्सिद्धाद्याश्चकुमारिकाः ॥ चतुश्चतुष्कमित्येतच्चतुष्कमितिचोच्यते ॥
॥ ६० ॥ कामंरतिञ्चप्रीतिञ्चअनंगमेखलादिकम् ॥ सप्तवैत्रिपुरघ्राद्याअसितांगादयोनव ॥ ६१ ॥ माहेश्वर्यादिकादेव्योदशाभिःपञ्च
भिर्गणैः॥ द्वितीयम्पञ्चकम्प्रोक्तम्पीठेकामफलप्रदम् ॥ ६२ ॥ आधारशक्तिमुख्यायेनित्यन्तत्रप्रतिष्ठिताः ॥ धर्माद्याश्चतथैवाष्टौतथासत्वा

दिकागुणाः ॥ ६३ ॥ एकत्रग्रहदिक्पालाश्चतुःकमपरंस्मृतम् ॥ देव्यास्तथोग्रचण्डाद्यानायिकाःपरिपूजयेत् ॥ ६४ ॥ पूर्वोक्तदे
शेमन्त्रेणभक्त्यावेतालभैरव ॥ आवाहनंषोडशोपचाराणाम्प्रतिपादनम् ॥ ६५ ॥ जपञ्चबलिदानञ्चअंगास्त्राणाम्प्रपूजनम् ॥ मुद्रा
पूर्वाविसृष्टिश्चषट्कमेतत्प्रकीर्तितम् ॥ ६६ ॥ एतानिसप्तयानानिप्रकारान्पूजकःसुधीः. ॥ सएवोद्रादिपीठानिसम्पूजयितुमर्हति ॥ ६७ ॥
योज्ञात्वासम्यगेतानिकुरुतेपीठपूजनम् ॥ ससम्यक्फलमाप्नोतिहीनायुरपिजायते ॥ ६८ ॥ त्रिपुरातन्त्रमन्त्रोक्तस्थानेष्वेतेषुभैरव ॥
पूजयित्वाप्रथमतःपूजयेत्परमेश्वरीम् ॥ ६९ ॥ कामेश्वरिइहागच्छसम्मुखीभवचेश्वरि ॥ चिन्तायित्वाथमनसाभ्यर्च्यकामेश्वरींहृदि
॥ ७० ॥ मानसैर्गन्धपुष्पाद्यैस्ततोदक्षिणनासया ॥ निःसार्यवायुन्तत्पुष्पमारोप्यमण्डलान्तरे ॥ ७१ ॥ आवाहयेन्महादेवींसर्वका
मेश्वरेश्वरीम् ॥ कामेश्वरिइहागच्छसम्मुखीभवसन्निधौ ॥ ७२ ॥ कामेश्वरिविद्महेत्वांकामाख्यायैचधीमहि ॥ तन्नःकुब्जिमहामायेततःपश्चा
त्प्रचोदयात् ॥ ७३ ॥ एह्येहिभगवत्यम्बलोकानुग्रहकारिणि ॥ कामेशेकामरूपेत्वंकामकान्तेप्रसीदमे ॥ ७४ ॥ ततस्तुप्रथमंस्नानञ्जलन्द
त्वातुपूजकः ॥ मूलमन्त्रेणवितरेदुपचारांस्तुषोडश ॥ ७५ ॥ पूजयेन्मध्यभागेतुषडंगानिततोर्च्चयेत् ॥ अंगन्यासेतुयेमन्त्राःक्रमेपूर्वन्तुभाषि
ताः ॥ ७६ ॥ तैरेवमन्त्रैरंगानिदेव्याअपिचपूजयेत् ॥ पूर्वाद्यष्टदलेष्वेतायोगिनीःपरिपूजयेत् ॥ ७७ ॥ यथाक्रमेणकामानांसिद्ध्यर्थंकामदा
यिकाः ॥ गुप्तकामांतुश्रीकामान्तथैवाविन्ध्यवासिनीम् ॥ ७८ ॥ कोटेश्वरीम्वनस्थान्तुयोगिनीम्पादचाण्डिकाम् ॥ दीर्घेश्वरीन्तुप्रकटाम्भुवने
शींक्रमाद्यजेत्॥७९॥वैष्णवीतन्त्रमन्त्रस्ययान्यष्टावक्षराणितु ॥तानिबिन्द्विन्दुयुक्तानिमन्त्रन्यासांश्चप्रक्ष्यते॥८०॥मन्त्रेषुषष्णाङ्गोणानाम्प

डिमाःपरिपूजयेत् ॥ ऐशान्यादिक्रमेणैवकामाख्यान्त्रिपुरान्तथा ॥ ८१ ॥ दौरंदाञ्चमहोच्छ्वासाम्प्रकटाम्भुनेश्वरीम् ॥ सिद्धकामेश्वरीञ्चापिदे
व्यारूपाणिभैरव ॥ ८२ ॥ अष्टपुष्पिकयादेवीम्पुनःसम्पूज्यचाष्टधा ॥ जप्त्वास्तुत्वाबलिन्दत्वानत्वामुद्राम्प्रदर्श्यच ॥ ८३ ॥ देव्यास्तुसिद्ध
चण्ड्यांवैनिर्माल्यम्प्रतिपाद्यच ॥ विसृज्यमण्डलाद्देवींस्थापयेद्योनिमण्डले ॥ ८४ ॥ एतत्कामेश्वरीतन्त्रंकथितंयुवयोःसुतौ ॥ शारदायाम
हातन्त्रंसमन्त्रंशृणुभैरव ॥ ८५ ॥ ॥ इतिकालिकापुराणेत्रिपुराषजनन्नामाष्टषष्टितमोध्यायः ॥ ६८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शर
त्कालेपुरायस्मान्नवम्याम्बोधितासुरैः ॥ शारदासासमाख्यातापीठेलोकेचमानव ॥ १ ॥ तस्यास्तुनेत्रबीजाख्यम्मन्त्रम्प्राक्प्रतिपादितम् ॥
दुर्गातन्त्रञ्चतन्मन्त्रमंगमन्त्रम्पुरोदितम् ॥ २ ॥ ताभ्यामेवतुमंत्राभ्याम्पूजयेत्ताञ्जगन्मयीम् ॥ तृतीयम्पीठमन्त्रन्तुशारदायाअनुत्तमम् ॥
॥ ३ ॥ शृणुतञ्चैकमनसाचतुर्वर्गप्रदायकम् ॥ चतुर्थस्वरसंयुक्तमुपान्तोवह्निनायुतः ॥ ४ ॥ कामराजन्तथानान्तमुपान्तस्वरसंयुतम् ॥
वह्निनाचापिसन्दीप्तःसर्वबिन्द्विन्दुसंयुतः ॥ ५ ॥ हादिःसमातिसहितएतद्बीजञ्चतुर्थकम् ॥ चतुर्भिरेभिःकथितोमन्त्रोक्तैश्चषडक्षरैः ॥ ६ ॥
अयन्तृतीयोमन्त्रस्तुशारदायाःप्रकीर्त्तितः ॥ अनेनपूजयेत्पीठेसर्वसिद्धिमवाप्नुयात् ॥ ७ ॥ रूपमस्याःपुराप्रोक्तंसिंहस्थन्दशबाहुभिः ॥
तत्रपजाक्रमंसम्यक्शृणुतम्पुत्रकौमम ॥ ८ ॥ चतुर्द्वारम्मण्डलन्तुकुर्यात्तत्रविभूतये ॥ महामायामण्डलन्तुशारदायास्तुमण्डलम् ॥ ९ ॥
वैष्णवीतन्त्रकल्पोक्तैर्मन्त्रस्थानादिमार्जनम् ॥ कृत्वातुनेत्रबीजेनमण्डलम्प्रस्तरेलिखेत् ॥ १० ॥ योनावष्टदलंकृत्वात्रिकोणम्मध्यतो
न्यसेत् ॥ अयंविशेषःकथितोवैष्णवमिण्डलात्पुनः ॥ ११ ॥ मण्डलोल्लेखनञ्चैवतथाभूतापसारणम् ॥ पात्रस्यप्रतिपत्तिस्तुअमृतीकर

णन्तथा ॥ १२ ॥ गन्धपुष्पाम्भसांक्षेपआत्मासनप्रपूजनम् ॥ प्राणायामश्चत्रिविधोभूतिशुद्धिप्रवेशनम् ॥ १३ ॥ दहनप्लवनेचैवपाणि
कच्छपिकातथा ॥ योगपीठस्यचध्यानंवैष्णवीतन्त्रभाषितम् ॥ १४ ॥ तथैवोत्तरतन्त्रोक्तंकुर्यादेव्याःप्रपूजने ॥ अमृतीकरणंकुर्यात्सालि
लेधेनुमुद्रया ॥ १५ ॥ रूपन्त्वेवंदशभुजम्पूर्वोक्तन्तुविचिन्तयेत् ॥ अंगन्यासकरन्यासौदुर्गातन्त्रेणभैरव ॥ १६ ॥ नवाक्षरेणवैकुर्यादं
गुष्ठादिक्रमेणतु ॥ हृदयादिक्रमात्पश्चाद्रुद्रादावापिपूर्ववत् ॥ १७ ॥ एतदेवार्घपात्रेचाष्टधामन्त्रञ्जपेत्सुधीः ॥ तत्तोयैःसेचयेच्छीर्षम्पुष्प
गन्धादिकन्तथा ॥ १८ ॥ एवम्पूजाक्रमन्तत्रकुर्यादेव्यास्तुमण्डले ॥ आदित्यञ्चण्डिकारूपन्ध्यात्वापर्वांशिलातले ॥ १९ ॥ तस्मैनि
वेदयेदर्घ्यंसिद्धार्थाच्छतपुष्पकैः ॥ आधारशक्तिप्रभृतीन्ह्रीमन्त्रेणचसाधकः ॥ २० ॥ पूजयेत्प्रथमम्मध्येधर्मादीनपिपूर्ववत् ॥ सत्वादी
न्गुरुपादान्तान्पूर्वतन्त्रोदितान्बुधः ॥ २१ ॥ पूजयेन्मध्यपद्मेतुसुमेरुमपिमध्यतः ॥ पूर्वभागेमण्डलस्यदेव्याःशक्तीःप्रपूजयेत् ॥ २२ ॥
नाथकामेश्वरादींस्तुलौहित्यान्तान्विशेषतः ॥ सर्वान्वैपीठदेवाँस्तुमण्डलस्योत्तरेयजेत् ॥ २३ ॥ मणिकूर्चश्चित्ररथम्भस्मकूटन्तथैवच ॥
श्वेतन्नीलञ्चचित्रञ्चत्वाराहंगन्धमादनम् ॥ २४ ॥ मणिकूर्चन्नन्दनञ्चपश्चिमेपूजयेदिमान् ॥ जल्पीशमथकेदारन्देवींदिक्करवासिनीम् ॥
॥ २५ ॥ धात्रींस्वधान्तथास्वाहाम्मानस्तोकेपराजिते ॥ दक्षिणेपूजयेदेताश्चतुःषष्टिञ्चयोगिनीः ॥ २६ ॥ ग्रहाँश्चदशदिक्पालान्पूर्वाद्युक्त
क्रमेणतु ॥ पूर्ववत्पूजयेद्धीमान्भैरवम्भैरवीमपि ॥ २७ ॥ ततःकच्छपिकाम्बद्धापुनरेवतुपूजकः ॥ ध्यायेच्चपूर्ववद्देवींहृदिस्थाम्मनसापिच
॥ २८ ॥ मानसैर्गन्धपुष्पाद्यैःपूजयित्वाहृदिस्थिताम् ॥ नासापुटेननिःसार्यदक्षिणेनाथमण्डले ॥ २९ ॥ पुष्पमारोप्यकामाख्यां

शारदामाह्वयेन्मुहुः ॥ एह्येहिपरमेशानिसान्निध्यामिहकल्पय ॥ ३० ॥ पूजाभागंग्रहाणेमम्मखंरक्षनमोस्तुते ॥ दुर्गेदुर्गेइहागच्छसर्वैः
पारिकरैःसह ॥ ३१ ॥ पूजाभागंग्रहाणेमम्मखंरक्षनमोस्तुते ॥ नारायण्यैविघ्नहेत्वाश्चण्डिकायैतुधीमहि ॥ ३२ ॥ शेषभागेतुगाय
त्र्यास्तन्नश्चण्डीप्रचोदयात् ॥ दत्वास्नानमनेनैवदत्वातन्त्रेणवैपुनः ॥ ३३ ॥ नेत्रबीजेनचतथापीठमन्त्रेणचान्तरम् ॥ चतुरक्षरेणशेषे
णत्रिभिर्मन्त्रैःप्रपूजयेत् ॥ ३४ ॥ चतुरक्षरमन्त्रेणपाद्यादीनथषोडश ॥ वितरेदुपचारांस्तुपूर्वोक्तांस्तांस्तुभैरव ॥ ३५ ॥ दुर्गातन्त्रेणमन्त्रेण
देव्यांगानिप्रपूजयेत् ॥ दुर्गेत्यनेनहृदयम्पुनदुर्गेत्यनेनकम् ॥ ३६ ॥ शिखाकवचनेत्रांश्चपादपादाँश्चपञ्चभिः॥वादिपञ्चाक्षरैःशेषैःपूजयेत्क्रमतः
सुधीः ॥ ३७ ॥ पूर्वाद्यष्टदलेष्वेताःपूजयेन्नाधिकक्रमात् ॥ जयन्तीम्पूर्वपत्रेतुआग्नेय्यादौतुमंगलाम् ॥ ३८ ॥ कालीश्चभद्रकालीश्चतथा
चैवकपालिनीम् ॥ दुर्गाशिवांक्षमाश्चैवक्रमादेवतुनामतः ॥ ३९ ॥ केशवस्यतुमध्येतुअष्टावेतास्तुनायिकाः ॥ नेत्रबीजस्यमन्त्रेणबीजेनषट्
सुनायिकाः ॥ ४० ॥ अमीषाञ्चतथैवासौषड्भिरेतान्तराहितैः ॥ ह्राँह्रींश्रीमित्युपांतान्तुप्रान्तामाद्यस्वरेणवै ॥ ४१ ॥ उग्रचण्डाम्प्रच
ण्डाञ्चचण्डोग्राञ्चण्डनायिकाम् ॥ चण्डाञ्चण्डवतींचैवचण्डरूपाञ्चचण्डिकाम् ॥ ४२ ॥ त्रिकोणकेशरान्तन्तुकामम्प्रीतिरतिंतथा ॥ पञ्चबा
णानपुष्पधनुःपूजयेत्काममन्त्रकैः ॥ ४३ ॥ अष्टपुष्पिकयापश्चात्सम्पूज्यपरमेश्वरीम् ॥ देव्यास्तुकरगृ णिशस्त्राण्यंगानिवाहनम् ॥
॥ ४४ ॥ पञ्चाननंकेशरञ्चदेव्यग्रेतुप्रपूजयेत् ॥ पीठदेवींशारदांतुकामाख्यामधिदेवताम् ॥ ४५ ॥ त्रिपुराख्यांमहादेवीम्पीठमत्याधि
देवताम् ॥ कामेश्वरींमहोत्साहाम्मध्यएवंप्रपूजयेत् ॥ ४६ ॥ चतुरक्षरमन्त्रेणदद्यात्पुष्पाञ्जलित्रयम् ॥ जप्त्वास्तुत्वाबलिंदत्वानमस्कृत्या

वगुण्यच ॥ ४७ ॥ योनिमुद्राम्प्रदर्श्याथनिर्म्माल्यंदिशिशूलिनः ॥ चण्डेश्वर्यैनमङ्गतिनिःक्षिप्यचविसर्जयेत् ॥ ४८ ॥ ततस्तुभास्कराया
र्घ्यन्दद्यादच्छिद्रधारणाम् ॥ देवीञ्चहृदयेस्थाप्यस्थापयेद्योनिमण्डले ॥ ४९ ॥ एवन्देवीन्तुकामाख्यांयोनिमुद्राञ्जगन्मयीम् ॥ शारदाख्या
म्महादेवींयोगेनविधिनाजयेत् ॥ ५० ॥ सर्वकामान्सुसम्प्राप्यशिवलोकमवाप्नुयात् ॥ यदिपीठंविनान्यत्रपूजयेत्कामरूपिणीम् ॥ ५१ ॥
नीलकूटेतदाप्येतत्सर्वमेवसमाचरेत् ॥ यदान्यत्रयजेद्देवींजलेवास्थण्डिलेपिवा ॥ ५२ ॥ शिलादिषुचवह्नौवादेवीपीठेयथेच्छया ॥ यजेद्धान
यजेद्वापिपीठेवश्यम्प्रपूजयेत् ॥ ५३ ॥ एवंयःपञ्चभिर्मन्त्रैःपञ्चमूर्तिंधरांशिवाम् ॥ एकैकेनाथवातस्यस्वयंस्याद्वरदायिका ॥ ५४ ॥ विघ्ना
नतस्यजायन्तेनाधयोव्याधयस्तथा ॥ नतस्यसदृशोन्यःस्याद्धनधान्यसमृद्धिभिः ॥ ५५ ॥ गवांकोटिप्रदानात्तुयत्फलञ्जायतेनृणाम् ॥
तत्फलंसमवाप्नोतिकामाख्याम्पूजयन्नरः ॥ ५६ ॥ दशपूर्वान्दशपरान्वंशानुद्धृत्यपापतः ॥ सकृत्सम्पूजनेनैवममलोकमवाप्नुयात् ॥
॥ ५७ ॥ द्विःसम्पूज्यमहादेवींकामाख्यांयोनिमण्डले ॥ शतंवंशान्त्समुद्धृत्यदेवीलोकमवाप्नुयात् ॥ ५८ ॥ यस्त्रिवारान्पूजयेत्तुविधिनाने
नमानवः ॥ नीलपर्वतमारुह्यकामाख्यांयोनिमण्डले ॥ ५९ ॥ ससहस्रन्तुवंशानामुद्धृत्यपापकोपतः ॥ इहलोकेसुखैश्वर्याचिरायुष्यमवा
प्नुयात् ॥ ६० ॥ देहान्तेमद्वहम्प्राप्यगणानामधिपोभवेत् ॥ यस्यांकस्यामथाष्टम्यान्नवम्यांवापिसाधकः ॥ ६१ ॥ पञ्चरूपान्तुकामाख्या
म्पञ्चमन्त्रैःसतन्त्रकैः ॥ पूजयेद्वरदान्देवीम्मण्डलैश्चपृथक्पृथक् ॥ ६२ ॥ ध्यात्वातुपञ्चरूपाणिजप्त्वामन्त्रांश्चपञ्चवै ॥ सकल्पकोटि
लक्षाणिममलोकेचमानवः ॥ ६३ ॥ स्थित्वादेवीप्रसादेनपरेनिर्वाणमाप्नुयात् ॥ इहलोकेवाञ्छितार्थंसुखम्प्राप्ययशस्तथा ॥ ६४ ॥ रिपू

ञ्जित्वासधर्मात्मामातंगानिवकेसरी ॥ चिरायुःपुत्रपौत्रैश्चविभवैश्चसमन्वितः ॥ ६५ ॥ क्रीडयित्वाह्यमरवद्युवतीभिश्चसादरात् ॥ यक्ष
रक्षःपिशाचानान्नेताभवतिनित्यशः ॥ ६६ ॥ सर्वान्कामानवाप्यैवद्विजराजसमोभवेत् ॥ ६७ ॥ ॥ इतिकालिकापुराणेएकोनसप्तति
तमोऽध्यायः ॥ ६९ ॥ ॥ छ ॥ ॥ और्वउवाच ॥ ॥ एतत्तन्त्रंसमस्तन्तुश्रुत्वावेतालभैरवौ ॥ पप्रच्छतुरुयम्बकञ्चहर्षोत्फुल्लवि
लोचनौ ॥ १ ॥ ॥ वेतालभैरवावूचतुः ॥ ॥ कामाख्यायाःश्रुतन्तन्त्रंसांगंयुष्मत्प्रसादतः ॥ नमस्कारन्तथामुद्राम्बलिदानन्तथै
वच ॥ २ ॥ तथैवमातृकान्यासम्पूजायाश्चान्यतःक्रमम् ॥ एतत्सर्वंसमाचक्ष्वविस्तरेणजगत्प्रभो ॥ ३ ॥ शृण्वतोर्नहिनौतृप्तिर्जायतेमोद
भूमिषु ॥ ॥ श्रीभगवानुवाच ॥ ॥ वक्ष्यामियदहम्पृष्टोभवद्भ्याम्पुत्रकोत्तमौ ॥ ४ ॥ शृणुतन्नरशार्दूलावेकाग्रमनसाधुना ॥ त्रिकोण
मथषट्कोणमर्द्धचन्द्रम्प्रदक्षिणम् ॥ ५ ॥ दण्डमष्टांगमुग्रञ्चसप्तधानतिलक्षणम् ॥ ऐशानीवाथकौबेरीदिक्कामाख्याप्रपूजने ॥ ६ ॥ प्रशस्ता
स्थण्डिलादौचसर्वमूर्त्तेश्चसर्वतः ॥ त्रिकोणादिव्यवस्थातुयदिपूर्वमुखोयजेत् ॥ ७ ॥ पश्चिमाच्छाम्भवींगत्वाव्यवस्थान्निर्दिशेत्तदा ॥
यदोत्तरामुखःकुर्यात्साधकोदेवपूजनम् ॥८॥ तदायाम्यान्तुवायव्यांगत्वाकुर्यात्तुसांस्थितिम्॥दक्षिणाद्वायवींगत्वादिशन्तस्माच्चशाम्भवीम् ॥
॥ ९ ॥ ततोपिदक्षिणंगत्वानमस्कारस्त्रिकोणवत् ॥ त्रिकोणाख्योनमस्कारस्त्रिपुराप्रीतिदायकम् ॥ १० ॥ दक्षिणाद्वायवींगत्वावायव्याच्छा
म्भवीन्ततः ॥ ततोपिदक्षिणांगत्वातान्त्यक्त्वाग्नौप्रविश्यच ॥ ११ ॥ आग्नेतोराक्षसींगत्वातत्पश्चादुत्तरान्दिशम् ॥ उत्तरांचतथाग्नेयीम्भ
मणन्द्वित्रिकोणवत् ॥ १२ ॥ षट्कोणोयंनमस्कारःप्रीतिदःशिवदुर्गयोः ॥ दक्षिणाद्वायवींगत्वातस्मादावृत्यदक्षिणम् ॥ १३ ॥ गत्वायो

सौनमस्कारःसोर्द्धचन्द्रःप्रकीर्तितः ॥ सकृत्प्रदक्षिणंकृत्वावर्तुलाकृतिसाधकः ॥ १४ ॥ नमस्कारःकथ्यतेसौप्रदक्षिणइतिद्विजैः ॥ त्यक्त्वास्व
मासनस्थानम्पश्चाद्दुर्गानमस्कृतिः ॥ १५ ॥ प्रदक्षिणंविनायातुनिपत्यभुविदण्डवत् ॥ दण्डइत्युच्यतेदेवैःसर्वदेवौघमोददः ॥ १६ ॥
पूर्ववद्दण्डवद्भूमौनिपत्यहृदयेनतु ॥ चिबुकेनमुखेनाथनासयाहनुकेनच ॥ १७ ॥ ब्रह्मरन्ध्रेणकर्णाभ्यांयद्भूमिस्पर्शनंक्रमात् ॥ सचाष्टांग
इतिप्रोक्तोनमस्कारोमनीषिभिः ॥ १८ ॥ प्रदक्षिणत्रयंकृत्वासाधकोवर्तुलाकृतिः ॥ ब्रह्मरन्ध्रेणसंस्पर्शःक्षितेर्यस्यान्नमस्कृतौ ॥ १९ ॥
सउग्रइतिदेवौघैरुच्यतेविष्णुतुष्टिदः ॥ नदानांसागरोयद्वद्द्विपदाम्ब्राह्मणोयथा ॥ २० ॥ नदीनाञ्चाह्नवीयाद्दग्देवानामपिचक्रधृक् ॥ नम
स्कारेषुसर्वेषुतथैवोग्रःप्रशस्यते ॥ २१ ॥ त्रिकोणाद्यैर्नमस्कारैःकृतैरेवतुभक्तितः ॥ चतुर्वर्गलभेद्भक्तोनचिरादेवसाधकः ॥ २२ ॥ नमस्कारो
महायज्ञःप्रीतिदःसर्वतःसदा ॥ सर्वेषामेवदेवानामन्येषामपिभैरव ॥ २३ ॥ योसावुग्रोनमस्कारःप्रीतिदःसततंहरेः ॥ महामायाप्रीतिकरः
सनमस्करणोत्तमः ॥ २४ ॥ उक्तास्तत्रनमस्काराःशृण्वतंपरतोयुवाम् ॥ मुद्राणाम्पारिसंख्यानंस्वरूपञ्चयथाक्रमम् ॥ २५ ॥ धेनुश्चस
म्पुटश्चैवप्राञ्जलिर्बिल्वपद्मकौ ॥ नाराचोमुण्डदण्डौचयोनिरर्द्धन्तथैवच ॥ २६ ॥ वन्दनीचमहामुद्रामहायोनिस्तथैवच ॥ भगश्चपुटक
श्चैवमिपंगोथार्द्धचन्द्रकः ॥ २७ ॥ अंगश्चद्विमुखश्चैवशंखमुद्राचमुष्टिकः ॥ वज्रंचैवतथाबद्धस्मयोनिर्विमलन्तथा ॥ २८ ॥ घटःशिखरि
णीतुंगःपुण्ड्रोथह्यर्द्धचन्द्रकः ॥ सम्मीलनीचकुण्डश्चचक्रंशूलन्तथैवच ॥ २९ ॥ सिंहवक्त्रंगोमुखश्चप्रोन्नामोन्नमनन्तथा ॥ विश्वंपाशुपतंशु
द्धन्त्यागोथोसोरिणीतथा ॥ ३० ॥ प्रसारिणीचोग्रमुद्राकुण्डलीव्यूहएवच ॥ त्रिमुखाचासिवल्लीचयोगोभेदोथमोहनम् ॥ ३१ ॥ बाणोधनु

श्वतूणीरम्मुद्राएताश्चसत्तमाः ॥ अष्टोत्तरशतम्मुद्राब्रह्मणायाःप्रकीर्त्तिताः ॥ ३२ ॥ तासान्तुपञ्चपञ्चाशदेताआद्यास्तुपूजने ॥ शेषास्तुया
स्त्रिपञ्चाशन्मुद्रास्ताःसमयेषुच ॥ ३३ ॥ द्रव्यानयनसंकेतनटनादिषुताःस्मृताः ॥ देवानाञ्चिन्तनेयोगेध्यानेजप्येविसर्जने ॥ ३४ ॥ आद्या
स्तुपञ्चपञ्चाशन्मुद्राभैरवकीर्त्तिताः ॥ मुद्रांविनातुयज्जप्यम्प्राणायामःसुरार्च्चनम् ॥ ३५ ॥ योगोध्यानासनेचापिनिष्फलानिचभैरव ॥ प्रत्येकं
लक्षणन्तेषांशृणुतन्तनयौयुवाम् ॥ ३६ ॥ दक्षिणामध्यमाग्रेणसव्यहस्तस्यतर्जनीम् ॥ योजयेत्सव्यमध्यान्तुतर्जन्यादक्षिणेनवै ॥ ३७ ॥
तथादक्षानामिकयावामहस्तकनिष्ठिकाम् ॥ अनामिकान्तुवामस्यदक्षिणस्यकनिष्ठया ॥ ३८ ॥ योजयेद्भक्तिमान्त्सम्यग्दक्षिणावर्तनेनतु ॥
धेनुमुद्रासमाख्यातासर्वदेवस्यतुष्टिदा ॥ ३९ ॥ संयोज्यद्वौतलौसर्वाण्यंगुल्यग्राणिहस्तयोः ॥ संयोज्यपार्श्वतोंगुष्ठौसम्पुटःप्रोच्यतेसुरैः ॥
॥ ४० ॥ सर्वेषामथदेवानांसम्पुटःप्रीतिदायकः ॥ ध्यानचिन्तनयोगादौसम्पुटःशस्यतेसदा ॥ ४१ ॥ निकुब्जयुगलम्पाण्योस्तंसंयोज्या
र्द्धएवच ॥ मध्यशून्यःपुटाकारःप्राञ्जलिःपरिकीर्तितः ॥ ४२ ॥ अंगुष्ठमन्तरंकृत्वापाण्योर्मुष्टिंविधायच ॥ संयोज्यबिल्ववन्तेतुबिल्वमुद्राप्र
कीर्तिता ॥ ४३ ॥ मणिबन्धादाकरभंसंयोज्यकरयोर्द्वयोः ॥ अंगुष्ठेचापिसंयोज्यतथैवचकनिष्ठिके ॥ ४४ ॥ तिस्रस्तिस्रोस्तयोः पाण्योरंगु
लीर्विरलास्तथाः ॥ पद्ममुद्रासमाख्याताचतुर्वर्गफलानृणाम् ॥ ४५ ॥ अंगुष्ठाग्रेणतर्जन्यासंयोज्याथोर्ध्वरेखया ॥ अन्यांगुलीस्तथानम्यनारा
चःस्यात्प्रसार्यते ॥ ४६ ॥ ममचैवशिवायाश्चप्रीतिदेयम्प्रियंकरी ॥ नाराचमुद्रासततम्प्रीत्यैवेतालभैरव ॥ ४७ ॥ अन्तरांगुष्ठमुष्टिञ्चकृत्वा
वामकरस्यतु ॥ मध्यमायोदक्षिणस्यतथानम्यप्रयत्नतः ॥ ४८ ॥ मध्यमेनाथतर्जन्याअंगुष्ठाग्रानियोज्यच ॥ दक्षिणंयोजयेत्पार्णिंवाममुष्टौ

चसाधकः ॥ ४९ ॥ दर्शयेद्दक्षिणेभागेमुण्डमुद्रेयमिष्यते ॥ इयन्तुगणनाथस्यप्रीतिदामुद्रिकोत्तमा ॥५०॥ सर्वेषामपिदेवानान्तुष्टिदासर्वकर्म
सु ॥ अंगुष्ठमध्यमादींश्चसम्यगानम्यतर्जनीम् ॥ ५१ ॥ प्रसार्यदण्डमुद्रेतिदक्षिणेस्यकरस्यच ॥ सर्वांगुलीस्तुसंयोज्यकरयोरुभयोरपि ॥
॥ ५२ ॥ संवेष्टयरज्जुवद्वेतिपाण्योरपिकनिष्ठिके ॥ वामस्यानाममूलेवैउदग्रंविनियोजयेत् ॥ ५३ ॥ दक्षस्यमध्यमामूलेतथाग्रंवाममेवच ॥
योजयेद्योजनात्पश्चादावर्त्यकरशाखिकाः ॥ ५४ ॥ योन्याकारन्तुतन्मध्यंयोनिगुद्राप्रकीर्त्तिता ॥ कामाख्यायाःपञ्चमूर्त्तेर्दुर्गायाअपिभैरव ॥
॥ ५५ ॥ प्रीतिदायोनिमुद्रेयम्ममकामस्यचप्रिया ॥ संसक्ताअंगुलीःसर्वाःप्रसार्यांगुष्ठपर्वणा ॥ ५६ ॥ अग्रेणचकनिष्ठायाअग्रेणापिचयोज
येत् ॥ करस्यदक्षिणस्यैवमर्द्धयोनिःप्रकीर्त्तिता ॥ ५७ ॥ महायोनिस्तुकथितावैष्णवीतन्त्रणेवरे ॥ सम्पुटम्प्राञ्जलिंवापियदिशीर्षेप्रदर्शयेत् ॥
॥ ५८ ॥ वन्दनीयासमाख्यातामुद्राविष्णुप्रमोदनी ॥ सैवचेच्छ्रवणासक्तामहामुद्राप्रकीर्त्तिता ॥ ५९ ॥ दक्षिणांगेतुसासक्तावैष्णवीपरिकी
र्त्तिता ॥ महायोनिस्तुकथितावैष्णवीतन्त्रगोचरे ॥६०॥ द्वयोस्तुमूलेंगुष्ठाग्रमंगुलीश्चकनिष्ठयोः ॥ नियोज्यप्रसृतीकृत्यद्वौपाणीयोजयेत्पुनः ॥
॥ ६१ ॥ भगमुद्रासमाख्यातालक्ष्मीवाणीशिवप्रिया ॥ सर्वांगुलीनामग्रौघन्दक्षिणस्यकरस्यच ॥ ६२ ॥ संयोज्यैकत्रपुरतोनिर्देशःपुटकः
स्मृतः ॥ कनिष्ठिनामिकांगुष्ठांगुलीनांयोजयेद्बुधः ॥ ६३ ॥ अग्राण्येकत्रमध्यान्तुतर्जनीश्चप्रसार्यवै ॥ कुब्जीकृत्यकरद्वन्द्वन्पृथगग्रेनिदर्श
येत् ॥ ६४ ॥ निःसंगनामसुद्रेयन्नरसिंहवराहयोः ॥ कनिष्ठानामिकामध्यामाकुञ्चन्दक्षिणेनतु ॥ ६५ ॥ करस्यतर्जन्यंगुष्ठेप्रसार्यक्रियतेतु
या ॥ सामुद्राद्यर्द्धचन्द्राख्याग्रहाणाम्प्रीतिदायिनी ॥ ६६ ॥ ऊर्द्धीकृत्यतथांगुष्ठंकरस्यदक्षिणस्यतु ॥ कृत्वामध्यान्तदंगुष्ठंवाममुष्टिन्तथो

र्द्धतः ॥ ६७ ॥ ऊर्द्धांगुष्ठन्तथाकुर्यादंगमुद्राप्रकीर्त्तिता ॥ एतस्याएवमुद्रायाकनिष्ठादिवियोगतः ॥ ६८ ॥ अष्टौमुद्राःसमाख्यातानामता
साम्पृथक्शृणु ॥ द्विमुखश्चैवमुष्टिश्चवज्रमावद्धमेवच ॥ ६९ ॥ विमलश्चघटश्चैवतुंगः पुण्ड्रस्तथैवच ॥ नवानांविष्णुमूर्त्तीनांसार्द्धमंगेनमुद्रि
काः ॥ ७० ॥ क्रमान्नवसमाख्यातानायिकानान्तथैवच ॥ संयोज्यकरयोःपृष्ठेतथावर्त्यतुवैसमम् ॥ ७१ ॥ प्रसार्यतर्जनीयुग्मंसंयुक्तं
सर्वतःपुनः ॥ अंगुष्ठौचतथासक्तौशंखमुद्राप्रकीर्त्तिता ॥ ७२ ॥ उत्तानमञ्जलिंकृत्वाअंगुष्ठेद्वेकनिष्ठयोः ॥ मूलेनिःक्षिप्यतुकरौसंयो
ज्याथप्रदर्शयेत् ॥ ७३ ॥ सायोनिरितिविख्यातामुद्रादेवौघतुष्टिदा ॥ मुष्टिर्दक्षिणहस्तस्ययदोर्द्धांगुष्ठिकाभवेत् ॥ ७४ ॥ सास्याच्छिख
रिणीमुद्राब्रह्मसूर्य्यप्रियाचसा ॥ अनामिकेकनिष्ठेचसंयोज्यवायुनापुनः ॥ ७५ ॥ मध्यमातर्जनीनान्तुधेनुमुद्रेवबन्धनम् ॥ सार्द्ध
धेनुरितिख्याताचन्द्रप्रीतिविवर्द्धिनी ॥ ७६ ॥ करयोरंगुलीनान्तुसर्वाग्राण्येकतःस्थिता ॥ नियोज्यद्वेतलेचैवतदधोपिनियोज्यच ॥
॥ ७७ ॥ अग्रैरग्रैर्योजयेत्तुमुद्रासम्मीलनीतुसा ॥ भौमभूमिमुनीशानामियम्प्रीतिविवर्द्धिनी ॥ ७८ ॥ सर्वांगुलीस्तुसंयोज्यदक्षिणस्यकर
स्यच ॥ कियद्भागंतथानम्यतलंकुर्यात्तुकुण्डवत् ॥ ७९ ॥ समाख्याताकुण्डमुद्राबुधवाणीशिवप्रिया ॥ सर्वांगुलीनाम्मध्यन्तुवामह
स्तस्यचांगुलीः ॥ ८० ॥ प्रसार्यांगुष्ठयुगलंसंयोज्याग्रेणभैरव ॥ तदंगुष्ठद्वयंकार्यंसम्मुखंवितरेत्ततः ॥ ८१ ॥ चक्रमुद्रासमाख्या
तागुरुविष्णुशिवाप्रिया ॥ अंगुष्ठंमध्यमाञ्चैवनामयित्वाकरस्यतु ॥ ८२ ॥ दक्षिणस्यपरास्तिस्रोयोजयेदग्रतः पुनः ॥ शूलमुद्रासमा
ख्याताममशुक्रगुहप्रिया ॥ ८३ ॥ निकुञ्जीकृत्यतुकरौवामांगुलिगणस्यतु ॥ अग्राणियोजयेन्मध्येतलस्यासव्यहस्ततः ॥ ८४ ॥

अधःकृत्वावामहस्तम्मुद्रासिंहमुखीस्मृता ॥ इयम्प्रीत्यैतुदुर्गायाःसूर्यपुत्रस्यचक्रिणः ॥ ८५ ॥ भगमुद्राकर्णमूलेगोमुखाख्याप्रकीर्तिता ॥ मम
विष्णोस्तथाराहोस्सर्वदाप्रीतिदायिनी॥८६॥मुष्टिद्वयमथोत्तानंकृत्वासंयोज्यपार्श्वतः ॥ दक्षिणस्यकनिष्ठादीन्प्रसार्यक्रमतःपुनः ॥८७॥ तथा
वामकनिष्ठाभ्यामेकैकेनप्रसारयेत् ॥ अष्टौमुद्राःसमाख्यातानामतःक्रमतःशृणु ॥८८॥ प्रोल्लासोन्नमनञ्चैवबिम्बंपाशुपतन्तथा ॥ शुद्धन्त्यागः
सारणीचतथाचैवप्रसारणी ॥ ८९ ॥ आकुञ्चकरशाखास्तुदक्षिणासातुमुद्रिका ॥ उग्रमुद्रासमाख्यातास्वहस्तस्याविपर्ययात् ॥ ९० ॥ इन्द्रा
दिलोकपालानान्दशमुद्राःप्रकीर्त्तिताः ॥ सर्वेषामेवदेवानाम्परमप्रीतिवर्द्धनाः ॥ ९१ ॥ अंगुष्ठाग्रन्तुतर्जन्याअग्रेभागेनयोजयेत् ॥ आकुञ्च
मध्यमाद्यास्तुदक्षहस्तस्यचांगुलीः ॥ ९२ ॥ दर्शयेत्कुण्डलाकारंकुण्डलीशक्तितुष्टिदम् ॥ सर्वेषामपिदेवानांयथातुष्टिकरमहत् ॥ ९३ ॥ अं
गुष्ठतर्जनीमध्याअग्रभागेनियोज्यच ॥ मध्यमाश्चकनिष्ठाश्चआकुञ्च्यदक्षिणेकरे ॥ ९४ ॥ त्रिमुखाख्यासमाख्याताविश्वदेवप्रियासदा ॥ के
तोःप्रियेयंसततम्मातॄणामपितुष्टिदा ॥९५॥ तर्जन्यंगुष्ठयोरग्रभागौसंयोज्यचांगुलीः ॥ अन्याआकुञ्चयोत्तिस्रःसासिवल्लीप्रकीर्त्तिता ॥ ९६ ॥
पितॄणामथसाध्यानांरुद्राणांविश्वकर्मणः ॥ सर्वदाप्रीतिजननीसासिवल्लीप्रकीर्त्तिता ॥ ९७ ॥ पादौतलाभ्यांसंयोज्यतदंगुष्ठद्वयन्ततः ॥ ऊर्ध्वं
संयोजयेन्नाभौतस्योपरितथाञ्जलिः ॥ ९८ ॥ योगमुद्रासमाख्यातायोगिनान्तत्वदायिनी ॥ सर्वेषामपिदेवानाम्पूजनेचिन्तनेतथा ॥ ९९ ॥
योगमुद्रासमाख्यातातुष्टिप्रीतिकरीसदा ॥ प्राञ्जलिर्न्नामसुद्रातुऊर्ध्वाधोभावयोजिता ॥ १०० ॥ विभिद्यदर्शयेद्धस्तौऊर्ध्वाधःप्रसृतीकृतौ ॥
भेदमुद्रासमाख्याताममविष्णोर्विधेःप्रिया ॥ १ ॥ अंगष्ठेद्वेतुनिःक्षिप्यकरयोरुभयोरपि ॥ अग्रेणयोजयेत्पश्चात्कनिष्ठायुगलन्ततः ॥ २ ॥

उभयोर्हस्तयोश्चान्यास्तर्जन्याद्याश्चयोजयेत् ॥ अग्राग्रैस्तुपृथक्कृत्यदर्शयेत्तुकनिष्ठिकाम् ॥३॥ मुद्रासम्मोहनन्नामकामदुर्गारमाप्रिया ॥ सर्वे
षामिहदेवानाम्मोहनम्प्रीतिदंस्मृतम् ॥४॥ आनम्यासव्यहस्तस्यमध्यमानामिकेतथा ॥ तयोःपृष्ठसुसंयोज्यअंगुष्ठाग्रन्ततःपरम् ॥ ५ ॥ क
निष्ठान्तर्जनींचैवअग्रेणायोजयेत्ततः ॥ बाणमुद्रासमाख्यातासर्वदेवस्यतुष्टिदा ॥ ६ ॥ सर्वांगुलीस्तुसंकोच्यअंगुष्ठमथतर्जनीम् ॥ प्रसार्य
करयोःपश्चादंगुष्ठाग्रन्तुयोजयेत् ॥ ७ ॥ अंगुष्ठाग्रेणतर्जन्याअग्रेणापिचतर्जनीम् ॥ यथाशक्तिप्रसार्यापिधेनुमुद्राप्रकीर्तिता ॥ ८ ॥ सर्वांगुली
नामग्राणिब्राह्मतीर्थेनियोजयेत् ॥ अनामिकायाःपृष्ठेतुअंगुष्ठाग्रन्नियोज्यच ॥ ९ ॥ शून्यंतूणीरवत्कृत्वातेषामंतस्तुभैरव ॥ तूणीरमुद्राचा
ख्यातासर्वेषाम्प्रीतिवर्द्धिनी ॥ ११० ॥ मुद्रासुसंस्थितापूजामुद्रासुपरिचिन्तनम् ॥ मुद्रासुसंस्थितायोगामुद्रामोदकरास्ततः ॥ ११ ॥ यदाय
दापूजनेषुचिन्तनेध्यानकर्मणि ॥ यज्ञादौस्तवनेवापिहस्तकृच्छ्रन्नविद्यते ॥१२॥ तदामुद्रान्वितंकुर्यादिष्टापूर्तेकरद्वयम् ॥ यज्ञकृत्येषुचेच्छक्तो
हस्तोमुद्रासुचक्षमः ॥ १३ ॥ तदामुद्राम्विधायैवतत्कृत्यंसमाचरेत् ॥ मुद्राविमुक्तहस्तन्तुक्रियतेकर्मदैविकम् ॥ १४ ॥ कृत्वायत्रिष्फलंय
स्मात्तस्मान्मुद्रान्वितोभवेत् ॥ विसर्जनेतुदेवानांयस्ययापरिकीर्तिता ॥१५॥ मुद्रांताम्पूजनादौतुतस्यचैवप्रयोजयेत् ॥ विसृज्योक्तामृतेमुद्रा
म्मुद्रायुक्तःसमाचरेत् ॥ १६ ॥ पूजनादिसमस्तन्तुकर्मवृद्धौविचक्षणः ॥ अतोमुद्रापरन्नाममुद्रापुण्यप्रदायिनी ॥ १७ ॥ देवानाम्मोददामु
द्रातस्मात्तांयत्नतश्चरेत् ॥ अर्द्धयोनिर्महायोनिर्योनिर्ब्राह्मीचवैष्णवी ॥ १८ ॥ मुद्राविसर्जनेप्रोक्ताशिवात्रिपुरयोःसदा ॥ दुर्गायाःसर्वरूपेषुमु
द्राएताःप्रकीर्त्तिताः ॥ १९ ॥ योनिश्चसम्पुटश्चैवमहायोनिंतथैवच ॥ वर्जयित्वाव्यस्तभावादुक्तादन्यत्रयोजयेत् ॥ १२० ॥ भवेद्यस्तुत्रिप

श्चाशदन्यामुद्राःसमन्ततः ॥ ताव्यस्तभावाद्वामाःस्युर्मुद्रामोदकराःपराः ॥ २१ ॥ एवंवांकथितामुद्राःपूजनेपूज्यतुष्टिदा ॥ क्रमस्तुबलिदान
स्यशृणुवेतालभैरव ॥ १२२ ॥ इतिकालिकापुराणेसप्ततितमोध्यायः ॥ ७० ॥ ॥ श्रीभगवानुवाच ॥ ॥ क्रमस्तुबलिदानस्यस्वरूपंरु
धिरादितः ॥ यथास्यात्प्रीतयेसम्यक्तत्त्वांवक्ष्यामिपुत्रकौ ॥ १ ॥ वैष्णवीतन्त्रकल्पोक्तःक्रमःसर्वत्रसर्वदा ॥ साधकैर्बलिदानस्यग्राह्यःसर्वसुर
स्यच॥२॥पक्षिणःकच्छपाग्राह्यामत्स्यानवविधामृगाः॥महिषोगोधिकागावच्छागोबभ्रुश्चसूकरः॥३॥खड्गश्चकृष्णसारश्चगोधिकाशरभोहरिः॥
शार्दूलश्चनरश्चैवस्वगात्ररुधिरन्तथा ॥४॥ चण्डिकाभैरवादीनाम्बलयःपरिकीर्तिताः ॥ बलिभिःसाध्यतेमुक्तिर्बलिभिःसाध्यतेदिवम् ॥५॥
बलिदानेनसततञ्जयेच्छत्रून्नृपान्नृपः ॥ मत्स्यानांकच्छपानान्तुरुधिरैःसततंशिवा ॥६॥ मासैकन्तृप्तिमाप्नोतिग्राहैर्मासाँस्तुत्रीनथ ॥ मृगाणांशो
णितैर्देवीनराणामपिशोणितैः ॥ ७ ॥ अष्टौमासानवाप्नोतितृप्तिङ्कल्याणदाचसा॥गोधिकानाञ्चरुधिरैर्वार्षिकन्तृप्तिमाप्नुयात् ॥ ८ ॥ कृष्णसार
स्यरुधिरैःसूकरस्यचशोणितैः ॥ प्राप्नोतिसततन्देवीतृप्तिन्द्वादशवार्षिकीम् ॥९॥ अजाविकानांरुधिरैःपञ्चविंशतिवार्षिकीम् ॥ महिषाणांचख
ड्गानांरुधिरैःशतवार्षिकीम् ॥१०॥ तृप्तिमाप्नोतिपरमांशार्दूलरुधिरैस्तथा ॥ सिंहस्यशरभस्याथस्वगात्रस्यचशोणितैः ॥ ११ ॥ देवीतृप्तिमवा
प्नोतिसहस्रम्परिवत्सरान् ॥ मांसैरपितथाप्रीतीरुधिरैर्यस्ययावती ॥ १२ ॥ कृष्णसारमृगंखड्गन्तथामत्स्यञ्चरोहितम् ॥ वार्ध्रीणसयुगञ्चा
पिफलन्तेषाम्पृथक्पृथक् ॥ १३॥ कृष्णसारस्यमांसेनतथाखड्गेनचण्डिका॥वर्षाणाञ्चशतान्येवतृप्तिमाप्नोतिकेवलम्॥१४॥रोहितस्यतुमत्स्य
स्यमांसैर्वार्ध्रीणसस्यच॥तृप्तिम्प्राप्नोतिवर्षाणांशतानित्रीणिमत्प्रिया॥ १५॥त्रीपिबन्तिवन्द्रियक्षीणंश्वेतंबद्धमजापतिम्॥वार्ध्रीणसःप्रोच्यतेसोह

व्येकव्येचसत्कृतः ॥१६॥ नीलग्रीवोरक्तशीर्षःकृष्णपादःसितछदः॥वार्ध्रीणसःस्यात्पक्षीचममविष्णोरपिप्रियः॥१७॥नरेणबलिनादेवीसहस्र
म्परिवत्सरान् ॥ विधिदत्तेनचाप्नोतितृप्तिंलक्षन्त्रिभिर्नरैः ॥ १८ ॥ नारेणैवाथमांसेनत्रिसहस्रंचवत्सरान् ॥ तृप्तिमाप्नोतिकामाख्याभैरवीमम
रूपधृक् ॥ १९ ॥ मन्त्रपूतंशोणितन्तुपीयूषञ्चायतेसदा ॥ मस्तकञ्चापितस्यात्तिमांसञ्चापितथाशिवा ॥ २० ॥ तस्मात्तुपूजनेदद्याद्बलेः
शीर्षञ्चलोहितम् ॥ भोज्येहोमेचमांसानिनियुञ्जीयाद्विचक्षणः ॥ २१ ॥ पूजासुनाममांसानिदद्याद्वैसाधकःक्वचित् ॥ ऋतेतुलोहितंशीर्षम
मृतन्तत्तुजायते ॥ २२ ॥ कष्माण्डमिक्षुदण्डञ्चमद्यमासवमेवच ॥ एतेबलिसमाःप्रोक्तास्तृप्तौछागसमाःसदा ॥ २३ ॥ चन्द्रहासेनकर्त्या
वाछेदनम्मुख्यमिष्यते ॥ दात्रासिधेनुक्रकचशंकुलाभिस्तुमध्यमम् ॥ २४ ॥ क्षुरक्षुरप्रभल्लैश्चवाधमम्परिकीर्तितम् ॥ एभ्योन्यैःशक्तिबाणा
द्यैर्बलिश्चेद्यःकदापिन ॥ २५ ॥ नात्तिदेवीबलिन्तन्तुदातामृत्युमवाप्नुयात् ॥ हस्तेनछेदयेद्यस्तुप्रोक्षितंसाधकःपशुम् ॥ २६ ॥ क्षीणं
वात्रह्मवध्यामवाप्नोतिमुरुदुःसहाम् ॥ नामन्त्र्यखडन्तुबलिन्नियुञ्जीतविचक्षणः ॥ २७ ॥ खड्गस्यामन्त्रणेमन्त्रायावन्तःकथिताः पुरा ॥
महामायावलौतेवैयोज्यास्तत्रोदिताबुधैः ॥ २८ ॥ तःसार्द्धमेतेमन्त्रास्तुयोज्याःखड्गादिमन्त्रणे ॥ पूजनेशारदादीनाङ्गामाख्यायाविशेषतः ॥
॥ २९ ॥ द्विःकालीतिततोदेव्यावज्रेश्वरिपदन्ततः ॥ ततोनुलोहदण्डायैनमःशेषतुयोजयेत् ॥ ३० ॥ सम्पूज्यानेनमन्त्रेणखड्गमादाय
पाणिना ॥ कालरात्र्यास्तुमन्त्रेणतंखड्गमभिमन्त्रयेत् ॥ ३१ ॥ नेत्रबीजस्यमध्यन्तुद्विरावर्त्यप्रयोजयेत् ॥ ततोनुकालिकालीतिकरालोष्ठी
ततःपरम् ॥ ३२ ॥ हान्तादींश्चतृतीयेनस्वरेणैकादशेनवै ॥ योजितोनादबिन्दुभ्यांद्वौतत्पश्चान्नियोजयेत् ॥ ३३ ॥ फेत्कारिणिपदन्तस्मा

त्खादयछेदयेत्यतः ॥ सर्वान्दुष्टानिंतिततोद्विम्मार्यलुलायकम् ॥ ३४ ॥ खड्गेनछिन्धिछिन्धीतिततःकिलकिलेतिवै ॥ ततःकिचिकिचित्येव
न्ततः पिबपिबेतिच ॥ ३५ ॥ ततोनुरुधिरश्चेतिस्फौँस्फौकिरिकिरीतिच ॥ कालिकायैनमइतिकालरात्र्यास्तुमन्त्रकम् ॥ ३६ ॥ इत्यनेन
तुमन्त्रेणकरवालेभिमन्त्रिते ॥ कालरात्रीस्वयन्तत्रप्रसीदत्यरिहानये ॥ ३७ ॥ बलेःपूर्वोदितामन्त्रानित्यंगुह्यास्तुसाधकैः ॥ अयम्मन्त्रस्तुव
क्तव्यस्तस्यहत्याविहानये ॥ ३८ ॥ यज्ञार्थेपशवःसृष्टाःस्वयमेवस्वयम्भवा ॥ अतस्त्वांघातयिष्यामितस्माद्यज्ञेवधोवधः ॥ ३९ ॥ ततोदैव
तंमुद्दिश्यकाममुद्दिश्यचात्मनः ॥ छेदयेत्तेनखड्गेनबलिम्पूर्वाननन्तुतम् ॥ ४० ॥ अथवोत्तरवक्त्रन्तंस्वयम्पूर्वमुखस्तथा ॥ पूर्वोक्तान्सैन्ध
वादीस्तुवक्त्रेवश्यन्नियोजयेत् ॥ ४१ ॥ सौवर्णराजतन्ताम्रंदैत्यम्पत्रपुटञ्चवा ॥ माहेयकांस्यमथवायज्ञकाष्ठमयञ्चवा ॥ ४२ ॥ पात्रंरुधिर
दानायकर्त्तव्यंविभवावधि ॥ नलौहेवल्कलेवापिवैत्रेराङ्गेथसैकते ॥ ४३ ॥ दद्याद्रक्तम्बलीनान्तुभूमौशुचिशुचेतथा ॥ नघटेभूतलेवापिदे
यन्क्षुद्रेनभाजने ॥ ४४ ॥ रुधिराणिप्रदद्यात्तुभूतिकामोनरोत्तमः ॥ नरस्यतुसदारक्तम्माहेयैतैजसेथवा ॥ ४५ ॥ दद्यान्नरपतिस्तत्तुनपटादौ
कदाचन ॥ हयमेधमृतेदद्यान्नकदाचिद्धयम्बलिम् ॥ ४६ ॥ तथादिक्पालमेधेतुगजन्दद्यान्नराधिपः ॥ नकदाचित्तदादेव्यैप्रदद्याद्धयहस्तिनौ
॥ ४७ ॥ हयाकर्षेचामरन्तुबलिंदद्यान्नराधिपः ॥ सिंहंव्याघ्रन्नरञ्चापिस्वगात्ररुधिरन्तथा ॥ ४८ ॥ नदद्याद्ब्राह्मणोमद्यम्महादेव्यै कदाचन ॥
सिंहंव्याघ्रन्नरदन्दत्वाब्राह्मणोनरकंव्रजेत् ॥ ४९ ॥ इहापिस्यात्सहीनायुःसुखसौभाग्यवर्जितः ॥ स्वगात्ररुधिरन्दद्याच्चात्मवध्यामवाप्नुयात् ॥
॥ ५० ॥ मद्यन्दत्वाब्राह्मणस्तुब्राह्मण्यादेवहीयते ॥ नकृष्णसारंवितरेद्बलिन्तुक्षत्रियादिकः ॥ ५१ ॥ ददतःकृष्णसारन्तुब्रह्महत्याभवेद्यतः ॥

यत्रसिंहस्यव्याघ्रस्यनरस्यविहितोवधः ॥ ब्रह्मणोक्तातुबल्यादौतत्रायंविहितःक्रमः ॥ ५२ ॥ कृत्वाघृतमयंव्याघ्रन्नरंसिंहञ्चभैरव ॥ अथवा
पूपविकृतंयवक्षोदमयञ्चवा ॥ ५३ ॥ घातयेच्चन्द्रहासेनतेनमन्त्रेणसंस्कृतम् ॥ प्रभूतबलिदानेतुद्वौवात्रीन्वाग्रतःकृतान् ॥ ५४ ॥ पूजयेत्प्र
मुखान्कृत्वासर्वान्मन्त्रेणसाधकः ॥ सामान्यपूजाकथितावलीनाम्पूर्वतोमया ॥ ५५ ॥ विशेषोयत्रयत्रास्तितन्मत्तःशृणुभैरव ॥ महिषम्प्रद
देहेव्यैभैरव्यैभैरवायवै ॥ ५६ ॥ अनेनैवतुमन्त्रेणतदातम्पूजयेद्बलिम् ॥ यथावाहम्भवान्द्वेष्टियथावहसिचण्डिकाम् ॥ तथाममरिपून्हिसशु
भांवहलुलायक ॥ ५७ ॥ यमस्यवाहनस्त्वन्तुवररूपधराव्यय ॥ आयुर्वित्तंयशोदेहिकासरायनमोस्तुते ॥ ५८ ॥ खड्गस्यतुयदादानंक्रिय
तेतन्त्रमन्त्रकम् ॥ जलेनाभ्युक्ष्यकुर्वीतगुहाजातेतिभाषयन् ॥ ५९ ॥ दैवेपैत्रेचशुभगःखड्गस्त्वंखडसन्निभः ॥ च्छिन्धिविघ्नान्महाभागगुहा
जातनमोस्तुते ॥ ६० ॥ प्रदानेकृष्णसारस्यमन्त्रोयम्परिकीर्तितः ॥ कृष्णसारब्रह्ममूर्त्तेब्रह्मतेजोविवर्द्धन ॥ ६१ ॥ चतुर्वेदमियंप्राज्ञप्रज्ञा
न्देहियशोमहत् ॥ तथासरभपूजायाम्मन्त्रमेतत्प्रकीर्त्तितम् ॥ ६२ ॥ त्वमष्टपादोविभ्रंसचन्द्रभागसमुद्भव ॥ अष्टमूर्त्तेमहाबाहोभैरवाख्यन
मोस्तुते ॥ ६३ ॥ यथाभैरवरूपेणवाराहोनिहतस्त्वया ॥ तथाशरभरूपेणरिपून्विघ्नान्निपूदय ॥ ६४ ॥ हरिस्त्वंहररूपेणयथावहसिचण्डि
काम् ॥ तथाशुभानिमोनित्यंबहुविघ्नांश्चसूदय ॥६५॥ त्वंहरिःसिंहरूपेणजगत्प्रत्यूहरूपिणम् ॥ जघानयेनसत्येनहिरण्यकशिपुंहरन् ॥६६॥
इत्येवंसिंहपूजायांक्रमउक्तोमयानघ ॥ नरेस्वगात्ररुधिरेपर्यायंशृणुभैरव ॥ ६७ ॥ पीठेचेद्दीयतेमर्त्योबलिंदद्यामच्छमशानके ॥ श्मशानं
हेरुकाख्यन्तुतत्पूर्वम्प्रतिपादितम् ॥६८॥ कामाख्यानिलयेशैलओड्राद्यौविद्धितत्क्रमम् ॥ ममरूपंश्मशानन्तद्भैरवाख्यञ्चकथ्यते ॥ ६९ ॥

तंत्रांगत्वन्तपःसिद्धौत्रिभागन्तुभविष्यति ॥ पर्वांगेभैरवाख्येतुसमुत्सृष्टिर्नरस्यतु ॥७०॥ दक्षिणांगे शिरोदद्याद्भैरव्यामुण्डमालया ॥ रुधिरम्प
श्चिमांगेतुहेरुकाख्यैनियोजयेत् ॥७१॥ दत्त्वासम्पज्यतुनरांविसृज्यागमनक्रमे॥ पीठश्मशानेषुबलिन्नैक्षेत्तुबलिदायकम् ॥७२॥ अन्यत्रापियतो
यत्रदीयतेयन्महाबलिः॥तत्राप्यन्यत्रचोत्सृज्यछित्वान्यत्रशिरोमृतम् ॥७३॥ नियोजयेत्साधकस्तुविसृज्यनविलोकयेत् ॥ सुस्नातम्मनुजन्दी
तम्पूर्वाह्णनियताशनम् ॥७४॥ मांसमैथुनभोग्येनहीनंस्रक्चन्दनोक्षितम् ॥ कृत्वोत्तरामुखन्तन्तु तदंगेष्वंगदेवताः ॥७५॥ पूजयेत्तन्तुनाम्नातुदै
वतेनचमानुषम्॥तद्ब्रह्मरन्ध्रेत्रह्माणन्तन्नासायाञ्चमेदिनीम् ॥७६॥ कर्णयोस्तुतथाकाशञ्जिह्वायांसर्वतोमुखम् ॥ ज्योतींषिनेत्रयोर्विष्णुंवदनेप
रिपूजयेत्॥७७॥ललाटेपूजयेच्चन्द्रंशक्रन्दक्षिणगण्डतः ॥ वामगण्डेतथावह्निंग्रीवायांसमवर्तिनम् ॥७८॥ केशाग्रेनिर्ऋतिम्मध्येभ्रुवोश्चापिप्रचे
तसम् ॥नासामूलेतुश्वसनंस्कन्धेचापिधनेश्वरम् ॥ ७९ ॥ हृदयेसर्पराजन्तुपूजयित्वापठेदिदम् ॥ नरवर्यमहाभागसर्वदेवमयोत्तम ॥ ८० ॥
रक्षमांशरणापन्नंसपुत्रपशुबान्धवम् ॥ सराज्यम्मांसहामात्यञ्चतुरंगसमन्वितम् ॥ ८१ ॥ रक्षपरित्यजप्राणान्मरणेनियतेसति ॥ महातपोभि
र्ज्ञानैश्चयज्ञैर्यत्साध्यतेमृतम् ॥ ८२ ॥ तन्मेदेहिमहाभागत्वञ्चापिप्राप्नुहिश्रियम् ॥ राक्षसाश्चपिशाचाश्चवेतालाद्याःसरीसृपाः ॥ ८३ ॥
नृपाश्चारिपवश्चान्येनमान्तेघ्नन्तुत्वत्कृते ॥ त्वत्कण्ठनालगलितैःशोणितैरंगसंयुतैः ॥ ८४ ॥ आप्यायस्वात्मवन्मृत्वामरणेनियतेसति ॥
एवंसम्पूज्यविधिवत्पूर्वतन्त्रैश्चपूजयेत् ॥ ८५ ॥ पूजितोमत्स्वरूपोयन्दिक्पालाधिष्ठितोभवेत् ॥ अधिष्ठितस्तथान्यैश्चब्रह्माद्यैःसकलैः
सुरैः ॥ ८६ ॥ कृतपापोपिमनुजोनिःपाप्मासतुजायते ॥ तस्यनिष्कलुषस्याशुपीयूषंशोणितम्भवेत् ॥ ८७ ॥ प्रीणातिचमहादेवीजग

न्माताजगजन्मयी ॥ सोपिकायम्परित्यज्यमानुषन्नचिरान्मृतः ॥ ८८ ॥ भवेद्गणानामधिपोमयापिबहुसत्कृतः ॥ इतोन्यथापापयुक्तम्म
लमूत्रवशायुतम् ॥ ८९ ॥ तम्बलिन्नहिगृह्णातिकामाख्यान्यापिनामतः ॥ अन्येषाम्माहिषादीनांबलीनामथपूजनात् ॥ ९० ॥ कायोमे
ध्यत्वमायातिरक्तंगृह्णातिवैशिवा ॥ अन्येभ्योपिचदेवेभ्योयदायत्तुप्रदीयते ॥ ९१ ॥ तदर्चितम्प्रदद्यात्तुपूजितायसुरायवै ॥ काणम्पंगुश्चा
तिवृद्धंरोगिणश्चगलद्व्रणम् ॥ ९२ ॥ क्लीबंहीनांगमथवावृद्धलिंगंकुलक्षणम् ॥ श्वित्रिणश्चातिह्रस्वञ्चमहापाताकिनन्तथा ॥ ९३ ॥ अद्वाद
शकवर्षीयंशिशुसूतकसंयुतम् ॥ ऊर्ध्वंसंवत्सराच्चापिमहागुरुनिपातिनम् ॥ ९४ ॥ बलिकर्मणिचैताँस्तुवर्जयेत्पूजितानपि ॥ पशूनाम्प
क्षिणाम्चापिनराणाञ्चविशेषतः ॥ ९५ ॥ स्त्रियन्नदद्यात्तुबलीन्दत्वानरकमाप्नुयात् ॥ संघातबलिदानेषुयोषितम्पशुपक्षिणः ॥ ९६ ॥ बलि
न्दद्यान्मानुषीन्तुत्यक्त्वासंघातपूजितम् ॥ नत्रिमासीयकान्न्यूनम्पशुन्दद्याच्छिवाबलिम् ॥ ९७ ॥ नचत्रैपक्षिकान्न्यूनम्प्रदद्याद्वैपतात्रिणम् ॥
काणव्यंगादिदुष्टन्तुनपशुम्पक्षिणन्तथा॥९८॥देव्यैदद्यात्तथामर्त्यन्तथैवपशुपक्षिणौ॥छिन्नलांगूलकर्णादीन्भग्नदन्तान्तथैवच ॥९९॥ भग्नशृं
गादिकंवापिनदद्यात्तुकदाचन॥नब्राह्मणंबलिन्दद्याच्चाण्डालमपिपार्थिव॥१००॥नोत्सृष्टन्द्विजदेवेभ्योभूपतेस्तनयन्तथा ॥रणेनविजितन्दद्या
त्तनयंरिपुभूभृतः ॥ १ ॥ स्वपुत्रम्भ्रातरंवापिपितरञ्चाविरोधिनम् ॥ विट्पतिञ्चनदद्यात्तुभागिनेयञ्चमातुलम् ॥ अनुक्तान्नापिदद्यात्तुतथाज्ञाता
न्मृगद्विजान् ॥ २ ॥ उक्तालाभेप्रदद्यात्तुगर्द्दभञ्चोष्ट्रमेवच ॥ लाभेन्येषान्नवितरेद्व्याघ्रमुष्ट्रंखरन्तथा ॥ ३ ॥ सम्पूज्यविधिवन्मर्त्यम्पशुम्प
क्षिणमेववा ॥ संछिन्नंचापिमन्त्रेणमन्त्रेणैवनिवेदयेत् ॥४॥ नारंमर्त्यंशिरोरक्तन्देव्याःसम्यक्निवेदयेत् ॥ छागन्तुवामतोदद्यान्माहिषंवितरे

त्पुरः ॥ ५ ॥ पक्षिणंवामतोदद्यादग्रतोदेहशोणितम् ॥ क्रव्यादानाम्पशूनान्तुपक्षिणांतुशिरोऽसृजम् ॥ ६ ॥ वामेनिवेदयेत्पार्श्वेजलजानाञ्चस
र्वशः॥कृष्णसारस्यकूर्म्मस्यखड्गस्यशशकस्यच॥७॥ग्राहाणामथमत्स्यानामग्रएवानिवेदयेत् ॥ सिंहस्यदक्षिणेदद्यात्खाङ्गिनोऽपिचदक्षिणे॥८॥
पृष्ठदेशेनदद्यात्तुशिरोवारुधिरंबलेः ॥ नैवेद्यन्दक्षिणेवामेपुरतोनतुपृष्ठतः ॥ ९ ॥ दीपन्दक्षिणतोदद्यात्पुरतोवानवामतः ॥ वामतस्तुतथाधूप
मग्रेवानतुदक्षिणे ॥ १० ॥ निवेदयेत्पुरोभागेगन्धम्पुष्पञ्चभूषणम् ॥ मण्डलेचेन्मध्यभागेवामदक्षादिपूर्ववत् ॥ ११ ॥ मदिराम्पृष्ठतोदद्या
दन्यत्पानन्तु वामतः ॥ अवश्यंविहितंयत्रमद्यन्तत्रद्विजःपुनः ॥ १२ ॥ नारिकेलजलंकांस्येताम्रेवाविसृजेन्मधु ॥ नापद्यपिद्विजोमद्यंक
दाचिद्विसृजेदपि ॥ १३ ॥ ऋतेपुष्पासवादुक्ताद्वृञ्जनाद्वाविशेषतः ॥ राजपुत्रस्तथामात्यः सचिवः सौप्तिकादयः ॥ दद्युर्न्नरबलिम्भूपसम्प
त्याविभयायच ॥ १४ ॥ नृपाननुमतेमर्त्यन्दत्वापापमवाप्नुयात् ॥ उपप्लवेरणेवापियथेच्छंवितरेन्नरः ॥१५॥ यः कश्चिद्राजपुरुषोनान्यस्त्व
पिकदाचन ॥ बलिदानदिनात्पूर्वन्दिवसेतुबलिन्नरम् ॥ १६ ॥ मानस्तोकेतिमन्त्रेणदेवीसूक्तेनयेनच ॥ गन्धद्वारेत्यनेनापिखड्गशीर्षेनिधाय
च ॥ १७ ॥ तस्मिन्खड्गेसुगन्धादिदत्वातेनाधिवासयेत् ॥ गन्धादिकन्तुखड्गस्थंगलेतस्य प्रदापयेत् ॥ १८ ॥ अम्बेऽम्बिकेतिमन्त्रेणरौद्रे
णभैरवस्यच ॥ एवन्तुसंस्कृतेमर्त्येदेवरिक्षातितंबलिम् ॥ १९ ॥ नतस्यव्याधयश्चापिक्षुन्नतारजनौनच ॥ नसूतकंदूषयेत्तज्ज्ञात्युत्पत्तिमृता
दिकम् ॥ १२० ॥ छिन्नन्नरस्यशीर्षन्तुपतितंयत्रयत्रच ॥ यच्छुभञ्चाशुभंवापिपश्चादीनाञ्चतच्छृणु ॥ २१ ॥ छिन्नंशिरस्तथैशान्यान्नारान्दिश्य
थराक्षसे ॥ पतितंराज्यहानिञ्चविनाशञ्चविनिर्दिशेत् ॥ २२ ॥ पूर्वाग्नियाम्यवारुण्यवायव्यादिगतंक्रमात् ॥ श्रियम्पुष्टिम्भयंलाभम्पुत्रलाभ

न्धनन्तथा ॥ २३ ॥ क्रमाद्विनिर्दिशेन्नारञ्छिन्नशीर्षन्तुभैरव ॥ उत्तरादिक्रमादेवमाहिषस्यापिमस्तकः ॥ २४ ॥ पतितोवायुकाष्ठान्तेसू
चयेद्यच्छृणुष्वतत् ॥ भाग्यहानिस्तथैश्वर्यंवित्तंरिपुजयम्भयम् ॥ २५ ॥ राज्यलाभंश्रियञ्चापिक्रमाद्विद्धितुभैरव ॥ पशूनाञ्चैवसर्वेषाञ्छागा
दीनामशेषतः ॥ २६ ॥ एवम्फलंक्रमाद्विद्याद्दतेजलभवाण्डजौ ॥ जलजानाम्पक्षिणान्तुयाम्यनैर्ऋत्ययोर्भयम् ॥ २७ ॥ अन्यत्रतुश्रियं
न्दद्यात्पतितंशातितंशिरः ॥ यःस्यात्कटकटाशब्दोदन्तानाञ्छिन्नमस्तके ॥ २८ ॥ नराणाम्पशुपक्ष्यादिग्राहादीनाञ्चरोगदः ॥ लोतकञ्चक्षु
षोर्ज्जातंयदिस्रवतिमस्तके ॥ २९ ॥ छिन्नेनरस्यराज्यस्यतदाहानिंविनिर्दिशेत् ॥ माहिषेमस्तकेनेत्राद्यदिस्रवतिलोतकम् ॥ १३० ॥ छिन्नेनि
वेदितंवैरिभूपमृत्युन्तदादिशेत् ॥ अन्येषामथपश्वादिबलीनांशिरसोर्दितात् ॥ ३१ ॥ निर्गतंछोतकन्धत्तेपराद्धीतिंगदन्तथा ॥ हसतिच्छि
न्नशीर्षञ्चेन्नारंस्यात्तुरिपुक्षयः ॥ ३२ ॥ श्रीवृद्धिरायुषोवृद्धिःसदादातुरसंशयः ॥ यद्यद्वाक्यन्निगदतितथाभवतिचाचिरात् ॥ ३३ ॥ हंकारा
द्राज्यहानिःस्यात्श्लेष्मस्रवाच्चपञ्चता ॥ देवानांयदिनामानिभाषतेछिन्नमस्तकः ॥ ३४ ॥ विभूतिमतुलाम्विद्यात्षण्मासाभ्यन्तरेतदा ॥
रुधिरादानकालेतुशकृन्मूत्रेयदिस्रवेत् ॥ ३५ ॥ कायन्तदाधश्चोर्ध्वंवादादुःस्यान्मरणन्तदा ॥ आक्षेपाद्रामपादस्यमहारोगःप्रजायते ॥ अन्य
दाक्षेपचलनैःकल्याणमुपजायते ॥ ३६ ॥ माहिषस्यतुरक्तस्यमानुषस्यतुसाधकः ॥ अंगुष्ठानामिकाभ्यान्तुकिञ्चिदुद्धृत्यभूतले ॥ ३७ ॥
महाकौशिकमन्त्रेणनिःक्षिपेद्बलिमुत्तमम् ॥ देवेभ्यःपूतनादिभ्योनैर्ऋत्याद्दिशिपूर्वतः ॥ ३८ ॥ महिषःपञ्चवर्षीयःपञ्चविंशतिवार्षिकः ॥
बलिर्देयोनरोदेव्यैतस्यरक्तन्तुभूतये ॥ ३९ ॥ नेत्रबीजत्रयंकामबीजंहन्ताप्रजापतिः ॥ वह्निबीजंपट्स्वराभ्यांसम्पृक्तश्चतथापरः ॥ १४० ॥

सएवैतास्तथैतावदादिवर्ग्गान्तसंयुतः ॥ षष्ठस्वरशिखाबिन्दुश्चन्द्रयुक्तस्तथापरः ॥ ४१ ॥ द्विर्मासिकाबीजकान्तःकौशिकीत्यभिमन्त्र
णम् ॥ एषबलिःस्वाहेतिमन्त्रोयंकौशिकीस्मृतः ॥ ४२ ॥ नृपोवैरिबलिन्दद्यात्खड्गमामंत्र्यपूर्वतः ॥ ४३ ॥ महिषश्चाथछागंवावैरिनाम्ना
भिमंत्र्यच ॥ सूत्रेणवदनेबद्धंत्रिधा तस्यतुमन्त्रकैः ॥ ४४ ॥ छित्वातस्योत्तमांगन्तुदेव्यैदद्यात्प्रयत्नतः ॥ यदायदारिपोर्वृद्धिर्बलिदानंतदा
परम् ॥ ४५ ॥ दद्यात्तदाशिरच्छित्वारिपोस्तस्यक्षयायच ॥ प्राणप्रतिष्ठाश्चरिपोःकुर्य्यात्तस्मिन्यशावथ ॥ ४६ ॥ तस्मिन्क्षीणेरिपोःप्राणाः
क्षीयन्तेविपदायुताः ॥ आदौविरुद्धरूपाणिचण्डिकेचततःपरम् ॥ ४७ ॥ वैरिणन्त्वमुकश्चेतियाहीत्याम्रेडितम्पुनः ॥ वह्निभार्य्यांततः
पश्चात्खड्गमन्त्रम्प्रकीर्तितम् ॥ ४८ ॥ स्वयंसवैरीयोद्वेष्टितामिमम्पशुरूपिणम् ॥ विनाशयमहामारिरूँपेरूँफेखादयखादय ॥ ४९ ॥ इत्यने
नतुमन्त्रेणवलेःशिरसिपुष्पकम् ॥ दद्यात्ततस्तद्रुधिरन्द्व्यक्षराभ्यांनिवेदयेत् ॥ १५० ॥ महानवम्यांशरदियद्येवन्दीयतेवालिः ॥ तदातदष्टां
गभवैर्मांसैर्होमंसमाचरेत् ॥ ५१ ॥ दुर्ग्गातन्त्रेणमन्त्रेणप्रणीतेदहनेशुचौ ॥ एवन्दत्वाबलिम्मर्त्योरिपुक्षयमवाप्नुयात् ॥ ५२ ॥ नाभेरध
स्ताद्रुधिरम्पृष्ठभागस्यचाश्रिये ॥ स्वगात्ररुधिरन्दद्यान्नकदाचनसाधकः ॥ ५३ ॥ नोष्ठस्यचिबुकस्यापिनेन्द्रियाणाञ्चमानवः ॥ कण्ठाधो
नाभितश्चोर्द्ध्वम्बाहोःपाणिमृतेतथा ॥ ५४ ॥ प्रदद्याद्रुधिरंघातन्नातिकुर्य्याच्चसाधकः ॥ गण्डयोश्चललाटस्यभ्रुवोर्म्मध्यस्यशोणितम्
॥ ५५ ॥ ॥ कर्णाग्रस्यचबाहोश्चतलयोरुदरस्यच ॥ कण्ठतोनाभितश्चोर्द्ध्वंहृद्भागस्ययतस्ततः ॥ ५६ ॥ पार्श्वयोश्चापिरुधिरन्दुर्ग्गा
यैविनिवेदयेत् ॥ नगुल्फतोऽसृक्प्रदद्यान्नजत्रोर्न्नापिवक्रतः ॥ ५७ ॥ नचरोगबिलादंगान्नान्यघाताच्चभैरव ॥ तदर्थेचकृताघातःसश्रद्धो

क्षुब्धमानसः ॥ ५८ ॥ श्रुतेरक्तम्प्रदद्यात्तुपद्मपुष्पस्यपत्रके ॥ सौवर्णेराजतेकांस्येलौहेफालेचवानरः ॥ ५९ ॥ निधायदेव्यैदद्यात्तुतद्रक्तम्म
न्त्रपूर्वकम् ॥ खननंक्षुरिकाखड्गसंकुलादियदस्त्रकम् ॥ १६० ॥ घातेनबृहदस्त्रस्यमहाफलमवाप्नुयात् ॥ पद्मपुष्पस्यपत्रन्तुयावद्भूजातिशो
णितम् ॥ ६१ ॥ तत्प्रमाणेचतुर्भागाधिकंरक्तन्तुसाधकः ॥ नकदाचित्प्रदद्यात्तुनांगच्छेदमथाचरेत् ॥ ६२ ॥ यःस्वहृदयसञ्जातमांसम्मा
पप्रमाणतः ॥ तिलमुद्गप्रमाणाद्वादेव्यैदद्यात्तुभक्तितः ॥ ६३ ॥ षण्मासाभ्यन्तरेतस्मात्काममिष्टमवाप्नुयात् ॥ बाह्वोस्तुस्कन्धयोर्वापि
योदद्याद्दीपवर्त्तिकाम् ॥ ६४ ॥ हृदयेवास्नेहपात्रंविनाभक्त्यातुसाधकः ॥ क्षणमात्रेणतद्दीपप्रदानस्यफलंशृणु ॥ ६५ ॥ भुक्त्वाचवि
पुलान्भोगान्देवीगेहेयदृच्छया ॥ कल्पत्रयन्तुसंस्थायसार्वभौमोनृपोभवेत् ॥ ६६ ॥ महिषस्याशिरश्छिन्नंसप्रदीपंशिवापुरः ॥ हस्ताभ्यां
यःसमादायअहोरात्रन्तुतिष्ठति ॥ ६७ ॥ सचिरायुःपूतमूर्तिरिहभुक्त्वामनोरमान् ॥ भोगानन्तेमद्गृहेगोगणानामधिपोभवेत् ॥ ६८ ॥ नर
स्यशीर्षमादायसाधकोदक्षिणेकरे ॥ वामेनरौधिरम्पात्रंगृहीत्वानिशिजाग्रतः ॥ ६९ ॥ यावद्रात्रंस्थितोमर्त्योराजाभवतिचेहवै ॥ मृतेमम
गृहम्प्राप्यगणानामधिपोभवेत् ॥ १७० ॥ क्षणमात्रबलीनांयःशिरोरक्तंकरद्वये ॥ गृहीत्वाचिन्तयेद्देवीम्पुरस्तिष्ठतिमानवः ॥ ७१ ॥ सका
मानिहसम्प्राप्यदेवीलोकेमहीयते ॥ महामायेजगन्नाथेसर्वकामप्रदायिनि ॥ ७२ ॥ ददामिदेहरुधिरंप्रसीदवरदाभव ॥ इत्युक्त्वामूलमन्त्रे
णनतिपूर्वम्विचक्षणः ॥ ७३ ॥ स्वगात्ररुधिरन्दद्यान्मानवःसिद्धसन्निभः ॥ येनात्ममांसंसत्येनददामीश्वरिभूतये ॥ ७४ ॥ निर्वाणन्तेनस
त्येनदेहिहँहँनमोनमः ॥ इत्यनेनतुमन्त्रेणस्वमांसंवितरेद्बुधः ॥ ७५ ॥ सौभाग्यंसुखसम्पन्नम्प्रदीपम्परमंरुचिः ॥ दीपयेन्मांसमिहजंदीपं

ह्रौंह्रौंनमोनमः ॥ ७६ ॥ इत्यनेन तुमन्त्रेणदीपन्दद्याद्विचक्षणः ॥ महानवम्यांशरदिरात्रौस्कन्धविशाखयोः ॥ ७७ ॥ यवचूर्णमयंकृ
त्वारिपुंमृन्मयमेववा ॥ शिरश्छित्वाबलिन्दद्यात्कृत्वातस्यतुमन्त्रतः ॥ ७८ ॥ अनेनैवतुमन्त्रेणखड्गमामन्त्रयत्नतः ॥ रक्तङ्किलिकि
लीघोरघोराधारविहिंसकः ॥ ७९ ॥ ब्रह्मशिष्याम्बिकाशिष्यममुकश्चारिसत्तमम् ॥ मान्तोविसर्गसहितःसचबिन्दुयुतोपरः ॥ १८० ॥
शिरश्छित्वाबलिन्दद्यात्कृत्वातस्य तुमन्त्रतः ॥ अनेनैवतुमन्त्रेणाबिन्दुनाचसमन्वितः ॥ ८१ ॥ ब्रह्माग्नियोंगचन्द्रेणबिन्दुनाचसमन्वितः ॥
फडन्तोबलिषुप्रोक्तःखड्गस्कन्दविशाखयोः ॥ ८२ ॥ रक्तद्रवैःशोचयित्वाकृत्रिमन्तंबलिंरिपुम् ॥ कुचन्दनस्यतिलकंललाटेविनिवेश्य
च ॥ ८३ ॥ रक्तमाल्यांवरंकृत्वारक्तवस्त्रधरन्तथा ॥ कण्ठेबध्वारक्तसूत्रैर्नाभौशल्यञ्चकृत्रिमम् ॥ ८४ ॥ दत्त्वोत्तरशिरस्कन्धंकृत्वाखड्गेनछे
दयेत् ॥ शिरस्तस्यततोदद्यात्स्कन्दमन्त्रेणमन्त्रितम् ॥ ८५ ॥ चतुर्दशस्वराग्निभ्यांसम्पृक्तःस्यात्पुरःसरम् ॥ परतःपरतःपूर्व्वञ्चन्द्रबिन्दुस
मन्वितम् ॥ ८६ ॥ स्कन्दस्यमूलमन्त्रोयन्तेनतस्मैबलिंसृजेत् ॥ चतुर्दशस्वराग्निभ्याम्पतृतीयन्तुपूर्व्ववत् ॥ ८७ ॥ प्रोक्तोविशाखमन्त्रो
यन्तेनतस्मैबलिंसृजेत् ॥ कुटिलाक्षौकृष्णापिंगवर्णौरक्तांगधारिणौ ॥ ८८ ॥ त्रिशूलंकरवालञ्चपाणिभ्यान्दक्षिणेतथा ॥ बिभ्रतौनृकपाल
ञ्चकर्तृकञ्चापिवामतः ॥ ८९ ॥ त्रिनेत्रौनरमुण्डानाम्मालामुरसिबिभ्रतौ ॥ विकटौदशनैर्भीमैर्गणेशौद्वारपालकौ ॥ १९० ॥ ध्यानेन
चिन्तयेद्देव्याःपुरतःसंस्थितौसदा ॥ चैत्रेमासिसितेपक्षेचतुर्दश्यांविशेषतः ॥ ९१ ॥ बलिभिर्म्महिषैश्छागैर्माञ्चभैरवरूपिणम् ॥ तोषयेन्मधु
भिर्मांसैस्तेनतुष्याम्यहंसुत ॥ ९२ ॥ चण्डिकाबलिदानेतुबलिशीर्षञ्चलेनच ॥ अभिषिच्यतुमन्त्रेणमूलेनैवनिवेदयेत् ॥ ९३ ॥ ईषत्प्रा

णन्तुवहुधाचलितम्पूर्वमर्चितम् ॥ वीक्षेत्कामसमृद्धिन्तुसिद्धभावश्चसाधकः ॥ ९४ ॥ सितप्रेतोरथस्तेयंयोगपीठस्यसन्निभः ॥ ध्यायाम्य
स्मिन्महामायेसिद्धिंबोधयतेनमः ॥ ९५ ॥ अनेनामन्त्रितंशीर्षन्नचिराद्यदिवेपते ॥ तत्कार्य्यस्यतदासिद्धिरसिद्धिस्तुविपर्ययात् ॥ ९६ ॥
एवन्ददद्बलिम्वीरोयथोक्तविधिनामुना ॥ बलिदानादेवचतुर्वर्गमाप्नोत्यसंशयम् ॥ ९७ ॥ एवंबलिप्रदानस्यक्रमोरूपन्तथैवच ॥ कथितो
रुधिराध्यायउपचाराञ्छृणुष्वमे ॥ १९८ ॥ ॥ इति श्रीकालिकापुराणेबलिदानविवरणंनामएकसप्ततितमोऽध्यायः ॥ ७१ ॥ ॥ छ ॥
॥ श्रीभगवानुवाच ॥ उपचारान्प्रवक्ष्यामिशृणुषोडशभैरव ॥ यैःसम्यक्तुष्यतेदेवीदेवोप्यन्योहिभक्तितः ॥ १ ॥ आसनम्प्रथमन्दद्यात्पौष्प्य
न्दारवमेववा ॥ वास्त्रंवाचार्मणङ्कौशम्मण्डलस्योत्तरेसृजेत् ॥ २ ॥ यदैवदीयतेपद्मेमण्डलस्यतदुत्सृजेत् ॥ वाक्पुष्पतोयैःकुसुमंविनाय
च्छादकम्भवेत् ॥ ३ ॥ पद्मस्यतद्बहिर्देशेद्वारादौविनिवेदयेत् ॥ अर्घ्यम्पाद्यञ्चाचमनंस्नानीयन्नेत्ररञ्जनम् ॥ ४ ॥ मधुपर्कञ्चगन्धञ्चपुष्प
म्पद्मंनिवेदयेत् ॥ प्रीतमासुचयद्योग्यंगात्रेदातुञ्चतत्तनौ ॥ ५ ॥ दद्यादयोग्यम्पुरतोनैवेद्यम्भोजनादिकम् ॥ पौष्पासवंयद्विहितंयस्यतद्य
दिगर्भकम् ॥ ६ ॥ निवेदयेत्तदापद्मेविपुलंद्वारिचोत्सृजेत् ॥ पौष्पाम्पुष्पौघरचितंकुशसूत्रादिसंयुतम् ॥ ७ ॥ अतिप्रीतिकरन्देव्याममा
प्यन्यस्यभैरव ॥ यज्ञकाष्ठसमुद्भूतमासनम्मसृणंशुभम् ॥ ८ ॥ नोच्छ्रायन्नातिविस्तीर्णमासनंविनियोजयेत् ॥ अन्यद्दारुभवञ्चापिदद्यादा
सनमुत्तम् ॥ ९ ॥ सकण्टकंक्षीरयुतन्दारुसारविवर्जितम् ॥ चैत्यश्मशानसम्भूतंवर्ज्जयित्वाविभीतकम् ॥ १० ॥ वल्कलंकोषजम्फालंवस्त्र
मेतत्त्रयम्मतम् ॥ रोमजंकम्बलञ्चैतदनेनतुचतुष्टयम् ॥११॥ अनेनरचितन्दद्यादासनञ्चेष्टभूतये॥वस्त्रेषुकम्बलंशस्तमासनन्देवतुष्टये॥१२॥

रांकवश्चार्म्मणंश्रेष्ठन्दारवश्चन्दनोद्भवम् ॥ यच्चासनंकुशमयन्तदासनमनुत्तमम् ॥ १३ ॥ सर्वेषामपिदेवानामृषीणाञ्चयतात्मनाम् ॥ योगपी
ठस्यसदृशमासनंस्थानमुच्यते ॥ १४ ॥ आसनस्यप्रदानेनसौभाग्यम्मुक्तिमाप्नुयात् ॥ शंबरोरोहितोरामोन्यंकुरंकुशशोरुरुः ॥ १५ ॥
एणश्चहरिणश्चेतिमृगानवविधामताः ॥ हरिणश्चापिविज्ञेयोयश्चभेदोत्रभैरव ॥ १६ ॥ ऋष्यःखड्गोरुरुश्चैवपृषतश्चमृगस्तथा ॥ एतेबलिप्रदानेषु
चर्म्मदानेषुकीर्तिताः॥१७॥सर्वेषान्तैजसानाञ्चआसनंश्रेष्ठमुच्यते॥आयसंवर्ज्जयित्वातुकांस्यशीशकमेववा॥१८॥शिलामयम्मणिमयन्तथा
रत्नमयम्मतम्॥आसनन्देवताभ्यस्तुभुक्त्यैमुक्त्यैसमुत्सृजेत् ॥१९॥ अत्रैवसाधकानाञ्चआसनंशृणुभैरव॥यत्रासीनःपूजयँस्तुसर्वसिद्धिमवाप्नु
यात्॥२०॥ऐन्धनश्चामर्णवास्त्रन्तैजसश्चचतुष्टयम्॥आसनंसाधकानाञ्चसततम्परिकीर्तितम्॥२१॥तत्सर्वमासनंशस्तम्पूजाकर्म्मणिसाधके ॥
नयथेष्टासनोभूयात्पूजाकर्म्मणिसाधकः ॥ २२ ॥ काष्ठादिकासनंकुर्य्यात्सितमेवसदाबुधः ॥ चतुर्विंशत्यंगुलेनदीर्घंकाष्ठासनम्मतम् ॥२३॥
षोडशांगुलविस्तीर्णमुच्छ्रायंचतुरंगुलम् ॥ षडंगुलंवाकुर्य्यात्तुनोच्छ्रितश्चातआचरेत् ॥ २४ ॥ पूर्व्वोक्तंवर्ज्जयेद्वर्ज्यमासनम्पूजनेष्वपि ॥ वस्त्र
न्द्विहस्तान्नोदीर्घसार्द्धहस्तान्नविस्तृतम् ॥ २५ ॥ नत्र्यंगुलात्तथोच्छ्रायंपूजाकर्म्मणिसंश्रयेत् ॥ यथेष्टश्चार्म्मणंकुर्य्यात्पूर्वोक्तंसिद्धिदायकम् ॥
॥ २६ ॥ षडंगुलाधिकंकुर्य्यान्नोच्छ्रितश्चकदाचन ॥ काम्बलश्चार्म्मणंशैलंमहामायाप्रपूजने ॥ २७ ॥ प्रशस्तमासनम्प्रोक्तंकामाख्यायास्तथैव
च ॥ त्रिपुरायाश्चसततंविष्णोश्चापिकुशासनम् ॥ २८ ॥ बहुदीर्घम्बहूच्छ्रायन्तथैवबहुविस्तृतम् ॥ दारुभूमिसमम्प्रोक्तमश्मापिसर्वकर्म्मणि
॥ २९ ॥ पृथक्पृथक्कल्पयेत्तुबहिर्द्वारितथासनम् ॥ नपत्रमासनंकुर्यात्कदाचिदपिपूजने ॥ ३० ॥ नप्राण्यङ्गसमुद्भूतमास्थिजंद्विरदादृते ॥ मा

तङ्गदन्तसञ्जातंकामिकेष्वासनञ्चरेत् ॥ ३१ ॥ चाम्मैपूर्वोदितंगुह्यन्तथागन्धमृगस्यच ॥ सलिलेयदिकुर्व्वीतदेवतानाम्प्रपूजनम् ॥ ३२ ॥
तत्राप्यासनआसीनोनोत्थितस्तुकदाचन ॥ तोयेशिलामयंकुर्य्यादासनंकौशमेववा ॥ ३३ ॥ दारवन्तैजसंवापिनान्यदासनमाचरेत् ॥ आ
सनारोपसंस्थानंस्थानाभावेतुपूजकः ॥ ३४ ॥ आसनंकल्पयित्वातुमनसापूजयेज्जले ॥ यद्यासितुन्नसंस्थानंविद्यतेतोयमध्यतः ॥ ३५ ॥
अन्यत्रवातदास्थित्वादेवपूजांसमाचरेत् ॥ इत्येतत्कथितम्पुत्रपूज्यपूजकसङ्गतम् ॥३६॥ आसनम्पाद्यमधुनाशृणुवेतालभैरव ॥ पाद्यार्थमुद
कम्पाद्यंकेवलन्तोयमेवतत् ॥ ३७ ॥ तत्तैजसेनपात्रेणशंखेनापिप्रदापयेत् ॥ धर्म्मार्थकाममोक्षाणांसंस्थानम्पाद्यमिष्यते ॥ ३८ ॥ तदास
नोत्तरंदद्यान्मूलमन्त्रेणसर्वतः ॥ कुशपुष्पाक्षतैश्चैवसिद्धार्थैश्चन्दनैस्तथा ॥ ३९ ॥ तोयैर्गन्धैर्यथालब्धैरर्घन्दद्यात्तुसिद्धये॥ अर्घ्येणलभतेका
मानर्घ्येणलभतेधनम् ॥ ४० ॥ पुत्रायुःसुखमोक्षाणिदानादर्घस्यवैलभेत् ॥ नदद्याद्भास्करायार्घ्यंशंखतोयैर्विचक्षणः ॥ ४१ ॥ तथानशु
क्तिपात्रेणविष्णवेर्घ्यन्निवेदयेत् ॥ दद्यादाचमनीयन्तुसुगन्धिसलिलैः शुभैः ॥ ४२ ॥ कर्पूरवासितैर्वापिकृष्णागुरुविधूपितैः ॥ यथातथासुग
न्धैर्वाप्रसन्नैःफेनवर्ज्जितैः ॥ ४३ ॥ तत्तैजसेनपात्रेणशंखेनापिप्रदापयेत् ॥ उदकन्दीयतेयत्तुप्रसन्नम्फेनवर्जितम् ॥ ४४ ॥ आचमनायदेवेभ्य
स्तदाचमनमुच्यते ॥ केवलन्तोयमात्रेणतद्वादद्यान्नमिश्रितम् ॥ ४५ ॥ वासितन्तुसुगन्धाद्यैःकर्त्तव्यंयदिलभ्यते ॥ आयुर्बलंयशोवृद्धिंप्रदा
याचमनीयकम् ॥ ४६ ॥ लभतेसाधकोनित्यंकामाँश्चैवयथोत्थितान् ॥ दधिसर्पिर्जलंक्षौद्रंसिताताभिश्चपञ्चभिः ॥ ४७ ॥ प्रोच्यतेमधुपर्क्क
स्तुसर्वदेवौघतुष्टये ॥ जलन्तुसर्वतःस्वल्पंसितादधिघृतंसमम् ॥ सर्वेभ्यश्चाधिकंक्षौद्रम्मधुपर्क्केप्रयोजयेत् ॥ ४८ ॥ तद्दद्यात्कांस्यपात्रेणरौ

क्मश्वेतमयेनवा ॥ ज्योतिष्टोमाश्वमेधादौपूर्वंचेष्टचपूजने ॥ ४९ ॥ मधुपर्क्कःप्रदिष्टोयंसर्व्वदेवौघतुष्टिदः ॥ धर्म्मार्थकाममोक्षाणांसाधकःपरि
कीर्त्तितः ॥५०॥ मधुपर्क्कःसौख्यभोग्यतुष्टिपुष्टिप्रदायकः ॥ पिष्टातकोथकस्तूरीरोचनंकुंकुमन्तथा ॥५१॥ गुडःक्षौद्रम्पञ्चगव्यंसर्वौषधिगण
स्तथा ॥ सितानिर्णेजनन्तैलंस्निग्धस्नेहेनतत्तिलाः ॥ ५२ ॥ प्रान्तेतोयमितिप्रोक्तंस्नानीयंकल्पकोविदैः ॥ स्वर्णरत्नोदकंचैवकर्प्पूराद्यधिवा
सितम् ॥ ५३ ॥ तैजसैःकांस्यपात्रैर्वाशंखैर्वातन्निवेदयेत् ॥ मण्डलेकेशरेदेयमादित्यप्रतिमासुच ॥ ५४ ॥ शिवलिङ्गेतथाभोगेपीठेदेवतनौत
था ॥ सद्यःस्निग्धेमृन्मयेवासर्प्पिःसिन्दूरजेतथा ॥ ५५ ॥ श्रीचन्दनप्रतिष्ठेवालेपयेत्प्रतिमातनौ ॥ अन्तिकस्थापितेखड्गेस्नापयेद्दर्प्पणेथ
वा ॥ ५६ ॥ एवन्दद्यात्तुस्नानीयम्महादेव्यैविशेषतः ॥ रविविष्णुशिवेभ्योवायत्रतत्रप्रपूजने ॥५७॥ पूजकःस्नानदानात्तुचिरायुरुपजायते ॥
सम्यक्स्नानप्रदानात्तुकल्पान्तंस्वर्गभाग्भवेत् ॥ ५८ ॥ यदेवदीयतेपाद्यङ्गन्धपुष्पादिकन्तथा ॥ उपचाराँस्तथासर्वानर्घ्यपात्राहितैर्जलैः ॥
॥ ५९ ॥ अमृतीकरणाद्यैस्तुसंस्कृतैस्त्वभिषिच्यतैः ॥ प्रदद्यादिष्टदेवेभ्योगृह्णातिचततःस्वयम् ॥ ६० ॥ अर्घ्यपात्राणितैस्तोयैर्विनायद्विनि
वेदनम् ॥ दीयतेचेष्टदेवेभ्यःसर्वन्तन्निष्फलम्भवेत् ॥ ६१ ॥ रागाल्लोभात्प्रमादाद्वाह्यर्घ्यम्पात्रामृतीकृतम् ॥ तोयंश्रुतंस्यात्पात्रात्तुपुनःकुर्यात्त
दामृतम् ॥ ६२ ॥ स्वल्पावशेषतोयेतुपात्रस्थेह्यमृतीकृते ॥ तत्रान्यदुदकन्दद्यात्तत्तेनैवामृतम्भवेत् ॥ ६३ ॥ बहूनियदिपुष्पाणिमालावाप्र
चुरायदि ॥ दीयन्ते चार्घ्यपात्रस्थैर्जलैःसंसिच्यचोत्सृजेत् ॥ ६४ ॥ अन्यतोयैर्यदुत्सृष्टमर्घ्यपात्रस्थितेतरैः ॥ तन्नगृह्णातीष्टदेवोदत्तंविधिश
तैरपि ॥ ६५ ॥ संस्कृतेत्वर्घ्यपात्रेतुनवाभिःप्रतिपत्तिभिः ॥ तिष्ठन्तिसर्वतीर्थानिपीयूषाणिचसर्वतः ॥ ६६ ॥ तस्मात्तत्रस्थितैस्तोयैरभ्यु

क्ष्योपचरान्त्सृजेत् ॥ नयोग्यमर्घ्यपात्रेषुनिधायाविनिवेदयेत् ॥ ६७ ॥ इदन्तेभैरवप्रोक्तंपट्टकञ्चैवासनादिकम् ॥ वस्त्रादिदशवक्ष्यामिशृणुवि
ज्ञानवृद्धये ॥ ६८ ॥ इतिश्रीकालिकापुराणेद्विसप्ततितमोध्यायः ॥७२॥ छ ॥ श्रीभगवानुवाच ॥ कार्पासंकम्बलंवाल्कंकोशजंवस्त्रमिष्यते॥
तत्पूर्व्वम्पूजयित्वैवमन्त्रैर्देवायचोत्सृजेत् ॥ १ ॥ निर्द्दशम्मलिनञ्जीर्णञ्छिन्नङ्गात्रावलिङ्कितम् ॥ परकीयंह्याखुदष्टंसूचीविद्धन्तथोषितम् ॥२॥
उग्रकेशंविधौतञ्चश्लेष्ममूत्रादिदूषितम्॥प्रदानेदेवताभ्यश्चैदैवेपित्र्येचकर्मणि ॥ ३ ॥ वर्ज्जयेत्स्वोपयोगेनयज्ञादावुपयोजने ॥उत्तरीयोत्तरासंगै
र्निचोलोमोदचेलकः॥४॥ परिधानञ्चपञ्चैतान्यस्यूतानिप्रयोजयेत्॥ शाणवस्त्रन्निशारञ्चतथैवातपवारणम्॥५॥चण्डातक्रन्तथादृश्यम्पञ्चस्यूता
न्यदुष्टये॥पताकाध्वजकुण्डादौस्यूतंवस्त्रम्प्रयोजयेत्॥६॥अन्यत्रावरणादौचताद्विनाशस्यतेनतत्॥रक्तंकौशेयवस्त्रञ्चमहादैव्यैप्रशस्यते ॥७॥पी
तन्तथैवकौशेयंवासुदेवायचोत्सृजेत् ॥ रक्तन्तुकम्बलन्दद्याच्छिवायपरमात्मने ॥ ८ ॥ विचित्रंसर्वदेवेभ्योदेवीभ्योंशुन्निवेदयेत् ॥ कार्पा
संसर्वतोभद्रन्दद्यात्सर्वेभ्यएवच ॥ ९ ॥ नैकान्तरक्तंदद्यात्तुवासुदेवायचैलकम् ॥ तथानैकान्तरक्तन्तुशिवायविनिवेदयेत् ॥ १० ॥ नीली
रक्तन्तुयद्वस्त्रन्तत्सर्वत्रविवर्ज्जितम् ॥ दैवेपित्र्येत्वोपयोगेवर्ज्जयेत्तुविचक्षणः ॥ ११ ॥ नीलीरक्तम्प्रमादात्तुयोदद्याद्विष्णवेबुधः ॥ निष्फलातस्य
तत्पूजातदाभवतिभैरव ॥ १२ ॥ विचित्रेवाससिपुनर्लग्नन्नीलीविराजितम् ॥ वस्त्रन्दद्यान्नमांदेव्यैनान्यस्मैतुकदाचन ॥ १३ ॥ द्विपदाम्ब्राह्म
णोयद्वद्देवानांवासवोयथा ॥ तथाभूषणवर्गेषुवस्त्रमुत्तममुच्यते ॥ १४ ॥ वस्त्रेणजीर्यतेलज्जावस्त्रेणहीयतेत्वघम् ॥ वस्त्रात्स्यात्सर्वतःसिद्धिश्च
तुर्वर्गप्रदञ्चतत् ॥ १५ ॥ वस्त्रन्तेकथितम्पुत्रसर्वप्रीतिप्रदायकम् ॥ भोग्यंभूषोत्तमंनित्यम्भूषणानिशृणुष्वमे ॥ १६ ॥ किरीटञ्चशिरोरत्नं

कुण्डलञ्चललाटिका ॥ तालपत्रञ्चहारश्चग्रैवेयकमथोर्मिका ॥ १७ ॥ प्रालम्बिकारत्नसूत्रमुत्तङ्गोतर्क्षमालिका ॥ पार्श्वद्योतोनखद्योतोह्यं
गुलीच्छादकस्तथा ॥ १८ ॥ जूटालकम्माणवकोमूर्द्धतारातलन्तिका ॥ अङ्गदोबाहुवलयःशिखाभूषणलिंगिनः ॥ १९ ॥ प्रागण्डबन्धमुद्रा
सनाभिपूरोथमालिका ॥ सप्तकीशृंखलश्चैवदन्तपत्रञ्चकर्णकः ॥ २० ॥ उरुसूचंचनीवींचमुष्टिवर्द्धम्प्रकीर्णकम् ॥ पादांगदहंसकश्चनूपुरंक्षुद्रघं
टिका ॥२१॥ सुखपण्टमितिप्रोक्ताअलङ्काराःसुशोभनाः ॥ चत्वारिंशदमीप्रोक्तालोकेवेदेतुसौख्यदाः ॥ २२ ॥ अलंकारप्रदानेनचतुर्वर्गप्रसा
धनम् ॥ एतेषाम्पूजनंकृत्वाप्रदद्यादिष्टसिद्धये ॥ २३ ॥ तेषान्दैवतमुच्चार्य्यपूजयेत्तुविचक्षणः ॥ शिरोगतानिवादद्यात्सौवर्णानितुसर्वदा ॥
॥ २४ ॥ चूडारत्नादिकानीहभूषणानितुभैरव ॥ ग्रैवेयकादिहंसान्तंसौवर्णंराजतञ्चवा ॥ २५ ॥ निवेदयेत्तुदेवेभ्योनान्यत्तैजससम्भवम् ॥
रीतिरंगादिसञ्जातम्पात्रोपकरणादिकम् ॥ २६ ॥ दद्यादायसमर्ज्जन्तुभूषणंनकदाचन ॥ घण्टाचापरकुम्भादिपात्रोपकरणादिकम् ॥ २७ ॥
तद्भूषणान्तरेदद्यादस्मात्तदुपभूषणम् ॥ सर्वन्ताम्रमयन्दद्याद्यत्किञ्चिद्भूषणादिकम् ॥ २८ ॥ सर्वत्रस्वर्णवत्ताम्रमर्घपात्रेततोधिकम् ॥ पूजार्घ
पात्रन्नैवेद्याधारपात्रञ्चपानकम् ॥ २९ ॥ औदुंबरंसदाविष्णोःप्रीतिदन्तोपदन्तथा ॥ ताम्रेदेवाःप्रमोदन्तेताम्रेदेवाःस्थिताःसदा ॥३०॥सर्वप्री
तिकरन्ताम्रन्तस्मात्ताम्रम्प्रयोजयेत् ॥ स्वोपयोगेनरःकुर्याद्देवानामपिभैरव ॥ ३१ ॥ ग्रीवोर्ध्वदेशेरौप्यन्तुनकदाचिच्चभूषणम् ॥ प्रावारःपान
पात्रञ्चगण्डकोगृहमेवच ॥ ३२ ॥ पर्य्यंकादियदन्यच्चसर्वन्तदुपभूषणम् ॥ अयोमयमृतंकांस्यमृतेयद्भूषणम्भवेत् ॥ ३३ ॥ स्वर्णरौप्यस्यचा
भावेत्वधःकायेनियोजयेत् ॥ एतेषाम्भूषणादीनांयद्दातुंशक्यतेनरैः॥३४॥ तत्तद्दद्यात्सम्भवेतुसर्वमेवप्रदापयेत् ॥ चतुर्वर्गप्रदंत्वित्थम्भूषणंसर्व

सौख्यदम् ॥ ३५ ॥ तुष्टिपुष्टिप्रीतिकरंयथाशक्तीष्टयेसृजेत् ॥ इदंवाभूषणम्प्रोक्तंसर्वदेवस्यतुष्टिदम् ॥ ३६ ॥ गन्धश्चसम्यक्शृणुतम्पुत्रौवेता
लभैरवौ ॥ चूर्णीकृतोवाघृष्टोवादाहाकर्षितएववा ॥ ३७ ॥ रसःसम्मर्दजोवापिप्राण्यंगोद्भवएववा ॥ गन्धःपञ्चविधःप्रोक्तोदेवानाम्प्रीतिदाय
कः ॥ ३८ ॥ गन्धचूर्णंगन्धपत्रंचूर्णंसुमनसस्तथा ॥ प्रशस्तगन्धयुक्तानांपत्रचूर्णानियानितु ॥ ३९ ॥ तानिगन्धवहानिस्युःसगन्धःप्रथ
मःस्मृतः ॥ घृष्टोमलयजोगन्धःसचूर्णीकृतमेरुणा ॥ ४० ॥ अगुरुप्रभृतिश्चापियस्यपंकःप्रदीयते ॥ गन्धोदृष्टामघृष्टोयान्द्वितीयःपरिकी
र्तितः ॥ ४१ ॥ देवदार्वगुरुर्ब्रह्मशालशारान्तचन्दनाः ॥ प्रियादीनाञ्चयोदग्ध्वागृह्यतेदाहजोरसः ॥ ४२ ॥ सदाहाकर्षितोगन्धस्तृतीयःपरि
कीर्तितः ॥ सुगन्धकस्वीबिल्वगन्धीनितिलकन्तथा ॥ ४३ ॥ प्रभृतीनांरसोयोसौनिःपीडयपरिगृह्यते ॥ ससम्मर्दोद्भवोगन्धःसम्मर्दजइती
ष्यते ॥ ४४ ॥ मृगनाभिसमुद्भूततत्कोषोद्भवएववा ॥ गन्धःप्राण्यंगजःप्रोक्तोमोददःस्वर्गवासिनाम् ॥ ४५ ॥ कर्पूरगन्धसाराद्याःक्षोदेघृष्टे
चसंस्थिताः ॥ चन्द्रभागादयश्चापिरसेपंकेचसंगताः ॥ ४६ ॥ गन्धसारंसर्वरसंगन्धादौचप्रयुज्यते ॥ मृगनाभिर्भवेद्घृष्टश्चूर्णोप्यन्यस्य
योगतः ॥ ४७ ॥ एवंसर्वंतुसर्वत्रगन्धोभवतिपञ्चधा ॥ घृष्टादिभावादन्योन्यंगंधःप्रीतिकरःपरः ॥४८॥ गन्धस्यविस्तरोभेदःप्रोक्तःकाली
यकादयः ॥ सर्वःपञ्चविधेष्वेवप्रविष्टोभवतिक्षणात् ॥४९॥ गन्धोमलयजोयस्तुदैवेपित्र्येचसम्मतः॥ तस्यपंकोरसोवापिचूर्णोवाविष्णुतुष्टिदः
॥ ५० ॥ सर्वेषुगन्धजातेषुप्रशस्तोमलयोद्भवः ॥ तस्मात्सर्वप्रयत्नेनदद्यान्मलयजंसदा ॥ ५१ ॥ कृष्णागुरुःसकर्पूरःसहितोमलयोद्भवैः ॥
वैष्णवीप्रीतिदोगन्धःकामाख्यायाश्चभैरव ॥ ५२ ॥ कुंकुमागुरुकस्तूरीचन्द्रभागैःसमीकृतैः ॥ त्रिपुराप्रीतिदोगन्धस्तथाचण्डयाश्चशस्य

ते ॥ ५३ ॥ दैवतोद्देशपूर्वेणगन्धंसम्पूज्यसाधकः ॥ देवायेष्टायवितरेत्सर्वसिद्धिप्रदंसदा ॥ ५४ ॥ गन्धेनलभतेकामान्गन्धोधर्म्मप्रदः
सदा ॥ अर्थानांसाधकोगन्धोगन्धेमोक्षःप्रतिष्ठितः ॥ ५५ ॥ अयंवांकथितोगन्धःपुत्रौवेतालभैरवौ ॥ पुष्पाणिदेव्यावैष्णव्याःप्रियाणिशृ
णुसम्प्रति ॥ ५६ ॥ बकुलैश्चैवमन्दारैःकुन्दपुष्पैःकुरुण्टकैः ॥ करवीरार्कपुष्पैश्चशालमलैश्चापराजितैः ॥ ५७ ॥ दमनैःसिन्धुवारै
श्चसुरभीकुरुबकैस्तथा ॥ लताभिर्ब्रह्मवृक्षस्यदूर्वांकुरैःश्चकोमलैः ॥ ५८ ॥ मञ्जरीभिःकुशानाञ्चबिल्वपत्रैःसुशोभनैः ॥ पूजयेद्वैष्णवी
न्देवींकामाख्यान्त्रिपुरान्तथा ॥ ५९ ॥ अन्याश्चयाःशिवाप्रीत्यैजायंतेपुष्पजातयः ॥ ताइमाःशृणुकथ्यन्तेमयावेतालभैरव ॥ ६० ॥
मालतीमल्लिकाजातीयूथिकामाधवीतथा ॥ पाटलाकरवीरश्चयवानर्कारिकातथा ॥ ६१ ॥ कुब्जकस्तगरश्चैवकर्णिकारोथरोचना ॥
चम्पकाम्रातकौबाणोवर्वरामल्लिकातथा ॥ ६२ ॥ अशोकोलोध्रतिलकौअटरूपाशिरीषकौ ॥ शमीपुष्पंचद्रोणश्चपद्मोत्पलबकारुणाः
॥ ६३ ॥ श्वेतारुणैस्त्रिसन्ध्येचपलाशःखदिरस्तथा ॥ वनमालाथसेवन्तीकुमुदोथकदम्बकः ॥ ६४ ॥ चक्रंकोकनदश्चैवभण्डिलोगि
रिकर्णिका ॥ नागकेशरपुन्नागौकेतक्यञ्जलिकातथा ॥ ६५ ॥ दोहदाबीजपूरश्चनमेरुःशालएवच ॥ त्रपुषीचण्डबिल्वश्चझिण्टीप
श्चविधास्तथा ॥ ६६ ॥ एवमाद्युक्तकुसुमैःपूजयेद्वरदांशिवाम् ॥ अपामार्गस्यपत्रन्तुततोभृंगारपत्रकम् ॥ ६७ ॥ ततोपिग
न्धिनीपत्रम्बलाहकमतःपरम् ॥ तस्मात्खदिरपत्रन्तुवञ्जुलस्तबकस्तथा ॥ आम्रन्तुंबकगुच्छन्तुजंबूपत्रन्ततःपरम् ॥ ६८ ॥ बीजपूर
स्यपत्रन्तुततोपिकुशपत्रकम् ॥ दूर्वांकुरन्ततःप्रोक्तंशमीपत्रमतःपरम् ॥ ६९ ॥ पत्रमामलकन्तस्मादामनंपत्रमन्ततः ॥ सर्वतोबिल्वपत्रन्तु

देव्याःप्रीतिकरम्मतम् ॥ ७० ॥ पुष्पंकोकनदम्पद्मंयत्राबन्धूकएवच ॥ पत्रम्बिल्वस्यसर्वेभ्योवैष्णवीतुष्टिदम्मतम् ॥ ७१ ॥ सर्वेषाम्पुष्प
जातीनांरक्तपद्ममिहोत्तमम् ॥ रक्तपद्मसहस्रेणयोमालांसम्प्रयच्छति ॥ ७२ ॥ भक्तियुक्तोमहादेव्यैतस्यपुण्यफलंशृणु ॥ कल्पकोटिसहस्रा
णिकल्पकोटिशतानिच ॥ ७३ ॥ स्थित्वाममपुरेश्रीमांस्ततोराजाक्षितौभवेत् ॥ पत्रेषुबिल्वपत्रन्तुदेवीप्रीतिकरम्मतम् ॥ ७४ ॥ तत्सहस्र
कृतामालापूर्ववत्फलदाभवेत् ॥ किञ्चात्रबहुनोक्तेनसामान्येनेदमुच्यते ॥ ७५ ॥ उक्तानुक्तैस्तथापुष्पैर्जलजैःस्थलसम्भवैः ॥ पत्रैःसर्वैर्यथा
लाभंसर्वौषधिगणैरपि ॥ ७६ ॥ वनजैःसर्वपुष्पैश्चपत्रैरपिशिवांयजेत् ॥ पूजयेत्परमेशानीम्पुष्पाभावेपिपत्रकैः ॥ ७७ ॥ पत्राणामप्यभावेतु
तृणगुल्मौषधादिभिः ॥ औषधीनामभावेतुतत्फलैरपिपूजयेत् ॥ अक्षतैर्वाजलैर्वापितदभावेतुसर्षपैः ॥ ७८ ॥ सितैस्तस्याप्यलाभेतुमानसी
म्भक्तिमाचरेत् ॥ ७९ ॥ राजिदन्तकपत्रैश्चपुष्पौघैरपिपूजयेत् ॥ तुलसीकुसुमैःपत्रैर्चयेच्छ्रीविवृद्धये ॥ पुरश्चरणकार्येषुबिल्वपत्रयुते
स्तिलैः ॥ ८० ॥ साक्षतैःसघृतैर्वापिशिवामुद्दिश्ययत्नतः ॥ जुहुयादनलंवृद्धंसंस्कृतंकामवृद्धये ॥ ८१ ॥ संकल्पितःकामासिद्ध्यैसंख्य
यायःकृतोजपः ॥ तदन्तेपूजनंयत्तुविहितंक्रियतेद्विजैः ॥ ८२ ॥ पुरश्चरणसंज्ञन्तुकीर्तितन्द्विजसत्तमैः ॥ तस्मिन्पुराणकेपूर्वपूर्वोक्तैर्विस्तरो
दितैः ॥ ८३ ॥ विधानैःपूजयेद्देवींकामाख्यांवैष्णवीमपि ॥ यथासम्भवमेवात्रदद्यात्षोडशसाधकः ॥ ८४ ॥ उपचाराँस्तथैवोक्तान्विधि
कृत्यात्रलङ्घयेत् ॥ सम्पूर्णम्पूजनंकृत्वाकल्पोक्तंशतधाजपेत् ॥ ८५ ॥ जपान्तेजुहुयादग्निंहोमांतेतुबलित्रयम् ॥ त्रिजातीयन्तुवितरेत्तौर्यत्रिक
मतःपरम् ॥ ८६ ॥ पत्नीस्वयंवाभ्रातावागुरुर्वाविनियोजयेत् ॥ नैवेद्यादीनिसर्वाणिसुपुत्रःशिष्यएववा ॥ ८७ ॥ यज्ञावसानेदद्यात्तुगुरवे

दक्षिणांशुभाम् ॥ चामीकरान्तिलाङ्गाश्चतदशक्तौतुचेलकम् ॥ ८८ ॥ अष्टम्यांशुक्लपक्षस्यब्रह्मचारीजितेन्द्रियः ॥ नवम्यांवाचतुर्दश्याम्महा
देव्याःपुरश्चरेत् ॥ ८९ ॥ आदद्याद्गुरुवक्त्रात्तुविधिनाविस्तरेणतु ॥ कल्पोदितेनसम्पूज्यतिथिष्वेतासुभैरव ॥ ९० ॥ सम्पूर्णपूजान्नाकृत्वान
दद्यान्मन्त्रमीप्सितम् ॥ नपुरश्चरणंवापिकुर्यात्कृत्वावसीदति ॥ ९१ ॥ नित्यपूजासातुपुनःसम्पूर्णायदिशक्यते ॥ कल्पोदितम्पूजयि
तुन्तदाकुर्यादतन्द्रितः ॥ ९२ ॥ नचेद्विस्तरशःकर्तुन्देव्याःपूजान्तुभैरव ॥ कल्पोक्तांवान्यदेवस्यतत्रायंविधिरुच्यते ॥ ९३ ॥ मार्ज
नाद्यैस्तुसंस्कृत्यस्थण्डिलेमण्डलंलिखेत् ॥ पात्रस्यप्रतिपत्तिन्तुकृत्वादाहम्प्लवन्तथा ॥ ९४ ॥ ध्यायेदात्मानमथचसंस्कृत्यांगस्वरू
पतः ॥ अंगुष्ठाद्यस्त्रपर्य्यन्तन्द्वादशांगस्यशुद्धये ॥ ९५ ॥ अर्घपात्रेष्टधाजप्त्वाउपचारान्प्रसेचयेत् ॥ आधारशक्तिप्रमुखंमूलव
र्णान्प्रयुज्यच ॥ ९६ ॥ हृदिस्थान्देवतान्ध्यात्वाबहिःकृत्यश्चवायुना ॥ आरोप्यमण्डलेदद्यादुपचारान्यथाविधि ॥ ९७ ॥ पूज
यित्वापडंगानितथाष्टौदलदेवताः ॥ पुष्पाञ्जलित्रयन्दत्वाजप्त्वास्तुत्वाप्रणम्यच ॥ ९८ ॥ मुद्रामग्रेप्रदर्श्याथततःपश्चाद्विसर्ज्जयेत् ॥
सर्वेषामेवदेवानामेषएवविधिःस्मृतः ॥ ९९ ॥ सम्यक्कल्पोदितापूजायादिकर्तुन्नशक्यते ॥ उपचारांस्तथादातुम्पञ्चैतान्वितरेत्त
दा ॥ १०० ॥ गन्धम्पुष्पंचधूपंचदीपंनैवेद्यमेवच ॥ अभावेपुष्पतोयाभ्यांतदभावेतुभक्तितः ॥ १ ॥ संक्षेपपूजाकथितातथाव
स्त्रादिकंपुनः ॥ पुरश्चरणकृत्येचप्रदीपंशृणुभैरव ॥ २ ॥ दीपेनलोकाञ्जयतिदीपस्तेजोभवःस्मृतः ॥ चतुर्वर्गप्रदोदीपस्तस्माद्दीपैर्यजे
च्छ्रियम् ॥ ३ ॥ सततम्पुष्पदीपाभ्याम्पूजयेद्यस्तुदेवताम् ॥ ताभ्यामेवचतुर्वर्गःकथितोनात्रसंशयः ॥ ४ ॥ पुष्पैर्देवाःप्रसीदन्तिपुष्पे

देवाश्चसंस्थिताः ॥ चराचराश्चसकलाःसदापुष्परसाःस्मृताः ॥ ५ ॥ किञ्चातिबहुनोक्तेनपुष्पस्योक्तिर्मताल्लिका ॥ परञ्ज्योतिःपुष्पग
तम्पुष्पेणैवप्रसीदति ॥ ६ ॥ त्रिवर्गसाधनम्पुष्पन्तुष्टिश्रीपुष्टिमोक्षदम् ॥ पुष्पमूलेवसेद्ब्रह्मापुष्पमध्येतुकेशवः ॥ ७ ॥ पुष्पाग्रेतुमहादेवःसर्वे
देवाःस्थितादले ॥ तस्मात्पुष्पैर्यजेद्देवान्नित्यम्भक्तियुतोनरः ॥ ८ ॥ उच्चारितन्नाममात्रंजायतेसर्वभूतये ॥ घृतप्रदीपःप्रथमास्तिलतैलोद्भवस्त
तः ॥ ९ ॥ सार्षपःफलनिर्यासजातोवाराजिकोद्भवः ॥ दधिजश्चाणुजश्चैवदीपाःसप्तप्रकीर्त्तिताः ॥ ११० ॥ पद्मसूत्रभवादर्भगर्भसूत्रभवा
थवा ॥ शणजावादरीवापिफलकोषोद्भवातथा ॥ ११ ॥ वर्त्तिकादीपकृत्येषुसदापञ्चविधाःस्मृताः ॥ तैजसन्दारवञ्चौहंमार्त्तिक्यन्नारिके
लजम् ॥ १२ ॥ तृणध्वजोद्भवंवापिदीपपात्रम्प्रशस्यते ॥ दीपवृक्षाश्चकर्त्तव्यातैजसाद्यैस्तुभैरव ॥ १३ ॥ वृक्षेषुदीपोदातव्योनतुभूमौ
कदाचन ॥ सर्वैसहावसुमतीसहतेनत्विदन्द्रयम् ॥ १४ ॥ अकार्यपादघातञ्चदीपितापन्तथैवच ॥ तस्माद्यथातुपृथिवीतापन्नाप्नोति
वैतथा ॥ १५ ॥ दीपन्दद्यान्महादेव्यैअन्येभ्योपिचभैरव ॥ कुर्वन्तम्पृथिवीतापंयोदीपमुत्सृजेन्नरः ॥ १६ ॥ सताम्रतापंनरकम्प्राप्नो
त्येवशतंसमाः ॥ सुवृत्तवर्त्तिःसुस्नेहःपात्रमग्नःसुदर्शनः ॥ १७ ॥ सूच्छ्रायेवृक्षकोटौतुदीपन्दद्यात्प्रयत्नतः ॥ लभ्यतेयस्यतापस्तुदीपस्यच
तुरङ्गुलात् ॥ १८ ॥ नसदीपइतिख्यातोह्योघवह्निस्तुसश्रुतः ॥ नेत्राह्लादकरःस्वर्चिर्दूरतापविवर्जितः ॥ १९ ॥ सुशिखःशब्दरहितोनिर्दू
मोनातिह्रस्वकः ॥ दक्षिणावर्त्तवर्त्तिस्तुप्रदीपःश्रीविवृद्धये ॥ १२० ॥ दीपवृक्षस्थितेपात्रेशुद्धस्नेहप्रपूरिते ॥ दक्षिणावर्तिवर्त्यातुचारुदीप्तःप्रदी
पकः ॥ २१ ॥ उत्तमःप्रोच्यतेपुत्रसर्वतुष्टिप्रदायकः ॥ वृक्षेणवर्जितोदीपोमध्यमःपरिकीर्त्तितः ॥ २२ ॥ विहीनःपात्रतैलाभ्यामधमःपरि

कीर्त्तितः॥शाणंवादौरवंवस्त्रंजीर्णम्मलिनमेववा ॥ उपयुक्तञ्चनादद्याद्वर्त्तिकार्थन्तुसाधकः ॥ २३ ॥ उपादद्यान्नूतनमेवसततंश्रीविवृद्धये ॥
कोपजंरोमजंवस्त्रंवर्त्तिकार्थन्नचाददेत् ॥ २४ ॥ नमिश्रीकृत्यदद्यात्तुदीपेस्नेहघृतादिकान् ॥ कृत्वामिश्रीकृतंस्नेहंतामिस्रन्नरकंव्रजेत् ॥ २५ ॥
वसामज्जास्थिनिर्यासैःस्नेहैःप्राण्यंगसम्भवैः ॥ प्रदीपन्नैवकुर्यात्तुकृत्वापंकेऽवसीदति ॥ २६ ॥ अस्थिपात्रेथवापच्येद्दुर्गन्धास्थिपवा
सिनि ॥ नैवदीपःप्रदातव्योविबुधःश्रीविवृद्धये ॥ २७ ॥ नैवनिर्वापयेद्दीपंकदाचिदपियत्नतः ॥ सततंलक्षणोपेतन्देवार्थमुपकल्पितम् ॥
॥ २८ ॥ नहरेद्ज्ञानतोदीपन्तथालोभादिनानरः ॥ दीपहर्त्ताभवेदन्धःकाणोनिर्वापकोभवेत् ॥ २९ ॥ उद्दीप्तदीप्तप्रतिमःकाष्ठकाण्ड
समुद्भवः ॥ बिल्वेध्मोद्भवमेवाथदीपालाभेनिवेदयेत् ॥ १३० ॥ उल्मुकन्नैवदीपार्थेकदाचिदपिचोत्सृजेत् ॥ प्रसन्नार्थन्तुतन्दद्यादुपचाराद्ब
हिष्कृतम् ॥ ३१ ॥ एवंवांकथितोदीपोधूपश्चशृणुतंसुतौ ॥ नासाक्षिरन्ध्रसुखदःसुगन्धोतिमनोहरः ॥ ३२ ॥ दह्यमानस्यकाष्ठस्यप्रयत
स्येतरस्यच ॥ परागस्याथवाधूमोनिस्तापोयस्यजायते ॥ ३३ ॥ सधूपइतिविज्ञेयोदेवानान्तुष्टिदायकः ॥ राशीकृतैर्न्नचैकत्रतैर्द्रव्यैः परि
पूजयेत् ॥ ३४ ॥ ओघाग्निवत्तत्तांकृत्वानतत्फलमवाप्नुयात् ॥ श्रीचन्दनञ्चसरलःशालःकृष्णागुरुस्तथा ॥ ३५ ॥ उदयःसुरथस्कन्दोरक्त
विद्रुमएवच ॥ पीतशालःपरिमलोविमर्दीकाशलस्तथा ॥ ३६ ॥ नमेरुर्देवदारुश्चबिल्वसारोथखादिरः ॥ सन्तानःपारिजातश्चहरिचन्दन
वल्लभौ ॥ ३७ ॥ वृक्षेषुधूपाःसर्वेपाम्प्रीतिदाःपरिकीर्तिताः ॥ अरालःसहसूत्रेणश्रीवासःपट्टवासकः ॥ ३८ ॥ कर्पूरःश्रीकरश्चैवपरागःश्रीहरा
मलौ ॥ सर्वौषधीवज्ञातीवबराहश्चूर्णउत्कलः॥३९॥जातीकोपस्यचूर्णश्चगन्धःकस्तूरिकातथा ॥क्षोदेवृत्तेचगदिताधूपाएतेउदाहृताः ॥१४०॥

यक्षधूपोवृक्षधूपःश्रीपिष्टोऽगुरुझर्झरः ॥ पत्रिवाहःपिण्डधूपःसुगोलःकण्ठएवच ॥ ४१ ॥ अन्योन्ययोगानिर्यासाधूपाएतेप्रकीर्तिताः ॥
एतैर्विधूपयेद्देवान्धूमिभिःकृष्णवर्त्मना ॥ ४२ ॥ येषान्धूपोद्भवैर्ग्राणैस्तुष्टिंगच्छन्तिजन्तवः ॥ निर्यासश्चपरागश्चकाष्ठंगन्धन्तथैवच ॥४३॥
कृत्रिमश्चेतिपञ्चैतेधूपाःप्रीतिकराःपराः ॥ नयक्षधूपंवितरेन्माधवायकदाचन ॥ ४४ ॥ नरक्तंविद्रुमंमह्यंसुरथंकाद्रिलन्तथा ॥ यक्षधूपः
पुत्रिवाहःपिण्डधूपःसुगोलकः ॥ ४५ ॥ कृष्णागुरुःसकर्पूरोमहामायाप्रियःस्मृतः ॥ वृक्कधूपेनवादेवीम्महामायाम्प्रपूजयेत् ॥४६॥ मेदोमज्जा
समायुक्तान्नधूपान्विनियोजयेत् ॥ परकीयाँस्तथाभ्रातॉस्तेपिकृत्याभिमर्द्दितान् ॥ ४७ ॥ पुष्पन्धूपञ्चगन्धञ्चउपचाराँस्तथापरान् ॥
ग्रात्वानिवेद्यदेवेभ्योनरोनरकमाप्नुयात् ॥ ४८ ॥ नभूमौवितरेद्धूपंनासनेनघटेतथा ॥ यथातथाधारगतङ्कृत्वातद्विनिवेदयेत् ॥
॥ ४९ ॥ रक्तविद्रुमशालौचसुरथःसूरलस्तथा ॥ सन्तानकोनमेरुश्चकालागुरुसमान्वितः ॥ १५० ॥ जातीकोषाक्षसंयुक्तोधूपः
कामेश्वरीप्रियः ॥ त्रिपुण्यायास्तथैवायम्मातृणामपिनित्यशः ॥ ५१ ॥ सर्वेषाम्पीठदेवानांरुद्रादीनाञ्चपुत्रक ॥ एषवांकथितोधू
पःशृणुतन्नेत्ररञ्जनम् ॥ ५२ ॥ येनतुष्यतिकामाख्यात्रिपुरावैष्णवीतथा ॥ सौवीरञ्जाम्बलन्तुत्थम्मयूरग्रीवकन्तथा ॥ ५३ ॥
दर्व्विकामेघनीलश्चअञ्जनानिभवन्तिषट् ॥ सवद्रूपश्चसौवीरंयाम्बलप्रस्तरन्तथा ॥ ५४ ॥ मयूरग्रीवकंरत्नम्मेघनीलस्तुतैजसम् ॥
घृष्टानिग्राह्यचैतानिशिलायान्तेजसेथवा ॥ ५५ ॥ प्रदद्यात्सर्व्वदेवेभ्योदेवीभ्यश्चापिपुत्रक ॥ घृततैलादियोगेनताम्रादौदीपव
ह्निना ॥ ५६ ॥ यदञ्जनञ्जायतेतुदर्विकापरिकीर्त्तिता ॥ सर्वाभावेतुतद्दद्याद्देवीभ्योदाहजाञ्जनम् ॥ ५७ ॥ महामायाजगद्धात्रीकामाख्यात्रि

पुरातथा ॥ आप्नुवन्तिमहातोषंपड्भिरेभिःसदाञ्जनैः ॥ ५८ ॥ विधवानाञ्जनंकुर्यान्महामायार्थमुत्तमम् ॥ नादत्तेत्वञ्जनन्देवीवैष्णवीविधवा
कृतम् ॥ ५९ ॥ नमृत्पात्रेयोजयेत्तुसाधकोनेत्ररञ्जनम् ॥ नपूजाफलमाप्नोतिमृत्पात्रविहिताञ्जनैः ॥ ६० ॥ चतुर्वर्गप्रदोधूपःकामदन्नेत्ररञ्ज
नम् ॥ तस्माद्द्वयमिदन्दद्याद्देवेभ्योभक्तितोनरः ॥ ६१ ॥ इतिवांगदितोधूपस्तथोक्तन्नेत्ररञ्जनम् ॥ नैवेद्यन्तुमहादेव्याःशृण्वैकाग्रमनाःपुनः ॥
॥ १६२॥ इतिश्रीकालिकापुराणेत्रिसप्ततितमोध्यायः ॥ ७३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ निवेदनीयंयद्द्रव्यंप्रशस्तम्प्रयतन्तथा ॥ तद्भ
क्ष्याद्यम्पञ्चविधंनैवेद्यमितिगद्यते ॥ १ ॥ भक्ष्यम्भोज्यञ्चलेह्यञ्चपेयञ्चोष्यञ्चपञ्चमम् ॥ सर्वत्रचैतन्नैवेद्यमाराध्येष्टेनिवेदयेत् ॥ २ ॥ तेषुप्रि
यतरन्देव्याःकथयेशृणुतंतुवाम् ॥ भक्ष्यादिपञ्चकैर्देवीदत्तैरेवाभितुष्यति ॥ ३ ॥ नादत्तेविधिवत्किञ्चिद्दत्तञ्चैतन्नविद्यते ॥ लांगलञ्चकपित्थञ्च
द्राक्षांक्रमुकमेवच ॥ ४ ॥ करकंबदरंकोलंकूष्माण्डम्पनसन्तथा ॥ बकुलञ्चमधूकञ्चरसालाम्रातकोद्भवम् ॥ ५ ॥ आक्षोडम्पिण्डखर्जूरं
करुणंश्रीफलन्तथा ॥ औदुम्बरञ्चपुन्नागम्माधवंकर्कटीफलम् ॥ ६ ॥ जाम्बवंपिण्डखर्ज्जूरम्बीजपूरञ्चजाम्भवम् ॥ हरीतकीमामलकंष
ड्विधंनागरंगकम् ॥ ७ ॥ देवकम्मधुकंशीतम्पटोलंक्षीरवृक्षजम् ॥ पाटलंशालकेकुम्भमग्निजंकदलीफलम् ॥ ८ ॥ तिन्दुकंकुसुमम्पीतं
कारविन्दंकरूपकम् ॥ गर्भावर्त्तञ्चतत्पुष्पंक्षीरस्राव्यमनंगजम् ॥ ९ ॥ कुमुदानाम्पंकजानाम्फलानिविविधानिच ॥ वन्यानांसकलैर्देवी
म्फलैःपुष्पैःप्रपूजयेत् ॥ १० ॥ ऋतेश्लेष्मातकंबिम्बशैलकंवैष्णवीन्तथा ॥ सर्वेषाम्फलजातीनाम्मध्येदेवीप्रियम्फलम् ॥ ११ ॥ लांग
लम्मातुलुंगञ्चकरमर्द्दरसालकम् ॥ एवम्फलांनिदेयानिकामाख्यायैचभैरव ॥ १२ ॥ त्रिपुरायैतथासम्यक्पीठदेवीभ्यएवच ॥ शृंगाटकंकशे

रुञ्चशालूकञ्चमृडालकम् ॥ १३ ॥ शृंगारकंकाञ्चनञ्चस्थूलंकन्दम्बकूलकम् ॥ एवमादीनिकन्दानिदेव्यैसर्वाणिचोत्सृजेत् ॥ १४ ॥ परमान्न
म्पिष्टकञ्चयावकङ्कशरन्तथा ॥ मोदकम्पृथुकादीनिकन्दपक्वानिचोत्सृजेत् ॥१५॥ हविःशाल्योदनन्दिव्यमाज्ययुक्तंसशर्करम् ॥ निवेदयेन्म
हादेव्यैसर्वाणिव्यञ्जनानिच ॥१६॥ क्षीरादीन्यथगव्यानिमाहिष्याणिचसर्वशः॥अजाविकमृगाणाञ्चक्षीरादीनिनिवेदयेत्॥१७॥मध्वादीनिच
सर्वाणिगुडधानाःसितान्तथा ॥ अन्नानिचैवपानानिमांसानिविनिवेदयेत् ॥ १८ ॥ सर्वसुरभिगन्धाढ्यंव्यञ्जनंसुमनोहरम् ॥ शाकमां
सादिसम्भूतम्महादेव्यैनिवेदयेत् ॥ १९ ॥ आमिषम्परमान्नञ्चदधिसर्पिःसशर्करम् ॥ महादेव्यैनिवेद्याथवाजिमेधफलंलभेत् ॥ २० ॥ सिता
सम्मिश्रितान्दत्वासुरांमधुसमन्विताम् ॥ देवीलोकेचिरंस्थित्वाराजाक्षितितलेभवेत् ॥ २१ ॥ लांगलंक्रमुकन्दत्वारुचकंकरमर्द्दकम् ॥ सौभा
ग्यमतुलम्प्राप्यदेवीलोकेमहीयते ॥ २२ ॥ माषान्मुद्गान्मसूरांश्चतिलान्भंगाँस्तथैवच ॥ यवादीन्यथसर्वाणियथायोग्यन्निवेदयेत् ॥ २३ ॥
यथायथाभवेद्भक्ष्यंयथाद्रव्यन्तथातथा ॥ संस्कृत्यवेशवाराद्यैर्महादेव्यैनिवेदयेत् ॥ २४ ॥ महावीरोमुनिर्वापिब्राह्मणश्चेतरोथवा ॥ यद्यद्भक्ष्यं
स्वमर्थन्तुप्रकल्प्यंस्याद्यथायथा ॥ २५ ॥ तथातथामहादेव्यैभक्तियुक्तोनिवेदयेत् ॥ संस्कार्याण्यथसंस्कृत्ययथासंस्कारकम्भवेत् ॥ २६ ॥
संस्कार्यश्चयथातस्यास्तत्तद्दद्यात्तथातथा ॥ यत्पूतिगन्धसंयुक्तन्दग्धम्भोज्यविवर्जितम् ॥ २७ ॥ तदुक्तमपिनोदद्यान्महादेव्यैकदाचन ॥
ताम्बूलंगन्धसंयुक्तंकर्पूराद्यधिवासितम् ॥ २८ ॥ सञ्चूर्णैर्जलजानाञ्चसंस्कृतंविनिवेदयेत् ॥ बलिदानेषुविहितायएवमृगपक्षिणः ॥ २९ ॥
तेषांमांसानिमत्स्यानाम्मांसानिचनिवेदयेत् ॥ खड्गवार्द्ध्रीणसच्छागमांसैर्मैश्रीकृतैःकृतम् ॥ ३० ॥ व्यञ्जनंस्वादुगन्धाढ्यंवासितंसुमनोह

रम् ॥ सकृदत्त्वामहादेव्यैसार्वभौमोनृपोभवेत् ॥ ३१ ॥ मूलकैरेणमांसेनलोहपात्रेसुसंस्कृतम् ॥ व्यञ्जनंगन्धिनन्दत्वादेवीलोकमवाप्नुयात् ॥
॥ ३२ ॥ खर्ज्जूरंपिण्डखर्ज्जूरंयवचूर्णञ्चसाज्यकम् ॥ वैष्णव्यैविनिवेद्यैवराजसूयफलंलभेत् ॥ ३३ ॥ कृशरान्नप्रदानेनसौभाग्यमतुलम्भ
वेत् ॥ दत्वैवनारिकेलाम्बुवह्निष्टोमफलंलभेत् ॥ ३४ ॥ जाम्बवंलवलीधात्रीश्रीफलानिनिवेद्यच ॥ वह्निष्टोमफलंलब्ध्वादेवीलोकमवाप्नु
यात् ॥ ३५ ॥ द्राक्षांसितासमायुक्तान्नागरंगकसंयुताम् ॥ विनिवेद्यमहादेव्यैलक्ष्मीवान्रूपवान्भवेत् ॥ ३६ ॥ धान्यञ्चपृथुकन्देव्यैदत्त्वाश्रि
यमवाप्नुयात् ॥ इक्षुदण्डम्मुद्गमण्डंनवनीतन्निवेद्यच ॥ ३७ ॥ सौभाग्यमुत्तमम्प्राप्यदेवीलोकेमहीयते ॥ नवनीतसमायुक्तन्तिलन्देव्यैनि
वेद्यच ॥ ३८ ॥ इहकामानवाप्यैवमृतोमोक्षमवाप्नुयात् ॥ अभक्ष्यवर्जंसर्वान्नंव्यञ्जनेनसमन्वितम् ॥ ३९ ॥ भोज्यवत्परिकल्प्याथमहादेव्यै
निवेदयेत् ॥ रत्नतोयसमायुक्तंसलिलन्नारिकेलजम् ॥ ४० ॥ क्षीराज्यमधुभिर्मिश्रंसितादधिसमन्वितम् ॥ यस्तैजसेनपात्रेणपेयन्देव्यै
निवेदयेत् ॥ ४१ ॥ भक्तिप्रवणचित्तेनतस्यपुण्यफलंशृणु ॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ ४२ ॥ स्थित्वादेवीपुरेधीरः
सार्वभौमोभवेत्क्षितौ ॥ ततःपरन्तुकैवल्यमाप्नोतिचयथेच्छया ॥ ४३ ॥ कलायञ्चसनीवारंकथितन्दधिसंयुतम् ॥ महादेव्यैनिवेद्यैवकामामिष्ट
मवाप्नुयात् ॥ ४४ ॥ मरीचम्पिप्पलीकोलञ्जीरकंतन्तुभन्तथा ॥ संस्कारेचसमक्षेचमहादेव्यैनिवेदयेत् ॥ ४५ ॥ तिंतिडींखण्डसंयुक्ताम्भ
क्तियुक्तोनिवेद्यच ॥ ज्योतिष्टोमफलंलब्ध्वादेवीलोकमवाप्नुयात् ॥ ४६ ॥ राजमाषम्मसूरञ्चपालकञ्चाथपोतिकाम् ॥ कालशाकंकलापञ्चत्रा
ह्मीमूलकमेवच ॥ ४७ ॥ वास्तूकञ्चकलम्बीञ्चकञ्चुकंहिलमोचिकाम् ॥ चक्रंविद्रुमपत्रञ्चतथैवचपुनर्नवाम् ॥ ४८ ॥ शाकानेतान्महादे

व्ययोजयेद्भक्तिसंयुतः ॥ सोऽतुलांश्रियमाप्नोतिममलोकेमहीयते ॥ ४९ ॥ श्रद्धापरीष्टिसंस्कारभक्तिद्रव्याभिसम्भ्रमम् ॥ रागाधिक्यात्फला
धिक्यंहीनाद्धैहीनतांव्रजेत् ॥ ५० ॥ मन्त्रकालविरुद्धानिनैवेद्यानिकदाचन ॥ देवेभ्योनोपयुञ्जीतगुरुताविहतानिच ॥ ५१ ॥ राजतेवाथसौव
र्णेताम्रेवाप्रस्तरेपिच ॥ पद्मपत्रेथवादद्यान्नैवेद्यम्मत्प्रियाप्रियम्॥५२॥ तैजसेषुचपात्रेषुसौवर्णन्ताम्रमेववा ॥ प्राशनार्थमुपादद्यादर्घ्यपात्रार्थमे
ववा॥५३॥ यज्ञदारुमयंवापिपात्रंमध्यममिष्यते॥सर्वालाभेतुमाहेयंस्वहस्तघटितंयदि ॥५४॥ एतद्वाङ्मथितंपुत्रौनैवेद्यंवैष्णवीप्रियम् ॥ कामा
ख्यायास्तथादेव्यास्त्रिपुरायाविशेषतः ॥ प्रदक्षिणनमस्कारौसाम्प्रतंशृणुतंयुवाम् ॥५५॥ इतिश्रीकालिकापुराणेचतुःसप्ततितमाध्यायः॥७४॥
॥ श्रीभगवानुवाच ॥ ॥ प्रसार्यदक्षिणंहस्तंस्वयंनम्रशिराःपुनः ॥ दक्षिणन्दर्शयन्पार्श्वम्मनसापिचदक्षिणः ॥१॥ सकृत्त्रिर्वावेष्टयेयुर्देव्याः
प्रीतिःप्रजायते ॥ सचप्रदक्षिणोज्ञेयःसर्वदेवौघतुष्टिदः ॥ २ ॥ अष्टोत्तरशतंयस्तुदेव्याःकुर्य्यात्प्रदक्षिणम् ॥ ससर्वकाममासाद्यपश्चान्मो
क्षमवाप्नुयात् ॥ ३ ॥ मनसापिचयोदद्यादेव्यैभक्त्याप्रदक्षिणम् ॥ प्रदक्षिणाद्यमगृहेनरकाणिनपश्यति ॥ ४ ॥ कायिकोवाग्भवश्चैवमान
सस्त्रिविधःस्मृतः ॥ नमस्कारःश्रुतस्तज्ज्ञैरुत्तमाधममध्यमः ॥ ५ ॥ प्रसार्य्यपादौहस्तौचपतित्वादण्डवत्क्षितौ ॥ जानुभ्यामवनिंगत्वाशिर
सास्पृश्यमेदिनीम् ॥ ६ ॥ क्रियतेयोनमस्कारउत्तमःकायिकस्तुसः ॥ जानुभ्यांसक्षितिंस्पृष्ट्वाशिरसास्पृश्यमेदिनीम् ॥ ७ ॥ क्रियतेयोनम
स्कारोमध्यमःकायिकःस्मृतः ॥ पुटीकृत्यकरौशीर्षेदीयतेयद्यथातथा ॥ ८ ॥ अस्पृष्ट्वाजानुशीर्षाभ्यांक्षितिंसोऽधमउच्यते ॥ यास्वयङ्गुष्ठप
द्याभ्याङ्घटिताभ्यान्नमस्कृतिः ॥ ९ ॥ क्रियतेभक्तियुक्तेनवाचिकस्तूत्तमस्तुसः ॥ पौराणिकैर्वैदिकैर्वामन्त्रैर्वाक्रियतेनतिः ॥ १० ॥ समध्य

मोनमस्कारोभवेद्वाचनिकःसदा॥ यत्तुमानुष्यवाक्येननमनंक्रियतेसदा॥ सवाचिकोऽधमोज्ञेयोनमस्कारेषुपुत्रकौ ॥११॥ इष्टमध्यानिष्टगतै
र्म्मनोभिस्त्रिविधम्पुनः ॥ नमनम्मानसम्प्रोक्तमुत्तमाधममध्यमम् ॥ त्रिविधेचनमस्कारेकायिकश्चोत्तमःस्मृतः ॥१२॥ कायिकैस्तुनमस्कारै
र्देवास्तुष्यन्तिनित्यशः ॥ अयमेवनमस्कारोदण्डादिप्रतिनामभिः ॥१३॥ प्रणामइतिविज्ञेयःसपूर्वम्प्रतिपादितः ॥ मनसापिचयोदद्याद्देव्यैभ
क्त्याप्रदक्षिणम् ॥१४॥ सदक्षिणेयमगृहेनरकाणिनपश्यति ॥ देवमानुषगन्धर्वायक्षराक्षसपन्नगाः ॥१५॥ नमस्कारेणतुष्यन्तिमहात्मानःसम
न्ततः॥नमस्कारेणलभतेचतुर्वर्गम्महामतिः॥१६॥सर्वत्रसर्वसिद्ध्यर्थंनतिरेवप्रशस्यते॥नत्याविजयतेलोकान्नत्यायुरपिवर्द्धते॥१७॥ नमस्कारे
णदीर्घायुरच्छिन्नालभतेप्रजाः ॥ नमस्कुरुमहादेव्यैप्रदक्षिणमथोकुरु ॥ १८ ॥ नैवेद्यन्देहिनितरामितियोभापतेमुहुः ॥ सोपिकामानवाप्येह
ममलोकेप्रमोदते ॥ १९ ॥ विदधातिचनैवेद्यम्महादेव्यैसुभक्तिमान् ॥ दातुम्प्रतिनरःसोपिदेवीलोकमवाप्नुयात् ॥ २० ॥ इतिवांकथि
ताःसम्यगुपचारास्तुषोडश ॥ किमन्यद्रुचितम्वान्तत्कथयिष्यामिपृच्छतोः ॥ २१ ॥ इतिकालिकापुराणेषोडशोपचारनिर्णयेपञ्चसप्ततित
मोध्यायः ॥ ७५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कामाख्यायाश्चमाहात्म्यंशृणुतश्चवदामिवाम् ॥ सांगन्तत्सरहस्यञ्चशृणुवेतालभैरव ॥ १ ॥
एकदागरुडेनाशुविष्णुर्विष्णुपरायणौ ॥ गच्छन्देवीन्तुकामाख्यान्नीलस्थामाससादह ॥ २ ॥ आसाद्यतंगिरिश्रेष्ठमवज्ञायसकेशवः ॥ गच्छ
गच्छेतिगरुडश्चोदयामासतंगतौ ॥ ३ ॥ तञ्चदेवीमहामायाकामाख्याजगताम्प्रसूः ॥ गरुडेनसमंकृष्णंस्तम्भयामासरोदसी ॥ ४ ॥ सतुगन्तु
म्महामायामाययापरिमोहितः ॥ नगन्तुमथवागन्तुमशकद्धद्धवत्स्थितः ॥ ५ ॥ अशक्तंगरुडंदृष्ट्वागमनेगरुडध्वजः ॥ क्रुद्धस्तम्पर्वतश्रेष्ठमु

त्सरायितुमुद्यतः ॥ ६ ॥ ततःकराभ्यान्तंशैलंक्रोडीकृत्यजगत्पतिः ॥ अभूत्क्षमश्चालयितुंमनागपिनकेशवः ॥ ७ ॥ तञ्चिचालयिषुंशैलङ्का
माख्याक्रोधतत्परा ॥ सिद्धसूत्रेणवैकुण्ठम्बबन्धगरुडेनहि ॥ ८ ॥ तम्बद्धासिद्धसूत्रेणग्राहोग्रेलवणार्णवे ॥ चिक्षेपहेलयादेवीसंक्षेपात्प्रापतत्त
लम् ॥ ९ ॥ तंसागरतलम्प्राप्तम्पुनरेवस्वमायया ॥ यन्त्रयित्वासमाक्रम्यजग्राहाब्धितलस्थितम् ॥ १० ॥ सप्रयत्नेनमहतानोत्प्लुतिङ्कर्तुमि
ष्टवान् ॥ महायत्नम्प्रकुर्व्वाणःपुनरुन्मज्जनेहरिः ॥ ११ ॥ तस्यासारम्प्रसारञ्चकामाख्याप्रत्यपेधयत् ॥ ज्ञानोद्गमनमप्यस्यसादेवीप्रत्यपेधय
त् ॥ १२ ॥ ततःप्रज्ञानरहितःप्रसारासारवर्ज्जितः ॥ गरुडेनसमन्तोयंतलेशीर्णमभूच्चिरम् ॥१३॥ मार्गमाणस्तुतंस्रष्टासागरान्तरसंस्थितम् ॥
हरिमासादयामासविशीर्णम्प्राकृतंयथा ॥ १४ ॥ तमासाद्यसताक्ष्यन्तुस्रष्टालोकपितामहः ॥ हस्ताभ्यान्तंसमादायवोत्प्लावयितुमिष्टवान् ॥
॥ १५ ॥ तमुत्प्लावयितुंशक्तोनाभूल्लोकपितामहः ॥ स्वयञ्चदेवीमायाभिर्बद्धःसन्विस्मयन्स्थितः ॥ १६ ॥ मार्गमाणास्तुतौसर्वेदेवाःशक्रपुरो
गमाः ॥ चिरेणचाऽथकालेनसमासेदुर्ज्जलान्तरे ॥१७॥ तावासाद्यततःसर्वेसुराःशक्रपुरोगमाः ॥ समुत्प्लावयितुंयत्नञ्चक्रुर्न्नाशक्नुवंश्चते ॥१८॥
ततःसर्वेपितेदवामोहितामाययाभृशम् ॥ विधिविष्णूस्थितौयद्वत्तद्वत्तेतत्रसंस्थिताः ॥ १९ ॥ मार्गमाणोथतान्त्सर्वान्देवान्देवगुरुस्तदा ॥ बृह
स्पतिर्म्मोहिमवत्यासदत्सानुसंस्थितम् ॥२०॥ समासाद्यसदेवानांवृत्तान्तन्देवपूजितः ॥ पृष्टवान्त्सादरंसम्यक्स्तुत्वानत्वायथाविधि ॥२१॥
गुरुरुवाच ॥ महादेवजगद्धामजगत्प्रशमकारण ॥ शक्रादीन्मार्गमाणोहन्देवाँस्त्वांसमुपस्थितः॥२२॥ब्रह्माविष्णुश्चनब्रह्मसदनेनापिनाकतः ॥
संस्थितौनापिकुत्रापिज्ञायेतेह्यन्यदायथा॥२३॥तमिमंसंशयन्देवछिन्धित्वन्देवदेवताः ॥ कुत्रतिष्ठन्तिकस्माद्वातथाभूत्वाह्यवस्थिताः ॥२४॥

अनुयास्यामितान्त्सर्वानुपदेशात्तवप्रभो॥तेषांस्थितिंत्वंकथययादितेवर्ततेदया ॥२५॥ तस्यतद्वचनंश्रुत्वातदुद्देशमहम्पुनः॥तत्सर्वमुक्तवान्कर्म
यथाबद्धाश्चमायया ॥ २६ ॥ अवज्ञातामहादेवीमहामायाजगन्मयी ॥ तेनतन्मायया बद्धोविष्णुस्तिष्ठतिसागरे ॥ २७ ॥ तम्मार्गमाणास्त्रि
दशाब्रह्माद्या माययापुनः ॥ निबद्धानिकटेतस्यस्थिताश्चात्यर्थसंयताः ॥ २८ ॥ ताँस्तुमार्गयितुंयामियदिहत्वम्मयाविना ॥ बद्धस्तथैव
त्वञ्चापिनायातुंभविताप्रभुः ॥ २९ ॥ तस्माद्गच्छाम्यहन्तत्रयत्रास्तेगरुडध्वजः ॥ ब्रह्मेन्द्राद्यास्तथागुप्तान्मोचयिष्येचतान्क्रमात् ॥ ३० ॥
इत्युक्त्वागुरुणासार्द्धंसम्भूयसवृषध्वजः ॥ देवौघायत्रतिष्ठन्तिगतस्तत्रमहेश्वरः ॥ ३१ ॥ तत्रगत्वामहादेवोविष्णुमाभाष्यवेधसम् ॥ सर्वा
स्तान्परिपप्रच्छकिमर्थंसंस्थितास्त्विह ॥ ३२ ॥ गतागतविहीनाश्चजडवज्ज्ञानवर्जिताः ॥ किमर्थमभवन्देवास्तन्मेभाषन्तुसम्प्रति ॥३३॥
तस्यतद्वचनंश्रुत्वामहादेवस्यकेशवः ॥ शनैर्भर्गमुवाचेदम्ब्रह्मादीनाम्पुरस्तदा ॥ ३४ ॥ ॥ श्रीभगवानुवाच ॥ नीलकटस्यशिखरादूर्द्ध्व
भागेनगच्छता ॥ वियतागरुडस्थेनमयानीलोमहागिरिः ॥ ३५ ॥ धृतःकरेणचोद्धर्त्तुंगरुडागतिवारणे ॥ तत्रमांसामहामायाकामाख्या
कामरूपिणी ॥ ३६ ॥ योगनिद्रास्वयन्धृत्वाचिक्षेपाम्बुधिपुष्करे ॥ ततोहन्तलमासाद्यतोयराशेःसवाहनः ॥ ३७ ॥ पतितोनिवसाम्यत्र
चिरमन्धकसूदन ॥ निवसामिचिरञ्चाहमत्रसागरतोयके ॥ ३८ ॥ नाद्यापिसामहामायानुदतेमांमहेश्वर ॥ मदर्थमागतादेवाब्रह्मेन्द्राद्याःसम
न्ततः ॥ ३९ ॥ तेपिबद्धामहादेव्यामायापाशेनवैहठात् ॥ तस्मान्नोह्यनुगृह्णीष्वनयेदानींशिवालये ॥ ४० ॥ ताञ्चप्रसादयिष्यामः सम्य
ग्वन्धविहिंसया ॥ हरेस्तद्वचनंश्रुत्वाह्यहञ्चकरुणायुतः ॥ ४१ ॥ उवाचपरमप्रीत्याविधिविष्णूप्रतिस्वयम् ॥ ईश्वर्याःकामपूर्वायाः कवचं

सुमनोहरम् ॥ ४२ ॥ बध्वाशरीरेचाप्लाव्यपश्चाद्गच्छन्तुताम्प्रति ॥ अहन्निबद्धकवचस्तेनाहम्मायया त्विह ॥ ४३ ॥ नवद्धोममसंसर्गात्तथाचे
हबृहस्पतिः ॥ तस्माद्यूयन्तुकवचंशृणुध्वम्वदनान्मम ॥ ४४ ॥ येनसौख्यात्समुत्थुत्यद्रक्ष्यामःपरमेश्वरीम् ॥ ॐकामाख्याकवचस्यमुनि
र्बृहस्पतिःस्मृतः ॥ ४५ ॥ देवीकामेश्वरीतस्यअनुष्टुप्छन्दइष्यते ॥ विनियोगः सर्वसिद्धौतश्चशृण्वन्तुदेवताः ॥ ४६ ॥ शिवः कामेश्वरीदेवी
कामाख्याचक्षुषीमम ॥ शारदावर्णयुगलन्त्रिपुरावदनन्तथा ॥ ४७ ॥ कण्ठेपातुमहामायाहृदिकामेश्वरीपुनः ॥ कामाख्याजठरेपातुशारदा
मान्तुनाभितः ॥ ४८ ॥ त्रिपुरापार्श्वयोःपातुमहामायातुमेहने ॥ गुदेकामेश्वरीपातुकामाख्योरुद्वयेतुमाम् ॥ ४९ ॥ जानुनोःशारदापातुत्रि
पुरापातुजंघयोः ॥ महामायापादयुगेनित्यंरक्षतुकामदा ॥ ५० ॥ केशेकोटेश्वरीपातुनासायांपातुदीर्घिका ॥ भैरवीदन्तसंघातेमातंग्यवतुचां
गयोः ॥५१॥ वाह्वोर्मांललितापातुपाण्योस्तुवनवासिनी ॥ विन्ध्यवासिन्यंगुलीषुश्रीकामानखकोटिषु ॥ ५२ ॥ रोमकूपेषुसर्वेषुगुप्तकाम
सदावतु॥पादांगुलीपार्ष्णिभागेपातुमाम्भुवनेश्वरी ॥५३॥ जिह्वायाम्पातुमांसेतुःकःकण्ठाभ्यन्तरेवतु॥नःपातुचान्तरेवक्षःइःपातुजठरान्तरे ॥
॥५४॥सामीन्दुःपातुमांवस्ताविन्दुविन्द्वन्तरेवतु ॥ ककारस्त्वचिमाम्पातुरकारोस्थिषुसर्वदा ॥५५॥ लकारः सर्वनाडीषुईकारःसर्वसन्धिषु ॥
चन्द्रःस्नायुषुमाम्पातुविन्दुर्मज्जासुसन्ततम् ॥ ५६ ॥ पूर्वस्यांदिशिचाग्नेय्यांदक्षिणेनैर्ऋतेतथा ॥ वारुणेचैववायव्यांकौबेरेहरमन्दिरे ॥५७॥
अकाराद्यास्तुवैष्णव्याअष्टौवर्णास्तुमन्त्रगाः ॥ पान्तुतिष्ठन्तुसततंसमुद्भवविवृद्धये ॥ ५८ ॥ ऊर्ध्वाधःपातुसततंमांतुसेतुद्वयंसदा ॥
नवाक्षराणिमन्त्रेषुशारदामन्त्रगोचरे ॥ ५९ ॥ नवस्वरन्तुमान्नित्यंनासादिषुसमन्ततः ॥ वातपित्तकफेभ्यस्तुत्रिपुरायास्तुत्र्यक्षरम् ॥ ६० ॥

नित्यंरक्षतुभूतेभ्यःपिशाचेभ्यस्तथैवच ॥ तत्सेतूसततम्पातांक्रव्याद्भ्योमान्निवारकौ ॥ ६१ ॥ नमः कामेश्वरींदेवीम्महामायांजगन्मयीम् ॥
याभूत्वाप्रकृतिर्नित्यंतनोतिजगदाद्यताम् ॥ ६२ ॥ कामाख्यामक्षमालाभयवरदकरांसिद्धसूत्रैकहस्तांश्वेतपीतोपरिस्थांमाणिकनकयुतांकुंकु
मांपीतवर्णाम् ॥ ज्ञानध्यानप्रतिष्ठामतिशयविनयांब्रह्मशक्रादिवन्द्यामग्रौबिन्द्वन्तमन्त्रप्रियतमविषयान्नौमिसिद्ध्यैरतिस्थाम् ॥ ६३ ॥
मध्येमध्यस्यभागेसततविनमिताभावहावावलीयालीलालोकस्यकोष्ठेसकलगुणयुताव्यक्तरूपैकनम्रा ॥ विद्याविद्यैकशांताशमनशमकरी
क्षेमकर्त्रीवरास्यानित्यम्पातात्पवित्रप्रणववरकराकामपूर्वेश्वरीनः ॥ ६४ ॥ इतिहरकवचन्तनुस्थितंशमयतिवैशमनन्तथायदि ॥ इहगृहाणय
तस्वविमोक्षणेसहितएषविधिः सहचामरैः ॥ ६५ ॥ इतीदङ्कवचंयस्तुकामाख्यायाःपठेद्बुधः ॥ सकृत्तन्तुमहादेवीत्वनुव्रजातिनित्यदा ॥
॥ ६६ ॥ नाधिव्याधिभयन्तस्यनक्रव्याद्भ्योभयन्तथा ॥ नाग्नितोनापितोयेभ्योनरिपुभ्योनराजतः ॥ ६७ ॥ दीर्घायुर्बहुभोगीचपुत्रपौत्र
समन्वितः ॥ आवर्त्तयञ्छतन्देवींमन्दिरेमोदतेपरे ॥ ६८ ॥ यथातथाभवेद्बद्धःसंग्रामेन्यत्रवाबुधः ॥ तत्क्षणादेवमुक्तःस्यात्स्मरणात्कवच
स्यतु ॥ ६९ ॥ ॥ ईश्वरउवाच ॥ इतिश्रुत्वातुकवचंहरिर्ब्रह्मासुरास्तथा ॥ शक्रोऽपिकवचंन्यासंदेहेचक्रुःपृथक्पृथक् ॥ ७० ॥ तेतुविन्य
स्तकवचामहामायाप्रभावतः ॥ उत्तुत्यसागरस्याम्भआसेदुःक्षितिमञ्जसा ॥ ७१ ॥ आसाद्यपृथिवींसर्वेब्रह्मविष्ण्वादयःसुराः ॥ नीलकूटं
समासाद्यकामाख्यान्द्रष्टुमागताः ॥ ७२ ॥ दृष्ट्वाकामेश्वरींदेवींकेशवस्ताञ्जगन्मयीम् ॥ इदमाहस्वयंज्ञात्वाप्रभावन्तत्प्रतिष्ठितम् ॥ ७३ ॥
त्वमेवप्रकृतिर्देवीत्वमेवपृथिवीजलम् ॥ त्वमेवजगताम्मातात्वमेवचजगन्मयी ॥ ७४ ॥ त्वंकर्त्रीसर्वजगताम्विद्यात्वम्मुक्तिदायिनी ॥

परापरात्मिकादेवीस्थूलसूक्ष्मात्मिकातथा ॥ ७५ ॥ प्रसीदत्वंमहादेविप्रसन्नायांशुभेत्वयि ॥ देवाःसर्वेप्रसीदन्तिचतुर्वर्गप्रदेऽनघे
॥ ७६ ॥ इतिश्रुत्वावचस्तस्यकेशवस्यमहात्मनः ॥ प्रत्यक्षरूपाकामाख्याहरिमाभाष्यचाब्रवीत् ॥ ७७ ॥ ॥ देव्युवाच ॥ ॥ केश
वब्रह्मणासार्द्धंसर्वैर्देवैस्तथागणैः ॥ मद्योनिसलिलेष्वद्यस्नानम्पानंकुरुद्रुतम् ॥ ७८ ॥ ततस्त्वन्निरहंकारःपरवीर्यसमन्वितः ॥ आरुह्य
गरुडंयाहित्रिदिवंसहवेधसा ॥ ७९ ॥ एवमुक्तोमहादेव्याकेशवःसहवेधसा ॥ योनिमण्डलतोयेषुस्नानम्पानञ्चकारह ॥ ८० ॥
कृतप्लावास्ततोदेवाःकृतस्नानश्चकेशवः ॥ गतादेव्याश्चसम्मत्यात्रिदिवम्प्रतिहर्षिताः ॥ ८१ ॥ गच्छन्तस्तेदेवगणाःसहिताःकेशवे
नच ॥ ब्रह्मणाचतदाद्राक्षुःकामाख्यान्तांवियद्गताम् ॥ ८२ ॥ नीलकूटसहस्राणियोनिभिःसहसंगतः ॥ ऊर्ध्वाधोभागयोगेनददृशुः
संस्थितानिच ॥ ८३ ॥ तानिप्रत्येकतोदेवाआरुह्यारुह्यतत्क्षणात् ॥ पपुःसस्नुःपूर्ववत्तेप्रीतिमापुस्तथातुलाम् ॥ ८४ ॥ निरा
मयास्तथाजग्मुर्विस्मयाक्षिप्तचेतनाः ॥ स्तुवन्तःप्रस्तुवन्तश्चकामाख्यायोनिमण्डलम् ॥ ८५ ॥ ततोदेवगुरुन्नत्वामांस्तुत्वाचभयात्पुनः ॥
विसृष्टास्त्रिदिवंयातोहर्षोत्फुल्लविलोचनः ॥ ८६ ॥ माहात्म्यमीदृशन्देव्याःकामाख्यायास्तुभैरव ॥ ८७ ॥ कवचञ्चेदृशम्प्रोक्तन्तत्त्वमासाद्य
पुत्रक ॥ यथेष्टविनियोगेनतामासाद्यसुखीभव ॥ ८८ ॥ कामाख्यायाश्चमाहात्म्यंकिमन्यत्कथयामिते ॥ यस्यायोनिशिलायोगाल्लोहा
द्यायान्तिस्वर्णताम् ॥ ८९ ॥ यद्योनिमण्डलेस्नात्वासकृत्पीत्वाचमानवः ॥ नेहोत्पत्तिमवाप्नोतिपरन्निर्वाणमाप्नुयात् ॥ ९० ॥ ॥ इति
कालिकापुराणेकामाख्याकवचमाहात्म्यवर्णनन्नामषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ ७ ॥ ॥ भगवानुवाच ॥ ॥ मातृकान्यासमधु

नाशृणुवेतालभैरव ॥ येनदेवत्वमायातिनरोऽपिविहितेनवै ॥ १ ॥ वाग्ब्रह्माणीमुखादेव्योमातृकाःपरिकीर्तिताः ॥ तासाम्मन्त्राणिसर्वाणि व्यञ्जनानिस्वरास्तथा ॥ २ ॥ चन्द्रबिन्दुप्रयुक्तानिसर्वकामप्रदानिच ॥ ऋषिस्तुमातृमन्त्राणाम्ब्रह्मैवपरिकीर्तितः ॥ ३ ॥ प्रोक्तश्छन्दश्चगायत्रीदेवताचसरस्वती ॥ शरीरशुद्धिमुख्येतुसर्वकामार्थसाधने ॥ ४ ॥ विनियोगःसमद्दिष्टोमन्त्राणांन्यूनपूरणे ॥ अकारेणसमंकादिर्वर्गोयःप्रथमःस्मृतः ॥ ५ ॥ तैश्चन्द्रबिन्दुसंयुक्तैस्तत्रस्थैरक्षरैर्बहिः ॥ आकारश्चतथोच्चायअंगुष्ठाभ्यान्नमस्तथा ॥ ६ ॥ प्रथमम्मातृकामन्त्रमंगुष्ठद्वयतोन्यसेत् ॥ परेवर्गाःस्वरैःसार्द्धंयेवान्येन्यासकर्म्मणि ॥ ७ ॥ तेसर्व्वेचन्द्रबिन्दुभ्यांयुक्ताःकार्य्यास्तुसर्वतः ॥ ह्रस्वेकारश्चवर्गेणदीर्घोकारान्तकेनतु ॥ ८ ॥ तर्जन्योर्विन्यसेत्सम्यक्स्वाहान्तेनतुपूर्ववत् ॥ ह्रस्वोकारष्टवर्गेणदीर्घोकारान्तकेनतु ॥ ९ ॥ मध्यमायुगलेसम्यग्वषडन्तेनविन्यसेत् ॥ एकारादिचवर्गन्तुऐकारान्तेनचैवहुम् ॥ १० ॥ न्यसेदनामिकायुग्मेनियतन्तत्रभैरव ॥ ओंकारादिपवर्गन्तुओंकारान्तमशेषतः ॥ ११ ॥ वौषडन्तकनिष्ठायांविन्यसेत्कार्य्यसिद्धये ॥ अंकारादियकारादिवर्गेणक्षान्तकेनतु ॥ १२ ॥ अइत्यन्तेनतलयोर्विन्यसेत्पाणिपृष्ठयोः॥वषट्कारंशेषभागेअस्त्रन्यासेनियोजयेत् ॥१३॥ हृदयादिषडंगेषुपूर्ववत्क्रमतोन्यसेत् ॥ अंगुष्ठाद्युक्तवर्गैस्तुक्रमात्षड्भिस्तथाविधैः ॥१४॥ पुनस्तथापादजानुसक्थिगुह्येषुपार्श्वयोः ॥ बस्तौचविन्यसेन्मन्त्रान्क्रमात्पूर्ववदक्षरैः ॥ १५ ॥ बाह्वोःपाण्योस्तथाकट्याम्नाभौचजठरेतथा ॥ स्तनयोरपिविन्यासन्तथाषड्भिःसमाचरेत् ॥ १६ ॥ वक्त्रेचचिबुकेगण्डेकर्णयोश्चललाटके ॥ अंशेकक्षेचषडर्गैःपूर्ववन्न्यासमाचरेत् ॥ १७ ॥ रोमकूपेब्रह्मरन्ध्रेगुदेजंघायुगेतथा ॥ नखेषुपादपार्ष्ण्योश्चतथापूर्ववदाचरेत् ॥ १८ ॥

एवन्तुमातृकान्यासंयःकुर्यान्नरसत्तमः ॥ ससर्वयज्ञपूजासुपूतोयोग्यस्तुजायते ॥ १९ ॥ नातःपरतरन्मन्त्रांविद्यतेक्वचिदेवहि ॥ यत्सर्व
कामदम्पुण्यञ्चतुर्वर्गप्रदम्परम् ॥ २० ॥ वाग्देवतांहृदिध्यात्वामूर्तिसर्वाक्षराणिच ॥ त्रिधाचमातृकामन्त्रैःसक्रमैश्चपिबेज्जलम् ॥ २१ ॥
सवाग्मीपण्डितोधीमाञ्जायतेचवरःकविः ॥ चन्द्रबिन्दुसमायुक्तान्स्वरान्पूर्वम्पठेद्बुधः ॥ २२ ॥ व्यञ्जनानितुसर्वाणिकेवलानिपठे
त्ततः ॥ अकारादिक्षकारान्तान्येवंश्वासैश्चपूरकैः ॥ २३ ॥ जलंकरतलेगृह्यपठित्वाक्षरसंघकम् ॥ अभिमन्त्र्यतुतत्तोयम्प्रथमम्पूरकैः
पिबेत् ॥ २४ ॥ कुम्भकेनद्वितीयन्तुतृतीयन्त्वथरेचकैः ॥ एवंसकृत्त्रिवारन्तुपीत्वातोयंविचक्षणः ॥ २५ ॥ दृढांगःपण्डितोभूयात्पुत्रपौ
त्रसमन्वितः ॥ त्रिसन्ध्यमथपीत्वैवमातृकामन्त्रमन्त्रितम् ॥ २६ ॥ तोयंकवित्वमाप्नोतिसर्वान्कामांस्तथैवच ॥ सततङ्कुरुतेयस्तुमातृ
कामन्त्रमन्त्रितम् ॥ २७ ॥ तोयपानम्महाभागपूरकुम्भकरेचकैः ॥ ससर्वकामान्त्सम्प्राप्यपुत्रपौत्रसमृद्धिमान् ॥ २८ ॥ भूत्वामहाक
विर्लोकेबलवान्त्सत्यविक्रमः ॥ सर्वत्रवल्लभोभूत्वाचान्तेमोक्षमवाप्नुयात् ॥ २९ ॥ राजानमथवाराजपुत्रम्भार्यामथापिवा ॥ वशीकरोति
नाचिरान्मान्त्रिकान्मन्त्रपानतः ॥ ३० ॥ न्यासःक्रमेक्रमप्रोक्तोवर्गक्रमइहैवतु ॥ अक्षराणांक्रमेणाथतोयपानंसमाचरेत् ॥ ३१ ॥ येये
मन्त्रादेवतानामृषीणामथरक्षसाम् ॥ तेमन्त्रामातृकामन्त्रैर्नित्यमेवप्रतिष्ठिताः ॥ ३२ ॥ सर्वमन्त्रमयश्चायंसर्ववेदमयस्तथा ॥ चतुर्वर्ग
प्रदश्चायम्मातृकामन्त्रउच्यते ॥ ३३ ॥ इतितेकथितम्पुत्रमातृकान्यासमद्भुतम् ॥ विभागमथमुद्राणांशृणुवेतालभैरव ॥ ३४ ॥ इतिका
लिकापुराणेसप्तसप्ततितमोध्यायः ॥ ७७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ यायोनिमुद्राकथितामुद्राविभजनेपुरा ॥ अष्टधायोनिमुद्रास्यात्प्र

थमासातुकीर्त्तिता ॥ १ ॥ द्वितीयाखेचरीमुद्राकामाख्यायास्तुभैरव ॥ तांविद्धिचाद्भुतङ्गुह्यंयेनतुष्यतिचण्डिका ॥ २ ॥ अनामिकान्दक्षि
णस्यतर्ज्जन्यांवामतोन्यसेत् ॥ वामानामान्दक्षिणस्यतर्ज्जन्यांविनिवेशयेत् ॥ ३ ॥ तेद्वेतथातर्ज्जनीभ्यांवेष्टयेदग्रतोग्रतः ॥ मध्येद्वय
न्तुविन्यस्यचोर्ध्वभागेत्वनामयोः ॥ ४ ॥ तदग्राग्रेणसंयोगात्तथैवचकनिष्ठिके ॥ अग्रेणैवचसंयुक्तेतन्मूलेङ्गुष्ठकेन्यसेत् ॥ ५ ॥ इयन्तेखे
चरीयोनिर्योनिमुद्रातुकामदा ॥ एषैवाधःकनिष्ठेद्वेनियोज्ययदियुज्यते ॥ ६ ॥ गुह्ययोनिस्तुसाख्याताकामेश्वर्यास्तुतुष्टिदा ॥ संवेष्टयपूर्व
वत्पाण्योर्द्वेकनिष्ठेत्वनामिके ॥ ७ ॥ अधोभागेनियोज्याथमध्यमेचोर्ध्वतस्तथा ॥ तासाम्परस्परश्चाग्रैरन्योन्यंयोजयेद्यदि ॥ ८ ॥
मध्यांमध्येतथांगुष्ठेनिःक्षिप्याग्रेनियोजयेत् ॥ योनिस्तु गाङ्करीप्रोक्तात्रिपुरातुष्टिदासदा ॥ ९ ॥ मध्येद्वेचतथावेष्टयपूर्ववच्चाप्यनामिका ॥
कनिष्ठाभ्याम्पुरोन्यस्यअंगुष्ठौमूलयोस्तयोः ॥ १० ॥ मुद्रेयंशारदीप्रोक्ताशारदायास्तुतुष्टिदा॥मूलयोनिस्तुकथितावैष्णवीतन्त्रगोचरे॥११॥
तर्ज्जन्यनामिकंमध्येकनिष्ठेपिक्रमादपि ॥ करयोर्योजयित्वैवकनिष्ठामलदेशतः ॥ १२ ॥ अंगुष्ठाग्रन्तुनिःक्षिप्यमहायोनिःप्रकीर्त्तिता ॥
अंगुष्ठौचाथसंवेष्टयसंयुज्याथकरांगुलीः ॥ १३ ॥ अग्रभागैर्म्मध्यशून्यन्तत्रकुर्य्यात्करद्वयम् ॥ इयन्तुयोगिनीयोनिर्योगिनीनाम्प्रियङ्करी ॥
॥ १४ ॥ एताअष्टौसमाख्यातायोन्यःकामेश्वरीप्रियाः ॥ मूर्त्तिभेदेनचान्येषान्देवानामपितुष्टिदाः ॥ १५ ॥ यात्रायांयुद्धविषयेवाग्वादेकल
हेतथा ॥ अष्टौयोन्यःस्मरेद्यस्तुजयस्तस्यसनातनः ॥ १६ ॥ विसर्ज्जनेपूजनेचस्मरणेकर्म्मभेदतः ॥ एतायोन्यःसमाख्याताश्चण्डिका
पूजनेषुच ॥ १७ ॥ एतास्तुकथितायोन्यःक्रमात्क्रमविसर्ज्जने ॥ रहस्यंवामदाक्षिण्यम्मन्त्रशुद्धिंशृणुष्वमे ॥ १८ ॥ मन्त्रेणक्रियतेयत्तुशा

रीरम्मन्त्रमुत्तमम् ॥ तद्रहस्यमितिप्राहुर्म्मन्त्रेषुमन्त्रकोविदाः ॥ १९ ॥ कामाख्यायास्तुषट्कोणंमण्डलस्यदलान्तरे ॥ त्रिधालिखे
न्मूलमन्त्रमूर्ध्वन्त्रिष्वपिसन्धिषु ॥ २० ॥ अथत्रिसन्धिषुपुनर्विधिंशक्रंहरंतथा ॥ सहितम्मदनेनैवलिखेद्भूर्जत्वचित्रिधा ॥ २१ ॥
तंतुमादायसाहस्रंदक्षिणेनकरेणवै ॥ मालामपिसमादायसञ्जपेदुत्तरामुखः ॥ २२ ॥ तद्भुजेदक्षिणेधार्य्यम्बाहौवासाधकोत्तमैः ॥ जपान्ते
लिखितंयन्त्रन्तेनसर्वजयीभवेत् ॥ २३ ॥ दीर्घायुःसर्ववशकृद्धनधान्यसमृद्धिमान् ॥ मृतोदेवीगृहेयातियन्त्रयान्त्रितबुद्धिमान् ॥ २४ ॥
षट्कोणानन्तरकृतंवेष्टिताष्टदलेष्वथ ॥ लिखित्वाभूर्जपत्रेषुविलीनैर्यावकोदकैः ॥ २५ ॥ उत्तरादिक्रमेणैववैष्णवीतन्त्रसंगतान् ॥ अष्टौव
र्णान्मध्यभागेपूर्ववत्कामराजकम् ॥ २६ ॥ त्रीन्त्रर्णान्त्रेत्रबीजस्यात्रिकोणस्याग्रतोलिखेत् ॥ एवन्त्रिधाकृतंयन्त्रकृत्वावामकरेस्थितः ॥
॥ २७ ॥ जपेत्त्रीणिसहस्राणिमालामादायदक्षिणे ॥ जपान्तेवैष्णवीरूपध्यानंकुर्यादतन्द्रितः ॥ २८ ॥ प्राणायामसहस्रन्तुततस्तंलिखितो
त्तमम् ॥ ग्रीवायान्धारयेद्यन्त्रंतेनसर्वजयीभवेत ॥ २९ ॥ राजपुत्रोभवेद्राजातदन्यःसचिवोभवेत् ॥ द्विजराजोभवेद्विद्वान्कविर्वाग्मीचवा
भवेत् ॥ ३० ॥ राक्षसेभ्यःपिशाचेभ्योभूतेभ्यश्चापिचान्यतः ॥ साधुसंविद्यतेतस्यनकदाचित्पराजयः ॥ ३१ ॥ दीर्घायुर्बलवान्प्राज्ञोमृतेमोक्ष
मवाप्नुयात् ॥ सम्पूर्णम्मण्डलंकृत्वाअष्टपत्रसमन्वितम् ॥३२॥ भूर्जत्वचिश्रीफलस्यनिर्यासैस्तस्यमध्यतः ॥ षट्कोणंविलिखेत्तस्यप्रागग्रे
ष्वथत्रिष्वपि ॥ ३३ ॥ विलिखेत्त्रिपुरावर्णानधोबीजन्तुनेत्रकम् ॥ दलेष्वष्टासुतुपुनर्वैष्णवीतन्त्रसंगतान् ॥ ३४ ॥ अष्टौवर्णास्तुविलिखे
त्तथाद्वार्षुचतुर्ष्वपि ॥ षट्कोणेपूत्तराकोणक्रमेणकाग्रमानसः ॥३५॥तद्धृत्वादक्षिणकरेवैष्णवीतन्त्रमन्त्रकम् ॥ जपेत्त्रिभिर्दिनैरेवायुतंसंयतमा

नसः॥३६॥प्राणायामसहस्राणित्रीणिकृत्वातुहर्षितः॥सन्ध्याकालेनवम्यान्तुशीर्षेणधारयेद्बुधः॥३७॥शतायुःसर्वदमनोमतिमान्पंडितोत्तमः॥
बलवीर्यधनैश्वर्ययुक्तःपार्थिवएववा ॥३८॥ प्रत्यक्षतोमहामायांकामाख्यान्त्रिपुरामपि ॥ नित्यम्पश्यतिमेधावीमहोच्छासाञ्चशारदाम् ॥३९॥
सिंहव्याघ्रोभुजंगोवायेन्येवातस्यहिंसकाः॥सर्वेतस्यतनुम्प्राप्यविषीदन्तिनसंशयः ॥४०॥ जयहेतुरतोन्यस्मात्संग्रामेशास्त्रवादतः॥नविद्यतेत्रि
भुवनेतस्मात्कुर्य्यात्तुयन्त्रकम् ॥४१॥ अन्तेदेवीगृहम्प्राप्यततोमोक्षमवाप्नुयात् ॥ महामायाशारदाख्याकामाख्यात्रिपुरातथा ॥ ४२ ॥ महो
त्साहातथैतेषांमन्त्राणांयोगणोभवेत् ॥ मण्डलञ्चाष्टदलकन्तन्मध्येविलिखेत्पुनः ॥ ४३ ॥ लिखित्वापूर्ववत्पूर्वम्प्रोक्तंमन्त्रगणंसमम् ॥ अ
न्येद्वयन्द्वारदेशेकोणेष्वक्षरतोलिखेत् ॥ ४४ ॥ शुक्लकौशेयवस्त्रेषुरसैर्वह्निशिखस्यतु ॥ उत्तरीयन्तुतद्वस्त्रङ्कृत्वाजप्यंसमाचरेत् ॥ ४५ ॥ कृतो
पवासःशुद्धश्चमातृकान्यासपूर्वकम् ॥ पञ्चानामपिवर्गाणांसहस्राणितुपञ्चवै ॥ ४६ ॥ दिवसैःपञ्चभिर्जप्त्वातदन्तेचसमाचरेत् ॥ प्राणायामस
हस्राणिपञ्चवैपञ्चभिर्दिनैः ॥ ४७ ॥ अन्तेतुकवचन्यासङ्कृत्यायन्याःसमाचरेत् ॥ ततस्तुमातृकामन्त्रैःश्वासरोधनपूर्वकम् ॥ ४८ ॥ त्रिःपि
बेत्कपिलाक्षीरञ्जागृयाँश्चतदानिशि ॥ एवंयःकुरुतेयन्त्रंशरीरेशुक्लवाससा ॥ ४९ ॥ सोत्रसिद्धिमवाप्नोतिदेवीलोकञ्चगच्छति ॥ यउत्तरीय
म्बिभृयाद्वस्त्रम्मन्त्रेणमन्त्रितम् ॥५०॥ नित्यमेवमहाभागप्रभावन्तस्यवैशृणु ॥ नतस्यदेहेशस्त्राणिप्रवेक्ष्यन्तिकदाचन ॥ ५१ ॥ नाग्निर्दहति
तत्कायन्नापःसंछेदयन्तिच ॥ राक्षसाश्चपिशाश्चभूताद्यायेतुहिंसकाः ॥ ५२ ॥ तेतन्दृष्ट्वामहाभागंभुवंगच्छान्तिवैभिया ॥ गच्छेदवारितःसो
पिसर्वत्रसाधकोत्तमः ॥ ५३ ॥ वशीकरोतिदेवाँश्चनृपानन्यांश्चयोषितः ॥ उत्सहेद्यदिमेधावीवाग्मीराजाचवैभवेत् ॥ ५४ ॥ चिरंजीवीमहाभा

गोधनधान्यसमृद्धिमान् ॥ कविःप्रज्ञासमायुक्तस्सोभेद्योजायतेरिभिः ॥ ५५ ॥ यस्मिन्पुरेसनिवसेद्वज्रपातोनतत्रवै ॥ रसोशरीरंशस्त्रा
णिदृढहस्तोज्झितान्यपि ॥ ५६ ॥ एनन्नघ्नन्तिसततञ्जयःसर्वत्रभैरव ॥ अपराध्यन्तिसततन्तस्यसर्वत्रभैरव ॥ ५७ ॥ नाधयोव्याधय
स्तस्यजायन्तेतुकदाचन ॥ देवीपुत्रःसमतिमान्मृतोमोक्षमवाप्नुयात् ॥ ५८ ॥ यन्त्रितास्वामिनायन्त्रंयादधातिपतिव्रता ॥ पुत्रैश्वर्यमवाप्नो
तिदीर्घायुःसावधूर्भवेत् ॥ ५९ ॥ प्रत्येकमेकंसंहत्यावर्द्धनासहितेनच ॥ क्रमाद्विंशतिमन्त्राणिकथितानिमयेहवै ॥ ६० ॥ तानिप्रत्येकतो
बुध्वायोन्यसेत्सर्वदाहृदि ॥ लिखित्वासर्वयन्त्राणिबिभृयाद्योथवागले ॥ ६१ ॥ देवेन्द्रोजायतेसोत्रप्रभावेणेहभूतले ॥ पूर्वोक्तानिसमस्ता
निफलान्याप्नोतितत्क्षणात् ॥ पिहितःसर्व्वलोकाँस्त्रीन्नित्यमेवप्रपश्यति ॥ ६२ ॥ एवंसार्द्धंयन्त्रवर्गैःसमस्तैरष्टाभिर्यत्पूर्वमुक्तंसहस्रम् ॥ शुक्ले
वस्त्रेसंलिखित्वास्वदेहेधृत्वानित्यम्प्राप्नुयाद्वैसमस्तम् ॥ ६३ ॥ यःशत्रजातिर्हृदयेसकुर्यात्संग्रामकालेकवचेष्टधाग्नि ॥ मन्त्राक्षराण्यादिकृता
निदेव्याअष्टौवहिर्गात्रविशेषतश्च ॥ ६४ ॥ गलेहरिंवक्षसिवैलिखेद्विधिंस्तनद्वयेपुत्रयुतम्महेश्वरम् ॥ बाह्वंससन्ध्योश्चहरिश्चवैष्णवीम्बाह्वो
स्तुलक्ष्मीश्चसरस्वतीश्च ॥ ६५ ॥ एवंरणाष्टांगमिदंविधायगात्रेसवर्मण्यनुचिन्तयेच्छिवाम् ॥ लिखेल्ललाटेतिलकान्तरेनरःसमस्तमन्त्राक्षर
यन्त्रमुत्तमम् ॥६६॥ ततोजपेदष्टवातुंपाणिन्दत्वाष्टधामसु॥वैष्णवीतन्त्रमन्त्रन्तुततोगच्छेद्रणाजिरम् ॥ सतुवीरोममसमःसंग्रामेषुचजायते॥
॥ ६७ ॥ तृणानीवपरास्त्राणिजायंतेग्रौतथात्मनि ॥ विनिस्सरन्तिरिपवोयाचकाधनिनोधनम् ॥ ६८ ॥ सिंहाग्र्यान्नरशार्दूलोवीर्यवान्बलवान्भ

१ गृहीत्वेतिशेषः ।

वेत् ॥ इदंरहस्यंकथितंकामाख्यायास्तुभैरव ॥ ७० ॥ वैष्णव्यातन्त्रमुख्येषुत्रिपुरायास्ततःशृणु ॥ तस्यास्तुसर्वमन्त्राणित्रयोदशयुतानिवै
॥ ७१ ॥ विंशतिन्तुसहस्राणांतन्त्राद्यंवाग्भवंस्मृतम् ॥ द्वितीयंकामराजाख्यम्मोहनञ्चतृतीयकम् ॥ ७२ ॥ आम्रेडितंवाग्भवन्तुचतुर्थम्परि
कीर्तितम् ॥ नेत्रबीजंद्वितीयन्तुद्विरुक्तंवाग्भवन्तथा ॥ ७३ ॥ आद्यन्तत्पञ्चमम्प्रोक्तञ्चतुर्भिरपिचाक्षरैः ॥ नेत्रबीजन्द्वितीयन्तुप्रथमम्परि
कीर्त्तितम् ॥ ७४ ॥ द्वितीयंकामबीजन्तुतृतीयंवाग्भवन्तथा ॥ एभिस्त्रिभिस्तुयन्मन्त्रन्तत्पष्ठम्परिकीर्तितम् ॥ ७५ ॥ नेत्रबीजन्द्वितीयन्तु
वाग्भवन्तेनसप्तमम् ॥ तदेवंवाग्भवाद्यन्तुअष्टमम्परिकीर्तितम् ॥ ७६ ॥ वाग्भवंकामबीजञ्चेदेताभ्यान्नवमंस्मृतम् ॥ कामबीजन्तथैवाद्यन्द्वि
तीयञ्चैवमोहनम् ॥ ७७ ॥ एकादशमिदम्प्रोक्तंडामराद्यन्तुवाग्भवम् ॥ द्वादशंकीर्तितम्मन्त्रंशेषतस्त्रैपुरम्महः ॥ ७८ ॥ तन्महस्त्रैपुरम्मन्त्रं
शृणुष्वैकमनास्त्विदम् ॥ प्रान्तादिस्तस्यचाप्यादिर्वह्निर्वाग्भवसंधितः ॥७९॥ आद्यंत्रिपुरभैरव्याबीजमाद्यम्प्रकीर्तितम् ॥ उपान्तश्चतदादिश्च
व्यञ्जनाद्यंवृषाननः ॥ ८० ॥ चतुर्थस्वरबिन्द्विन्दुयुताश्चैतत्तृतीयकम् ॥ उपान्तश्चतदादिश्चवह्निशेषस्वरस्तथा ॥८१॥ समाप्तिर्बिन्दुसहिता
सहितस्तुतृतीयकः ॥एतत्तत्त्वंविजानातियोनरोभुविभूमणिः ॥८२॥सिद्धविद्याधरेभ्यस्तुसोधिकोमत्समोभवेत् ॥ एतेत्रयोदशप्रोक्तामन्त्रामन्त्रे
पुचोज्ज्वलाः ॥ ८३ ॥ विंशतेस्तुसहस्रेभ्यः पराश्चैतेप्रकीर्तिताः ॥ विंशतेस्तुसहस्राणामाद्यमेतत्प्रकीर्तितम् ॥ ८४ ॥ त्रिपुरायास्तुबालाया
मन्त्रन्तच्छृणुभैरव ॥ वाग्भवःकामराजस्तुउपान्तादिः सबिन्दुकः ॥८५॥ शेषस्वरसमाप्तिभ्याम्मन्त्रमेतत्प्रकीर्तितम् ॥ एषातुत्रिपुराबालाम
ध्याप्रोक्तापुरैवहि ॥ ८६ ॥ शेषातेजस्विनीप्रोक्तायायन्त्रिपुरभैरवी ॥ मध्यायाःपूजनम्प्रोक्तम्बालायाःशृणुसाम्प्रतम् ॥ ८७ ॥ तथात्रिपुर

भैरव्याःसर्वसिद्धिप्रदायकम् ॥ विभिद्यशक्त्याशम्भुन्तुशक्तिश्चापिविभेदयेत् ॥ ८८ ॥ शम्भवेवर्णषट्कोणंकेशरन्तत्रसंलिखेत् ॥ मध्याया
स्त्रिपुरायास्तुयादृशेद्वारमण्डले ॥ ८९ ॥ तादृशेत्रापिकर्त्तव्यंकोणेषुलिखितन्तथा ॥ पापोत्सारणकर्म्माणिभूम्यादीनांविशोधनम् ॥ ९० ॥
पूर्वमुत्तरतन्त्रोक्तन्त्रिपुरापीठभाषितम् ॥ कामाख्यापूजनेप्रोक्तंसर्वंकुर्यात्तुसाधकः ॥ ९१ ॥ दहनप्लवनादीनिप्रतिपत्तिश्चपात्रके ॥ सर्वन्तुपू
र्ववत्कार्यङ्कामाख्यापूजनेयथा ॥ ९२ ॥ कृत्वात्रदेहन्यासन्तुमन्त्रवर्णैस्तथाक्षरैः ॥ सर्वैःस्वरैस्तथाकाद्यैस्ततोरूपंविचिन्तयेत् ॥ ९३ ॥
चतुर्भुजांरक्तवर्णांरक्तवस्त्रविभूषिताम् ॥ दक्षिणोर्ध्वेस्रजञ्चाधोविभ्रतीम्पुस्तकोत्तमम् ॥ ९४ ॥ अभयंवामहस्ताभ्यांवरञ्चदधतीन्तथा ॥ सहस्र
सूर्य्यसङ्काशान्त्रिनेत्रांगजगामिनीम् ॥ ९५ ॥ पीनतुंगस्तनयुगांसितप्रेतासनस्थिताम् ॥ स्मितप्रसन्नवदनांसर्वालंकारसंयुताम् ॥
॥ ९६ ॥ तिसृभिर्मुण्डमालाभिःशिरोवक्षःकटीषुच ॥ त्रिगुणान्त्रिगुणीभूतैःप्रत्येकम्परिभूषिताम् ॥ ९७ ॥ मदिराघूर्णनयनांरक्तदन्त
च्छदद्वयाम् ॥ चिन्तयेद्वरदान्देवीमेवन्त्रिपुरभैरवीम् ॥ ९८ ॥ बालायास्त्रिपुरायास्तुरूपम्पूर्वम्प्रपूजने ॥ उक्तःक्रमःपीठयोगेतन्त्रादि
शृणुभैरव ॥ ९९ ॥ पुष्पबाणांस्तुपाशञ्चधत्तेपौष्पंशरासनम् ॥ पाशञ्चकुणपारूढासाबालात्रिपुरास्मृता ॥ १०० ॥ मन्मन्त्रेत्रिपुरेदेवींविद्म
हेपदमादितः ॥ कामेश्वरींधीमहित्वामनुतन्नःप्रचोदयात् ॥ १ ॥ एषात्रिपुरगायत्रीत्यावाहनविशेषतः ॥ स्नानाद्यैःपूजयेत्सम्यग्बालामन्या
श्चभैरवीम् ॥ २ ॥ अस्याःक्रमेविशेषोयोन्यासेचोत्तरकर्मणि ॥ तत्सर्वंसहमन्त्रौघैःशृणुवेतालभैरव ॥ ३ ॥ ब्राह्मेमुहूर्त्तउत्थायचिन्तयेत्प
रमंगुरुम् ॥ ततोनुस्वगुरुंशुद्धन्ततस्त्रिपुरभैरवीम् ॥ ४ ॥ चतुर्भुजांशुक्लवर्णांवरदाभयपुस्तकाम् ॥ अक्षमालाञ्चक्रमतोधत्तेवामेचदक्षिणे ॥५॥

सुवर्णरत्नखचितेसंस्थिताम्प्रवरासने ॥ सौवर्णमुत्तरीयन्तुधत्तेसौवर्णकुण्डले ॥ ६ ॥ स्वगुरुंवर्णतोध्यानात्तथैवपरिचिन्तयेत् ॥ भैरवी
श्चिन्तयित्वातुततउत्थायचाचरेत् ॥ ७ ॥ मैत्रमाचमनञ्चैवदन्तानांशोधनन्तथा ॥ प्रातःस्नानन्ततःकुर्यात्त्रैपुरंयोजयन्क्रमम् ॥ ८ ॥
सर्वत्रदेवीमन्त्रेषुवैदिकेष्वपिभैरवीम् ॥ त्रिपुराञ्चिन्तयेन्नित्यन्देवमन्त्रेषुचक्रमात् ॥ ९ ॥ त्रिभिस्तुत्रिपुराबीजैस्त्रिधामज्जनमाचरेत् ॥ देवाना
मपिसर्वेषुभैरवेषुपदंसदा ॥ ११० ॥ कुर्याद्विशेषणन्नित्यन्नोच्चार्यान्निर्विशेषणम् ॥ आपःपुनन्तुपृथिवीमुक्त्वात्रिपुरभैरवीम् ॥ ११ ॥ कुर्या
दाचमनंविप्रोद्रुपदायान्तथाचरेत् ॥ इदंविष्णुर्भैरवस्तुविचक्रमइतीरितम् ॥ १२ ॥ मृदालम्भनकृत्येषुनित्यमेवाप्युदीरयेत् ॥ गायत्रीन्त्रि
पुराद्यान्तुभैरवीमाह्वयेच्छिवाम् ॥ १३ ॥ मार्तण्डभैरवायेतिसूर्यायार्घन्निवेदयेत् ॥ उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥ १४ ॥ दृशेवि
श्वायसूर्यंशेषेभैरवमीरयेत् ॥ तर्पणादौप्रयुञ्जीततृप्यताम्ब्रह्मभैरवः ॥ १५ ॥ आवाहनेस्वयंपितॄन्भैरवानितिकीर्तयेत् ॥ तृप्यताम्भैरवीमातः
पितर्भैरवतृप्यताम् ॥ १६ ॥ आदौचत्रिपुरापूर्वन्तर्पणेपिप्रयोजयेत् ॥ ज्योतिष्टोमाश्वमेधादौयत्रयंयम्प्रपूजयेत् ॥ १७ ॥ तत्रभैरवरूपेण
देवीमपिचभैरवीम् ॥ मदिरापात्रमालोक्यरक्तवस्त्रांस्त्रियंतथा ॥१८॥ शिरोनरस्यदृष्ट्वातुभैरवींचिंतयेद्द्विज ॥ स्त्रियोदृष्ट्वाह्यथैकत्रयुवतीःसुमनो
हराः ॥ १९ ॥ ताभ्यस्त्रिपुरभैरव्याःप्रीतयेचन्दनादिकम् ॥ दद्याद्भक्त्यातुमनसाचिन्तयन्नथभैरवीम् ॥ १२० ॥ भैरवीम्प्रतिगृह्णामिभैरवो
हम्प्रतिग्रही ॥ कन्यायाम्भावयेद्धीमान्त्रिपुरायाःप्रपूजकः ॥ २१ ॥ भैरवायददाम्यद्यदेवींत्रिपुरभैरवीम् ॥ इतीरयेत्प्रदानेतुकन्यायास्त्रिपु
रान्ततः ॥ २२ ॥ तस्याःपूजोपकरणपात्राद्यञ्जन्यपूजने ॥ आसनाद्यञ्चसततन्नोपयोज्यंकदाचन ॥ २३ ॥ सकृत्तुदापयेदन्यैर्मदिरांसाध

कोद्विजः ॥ शूद्रादयस्तुसततन्दद्युरासवमुत्तमम् ॥ २४ ॥ एवन्तुवामभावेनयजेत्त्रिपुरभैरवीम् ॥ बालान्तुवामदाक्षिण्यमावाभ्यामपिपूज
येत् ॥ २५ ॥ श्मशानभैरवीन्देवीमुग्रतारान्तथैवच ॥ उच्छिष्टभैरवीञ्चण्डीन्तारान्त्रिपुरभैरवीम् ॥ २६ ॥ एषातुवामभावेनपूज्यादक्षिण
तांविना ॥ ऋषीन्देवान्पितॄंश्चैवमनुष्यान्सुतसञ्चयान् ॥ २७ ॥ योयजेत्पञ्चभिर्यज्ञैर्ऋणानिपरिशोधयेत् ॥ विधिवत्स्नानदानाभ्यांकुर्वन्य
द्विधिपूजनम् ॥ २८ ॥ क्रियतेसरहस्यन्तुतद्दाक्षिण्यमिहोच्यते ॥ सर्वेचापितृदेवादौयस्माद्भवतिदक्षिणः ॥ २९ ॥ देवीचदक्षिणायस्मात्त
स्माद्दक्षिणउच्यते ॥ यापुनःपूज्यमानातुदेवादीनाञ्चपूर्वतः ॥ १३० ॥ यज्ञभागंस्वयन्धत्तेसाबलातुप्रकीर्त्तिता ॥ पूजकोपिभवेद्वामस्तत्रै
वसततंसुत ॥ ३१ ॥ पञ्चयज्ञान्नवाकुर्याद्यद्वावाम्यप्रपूजने ॥ अन्यस्यपूजाभागंहियतोगृह्णातिवामिका ॥ ३२ ॥ यत्पूजयेद्वामभावैर्नतत्स्या
दृणशोधनम् ॥ पितृदेवनरादीनाञ्जायतेचकदाचन ॥ ३३ ॥ सोभ्यस्यत्रिपुरायोगन्तेनयोगेनसंयुतः ॥ जीयतेयदिसुप्राज्ञस्तदामोक्षमवा
प्नुयात् ॥ ३४ ॥ सचमोक्षश्चिरेणैवजायतेत्रपुनःपुनः ॥ ऋणशोधनजैःपापैराक्रान्तश्चैवभैरव ॥ ३५ ॥ इहलोकेसुखैश्वर्ययुक्तःसर्वत्रवल्लभः ॥
मदनोपमकान्तेनशरीरेणविराजता ॥ ३६ ॥ सराष्ट्रकञ्चराजानंवशीकृत्यसमन्ततः ॥ मोहयन्वनिताःसर्वान्त्सर्वाश्चमदविह्वलाः ॥ ३७ ॥
सिंहान्व्याघ्रांस्तरक्षूंश्चभूतप्रेतपिशाचकान् ॥ वशीकुर्वन्विचरतिवायुवेगोद्यतस्ततः ॥ ३८ ॥ बालांवात्रिपुरान्देवीम्मध्यांवाप्यथभैरवी
म् ॥ योयजेत्परयाभक्त्यायश्चबाणोपमाकृतिः ॥ ३९ ॥ कामेश्वरीन्तुकामाख्याम्पूजयेत्तुयथेच्छया ॥ दाक्षिण्याद्वामभावाद्वासर्वथा
सिद्धिमाप्नुयात् ॥ १४० ॥ महामायांशारदाञ्चशैलपुत्रीन्तथैवच ॥ यथातथाप्रकारेणदाक्षिण्यादेवपूजयेत् ॥ ४१ ॥ योदाक्षिण्यंविनाभा

वम्महामायांसमर्चति ॥ सपापःस्वर्गलोकेभ्यश्च्युतोभवतिरोगधृक् ॥ ४२ ॥ अन्यास्तुशिवदूत्याद्यादेव्योयाःपूर्वमीरिताः ॥ तास्तुवाम्पांतु
दाक्षिण्याम्पूजितव्यास्तुसाधकैः ॥ ४३ ॥ किन्तुयःपूजकोवामःसोन्यासाम्पारिवर्जितः ॥ सर्वासाम्पूजकःस्यात्तुदक्षिणस्तेनउत्तमः ॥ ४४ ॥
अथत्रिपुरभैरव्यान्यासञ्चशृणुभैरव ॥ येनवैन्यासमात्रेणदेववज्जायतनरः ॥४५॥ भैरवीतन्त्रमन्त्रस्यऋषिर्द्दक्षिणउच्यते॥ छन्दःपंक्तिःसमाख्या
तादेवीत्रिपुरभैरवी॥४६॥कामार्थयोःसाधनेचविनियोगःप्रकीर्त्तितः॥हकारंविन्यसेन्नाभौमकारंबस्तितोन्यसेत् ॥४७॥वकारंशेफेविन्यस्यएका
रञ्चगुदेतथा॥पुनरूर्वोस्तथैवाद्यञ्जानुयुग्मेद्वितीयकम् ॥४८॥ तृतीयञ्जंघयोर्न्यस्यचतुर्थम्पादयोर्न्यसेत् ॥ त्रिविधंविन्यसेद्देवन्नाभ्यादेःपादसंग
तम्॥४९॥द्वितीयस्यतुबीजस्यआद्यंहृद्येवविन्यसेत्॥वामेस्तनेद्वितीयन्तुतृतीयन्दक्षिणेस्तने॥५०॥चतुर्थमुदरेन्यस्यपञ्चमम्पार्श्वयोर्न्यसेत् ॥
षष्ठन्नाभौपरिन्यस्यन्यसेच्चापित्रिधात्रिधा॥५१॥तृतीयस्यतुबीजस्यमूर्ध्निचाद्यन्तुविन्यसेत्॥द्वितीयंन्यस्यकेशान्तेतृतीयंवदनेन्यसेत् ॥५२॥
चतुर्थंहृदयेन्यस्ययथास्यात्तुत्रिधात्रिधा॥आद्याद्यन्दक्षिणांगुष्ठेद्वितीयन्तर्ज्जनींपुनः ॥५३॥तृतीयञ्चमध्यमायामनामायाञ्चतुर्थकम् ॥ तृतीयाद्य
ङ्कनिष्ठायांवामांगुष्ठेद्वितीयकम् ॥ ५४ ॥ तृतीयंवामतर्ज्जन्याञ्चतुर्थम्मध्यमातनौ ॥ अनामायाम्पञ्चमन्तुषष्ठंशेषेतुविन्यसेत् ॥ ५५ ॥ एव
न्त्रिधातुविन्यस्यतृतीयमथबीजकम् ॥ उभयोर्हस्तयोःकृत्वाअंगुष्ठाद्यंयुगंयुगम् ॥ ५६ ॥ तृतीयम्बीजवर्णास्तुविन्यसेत्क्रमतोबुधः ॥ पिण्डि
तंसर्वबीजन्तुविन्यसेत्तुकनिष्ठयोः ॥ ५७ ॥ आद्यन्तुतलयोर्न्यस्यपृष्ठयोश्चद्वितीयकम् ॥ तालत्रयन्ततोदत्वातृतीयेनास्त्रवेष्टनम् ॥ ५८ ॥
कर्णयोश्चिबुकेगण्डेमुखेदृङ्नासयोस्तथा ॥ स्कन्धयोश्चकपोलेचजठरेशिश्नमूर्द्धनि ॥५९॥ पादयोःपार्श्वयोश्चैवहृदयेस्तनयुग्मके ॥ कण्ठदे

शेचन्यस्तव्यामन्त्रवर्णक्रमात्पुनः ॥ १६० ॥ लिंगेरत्यैनमइतिवाग्भवाद्येनविन्यसेत् ॥ ॐक्लींप्रीत्यैनमइतिहृदयेविन्यसेत्ततः ॥ ६१ ॥
नमोभवायेतिततोभ्रुवोर्मध्येतृतीयकम् ॥ विन्यसेत्त्रिपुराबीजंसद्योदेवत्वसिद्धये ॥ ६२ ॥ ॐईंईशानरूपायततोनमोभवायवै ॥ नमइत्यन्त
तःप्रोक्तोमूर्ध्नीशानंन्यसेत्पुनः ॥ ६३ ॥ वक्त्रेतत्पुरुषश्चापिबीजेनमकरध्वजम् ॥ हृदयेघोरकन्दर्पमाद्यबीजेनवैन्यसेत् ॥ ६४ ॥ शिश्नेवा
वामदेवन्तुमन्मथश्चापिविन्यसेत् ॥ सद्योजातम्पादद्वयेकामदेवश्चविन्यसेत् ॥६५॥ ॐकारश्चहकारश्चरेफमेकत्रसन्धितम् ॥ प्रान्तस्वरंवाग्भ
वाद्यंस्वरैर्द्वस्वैस्तुपञ्चभिः ॥ ६६ ॥ एभिस्तुपञ्चभिर्मन्त्रैरीशानादीनिविन्यसेत् ॥ वक्त्राणिपूर्वमुक्तानिस्वमुखोर्ध्वंतुपूर्वतः ॥ ६७॥ दक्षिणोत्त
रयोःपश्चात्पश्चिमेचापिविन्यसेत् ॥ हृदयादिपडंगानिदीर्घैराद्यस्वरैः पुनः ॥ ६८ ॥ न्यसेत्ततःपञ्चबाणान्मूर्धादिष्वथाविन्यसेत् ॥ ॐह्राँ
क्लींसौंद्रावणायन्यसेन्मूर्ध्नितःपुनः ॥ ६९ ॥ ॐह्राँक्षोभणबाणायपद्मचान्नमइतीरयेत् ॥ ओंक्लींप्लींह्रींसमाप्यन्तुपट्कारान्तार्द्धचन्द्रकैः ॥
॥ १७० ॥ वक्त्रेवशीकृतंलिंगेसम्मोहनमथोन्यसेत् ॥ आकर्षणन्तथाबाणंहृदिमन्त्रैःक्रमान्न्यसेत् ॥ ७१ ॥ वाग्भवाद्यन्तकारान्तोवषट्का
रसमन्वितः ॥ त्रिःशेषस्वरएवात्रचन्द्रार्द्धोबिन्दुसंयुतः ॥ ७२ ॥ एभिस्तुपञ्चभिर्मन्त्रैरष्टशक्तीःक्रमादिमाः ॥ एतेषुचाष्टस्थानेषुविन्यसेन्म
न्त्रवित्पुनः ॥ ७३ ॥ सुभगाश्चभगान्देवीन्तृतीयाम्भगरूपिणीम् ॥ भगमालाश्चतुर्थीन्तुअनंगकुसुमान्ततः ॥ ७४ ॥ अनंगमेखलाम्पश्चाद
नंगमदनान्तथा ॥ अष्टमींचतथादेवींमदविभ्रममन्थराम् ॥ ७५ ॥ रूपतोध्यानतश्चैषायथात्रिपुरभैरवी ॥ ललाटभ्रूमध्यभागमुखकर्णान्तक
ण्ठके॥७६॥हृन्नाभिलिंगेष्वेवात्रन्यस्तव्याअष्टशक्तयः॥शिरोललाटभ्रूयुग्मकर्णनेत्रद्वयेषुच॥७७॥गण्डयोरथनासायांदन्तवीथ्याम्मुखेतथा ॥

चतुर्दशपदेष्वेपुन्यसेच्चतुर्दशस्वरान् ॥ ७८ ॥ चिबुकेत्वथग्रीवायांकण्ठदेशेतुपार्श्वयोः ॥ स्तनयोःकक्षयोश्चापिकफोण्योर्हस्तयोस्तथा॥७९॥
तत्पृष्ठयोस्तथानाभौलिंगेचोरुद्वयेतथा ॥ अष्ठीवदोर्जघयोस्तुस्फिचोस्तुपदमूलयोः ॥ १८० ॥ चरणांगुष्ठयोःकादिमद्यान्वर्णांस्तुविन्यसेत् ॥
मेखलायांकण्ठदेशेबाहुभूषणभागतः ॥ ८१ ॥ हरेःस्रजिकुण्डलेचकेशबन्धेतथैवच ॥ चूडामणौचन्यस्तव्यानकाराद्याःक्रमात्पुनः ॥ ८२ ॥
मन्त्राक्षराणित्रीण्येवसन्धितानिपुनस्तथा ॥ प्रातिलोम्येनविन्यस्यमन्त्रैर्मूर्ध्निंत्रिधात्रिधा ॥८३ ॥ अमृतांयोगिनींविश्वयोगिनीश्चाक्षरक्रमात् ॥
ततोबीजन्यक्षराणिमूर्ध्निबाहौतथाहृदि ॥ ८४ ॥ विन्यस्यपूर्ववत्पूजामारभेन्मन्त्रविद्बुधः ॥ पूर्ववत्पूजयेद्देवीम्पीठदेवविवर्जिताम् ॥ ८५ ॥
विशेषतोह्यष्टशक्तीःक्रमात्तुस्वभगादिकाः ॥ मण्डलस्याष्टदिग्भागेपूर्वादौपरिचिन्तयेत् ॥ ८६ ॥ त्रिकोणाग्रेमृताद्यास्तुसम्पूज्यास्तुत्रियोनयः॥
मध्येष्टभूषणान्येवपूजयेत्ततःपुनः ॥ ८७ ॥ ईशानादीनिवक्त्राणिममभैरवमध्यतः ॥ पूजयेत्तुतथातत्रमनोभवमुखानापि ॥ ८८ ॥ अन्य
च्चपूजनेतत्रक्रमःपूर्वोदितश्चयः ॥ सएवंसतुनग्राह्यःत्रिपुरापरिपूजने ॥ ८९ ॥ निर्माल्यधारिणीदेवीवितस्याःशृणुभैरवी ॥ विसर्जनश्चोत्तरस्या
न्त्यक्तानिर्म्माल्यमाचरेत् ॥ १९० ॥ त्रिमूर्त्तिम्पूजयेत्तांतुदेवीन्त्रिपुरभैरवीम् ॥ नजपेत्रिशताद्न्यूनंसाधकस्तुकदाचन ॥९१॥ अंगुष्ठमध्यमा
नामांगुलीभिस्तिसृभिःपुनः ॥ सदापुष्पादिकन्दद्यान्मालान्तुत्रिगुणाश्चरेत् ॥ ९२ ॥ चर्मासनमधिष्ठायपश्चात्कृत्वापदद्वयम् ॥ पूजयेन्निर्ज
नेदेशेसाधकोनन्यमानसः ॥ ९३ ॥ आसादयेत्तुपुष्पादिनैवेद्यादिचयद्भवेत् ॥ तद्वामहस्तमुख्येनसततंसाधकोबुधः ॥९४॥ त्रिच्छिद्रात्रिपु
राप्रोक्तानसम्यक्पूजितायदि ॥ शरीरेनिन्दितोव्याधिर्जीर्यतेवश्यमेवहि ॥ ९५ ॥ अवश्याःपुत्रदाराश्चभृत्याद्याश्चभवन्तिहि ॥ अस्त्राद्धोता

भवेत्स्वस्यप्राणत्यागोनसंशयः ॥ ९६ ॥ त्रिच्छिद्रदायिनीचैवमन्यथापूजितायदि ॥ इतःप्रकारान्सततंसम्यग्वेतालभैरव ॥ ९७ ॥ एपाच
त्रिपुरादेवीयाश्चान्याःपूर्वभाषिताः ॥ सर्वास्तुमायाभैरव्यायोगनिद्राजगत्प्रसूः॥९८॥तस्याःप्रपंचरूपैस्तुबहुभिःसैवक्रीडति ॥ महामायामल
भूताततस्तुशारदापुरा ॥९९॥उमाततःशैलपुत्रीमत्प्रियायास्ततस्त्विमाः ॥ उग्रचण्डाप्रचण्डाद्यास्त्रिपुराद्यास्तथैवच ॥२००॥ तासाञ्चापिसदै
वाहम्महाभैरवरूपधृक्॥नायकोसुतरान्ताभिर्नित्यंनित्यंवसेद्बुधः॥१॥ममभैरवरूपस्यमन्त्रःपूर्वमयोदितः ॥रूपञ्चोक्तम्पूजनेषुत्रिपुरायाःक्रमः
स्मृतः॥२॥महाभैरवंविद्महेकालरुद्रायधीमहि॥तन्नःकामोभैरवस्तुक्लेदीन्नित्यम्प्रचोदयात्॥३॥ एपाभैरवरूपस्यगायत्रीमेप्रष्ठिता ॥ यथेष्टमांस
मद्यादिभोजनार्थंमयाधृतः॥४॥महाभैरवकायोयन्तथास्त्रीरतिसंगमे॥अयन्तुवाम्यभावेनपूज्योमद्यादिभिःसदा ॥५॥ वामःकायोब्राह्मणोपिमां
समद्यादिमुक्तये॥कृतोमहामोहनामाचार्वाकादिप्रवर्तकः॥६॥ विष्णोर्वामात्मिकामूर्तिर्न्नारसिंहाह्वयाभवत् ॥ सतुदाक्षिण्यवामाभ्याम्पूजनीयःस
दाबुधैः॥७॥तथैवबालगोपालमूर्त्तिर्जरायुवेष्टिता॥मद्यमांसाशनोभोगीलोलुपःस्त्रीषुसर्वदा॥८॥बह्वचस्तुचण्डिकादेव्यावामिकामूर्त्तयःस्मृताः॥
लक्ष्म्यास्तुवामिकामूर्त्तिरुक्तादहनभैरवी॥९॥याग्निदाहंपुरग्राममन्दिरेष्वकरोदियम्॥सुपूजितामहालक्ष्मीर्देहन्यासात्तुपूजयेत्॥ २१०॥वाग्भैर
वीसरस्वत्यावामिकामूर्त्तिरीरिता॥तस्यामन्त्रम्पुराप्रोक्तंशुक्लवर्णातुसास्मृता ॥११॥ मध्यायास्त्रिपुरायास्तुरूपन्ध्यानमिहोच्यते ॥ पूजाक्रम
स्तथैवोक्तःसर्वत्रैवतुभैरव ॥ १२ ॥ मार्त्तण्डभैरवोनाममूर्तिःसूर्यस्यकीर्त्तिता ॥ गणेशस्याग्निवेतालःकथितोवामनामकः ॥ १३ ॥ एतेवा
म्येनभावेनपूजनीयाविशेषतः ॥ त्रिधाद्यस्तुयथापूर्वन्नमयैर्बलवैस्तथा ॥१४॥ वान्तैर्द्विरेफैःसर्वत्रयथाकृत्वातथातथा ॥ अनुस्वारविसर्गाभ्या

म्प्राक्शेषौपारिकीर्तितौ ॥ १५ ॥ मध्येतुकेवलाःपूर्वैसानुस्वारविसृष्टिभिः ॥ पश्चाद्विन्त्रिक्रमाद्यस्तुवर्णैरेकेनचैवहि ॥ १६ ॥ व्यस्तैःसमस्तै
रपिचदकारादिषुसंयुतैः ॥ आद्यायास्त्रिपुरायास्तुमन्त्रवद्योजितैस्तथा ॥१७॥ तथात्रिपुरभैरव्यामन्त्रवच्चाक्षरैरपि ॥ त्रिश्चतुर्दशभिःकृत्वाडादीं
स्त्रींस्तुविशारयेत् ॥ १८ ॥ द्वितीयन्द्विगुणंकृत्वाशेषेत्रादौचयोजयेत् ॥ विंशतिस्तुसहस्राणिशेषेचापित्रयोदश ॥ १९ ॥ आद्यमाद्यन्ततः
प्रोक्तंवाग्भवाद्यन्तृतीयकम् ॥ एवञ्चपरमप्येतन्मन्त्राणाञ्चचतुष्टयम् ॥ २२० ॥ एतज्ज्ञात्वानरःकामानखिलान्प्राप्यसंगतः ॥ मृतेदेवीपुरंया
तिक्रमादेवतुभैरव ॥ २१ ॥ यःसकृत्तुजपेदेतत्सकलम्मन्त्रसञ्चयम् ॥ प्रथमंकामतोन्यस्यसाधकस्तुत्रिभिर्दिनैः ॥ २२ ॥ चिन्तयन्मनसा
देवींसम्यक्त्रिपुरभैरवीम् ॥ सकामानखिलान्प्राप्यस्वरूपेमदनोपमः ॥ २३ ॥ धार्म्मिकोनृपतिर्भूयाद्ब्राह्मणोद्विजराड्भवेत् ॥ आराधित
शरीरस्तुपिशाचाद्यैस्सदैवहि ॥ २४ ॥ नीरोगश्चिरायुश्चबलवानपिजायते ॥ एवन्त्रिपुरभैरव्यामयाप्रोक्तस्त्वयंक्रमः ॥ २५ ॥ वैष्णव्या
स्तुमहादेव्याः सहस्राणितुषोडश ॥ शृणुभैरवमन्त्राणिशिवैकाग्रमनाःपुनः ॥ २६ ॥ अष्टोत्तरसहस्रन्तुचतुःषष्टिस्तथात्रयः ॥ मन्त्राःप्रोक्ताम
हादेव्यामूर्तिभेदेनताःपुनः ॥ २७ ॥ अनुस्वारविसर्गाद्यान्द्विगुणांस्तेपुनःसमाः ॥ कादिव्यञ्जनसंयोगादूर्ध्वाधोव्यस्तभावतः ॥ २८ ॥
द्वाभ्यान्त्रिभिश्चसततमुद्धरेन्मन्त्रवित्पुनः ॥ अष्टावष्टौततःकृत्वासमस्तव्यस्तसंयुतैः ॥ २९ ॥ विस्वरैःसस्वरैश्चापिसानुस्वारविसर्गकैः ॥
केवलैरपितत्रैवद्विव्यस्तैरन्तरैस्तथा ॥ २३० ॥ एवमष्टोत्तरंयावत्संयोगयोगभावतः ॥ देव्यास्तुषट्सहस्राणिसहस्राणितथादश ॥ ३१ ॥
मन्त्रास्तुसङ्ख्ययाख्याताःक्रमाद्वेतालभैरव ॥ समस्तव्यस्तरूपेणवैष्णव्यायेमयोदिताः ॥ ३२ ॥ ताज्ञात्वामानवोयातिममैवसदनम्प्रति ॥

अष्टम्यांच नवम्यांचसहस्राणितुषोडश ॥ ३३ ॥ योजपेन्मन्त्रबीजानिसकृदेवतुभैरव ॥ ध्यायँस्तुवैष्णवींमूर्त्तिन्तदेकाग्रमनाःशृणु ॥ ३४ ॥
नरराजोभवेद्भूमौपण्डितश्चातिहर्षितः ॥ चिरायुःसुखभोगीस्यादुद्रिक्तोबलवाहनैः॥३५॥तान्येवचाष्टधाजप्त्वासार्वभौमोनृपोभवेत् ॥ गणाध्य
क्षोमृतेःसस्यात्ततोमुक्तिमवाप्नुयात् ॥ ३६ ॥ इतिसकलगुणौघैरस्तदोषस्तुनित्यंभवतिकलुषहन्ताश्रीविवृद्धचैसुमन्त्रः ॥ सततमखिलवेत्ता
योभवेदेतयोस्तुसचभवतिजितारीरोगशोकप्रमुक्तः ॥२३७॥ इतिश्रीकालिकापुराणेअष्टसप्ततितमोऽध्यायः॥ ७८ ॥ ॥ श्रीभगवानुवाच ॥
निष्पल्लवद्वादशभिर्लक्षैर्म्मन्त्रजपैस्तथा ॥ पुरश्चरेत्साधकस्तुकाममिष्टातिहेतवे ॥ १ ॥ जातीपुष्पञ्चबकुलम्मालतीपुष्पमेवच ॥ नन्द्यावर्त्त
पाटलञ्चस्थितपद्ममतःपरम् ॥ २ ॥ आज्यमन्नम्पायसञ्चदधिक्षीरन्तथामधु ॥ लाजाश्चापिसकर्पूराअमीएवचतुर्दश ॥ ३ ॥ पुरश्चरण
सम्भूतात्रिपुरायाःप्रकीर्त्तिताः ॥ द्वादशस्वेवलक्षेषुजप्तेष्वपिचसाधकः ॥ ४ ॥ एतानिसर्वद्रव्याणिजुहुयादनलोज्वले ॥ लक्षत्रयन्तुयोजप्त्वा
पुरश्चरणमाचरेत् ॥ ५ ॥ सतुसाज्यंसकर्पूरंजुहुयात्तुचतुष्टयम् ॥ दशभिर्नवलक्षेषुद्रव्यैर्म्मन्त्रीपुरश्चरेत् ॥ ६ ॥ जप्तेषुचाष्टभिःषट्सुसर्वैः
सर्वत्रचाचरेत् ॥ हस्तमात्रन्तुकुण्डंस्यात्षट्कोणन्त्र्यंगुलाधिकम् ॥ ७ ॥ त्रिपुरायास्तुमध्यायाबालायाश्चसदैवहि ॥ तथात्रिपुरभैरव्याः
कुण्डमानम्प्रकीर्त्तितम् ॥ ८ ॥ चतुष्कोणम्भवेत्कुण्डंहस्तमात्रद्वयेषुच ॥ अष्टांगुलाधिकम्प्रोक्तंवैष्णव्यास्तुपुरश्चरे ॥ ९ ॥ त्रिकोणंहस्त
मात्रन्तुकामाख्यायास्तुकुण्डकम् ॥ एवंसर्वप्रपञ्चानामासामपितथातथा ॥ १० ॥ संस्कुर्यादनलंवृद्धंविधिवद्वैष्णवीकृतौ ॥ कामाख्याया
स्तथाकुर्याज्योतिष्टोमादिमत्सुत॥११॥ आदौत्रिपुरभैरव्याश्चतुर्भिर्दशभिस्तथा ॥ जुहुयादनलेवृद्धेआहुतीश्चचतुर्दश ॥१२॥ पश्चात्तुमूलम

न्त्रेणअष्टोत्तरशतत्रयम् ॥ होमंयन्नववातेनशतानिनववाथवा ॥ १३ ॥ जपान्तेतुबलिन्दद्याद्वैवैष्णव्याबलिदानतः ॥ रत्नकर्पूरकनकान्यत्रै
वगुरुदक्षिणाः ॥ १४ ॥ अलाभेदधिपुष्पाज्यलाजैर्देव्याःपुरश्चरेत् ॥ लाभेचतुर्दशद्रव्यैर्जुहुयाद्विधिपूर्वकम् ॥ १५ ॥ अस्यायन्त्रंरहस्येन
शृणुवेतालभैरव ॥ यत्कृत्वैवाखिलान्कामाँल्लभतेनरसत्तम ॥ १६ ॥ षट्कोणम्मडलंकृत्वातत्तुकोणत्रयेलिखेत् ॥ मन्त्रन्त्रिपुरभैरव्यास्त्रिव
र्णन्तुततस्त्वधः ॥ १७ ॥ आद्यायास्त्रिपुरायास्तुत्रिबीजानिलिखेदनु ॥ मध्यबीजत्रयम्मध्येलिखित्वापीठयन्त्रके ॥ १८ ॥ सर्वैस्तुमातृका
वर्णैस्त्रिधासंवेष्टयेदनु ॥ लाक्षारसैर्लिखित्वातुत्रिलोहैर्वेष्टयेत्ततः ॥ १९ ॥ तद्धार्यम्मूर्ध्निसततन्तेनसर्वजयीभवेत् ॥ रूपवान्बलवान्वाग्मी
धनरत्नयुतःसदा ॥ २० ॥ दीर्घायुःकामभोगीचसुप्रजःसचजायते ॥ मध्येबीजंलिखित्वैकम्मूर्ध्निचाधस्तथापरम् ॥ २१ ॥ आद्यायास्तद्वदे
वात्रभैरव्यास्तद्वदेवहि ॥ इमानिषड्मन्त्राणिक्रमाद्वेतालभैरव ॥ २२ ॥ पूर्ववत्सँल्लिखित्वैवसंवेष्टयाथत्रिलोहकैः ॥ वामेबाहौदक्षिणेचहृदिक
ण्ठेकरेतथा ॥ २३ ॥ मूर्ध्निधार्याणिक्रमतःफलमेतच्चतद्भयम् ॥ सम्पत्सौभाग्यसंस्तम्भवशीकरणमोहनम् ॥ २४ ॥ कवित्वमथसर्वत्रभवेदे
तन्नसंशयः ॥ यन्त्रमन्त्राणितन्त्राणित्रैपराणितुभैरव ॥ २५ ॥ सपञ्चषट्सहस्राणिमन्त्रौघैस्त्रिगुणीकृतैः ॥ तज्ज्ञात्वापूजकोधीमान्परत्रेहन
सीदति ॥ २६ ॥ मन्त्रौघैस्तंत्रमन्त्रैरविचलितपदन्त्रैपुरंयत्प्रधानंयद्विप्राद्यैरदेयंविगतभयपदंयत्कवित्वप्रदातृ ॥ त्रैवर्गीयन्त्रिरूपन्त्रिदिव
मथसुरायत्रसन्तित्रयोपितज्ज्ञानौघैःसुभूतंसकलशुभफलंयन्महस्त्रैपुराख्यम् ॥ २७ ॥ कवचन्त्रिपुरायास्तुशृणुवेतालभैरव ॥ यज्ज्ञात्वा
मन्त्रवित्सम्यक्फलमाप्नोतिपूजने ॥ २८ ॥ उपचाराःपुराप्रोक्तायेनएवात्रपूजने ॥ प्रतिपत्तिस्तुसैवात्रकीर्तितानित्यपूजने ॥ कवच

स्यचमहात्म्यमहंब्रह्मानकेशवः ॥ २९ ॥ वक्तुंक्षमस्त्वनन्तोपिबहुजिह्वःकदाचन ॥ क्रव्याद्भयंनलभतेतथातोयपरिप्लुवे ॥ ३० ॥ कवच
स्मरणादेवसर्वकल्याणमाप्नुयात् ॥ त्रिपुराकवचस्यास्यऋषिर्दक्षिणउच्यते ॥ ३१ ॥ छन्दश्चित्राह्वयम्प्रोक्तन्देवीत्रिपुरभैरवी ॥ धर्म्मार्थ
काममोक्षाणांविनियोगस्तुसाधने ॥ ३२ ॥ यथाद्यात्रिपुराख्यायाबीजानिक्रमतःसुत ॥ नामतोवाग्भवादीनिकीर्तितानिमयापुरा ॥ ३३ ॥
तथात्रिपुरभैरव्याबीजानामपिनामतः ॥ वाग्भवःकामराजश्चतथात्रैलोक्यमोहनः ॥ ३४ ॥ अवतुसकलशीर्षेवाग्भवेवाचमुग्रांनिखि
लरचितकामान्कामराजोवतान्मे ॥ सकलकरणवर्गंडामरःपातुनित्यन्तनुगतबहुतेजोवर्द्धयन्बुद्धिहेतुः ॥ ३५ ॥ कूटैस्तुपञ्चभिरिदंगदितंहिय
न्त्रंमन्त्रंततोनुसततम्ममतेजउग्रम् ॥ तेजोमयम्महतिनित्यपरायणस्थन्तन्मेहृदिप्रविततन्तनुतांसुबुद्धिम् ॥ ३६ ॥ आधारेवाग्भवःपातुका
मराजस्तथाहृदि ॥ भ्रुवोर्म्मध्येचशीर्षेचपातुत्रैलोक्यमोहना ॥ ३७ ॥ विततकुलकलाज्ञाकामिनीभैरवीयात्रिपुरपुरदहाख्यासर्वलोकस्य
माता ॥ वितरतुममनित्यन्नाभिपद्मेसकुक्षौवनगतवनितानांरोगहानिंसुखञ्च ॥ ३८ ॥ योगैर्ज्जगन्तिपरिमोहयतीवनित्यंजागर्तियात्रिपुरभैरवभा
मिनीति ॥ सायञ्चभावकलितामममपञ्चभागेनासाक्षिकर्णरसनात्वचिपातुनित्यम् ॥ ३९ ॥ आद्यातुत्रिपुरेयंयामध्यायाकामदायिनी ॥ त्रि
धातुह्यवतान्नित्यंदेवीत्रिपुरभैरवी ॥ ४० ॥ उदयदिशिसदामाम्पातुबालातुमातायमदिशिममममध्याभद्रमुग्रंविदध्यात् ॥ वरुणपवनकाष्ठा
मध्यतोभैरवीमामवतुसकलरक्षांकुर्वतीसुन्दरीमे ॥ ४१ ॥ महायोनिर्महायोनेर्विश्वयोनिःसदैवतु ॥ सापातुत्रिपुरानित्यंसुन्दरीभैरवी
चया ॥ ४२ ॥ ललाटेसुभगादेवीपूर्वस्यान्दिशिकामदा ॥ नित्यन्तिष्ठतुरक्षन्तीसदात्रिपुरसुन्दरी ॥ ४३ ॥ भ्रुवोर्मध्येतथाग्नेया

न्दिशिमान्त्रिपुराचया ॥ वर्द्धयन्तीभगगणान्पातुत्रिपुरभैरवी ॥ ४४ ॥ वदनेदक्षिणस्याश्चदिशिमाम्भगसर्पिणी ॥ त्रिपुरायमदूतादीन्वारय
न्तीसदावतु ॥ ४५ ॥ कर्णयोःपश्चिमायाश्चदिशिमाम्भगमालिनी ॥ अयोनिजाजगद्योनिर्बालामान्त्रिपुरावतु ॥ ४६ ॥ अनङ्गकु
सुमाकण्ठेप्रतीच्यान्दिशिसुन्दरी ॥ त्रिपुराभैरवीमायानित्यम्पातुमहेश्वरी ॥ ४७ ॥ हृदिमारुतकाष्ठायान्देवीचानंगमेखला ॥ नाभावुदीच्यां
न्दिशिमाम्मातंगीत्रिपुरापरा ॥ ४८ ॥ अनंगमदनादेवीपातुत्रिपुरभैरवी ॥ एशान्यान्दिशिलिंगेचमदविभ्रममन्थरा ॥ ४९ ॥
वाग्वादिनीरक्षतुमांसदात्रिपुरभैरवी ॥ गुदमेढ्रान्तरेपातुरतिस्त्रिपुरभैरवी ॥ ५० ॥ हृदयाभ्यन्तरेप्रीतिःपातुत्रिपुरसुन्दरी ॥ भ्रूनासयोर्म
ध्यदेशेनित्यम्पातुमनोभवः ॥ ५१ ॥ द्रावणःशत्रुनःपातुवाणीमान्दुर्गमूर्द्धनि ॥ क्षोभणोमांसदापातुकव्याद्भ्योनिष्टभीतितः ॥ ५२ ॥ वशीक
रणवाणीमामग्रितःपातुराजतः ॥ आकर्षणाह्वयावाणीमाम्पातुशस्त्रघाततः ॥५३॥ मोहनःसर्वभूतेभ्यःपिशाचेभ्योजलात्तथा ॥ नित्यम्पातुम
हावाणस्तन्वानःकाममुत्तमम्॥५४॥मालामांशास्त्रबोधायशास्त्रवादेसदावतु॥पुस्तकम्पातुमनसिसङ्कल्पंवर्द्धयन्मम ॥५५॥ वरःपातुसदास्था
न्निस्थामतेजोविवर्द्धयन् ॥ प्रभयंह्यभयन्धत्तांसर्वेभ्योभूतिभावनम् ॥५६॥ ऊर्ध्वाधोभावभूतास्थिततरकरणैरक्तकीर्णासुचक्राकालाग्निप्रख्यरो
चिःसकलसुरगणैरर्चितामुण्डमाला ॥ ज्ञानध्यानैकतानाप्रबलबलकरन्तत्त्वभूतप्रतिष्ठम्पातादूर्ध्वंतथाधःसकलभयभृतोभोगभीरोस्तुविद्या ॥
॥ ५७ ॥ भूःपातुहृदिमान्नित्यंसःशीर्षेपातुनित्यशः ॥ वःपातुगुह्यदेशेमांसौःपातुकण्ठपार्श्वयोः ॥ ५८ ॥ वकारोममनाडीषुशिरःसौःपातु
सर्वदा ॥ शक्रःपातुसदाकाशेब्रह्मारक्षतुसर्वतः ॥ ५९ ॥ विद्याविद्याभाविनीकामरूपास्थूलाक्ष्मामाययायादिमाया ॥ ब्रह्मेन्द्राद्यैरर्चि

ताभीतिहन्त्रीरक्षांकुर्यात्सर्वतोभैरवीमाम् ॥ ६० ॥ आद्यामध्याभाविनीनीतियुक्तासम्यग्ज्ञानज्ञेयरूपापराया ॥ आदावन्तेमध्यभागेवता
रापायादेवीत्रैपुरीभैरवीया ॥ ६१ ॥ यन्मन्त्रभागतन्त्राणांयन्त्राणामपिकेशवः ॥ ब्रह्मारुद्रश्चजानातितत्त्वन्नान्योनमोस्तुतान् ॥ ६२ ॥
त्वम्ब्रह्माणिभवानिविश्वभावितुर्लक्ष्मीरातिर्योगिनीत्वंवाग्मीसुभगाभवायुतयुगम्मन्त्राक्षरन्निष्कलम् ॥ वर्णास्तेनिखिलास्तनावचलितस्त्वंका
मिनीकामदात्वंदेवित्रिपुरेकावित्वममलंसौभाग्यमुच्चैःकुरु ॥ ६३ ॥ इदन्तुकवचन्देव्यायोजानातिसमन्त्रवित् ॥ नाधयोव्याधयस्तस्यन
भयञ्चसदाक्वचित् ॥ ६४ ॥ इतितेपरमंगुह्यमाख्यातंकवचम्परम् ॥ तद्भजस्वमहाभागततःसिद्धिमवाप्स्यसि ॥ ६५ ॥ इदम्पवित्रम्परम
म्पुण्यंकीर्त्तिविवर्द्धनम् ॥ त्रिपुरायास्त्रिमूर्त्तेस्तुकवचम्मयकोदितम् ॥ ६६ ॥ यःपठेत्प्रातरुत्थायसप्राप्नोतिमनोगतम् ॥ लिखितंकवचंय
स्तुकण्ठेगृह्णातिमन्त्रवित् ॥ ६७ ॥ नतस्यगात्रंकृन्तन्तिरणेशस्त्राणिभैरव ॥ संग्रामेशास्त्रवादेचविजयस्तस्यजायते ॥ ६८ ॥ इदंकवच
मज्ञात्वायोजपेत्त्रिपुरान्नरः ॥ सशस्त्रघातमाप्नोतिभैरवींसुन्दरीमपि ॥ ६९ ॥ बीजमुच्चारयेत्स्वस्थोगतवाग्दोषनिश्चितः ॥ संयोगबोधः
प्रत्येकभेदश्रवणगोचरः ॥ ७० ॥ यथैवजायतेसम्यग्यज्ञादिदोदवर्ज्जितः ॥ यस्योच्चारणकृत्येतुसंयोगोबोधदूषणम् ॥ ७१ ॥ प्रत्येकभि
न्नताबोधःसकुष्ठीजायतेनरः ॥ न्यासानाम्प्रचुरत्वेतुफलानामपिभूरिता ॥ ७२ ॥ उक्तन्यासोनहित्याज्योह्यधिकन्तुसमाचरेत् ॥ मयोक्त
न्यासमज्ञात्वानकृत्वावाप्रमादतः ॥७३ ॥ यःकुर्यात्पूजनन्देव्याआप्नुयात्समहापदम् ॥ मन्त्राक्षरस्यविन्यासःसर्वमन्त्रेषुकीर्त्तितः ॥ ७४ ॥
वैष्णवेचाथवारौद्रेमहाभागेथवापुनः ॥ मन्त्रेकलेवरगतेमहामायाप्रपूजने ॥ ७५ ॥ मन्त्रन्यासेनवाकुर्यात्कुर्याद्वान्यत्रवाचरेत् ॥ अंग

रागेषुसिन्दरम्पानेषुमदिरांतथा ॥ ७६ ॥ वस्त्रंरक्तन्तुकौशेयन्त्रिपुराप्रीतिदम्मतम् ॥ त्रयोदीपाःप्रदातव्याःपञ्चवासप्तभैरव ॥ ७७ ॥ इतो
न्यूनान्नप्रदद्यात्त्रिपुरायैकदाचन ॥ मल्लिकामालतीकुन्दंबकोद्रोणःसिताम्बुजम् ॥ ७८ ॥ शुक्लपुष्पाणित्रिपुराप्रीतिदानितुभैरव ॥ रक्ताम्बुजं
यवारक्ताकरवीरोथकोमलः ॥७९॥ रक्तंत्रिपुरभैरव्याःप्रीतिदा स्नेहकाश्चनैः ॥ इदन्तेकथितम्पुत्रसंक्षेपादेवभैरव ॥ ८० ॥ अवाप्यसिद्धिम्पर
मांस्वयंविस्तारयिष्यसि ॥ आराध्यत्वम्महामायामवाप्यचगणेशताम् ॥ ८१ ॥ कल्पमन्त्रौघमन्त्राणांभविष्यसिवितानकः ॥ अस्या
स्त्रिपुरभैरव्याःशुक्लरूपाणियानितु ॥ ८२ ॥ तानिसारस्वताख्यानिमन्त्राःसम्यगुदीरिताः ॥ सरस्वतीतुयादेवीवीणापुस्तकधारिणी ॥ ८३ ॥
स्रक्कमण्डलुहस्ताचदक्षिणेशुक्लवर्णिका ॥ महाचलस्यपृष्ठस्थासितपद्मोपरिस्थिता ॥ ८४ ॥ शुक्लवर्णाशुक्लवस्त्राशुक्लाभरणभूषिता ॥ तस्या
स्तुवाग्भवाद्याभ्यान्नेत्रबीजन्द्वितीयकम् ॥ ८५ ॥ कृत्वान्तेविनियोज्यैवमन्त्रम्प्राक्प्रतिपादितम् ॥ वरदाभयहस्ताचमालापुस्तकधारिणी ॥
॥ ८६ ॥ शुक्लपद्मासनगतासापरावाक्सरस्वती ॥ मालाबीजाद्यक्षरन्तुद्विरुक्तञ्चार्द्धचन्द्रकम् ॥ ८७ ॥ मन्त्रमस्याः पुराप्रोक्तन्तन्त्रंसामान्य
मीरितम् ॥ एपातुयारक्तवर्णामुण्डमालाविभूषिता ॥ ८८ ॥ तस्याःप्रोक्तःपुरामन्त्रःसातुवृद्धासरस्वती ॥ षष्ठोमन्त्रस्तथैतस्यास्त्रयोदशनिरू
पणे ॥ ८९ ॥ एपाःकवित्वशास्त्रौघतत्त्ववादविनिश्चये ॥ सुखसम्पत्करप्रोक्तानित्यमेवतुभैरव ॥ ९० ॥ अस्याप्यस्त्रैःसमस्तैश्चशुक्लरक्ता
दिभेदतः ॥ चतुःपष्टिर्मूर्त्तयश्चत्रैपुरादुतवाग्भवम् ॥ ९१ ॥ महामायायोगनिद्रामूलभूताजगत्प्रसुः ॥ जगन्माताजगद्धात्रीविद्याविद्यापरा
त्मिका ॥ ९२ ॥ तस्याएवमहाभागत्रिपुराद्याविभूतयः ॥ प्रस्तुताःकथितानित्यन्ताःस्वयंगतएवहि ॥ ९३ ॥ इतितेकथितम्पुत्रमहादेव्या

मनोहरम् ॥ रहस्यंवामदाक्षिण्यम्मन्त्रसिद्धिंशृणुष्वमे ॥ ९४ ॥ इतिश्रीकालिकापुराणेत्रिपुराकवचंनामैकोनाशीतितमोध्यायः ॥ ७९ ॥
श्रीभगवानुवाच ॥ ॥ मन्त्रशुद्धिमवेक्ष्यैवगृह्णीयान्मन्त्रमुत्तमम् ॥ तत्रसिद्धंसुसिद्धञ्चसाध्यमात्रत्वमेवच ॥ १ ॥ मन्त्रश्चतुर्विधम्प्रोक्तंत
द्विद्व्यक्षरभेदतः ॥ वर्णक्रमःशाश्वतस्तुयोमयाभाषितःपुरा ॥ २ ॥ तमादौभैरवज्ञात्वापश्चाच्चक्रंशृणुष्वमे ॥ वर्णानान्तुयुगादीनांवैष्णवीतन्त्र
संज्ञकः ॥ ३ ॥ यःप्रोक्तोभून्महामन्त्रस्तस्यासन्नक्षराणितु ॥ मूलभूतानितान्येवततोन्यानपिवर्द्धयेत् ॥ ४ ॥ अकारश्चककारश्चचटकारोत
थैवच ॥ तपकारौयकारश्चवर्गाद्याःपरिकीर्तिताः ॥ ५ ॥ आईऋऊइउऋलृलृएतेदीर्घदीर्घकाः ॥ एऐओऔविसर्गश्चबिन्द्वादिर्याज्ञिकस्तथा ॥
॥ ६ ॥ धनेरन्तरजाश्चेतिकीर्तितास्तुस्वराअमी ॥ खकारश्चगकारश्चङोवर्गःप्रकीर्तितः॥७॥व्यञ्जनकारादि छजौटकाञौपरमस्मृतः ॥ उकार
श्चडकारश्चभैरवशब्दादिरेवच ॥८॥ णकारान्तस्तृतीयोयंवर्गोठादिःप्रकीर्तितः ॥ थकारश्चदकारश्चधर्म्मशब्दादिरेवच ॥९॥ नवशब्दस्यचैवा
दिश्चतुर्थोवर्गउच्यते ॥ फलशब्दस्ययश्चादिर्बहुशब्दादिरेवच ॥ १० ॥ भकारोमनशब्दादिः पञ्चमोवर्गउच्यते ॥ यकारश्चरकाश्चलकारो
वस्तथैवच ॥ ११ ॥ एभिश्चतुर्वगकोयंषष्ठोभैरवउच्यते ॥ शषसाहः क्षकारश्चसंयोगः परिवेदकः ॥ १२ ॥ पञ्चभिः शेषवर्गोयंसप्तमः
परिकीर्तितः ॥ संयोगायोसंगलोमप्रतिलोमैरिमेसुत ॥ १३ ॥ वर्णाःस्युर्मन्त्रनामादौवाङमात्रोपिचभैरव ॥ चतुर्वर्गप्रदावर्णाःसुखदुःखक
रास्तथा ॥ १४ ॥ रोगश्चतेजसम्पूज्यपूजकाः परिकीर्तिताः ॥ अहंविष्णुश्चब्रह्माचगायत्रीब्रह्ममातृकाः ॥ १५ ॥ अपरम्ब्रह्मवर्णा
र्थेपरब्रह्मसुखप्रदम् ॥ अपरब्रह्मकुशलःपरम्ब्रह्माधिगच्छति ॥ १६ ॥ सिसृक्षुरीश्वरोवर्णाञ्जगन्तिस्वेच्छयापुनः ॥ ससर्जममवक्त्रेतांब्रह्मवक्त्रे

चवैन्यधात् ॥ १७ ॥ अहन्तुसकलान्वर्णान्न्यस्यभैरवतन्त्रकम् ॥ अकारबहुलम्पुत्रज्ञानमार्गंविवर्धयन् ॥ १८ ॥ यइमेगदितावर्णामयाव
र्णविनिश्चये ॥ मन्त्रशुद्धि विवेकार्थंवर्णचक्रन्ततःशृणु ॥ १९ ॥ शक्तिशम्भुस्वरूपिण्यौरेखेद्वेप्रथमंन्यसेत् ॥ तन्मध्यतःपुनारेखेविष्णुलक्ष्मी
तलेतथा ॥ २० ॥ तयोस्तुरेखयोर्म्मध्येद्वेरेखेसमतोन्यसेत् ॥ तस्यचक्रस्यचारेषुरेखास्तुपरिसंख्यया ॥२१॥ चतस्रस्तुप्रदातव्याःस्वरमध्ये
तुभैरव ॥ भिन्नानाञ्चतथावर्णाःसन्धयोष्टौप्रकीर्तिताः ॥ २२ ॥ नेमयस्तुचतस्रोस्यसन्धिमध्येषुकीर्तिताः ॥ अष्टारसंयुतश्चक्रश्चतुर्नेमिसम
न्वितम् ॥ २३ ॥ बहिर्वेष्टनसंयुक्तंवर्णचक्रंप्रकीर्तितम् ॥ मेषादीनाञ्चराशीनामुदयास्तप्रतिज्ञया ॥ २४ ॥ इदमेवभवेच्चक्रंज्ञानश्रीवृद्धिकारक
म् ॥ इदञ्चक्रंलिखित्वातुसमभूमावुदङ्मुखः॥२५॥प्राङ्मुखोवालिखेद्वर्णाञ्छुचिरिष्टन्नमन्गुरुम् ॥ प्रदक्षिणंलिखेत्तस्मिन्वर्णास्तेष्वेवतुक्रमात्
॥ २६ ॥ पुरोनेमावकारन्तुरकारश्चापिवैलिखेत् ॥ अकारंवर्जयेद्दीर्घमीकारश्चस्वरेषुवै ॥ २७ ॥ आकारादिक्षकारान्तंक्राइनञणवार्जितम् ॥
प्रदक्षिणक्रमादेवलिखित्वावर्णसञ्चयम् ॥ २८ ॥ स्वनामाद्यक्षरंगृह्यकुर्यात्तुगणनक्रमम् ॥ मन्त्रस्याद्यक्षरंयावत्सिद्धाद्यन्तत्रयोजयेत् ॥२९॥
नवैकपञ्चकेसिद्धःसाध्यःषड्युग्मपंक्तिषु ॥ त्रिसप्तैकादशेष्वेवसुसिद्धःपरिकीर्तितः ॥ ३० ॥ द्वादशाष्टचतुर्थेषुशास्त्रेवःपरिकीर्तितः ॥ सिद्धेने
वाचिरात्सिद्धिःसाध्यःकालेनसिद्ध्यति ॥ ३१ ॥ क्रमान्नाशयतेशत्रुःसुसिद्धःसिद्धिदोचिरात् ॥ योयोवर्णक्रमःप्रोक्तोमन्त्रेदाक्षिण्यगोचरे ॥
॥ ३२ ॥ वाम्याराधनमन्त्रेषुक्रमंशृण्विहभैरव ॥ ऋलृद्वयंङञणनावर्ज्याश्चवर्णगोचरे ॥ ३३ ॥ लिखेद्वामक्रमेणैवतत्रवर्णास्तुमन्त्रवित् ॥
नृसिंहार्कवराहाणांप्रासादप्रणवस्यच ॥ ३४ ॥ एकाक्षरद्व्यक्षराणान्नासिद्धादिविचिंतनम् ॥ बीजेषुचापिसर्वेषुदीक्षार्थेषुचभैरव॥३५ ॥ सिद्धा

दिचिन्तानोकार्याग्राह्यास्तुदशवश्यकम् ॥ सुसिद्धंकामदंग्राह्यंसाध्यसिद्धविचारणात् ॥ ३६ ॥ नग्राह्यःशात्रवोधीरैर्गृहीत्वाप्नोतिचापदम् ॥
योयस्यैकाक्षरोमन्त्रस्तन्नाम्नासानिगद्यते ॥३७॥ सहितश्चन्द्रबिन्दुभ्यान्तद्बीजमितिगद्यते ॥ तथाशक्रोनकारःस्यात्सार्द्धचन्द्रःसबिन्दुकः ॥
॥ ३८ ॥ सएवशक्रबीजंस्यात्तथान्यत्रापियोजयेत् ॥ मन्त्रोद्धारेषुसर्वत्रपरतःपरतःपुरः ॥ ३९ ॥ पूर्वतोपिपरेकार्यमनुक्तःपूर्वपक्षकः ॥ यदा
षोडशसाहस्रंवैष्णव्यामन्त्रसञ्चयम् ॥ ४० ॥ चक्रेनिरीक्ष्यतेतत्रषोडशारंतुचक्रकम् ॥ विंशतिस्तुसहस्राणित्रिपुरायायदीक्षते ॥ ४१ ॥ द्वा
त्रिंशारन्तत्रचक्रंलेखनीयंसदाबुधैः ॥ इदमेवमहाचक्रंषोडशारादिकंकृती ॥ ४२ ॥ कुर्यादधिकरेखाभिर्म्मन्त्रशुध्यन्तरेसुत ॥ इयन्तेकथिता
पुत्रमन्त्रसिद्धिरभीष्टदा ॥ ४३ ॥ जानातिसम्यक्यइमांसजयीकाममाप्नुयात् ॥ रहस्यम्परमम्पुत्रप्रयोगादिप्रकारतः ॥ ४४ ॥ वक्ष्यामितत्स
मासेनशृणुवेतालभैरव ॥ दन्तःपक्षबिडालस्यतत्त्वचापरिवेष्टितः ॥ ४५ ॥ निर्माल्येनतुवैष्णव्यातत्संवेष्टयगुणत्रयम् ॥ तत्तद्वावामसूत्रस्य
तत्तन्मन्त्रेणमन्त्रितम् ॥ ४६ ॥ गृहीत्वादक्षिणेपाणौमन्त्राणांशतमादितः ॥ सञ्चयेदथवैष्णव्याअष्टम्याम्नियतेन्द्रियः ॥ ४७ ॥ ततस्तुदक्षि
णेबाहौधार्ययन्त्रोत्तमम्बुधैः ॥ ततोद्वादशसिद्धिःस्याद्धर्त्ताचेत्राभितित्तिलीम् ॥ ४८ ॥ जयःसंग्रामवादेषुशरीरस्याप्यरोगिता ॥ वशकृद्राजपु
त्राणांराज्ञामपिचसन्ततम् ॥ ४९ ॥ भूतप्रेतपिशाचाश्चनोयान्तिनेत्रगोचरे ॥ योषितांसमदानान्तुवशकृच्चिन्तनात्सकृत् ॥ ५० ॥ रुधिरा
णांश्लेष्मणाञ्चधातूनांस्तम्भनन्तथा ॥ तेजसांस्तम्भकश्चैवचक्षुस्तेजःप्रदन्तथा ॥ ५१ ॥ मर्ध्निपक्षबिडालस्यहस्तंदत्वाशतत्रयम् ॥ वैष्णवीत
न्त्रमन्त्रन्तुजप्त्वातंस्थापयेद्गृहे ॥ ५२ ॥ तंबिडालन्तुयापश्येन्मलिनीवनितासुत ॥ नापुत्रासाभवित्रीतुकदाचिदपिभैरव ॥ ५३ ॥ तादृक्प

क्षविडालस्तुयस्यतिष्ठतिमन्दिरे ॥ मृतापत्यापितद्देहेजीवत्पुत्राप्रजायते ॥ ५४ ॥ कोकिलोभृङ्गराजोवाचकोरोवाशुकोथवा ॥ वैष्णवीतन्त्र
मन्त्रेणमान्त्रितोयत्रतिष्ठति ॥ ५५ ॥ विघ्नन्नमन्दिरेतस्यभवितृसुप्रजाभवेत् ॥ नसर्पास्तत्रगच्छन्तिगताःखादन्तिनोनरान् ॥ ५६ ॥ नारीन
बंधकीतस्यमन्दिरेपिप्रजायत ॥ पञ्चमर्तेश्चण्डिकायानिर्माल्यानिचपञ्चमः ॥ ५७ ॥ तेषांबलीनांमांसेनस्थाल्याम्पक्त्वादिनत्रयम् ॥ अष्ट
म्यांतत्पुनर्देव्यैदत्वातन्मन्त्रमन्त्रितैः ॥५८॥ तोयैरभ्युक्ष्यभुञ्जीयान्मनसाचिन्तयेच्छिवाम् ॥ तस्मिन्भुक्तेतुदीर्घायुर्जरारोगविवर्जितः॥५९॥
तेजस्वीशत्रुदमनःकविर्वाग्मीचजायते॥ललाटेमूर्ध्निकण्ठेचबाह्वोःपाण्योस्तथाहृदि॥६०॥वैष्णवीतन्त्रमन्त्रस्ययानिचाष्टाक्षराणिच ॥ लिखि
त्वातानिचैतेषुस्थानेषुमन्त्रविद्वधः॥६१॥कुंकुमंक्षीरमलयजातपंकःसुयावकैः॥ अष्टम्यांसंयतोभूत्वानवम्याम्प्रथमन्नरः ॥६२॥ प्रतिस्थानेन्य
स्यकरमष्टावष्टौजपेद्बुधः॥आवर्त्तनेनमन्त्राणान्ततोनुपूजयेच्छिवाम्॥६३ ॥ततस्तस्मिन्दिनेदेव्यैविजातीयंबलित्रयम्॥दत्वासहस्रम्मन्त्रस्यस
ङ्ख्ययाजपमारभेत्॥६४॥जपान्तेतुहविर्भुक्त्वासंयतोरजनीन्नयेत्॥एवंसकृत्कृतेपुत्ररणेतस्यपराजयः ॥ ६५ ॥ कदाचिदपिनोभूयान्नचवादेषुशा
स्त्रतः॥ विधिमेवंसकृत्कृत्वारणकालेयथातथा ॥ ६६ ॥ सदालिखेत्क्षत्रियस्तुविजयायरणेषुच ॥ अपरन्तुरणाष्टाङ्गंगुह्यमेतत्प्रकीर्त्तितम्॥६७॥
अनेनैवतुगुह्येनविजयीत्वम्भविष्यसि॥इतिनौकथितंसर्वंगुह्याद्गुह्यतरंशुभम् ॥६८॥ सुखसम्पत्करंमंत्रंयंत्रतन्त्रसमन्वितम्॥यच्छ्रोतुन्त्रिदशाः
सर्वेनित्यंवाञ्छन्तिचामृतम्॥६९॥तदिदन्तेसमाख्यातम्पुत्रवेतालभैरव॥एतत्सर्वंन्नरोज्ञात्वातत्त्वतःपुत्रभैरव ॥७०॥ सकामानाखिलान्प्राप्यानि
त्यंकैवल्यमाप्नुयात् ॥ शृणोतियःसकृदिदंकथ्यमानोद्विजोत्तमैः ॥ ७१ ॥ नतस्यविघ्नाजायन्तेनापुत्रःसचजायते ॥ दीर्घायुर्बलयुक्तश्चानि

त्यम्प्रमुदितःकृती ॥ ७२ ॥ वाञ्छितार्थमवाप्नोतिदेवीगृहमवाप्नुयात् ॥ गच्छतंकामरूपान्तःपीठन्नीलाचलाह्वयम् ॥ ७३ ॥ कामाख्यानि
लयंगुह्यंकुब्जिकापीठसञ्ज्ञकम् ॥ आकाशगंगायत्रास्तितज्जलैरभिषिच्यच ॥ ७४ ॥ तत्राराधयतम्पुत्रौमहामायांजगन्मयीम् ॥ साप्रसन्ना
चिराद्देवीवरदानौभविष्यति ॥ ७५ ॥ ॥ और्वउवाच ॥ ॥ इत्युक्त्वावृषभारूढस्तदावेतालभैरवौ ॥ सपुत्रौतुपरित्यज्यतत्रैवान्तरधीयत
॥ ७६ ॥ ततस्तौनाटकंशैलम्परित्यज्यतपस्विनौ ॥ आसेदतुर्महात्मानंवसिष्ठम्ब्रह्मणःसुतम् ॥ ७७ ॥ सतुसन्ध्याचलगतस्तौदृष्ट्वासमुप
स्थितौ ॥ सभाजयामासमुनिःशिष्यवत्तौहरात्मजौ ॥ ७८ ॥ ततस्तस्योपदेशेनवसिष्ठस्यमहात्मनः ॥ जग्मतुस्तौमहाशैलन्नीलंकामाख्य
यागतम् ॥ ७९ ॥ तत्रगत्वामहात्मानौवैष्णवीतन्त्रगोचरम् ॥ आदायजातान्तान्देवींमहामायांजगन्मयीम् ॥ ८० ॥ भैरवाख्यस्यलिंग
स्यनिकटस्थौशिवात्मनः ॥ आकाशगंगामाप्लाव्यस्थण्डिलेमण्डलोत्तमम् ॥ ८१ ॥ विधायनरशार्दूलौजेपतुर्मन्त्रमुत्तमम् ॥ तञ्चस्वाविधि
वन्मन्त्रंसिद्धमष्टाक्षरात्मकम् ॥ ८२ ॥ वेतालस्यतथासाध्यमष्टलक्षाणिसंख्यया ॥ त्रिभिर्वर्षैस्तुलक्षाणाञ्चतुर्णामन्ततस्ततः ॥ ८३ ॥ त्रि
धापुरश्चरणञ्चतौभक्त्यासमकुर्वताम् ॥ यद्यदौत्तरतन्त्रोक्तंकल्पोक्तम्पूजनेकृतम् ॥ ८४ ॥ तत्सर्वञ्चक्रतुस्तौतुतान्त्रिहायनसंवृतौः ॥ कामाख्या
त्रिपुरादीनामन्यासामापिपूजनम् ॥ ८५ ॥ सकृत्कृत्वापीठयात्राञ्चेरतुर्विधिवत्तदा ॥ एवन्तौबद्धकवचौकृतन्यासौहरात्मजौ ॥ ८६ ॥ सुप्रीता
चानुजग्राहमहामायाथतौतदा ॥ ध्यानस्थयोस्तुजपतोर्यजतोश्चजगन्मयी ॥ ८७ ॥ शिवालिंगंविनिर्भिद्यतदाप्रत्यक्षतांगता ॥ तस्यांविनि
र्गतायान्तुशिवलिंगान्त्रिधाभवत् ॥ ८८ ॥ भैरवोभैरवीचेतिहेरुकश्चतथात्रयः ॥ तान्ददर्शतदादेवींवेतालोभैरवस्तदा ॥ ८९ ॥ यथाध्यानग

तादृष्टावहिश्चापितथातथा ॥ तान्दृष्ट्वाचारुसर्वांगीम्पीनोन्नतपयोधराम् ॥ ९० ॥ वरदाभयहस्ताश्चसिद्धसूत्रासिधारिणीम् ॥ रक्तपद्मप्रतीका
शांसितप्रेतासनस्थिताम् ॥ ९१ ॥ निमील्यनयनद्वन्द्वन्तदावेतालभैरवौ ॥ त्राहित्राहिमहामायेऊचतुस्तौमुहुर्मुहुः ॥ ९२ ॥ ततस्तयामहादे
व्यातेजसाप्यायितौतुतौ ॥ पस्पर्शवरहस्तस्यचाग्रभागेनवैष्णवी ॥ ९३ ॥ आप्यायितौततस्तौतुस्पृष्टावपितथापुनः ॥ आसेदतुश्चदेवत्वम्म
नुष्यत्वंविहायच ॥ ९४ ॥ देवभूतौतदातौतुमहामायाञ्जगन्मयीम् ॥ स्तुतिभिर्नुतिभिश्चेतितदातुष्टुवतुःशिवाम् ॥९५॥ वेतालभैरवावूचतुः ॥
जयजयदेविसुरगणार्चितपादपंकजे ॥ विश्वस्यभूतिभाविनिशाशिमौलिकेलिविभाविनिगिरिजे ॥ ९६ ॥ नेत्रत्रयनिर्जितविवस्वद्विधुवह्निका
न्तितुलितकमलजे ॥ मध्यनेत्रनतभ्रूभंगभक्तरक्तमतिचयज्वायकविमलजे ॥ ९७ ॥ आज्ञाचक्रान्तशान्तनवकोटिकरोटितुल्यकान्त
शान्तशशधरे ॥ बहुमायकायभोगयोगतरंगसारस्यपद्मवसुचरे ॥ ९८ ॥ त्रिनाडिनीतमध्यबद्धविष्किरवल्लभशुभसुषुम्नसमाधारपरे ॥
विबुधरत्नविमोदिविश्वमूर्तिमहोमयानवसिषट्चक्रधरे ॥ ९९ ॥ आदिषोडशचक्रचुम्बितचारुदेहपीनतुंगकुचाचलालिंगितभूमिमध्यनागशा
कगते ॥ सिद्धिसूत्रवराभयासिशान्तपातकपंकजातकमूलमणिचतुर्बाहुयुते ॥ १०० ॥ ज्ञानतालकमन्त्रतन्त्रयोगियोगनिबद्धसार
भूतभङ्गविनोदकृते ॥ आत्मतत्त्वपरैकशाररत्नहारकमुक्तिसूक्तिविवेकासितप्रेतरते ॥ १ ॥ रत्नसारसमस्तसङ्गतरङ्गरागवियोगिमन्त्रशान्त
पूरविशेषकृते ॥ योगिनीगणनृत्यभृत्यभावननिबद्धनद्धहारकङ्कणमुख्यभूषणपते ॥ २ ॥ साट्टहासविनोदमोदितमुक्तकेशसुरेशनिबद्धदे
हपुटे ॥ देहिदेविशोकशोचनबन्धमोचनपापशापशुभगते ॥ ३ ॥ सर्वविद्यात्मिकांशुद्धाम्मन्त्रयन्त्रमयींशिवाम् ॥ प्रणमामिमहा

मायांलोकेवेदेचकीर्तिताम् ॥ ४ ॥ परापरात्मिकांनित्यांसाध्याधारैकसंस्थिताम् ॥ कामाह्वादकरीङ्कान्तांत्वांनमामिजगन्मयीम् ॥ ५ ॥
प्रपञ्चपरमव्यक्तञ्जगदेकविवर्द्धिनि ॥ प्रभावेनार्धरक्ताङ्गिदेवितुभ्यन्नमोस्तुते ॥ ६ ॥ कामाख्यानित्यरूपाख्यामहामायासरस्वती ॥
यालक्ष्मीर्विष्णुवक्षःस्थानमावोह्यच्युतांशिवाम् ॥ ७ ॥ मन्त्राणियस्यास्तन्त्राणिसहस्राणिचषोडश ॥ मन्त्रयन्त्रात्मकेतुभ्यन्नमोस्तुममपार्व
ति ॥ ८ ॥ इतिस्तुताततस्ताभ्याम्महामायाजगत्प्रसूः ॥ उवाचमुदिताचेतिवरंवरयतंयुवाम् ॥ ९ ॥ प्रत्यक्षतोमहामायाम्पूर्ववद्धचा
नगोचराम् ॥ तौदृष्ट्वाभर्गतनयौप्राहतुश्चेदमुत्तमम् ॥ १० ॥ ॥ वेतालभैरवावूचतः ॥ देव्यनेनशरीरेणभवत्याः शंकरस्यच ॥ प्रार्थयेशा
श्वतींसेवांनित्यंयावद्रविः शशी ॥ ११ ॥ नान्यंवरंसाधयावोमायेत्वत्तोजगन्मयि ॥ अन्यथातवभक्त्यैवस्थास्यावोगिरिकन्दरे ॥ १२ ॥
एवमुक्तातततस्ताभ्याम्महामायाजगन्मयी ॥ एवमस्त्वितिचोवाचभवत्वेवम्मुहुर्मुहुः ॥ १३ ॥ एवंसिद्धिर्जगद्धात्रीप्रोक्तास्वस्याथचूचुके ॥
निष्पीड्यकारयामासक्षीरधाराद्वयंशिवा ॥ १४ ॥ ततस्तुनिःसृतंक्षीरम्पाययामासभैरवम् ॥ वेतालञ्चमहाराजपिबतस्तौचतत्तदा ॥ १५ ॥
पीत्वातौचतदाक्षीरंदेवत्वम्प्राप्यशाश्वतम् ॥ अजरौचामरौभूतौमहातेजस्विनौशुभौ ॥ १६ ॥ तस्यास्तुक्षीरममृतंतत्पीत्वातौमहाबलौ ॥ पीयू
षपानात्सञ्जातौततस्तौप्राहवैष्णवी ॥ १७ ॥ गणानांदेवदेवस्यभवतश्चाधिपौयुवाम् ॥ द्वाःस्थौचानित्यमासन्नौनन्दिवद्भवतंसुतौ ॥ १८ ॥
और्वउवाच ॥ इत्युक्त्वाहरसम्मत्यामहामायाजगन्मयी ॥ योगिनीगणसंयुक्तातत्रैवान्तरधीयत ॥ १९ ॥ अन्तर्हितायान्तस्यान्तुतदावेताल
भैरवौ ॥ मुदितौपरमप्रीतौकृतकृत्यौबभूवतुः ॥ १२० ॥ अथागच्छद्देवगणैः सार्द्धंसप्रमथोहरः ॥ सभाजयितुमत्यर्थम्पुत्रौवेतालभै

खौ ॥ २१ ॥ तावासाद्यमहादेवस्तदानीलाह्वयंगिरिम् ॥ सकलन्दर्शयामासपीठन्तुस्थानभेदतः ॥ २२ ॥ कामाख्यायागुहान्तत्रदर्शयित्वामनोभवाम् ॥ ततः स्वीयांकामगुहाञ्छायाछत्रंस्वमालयम् ॥ २३ ॥ स्वकीयम्पञ्चमूर्तीनांसंस्थानञ्चाप्यदर्शयत् ॥ कामरूपस्य सकलम्पीठन्देवमयन्तथा ॥ २४ ॥ प्रत्येकन्दर्शयामासक्रमतस्त्रिपुरान्तकः ॥ प्रथमंकरतोयाख्यांसत्यगंगांसदाशिवाम् ॥ २५ ॥ पुण्यतोयमयींशुद्धान्दक्षिणाब्ध्येकगामिनीम् ॥ ततस्तुकामरूपस्यवायव्यान्त्रिपुरान्तकः ॥ २६ ॥ आत्मनोलिंगमतुलञ्जलपीशाख्यंव्यदर्शयत् ॥ यत्रनन्दीसमाराध्यमहादेवञ्जगत्पतिम् ॥ २७ ॥ अभिन्नेनशरीरेणगाणपत्यमवाप्नुयात् ॥ नन्दिकुण्डम्महाकुण्डंयत्रनन्दीपुराकरोत् ॥ २८ ॥ अभिषेकंलब्धवरंपीतंतोयमनुत्तमम् ॥ तत्रस्नात्वाचपीत्वाचकृतकृत्योनरोत्तमः ॥ २९ ॥ हरस्यसदनंयातिनन्दिनोपिमहाश्रियः ॥ तस्यासन्नेमहादेवींनातिदूरेव्यवस्थिताम् ॥ १३० ॥ सिद्धेश्वरायोनिरूपाम्महामायाञ्जगन्मयीम् ॥ त्र्यम्बकोदर्शयामासभैरवायमहात्मने ॥ ३१ ॥ यत्रनन्दीमहामायामाज्ञयाशशिधारिणः ॥ स्तुतिभिर्नतिभिःपूज्यगाणपत्यमवाप्नुयात् ॥ ३२ ॥ सुवर्णमानसस्तत्रनदमुख्योमनोहरः ॥ नन्दिनोनुग्रहायाशुमानसाख्यंसरस्तुतत् ॥ ३३ ॥ आगतञ्चाज्ञयाशम्भोःपूर्वमेवतपस्यतः ॥ जटोद्भवातत्रनदीहिमवत्प्रभवाशुभा ॥ ३४ ॥ यस्यांस्नात्वानरःपुण्यमाप्नोतिजाह्नवीसमम् ॥ गौरीविवाहसमयेसर्वैर्मातृगणैःकृतः ॥ ३५ ॥ जलाभिषेकोभर्गस्यजटाजूटेषुयःपुरा ॥ तैस्तोयैरभवद्यस्माज्जटोदाख्यानदीततः ॥ ३६ ॥ चैत्रेमासिसिताष्टम्यांस्नात्वायस्यान्नरोव्रजेत् ॥ पूर्णायुर्वैनरश्रेष्ठशिवस्यसदनम्प्राति ॥ ३७ ॥ द्वापारस्यतुयागङ्गात्रिःस्रोताख्यासरिद्वरा ॥ हिमवत्प्रभवाशुद्धचन्द्रबिम्बाद्विनिर्गता ॥ ३८ ॥ यस्यांस्नात्वामहामा

घ्याम्मातृयोनौनजायते ॥ चन्द्रसूर्य्यग्रहेस्नात्वाकैवल्यम्प्राप्नुयान्नरः ॥ ३९ ॥ सितप्रभानामनदीमहादेवावतारिता ॥ हिमवत्प्रभवासापिसिता
दक्षसमुद्रगा ॥ १४० ॥ तस्यान्दशहरायान्तुदशम्यांशुक्लपक्षके ॥ स्नात्वाविष्णुगृहेयातिनरोवैमुक्तपातकः ॥ ४१ ॥ नवतोयानामनदीततः
पूर्वस्थितापुरा ॥ नवन्नवन्नवन्नित्यंकुर्वन्तीसापुनातिहि ॥४२॥ नवतोयाततःप्रोक्ताहिमवत्प्रभवैवसा ॥ तस्यांस्नात्वामहामाघ्यान्नरोगच्छतिदेव
ताम् ॥ ४३ ॥ सम्पूर्णमाघमासन्तुस्नात्वाविष्णुगृहंव्रजेत् ॥ तासान्नदीनान्तुपतिरगदोनामवैनदः ॥ ४४ ॥ पीठपूर्वेस्थितःपुण्योब्रह्मपादसमु
द्भवः ॥ हिमवत्प्रभवःसोपिदेवगन्धर्वसेवितः ॥ ४५ ॥ तत्रस्नात्वाचपीत्वाचनरोब्रह्मगृहंव्रजेत् ॥ कार्तिकंसकलंमासंयोगदाख्येमहानदे ॥
॥ ४६ ॥ स्नानङ्करोतिमनुजस्तस्यपुण्यफलंशृणु ॥ इहलोकेत्वरोगःसप्राप्य चैवोत्तमंसुखम् ॥४७॥ शेषेब्रह्मगृहम्प्राप्यततोमोक्षमवाप्नुयात् ॥
नन्दिकुण्डेनरःस्नात्वानक्तङ्कुर्य्यात्तदानिशि ॥४८॥ ततःपरस्मिन्दिवसेगच्छेज्जल्पीशमन्दिरम् ॥ तत्रस्नात्वामहानद्याञ्जल्पीशम्प्रतिपूज्यच ॥
॥ ४९ ॥ तस्यान्निशिहविष्याशीसंयतस्तान्निशान्नयेत् ॥ ततोनुदिवसेप्राप्तेगच्छेत्सिद्धेश्वरींशिवाम् ॥ १५० ॥ ताम्पूजयेत्तथाष्टम्यामुपवास
न्तथाचरेत् ॥ चतुर्भुजातुसादेवीपीनोन्नतपयोधरा ॥ ५१ ॥ सिन्दूरपुञ्जसङ्काशाधत्तेकर्त्रीञ्चखर्परम् ॥ दक्षिणेवामबाहुभ्यामभीतिवरदा
यिनी ॥ ५२ ॥ जटामण्डितशीर्षाचरक्तपद्मोपरिस्थिता ॥ पञ्चाक्षरजपान्तादिर्मन्त्रोस्याःपरिकीर्तितः ॥ ५३ ॥ कामाख्यातन्त्रमेवास्याः
पूजनेतन्त्रमीरितम् ॥ एवंकृत्वानरोधीरःपुनर्योनौनजायते ॥ ५४ ॥ जामदग्न्यभयाद्भीताःक्षत्रियाःपर्वमेवये ॥ म्लेच्छच्छन्नान्युपादा
यजल्पीशंशरणंगताः ॥ ५५ ॥ तेम्लेच्छवाचः सततमार्य्यवाचश्चसर्वदा ॥ जल्पीशंसेवमानास्तेगोपायन्तिचतंहरम् ॥ ५६ ॥ तएवतुगुणा

स्तस्यमहाराजमनोहराः ॥ तोषयित्वातथासर्वाञ्जल्पीशम्पूजयेन्नरः ॥ ५७ ॥ वरदाभयहस्तोयन्द्विभुजः कुन्दसन्निभः ॥ तत्पुरुपस्यतुमन्त्रे
णपूजयेद्देवमुत्तमम् ॥ ५८ ॥ एवम्पुण्यकरः पीठोजल्पीशस्यमहात्मनः ॥ एवञ्ज्ञात्वानरोयातिशंकरस्यपुरम्प्रति ॥ १५९ ॥ इतिकालिपुराणे
अशीतितमोध्यायः ॥ ८० ॥ ॥ मार्कण्डेयउवाच ॥ ॥ एतच्छ्रुत्वातुसंवादमुत्तमंशंकरस्यच ॥ भैरवस्यतुवेतालसहितस्यमहात्मनः ॥ १ ॥
भूयश्चसगरोराजामुनिमौर्वम्ममहामतिम् ॥ पप्रच्छमोदसंहृष्टःसूनृतंचेदमुत्तमम् ॥२॥ सगरउवाच ॥ ॥ विचित्रमिदमाख्यातम्भगवन्मुनिस
त्तम ॥ कामरूपस्यपीठस्यसंस्थानन्निर्णयन्तथा ॥ ३ ॥ भूयश्चश्रोतुमिच्छामिविस्तरेणमहामते ॥ वायव्यस्याथमध्यस्यपूर्वभागस्यानिर्णयम्
॥ ४ ॥ यथायस्मिन्निष्ठितोस्तिमहादेवोम्बिकातथा ॥ तत्सर्वम्मुनिशार्दूलकथयश्रोतुमुत्सहे ॥ ५ ॥ और्वउवाच ॥ उक्तो वायव्यभागस्यानिर्ण
योनृपसत्तम ॥ नैर्ऋत्योत्तरमध्याद्रेः शृण्विदानींविनिर्णयम् ॥ ६ ॥ बहुरोकानामनदीकरतोयाप्रदक्षिणे ॥ उत्तरश्रावणीचास्तेतत्पूर्वंकामरू
पकम् ॥ ७ ॥ सुरसोनामजीमूतः कामरूपन्ततः स्थितः ॥ नःसृतावहुरोकेतिनदीतस्माद्वृषप्रदा ॥ ८ ॥ आसन्नेसुरसाख्यस्यशिवालिंगो
महावृषः ॥ माहेश्वरीतत्रदेवीयोनिमण्डलरूपिणी ॥ ९॥ स्नात्वातुबहुरोकायामारुह्यसुरसाचलम् ॥ महावृषम्पूजायित्वामहादेवीम्महेश्वरीम्
॥ १० ॥ धूतपापोजितद्वन्द्वःपुनर्योनौनजायते ॥ चतुर्भुजोवृषारूढोवरदाभयशूलधृक् ॥ ११ ॥ शुद्धस्फटिकसंकाशोजटावान्समहावृषः ॥
अघोरस्यतुमन्त्रेणपूजास्यपरिकीर्तिता ॥ १२ ॥ कामेश्वर्य्याः स्वरूपन्तुमाहेश्वर्याः प्रकीर्तितम् ॥ पूजापियद्वदेवास्यास्तद्वत्फलप्रदायिका
॥१३॥ तत्रवसिष्ठकुन्डन्तुवसिष्ठमुनिसेवितम् ॥ यत्रस्थितोवसिष्ठस्तुनरकेणनिवारितः ॥१४॥ अप्राप्यगन्तुंजीमूतन्नीलाख्यंवासवस्तुतम् ॥

स्वस्नानार्थंकृतंतत्रकुण्डंदेवगणार्चितम् ॥१५॥ तत्रस्नात्वानरोयातिनाकपृष्ठंयथेच्छया ॥ सुरसस्यचपूर्वस्यांकृत्तिवासाह्वयोगिरिः ॥ १६ ॥
कृत्तिवासाःस्वयंतत्रसत्यासहावसत्पुरा ॥ चन्द्रिकाख्यानदीयत्रतस्यांस्नात्वादिवंव्रजेत् ॥१७॥ चन्द्रिकायान्नरःस्नात्वासम्पूज्यकृत्तिवाससम्॥
भाद्रशुक्लचतुर्थ्यांतुनिष्कलंकोभवेन्नरः ॥१८॥ पूर्णभाद्रपदंमासश्चन्द्रिकायान्नरोत्तमः॥स्नात्वागच्छंतिभूतेशन्दृष्ट्वैवकृत्तिवाससम् ॥१९॥उत्तर
स्राविणीनित्यश्चान्द्रिकाख्यासरिद्वरा ॥ नातिदूरेचन्द्रिकायाः पूर्वस्यान्दिशिफेनिला ॥ २० ॥ सञ्ज्ञयासासरिच्छ्रेष्ठाशतानन्दावतारिता ॥
ब्रह्मणोदुहितासातुगंगापर्वतसम्भवा ॥ २१ ॥ फेनिलायान्नरः स्नात्वाब्रह्मोत्थानादिनेपुनः ॥ फाल्गुनेमासिनरकञ्जित्वास्वर्गमवा
प्नुयात् ॥ २२ ॥ ततः सिताह्वयापूर्वसरिदुत्तरगामिनी ॥ तस्यांस्नात्वामहाचैत्र्यांगंगास्नानफलंलभेत् ॥ २३ ॥ ततःपूर्वे
सुमदनायोजनद्वितयान्तरे ॥ नदीजनकराजेनसमाराध्यवृषध्वजम् ॥ २४ ॥ हितायभैरवाख्यस्यसुतीक्ष्णादवतारिता ॥ सुतीक्ष्णंगिरिमा
रुह्यस्नात्वासुमदनाजले ॥ २५ ॥ माघशुक्लचतुर्थ्यान्तुपूजयित्वामहेश्वरम् ॥ सम्प्राप्यसकलान्कामाञ्छिवलोकायगच्छति ॥ २६ ॥ एता
नद्यःकामरूपैनैर्ऋत्यामुत्तरस्रवाः ॥ पीठस्यपूर्वतस्तत्रत्रिपुरायत्रपूज्यते ॥ २७ ॥ एवन्तेकथितंराजन्महापुण्यदमुत्तमम् ॥ कामरूपस्यनैर्ऋ
त्यांयत्रशम्भुःसदाम्बिका ॥ २८ ॥ पुरैवचमहाराजयानद्योदक्षिणस्रवाः ॥ हिमवत्प्रभवायाताःक्रमशःशृणुभूपते ॥ २९ ॥ अगदस्यनदस्यो
र्द्धम्भद्राख्यातुमहानदी ॥ भाद्रेकृष्णचतुर्दश्यांयस्यांस्नात्वादिवंव्रजेत् ॥ ३० ॥ ततःपूर्वसुभद्राख्यानदीपुण्यतमासदा ॥ वैशाखस्यतृतीया
यांयस्यांस्नात्वादिवंव्रजेत् ॥ ३१ ॥ ततस्तुमानसानामनदीपुण्यतमामता ॥ सरसोमानसाख्यात्तुतृणबिन्द्वतारिता ॥ ३२ ॥ वैशाखंसक

लम्पासन्तस्यांस्नात्वानरोत्तमः ॥ विष्णुलोकमवाप्यैवततोमोक्षमवाप्नुयात् ॥ ३३ ॥ हिमवन्निकटेशैलोविभ्राटासमहाद्युतिः ॥ यस्मिन्वसति
भूतेशःसदाभैरवरूपधृक् ॥ ३४ ॥ तस्मात्तुभैरवीनामनदीपुण्योदकाशुभा ॥ प्राङ्मानसाद्यास्रवतिगंगेवफलदायिनी ॥ ३५ ॥ यस्यांवसन्त
समयेस्नात्वागच्छतिवैदिवम् ॥ यस्यांसम्पूज्यकामाख्यामिष्टंज्ञानमवाप्नुयात् ॥ ३६ ॥ सम्पूज्याथमहामायान्द्विगुणम्प्राप्नुयात्फलम् ॥ ऊ
र्द्धन्ततोदेवगंगावर्णासाख्यासरिद्वरा ॥ ३७॥ हिमवत्प्रभवानित्यंफलदामानसोपमा ॥ सुभद्राद्यास्तुयाःप्रोक्तावर्णासान्ताःसरिद्वराः ॥ ३८ ॥
हिमवत्प्रभवास्तास्तुसर्वाएवोत्तरस्रवाः ॥ पूर्वेतुमदनायास्तुब्रह्मक्षेत्रस्यपश्चिमे ॥ ३९ ॥ रविक्षेत्रंयत्रदेवआदित्यःसततंस्थितः ॥ भैरवस्यहि
तार्थायत्रसर्वेश्वराःस्थिताः ॥ ४० ॥ कामरूपेमहापीठेब्रह्मेन्द्रवरुणादयः ॥ तदानत्वाह्वयेशैलेश्रीसूर्योपिव्यवस्थितः ॥ ४१ ॥ त्रिस्रोताना
मयस्यास्तिनदीपूर्वदिशिस्थिता ॥ कापोतकरणम्पश्चादस्यकुण्डद्वयंस्थितम् ॥ ४२ ॥ कापोतकुण्डेविधिवत्स्नात्वाकारणकुण्डके ॥ नत्वा
चलंसमारुह्यसम्पूज्यचदिवाकरम् ॥ ४३ ॥ सकृदेवनरोयातिभास्करस्यगृहम्प्रति ॥ सूर्यरश्मिसमुद्भूतंकापोतकरणामृतम् ॥ ४४ ॥ पुण्यतो
यसमाख्यातंपापंकापोतमेहर ॥ इत्यनेनतुमन्त्रेणस्नात्वाकापोतकेवरे ॥४५॥ करणंसमपस्पृश्यतत्वशैलेरविंयजेत् ॥ त्रिविधंब्रह्मबीजन्तुसहस्र
पदमन्ततः ॥ ४६ ॥ रश्मयेपिचतुर्थ्यन्तुदेवीजायातुचेष्टतः ॥ अंगबीजमिदंप्रोक्तमादित्यस्यातिकामदम् ॥ ४७ ॥ पद्मासनः
पद्मकरःपद्मगर्भसमद्युतिः ॥ सप्ताश्वःसप्तरज्जुश्चद्विभुजोभास्करःसदा ॥ ४८ ॥ वर्तुलम्मण्डलंचास्यअष्टपत्रसमन्वितम् ॥ अंगुष्ठाग्रांगु
लीनाञ्चहृदादीनान्तथाचषट् ॥ ४९ ॥ अंगमन्त्रेणसहितउपान्तेवह्निसंयुतः ॥ सर्वन्यासेसमुद्दिष्टोमन्त्रःसर्वफलप्रदः ॥ ५० ॥ हृच्छिरस्तु

शिखावर्मनेत्रास्योदरपृष्ठतः॥ बाह्वोःपाण्योर्जंघयोस्तुपादयोश्चापिविन्यसेत्॥५१॥ जघनेचसमस्तानिक्रमान्मन्त्राक्षराणिच॥क्रमाच्चोत्तरतः
प्रोक्तःपूजनेपरिकीर्तितः ॥५२॥ विसर्जनन्तथैशान्यांविद्याद्यादलशक्तयः ॥ निर्माल्यधृक्तत्वचण्डोमाठराद्यास्तुपार्श्वयोः॥५३॥ बीजमुत्तरत
न्त्रेस्यपूर्वतःप्रतिपादितम् ॥ अनेनविधिनातत्वेपूजयित्वानरोत्तमः ॥५४॥सकामानखिलान्प्राप्यइहलोकेत्वरुक्तनुः ॥ सुखीशेषेतथोगच्छेद्रा
स्करस्यालयम्प्रति ॥ ५५ ॥ नातिदूरेभास्करस्यदक्षिणस्यांशुभाह्वयः ॥ तस्योर्ध्वसानौवसतिलिङ्गशांकरमुत्तमम् ॥ ५६ ॥ परिवार्यसदा
यान्तिमहाकायास्तुवानराः ॥ परिवार्यावतिष्ठंतेसेवमानाश्चशंकरम् ॥ ५७ ॥ त्रिस्रोतायान्नरःस्नात्वायःपश्येत्तुशुभाचले ॥ महात्मानम्महा
देवंकाममिष्टंलभेन्नरः ॥ ५८ ॥ ततःपूर्वेसुरनदीनाम्नाकुसुममालिनी ॥ क्षीरोदाख्यापरातस्मात्तेगतेदक्षिणस्रवे ॥ ५९ ॥ एतेअपिमहाराज
पुण्यतोयेमृतस्रवे ॥ तयोःस्नात्वानरोयातिशंकरस्यालयम्प्रति ॥ ६० ॥ ततोपिपूर्वतोदेवीलीलाख्याचापरानदी ॥ यस्यांस्नात्वामहानद्यांशि
वलोकायगच्छति ॥ ६१ ॥ ततःपूर्वेशिवाचण्डीचण्डिकाख्यामहानदी ॥ निर्यातिधवलाख्यात्तुपर्वतात्सुमनोहरात् ॥ ६२ ॥ शिवलिङ्गद्व
यन्तत्रनातिदूरेव्यवस्थितम् ॥ गोलोकश्चाथशृङ्गंचक्रोशमान्त्रान्तरेस्थितम् ॥ ६३ ॥ चण्डिकायान्नरःस्नात्वाआरुह्यधवलेश्वरम् ॥ दक्षिणं
सागरंवीक्ष्यपृष्ठागोलोकसंज्ञकम् ॥ ६४ ॥ ततोवतीर्यचपुनःशृंगिणंभूमिपीठकम् ॥ शिवपूजाविधानेनपूजयित्वामहेश्वरम् ॥ ६५॥ अश्वमेध
स्ययज्ञस्यफलंसम्प्राप्यमानवः ॥ सर्वान्कामानवाप्येहदेहान्तेशिवतांव्रजत् ॥ ६६ ॥ एतायाःकथितानद्यःसर्वावैदक्षिणस्रवाः॥तस्मादीशान
काष्ठायाम्पर्वतोगन्धमादनः ॥ ६७ ॥ यत्रशृगाह्वयंलिंगंशिवस्यास्तेमहत्तरम् ॥ सएवपर्वतश्रेष्ठःप्राप्तःक्षेत्रस्यपश्चिमे ॥ ६८ ॥ धृत्वात्रह्मशि

लांदेवींसाचित्रंप्रतिगामिनी ॥ गन्धमादनकस्यांतेभृंगेशस्यपदद्वयम् ॥ ६९ ॥ स्रवद्गंगाजलंचास्तेकुण्डन्तत्रान्तरालकम् ॥ अन्तरालककुण्डेतुस्नात्वापीत्वाचतज्जलम् ॥ ७० ॥ भृंगेशस्यततोदृष्ट्वाशिलासंस्थम्पदद्वयम् ॥ पूजयित्वामहाभृंगंगाणपत्यमवाप्नुयात् ॥ ७१ ॥ शम्भुपादसमुद्भूतमन्तरालदृशाकरम् ॥ वृषध्वजपदानांत्वंसंयोजयमहावृष॥७२॥इत्यनेनतुमन्त्रेणस्नानङ्कृत्वान्तराजले ॥ भृंगदेवन्ततःपश्येत्कुब्जपीठान्तवासिनम् ॥ ७३ ॥ मणिकूटस्याथगिरेर्गन्धमादनकस्यच ॥ मध्येस्रवतिलौहित्योब्रह्मणाग्निसमुत्थितः ॥ ७४ ॥ वर्णाशायादक्षिणस्यांलोहित्योनामसागरः ॥ मणिकूटःस्थितःपूर्वेहयग्रीवोहरिर्यतः ॥७५॥ सहयग्रीवरूपेणविष्णुर्हत्वाज्वरासुरम् ॥ निहत्यसहयग्रीवःक्रीडायैयत्रसास्थितः ॥ ७६ ॥ हत्वाज्वरन्तथाविष्णुस्तत्रवासमथाकरोत् ॥ नरदेवासुरादीनांयथाभवतिवैहितम् ॥७७॥ ज्वरेणापीडिततनुर्ज्वरंहत्वामहासुरम् ॥ सर्वलोकहितार्थायसोगदस्थानमाहरत् ॥ ७८ ॥ अगदस्थानसम्भूतंसञ्जातञ्चमहासुरम् ॥ तस्यस्वयंहयग्रीवोनामचक्रेपुनर्भवम् ॥ ॥ ७९ ॥ नपुनर्ज्जायतेयस्मात्तत्रस्नात्वानरोत्तमः ॥ अपुनर्भवसञ्ज्ञंतत्सरस्तुपरिकीर्तितम् ॥ ८० ॥ मणिकूटाचलेविष्णुर्हयग्रीवस्वरूपधृक् ॥ शतव्यामप्रमाणेनविस्तरेणैवशोभितम् ॥ ८१ ॥ तस्मात्पूर्वेभद्रकामःपर्वतस्तुत्रिकोणकः ॥ यत्रकालहयोनामशिवालिङ्गोव्यवस्थितः॥८२॥ तस्यासन्नेदक्षिणस्यामपुनर्भ्वकुण्डकम् ॥ अपुनर्भूसरस्तीरेपर्वतेभद्रकामदे ॥ ८३ ॥ हरवीथीतिविख्याताशिलात्रब्रह्मस्वरूपिणी ॥ तत्रयोगीमहादेवोयोगज्ञोध्यानतत्परः ॥ ८४ ॥ यन्दृष्ट्वायोग्रवान्मर्त्योमृतोमोक्षमवाप्नुयात् ॥ तस्यामेवशिलायान्तुगोकर्णोनामशंकरः ॥ ८५ ॥ गोकर्णोनिहतोयेनअन्धकस्यसखापुरा ॥ गोकर्णस्यतथैशान्यांकेदारःशम्भुरन्ततः ॥ ८६ ॥ ततोऽन्धकसमःप्रोक्तःकमलाकरभोगधृक् ॥

यत्रास्तिशम्भुःकेदारःसगिरिर्म्मदनाह्वयः ॥ तत्रैवकमलःप्रोक्तःसमहात्मालयप्रदः ॥८७॥ स्नात्वापुनर्भवजलेदृष्ट्वागोकर्णयोगिनौ ॥ केदार
कमलौदृष्ट्वामुक्तिर्माधवदर्शने ॥ ८८ ॥ दृष्ट्वातुमाधवन्देवन्ततःकामंविलोकयेत् ॥ कामंविलोक्यतत्रस्थोनिरीक्षेदपुनर्भवम् ॥ ८९ ॥ एवंकृ
त्वापीठयात्रामनेनक्रमयोगतः ॥ सप्तपूर्वान्त्सप्तपरानात्मानन्दशपञ्चच ॥ ९० ॥ पितॄनुद्धृत्यत्रिदिवन्नयेत्सपुरुषोत्तमः ॥ विष्णुस्थानसमु
द्भूतापुनर्भवहरीश्वर ॥ ९१ ॥ पापंहरस्वर्गहेतोर्जितसङ्गमहोदधे ॥ अनेनैवतुमन्त्रेणस्नायाद्वीरोपुनर्भवेत् ॥ ९२ ॥ हयग्रीवस्यतन्त्रन्तुपुरैव
प्रतिपादितम् ॥ रूपंशृणुमहाराजाचिन्तयेत्तस्ययादृशम् ॥ ९३ ॥ कर्पूरकुन्दधवलःसितपद्मोपरिस्थितः ॥ चतुर्भुजःकुण्डलादिनानालंकार
भूषितः ॥ ९४ ॥ वरदाभयहस्तस्तुवामहस्तद्वयेनतु ॥ पुस्तकंसितपद्मञ्चधत्तेहस्तद्वयेपरे ॥ ९५ ॥ श्रीवत्सकौस्तुभोरस्कःक्वचिच्चगरुडास
नः ॥ सर्वउत्तरतन्त्रोक्तःक्रमोग्राह्यःप्रपूजने ॥ ९६ ॥ विष्वक्सेनोहयारेस्तुनिर्माल्यधृग्विसर्जने ॥ शिलारूपप्रतिच्छन्नःसदास्तेगरुडध्वजः॥
॥ ९७ ॥ क्रीडमानोथगन्धर्वैःस्थितोलोकहितायच ॥ हयग्रीवस्यमन्त्रस्यसिद्धिर्लक्षद्वयेनतु ॥ ९८ ॥ यावकैःपायसैराज्यैर्होमंकुर्वन्पु
रश्चरेत् ॥ एकेनैवतुराजेन्द्रपुरश्चरणकर्मणा ॥९९॥ इष्टसिद्धिमवाप्येहविष्णुलोकमवाप्नुयात् ॥ मन्त्रैस्तुपञ्चवक्त्राणाम्पञ्चमूर्त्तीःसदार्च्चयेत् ॥
॥ १०० ॥ पूर्वेतत्पुरुषादीनांकामादीन्पूजकोद्विजः ॥ कामस्तत्पुरुषोज्ञेयोयोगीशानःप्रकीर्त्तितः ॥ १ ॥ अघोरोह्यथगोकर्णःकेदारोवामदेव
कः ॥ सद्योजातस्तुकमलामन्त्रैस्तैस्तैःप्रपूजयेत् ॥२॥ पर्वतश्चैवकेदारःशिवगंगातुकालिका ॥ हयग्रीवस्यपूर्वस्यांकेदारस्यतुपश्चिमे ॥ ३ ॥
छायाभोगाह्वयस्यानम्पुरीभोगवतीतथा ॥ योगच्छेन्मणिकूटाख्यांकौतुकाच्चपुनर्भवम् ॥ ४ ॥ ससर्वतीर्थयात्राणांफलमाप्नोतिमानवः ॥

ज्येष्ठमासिसितेपक्षेपञ्चदश्यष्टमीषुच ॥ ५ ॥ स्नात्वापुनर्भवजलेयःपश्येद्विधिवद्धरिम् ॥ ससर्वैकुलमुद्धृत्यविष्णुसायुज्यमाप्नुयात् ॥ ६ ॥
ज्येष्ठन्तुसकलम्मासन्नित्यंपश्येत्तुयोहरिम् ॥ हरौविलीनतांयातिससर्वैःसहितःकुलैः ॥ ७ ॥ एतत्तेकथितम्पुण्यंमणिकूटाह्वयम्परम् ॥ वाराण
सीतोह्यधिकंसिद्धविद्याधरार्चितम् ॥ ८ ॥ यःपठेच्छृणुयाद्विप्रोमणिकूर्चस्यनिर्गमम् ॥ ससर्ववेदस्यफलम्प्राप्नोत्येवनसंशयः ॥
॥ १०९ ॥ इतिश्रीकालिकापुराणेएकाशीतितमोध्यायः ॥ ८१ ॥ ॥ छ ॥ ॥ और्वउवाच ॥ ॥ ततःपूर्वंमहाराजदर्पणोना
मपर्वतः ॥ कुबेरोयत्रवसतिधनपालैःसमंसदा ॥ १ ॥ यस्मिन्नास्तेमध्यभागेरोहितोरोहिताकृतिः ॥ यस्मिँल्लोहादिकंस्पृष्टंस्वर्णतांयातितत्स
णात् ॥ २ ॥ यत्रातिदूरेस्रवतिदर्पणोनामवैनदः ॥ हिमाद्रिप्रभवोनित्यंलौहित्यसदृशःफलैः ॥ ३ ॥ समुत्पन्नंहिलौहित्यंसर्वैर्देवगणैर्हरिः ॥
सर्वतीर्थोदकैःसम्यक्स्नापयामासतंसुतम् ॥ ४ ॥ तस्यस्नानसमुद्भूतःपापदर्पस्यपाटनः ॥ तेनायन्दर्पणोनामपुरादेवगणैःकृतः ॥ ५ ॥
तस्मिन्स्नात्वानदवरेयोर्चयेद्दर्प्पणाचले ॥ कुबेरम्प्रतिपत्तिथ्यांकार्त्तिकेशुक्लपक्षके ॥ ६ ॥ सयातिब्रह्मसदनमिहभूतिशतैर्युतः ॥ दर्पणाद्दिशि
पूर्वस्यामग्निमालाह्वयोगिरिः ॥ ७ ॥ सर्पाकारःसप्तशतव्यामदीर्घोर्द्ध्वविस्तृतः ॥ तत्रतिष्ठतिवैवह्निरूर्ध्वभागेग्निमण्डले ॥ ८ ॥ सिन्दूरपुञ्ज
संकाशोचारुदारुशिलातले ॥ तस्मिन्निरिन्धनोवह्निर्नित्यमद्यापिकाशते ॥ ९ ॥ भैरवस्यहितार्थायकामाख्यापरिसेवने ॥ पूर्वमेवास्थितस्तत्र
साक्षाद्वह्निर्गणैःसह ॥ १० ॥ लौहित्यपाथसिस्नात्वात्वग्निमालाह्वयंगिरिम् ॥ आरुह्यवह्निंसंपूज्यमोदतेविष्णुमन्दिरे ॥ ११ ॥ पुरस्तादग्नि
मालस्यकुण्डकंवारुणाह्वम् ॥ तस्यतीरेगिरिश्रेष्ठोनाम्नाकंसकरःस्मृतः ॥ १२ ॥ वरुणस्तत्रवसतिनित्यमेवजलाधिपः ॥ तस्मिन्कंसकरेस

म्यक्पूजयित्वाप्रचैतसम् ॥ १३ ॥ स्नात्वाचवारुणेकुण्डेवारुणँल्लोकमाप्नुयात् ॥ आद्यंव्यंजनमेवात्रपञ्चमस्वरसंयुतम् ॥ १४ ॥ शम्भु
चूडाशिखायुक्तंकौबेरम्बीजमुच्यते ॥ सप्तमोयंःपकारस्यबिन्दुश्चन्द्रार्द्धसंयुतः ॥ १५ ॥ वह्निबीजमितिख्यातन्तेनवह्निम्प्रपूजयेत् ॥ मकार
पञ्चमःसोमबिन्दुनावारुणःस्मृतः ॥ १६ ॥ एभिर्मन्त्रैरिमान्देवान्नित्यमेवप्रपूजयेम् ॥ वायुकूटोनामगिरिःपूर्वस्यांवरुणाचलात् ॥ १७ ॥
द्विखण्डोवायुबीजेनमण्डलेनसमन्वितः ॥ वायुलोकस्थितश्चन्द्रोयस्मान्निःसृत्यमारुतः ॥ १८ ॥ ऊर्ध्वाधोभागमासाद्यनित्यंवहतिभूपते ॥
तत्रवायुंसमभ्यर्च्यवायुलोकमवाप्नुयात् ॥ १९ ॥ पूर्वंवायुगिरेःशैलश्चन्द्रकूटइतिस्मृतः ॥ त्रिकोणश्चन्द्रसंकाशस्तदूर्ध्वेचन्द्रमण्डलम् ॥
॥ २० ॥ द्वितीयवर्गस्याद्यन्तुबिन्दुनासमलंकृतम् ॥ चन्द्रबीजमितिप्रोक्तन्तेनचन्द्रम्प्रपूजयेत् ॥ २१ ॥ अद्यापिप्रतिदर्शेतुपर्वतन्तान्निशा
पतिः ॥ प्रदक्षिणीकरोत्येवदशभिश्चापिखेचरैः ॥ २२ ॥ तस्यैवपूर्वभागेतुसोमकुण्डाह्वयंसरः ॥ तत्रस्नात्वाचपीत्वाचनरःकैवल्यमश्नुते
॥ २३ ॥ स्वर्गादवतरच्चन्द्रःकामाख्यासेवनेयदा ॥ तदातद्रश्मिसंघाताान्निःसृतास्तोयराशयः ॥ २४ ॥ तैस्तोयैर्वासवःकुण्डमकरो
दिन्द्रचन्द्रयोः ॥ मध्येपुण्यतमेस्थानेस्वयंब्रह्मशिलोपरि ॥ २५ ॥ चन्द्ररश्मिसमुद्भूतचन्द्रकुण्डमहोदधौ ॥ यंयम्भावंसमासाद्यत
श्चन्द्रकलुषंहरम् ॥ सुधास्रवणमाह्लादत्वश्चन्द्रकलुषंहर ॥ २६ ॥ इत्यनेनतुमन्त्रेणयःस्नात्वाचन्द्रपाथसि ॥ चन्द्रकूटंसमारुह्यपूजये
द्यस्तुतन्नरः ॥ २७ ॥ अविच्छिन्नासंततिस्तुसुकान्तातस्यजायते ॥ परत्रचन्द्रभवनाम्भित्वायातिपरम्पदम् ॥ २८ ॥ तीरेतुचन्द्रकूटस्य
नन्दनोनामवैगिरिः ॥ तस्मिन्वसतिशक्रस्तुकामाख्यासेवनेरतः ॥ २९ ॥ पञ्चभावंसमासाद्यसर्वदेवेश्वरोहरिः ॥ सेवितुन्त्रिदशेशानींसततं

वर्त्ततेनतः ॥३०॥ चन्द्रकूटस्यतुगिरेर्न्नन्दनस्यतथागिरेः ॥ प्रतिदर्शन्तथाचन्द्रःप्रदक्षिणयतित्रिधा ॥३१॥ चन्द्रकूटजलेस्नात्वासमारुह्या
थनन्दनम् ॥ आराध्यशक्रंलोकेशंमहाफलमवाप्नुयात् ॥३२॥ नन्दनात्पूर्वभागेतुभस्मकूटोमहागिरिः ॥ यःस्वयम्भर्गरूपःससदाचेच्छान्तमु
त्तमम् ॥ ३३ ॥ दक्षिणेभस्मकूटस्येदेवीपीयूषधारिणी ॥ उर्वशीनामविख्याताशक्रप्रीतिकरीसदा ॥३४॥ देवैर्यत्स्थापितम्पूर्वममृतम्भोजना
यवै ॥ कामाख्यायास्तदादा यस्वयंतिष्ठतिचोर्वशी ॥३५॥ शिलारूपोहरस्तान्तुसमावृत्यैवातिष्ठति ॥ साचैवामृतराशिन्तुकृत्वाकिञ्चनकिञ्चन
॥३६॥ उपस्थापयतेनित्यंकामाख्यायोनिमण्डले ॥ सुधाशिलान्तरस्थातुउर्वशीकुण्डवासिनी ॥ ३७ ॥ उर्वशीभस्मकूटस्यमध्येकुण्डंसदा
मृतम् ॥ द्वात्रिंशद्धनुराकीर्णम्पञ्चाशद्धनुरायतम्॥३८॥तत्रस्नात्वाचपीत्वाचनरोमोक्षमवाप्नुयात् ॥ कामाख्यायोनिरैशानीन्दिशंयातिसदैवहि॥
॥ ३९ ॥ भस्मकूटेप्रविशतिउर्वशीमपियोगिनी ॥ आप्यायिताचामृतेननित्यंदेवीप्रमोदते ॥ ४० ॥ मोदयुक्तामहादेवीकामेनमोदतेसदा ॥
भस्मकूटस्यचैशान्याम्मणिकूटोमहागिरिः ॥ ४१ ॥ मणिकर्णोनामहरस्तत्रतिष्ठतिलिंगकम् ॥ ससद्योजातरूपस्तुमणिकर्णइतीरितः॥४२॥
सद्योजातस्यमन्त्रणेपूजितव्यःसदाशिवः॥चन्द्रतीर्थजलेस्नात्वादृष्ट्वाचन्द्रंसवासवम्॥४३॥मणिकर्णेश्वरन्दृष्ट्वामुक्तिर्भस्माचलंगते ॥ श्वेतःश्वे
ताम्बरधरोदशाश्वोहेभभूषितः॥४४॥गदापाणिर्द्विबाहुश्चकर्त्तव्योवरदःशशी॥सहस्रनेत्रोगौरांगोद्विभुजोवामहस्तगम् ॥४५॥ वज्रंगदांकुशन्धत्ते
दक्षिणेनापिपणिना॥ ऐरावतगजस्थस्तुबाणतूणीरबन्धनः॥४६॥धनुश्चकक्षेगृह्णातिसेवमानोमहेश्वरीम् ॥ वकारानन्तरोवर्णश्चन्द्रबिन्दुसमान्वि
तः॥४७॥शक्रबीजामितिप्रोक्तंशक्रन्तेनप्रपूजयेत्॥नदीसुमंगलानामहिमपर्वतनिर्गता ॥४८॥ पूर्वस्यांमणिकूटस्यसदास्रवतिशोभना॥मणिकूटं

समारुह्ययस्ताम्पश्यतिवैनदीम् ॥ ४९ ॥ सगंगास्नानजम्पुण्यमवाप्यत्रिदिवंव्रजेत् ॥ मणिकूटाचलात्पूर्वमत्स्यध्वजकुलाचलः ॥ ५० ॥
निर्दग्धोयत्रमदनोहरनेत्राग्निनापुनः ॥ शरीरम्प्रापतपसासमाराध्यवृषध्वजम् ॥ ५१ ॥ तत्रमत्स्यस्वरूपस्तुकामदेवेनसांस्थितः ॥ अ
धित्यकायाम्पृथिवींवीक्षमाणःसमन्ततः ॥ ५२ ॥ नदीतुशाश्वतीनामतत्रास्तेदक्षिणस्रवा ॥ सरःकामसरोनामतत्रशैलेव्यवस्थितम् ॥
॥ ५३ ॥ शाश्वत्यांविधिवत्स्नात्वापीत्वाकामसरोम्भसि ॥ विमुक्तपापः शुद्धात्माशिवलोकेमहीयते ॥ ५४ ॥ गन्धमादनपूर्वस्यां
सुक्रान्तोनामपर्वतः ॥ तत्प्रान्तेवासवंकुण्डंवासवामृतभोजनम् ॥ ५५ ॥ यत्रास्थित्वादक्षिणस्याम्पुराशक्रःशचीपतिः ॥ अमृतंश्रान्त
देहस्तुकामरूपान्तरेपपौ ॥ ५६ ॥ स्नात्वातुवासवेकुण्डेसमारुह्यसुकान्तकम् ॥ वासवस्यप्रियोभूत्वाशक्रलोकमवाप्नुयात् ॥ ५७ ॥ पूर्वस्या
न्तुसुकान्तस्यरक्षःकूटाह्वयोगिरिः ॥ यत्रास्तेसततन्देवोनिर्ऋतीराक्षसेश्वरः ॥ ५८ ॥ खड्गहस्तोमहाकायोवामेचर्म्मधरस्तथा ॥ जटाजूटस
मायुक्तःप्रांशुःकृष्णाचलोपमः ॥ ५९ ॥ द्विभुजःकृष्णवासास्तुगर्द्दभोपरिसंस्थितः ॥ प्रान्तोपान्तौबिन्दुचन्द्रसहितावादिरेवच ॥ ६० ॥
नैर्ऋत्यङ्कथितम्बीजन्तेनतम्परिपूजयेत् ॥ रक्षःकूटंसमारुह्यनिर्ऋतिंराक्षसेश्वरम् ॥ ६१ ॥ यःपूजयेद्विधानेनचण्डिकांराक्षसेश्वरीम् ॥ नतस्य
राक्षसेभ्योस्तिभयन्नपकदाचन ॥ ६२ ॥ राक्षसाश्चपिशाचाश्चवेतालागणनायकाः ॥ तन्दृष्ट्वापुरुषंराजन्त्सर्वदैवप्रविभ्यति ॥ ६३ ॥ रक्षःकूटा
त्पूर्वदिशिभैरवोनाममाधवः ॥ पाण्डुनाथइतिख्यातोग्रावरूपेणसंस्थितः ॥ ६४ ॥ तम्पाण्डुनाथंसततमष्टाक्षरभवोत्तरम्[1] ॥ तेनैवपूजयेद्देव

१ अष्टाक्षरभवोद्भवम् इ० पा० ।

म्पाण्डुनाथाह्वयंहरिम् ॥ ६५ ॥ वर्णेनरक्तगौराङ्गंगदापद्मधरंकरे ॥ दक्षिणेचक्रशक्तीचबाहुभ्यामपिबिभ्रतम् ॥ ६६ ॥ चतुर्भुजरक्तपद्मसं
स्थितम्मुकुटोज्ज्वलम् ॥ कुण्डलेबिभ्रतंशुद्धेश्रीवत्सोरस्कमुत्तमम् ॥ ६७ ॥ नमोनारायणायेतिमूलबीजेनवाहरेः ॥ एवंसम्पूजयेद्धूपचतुर्वर्ग
स्यसिद्धये ॥ ६८ ॥ पाण्डुनाथस्योत्तरस्याम्ब्रह्मकूटाह्वयंसरः ॥ ब्रह्मणानिर्मितम्पूर्वंस्नानार्थंस्वर्गवासिनाम् ॥ ६९ ॥ आयामेनशतव्यासं
विस्तीर्णंत्वेतदर्द्धकम् ॥ सर्व्वपापहरम्पुण्यन्देवलोकात्समागतम् ॥ ७० ॥ कमण्डलुसमुद्भूतब्रह्मकुण्डामृतस्रव ॥ हरमेसर्वपापानिपुण्यं
स्वर्गश्चसाधय ॥ ७१ ॥ इत्यनेनतुमन्त्रेणस्नात्वातस्मिन्त्सरोजले ॥ पाण्डुनाथञ्चसम्पूज्यविष्णुसायुज्यमाप्नुयात् ॥ ७२ ॥ ब्रह्मकुण्डजले
स्नात्वापूजयित्वाउमापतिम् ॥ वायुकूटंसमारुह्यमुक्तिमेवाप्नुयान्नरः ॥ ७३ ॥ पाण्डुनाथात्पूर्वदिशिगिरिश्चित्रहरोहरिः ॥ सततंयत्ररमते
विष्णुर्वाराहरूपधृक् ॥ ७४ ॥ ततस्तुनीलकूटाख्यंकामाख्यानिलयम्परम् ॥ तत्पूर्वभागेवसतिब्रह्माब्रह्मगिरिःपुनः ॥ ७५ ॥ ब्रह्मशैलस्य
पूर्वस्याम्भूमिपीठेव्यवस्थितम् ॥ चारुनिम्नशुभावर्त्तकामाख्यानाभिमण्डलम् ॥ ७६ ॥ तवोग्रताराहूपेणरमतेपरमेश्वरी ॥ तत्रतेनै
वरूपेणपूजितव्याशुभात्मिका ॥ ७७ ॥ तस्यास्तुबीजम्पूर्वस्मिन्नुत्तरेप्रतिपादितम् ॥ रूपंशृणुनरश्रेष्ठयेनध्येयासदाशिवा ॥ ७८ ॥ कृष्णाल
म्बोदरीदीर्घाविरलारक्तदन्तिका ॥ चतुर्भुजाकृशांगीतुदक्षिणेकत्रिखर्पेरौ ॥ ७९ ॥ खड्गञ्चेन्दीवरंवामेशीर्षेचैकाजटापुनः ॥ वामपादंशवस्यो
र्वोर्निधायांघ्रिन्तुदक्षिणम्॥८०॥शवस्यहृदयेन्यस्यसाट्टहासम्प्रकुर्वती ॥ नागहारशिरोमालाभूषिताकामदापरा॥८१॥त्रिकोणंमण्डलञ्चास्या
हुंकारम्मध्यबीजकम्॥द्वारेशानांयोगिनीनान्नामान्यस्यान्तुतन्त्रके॥८२॥ज्ञेयानिनरशार्दूलयत्प्रोक्तंवाम्यगोचरे ॥उर्वश्यांविधिवत्स्नात्वास्पृष्ट्वा

पांडुशिलान्तथा।।८३॥नीलकूटंसमारुह्यपुनर्योनौनजायते ॥ पुरन्दरपुरायातेवाराणस्याःकलाधिके ॥८४॥ सुधासंकीर्णतोयौघैःपापंहरममो
र्वशि॥अमृतस्राविणीदेवीसुधौघपरिपूरणी ॥ ८५ ॥ अमृतेनामृतम्मेद्यदेहिदेविममोर्वशि ॥ पुरन्दरप्रियेदेविवाराणस्याःसदाम्बिके ॥ ८६ ॥
लोहित्यह्रदसंकीर्णेपापंहरममोर्वशि ॥ इत्येभिःस्तुतिभिर्मन्त्रैःस्नात्वापुण्योर्वशीजले ॥ ८७ ॥ सर्वपापविनिर्मुक्तोविष्णुलोकेविचेष्टते ॥
उर्वशीद्विभुजाप्रोक्तास्वर्णकंकणधारिणी॥८८॥सौवर्णपात्रममृतस्रावणायबिभर्त्तिच ॥ शुक्लवस्त्रागौरवर्णापीनोन्नतपयोधरा॥८९॥सर्वांगसुन्दरी
शुद्धासर्वाभरणभूषिता ॥ एतन्नामाद्यक्षरन्तुमन्त्रमस्याःप्रकीर्तितम् ॥ ९० ॥ उमातन्त्रेतुगदितम्मन्त्रमस्याःप्रकीर्त्तितम् ॥ गणेशःपूर्वद्वार
स्थःकामाख्यापर्वतस्यतु ॥ ९१ ॥ तत्रैवचाग्निवेतालःस्थितोद्वारिमनोहरः ॥ तयोरूपञ्चमन्त्रञ्चयथोक्तंशम्भुनापुरा ॥ ९२ ॥ तदहम्प्रतिव
क्ष्यामिमहाराजशृणुष्वमे ॥ ॐनमउल्कामुखायेतिमूलबीजादिसंगतम् ॥ ९३ ॥ मन्त्रंसिद्धगणेशस्यद्वारस्थस्यप्रकीर्त्तितम् ॥ रूपन्तस्य
प्रवक्ष्यामिगजवक्त्रन्त्रिलोचनम् ॥ ९४ ॥ लम्बोदरञ्चतुर्बाहुंव्यालयज्ञोपवीतिनम् ॥ सूर्यकर्णम्बृहद्गण्डमेकदन्तम्पृथूदरम् ॥ ९५ ॥ दक्षिणेतु
करेदण्डमुत्पलञ्चतथापरे ॥ लड्डुकम्परशुञ्चैववामतःपरिकीर्त्तितम् ॥९६॥ बृहत्वाक्षितगगनम्पीनस्कन्धांघ्रिपाणिनम् ॥ युक्तम्बुद्धिकुबुद्धिभ्या
मधस्तान्मूषकान्वितम् ॥ ९७ ॥ तन्त्रस्तुयादृशःप्रोक्तःपञ्चवक्त्रस्यपूजने ॥ सएवतन्त्रोग्राह्यस्तुतादृग्विधिनिषेधनम् ॥ ९८ ॥ द्विभुजः
पीनवदनोरक्तनेत्रोभयंकरः ॥ क्षुरिकान्दक्षिणेपाणौवामेरुधिरपात्रकम् ॥ ९९ ॥ दंष्ट्राकरालवदनःकृशोधमनिसन्ततः ॥ जटान्दीर्घाम्मूर्ध्नि

१ एभिर्म्मन्त्रैर्याःस्तुतयस्ताभिःस्नात्वेत्यर्थः । २ सुशोभनामितिवापाठः ।

विभ्रद्घोरएवयुतस्तथा ॥ १०० ॥ पचतुर्थोग्निबीजेनषष्ठस्वरविभूषितः ॥ अग्निवेतालबीजोयंसर्वत्रभयनाशकः ॥ १०१ ॥ पूजयेदग्निवेतालं
सर्वत्रभयकारणम् ॥ यःपूजयेत्तस्यपुनर्भूतादिभ्योभयन्नहि ॥ २ ॥ अष्टानामथमन्त्राणांयोगिनीनांक्रमान्नृप ॥ शैलपुत्रीप्रमुख्यानांमन्त्राण्य
ष्टाक्षराणितु ॥३॥ वैष्णवीतन्त्रसंस्थानिपूर्वप्रोक्तानितानितु ॥ शैलपुत्र्यास्तथाचांगमन्त्रम्प्राक्प्रतिपादितम् ॥ ४ ॥ रूपन्तुनरशार्दूलयोगिनी
नांविशेषतः ॥ प्रत्यक्षरेणबीजेनदुर्गातन्त्रेणवात्विमाः ॥ ५ ॥ नेत्रबीजेनैवपूज्यायोगिन्योनृपसत्तम ॥ कात्यायनीम्पाददुर्गान्दुर्गातन्त्रेणपू
जयेत् ॥ ६ ॥ तदेवपूजनंरूपन्तत्पूर्वम्प्रतिपादितम् ॥ कालरात्र्यास्तुमन्त्रेणकालरात्रिंप्रपूजयेत् ॥ ७ ॥ कालरात्र्यारूपमन्त्रौपुरैवप्रतिपा
दितौ ॥ महामायातन्त्रमन्त्रैःपूजयेद्भुवनेश्वरीम् ॥८॥एताःसर्वास्तुयोगिन्यःकामाख्यावत्फलप्रदाः॥विशेषोयत्रनैवोक्तोरूपेतन्त्रेचपूजने॥९॥
दुर्गातन्त्रेणमंत्रेणतत्रपूजांसमाचरेत्॥प्रत्येकंयोगिनींयस्तुपूजयेन्नरसत्तमः ॥१०॥ससर्वयज्ञस्यफलंप्राप्नोतिनरसत्तम॥नीलशैलस्यपूर्वस्मि
न्स्वरूपम्प्रतिपादितम् ॥ ११ ॥ नाभिमण्डलपूर्वस्याम्भस्मकूटस्यदक्षिणे ॥ पूर्वस्यांकर्पटोनामपर्वतोयमरूपधृक् ॥ १२ ॥ तत्रयाम्यशिला
कृष्णानीलाञ्जनसमप्रभा ॥ अधित्यकायांराजेंद्रयामपञ्चसुविस्तृता ॥ १३ ॥ पूजयेत्तत्रशमनम्पाणौदण्डंसदैवयः ॥ धत्तेतुपाणिनानित्यं
प्राणिदण्डस्यसाधनम् ॥ १४ ॥ कृष्णवर्णन्तुद्विभुजङ्किरीटमुकुटोज्ज्वलम् ॥ दधतश्चासिपुत्रीञ्चवामपाणौसदैवहि ॥ १५ ॥ कृष्णवस्त्रंस्थू
लपद्मम्वहिर्निःसृतदन्तकम् ॥ भयाभयप्रदन्नित्यन्नृणांमहिषवाहनम् ॥ १६ ॥ पूजयेत्परयाभक्त्यायाम्यबीजेनसाधकः ॥ उपान्तवर्गस्या
दियोवर्णोविंद्विन्दुसंयुतः ॥ १७ ॥ यमबीजमितिख्यातंयमस्यप्रीतिदायकम् ॥ अनेनैवतुमन्त्रेणशमनम्पूजयेत्तुयः ॥ १८ ॥ कर्पटाख्येऽच

लवरेनापमृत्युमवाप्नुयात् ॥ पूर्वस्यांकर्प्पटाख्यान्तुशैलाच्चित्रइतिस्मृतः ॥ १९ ॥ यःपूर्वभागप्रान्तेऽभूद्दिश्याग्नेय्यामवस्थितः ॥ पीठस्तुब्रह्म
ग्रावस्तुसप्राक्पर्वतउच्यते ॥ १२० ॥ तस्मिन्वसंतिसततंग्रहानवयथेच्छया ॥ तत्रतान्पूजयेद्यस्तुसनाप्नोत्यापदंक्वचित् ॥ २१ ॥ रूपम्म
न्त्रश्चसूर्यस्यचन्द्रस्यप्रतिपादितम् ॥ सप्तानामितरेषान्तुमन्त्रंरूपंशृणुष्वमे ॥ २२ ॥ रक्ताम्बरधरःशूलीशक्तिमाँश्चगदाधरः ॥ चतुर्भुजोमेष
रथोवरदोमंगलोमतः ॥ २३ ॥ पीताम्बरधरःशूलीपीतमाल्यानुलेपनः ॥ खड्गचर्म्मगदापाणिःसिंहस्थोवरदोबुधः ॥ २४ ॥ स्वर्णगौरःपीत
वासाःस्वर्णपर्यङ्कसंस्थितः॥मालाङ्कमण्डलुन्दण्डंवामेनवरदायकम् ॥ २५ ॥ चतुर्भुजश्चसर्वज्ञश्चिन्तयेद्देवतीर्थकम् ॥ सर्वैर्देवगणैर्नित्यन्तप्य
मानम्मनोहरम् ॥ २६ ॥ शुक्लवस्त्रंशुक्लवर्णंशंखनागोपरिस्थितम् ॥ चतुर्भुजम्पाशमालांपुस्तकञ्चवराभये ॥ २७ ॥ क्रमाद्दक्षिणवामायान्ध
त्तेदैत्यगुरुःसदा ॥ इन्द्रनीलनिभःशूलीवरदोगृध्रवाहनः ॥ २८ ॥ पाशबाणासनधरोध्यातव्योर्कसुतःसदा ॥ कामदेवस्यबीजन्तुमन्त्रम्भौ
मस्यकीर्त्तितम् ॥ २९ ॥ दुर्गायानेत्रबीजस्ययत्तुमध्याक्षरंशुभम् ॥ तन्मन्त्रंशशिपुत्रस्यसर्वकामफलप्रदम् ॥१३०॥ नकारपञ्चमोद्विस्तुचतुः
षट्स्वरसंयुतम् ॥ गणेशबीजान्तामिदंगुरोर्म्मन्त्रम्प्रकीर्त्तितम् ॥ ३१ ॥ बिन्द्विन्दुसंयुतञ्चापिपूर्ववर्णद्वयम्पुनः ॥ सप्तमस्वरसंयुक्तोमकरस्त्वा
दिरन्तरम् ॥ ३२ ॥ प्रान्तवर्गाद्यक्षरन्तुबिन्द्विन्दुभ्यांसमन्वितम् ॥ भवेच्छुक्रस्यबीजन्तुसर्वकामसमृद्धिदम् ॥ ३३ ॥ प्रान्तवर्गाद्यक्षरन्तुच
न्द्रबिन्दुसमन्वितम्॥आद्यमन्त्रस्वरोपेतन्तदेवेत्यादिसंयुतम् ॥३४॥ शनैश्चरस्यमन्त्रोयंसर्वदोषविनाशनः॥बिन्दुचन्द्रसमायुक्तन्नामाद्यक्षरमे
वा ॥३५॥ तेषांसर्वग्रहाणांवैमन्त्रमङ्गंप्रकीर्त्तितम् ॥ शान्तिकेपौष्टिकेकृत्येएभिर्म्मन्त्रैर्ग्रहानिमान् ॥३६॥ पूजयेत्सर्वदाधीरोभूतिकामोमहाम

तिः ॥ वरदाभयहस्तश्चखड्गचर्म्मधरस्तथा ॥३७॥ सिंहासनगतःकृष्णोबाहुर्द्धीरःप्रचक्ष्यते ॥ धूम्रवर्णोविशालाक्षःपुच्छरूपीचतुर्भुजः॥३८॥
खड्गचर्म्मगदाबाणपाणिःकेतुःशरासनः ॥ उपान्तादिर्द्वादशेनस्वरेणसहितःपुनः ॥३९॥ उपान्तःपञ्चमेनेन्दुबिन्दुभ्यांसहितावुभौ॥ मन्त्रो
यमनुलोमेनराहोःकेतोर्विलोमतः ॥ १४० ॥ आद्यक्षरम्पूर्ववद्वामन्त्रयुक्तमथैतयोः ॥ एवञ्चित्रेशैलवरेपूजयित्वानवग्रहान् ॥ ४१ ॥
अभीष्टाँल्लभतेकामान्नरःशान्तितथोत्तमाम् ॥ चित्रकूटात्तुपूर्वस्यांकज्जलाचलउत्तमः॥४२॥सर्वविद्याधराद्यास्तुसन्त्यस्मिन्देवयोनयः॥तम्पर्व
तंसमारुह्यप्रणम्यसकलान्त्सुरान् ॥ ४३ ॥ स्वर्गंयान्तिनरश्रेष्ठइहचाप्यतुलांश्रियम् ॥ कज्जलाचलशैलात्तुपूर्वस्मिञ्छुभपर्वतः ॥ ४४ ॥
शच्यासार्द्धम्पुरारेमेयत्रचक्रःसुरेश्वरः ॥ तत्पूर्वस्याम्महादेवीनदीकपिलगांगिका ॥ ४५ ॥ तस्यांस्नात्वानरोगंगास्नालजम्फलमाप्नुयात् ॥
कामाख्यानिलयात्पूर्वन्दक्षिणस्यान्तथादिशि ॥ ४६ ॥ विद्यतेमहदावर्त्तंभुवित्रह्मबिलम्महत् ॥ पञ्चविंशतिमानेनयोजनानान्नरेश्वर ॥४७॥
तस्मादायातिसुनदीसिताम्भोपमतोयभाक् ॥ कोत्रह्माकीर्त्तितोदेवैर्यस्मात्तस्यपिलात्सृता ॥४८॥ गंगेवफलदायस्मात्तस्मात्कपिलगांगिका ॥
स्नात्वाकपिलगंगायांसर्वमन्वन्तरेषुच ॥४९॥ नवःस्वर्गमवाप्यादौत्रह्मलोकन्ततोव्रजेत् ॥ अतीत्यतान्नदींपूर्वभागेदमनिकाह्वया ॥ १५० ॥
नदीमहाकृष्णतोयापापस्यदमनीतथा ॥ ततोवृद्धाह्वयाचाभूदपरासरिदुत्तमा ॥ ५१ ॥ तस्यानद्याः पूर्वभागेगंगावत्फलदायिनी ॥ माघन्तु
सकलम्मासंस्नात्वामुक्तिमवाप्नुयात् ॥ ५२ ॥ तथादमनिकायाश्चपरन्निर्वाणमाप्नुयात् ॥ ततः पूर्वेपरादेवीनाम्नासासरिदुत्तमा ॥ ५३ ॥
महतीदिव्ययमुनायमुनावत्फलप्रदा ॥ दक्षिणाद्रिसमुद्भूतादक्षिणोदधिगामिनी ॥ ५४ ॥ तस्यान्तुकार्त्तिकम्मासंस्नात्वामुक्तिमवाप्नुयात् ॥

इहचैवोत्तमान्भोगान्भागधेयान्प्रतिष्ठितान् ॥ ५५॥ तन्मध्येभैरवोदेवोभर्गसम्भोगसम्भवः ॥ दुर्ज्जयाख्येवरगिरावस्त्युपत्यकभूमिगः॥५६॥
योसौशरभरूपस्यमध्यखण्डोतिभैरवः ॥ सएवभैरवाख्योयम्पञ्चवक्त्रस्यमन्त्रकैः ॥ ५७ ॥ सम्पूज्यतत्रमतिमान्सयातिंशिवलोकताम् ॥
कामेश्वरस्ययापूजाकथितानीलनिर्णये ॥ ५८ ॥ सम्पूज्यश्चाचलश्रेष्ठेदुर्ज्जयेचाचलोत्तमे ॥ तत्रभैरवगंगास्तिसरोवैभैरवाह्वयम् ॥ ५९ ॥
तयोःस्नात्वानरोयातिशिवलोकंसनातनम् ॥ दुर्ज्जयाख्यस्यपूर्वस्याम्पुरन्नामवरासनम् ॥ १६० ॥ तद्दक्षिणेमहाशैलःक्षोभकोनामनामतः ॥
तस्मिन्गिरौशिलापृष्ठेरक्तदेवीव्यवस्थिता ॥ ६१ ॥ पञ्चपुष्करणीनाम्नापञ्चयोनिस्वरूपिणी ॥ एकत्रपञ्चभिर्दुर्गायोनिभिःपञ्चवक्त्रकम् ॥
॥६२ ॥ स्थितारमायितुन्तत्रनित्यमेवहिमाद्रिजा ॥ तच्छैलपूर्वभागेतुकान्तानाममहानदी ॥ ६३ ॥ दक्षिणंसागरंयातिप्रथमश्चोत्तरस्रवा ॥
दिव्यङ्कुण्डम्महाकुण्डन्तच्छैलोपत्यकाश्रितौ ॥ ६४ ॥ संस्थितंतत्रस्नात्वातुतान्देवीम्परिपूजयेत् ॥ दिव्यकुण्डेनरःस्नात्वापञ्चपुष्करणीं
शिवाम् ॥ ६५ ॥ यःपूजयेन्महाभागःसयोनौनहिजायते ॥ पञ्चयोन्यःपुष्करिणीःपञ्चैवपरिसंस्थिताः ॥ ६६ ॥ यतस्ततःपञ्च
रूपापञ्चपुष्करिणीमता ॥ यथावत्फलपुष्पाणितथैताः पञ्चयोनयः ॥ ६७ ॥ पञ्चपुष्करणीदेव्यःप्रचण्डाःसर्वकामदाः ॥ त्रिपुरा
यास्तुतन्त्रेणताःपूज्याःसाधकोत्तमैः ॥ ६८ ॥ कामेश्वरीतन्त्रमन्त्रैरथवापूजयेच्छिवाम् ॥ बालायास्त्रिपुरायास्तुमन्त्रमस्याःप्रकीर्त्ति
तम् ॥ ६९ ॥ कामेश्वर्यास्तुवामन्त्रम्पूजनेस्याःप्रकीर्त्तितम् ॥ उग्रचण्डाप्रचण्डाचचण्डोग्राचण्डनायिका ॥ १७० ॥ चण्डाचेति
चयोगिन्यःपञ्चास्याःपरिकीर्त्तिताः ॥ शिवालिंगश्चतत्रास्तिशिलायांहेरुकाह्वयम् ॥ ७१ ॥ देवीदक्षिणपूर्वस्यान्नायकन्तन्तुपूजयेत् ॥

भैरवस्यतुमन्त्रेणपूजयित्वादिवंव्रजेत् ॥ ७२ ॥ निर्म्माल्यधारिणीदेवीचण्डगौरीतिकीर्त्तिता ॥ एतस्यांनरशार्दूलपुराभर्गेणभाषिता ॥ ७३ ॥
कान्तायाःसलिलेस्नात्वावसन्तेमानवोत्तमः ॥ रूपवान्गुणवान्भूत्वाशिवलोकायगच्छति ॥ ७४ ॥ क्षोभकाख्यान्महाशैलादैशान्याम्पर्वतो
त्तमः ॥ तुंगसंध्याचलोनामवसिष्ठोयत्रशप्तवान् ॥ ७५ ॥ निमिनाम्नस्तुराजर्षेःशापाद्ब्रह्मसुतःपुरा ॥ वसिष्ठोह्यशरीरोभूत्तच्छापाच्चनिमिस्तथा
॥ ७६ ॥ ततोब्रह्मोपदेशेननिर्जनेकामरूपके ॥ सन्ध्याचलेतपस्तेपेतस्यविष्णुरभूत्तदा ॥ ७७ ॥ प्रत्यक्षस्तस्यदेवस्यवरदानान्महामुनिः ॥
अमृतान्यवतार्याशुकुण्डंकृत्वागिरेस्तटे॥७८॥तत्रस्नात्वाचपीत्वाचशरीरम्प्रापपूरितम् ॥ तस्मादमृतकुण्डाच्चसंध्यानामनदीवरा ॥ ७९॥निः
सृतातत्रचाप्लुत्याचिरायुरगदोभवेत् ॥ तस्मात्पूर्वन्तुललितालालिताख्यासारिद्वरा॥१८०॥ सागराद्दक्षिणात्पूर्वम्महादेवावतारिता ॥ वैशाखशुक्ल
पक्षस्यतृतीयायान्नरस्तुयः ॥ ८१ ॥ कुर्याद्वैललितास्नानंसशम्भुसदनंव्रजेत् ॥ ललितायाःपूर्वतीरेभगवान्नामपर्वतः ॥ ८२ ॥ स्वयंविष्णु
र्लिङ्गरूपीतत्रास्तेभगवान्हरिः ॥ ललितायान्नरःस्नात्वाद्वादश्यांशुक्लपक्षके ॥ ८३ ॥ भगवन्तंसमारुह्ययोयजेत्परमेश्वरम् ॥ सयातिविष्णुस
दनंशरीरेणविराजता ॥ ८४॥ एताःपूर्वोदितानद्यःसर्वाश्चैवोत्तरस्रवाः ॥ क्रमात्तुदक्षिणंयान्तिसागरञ्चाह्नवीसमाः ॥ ८५ ॥ कामाख्याम्प्रथम
न्दृष्ट्वास्नात्वाचैवोर्वशीजले ॥ यएतासुचरेत्स्नानंसतुमुक्तिमवाप्नुयात् ॥ १८६ ॥ ॥ इतिश्रीकालिकापुराणेद्व्यशीतितमोध्यायः ॥ ८२ ॥
॥ और्वउवाच ॥ ॥ शाश्वतीकथितायातुनदीमत्स्यध्वजासिता ॥ तस्याःपूर्वेसमाख्यातानदीदीपवतीमता ॥ १ ॥ एपाचहिमवज्जाताछि
न्दन्तीदीपवत्तमः ॥ तेनदेवमनुष्येपुनदीदीपवतीस्मृता ॥ २ ॥ दीपवत्याःपूर्वतस्तुशृंगाटोनामपर्वतः ॥ तत्रदेवस्यभर्गस्यालिंगमेकम्प्रति

ष्ठितम् ॥ ३ ॥ सरित्तुसिद्धात्रिःस्रोतादक्षिणोदधिगामिनी ॥ ४ ॥ शृंगाटकस्यसततंस्रवन्तीसातुपादतः ॥ दक्षिणंसागरंयातिभर्गस्यप्रिय
कारिणी ॥ ५ ॥ सलिलेयोनरःस्नात्वात्रिःस्रोतायानरोत्तमः ॥ शृंगाटकंसमारुह्यपूजयेल्लिंगशंकरम् ॥ ६ ॥ सदीप्तकायःशुद्धात्माप्राप्यका
मानिहातुलान् ॥ अन्तेभर्गगृहंयातिततोमोक्षमवाप्नुयात् ॥ ७ ॥ हरस्तुद्विभुजस्तस्मिन्त्सदावृषभवाहनः ॥ उमयारमतेसार्द्धंवामदेवस्यमन्त्र
कैः ॥ ८ ॥ तन्त्रैश्चपूजयेद्देवमुमामन्त्रेणचण्डिकाम् ॥ तत्पूर्वतोनिम्नगातुनाम्नातुवृद्धदेविका ॥ ९ ॥ तस्यांस्नात्वाफलम्मर्त्योदेविकास्नान
जंलभेत् ॥ ततोभट्टारिकानामहिमशैलसमुद्भवा ॥ १० ॥ महानदीदेवगणैर्यासदोपास्यतेसुखम् ॥ तस्यांयःकुरुतेस्नानंयुगादिषुचतुर्ष्वपि ॥
॥ ११ ॥ सयातिपरमंस्थानन्तद्विष्णोःपरमम्पदम् ॥ अस्तिनाटकशैलेतुसरोमानससन्निभम् ॥१२॥ यत्रसार्द्धंशैलपुत्र्याजलक्रीडांसदाहरः ॥
कुरुतेनरशार्दूलस्वर्णपंकजशोभिते ॥ १३ ॥ तस्यपश्चान्मध्यपूर्वभागेभ्यस्तुसारित्त्रयम् ॥ अवतीर्णम्प्रयात्येवदक्षिणंसागरम्प्रति ॥ १४ ॥
तस्यपश्चिमभागेतुनदीदिक्करिकाह्वया ॥ दिग्गजक्षतसञ्जातातेनदिक्करिकाह्वया ॥ १५ ॥ मध्यभागात्सृतायातुशंकरेणावतारिता ॥ वृद्धगंगा
ह्वयासातुगंगेवफलदायिनी ॥ १६ ॥ यानिःसृतापूर्वभागात्तस्माद्गिरिवरान्नदी ॥ सुवर्णस्राविणीख्यातासागंगासदृशीफले ॥ १७ ॥ कुर्वत्याः
सरसिस्नानम्पार्वत्याश्चशरीरतः ॥ निःसृताःस्वर्णकणिकास्तावहन्तिजलैरिमाः ॥ १८ ॥ क्रीडार्थंशम्भुनागात्रेकणिकाभिःसमाचिताः ॥ स्व
स्थानात्तत्रसंलग्नास्ततश्चन्दनन्बिदवः ॥ १९ ॥ ताउमायाःशरीरात्तुसंस्रवन्तिजलैःसह ॥ ततःस्वर्णवहानामस्वर्णश्रीःसर्वतोऽधिका
॥ २० ॥ एतासुचैत्रमासन्तुस्नात्वामर्त्योनरर्षभः ॥ कृष्णपक्षेचतुर्दश्यान्त्रिकालंयत्रमानवः ॥ २१ ॥ शिरंशिवगृहेस्थित्वाशेषेब्रह्मगृहंव्रजे

तं ॥ भूमाववगतःपश्चात्सार्वभौमोनृपोभवेत् ॥२२॥ वृद्धगंगाजलस्यान्तस्तीरेब्रह्मसुतस्यवै॥ विश्वनाथाह्वयोदेवःशिवलिंगसमन्वितः॥२३॥
विश्वदेवीमहादेवीयोनिमण्डलरूपिणी॥हयग्रीवेणयुयुधेतत्रदेवोजगत्पतिः ॥ २४ ॥ हयग्रीवंयत्रहत्वामणिकूटम्पुरागतम् ॥ तत्रयःपूजयेद्गौ
शारदांतन्त्रमन्त्रकैः ॥२५॥ हयग्रीवस्यमन्त्रेणतन्त्रेणगरुडध्वजम् ॥ कामेश्वरस्यतन्त्रेणमन्त्रेणापिचशंकरम् ॥२६॥ योयजेत्परयाभक्त्या
द्वादश्यांसमुपोषितः ॥ अपूम्याश्चचतुर्दश्यान्तस्यपुण्यफलंशृणु ॥२७॥ कल्पकोटित्रयंस्थित्वाशिवगेहेगृहेहरेः ॥ तावन्तंसंस्थितःकालन्ता
वन्तश्चशिवागृहे ॥२८॥ शेषेभुवंसमासाद्यवेदविद्ब्राह्मणोभवेत् ॥ नद्यःस्वर्णश्रियःपूर्वन्नदीकामाह्वयाशुभा ॥२९॥ कामायाःपूर्वभागेतुनदीशो
भासनाह्वया ॥ शोभासनायाःपूर्वस्यान्नदीनाम्नावृषोदका ॥ ३० ॥ ततःपूर्वेकामरूपम्पीठन्तेजगताम्प्रसूः ॥ जगन्मयीमहामायादेवीदिक्करवा
सिनी ॥ ३१ ॥ एतायाःकथितानद्यःसकलादक्षिणस्रवाः ॥ तासुस्नात्वाचपीत्वाचस्वर्गलोकमवाप्नुयात् ॥ ३२॥ प्रान्तेदिक्करवासिन्याःसदाव
हतिस्वर्णदी ॥ सितगंगाह्वयालोकेसाक्षाद्गंगाफलप्रदा ॥ ३३ ॥ साभूमिपीठसंस्थाचदेवीदिक्करवासिनी ॥ अन्तर्जलेप्लावयन्तीयातिप्रत्यक्षतां
सुरैः ॥ ३४ ॥ सितगंगाजलेस्नात्वादृष्ट्वाशम्भुंहरिंविधिम् ॥ इष्ट्वाललितकान्ताख्यंपुनर्योनौनजायते ॥ ३५ ॥ लिंगस्वरूपीभगवाञ्छम्भुस्तत्र
स्वयंस्थितः ॥ विष्णुःशिलास्वरूपेणब्रह्मालिंगस्वरूपधृक् ॥ ३६ ॥ पीठेदिक्करवासिन्याद्विरूपारमतोशिवा ॥ तीक्ष्णकान्ताह्वयात्वेकायोग्र
ताराप्रकीर्त्तिता ॥ ३७॥ परालिलितकान्ताख्यायाश्रीमंगलचण्डिका ॥ तस्यास्तुसततंरूपन्तीक्ष्णकान्ताह्वयन्नृप ॥३८॥ कृष्णालम्बोदरीया
तुसास्यादेकजटाशिवा ॥ तेनरूपेणतान्देवींसततम्पारिपूजयेत् ॥३९॥ अंगमन्त्रश्चरूपश्चतस्याःप्राक्प्रतिपादितम्॥त्रिकोणंमण्डलञ्चास्याःकर्त

व्यम्मन्त्रपूर्वकम् ॥४०॥ आदौरेखेततःपश्चात्सुरेखेतिपदन्ततः॥तथापदश्चाधिगम्यतिष्ठान्त्वातिपदन्ततः ॥४१॥ मण्डलस्यास्यमन्त्रोयन्ती
क्ष्णायाःपरिकीर्त्तितः॥ नरत्रिपुरदेवादियमवेतालदुर्द्धराः॥४२॥गणग्रामेत्यन्तकान्ताद्वारपालाःप्रकीर्त्तिताः॥ एताँस्तुपूजयेत्सम्यङ्मण्डलस्या
ष्टदिक्षुवै ॥ ४३ ॥ आदौसम्बोधनंकृत्वावज्रपुष्पन्ततःपरम् ॥ वह्निजायस्ततःपश्चान्मन्त्रमेषाम्प्रकीर्त्तितम् ॥४४॥ पात्रोपकरणादीनांस्था
नस्यान्यस्यसर्वतः ॥ सर्वमुत्तरतन्त्रोक्तंगुह्यंरूपद्वयेपिच ॥ ४५ ॥ चामुण्डाचकरालाचसुभगाभीषणाभगा ॥ विकटेतिचयोगिन्यःप्रोक्ताय
स्यास्तवैवपट् ॥ ४६ ॥ हेभगवत्येकजटेविघ्नहेपदमन्ततः ॥ विकटदंष्ट्रेधीमहितन्नस्तारेप्रचोदयात् ॥ ४७ ॥ एषातुतीक्ष्णगायत्रीपीठदेव्याः
प्रकीर्त्तिता ॥ निर्माल्यधारिणीचास्यादेवीविकटचाण्डिका ॥ ४८ ॥ मालातुमृन्मयीप्रोक्तारुद्राक्षसम्भवापिवा ॥ विशेषएषदेव्यास्तुपूजनेपरि
कीर्त्तितः ॥ ४९ ॥ उपचारादिकंकृत्यम्बलिदानञ्चपादिकम् ॥ सर्वन्तुपूर्ववद्वाह्यंकामाख्यापूजनेयथा ॥ ५० ॥ पानेषुमदिराशस्तानरो
बलिषुपार्थिव ॥ मोदकोनारिकेलश्चमांसव्यञ्जनमैक्षवम् ॥ ५१ ॥ नैवेद्येषुप्रियकरास्तीक्ष्णायाःपरिकीर्त्तिताः ॥ यैषाललितकान्ताख्यादे
वीमंगलचण्डिका ॥ ५२ ॥ वरदाभयहस्तासाद्विभुजागौरदेहिका ॥ रक्तपद्मासनस्थाचमुकुटोज्वलमंडिता ॥ ५३ ॥ रक्तकौशेयवस
नास्मितवक्त्राशुभानना ॥ नवयौवनसम्पन्नाचार्वंगीललितप्रभा ॥ ५४ ॥ उमायाभाषितम्मन्त्रंयत्पूर्वन्त्वेकमक्षरम् ॥ मन्त्रमस्यास्तुतज्ज्ञे
यन्तेनदेवीम्प्रपूजयेत् ॥ ५५ ॥ नारायण्यैविघ्नहेत्वांचण्डिकायैतुधीमहि ॥ तन्नोललितकान्तेतिततःपश्चात्प्रचोदयात् ॥ ५६ ॥ एषाल
लितगायत्रीदेव्याइष्टयैप्रकीर्तिता ॥ लोहितांगस्यदिवसःप्रियोस्याःपरिकीर्त्तितः ॥ ५७ ॥ कालोवसन्तकालश्चस्वरश्चापितुपञ्चमः ॥ अष्टम्या

श्चनवम्याञ्चपूजाकार्याविभूतये ॥ ५८ ॥ निर्माल्यधारिणीचास्यादेवीललितचाण्डिका ॥ दूर्वांकुरैःसमायुक्तमक्षतम्प्रीतिदम्परम् ॥ ५९ ॥
अयमस्याविशेषस्तु पूजनेपरिकीर्त्तितः ॥ वैष्णवीतन्त्रमन्त्रस्य तन्त्रंग्राह्यन्तुपूजने ॥ ६० ॥ उपचारोबलिश्चास्याविहितोयःक्रमःपुरा
महामायामहादेव्यास्तद्ग्राह्यम्परिपूजने ॥ ६१ ॥ स्वगात्ररुधिरन्दद्यादात्मनश्चहितायवै ॥ पटेपुप्रतिमायांवाघटेमंगलचाण्डिकाम् ॥ ६२ ॥
यःपूजयेद्भौमदिनेशुभैर्दूर्वांकुरैःशिवाम् ॥ सततंसाधकःसोपिकाममिष्टमवाप्नुयात् ॥६३॥ एवन्दिक्करवासिन्याःकथितःपूजनक्रमः ॥ यच्छ्रुत्वा
नाशुभंकिञ्चिदाप्नोतिश्रवणेरतः॥६४॥दिक्करस्त्वरुणःप्रोक्तस्तथाशम्भुश्चदिक्करः ॥ तस्मिन्नध्युषितादेवीतस्माद्दिक्करवासिनी॥६५॥ जगत्त्रयेपि
यस्यास्तुसदृशीकापिसुन्दरी॥नान्यास्तिललितातेनदेवीललितकान्तिका ॥६६॥ शंकरस्यपुराप्रोक्तोग्राह्योवैपूजनक्रमः ॥ शृणुराजन्नवहितो
ब्रह्मणःपूजनक्रमम् ॥६७॥ ब्रह्मबीजम्पुराप्रोक्तन्तन्मन्त्रंसवर्तश्चरेत् ॥ तेनैवतन्तुसम्पूज्यपरान्निर्वाणमाप्नुयात् ॥६८॥ एतस्यचांकमन्त्रस्तुयथा
भर्गेणभाषितम्॥वेतालभैरवाभ्यान्तुरूपञ्चशृणुभूमिप॥६९॥यस्तृतीयश्चवह्निश्चशेषःस्वरसमन्वितः ॥चन्द्रबिन्दुसमायुक्तोब्रह्ममन्त्रम्प्रकीर्त्ति
तम्॥७०॥अनेनैवतुमन्त्रेणब्रह्माणंयःप्रपूजयेत्॥सकाममिष्टंसम्प्राप्यब्रह्मलोकेषुमोदते॥७१॥ब्रह्माकमण्डलुधरश्चतुर्वक्त्रश्चतुर्भुजः ॥ कदाचिद्र
क्तकमलेहंसारूढःकदाचन ॥७२॥ वर्णेनरक्तगौरांगःप्रांशुस्तुंगांगउन्नतः ॥ कमण्डलुंवामकरेखुंचंहस्तेचदक्षिणे ॥७३॥ दक्षिणाधस्तथामलां
वामाधश्चतथास्रुवम् ॥ आज्यस्थालीवामपार्श्वेदेवाः सर्वेऽग्रतःस्थिताः ॥ ७४ ॥ सावित्रीवामपार्श्वस्थादक्षिणस्थासरस्वती ॥ सर्वेचऋ

१ हस्तेदधानइतिशेषः ।

षयोह्यग्रेकुर्यादेवंविचिन्तनम् ॥ ७५ ॥ चतुष्कोणंचतुर्द्वारमष्टपत्रसमन्वितम् ॥ चतुष्कोणेष्वंकितन्तुस्रुक्क्रमण्डलुस्रुक्स्रुवैः ॥ ७६ ॥ सम्मा
र्जनादिकंसर्वंयाश्चान्याःप्रतिपत्तयः ॥ दृष्टाश्चोत्तरतन्त्रोक्तायोगपीठेंगिकादिकाः ॥ ७७ ॥ आधारशक्तिप्रमुखांस्तथासर्वांस्तुपूजयेत् ॥
अष्टपत्रेषुपद्मस्यदिक्पालांश्चप्रपूजयेत् ॥ ७८ ॥ पद्मासनायविमहेहंसारूढायधीमहि ॥ तन्नोब्रह्मन्निति पदन्ततःपश्चात्प्रचोदयात् ॥ ७९ ॥
एषातुब्रह्मगायत्रीपूजयेदनयाविधिम् ॥ निर्माल्यधारीचैतस्यसनत्कुमारउच्यते ॥८०॥ उपचाराःपूर्ववत्तुनेत्राञ्जनविवर्जिताः ॥ रक्तकौशेयव
स्त्रन्तुब्रह्मप्रीतिकरम्परम् ॥ ८१ ॥ अन्नंसपायसंसर्पिस्तिलयुक्तञ्चभाजनम् ॥ सितरक्तसमायुक्तञ्चन्दनम्परिकीर्तितम् ॥ ८२ ॥ पार्श्वयोः
शंकरंविष्णुंपूजनेपूजयेत्पुरः ॥ स्रुवादीन्करसंस्थाँस्तुमण्डलेपरिपूजयेत् ॥ ८३ ॥ सरस्वतीञ्चसावित्रीहंसम्पद्मन्तथैवच ॥ अयंविशेषः
कथितः प्रणामश्चास्यदण्डवत् ॥ ८४ ॥ पद्मबीजभवामालाजपकर्मणिकीर्तिता ॥ पूर्णादर्शौतिथीग्राह्यौपूजाकर्मणिसर्वदा ॥ ८५ ॥
क्षीरेणार्घ्यम्प्रदद्यात्तुसर्वदाब्रह्मणेनृप ॥ अयन्तेकथितोभूपयथाभर्गेणभाषितः ॥ ८६ ॥ दर्शयतास्वपुत्राभ्यांकामरूपाह्वयंशुभम् ॥ यत्रतत्र
विधिश्चैवसाधकः परिपूजयेत् ॥ ८७ ॥ पीठेसम्यक्पूजयित्वापरन्निर्वाणमाप्नुयात् ॥ कथिताब्रह्मणः पूजापूजनंसृणुवैष्णवम् ॥ ८८ ॥ बीज
न्तुवासुदेवस्यपुरैवप्रतिपादितम् ॥ तदंगमन्त्रंराजेन्द्रद्वादशाक्षरमुच्यते ॥ ८९ ॥ ॐनमोभगवतेपूर्ववासुदेवायवैपरम् ॥ अंगमन्त्रमिदञ्चैव
वासुदेवस्यकीर्तितम् ॥ ९० ॥ अस्यप्रत्यङ्गरूपन्तुदधिवामनसंज्ञकम् ॥ तस्यमन्त्रन्नरश्रेष्ठशम्भुनाभाषितंशृणु ॥ ९१ ॥ ॐनमोविष्ण

१ ओं नमोविष्णवेसुरपतयेमहाबलायनस्वाहा ।

वेपूर्वम्पदन्तस्यप्रकीर्तितम् ॥ पदञ्चसुरपतयेचतुर्थ्यंतंमहाबलम् ॥ ९२ ॥ स्वाहान्तंहृदयासन्नंप्रत्यंगवैष्णवम्मतम् ॥ मन्त्रत्रयन्तुयोवेदं
बीजम्प्रत्यंगसंज्ञकम् ॥ ९३ ॥ सपुमान्देवकायस्तुनसभूयोभिजायते ॥ सर्वउत्तरतन्त्रोक्तःक्रमोग्राह्यःप्रपूजने ॥ ९४ ॥ त्रिषुमन्त्रेषुचसदा
विशेषंशृणुभूपते ॥ रूपन्तुबीजमन्त्रस्यप्रथमंशृणुभूपते ॥ ९५ ॥ पूर्णचन्द्रोपमःशुक्लःपक्षिराजोपरिस्थितः ॥ चतुर्भुजःपीतवस्त्रैस्त्रिभिःसंवी
तदेहभृत् ॥ ९६ ॥ दक्षिणोर्ध्वेगदान्धत्तेतदधोविकचाम्बुजम् ॥ वामोर्ध्वेचक्रमत्युग्रन्धत्तेऽधःशंखमेवच ॥ ९७ ॥ श्रीवत्सवक्षाःसततंकौ
स्तुभंहृदिचांशुमत्॥धत्तेकक्षेह्यधोवामेतूणीरम्बाणपूरितम् ॥९८॥ दक्षिणेकोपगङ्गङ्गन्नन्दकंसशरासनम् ॥ शीर्षेकिरीटंसूद्योतंकर्णयोःकुण्ड
लद्वयम् ॥ ९९ ॥ आजानुलंबिनीश्चित्रांवनमालांगलेस्थिताम् ॥ दधानन्दक्षिणेदेवींश्रियम्पार्श्वेतुबिभ्रतम् ॥ १०० ॥ सरस्वतींवा
मपार्श्वेचिंतयेद्वरदंहरिम् ॥ बीजमन्त्रस्यरूपञ्चकथितन्तवपार्थिव ॥ १ ॥ द्वादशाक्षरमन्त्रस्यरूपमेतच्छृणुष्वमे ॥ नीलोत्पलदलश्यामन्तथै
वचचतुर्भुजम् ॥ २ ॥ दक्षिणोर्ध्वस्थितम्पद्मंगदांचाथप्रयोजयेत् ॥ वामेधश्चक्रमतुलमूर्ध्वेशंखञ्चबिभ्रतम् ॥ ३ ॥ चिन्तयेद्वरदन्देवंसर्व
मन्यच्चपूर्ववत् ॥ अष्टादशाक्षरस्यास्यप्रत्यंगस्यचचिन्तनम् ॥ ४ ॥ शृणुराजन्नवहितोदारिद्र्यभयनाशनम् ॥ पूर्णेन्दुसदृशंकांत्याशुक्लवर्णं
विचिन्तयेत् ॥ ५ ॥ करेविचिन्तयेद्वामेपीयूषापूरितंघटम् ॥ दध्यन्नखण्डसंयुक्तंदक्षिणेस्वर्णभाजनम् ॥ ६ ॥ पद्मासनगतन्देवञ्चन्द्रमण्डल
मध्यगम् ॥ शुक्लवस्त्रधरंदेवम्प्रमाणाद्वामनंसदा ॥ ७ ॥ ईषद्धाससमायुक्तन्त्रिलोकेशन्त्रिविक्रमम् ॥ चिन्तयेद्वरदन्देवंसर्वकामफलप्रदम् ॥
॥ ८ ॥ दहनप्लवनादौचपूर्वतन्त्रोदितायथा ॥ तथामन्त्राःपरिग्राह्यास्तथाचोत्तरतन्त्रगाः ॥ ९ ॥ मण्डलस्यक्रमन्तस्यशृणुभर्गेणभाषितम् ॥

रेखयानित्यपूजासुरजोभिःपञ्चभिस्तथा ॥ ११० ॥ नैमित्तिकेयथाकार्यम्भेदाभेदेनसाम्प्रतम् ॥ हस्तमात्रञ्चतुर्द्वारंवर्त्तुलाम्बुजसन्निभम् ॥
॥ ११ ॥ चतुष्कोणेचतुर्भिस्तुशंखैर्युक्तम्मनोहरम् ॥ बद्धद्वारन्दिक्पतीनामायुधैःकरणैस्तथा ॥ १२ ॥ अष्टासुदिक्षुनिहितंसबाह्येर्वेष्टपद्मक
म् ॥ एवंयथारजोभिस्तुकार्यन्तच्छृणुपार्थिव ॥ १३ ॥ सितैःपीतैस्तथारक्तैःश्यामैश्चहरितैःक्रमात् ॥ रजोभिर्मण्डलंकुर्यादन्यथानसमाच
रेत् ॥ १४ ॥ चतुर्हस्तन्त्रिहस्तञ्चद्विहस्तंहस्तमात्रकम् ॥ सर्वत्रमण्डलंकुर्याद्यथोक्तंवाधिकम्पुनः ॥ १५ ॥ राजसूयाश्वमेधादौचतुर्हस्ताधि
कम्मतम् ॥ कल्पानतिक्रमाद्रूपयथोक्तंयत्रयत्रच ॥ १६ ॥ दिक्पालायुधपद्मानाम्पूर्ववल्लिखनक्रमः ॥ सितैरजोभिःकर्त्तव्यम्मध्येपद्मंसुवर्त्तु
लम् ॥१७॥ कर्णिकापीतवर्णास्यकेशराग्रन्तथारुणम्॥रक्तैःपीतैःपूरयेत्तुबहिःपद्मस्यसर्वतः ॥१८॥वज्रंशक्तिंलोहदण्डंखड्गम्पाशांकुशंगदाम्॥
शूलमष्टदिगीशानामायुधानिक्रमात्पुनः ॥१९॥शम्भुर्गौरीतथाब्रह्मारामःकृष्णस्तथैवच ॥ एतास्तुसततम्पूज्याःसंस्थिताःपञ्चदेवताः॥१२०॥
नकदाचिदधःकुर्याच्छम्भुगौर्योर्वियोजनम् ॥ वियोगेतुकृतापूजानिष्फलातस्यजायते ॥ २१ ॥ विच्छिन्नम्मूर्ध्निभूतन्तुपूजितंशक्तमेवच ॥
न्यासेतुमण्डलस्यास्यरजोदोषंविवर्जयेत् ॥ २२॥ सर्वत्रमण्डलंकार्यंवासुदेवस्यपूजने ॥ एवमेवनृपश्रेष्ठनिष्फलञ्चान्यथेतरत् ॥२३॥ बलभ
द्रश्चकामश्चह्यनिरुद्धस्तदुद्भवः ॥ नारायणस्तथाब्रह्माविष्णुःषष्ठःप्रकीर्तितः ॥२४॥ नरसिंहोवराहश्चयोगिन्योष्टौप्रकीर्तिताः॥पूर्वाद्यष्टदलेश्वेतां
रूपतोमन्त्रतःपृथक् ॥२५ ॥ पूजयेत्कर्णिकामध्येवासुदेवन्तुनायकम् ॥ विमलानायिकातस्यवासुदेवस्यकीर्तिता ॥२६ ॥ बलभद्रमुखानान्तु
योगिनीःशृणुपार्थिव ॥ आदावुत्कर्षिणीज्ञेयाज्ञानापश्चात्क्रियापरा॥२७॥योगाप्रज्ञातथैशानीअनुग्राहीतथाष्टमी॥सर्वाश्चतुर्भुजाःप्रोक्ताःशंखच

क्रगदाधराः॥२८॥योगिन्योबलभद्रन्तुकामंविधिमृतेतथा॥ विधिरूपन्तुपूर्वांक्तंहलञ्चमुशलम्बलः॥२९॥शंखञ्चक्रञ्चधत्तेयोगदांपार्श्वस्थितांस
दा ॥ कामस्तुपुष्पकोदण्डन्धत्तेवामेनपाणिना ॥१३०॥ गदांचक्रञ्चपुष्पञ्चधत्तेन्यैःपाणिभिःपुनः ॥ पार्श्वेपद्मन्तथाधत्तेसर्वमन्यच्चपूर्ववत् ॥
॥ ३१॥ चक्रंशंखोवराहस्यदक्षिणेपरिकीर्त्तितौ ॥ नृसिंहस्यपुनश्चक्रशंखौदक्षिणवामयोः ॥ ३२ ॥ शंखंपद्मन्तथाविष्णोःपाण्योर्दक्षिणयोः
स्थितम् ॥ शंखोगदावामतस्तुनारायणकरस्थितौ ॥ ३३ ॥ दक्षिणाधोगदान्धत्तेह्यनिरुद्धोनरोत्तमः ॥ सितरक्तस्तथापीतोभिन्नाञ्जननिभ
स्तथा ॥ ३४ ॥ नीलोत्पलदलश्यामस्तथारक्तघनप्रभः ॥ भ्रमरश्यामलःपिंगःस्वर्णगौरःक्रमादिमे ॥ ३५ ॥ वर्णतोयोगिनःप्रोक्तावासुदेव
स्यपार्थिव ॥ यादृग्वर्णश्चध्यानञ्चयस्ययस्यचयोगिनः ॥३६॥ तादृशीर्योगिनीस्तस्यचिन्तयेत्तत्समीपगाः ॥ आधारशक्तिप्रमुखाःसर्वाआ
सनदेवताः ॥ ३७ ॥ ग्रहाश्चसर्वेदिक्पालाध्यानतोमन्त्रतस्तथा ॥ पूजनीयायथोद्देशंमण्डलस्यक्रमान्नृप ॥ ३८ ॥ देवस्यचिन्तितंयद्यच्छ
रीरेकमलादिकम् ॥ धृतास्त्रंवज्रशक्त्यादिगरुडादींश्चपूजयेत् ॥३९॥ वर्णमालांशम्भुमतामासाद्यक्रमयोगतः ॥ आद्यद्वितीयक्रमतोगदादी
नान्तुमन्त्रकम् ॥ १४० ॥ पञ्चरात्रोदितेभागेनारदेनयथोदिताः ॥ मन्त्राश्चक्रगदादीनांग्राह्याःसर्वत्रपूजने ॥ ४१॥ गरुत्मान्त्सूर्यसंकाशोग
दाकृष्णायसीपुनः ॥ सरस्वतीशुक्लवर्णालक्ष्मीर्हेमप्रभासदा ॥ ४२ ॥ मध्याह्नसूर्यप्रतिमश्चक्रन्तुपरिकीर्त्तितम् ॥ सम्पूर्णप्रतिमःशंखःशंख
स्तुपरिकीर्त्तितः ॥ ४३ ॥ कौस्तुभोह्यरुणःप्रोक्तःश्रीवत्सोह्यरुणद्युतिः ॥ आरक्तःकौस्तुभोज्ञेयोमालाचित्राप्रकीर्तिता ॥ ४४ ॥ विद्युत्प्रभा

१ सन्देहोद्विरुक्तत्वात् ।

सर्वबाणाःशक्रचापप्रभन्धनुः ॥ स्वर्णचूर्णप्रकाशन्तुवस्त्रमस्यप्रकीर्तितम् ॥ ४५ ॥ बालसूर्यप्रतीकाशेकुण्डलेद्वेश्रवोगते ॥ सूर्यस्यसदृशं
शीर्षेकिरीटम्परिकीर्तितम् ॥ ४६ ॥ शृणुन्यासन्ततोभूपयैर्न्यासैर्विष्णुरूपधृक् ॥ साधकोहिभवेन्नित्यंस्वर्गमोक्षप्रदायकम् ॥ ४७ ॥ न्यास
न्तुप्रथमंकुर्यान्मंत्रविद्वादशाक्षरैः ॥ वासुदेवस्यबीजेनबीजञ्चैवाथयोगिनाम्॥४८॥ततोन्यसेन्महामन्त्रेततश्चाष्टादशाक्षरैः॥ततस्तुहृदयादीनां
षड्भिर्मन्त्रैर्द्विधापुनः ॥ ४९ ॥ एवञ्चतुर्भिर्न्यासैस्तुपूजामेकांसमाचरेत् ॥ प्रथमन्दक्षिणांगुष्ठेन्यसेदाद्यक्षरम्बुधः ॥ १५० ॥ द्वादशाक्षरम
न्त्रस्यशेषबीजानितुक्रमात् ॥ तर्जन्यादौदक्षिणस्यवामांगुष्ठान्तमेवच ॥ ५१ ॥ शेषाक्षरद्वयम्पश्चान्न्यसेत्पाणितलद्वये ॥ हृदिशीर्षेशिखा
याञ्चवर्णन्ताद्दक्पिचण्डयोः ॥ ५२ ॥ पृष्ठेतुभुजयोःपाण्योर्जङ्घयोःपादयोःक्रमात् ॥ द्वादशाक्षरमन्त्रस्यबीजानिचततोन्यसेत् ॥ ५३ ॥
अंगुष्ठयोस्तुप्रथमंवासुदेवस्यतत्वकम् ॥ तर्जन्यादौयोगिनान्तुबीजान्यष्टौद्वयोर्न्यसेत्॥५४॥शिरोदृगास्यकण्ठोष्ठनाभिगुह्येषुजानुनोः ॥ पाद
योर्वासुदेवस्ययोगिबीजानिविन्यसेत् ॥५५॥ मन्त्राणिहृदयादीनांयान्युक्तानिपुरानृप ॥ तानिन्यस्यांगुष्ठमूलेंगुलीजातेद्वयेद्वये ॥ ५६ ॥
वामदक्षिणपाण्योस्तुशेषन्तुतलयोर्न्यसेत् ॥ हृदयाद्यस्त्रपर्यन्तम्पुनस्तानिक्रमान्न्यसेत् ॥ ५७ ॥ अष्टादशाक्षरस्यादिनववर्णान्न्यसेद्बुधः ॥
शिरोनेत्रादिपूर्वोक्तेनवबीजस्यगोचरे ॥ ५८ ॥ शेषान्वर्णानसंकीर्णपार्श्वबस्तिषुशेफसि ॥ कट्योरूर्वोर्जंघयोश्चन्यसेत्पादांगुलीषुच ॥ ५९ ॥
यस्यमन्त्रस्ययापूजातन्त्रैस्तुयत्रचोदिता ॥ तस्यतन्त्रस्यतत्रैवन्यासम्मन्त्रीसमाचरेत् ॥ १६० ॥ अथचैकत्रसर्वेषांन्यासंकुर्याद्विचक्षणः ॥

१ द्वयोर्हस्तयोरित्यर्थः । २ द्विभ्रूरितिपाठः ।

चतुर्विधैःकृतैर्न्यासैःपूतात्माधूतकल्मषः ॥ ६१ ॥ साक्षाद्विष्णुर्भवेन्मन्त्रीसम्यक्पूजाफलंलभेत् ॥ विनापिपूजनंयस्तुन्यासंकुर्याच्चतुर्विधम् ॥
॥ ६२ ॥ सर्धारोविष्णुसायुज्यमाप्नोतिपरमम्पदम् ॥ योगपीठन्ततोध्यात्वागरुडञ्चक्रशंखकौ ॥ ६३ ॥ गदांलक्ष्मीञ्चक्रपद्मेक्रमादेतेषुवि
न्यसेत् ॥ पूर्वदक्षिणकौबेरपश्चात्कोणेषुवैक्रमात् ॥ ६४ ॥ दक्षिणेचोत्तरेवापिविन्यसेन्मन्त्रविद्बुधः ॥ वनमालाम्पद्ममध्येश्रीवत्संकौस्तुभं
मणिम् ॥ ६५ ॥ विन्यस्यदक्षिणेतस्यन्यसेच्छार्ङ्गंशरासनम् ॥ तूणीरयुगलंवामेखड्गन्दक्षिणतोन्यसेत् ॥ ६६ ॥ वामेचर्मनिधायाशुतत्र
कुर्यात्सरस्वतीम् ॥ पूजयित्वाचसर्वाणिततोमुद्राम्प्रदर्शयेत् ॥६७॥ मुद्राःपुटाद्यायाःप्रोक्ताविष्णोर्याश्चापियोगिनाम् ॥ ग्रहाणांदिक्पतीनाञ्च
मुद्रास्तादर्शयेत्पृथक् ॥ ६८ ॥ शेषमन्त्राःपुराप्रोक्ताअच्छिद्रस्यावधारणे ॥ तन्मन्त्रान्तसम्पठित्वैवसूर्यायार्घ्यंनिवेदयेत् ॥ ६९ ॥ निर्माल्य
धारीविष्णोस्तुविष्वक्सेनश्चतुर्भुजः ॥ शंखचक्रगदापाणिर्दीर्घश्मश्रुजटाधरः ॥ १७० ॥ रक्तपिंगलवर्णस्तुसितपद्मोपरिस्थितः ॥ यत्तृती
यस्वरान्तेनसंयुक्तोबिन्दुनेन्दुना ॥७१॥ कीर्तितस्तस्यमन्त्रोयन्तेनतम्परिपूजयेत् ॥ विसर्जनन्तथाविष्णोरैशान्याम्परिकीर्तितम् ॥ ७२ ॥
अन्येषाम्मनसाकुर्याद्बलादीनांविसर्जनम् ॥ एवंयःकुरुतेपूजांविष्णोःशम्भोर्विधेःक्वचित् ॥ ७३ ॥ पीठेदिक्करवासिन्याःसयातिपरमम्पदम् ॥
यत्रयत्रभवेद्विष्णोःपूजनन्नृपसत्तम ॥ ७४ ॥ तत्रतत्रैवतन्त्रोयंग्राह्योवैवैष्णवैर्बुधैः ॥ संक्षेपेणैवतत्रैवपूजयेदधिवासनम् ॥ ७५ ॥ हृदयाद्यंग
पूजातुनकर्तव्यास्यपूजने ॥ संक्षेपैर्विस्तरैर्वापिवासुदेवम्प्रपूजयेत् ॥ ७६ ॥ रक्तंकौशेयवस्त्रञ्चपीतंशुक्लन्तथैवच ॥ प्रीतिदंवासुदेवस्यवस्त्रमे
तत्प्रकीर्तितम् ॥ ७७ ॥ घृतप्रदीपोदीपेषुगन्धेषुमलयोद्भवः ॥ पानार्घ्यभोज्यपात्रेषुताम्रंप्रीतिकरम्मतम् ॥ ७८ ॥ किरीटंकुण्डलंहारोभूषणं

विष्णुतुष्टिदम् ॥ शंखस्नानीयपात्रेषुधूपेष्वगुरुरेवच ॥ ७९ ॥ प्रीतिदोवासुदेवस्यसततम्परिकीर्तितः ॥ कदम्बंकुब्जकंजातीमल्लिकामालती
तथा॥१८०॥ पंकजश्चेतिपुष्पाणितद्विष्णोःप्रीतिदान्युत ॥ निर्जलंस्थंडिलंस्थानन्तीर्थन्तोयमथापिवा ॥८१॥ तद्विष्णोरितिमन्त्रस्तुस्तुतिः
पुरुषसूक्तकम् ॥ पुत्रञ्जीवोद्भवामालाप्रशस्ताविष्णुपूजने ॥ ८२ ॥ तिथिश्चद्वादशीप्रोक्तावसन्तःकालउत्तमः ॥ शाल्योदनंहविष्यान्नंयावक
म्पायसंघृतम् ॥ ८३ ॥ कृशरान्नन्तथान्नेषुपानेषुक्षीरमिष्यते ॥ दलेषुतुलसीपत्रम्बैल्वमामलमेवच ॥ ८४ ॥ हरेःप्रीतिकराणिस्युरेतानिनृप
सत्तम ॥ सर्वाणिपरकीयानियानितानिचवर्जयेत् ॥ ८५ ॥ एवंयःपूजयेद्विष्णुंसततन्नरसत्तमः ॥ कुलकोटिंसमुद्धृत्यसस्वयंस्याज्जनार्दनः
॥ ८६ ॥ इदन्तेकथितम्भूपवासुदेवस्यतन्त्रकम् ॥ पीठस्यकामरूपस्यसंक्षेपान्निर्णयन्तथा ॥ ८७ ॥ इतिसर्वंकामरूपपीठंशम्भुरदर्शयत् ॥
पुत्राभ्यांसपुनस्ताभ्यांकैलासम्प्रययौगिरिम् ॥ ८८ ॥ तत्रगत्वायथायोगन्निधायतनयौस्वकौ ॥ विमुक्तशापास्तेजाताःशम्भुर्गिरिसुतातथा
॥ ८९ ॥ वेतालोभैरवश्चेतिनृपसत्तमनिर्जराः ॥ इदंयोमहदाख्यानंशृणोत्येकाग्रमानसः ॥ १९० ॥ शापभीतिर्नतस्यास्तिव्याधयस्तस्यना
धयः ॥ पुत्रपौत्रधनैश्वर्ययुक्तःसर्वत्रवल्लभः ॥ ९१ ॥ सर्वकल्याणसंयुक्तोदीर्घकालंसजीवति ॥ कामरूपम्महापीठंयोजानातिनरोत्तमः
॥ ९२ ॥ सदिव्यज्ञानसंपन्नःपरन्निर्वाणमाप्नुयात् ॥ यःकामरूपेसकलेपीठयात्रांसमाचरेत् ॥ ९३ ॥ आसाद्यसकलान्पीठान्पूजयेत्सर्वदेव
ताः ॥ दशपूर्वान्दशपरानात्मानञ्चैकविंशतिम् ॥ दिव्येज्ञानेनिधायाशुसर्वम्मुक्तिमियात्सह ॥ १९४ ॥ ॥ इतिश्रीकालिकापुराणेत्र्यशी
तितमोध्यायः ॥ ८३ ॥ ॥ छ ॥ ॥ और्वउवाच ॥ ॥ कामरूपेमहापीठेस्नात्वापीत्वाचदेवताः ॥ पूजयित्वाचविपुलालोकाःस्वर्गे

पुराययुः ॥ १ ॥ केचिद्भेजुश्चनिर्वाणंकेचिद्यांतिस्मशंभुताम् ॥ नयमस्तान्वारयितुन्नेतुश्चनिजमन्दिरम् ॥ २ ॥ क्षमोभून्नरशार्दूलशिवा
द्याजातसाध्वसाः ॥ यमदूतन्तत्रयान्तंबाधन्तेशांकरागणाः॥३॥नताद्धियातत्रयान्तियमदूताःप्रचोदिताः॥ तथादृष्ट्वाथशमनःस्वक्रियापरिवर्जि
तः ॥ ४ ॥ विधातारंसमासाद्यवचनञ्चेदमब्रवीत् ॥ विधातुःकामरूपेस्मिन्स्नात्वापीत्वाचमानवः ॥ ५ ॥ कामाख्यागणतांयातितथाशम्भु
गणेशताम् ॥ तत्रमेनाधिकारोस्तिनतान्वारयितुंक्षमः ॥ ६ ॥ विधत्स्वात्रोचितांनीतिंयुज्यतेयदिगोचरे ॥ तस्यतद्वचनंश्रुत्वाब्रह्मालोकापिता
महः ॥ ७ ॥ जगामविष्णुभवनंसहैवसमवर्तिना ॥ तमासाद्यतथाप्राहविष्णुर्वैयमभाषितम् ॥ यथावत्सर्वलोकेशःसचतद्वाक्यमग्रहीत् ॥ ८ ॥
सहब्रह्मयमाभ्यान्तुविष्णुशम्भूयमौततः ॥ सत्कृतस्तेनपृष्टश्चप्राहेदंयमभाषितम् ॥ ९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ सर्वदेवैःसर्वतीर्थैः
सर्वक्षेत्रैस्तथैवच ॥ एतद्व्याप्तेकामरूपन्नातोन्यद्विद्यतेपरम्॥१०॥इदम्पीठंसमासाद्यदेवत्वंयान्तिमानवाः ॥ अमृतत्वंगणत्वञ्चतत्रशक्तोयमोनहि
॥ ११ ॥ तथाकुरुमहादेवयथास्यादक्षमोयमः ॥ यमोनिरस्तोयत्रास्तिमर्यादानप्रदृश्यते ॥ १२ ॥ ॥ और्वउवाच ॥ ॥ एतद्विष्णुवचःश्रु
त्वाविधिनासहितस्यतु॥अंगीचकारहृदयेतद्वचःसाध्यसाधने ॥१३॥विसृज्यतान्ब्रह्मविष्णुयमान्वृषभवाहनः ॥आदायस्वगणान्तसर्वान्कामरू
पान्तरंययौ॥१४॥उग्रतारान्ततोदेवींगणश्चप्राहशंकरः॥उत्सारयन्तुसकलानिमाँल्लोकान्गणाद्रुतम् ॥१५॥ उग्रतारेमहादेवित्वञ्चाप्युत्सारयद्रुत
म्॥ततोगणाःकामरूपादेवीचाप्यपराजिता॥१६॥लोकानुत्सारयामासुःपीठंकर्तुर्हरस्यकम् ॥ उत्सार्यमाणेलोकेतुचतुर्वर्णेद्विजातिषु ॥१७॥ स
न्ध्याचलगतोविप्रोवसिष्ठःकुपितोमुनिः ॥ सोप्युग्रतारयादेव्याउत्सारयितुमीशया ॥१८॥ गणैःसहधृतःप्राहशापंकुर्वन्त्सुदारुणम्॥ यस्मादहं

धृतोवामेत्वयोत्सादयितुम्मुनिः ॥ १९ ॥ तस्मात्त्वंवाम्यभावेनपूज्याभवसमन्त्रिका ॥ भ्रमन्तिम्लेच्छवद्यस्माद्गणानाम्मन्दबुद्धयः ॥ २० ॥
भवन्तुम्लेच्छास्तस्माद्वैभवन्तःकामरूपके ॥ महादेवोपियस्मान्मान्निःसारयितुमुद्यतः ॥ २१ ॥ तपोधनम्मुनिन्दान्तंम्लेच्छवद्वेदपारगम् ॥
तस्मान्म्लेच्छप्रियोभूयाच्छंकरश्चास्थिभस्मधृक् ॥ २२ ॥ एतत्तुकामरूपाख्यंम्लेच्छैर्गुप्तम्मदत्वरम् ॥ स्वयंविष्णुर्न्नचायातियावत्स्थान
मिदम्पुनः ॥ २३ ॥ विरलाश्चागमाःसन्तुयएतत्प्रतिपादकाः ॥ विरलंयस्तुजानातिकामरूपागमम्बुधः ॥ २४ ॥ सएवप्राप्तेकालेपिसम्पूर्ण
म्फलमाप्स्यति ॥ एवमुक्त्वावसिष्ठस्तुतत्रैवान्तरधीयत ॥२५॥ तेगणाम्लेच्छतांयाताःकामरूपेसुरालये॥वामाभूदुग्रतारापिशम्भुर्म्लेच्छरतोभ
वत् ॥ २६ ॥ आगमाविरलाश्चासन्येचमत्प्रतिपादकाः ॥ वेदमन्त्रविहीनन्तुचतुर्वर्णविवर्ज्जितम् ॥ २७ ॥ कामरूपंक्षणाज्जातंयद्यमेनानुसा
रितम् ॥ आगतेपिहरौमुक्तेशापात्पीठेफलप्रदे ॥ २८ ॥ यथानसम्यक्स्थास्यन्तितत्पीठेदेवमानुषाः ॥ गुप्तयेसर्वकुण्डानाम्ब्रह्मोपायन्तथा
करोत् ॥ २९ ॥ अपुनर्भवकुण्डस्यसोमकुण्डस्यचोभयोः ॥ ब्रह्मोर्वशीकुण्डयोस्तुनदीनामपिभूरिशः ॥ ३० ॥ नदीनाम्पूर्वमुक्तानामनुक्ता
नाञ्चगुप्तये ॥ सर्वस्यैकफलज्ञानेब्रह्मोपायन्तथाकरोत् ॥ ३१ ॥ अमोघायांशान्तनोस्तुभार्यायान्तनयंस्वकम् ॥ जलरूपंसमुत्पाद्यजामदग्न्ये
नधीमता ॥ ३२ ॥ अवतारयदव्यग्रम्प्लावयन्कामरूपकम् ॥ सतुब्रह्मसुतोधीरःप्लावयन्कुण्डसञ्चयान् ॥ ३३ ॥ आच्छाद्यसर्वतीर्थानिभुवि
गुप्तानिचाकरोत् ॥ लोहित्यमात्रंयेकेचिज्जानन्तितत्रवैनराः ॥ ३४ ॥ तेलोहित्यस्नानफलम्प्राप्नुवन्तिसुनिश्चितम् ॥ नजानन्तिचकुण्डा

१ सर्वतीर्थत्वेनजानन्तीत्यर्थः ।

निनापितीर्थानिचान्यतः ॥ ३५ ॥ वसिष्ठशापादेतत्तुप्रवृत्तन्तीर्थगोपनम् ॥ यःकश्चित्तत्रजानातितीर्थानाञ्चविशेषताम् ॥ ३६ ॥ समवाप्नो
तितत्स्नानफलंसम्यङ्नरोत्तम ॥ सर्वानदीःसमाप्ताव्यसर्वतीर्थानिसर्वतः ॥ ३७ ॥ लौहित्योब्रह्मणःपुत्रोयातिदक्षिणसागरम् ॥ एवन्तेकथितं
राजन्कामरूपस्यकीर्त्तनम् ॥ यदन्यद्रोचतेतुभ्यन्तत्पृच्छनिगदामिते ॥ ३८ ॥ इतिश्रीकालिकापुराणेचतुरशीतितमोध्यायः ॥ ८४ ॥
मार्कण्डेयउवाच ॥ ॥ और्वस्यवचनंश्रुत्वासगरस्तम्मुनिम्पुनः॥पप्रच्छेदन्द्विजश्रेष्ठाहर्षसम्प्लुतमानसः ॥ १ ॥ ॥ सगरउवाच ॥ ॥
अमोघायांकथंयज्ञेलौहित्योब्रह्मणःसुतः ॥ कथंशान्तनुजायायांरतःसकमलासनः ॥ २ ॥ पारस्त्रैणेयपुत्रोवाकथञ्जज्ञेपितामहात् ॥ तत्सर्वं
श्रोतुमिच्छामिकथयस्वद्विजोत्तम ॥ ३ ॥ ॥ और्वउवाच ॥ ॥ शृणुत्वंराजशार्दूलकथयामिमहत्तरम् ॥ आख्यानम्ब्रह्मपुत्रस्य
लौहित्यस्यमहात्मनः ॥ ४ ॥ हरिवर्षेमहावर्षेशान्तनुर्न्नामनामतः ॥ मुनिरासीन्महाभागोज्ञानवान्त्सतपोरतः ॥ ५ ॥ तस्य
भार्यामहाभागाअमोघाख्यामहासती ॥ हिरण्यगर्भस्यमुनेस्तृणबिन्द्वाश्रमोद्भवा ॥ ६ ॥ तयासार्द्धंसकैलासंमर्यादापर्वतेवसन् ॥ लो
हिताख्यस्यसरसस्तीरेवैगन्धमादने ॥ ७ ॥ एकदासतपोनिष्ठोनिजपुष्पादिगोचरम् ॥ जगामवनमध्यन्तुचिन्वन्बहुफलानिच ॥ ८ ॥
तस्मिन्नवसरेब्रह्मासर्वलोकपितामहः ॥ तत्राजगामयत्रास्तिअमोघाशान्तनोःप्रिया ॥ ९ ॥ तान्दृष्ट्वादेवगर्भाभांयुवतीमतिसुन्दरीम् ॥
मोहितोमदनेनाशुतदाभूद्रूपितेन्द्रियः ॥ १० ॥ उदीरितेन्द्रियोभूत्वाजिघृक्षुस्ताम्महासतीम् ॥ अथाधावत्ततोब्रह्मासम्मुखोमदनार्दितः
॥ ११ ॥ धावमानंविधातारन्दृष्ट्वामोहान्महासती ॥ नैवंनैवमितिप्रोक्तापर्णशालांव्यलीयत ॥ १२ ॥ इदञ्चोवाचधातारममोघाकुपितातदा ॥

पर्णशालान्तरंगत्वाद्वारमावृत्यतत्क्षणात् ॥ १३ ॥ अकार्यन्नमयाकार्यम्मुनिपत्न्याविगर्हितम् ॥ बलात्प्रमथ्याचाहञ्चेत्त्वयात्वाञ्चशपा
म्यहम् ॥ १४ ॥ अमोघयाचैवमुक्तेविधातुश्चतदानृप ॥ रेतश्चस्कन्दतत्रैवआश्रमेशान्तनोर्म्मुनेः ॥ १५ ॥ च्युतेरेतसिधातापिहिंसयानंस
मुत्थितः ॥ लज्जयातिपरीतात्माद्रुतंवैस्वाश्रमंययौ ॥ गतेवेधसिशान्तनुश्चनिजमाश्रममागतः ॥ १६ ॥ आगत्यदृष्ट्वाहंसानाम्पदक्षोभन्त
दाभुवि ॥ तेजश्चपतितम्भूमौविधातुर्ज्ज्वलनोपमम् ॥ १७ ॥ अमोघाम्परिपप्रच्छपर्णशालान्तरस्थिताम् ॥ किमेतदत्रसुभगेप्रवृतन्दृश्यते
तुयत् ॥ १८ ॥ पक्षिणाञ्चपदक्षोभन्तेजश्चेदञ्चकीदृशम् ॥ सातस्यवचनंश्रुत्वाशान्तनुम्मुनिसत्तमम् ॥ १९ ॥ अमर्षितैवन्यगददाकुलावि
कलानना ॥ हंसयुक्तस्यन्दनेनकोप्यागत्यचतुम्मुखः ॥२०॥ कमण्डलुकरोतीवरातिम्मांसमयाचत ॥ ततोमयातर्जितःसउटजान्तरलीनया ॥
॥ २१ ॥ प्रच्याव्यतेजःसंयातोममशापभयार्दितः ॥ कुरुतत्रप्रतीकारंयदिशक्नोषिशान्तनो ॥ २२ ॥ नहीमांधर्षणांसोढुंकश्चिच्छक्नोतिजी
वभृत् ॥ सतस्यावचनंश्रुत्वास्वयम्ब्रह्मासमागतः ॥ २३ ॥ इतिनिश्चित्यमनसातदाध्यानपरोभवत् ॥ दिव्यज्ञानेनसज्ञात्वादेवकार्यमुपस्थि
तम् ॥ २४ ॥ तीर्थावतरणञ्चापिहितायजगताम्मुनिः ॥ ज्ञात्वोदर्कञ्चिन्तयित्वास्वभार्यामिदमब्रवीत् ॥ २५ ॥ इदन्तेजोब्रह्मणस्त्वम्पि
वामोघेममाज्ञया ॥ हितायसर्वजगतान्देवकार्यार्थसिद्धये ॥ २६ ॥ भवत्यानिकटम्ब्रह्मास्वयमेवसमागतः ॥ त्वामप्राप्यमहत्कृत्यमावयोः
ससमर्प्यच ॥ २७ ॥ गतोनिजास्पदन्तत्त्वंकर्तुमर्हसितद्वचः ॥ तच्छ्रुत्वाशान्तनोर्वाक्यममोघातीवलज्जिता ॥ २८ ॥ सान्त्वयन्तीवतम्प्रा
हपतिव्रत्वामहासती ॥ नान्यस्यतेजोधास्यामिनचतेविमनस्कता ॥ २९ ॥ अवश्यंयदिकर्तव्यम्पीत्वात्वम्मयिचोत्सृज ॥ ततस्तस्यावचः

श्रुत्वायुक्तन्तथ्यश्चशान्तनुः॥३०॥स्वयम्पीत्वातुतत्तेजःस्वभार्यायांन्यषेचयत्॥संक्रामितैःशान्तनुनातेजोभिर्ब्रह्मणःसती॥३१॥गर्भन्दधरामो
घाख्याहितायजगतान्ततः॥तस्याःकालेतुसंप्राप्तेनासातोजलसञ्चयः॥३२॥तन्मध्येतनयश्चापिनीलवासाःकिरीटधृक् ॥ रत्नमालासमायुक्तो
रक्तगौरश्चब्रह्मवत्॥३३॥चतुर्भुजःपद्मविद्याध्वजशक्तिधरस्तथा॥क्षिशुमारशिरःस्थश्चतुल्यकायोजलोत्करैः ॥३४॥ तज्जातश्चतथाभूतंशान्तनु
र्लोकशान्तनुः॥चतुर्णाम्पर्वतानाञ्चमध्यदेशेन्यवीविशत् ॥३५॥ कैलासश्चोत्तरेपार्श्वेदक्षिणेगन्धमादनः॥जारुधिःपश्चिमेशैलःपूर्वेचशंबकाह्वयः
॥३६॥ तेषांमध्येस्वयंकुण्डंपर्वतानांविधेःसुतः ॥ कृत्वातिववृधेनित्यंशरदीवनिशाकरः॥ ३७ ॥ तन्तोयमध्यगम्पुत्रंमासाद्यद्रुहिणःसुतम् ॥
क्रमतस्तस्यसंस्कारानकरोद्देहशुद्धये॥३८॥ अथकालेबहुतिथेव्यतीतेब्रह्मणःसुतः ॥ तोयराशिस्वरूपेणववृधेपञ्चयोजनान् ॥३९॥ तस्मिन्दे
वाःपपुःसस्नुर्द्वितीयइवसागरे ॥ सितामलजलेह्लद्येदिव्यैश्चाप्सरसांगणैः ॥ ४० ॥ तस्मिन्नवसरेरामोजामदग्न्यःप्रतापवान् ॥ चक्रेमातृवधं
घोरमयुक्तम्पितुराज्ञया ॥ ४१ ॥ तस्यपापस्यमोक्षायस्वपितुश्चोपदेशतः ॥ सजगाममहाकुण्डंब्रह्माख्यंस्नातुमिच्छया ॥ ४२ ॥ तत्रस्ना
त्वाचपीत्वाचमातृहत्यामपानयन् ॥ वीथीम्परशुनाकृत्वातम्मह्यामवतारयत् ॥ ४३ ॥ ॥ सगरउवाच ॥ ॥ जमदग्नेःसुतोरामःकिमर्थं
न्निजमातरम् ॥ जघानतस्यमाताचकिंनाम्नीकस्यचात्मजा ॥ ४४ ॥ मुनेःपुत्रःकथञ्जातस्तथाक्रूरोमहाबलः ॥ योयुद्धकुशलोवीरोराजन्या
न्त्समपोथयत् ॥ ४५ ॥ तदहंश्रोतुमिच्छामितत्त्वतोमुनिसत्तम ॥ कथयस्वमहाभागयदिगुह्यन्तथापिमे ॥ ४६ ॥ ॥ और्वउवाच ॥ ॥

शृणुराजन्नवहितोजमदग्नेःसुतस्यवै ॥ चरितंसयथाजज्ञेप्रसूकुरंतरश्वसः ॥४७॥ ब्रह्मपुत्रोभृगुर्नामऋचीकस्तत्सुतोभवत् ॥ सभार्यार्थीचरन्भू
मौकान्यकुब्जंगतःपुरा ॥४८॥ ददर्शचारण्यगतंजह्नोर्वंशसमुद्भवम् ॥ कुशिकस्यसुतंगाधिन्तपःस्थंनृपसत्तम ॥४९॥ अरण्यस्थस्यतस्याथपु
त्रकामस्यभूभृतः ॥ सभार्यस्यसुताजज्ञेदेवकन्यासमागुणैः ॥ ५० ॥ ऋचीकोभृगुपुत्रस्ताम्भार्यार्थेसमयाचत ॥ गाधिन्नृपतिशार्दूल
सचोवाचनृपोमुनिम् ॥ ५१ ॥ दातुंयोग्यासुतामेद्यत्वद्विधायमहामुने ॥ किंत्वेकःकुलधर्मोमेविद्यतेशुल्कसंग्रहे ॥ ५२ ॥ एकत्रकृ
ष्णवर्णानामश्वानचांन्द्रवर्चसाम् ॥ सहस्रमेकंयोदद्यात्तस्मैपुत्रीप्रदीयते ॥ ५४ ॥ ॥ ऋचीक उवाच ॥ ॥ दास्याम्यश्वसहस्रंवै
तवराजंस्तथाविधम् ॥ किञ्चित्कालम्प्रतीक्षस्वयावत्तदहमानये ॥ ५४ ॥ एवमस्त्वितितंगाधिरुवाचभृगुसूनवे ॥ गंगातीरंकान्यकु
ब्जंसोगच्छद्धयसाधने ॥ तत्राराध्यभृगोःपुत्रोवरुणंयादसाम्पतिम् ॥ ५५ ॥ तेनदत्तन्तदालेभेसहस्रंवाजिनाम्मुनिः ॥ तेनयत्रत
दालब्ध्वाअश्वान्नृपतिसत्तम ॥ ५६ ॥ तदश्वतीर्थंविख्यातम्महाफलकरम्परम् ॥ गंगाजलादुत्थितन्तुदत्तंसम्यक्प्रचेतसा ॥ ५७ ॥
आदायाश्वसहस्रन्तुमुनिर्गाधिमथाभ्ययात् ॥ तानश्वान्गाधिरादायपुत्रींसत्यवतींसुताम् ॥ ५८ ॥ ऋचीकायददौलक्ष्मींकेशवायेवसागरः ॥
ऋचीकोगाधितनयांलब्ध्वाभार्यामनिन्दिताम् ॥ ५९ ॥ मुदितःसतयारेमेयथाकामंस्वकाश्रमे ॥ कृतदारंसुतंश्रुत्वाद्रष्टुम्पुत्रंसुपाम्भृगुः ॥
॥ ६० ॥ अथाजगाममतिमान्स्नुषान्दृष्ट्वाननन्दच ॥ दम्पतीतंसमासीनम्भृगुन्देवगणार्चितम् ॥ ६१ ॥ पूजयित्वायथान्यायन्तस्थतु
स्तौकृताञ्जली ॥ ततोभृगुःस्नुषांस्वीयांसुप्रीतइदमब्रवीत ॥ ६२ ॥ वरम्वृणीष्वदास्यामिवाञ्छितंवरवर्णिनि ॥ अदेयन्दुष्करंवापियत्रते

१ व्रतधरइतिपाठांतरम् ।

विद्यतेस्पृहा ॥ ६३ ॥ ततःसत्यवतीपुत्रन्तपआम्नायपारगम् ॥ मातुश्चवीरमतुलम्पुत्रंवरमयाचत ॥ ६४ ॥ सचैवमस्त्वित्युक्त्वैवभूत्वाध्यान
परस्तदा ॥ विश्वमावृत्यमनसायत्नाच्छ्वासंससर्ज्जसः ॥६५ ॥ तस्यानिःश्वासवातात्तुनिःसृतंवैचरुद्वयम् ॥ तस्यैतद्वितयन्दत्त्वाभृगुस्तामिदम
ब्रवीत् ॥ ६६ ॥ चरुद्वयंगृहाणेदंस्नुषेसत्यवतिस्वयम् ॥ स्नात्वाऋतौऋतौमातास्नुषेत्वञ्चकारिष्यथः ॥ ६७ ॥ आलिंग्याश्वत्थवृक्षन्तेमातापुं
सवनायवै ॥ चरुमारक्तकञ्चेमंसाभोक्ष्यतिसुतस्ततः ॥ ६८ ॥ त्वञ्चोदुम्बरवृक्षन्तुसमालिंग्यासितंचरुम् ॥ भोक्ष्यसेतवपुत्रस्तुभविष्यतिस
नातनः ॥ ६९ ॥ एवमुक्त्वाभृगुर्यातोयथेच्छंसापिसम्मुदम् ॥ अवापमात्रासहिताभर्त्रापित्राचभामिनी ॥ ७० ॥ अथस्नानादिनेऽश्वत्थमालिं
ग्यारक्तकञ्चरुम् ॥ आदात्सत्यवतीतस्यामाताफल्गुंसितञ्चरुम् ॥ ७१ ॥ परिवर्त्तन्तुतज्ज्ञात्वादिव्यज्ञानोभृगुर्म्मुनिः ॥ अथागत्यस्नुषान्ता
न्तुवचनञ्चेदमब्रवीत् ॥ ७२ ॥ विपर्ययस्त्वयाभद्रेवृक्षालिंगनकर्म्मणि ॥ तथाचरुप्राशनेतुतत्रेदन्तेभविष्यति ॥ ७३ ॥ ब्राह्मणःक्षत्रियाचार
स्तवपुत्रोभविष्यति ॥ क्षत्रियोब्राह्मणाचारोमातुस्तेभवितासुतः ॥ ७४ ॥ इत्युक्त्वाभृगुणासाध्वीतदासत्यवतीभृगुम् ॥ पुनःप्रसादयामासपौ
त्रोमेस्त्वितितादृशः ॥ ७५ ॥ एवमस्त्वितिसप्रोच्यतत्रैवान्तर्दधेभृगुः ॥ अथकालेसुतन्दीप्तञ्जमदग्निञ्चगाधिजा ॥ ७६ ॥ सुषुवेजननीतस्या
विश्वामित्रन्तपोनिधिम् ॥ जमदग्निस्ततोवेदांश्चतुरःप्रापमाचिरम् ॥ ७७ ॥ प्रादुरासीद्धनुर्वेदःस्वयन्तस्मिन्महात्मनि ॥ विश्वामित्रोपिसक
लान्वेदानापतथाचिरात् ॥ ७८ ॥ धनुर्वेदन्तथाकृत्स्नंविप्रश्चाभूत्तपोबलात् ॥ जाज्वल्यमानस्तेजस्वीजमदग्निर्म्महातपाः ॥ वेदैस्तपोभिः
समुनीनत्यक्रामच्चसूर्यवत् ॥ ७९ ॥ इतिश्रीकालिकापुराणेपञ्चाशीतितमोध्यायः ॥ ८५ ॥ ॥ और्वउवाच ॥ ॥ अथकालेव्यतीतेतु

जमदग्निर्म्महातपाः ॥ विदर्भराजस्यसुताम्प्रयत्नेनजितांस्वयम् ॥ १ ॥ भार्यार्थम्प्रतिजग्राहरेणुकांलक्षणान्विताम् ॥ सातस्मात्सुषुवेपुत्रां
श्चतुरोवेदसम्मितान् ॥ २ ॥ मरुत्वन्तंसुषेणञ्चवसुंविश्वावसुन्तथा ॥ पश्चात्तस्यांस्वयञ्जज्ञेभगवान्मधुसूदनः ॥ ३ ॥ कार्त्तवीर्यवधायाशुश
क्राद्यैःसकलैःसुरैः ॥ याचितःपञ्चमःसोभूत्तेषांरामाह्वयस्तुसः ॥ ४ ॥ भारावतरणार्थायजातःपरशुनासह ॥ सहजम्परशुन्तस्यनजहातिक
दाचन ॥ ५ ॥ अयन्निजपितामह्याश्चरुभुक्तिविपर्य्ययात् ॥ ब्राह्मणःक्षात्रियाचारोरामोभूत्क्रूरकर्म्मकृत् ॥ ६ ॥ सवेदानाखिलाञ्ज्ञात्वाधनुर्वेदं
चसर्वशः ॥ सततःकृतकृत्योभूद्वेदविद्याविशारदः॥७॥एकदातस्यजननीस्नानार्थंरेणुकागता ॥ गंगातोयेह्यथापश्यन्नाम्नाचित्ररथन्नृपम् ॥८॥
भार्याभिःसदृशीभिश्चजलक्रीडारतंशुभम् ॥ सुमालिनंसुवस्त्रन्तन्तरुणञ्चन्द्रमालिनम् ॥९॥ तथाविधन्नृपन्दृष्ट्वासञ्जातमदनाभृशम् ॥ रेणुका
स्पृहयामासतस्मैराज्ञेसुवर्च्चसे॥१०॥स्पृहायुतायास्तस्यास्तुसंक्लेदःसमजायत॥विचेतनाम्भसाक्लिन्नात्रस्तासास्वाश्रमंययौ॥११॥ अबोधिजम
दग्निस्तांरेणुकांविकृतान्तथा॥धिग्धिक्कारंरतेत्येवान्निनिन्दचसमन्ततः॥१२॥ततःसतनयान्प्राहचतुरःप्रथमम्मुनिः॥मरुत्वत्प्रमुखान्त्सर्वानेकैकं
क्रमतोद्रुतम् ॥ १३ ॥ छिन्धीमाम्पापनिरतांरेणुकांव्यभिचारिणीम् ॥ तेतद्वचोनैवचक्रुर्मूकाश्चासञ्जडाइव ॥ १४ ॥ कुपितोजमदग्निस्ता
ञ्छशापेतिविचेतसः ॥ भवध्वंयूयमचिराज्जडागोबुद्धिवर्द्धिताः ॥ १५ ॥ यथाजगामचरमोजामदग्न्योतिवीर्यवान् ॥ तञ्चरामम्पिताप्राहपा
पिष्ठाञ्छिन्धिमातरम् ॥ १६ ॥ सभ्रातॄंश्चतथाभूतान्दृष्ट्वाज्ञानविवर्ज्जितान् ॥ पित्राशप्तान्महातेजाःप्रसुम्परशुनाच्छिनत् ॥ १७ ॥ रामेणरेणु
काञ्छिन्नान्दृष्ट्वाविक्रोधनोभवत् ॥ जमदग्निःप्रसन्नःसन्नितिवाचमुवाचह ॥ १८ ॥ प्रीतोस्मिपुत्रभद्रन्तेयत्त्वयामद्वचःकृतम् ॥ तस्मादिष्टान्व

रान्कामाँस्त्वंवैवरयसाम्प्रतम् ॥ १९ ॥ सतुरामोवरान्वत्रेमातुरुत्थानमादितः ॥ वधस्यास्मरणन्तस्याभ्रातॄणांशापमोचनम् ॥ २० ॥ मातृ
हत्याव्यपनयंयुद्धेसर्वत्रवैजयम् ॥ आयुःकल्पान्तपर्यन्तंक्रमाद्वैनृपसत्तम ॥ २१ ॥ सर्वान्वरान्त्सप्रददौजमदग्निर्म्महातपाः॥सुप्तोत्थितेवज
ननीरेणुकाचतदाभवत् ॥ २२ ॥ वधन्नचापिसस्मारसहजाप्रकृतिस्थिता ॥ युद्धेजयश्चिरायुष्यंलेभेरामस्तदैवहि ॥ २३ ॥ मातृहत्याव्यपो
हायपितातंवाक्यमब्रवीत् ॥ नपुत्रवरदानेनमातृहत्यापगच्छति ॥ २४ ॥ तस्मात्त्वम्ब्रह्मकुण्डायगच्छस्नातुञ्चतज्जले ॥ तत्रस्नात्वामुक्तपापो
नचिरात्पुनरेष्यसि ॥ २५ ॥ जगद्धितायपुत्रत्वम्ब्रह्मकुण्डंव्रजद्रुतम् ॥ सतस्यवचनंश्रुत्वारामःपरशुधृक्तदा ॥ २६ ॥ उपदेशात्पितुर्यातो
ब्रह्मकुण्डंवृषोदकम् ॥ तत्रस्नानञ्चविधिवत्कृत्वाधौतपरश्वधः ॥ २७ ॥ शरीरान्निःसृताम्मातृहत्यांसम्यग्व्यलोकयत् ॥ जातसम्प्रत्ययः
सोथतीर्थमासाद्यतद्वरम् ॥ २८ ॥ वीथीम्परशुनाकृत्वाब्रह्मपुत्रमवाहयत् ॥ ब्रह्मकुण्डात्सृतःसोथकासारेलोहिताह्वये ॥ २९ ॥ कैलासोप
त्यकायान्तुन्यपतद्ब्रह्मणःसुतः ॥ तस्यापिसरसस्तीरेसमुत्थायमहाबलः ॥ ३० ॥ कठारेणदिशम्पूर्वामनयद्ब्रह्मणःसुतम् ॥ ततोपरत्रापि
गिरिंहेमशृंगंविभिद्यच ॥ ३१ ॥ कामरूपान्तरम्पीठमवाहयदसुंहरिः ॥ तस्यनामस्वयञ्चक्रेविधिर्लोहितगंगकम् ॥ ३२ ॥ लोहितात्सरसो
जातोलोहिताख्यस्ततोभवत् ॥ सकामरूपमखिलम्पीठमाप्लाव्यवारिणा ॥ ३३ ॥ गोपायन्सर्वतीर्थानिदक्षिणंयातिसागरम् ॥ प्रागेवदिव्यय
मुनांसत्यक्चात्रब्रह्मणसुतः ॥ ३४ ॥ पुनःपततिलौहित्येगत्वाद्वादशयोजनम् ॥ चैत्रेमासिसिताष्टम्यांयोनरोनियतेन्द्रियः ॥ चैत्रन्तुसकलम्मा
संशुचिःप्रयतमानसः ॥ ३५ ॥ स्नातिलौहित्यतोयेषुसयातिब्रह्मणःपदम् ॥ ३६ ॥ लोहित्यतोयेयःस्नातिसकैवल्यमवाप्नुयात् ॥

इतितेकथितंराजन्यदर्थम्मातरंपुरा ॥ ३७ ॥ अहन्वीरोजामदग्न्योयस्माद्वाक्रूरकर्म्मकृत् ॥ इदन्तुमहदाख्यानंयःशृणोतिदिनेदिन ॥ ३८ ॥ सदीर्घायुःप्रमुदितोबलवानभिजायते ॥ इतितेकथितंराजञ्छरीरार्द्धंयथाद्विजा ॥ ३९ ॥ शम्भोर्जहारवेतालभैरवौचयथा ह्यौ ॥ यस्यवातनयौजातौयथायातौगणेशताम् ॥ ४० ॥ किमन्यत्कथयेतुभ्यन्तद्वदस्वनृपोत्तम ॥ ॥ मार्कंडेयउवाच ॥ ॥ इत्यौर्वस्यचसंवादःसगरेणमहात्मना ॥ ४१ ॥ योसौकायार्द्धहरणःशम्भोर्गिरिजयाकृतः ॥ सर्वोह्यकथितोविप्राःपृष्टंयच्चान्यदुत्तमम् ॥ ॥ ४२ ॥ सिद्धस्यभैरवाख्यस्यपीठानाञ्चविनिर्णयम् ॥ भृंगिणश्चयथोत्पत्तिर्म्महाकालस्यचैवहि ॥ उक्तंहिवःकिमन्यत्तुपृच्छन्तु द्विजसत्तमाः ॥ ४३ ॥ इतिसकलसुतन्त्रन्तन्त्रमन्त्रावदातम्बहुतरफलकारिप्राज्ञविश्रामकल्पम् ॥ उपनिषदमवेत्यज्ञानमार्गैकतानंस्रवति सइहनित्यंयःपठेत्तन्त्रमेतत् ॥ ४४ ॥ इतिश्रीकालिकापुराणेषडशीतितमोध्यायः ॥ ८६ ॥ ॥ ऋषयऊचुः ॥ ॥ कथितोभवतासर्गः संशयाश्चापिशातिताः ॥ त्वत्प्रसादान्महाभागकृतकृत्यावयंगुरो ॥ १ ॥ भूयश्चश्रोतुमिच्छामोवयमेतद्द्विजोत्तम ॥ कोन्योभृंगीमहाकालो जातौवेतालभैरवौ ॥ वितालश्चमहाकालंभैरवंभृंगिणन्तथा ॥ २ ॥ शृणुमोद्विजशार्दूलकथमेषाञ्चतुष्टयम् ॥ ॥ मार्कण्डेयउवाच ॥ भुवंगतेमहाकालेमानुष्यस्थेचभृंगिणि ॥ ३ ॥ वेतालभैरवाख्येचतयोर्भूतेद्विजोत्तमाः ॥ वरलब्धेचवेतालेभैरवेतेनसंगते ॥ ४ ॥ अन्धक न्तपसायुक्तम्भृंगिणश्चाकरोद्धरः ॥ अन्धकस्तुहरम्पूर्वंविरुध्यापदमागतः ॥ ५ ॥ पश्चाद्धरंसमाराध्यपुत्रोभूत्तस्यसोसुरः ॥ भृंगिस्नेहाद्भृंगि णन्तंसंज्ञयाचाकरोद्धरः ॥ ६ ॥ स्नेहेनतुमहाकालेबाणम्बलिसुतंहरः ॥ विष्णुनाछिन्नबाहुन्तुमहाकालमथाकरोत् ॥ ७ ॥ एवंमुनिवरास्तेषां

संयतश्चचतुष्टयम् ॥ वेतालभैरवौभृंगिमहाकालौह्यनुक्रमात् ॥ ८ ॥ ॥ ऋषयऊचुः ॥ ॥ यत्पृष्टंसगरेणैवमुनिमौर्व्वम्महाधिपम् ॥ नी
त्यायोज्याययाभार्यासुतआत्माथवागुरो ॥ ९ ॥ राजनीतौसतान्नीतौसदाचारेचयेस्थिताः ॥ विशेषास्तेनयेप्रोक्ताऔर्व्वेणसुमहात्मना ॥
॥ १० ॥ विशेषेणद्विजश्रेष्ठश्रोतुंसम्यक्तपोधन ॥ इच्छामस्तान्महाभागकथयस्वजगद्गुरो ॥ ११ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ येये
विशेषाःकथिताऔर्वेणसुमहात्मना ॥ तद्वःसर्वम्प्रवक्ष्यामिशृण्वन्तुमुनिसत्तमाः ॥ १२ ॥ श्रुत्वैवंसगरोराजामन्त्रकल्पादिकम्पुनः ॥ विशे
षान्परिपप्रच्छनीत्यादीनाम्महामुनिम् ॥ १३ ॥ ॥ सगरउवाच ॥ ॥ ययानीत्याप्रयोक्तव्यःसुतआत्माप्रियातथा ॥ तेषांविशेषैःसहितं
सदाचारंवदस्वमे ॥ १४ ॥ ॥ और्वउवाच ॥ ॥ क्रमेणशृणुराजेंद्रययानीत्यानियोजिताः ॥ आत्मासुतोवाभार्यावाताद्विशेषंशृणुष्वमे ॥
॥ १५ ॥ ज्ञानविद्यातपोवृद्धान्वयोवृद्धान्त्सुदक्षिणान् ॥ सेवेतप्रथमंविप्रान सूयःपरिवर्जितान् ॥१६॥ तेभ्यश्चशृणुयान्नित्यंवेदशास्त्रविनिश्चय
म् ॥ यद्वचुस्तेचतत्कार्यम्प्राज्ञश्चैवनृपश्चरेत् ॥ १७ ॥ पञ्चेन्द्रियाणिपञ्चाश्वाःशरीरंरथउच्यते ॥ आत्मारथीकराज्ञानंसारथिर्म्मनउ
च्यते ॥ १८ ॥ अश्वान्त्सुदान्तान्कुर्वीतसारथिश्चात्मनोवशम् ॥ कशादृढासदाकार्याशरीरास्थिरतातथा ॥ १९ ॥ अदान्तांस्तुस
मारुह्यसैन्धवान्स्पन्दनीयथा ॥ अश्वानांमिच्छयागच्छन्नुत्पथम्प्रतिपद्यते॥२०॥तत्रावशःसारथिस्तुस्वेच्छयाप्रेरयन्हयान् ॥ नयेत्परवशंस
म्यग्ग्रथितंवीरमप्युत ॥ २२ ॥ तथेन्द्रियाणिनृपतिर्विषयाणाम्परिग्रहे ॥ स्ववश्यानिप्रकुर्वीतमनोज्ञानन्दृढन्तथा ॥ २२ ॥ ज्ञानेदृढेकशाया
श्चदृढायान्नपसत्तम ॥ सारथिःस्ववशोदान्तानीशःप्रेरयितुंहयान् ॥ २३ ॥ अतोनृपःस्वेन्द्रियाणिवशेकृत्वामनस्तथा ॥ ज्ञानमार्गमधिष्ठाय

प्रकुर्वीतात्मनोहितम् ॥ २४ ॥ भोक्तव्यंस्वेच्छयाभूयोनकुर्याल्लोभमासवे ॥ द्रष्टव्यमितिद्रष्टव्यन्नद्रष्टव्यञ्चस्वेच्छया ॥ २५ ॥ श्रोतव्यमिति
श्रोतव्यन्नाधिकंश्रवणे चरेत् ॥ शास्त्रतत्त्वमृतेधीरःश्रुतिवश्योभवेन्नहि ॥ २६ ॥ एवंघ्राणान्त्वचञ्चापिवशीकृत्येच्छयानृपः ॥ स्वेच्छयानोपभु
ञ्जीतनोद्दामंविषयंव्रजेत् ॥ २७ ॥ एवंयदिभवेद्राजातदासस्याजितेन्द्रियः ॥ जितेन्द्रियत्वेहेतुश्चशास्त्रवृद्धोपसेवनम् ॥ २८ ॥ अवृद्धसेव्य
शास्त्रज्ञोनृपःशत्रुवशोभवेत् ॥ तस्माच्छास्त्रमधिष्ठायभवेद्राजाजितेन्द्रियः ॥ २९ ॥ धृतिःप्रागल्भ्यमुत्साहोवाक्पटुत्वंविवेचनम् ॥ दक्षत्वन्धा
रयिष्णुत्वन्दानंमैत्रीकृतज्ञता ॥ दृढशासनतासत्यंशौचम्मतिविनिश्चयम् ॥ ३० ॥ पराभिप्रायवेदित्वञ्चारित्रन्धैर्यमापदि ॥ क्लेशधारणश
क्तिश्चगुरुदेवाद्विजार्चनम्॥३१॥अनसूयाह्यकोपित्वंगुणानेतान्नृपोभ्यसेत् ॥ कार्याकार्यविभागञ्चधर्मार्थेकामएवच ॥३२॥ सततम्प्रतिबुद्ध्ये
तक्कुर्यादवसरोपितत् ॥ सामदानंचभेदश्चदण्डश्चेतिचतुष्टयम् ॥ ३३ ॥ ज्ञात्वोपायांस्तुतत्कालेतदुपायान्प्रयोजयेत् ॥ साम्नस्तुविषयेभेदोम
ध्यमःपरिकीर्त्तितः ॥ ३४ ॥ दानस्यविषयेसामयोग्यमेवोपलक्ष्यते ॥ दानस्यविषयेदण्डोह्यधमःपरिकीर्त्तितः ॥ ३५ ॥ दण्डस्यविषयेदान
न्तदप्यधममुच्यते ॥ साम्नस्तुगोचरेदण्डोह्यधमादधमःस्मृतः ॥ ३६ ॥ सौजन्यंसततञ्ज्ञेयम्भूभृतोभेददण्डयोः ॥ साम्नोदानस्यचतथासौ
जन्यंयातिगोचरे ॥ ३७ ॥ कामःक्रोधश्चलोभश्चहर्षोमानोमदस्तथा ॥ एतानातिशयान्राजाशत्रूनिवाविशातयेत् ॥ ३८ ॥ सेव्याःकालेमुयु
क्तौतेलोभगर्वौविवर्जयेत् ॥ तेजएवनृपाणान्तुतीव्रंसूर्यस्यवैयथा ॥ ३९ ॥ तत्रगर्वंरोगयुक्तंकायवांस्तंतुसन्त्यजेत् ॥ आखेटकाक्षौस्त्रीसेवा

१ बुभुक्षाभावेऽन्येच्छयानभोक्तव्यमितितात्पर्यम् ।

पानञ्चैवार्थदूषणम् ॥ ४० ॥ वाग्दण्डयोश्चपारुष्यंसप्तैतानिविवर्जयेत् ॥ परस्त्रीषुविरक्तासुसेवामेकान्ततस्त्यजेत् ॥ ४१ ॥ सतीषुनिजना
रीषुयुक्तंकुर्यान्निवेशनम् ॥ रतिपुत्रफलादारास्तास्तुनैकान्ततस्त्यजेत् ॥ ४२ ॥ तयोःसिद्धचैस्त्रियःसेव्यावर्जयित्वातिसक्तताम् ॥ मृगयान्तु
प्रमादानांस्थानन्नित्यंविवर्जयेत् ॥ ४३ ॥ अक्षांस्तथानकुर्वीतसत्कार्यासक्तिनाशनान् ॥ अन्यैःकृतंकदाचित्तुसेवेतनात्मनाचरेत् ॥ ४४ ॥
अकार्यकरणेवीजंकृत्यानाञ्चविवर्जने ॥ अकालमन्त्रभेदेचकलहेसत्कृतिक्षये ॥ ४५ ॥ वर्जयेत्संततम्पानंशौचमांगल्यनाशनम् ॥ अर्थक्षय
करंनित्यंत्यजेच्चैवात्मदूषणम् ॥ ४६ ॥ अभिशस्तेषुचोरेषुघातकेष्वाततायिषु ॥ सततम्पृथिवीपालोदण्डपारुष्यमाचरेत् ॥ ४७ ॥ नान्यत्र
दण्डपारुष्यंकुर्यान्नृपतिसत्तमः ॥ वाक्पारुष्यञ्चसर्वत्रनैवकुर्यात्कदाचन ॥ ४८ ॥ रक्षणीयंसदासत्यंसत्यमेकम्परायणम् ॥ क्षमान्तेजस्विता
श्चैवप्रस्तावान्नृपआचरेत् ॥४९॥ यानासनाश्रयद्वैधसन्धयोविग्रहस्तथा ॥ अभ्यसेत्षड्गुणानेतांस्तेषांस्थानञ्चशाश्वतम् ॥ ५० ॥ यःप्रमाण
न्नजानातिस्थानेवृद्धौतथाक्षये ॥ कोषेजनपदेदण्डेनसराज्येवातिष्ठते ॥ ५१ ॥ कोषेजनपदेदण्डेचैकैकत्रत्रयन्त्रयम् ॥ प्रस्तावाद्विनियुञ्जी
तरक्षेन्नैकांस्ततस्त्विमान् ॥ ५२ ॥ मित्रेशत्रावुदासीनेप्रभावन्त्रिष्वपीरयेत् ॥ उत्साहोविजिगीषायान्धर्मकृत्येष्टवर्गके ॥ ५३ ॥ शरीर
यात्रानिर्वाहेक्रियेतसततंनृपैः ॥ मन्त्रनिश्चयसम्भूताम्बुद्धिंसर्वत्रयोजयेत् ॥ ५४ ॥ अमात्येशात्रवेराज्येपुत्रेष्वन्तःपुरेषुच ॥ कृषिन्दुर्ग
श्चवाणिज्यंखड्गानांकरसाधनम् ॥ ५५ ॥ आदानंसैन्यकरयोर्बन्धनंगजवाजिनोः ॥ शून्येसद्मसुखानाञ्चयोजनंसततञ्जनैः ॥ ५६ ॥
त्रयाणांसारसेतूनाम्बंधनञ्चेतिचाष्टमम् ॥ एतदष्टसुवर्गेषुचारान्त्सम्यक्प्रयोजयेत् ॥ ५७ ॥ कार्याकार्यविभागायचाष्टवर्गाधिकारिणाम् ॥

अष्टौचारान्नियुञ्जीयादष्टवर्गेषुपार्थिवः ॥ ५८ ॥ दशशून्येषुयुञ्जीतक्रमतःशृणुतानिमे ॥ स्वामीसचिवराष्ट्राणिमित्रंकोशोबलन्तथा ॥ ५९ ॥
दुर्गन्तुसप्तमंज्ञेयंराज्यांगंगुरुभाषितम् ॥ दुर्गयुक्तंचाष्टवर्गेचारान्नात्मनियोजयेत् ॥ ६० ॥ तस्मादिमानिशेषाणिपञ्चचारपदानिच ॥
शुद्धान्तेषुचपुत्रेषुसयूथादौमहानसे ॥६१॥ शत्रूदासीनयोश्चापिबलाबलविनिश्चये ॥ अष्टादशसुचैतेषुचारान्राजाप्रयोजयेत् ॥६२॥ नयत्प्र
काशञ्जानीयात्तत्तच्चारैर्निरूपयेत् ॥ निरूप्यतत्प्रतीकारमवश्यंछिद्रतश्चरेत् ॥ ६३ ॥ यथानियोगमेतेषांयोयोयत्रान्यथाचरेत् ॥ ज्ञात्वातत्रनृ
पश्चारैर्दण्डयेद्वावियोजयेत् ॥ ६४ ॥ चारांस्तुमन्त्रिणासार्द्धंरहस्येसंस्थितोनृपः ॥ प्रदोषसमयेपृच्छेत्तदानीमेवसाधयेत् ॥ ६५ ॥ स्वपुत्रेचा
थशुद्धान्तेयेतुचारामहानसे ॥ नियुक्तास्तान्मध्यरात्रेपृच्छेत्स्वोपिचमन्त्रिणि ॥ ६६ ॥ एतांश्चारान्तस्वयंपश्येन्नृपतिर्मन्त्रिणाविना ॥ अन्यां
स्तुमन्त्रिणासार्द्धन्निरूप्यप्रदिशेत्फलम् ॥ ६७ ॥ नैकवेशधरश्चारोनैकोनोत्साहवर्जितः ॥ संस्तुतोनहिसर्वत्रनातिदीर्घोनवामनः ॥ ६८ ॥
सततन्नदिवाचारीनरोगीनाप्यबुद्धिमान् ॥ नवित्तविभवैर्हीनोनभार्यापुत्रवर्जितः ॥ ६९ ॥ कार्यश्चारोनृपतिनातत्त्वगुह्यविनिर्णये ॥ अनेकवे
शग्रहणक्षमम्भार्यासुतैर्युतम् ॥ ७० ॥ बहुदेशवचोभिज्ञम्पराभिप्रायवेदकम् ॥ दृढभक्तम्प्रकुर्वीतचारंशक्तमसाध्वसम् ॥ ७१ ॥ अभितिष्ठे
त्स्वयंराजाकृषिमात्मसमैस्तथा ॥ वणिक्पथेतुदुर्गादौतेषुशक्तान्नियोजयेत् ॥ ७२ ॥ अन्तःपुरेपितुस्तुल्यान्धीरान्वृद्धान्नियोजयेत् ॥ षण्ढा
न्षण्डांस्तथावृद्धांस्त्रियोवाबुद्धितत्पराः ॥ ७३ ॥ शुद्धान्तेद्वारियुञ्जीयात्स्त्रियोवृद्धामनीषिणीः ॥ नैकःस्वपेत्कदाचित्तुनैकोभुञ्जीतपार्थिवः
॥ ७४ ॥ नैकाकिनीन्तुमहिषींव्रजेन्मैत्रायनैककः ॥ अमात्यानुपधाशुद्धान्भार्याःपुत्रांस्तथैवच ॥ ७५ ॥ प्रकुर्यात्सतम्भूपःसप्रसा

दंसमाचरन् ॥ धर्मार्थकाममोक्षैश्चप्रत्येकम्परिशोधनैः ॥ ७६ ॥ उपेत्यधीयतेयस्मादुपधासाप्रकीर्त्तिता ॥ अर्थकामोपधाभ्या
न्तुभार्यापुत्रांश्चशोधयेत् ॥ ७७ ॥ धर्मोपधाभिर्विप्रांस्तुसर्वाभिःसचिवान्पुनः ॥ एभिर्यज्ञैस्तथादानैरिहैवनृपतिर्भवेत् ॥ ७८ ॥
तस्माद्भवांस्तुराज्यार्थीधर्ममेवंसमाचरेत् ॥ अनेनैवाभिचारेणयज्ञैर्वापार्थिवोह्ययम् ॥ ७९ ॥ प्राणांस्त्यजतिराजात्वम्भविष्यसिनसं
शयः ॥ इतिधर्मोनृपस्यैवअश्वमेधादिकश्चयः ॥ ८० ॥ स्वयन्नकुरुतेभूपस्तस्मात्त्वंकुरुसत्तम ॥ एवम्मन्त्रैर्मन्त्रयित्वानृपःकार्यान्ति
काद्विजात् ॥ ८१ ॥ तैरज्ञातान्त्स्वयञ्ज्ञात्वागृह्णीयात्तस्यतैर्मनः ॥ यदिराज्याभिलाषेणसचिवोधर्ममाचरेत् ॥ ८२ ॥ नृपतौवाधिकं
कुर्याद्धर्मन्तंहीनतान्नयेत् ॥ आभिचारिकमत्यर्थंकुर्वाणन्तुविघातयेत् ॥ ८३ ॥ प्रवासयेद्ब्राह्मणन्तुपार्थिवश्चाभिचारिकम् ॥ एषाधर्मो
पधाज्ञेयातैरमात्यान्त्सताञ्जयेत् ॥ ८४ ॥ एतादृशीन्तथैवान्यामुपधान्धर्मतश्चरेत् ॥ कोपाध्यक्षान्त्समामन्त्र्यराजामात्यान्प्रतारयेत् ॥
॥ ८५ ॥ पुत्रानन्यान्प्रतितथामन्त्रसंवरणाक्षमान् ॥ अयंहिप्रचुरःकोपोमदायत्तोनरोत्तम ॥ ८६ ॥ आनयेतवसम्मत्यातद्यदित्वम्प्रतीच्छ
सि ॥ तवार्थलग्नादस्माकञ्जीवनंचभविष्यति ॥ ८७ ॥ त्वञ्चापिप्रचुरैःकोपैःकिंकिंवानकरिष्यसि ॥ एवमन्यैःकोपगतैरुपायैर्नृपसत्तमः ॥
॥ ८८ ॥ पुत्रामात्यादिकान्त्सर्वान्त्सततम्परिशोधयेत् ॥ कोपदोपकरान्हन्यात्कर्त्तुमिच्छून्विवासयेत् ॥ ८९ ॥ द्वैधचित्तान्विमन्येतकुर्या
द्वैकोपरक्षणम् ॥ दासीश्चशिल्पिनीर्वृद्धामेधाधृतिमतीःस्त्रियः ॥९०॥ अन्तर्बहिश्चयायान्तिविदिताःसचिवादिभिः॥ताराजारहसिस्थित्वाभार्या
दिभिरलक्षितः ॥ ९१ ॥ अभिमन्त्र्याथसंमंत्र्यप्रेषयेत्सचिवान्प्रति ॥ तागत्वाहृदयंबुद्धास्त्रियोविज्ञानतत्पराः ॥९२॥ महिषीप्रमुखाराज्ञस्त्वां

वैकामयेतेशुभाः ॥ तत्राहंयोजयिष्यामियदितेविद्यतेस्पृहा ॥ ९३ ॥ सचिवस्त्वांकामयतेत्वद्योग्योवरवर्णिनि ॥ तंसङ्गमयितुंशक्तायदिश्रद्धा
तवास्त्यहम् ॥ ९४ ॥ इत्यनेनप्रकारेणनानोपायैस्तथोत्तरैः ॥ भार्याःपुत्रदुहित्रीश्चस्नुषाश्चप्रस्नुषास्तथा ॥ ९५ ॥ शोधयेत्सचिवान्पुत्रान्पौ
त्रादीन्त्सेवकांस्तथा ॥ कामोपधाविशुद्धांस्तुघातयेदविचारयन् ॥ स्त्रियस्तुयोज्यादण्डेनब्राह्मणांस्तुप्रवासयेत् ॥ ९६ ॥ मोक्षमार्गावसक्तन्तु
हिंसापैशुन्यवर्जितम् ॥ क्षमैकसारंनृपतिःसचिवंपरिवर्जयेत् ॥ ९७ ॥ मोक्षमार्गविषक्तांस्तुदण्डयानपिनदण्डयेत् ॥ समबुद्धिस्तुसर्वत्रतस्मा
त्तम्परिवर्जयेत् ॥ ९८ ॥ इतिसूत्रञ्चोपधानामुपधावहुधापुनः ॥ विवेचिताचोशनसातच्छास्त्रेतत्रबोधयेत् ॥ ९९ ॥ विग्रहेसततंराजापरैर्न्न
सम्यगाचरेत् ॥ भूवित्तमित्रलाभेषुनिश्चितेष्वेवविग्रहाः ॥ १०० ॥ सप्ताङ्गेषुप्रसादश्चसदाकार्योनृपोत्तमैः ॥ कोपस्यसञ्चयंरक्षां
सततंसम्यगाचरेत् ॥ १ ॥ मन्त्रिणस्तुनृपःकुर्याद्विप्रान्विद्याविशारदान् ॥ विनयज्ञान्कुलीनांश्चधर्मार्थकुशलानृजून् ॥ २ ॥
मन्त्रयेत्तैःसमञ्ज्ञानंनात्यर्थंवहुभिश्चरेत् ॥ एकैकेनैवकर्त्तव्यम्मन्त्रस्यचविनिश्चयम् ॥ ३ ॥ व्यस्तैःसमस्तैश्चान्यस्यव्यपदेशैः
समन्ततः ॥ सुसंवृतम्मन्त्रगृहंस्थलंवारुह्यमन्त्रयेत् ॥ ४ ॥ अरण्येनिःशलाकेवानयामिन्याङ्कदाचन ॥ शिशून्छाखामृगान्पण्डा
न्छुकान्वैसारिकास्तथा ॥ ५ ॥ वर्जयेन्मन्त्रगेहेतुमनुष्यान्विकृतांस्तथा ॥ दूषणम्मन्त्रभेदेषुनृपाणांयत्तुजायते ॥ नतच्छक्यं
समाधातुन्दक्षैर्नृपशतैरपि ॥ ६ ॥ दण्ड्यांस्तुदण्डयेद्दण्डैरदण्ड्यान्दण्डयेन्नहि ॥ अदण्डयन्नृपोदण्ड्यान्नदण्ड्यांश्चापिदण्डयन् ॥ ७ ॥
नृपतिर्वाच्यताम्प्राप्यचौरकिल्विषमाप्नुयात् ॥ दुर्गेतुसमतांकुर्यात्प्राकाराट्टालतोरणैः ॥ ८ ॥ भूपितान्नगराद्राजादूरेदुर्गाश्रयञ्चरेत् ॥ दुर्गम्बल

न्नृपाणान्तुनित्यन्दुर्गम्प्रशस्यते ॥ ९ ॥ शतमेकोयोधयतिदुर्गस्थोयोधनुर्द्धरः ॥ शतन्दशसहस्राणितस्माद्दुर्गम्प्रशस्यते ॥ ११० ॥ जल
दुर्गम्भूमिदुर्गंवृक्षदुर्गन्तथैवच ॥ अरण्यबलदुर्गश्चशैलजम्परिखोद्भवम् ॥ ११ ॥ दुर्गंकार्यंनृपतिनायथादुर्गस्वदेशतः ॥ दुर्गंकुर्वन्पुरंकुर्य्या
त्त्रिकोणन्धनुराकृति ॥ १२ ॥ वर्तुलञ्चचतुष्कोणन्नान्यथानगरञ्चरेत् ॥ मृत्तिकाकृतिदुर्ग्गन्तुसततंकुलनाशनम् ॥१३॥ यथाराक्षसराज्यस्य
लङ्कादुर्गान्विताप्रुरा ॥ बलेःपुरंशोणिताख्यन्तेजोदुर्गैःप्रतिष्ठितम् ॥१४॥ तद्यस्माद्व्यजनाकारंमनोभ्रष्टःशिवावलिः ॥ सौभाग्यंसातुराज्यस्य
नगरम्पञ्चकोणकम् ॥ १५ ॥ दिवियद्वर्त्ततेराज्यतंत्रभ्रष्टंभविष्यति ॥ यच्चायोध्याह्वयम्भूपपुरमिक्ष्वाकुभृताम् ॥ १६ ॥ धनुराकृतितच्चा
पिततोभूद्विजयप्रदम् ॥ दुर्गभूमौजयेद्दुर्गान्दिक्पालांश्चैवद्वारतः ॥ १७ ॥ पूजयित्वाविधानेनजयम्भूपःसमाप्नुयात् ॥ अतोदुर्गन्नृपःकुर्यात्सतं
तञ्जयवृद्धये ॥ १८ ॥ नब्राह्मणान्त्सदाराजाकेनाप्यवमनीकृतान् ॥ अवामन्यनृपोविप्रान्प्रेत्येहदुःखभाग्भवेत् ॥१९॥ नविरोधस्तुतैःकार्यः
स्वानितेपान्नचाददेत् ॥ कृत्यकालेषुसततन्तानेवपरिपूजयेत् ॥ १२० ॥ नैषान्निन्दाम्प्रकर्वीतनाभ्यसूयान्तथाचरेत् ॥ एवन्नृपोमहाबुद्धिस्त
त्तन्मण्डलसंयुतः ॥ २१ ॥ अप्रमादीचारचक्षुर्गुणवान्त्सुप्रियंवदः ॥ प्रेत्येहमहतींसिद्धिंप्राप्नोतिसुखभो वान् ॥ २२ ॥ यैर्गुणैर्योजितश्चा
त्मातैःपुत्रानपियोजयेत् ॥ नृपस्यचस्वतन्त्रत्वंसततंस्वंविनाशयेत् ॥ २३ ॥ स्वतन्त्रोभूपतनयोर्न कार्यातिनिश्चितम् ॥ निर्विकारायस
ततंवृद्धांश्चपरियोजयेत् ॥ २४ ॥ भोजनेशयनेयानेपुरुषाणाञ्चवीक्षणे ॥ वियोजयेत्सदादारान्भूपःकामविचेष्टने ॥ २५ ॥ अस्व
तन्त्राःस्त्रियःकार्याःसततम्पार्थिवेनतु ॥ ताःस्वतन्त्राःस्त्रियोनित्यंहानयेसम्भवन्तिहि ॥ २६ ॥ तस्मात्कुमारम्महिषीमुपधाभिर्मनोहरैः ॥ शो

धयित्वानियुञ्जीतयौवराज्यावरोधयोः ॥ २७ ॥ अन्तःपुरप्रवेशेतुस्वतन्त्रत्वान्निषेधयेत् ॥ भूपपुत्रस्यभार्यायाबहिःसारेतथैवच ॥ २८ ॥
अयंविशेषःसंक्षेपान्नृपधर्मोमयोदितः ॥ पुत्राणांगुणविन्यासेभार्याणामपिभूपते ॥ २९ ॥ उशनाराजनीतीनान्तन्त्राणितुबृहस्पतिः ॥
चकारान्यान्विशेषांस्तुतयोस्तन्त्रेषुबोधयेत् ॥ १३० ॥ एवंराजामहाभागोराजनीतौविशेषताम् ॥ कुर्वन्नसीदतिसदाभूयसींश्रियमश्नुते ॥
॥ १३१ ॥ इतिश्रीकालिकापुराणेसप्ताशीतितमोध्यायः ॥८७॥ और्वउवाच ॥ ॥ सदाचारेषुराजेंद्रविशेषाञ्छृणुसम्प्रति ॥ यानवश्यन्नृपः
कुर्यात्तान्मत्तःसकलाञ्छृणु ॥१॥साधवःक्षीणदोषाश्चसच्छब्दःसाधुवाचकः ॥ तेषामाचरणंयत्तत्सदाचारःसउच्यते ॥२॥ आगमेषुपुराणेषुसं
हितासुयथोदितान् ॥ समुद्दिष्टसदाचारान्गृह्णीयात्तान्गृहस्थवत् ॥३॥ऋषीन्यजेद्वेदपाठैर्देवान्होमैःप्रपूजयेत् ॥ श्राद्धैःपितॄंस्तर्पयेत्तुभूतानिबलि
भिस्तथा ॥ ४ ॥ मैत्रम्प्रधावनंस्नानन्दन्तधावनमञ्जनम् ॥ सर्वंगृहस्थवत्कुर्यान्निषेकाद्यंविधिन्तथा ॥ ५ ॥ षट्कर्म्मसुनियुञ्जीतराजावि
प्रान्त्समन्ततः ॥ तथैवक्षत्रियादींश्चस्वेस्वेकर्म्मणियोजयेत् ॥ ६ ॥ यःस्वधर्म्मम्परित्यज्यपरधर्मंसमाचरेत् ॥ तंशतेननृपोदण्डम्पुनस्तस्मि
न्नियोजयेत् ॥ ७ ॥ सांवत्सरेषुकृत्येषुविशिष्यैतान्त्समाचरेत् ॥ अवश्यम्पार्थिवोराजन्तान्विशेषाच्छृणुष्वमे ॥ ८ ॥ शरत्कालेमहाष्टम्यान्दु
र्गायाःपरिपूजनम् ॥ नीराजनन्दशम्यान्तुकुर्याद्बैबलवृद्धये ॥ ९ ॥ पौषेमासितृतीयायांकुर्यात्पुष्याभिषेचनम् ॥ पूजयित्वाश्रियन्देवींश्री
पञ्चम्याम्नृपश्चरेत् ॥ १० ॥ श्रीयज्ञन्धनधान्यस्यवृद्धयेनृपसत्तम ॥ ज्येष्ठेदशहरायान्तुविष्णोरिष्टिन्तथाचरेत् ॥ ११ ॥ रवौहरिस्थेद्वादश्यां
शक्रपूजान्तथाचरेत् ॥ विशिष्यैतांस्तुनृपतिः कुर्याद्यज्ञान्बहुव्ययैः ॥ १२ ॥ एभिःकृतैर्बलंराज्यङ्कोषश्चापिविवर्द्धते ॥ अकृतेष्वेषुयज्ञेषुदुर्भि

क्षम्मरणन्तथा ॥ १३ ॥ जायन्तेचेतयःसर्वाविशिष्यैतांस्ततश्चरेत् ॥ शरत्कालेमहापूम्यान्दुर्गायाःपूजनेविधिः ॥ १४ ॥ पुराप्रोक्तस्तुविधि
नातेनकार्यन्तुपूजनम् ॥ विधिन्नीराजनस्यत्वंशृणुपार्थिवसत्तम ॥ १५ ॥ कृतेनयेनचाश्वानाङ्गजानामपिचैधनम् ॥ आश्विनेशुक्लपक्षेतुतृती
यास्वातियोगिनी ॥ १६ ॥ ऐशान्यांस्वपुरस्यैवगृह्णीयात्स्थानमुत्तमम् ॥ नीराजनन्ततःकुर्यात्संप्राप्तेदिवसेष्टमे ॥ १७ ॥ नीराजनस्यकाल
स्तुपूर्वमुक्तोमयातव ॥ विधानमात्रंशृणुमेकृतकृत्योभविष्यसि ॥ १८ ॥ एकंहयम्महासत्वंसुमनोहरमेवच ॥ १९ ॥ पूजयेत्सप्तदिवसान्गंध
पुष्पांशुकादिभिः ॥ तृतीयादौपूजयित्वानयेतयज्ञमण्डलम् ॥ २० ॥ चेष्टान्निरूपयँस्तस्यजानीयात्तुशुभाशुभम् ॥ परराष्ट्रावमर्दैःस्यादश्वो
यदिपलायते ॥ २१ ॥ श्रियतेराजपुत्रस्तुयदिचाश्रूणिमुञ्चति ॥ नीयमानोनगच्छेत्तुमहिषीमरणन्ततः ॥ २२ ॥ तथैवमुखनासाक्षिशब्दङ्गु
र्याद्ध्योयदि ॥ यःकाष्ठाभिमुखःकुर्यात्तत्काष्ठायांजयेद्रिपून् ॥ २३ ॥ उत्क्षिप्यदक्षिणाग्रन्तुपदमश्वोभवेत्पुरः ॥ तदायदिसमस्ताँश्चनृपतिर्वि
जयेद्रिपून् ॥ २४ ॥ प्रातर्नीराजनङ्कुर्याद्दशम्यान्नृपसत्तम ॥ तदप्राप्तौचद्वादश्यान्तस्यामेवसमाचरेत् ॥ २५ ॥ कार्त्तिकेपञ्चदश्यांवातत्राभा
वेतुपार्थिव ॥ ऐशान्यांस्वपुरस्योच्चैर्हस्तमानेनषोडश ॥ २६ ॥ दशहस्तन्तुविपुलङ्कुर्याद्वैतत्रतोरणम् ॥ द्वात्रिंशद्धस्तमात्रन्तुहस्तषोडशविस्तृ
तम् ॥ २७ ॥ यज्ञार्थम्मण्डलङ्कुर्यान्मध्येवेदिंविनिर्दिशेत् ॥ वेद्याश्चोत्तरतश्चाश्ववेदिङ्कुर्यादनुत्तमाम् ॥ २८ ॥ यत्रसंस्थाप्यचाश्वश्चपूजितव्यः
पुरोहितैः ॥ सर्जोदुम्बरशाखानामर्जुनस्याथवानृप ॥ २९ ॥ मत्स्यशंखाङ्कितैश्चक्रैर्ध्वजैश्चाप्यभिभूषयेत् ॥ तोरणङ्कनकैरत्नैस्तथानानाविधैः

---

१ परेणशत्रुणारक्षाभिमर्दइत्यर्थः ।

फलैः॥३०॥भल्लातकंशालिकुष्ठंसिद्धार्थसैन्धवस्यतु॥कण्ठदेशेनिबध्नीयात्पुष्टिशान्त्यर्थमेवच ॥३१॥वैष्णवंमण्डलंकृत्वादिक्पालाँश्चनवग्रहान्॥विश्वेदेवाँस्तुमन्त्रेणविष्णुमुख्यान्प्रपूजयेत्॥३२॥आज्यैस्तिलैश्चपुष्पैश्चमिश्रीकृत्यपुरोहितः॥रवेस्तुवरुणस्यैवप्रजेशस्यतथैवच ॥३३॥ पुरुहूतस्यविष्णोश्चहोमंसप्ताहमाचरेत् ॥ एकैकस्यसहस्रंवाअष्टोत्तरशतञ्चवा ॥ ३४ ॥ कुर्यात्तुप्रत्यहंहोमंचतुर्वर्गस्यसिद्धये ॥ समिधश्चापिहोतव्याःपालाशाःखादिरास्तथा ॥३५॥ औदुंबरयश्चकाश्मर्याआश्वत्थाश्चपुरोधसा॥सौवर्णान्राजतान्वापिमार्त्तिकान्वायथेच्छया॥३६॥ कुर्यात्तुकलशानष्टौफलाम्रान्वरयोजितान् ॥ क्षिपेत्तेषुघटेष्वेवसमंगहरितालकम्॥३७॥ चन्दनञ्चतथा कुष्ठंप्रियंगुञ्चमनःशिलाम् ॥ अञ्जनञ्चहरिद्राञ्चश्वेतान्दन्तीन्तथैवच ॥ ३८ ॥ भल्लातकम्पूर्णकोन्दंसहदेवींशतावरीम्॥ वचांसनाराकुसुमांसोमराजींसुगुप्तिकाम् ॥३९॥ तुत्थंचकरवीरंचतुलसीदलमेवच ॥ एतानिनिःक्षिपेन्मध्येकलशानाम्पुरोहितः ॥ ४० ॥ कनकैरम्बुजैर्यज्ञदारुभिःस्रुक्स्रुवौतथा ॥ कर्त्तव्येशान्तिकामेननीराजनविधौनृप ॥ ४१ ॥ एवंसप्ताहपर्यन्तम्पूजाभिर्हवनैस्तथा ॥ पूर्वोक्तान्पूजयित्वातुनृपःसप्ताहमाचरेत् ॥ ४२ ॥ यावन्नीराजनंकुर्यात्तावद्राजावसेद्गृहे ॥ रात्रौनयज्ञभूमौतुनिवसेच्छान्तिमिच्छुकः ॥ ४३ ॥ नारोहयेत्तुरंगन्तंगजंवातत्रपार्थिवः ॥ यावत्सप्ताहपर्यन्तन्तस्यांनान्येनवैव्रजेत् ॥ ४४ ॥ भक्ष्यैर्न्नानाविधैश्चैवमधुपायसयावकः ॥ मोदकैर्वाबलिंकुर्यादन्नव्यञ्जनसम्भवैः ॥ ४५ ॥ पूर्वोक्तानान्तुदेवानांसप्ताहंयावदुत्तमम् ॥ सप्तमेह्नितुरेमन्तम्पूजयेत्तोरणान्तरे ॥ ४६ ॥ सूर्यपुत्रम्महाबाहुन्द्विभुजंकवचोज्वलम् ॥ ज्वलन्तंशुक्लवस्त्रेणकेशानुदग्रथ्यवाससा ॥ ४७ ॥ कशांवामकरेबिभ्रद्दक्षिणन्तुकरम्पुनः ॥ सखड्गंन्यस्यवालायांसितसैन्धवसंस्थितम् ॥ ४८ ॥ एवंविधन्तुरेमन्त

म्प्रतिमायांघटेपिवा ॥ सूर्यपूजाविधानेनपूजयेत्तोरणान्तरे ॥४९॥ पूजयित्वातुरेमन्तन्द्विरदन्तुरगन्तथा ॥ अहतांबरसंवीतंस्रक्चन्दसमन्वि
तम् ॥ ५० ॥ सुवर्णविद्धनिस्त्रिंशांविचित्रंकवचादिभिः ॥ यक्तन्तुहोमकुण्डस्यऐशान्यामश्ववेदिकाम् ॥ ५१ ॥ पूर्वंकृताग्नयेदश्वगजपातौ
पृथक्पृथक् ॥ नीयमानेगजेवाश्वेपूर्वोक्तन्तुनिमित्तकम् ॥ ५२ ॥ यत्नाद्वीक्षेतनृपतिःफलञ्चैवावधारयेत् ॥ होमकुण्डस्योत्तरस्यांवैयाघ्रेच
र्म्मणिस्थितः ॥ ५३ ॥ दैवविदांचाश्वविदासहितोवीक्ष्यसैन्धवम् ॥ नीतायतुरगायाशुभक्तापिण्डींसुगन्धिनीम् ॥ ५४ ॥ दद्यात्पुरोहित
स्तत्रसंमन्त्र्यशान्तिमन्त्रकैः ॥ भक्षणाद्यादिजिघ्रेत्तदश्नीयाद्वाहयःसच ॥५५॥ तदास्यात्सर्वकल्याणंविपरीतमतोन्यथा ॥ शाखामौदुम्बरी
माश्रींसकुशाञ्चवटोदके ॥ ५६ ॥ आप्लाव्याप्लाव्यतुरगान्राजाभूपञ्चसैनिकान् ॥ रथाँश्चसस्पृशेन्मन्त्रैःशान्तिकःपौष्टिकैस्तथा ॥ ५७ ॥
सेचयेत्सहितैर्विप्रैश्चतुरंगंपुरोहितः ॥ दिक्पालानांग्रहाणाञ्चमन्त्रश्चवैष्णवैस्तथा ॥५८॥ बहुधाचाभिषिच्याथततःसौवर्णदर्पणम् ॥ वीक्षयि
त्वानृपश्चर्त्विक्ततोमन्त्रिणमेवच ॥ ५९ ॥ राजपुत्रन्तथामात्यांनन्यानपिचसैनिकान् ॥ कम्पयन्द्विजशार्दूलःसर्वानेवतुदर्शयेत ॥ ६० ॥
चतुरंगस्यस्वस्यापिकृत्वैवंशान्तिपौष्टिके ॥ मृण्मयंशात्रवंकृत्वाचाभिचारिकमन्त्रकैः ॥ हृदिशूलेनविध्वातंशिरःखड्गेनछेदयेत् ॥ ६१ ॥
आचार्यःकविकाम्पश्चाद्दिशिमन्त्र्यहयायवै ॥ ऐन्द्रैःप्राभाकरैर्मन्त्रैर्दद्याद्वक्त्रेस्वयम्पुनः ॥ ६२ ॥ तमनेनतुमन्त्रेणसमारुह्यनृपस्तदा ॥ गच्छे
दुत्तरपूर्वान्तुदिशंसर्वैर्बलैःपुनः ॥ ६३ ॥ ऋत्विक्पुरोहिताचार्याःसर्वएवनृपन्तथा ॥ अनुगच्छेयुरन्यानिनिमित्तानिविलोकितुम् ॥ ६४ ॥

१ लगाम इतिप्रसिद्धः ।

वादित्रघोषैस्तुमुलैरातपत्रैर्वृतस्तथा ॥ गच्छेन्नीराजनेराजादारयन्निवमेदिनीम् ॥ ६५ ॥ मणिविद्रुममुक्तादिस्वर्णरत्नैरलंकृतः ॥ क्रोशमात्रन्त
तोगत्वापूर्वद्वारेणपार्थिवः ॥ ६६ ॥ स्वपुरम्प्रविशेद्विप्रैर्यज्ञंयायात्पुरोहितः ॥ तत्रगत्वादक्षिणान्तुहिरण्यङ्गान्तथातिलम् ॥ ६७ ॥ दत्त्वाप
श्चाद्विजेभ्यस्तुदद्याद्दानानिशक्तितः ॥ एवन्नीराजनङ्कृत्वाबलानाञ्चमहीक्षितः ॥ ६८ ॥ प्रेत्येहसुस्थिरांलक्ष्मींनृपतिःप्राप्नुयात्तथा ॥ त्वमश्वा
मृतसञ्जातसागरोद्भवसैन्धव ॥ ६९ ॥ येनसत्येनवहसेशक्रन्तेनेहमांवह ॥ येनसत्येनरेमन्तंयेनसत्येनभास्करम् ॥ ७० ॥ वहसेतेनसत्येन
विजयायवहस्वमाम् ॥ आभ्यान्तुभूपमन्त्राभ्यामश्वारोहणमाचरेत् ॥ ७१ ॥ आरुह्याग्रेमहिष्यास्तुशुद्धान्तेलम्बयेत्ततः ॥ महिषीचततो
भूपंपर्यङ्कोपरिसंस्थितम् ॥ ७२ ॥ दूर्वाक्षतैःससिद्धार्थैःस्त्रीभिःसहतमर्चयेत् ॥ कृतेतुभूमिग्रहणेतृतीयायांनिराजने ॥ ७३ ॥ सूतकंयदिजायेत
तत्रदुष्यतिकेवलम् ॥ सूतकीमृतकीवापिपार्थिवस्तुयथातथा ॥ ७४ ॥ बलनीराजनंकुर्यात्तन्मात्रञ्चविशेषतः ॥ ७५ ॥ सद्यःशौचम्भवेद्राज्ञो
व्यवहारविलोकने ॥ तथाधिवासनेयज्ञेपरराष्ट्रविमर्दने ॥ ७६ ॥ अयन्तेकथितोराजन्नीराजनक्रमोमया ॥ पुष्यस्नानविधानन्तुपार्थिवशृणु
साम्प्रतम् ॥ ७७ ॥ इतिश्रीकालिकापुराणेअष्टाशीतितमोध्यायः ॥ ८८ ॥ ॥ और्वउवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामिपुष्यस्नानविधि
क्रमम्॥येनविज्ञानमात्रेणविघ्नानश्यन्तिसन्ततम् ॥१॥ पौषेपुष्यर्क्षगेचन्द्रेपुष्यस्नानन्नृपश्चरेत् ॥ सौभाग्यकल्याणकरन्दुर्भिक्षमरणापहम् ॥
॥ २ ॥ विष्ट्यादिदुष्टकरणेव्यतीपातेचवैधृतौ ॥ वज्रेशूलेहर्षणादौयोधेतुयदिलभ्यते ॥ ३ ॥ तृतीयायुक्तपुष्यर्क्षेरविशौरिकुजेहनि ॥ तदासम
स्तदोषाणान्तत्स्नानंहानिकारकम् ॥४॥ ग्रहदोषाश्चजायन्तेयदिवाज्येषुचेतयः॥तदापुष्यर्क्षमन्त्रेतुकुर्यान्मासान्तरेपिच ॥५॥ इयन्तुब्रह्मणा

शान्तिरुद्दिष्टागुखेपुरा ॥ शक्रादिसर्वदेवानांशान्त्यर्थश्चजगत्पतिः ॥६॥ तुषकेशास्थिवल्मीककीटदेशादिवर्जिते ॥ शर्कराकृमिकूष्माण्डम्ब
हुकृष्टविवर्जिते ॥७॥ काकोलूकैश्चकंकैश्चकाकोलैर्गृध्रशौनकैः ॥ वर्जितेकण्टकिवनेबिभीतकविवर्जिते॥८॥शिग्रुश्लेष्मातकाभ्यान्तुजलौकाद्यै
र्विवर्जिते॥स्वस्थानेचम्पकाशोकवकुलादिविराजिते॥९॥हंसकारण्डवाकीर्णेसरस्तीरेथवाशुचौ ॥१०॥ पुष्यस्नानायनृपतिर्गृह्णीयात्स्थानमुत्तम
म्॥१०॥ततःपुरोहितोराजानानावादित्रनिःस्वनैः॥प्रदोषसमयेगच्छेत्तत्स्थानम्पूर्ववासरे॥११॥तस्यस्थानस्यकौबेर्यान्दिशिस्थित्वापुरोहितः॥
सुगन्धचन्दनैःपानैःकर्पूरदधिवासितः॥१२॥गोरोचनाभिःसिद्धार्थैरक्षतैःसफलादिभिः॥गन्धद्वारेत्यादिभिस्तुमन्त्रैःसर्वाधिसिक्तकैः ॥ १३ ॥
अधिवास्यतुतत्स्थानम्पूजयेत्तत्रदेवताः ॥ गणेशंकेशवंशक्रम्ब्रह्माणञ्चापिशंकरम् ॥१४॥ उमयासहितन्देवंसर्वाश्चगणदेवताः ॥ मातृश्चपूजये
त्तत्रनृपतिःसपुरोहितः ॥ १५ ॥ मङ्गलान्कलशान्कृत्वानानानैवेद्यसञ्चयान् ॥ प्रदद्यात्पायसंस्वादुफलंमोदकयावकौ ॥ १६ ॥ अधिवास्य
चतत्स्थानंदूर्वासिद्धार्थकाक्षतैः ॥ तत्स्थानाच्चापिभूतानिसारयेन्मन्त्रमीरयन् ॥ १७ ॥ अपसर्पन्तुतेभूतायेभूताभूमिपालकाः ॥ भूमि
नामविरोधेनपूजाकर्मकरोम्यहम् ॥ १८ ॥ ततःकरौपुटीकृत्यमन्त्रेणानेनपार्थिवः ॥ आवाहयेदिमान्देवान्पूज्यान्पुष्पाभिषेकतः ॥ १९ ॥
आगच्छन्तुसुराःसर्वेयत्रपूजाभिलाषिणः ॥ दिशोहिपालकाःसर्वेयेचान्येप्यंशभागिनः ॥ २० ॥ ततःपुष्पाञ्जलिन्दत्त्वापुनर्मन्त्रम्पठेदिमम् ॥
अद्यतिष्ठन्तुविबुधाःस्थानमासाद्यमामकम् ॥ २१ ॥ स्वपूजाम्प्राप्यपातारोदत्त्वाशान्तिम्महीभुजे ॥ ततस्तान्नृपतीरात्रिंनयेत्तुसपुरोहितः
॥ २२ ॥ स्वप्नेशुभाशुभंविद्यान्नृपस्तुसपुरोहितः ॥ कृत्वापूजान्तुदेवानांरात्रौस्थानेनृपःस्वपेत् ॥ २३ ॥ शुभाशुभफलंस्वप्नेज्ञेयन्दोषज्ञस

म्मते ॥ दुःस्वप्नदर्शनञ्चैत्स्यात्तदापुष्याभिषेचने॥२४॥ होमञ्चतुर्गुणंकुर्याद्दत्वाचापिगवांशतम् ॥ गोवाजिकुञ्जराणान्तुप्रासादस्यगिरेस्तरोः॥
॥ २५ ॥ आरोहणंशुभकरंराज्यश्रीवृद्धिकारकम् ॥ दधिदेवसुवर्णानाम्ब्राह्मणस्यप्रदर्शनम् ॥ २६ ॥ वीणादूर्वाक्षतफलंपुष्पच्छत्रविलेपनम्॥
शीतांशुचक्रशत्रूणाम्पद्मस्यसुहृदन्तथा ॥ २७ ॥ लाभाःक्षयकराःशत्रोरत्नकारस्यभूभृतः ॥ दर्शनञ्चोपरागस्यनिगडेनचबन्धनम् ॥ २८ ॥
मांसस्यभोजनञ्चैवपर्वतस्यविवर्तनम् ॥ नाभिमध्येतरूत्पत्तिर्मृतम्प्रत्यनुरोदनम् ॥२९॥ अगम्यागमनङ्कूपपंकगर्भावतीर्णता ॥ पर्वतस्यतथा
नद्याःस्रोतसांलङ्घनन्तथा ॥ सपुत्रमरणञ्चैवपानंरुधिरमद्ययोः ॥ ३० ॥ भोजनम्पायसस्यापिमनुष्यारोहणन्तथा ॥ ३१ ॥ कल्याणसुख
सौभाग्यराज्यशत्रुक्षयंन्तथा ॥ एतेस्वप्नाःप्रकुर्वन्तिनृपस्यनृपसत्तम ॥ ३२ ॥ खरोष्ट्रमहिषाणाञ्चआरोहोराज्यनाशनः ॥ नृत्यंगीतन्तथाहा
स्यंपाठश्चाप्यशुभप्रदः ॥ ३३ ॥ रक्तवस्त्रपरीधानंरक्तमाल्यानुलेपनम् ॥ रक्तांकृष्णांस्त्रियञ्चैवक्रामयन्मृत्युमाप्नुयात् ॥ ३४ ॥ कूपान्तरेप्रवे
शःस्याद्दक्षिणाशागतिस्तथा॥पंकेनिमज्जनंस्नानम्भार्यापुत्रविनाशनम्॥३५॥लाभस्तस्यभवेत्स्वप्नेनुरुत्पत्तिर्नृपस्यच ॥ आदायगर्भनाडीन्तुस
कुलेयातिखन्दुनम्॥३६॥म्लेच्छराज्यान्तरम्प्राप्यमहाकल्याणमाप्नुयात्॥दीर्घंविंशतिहस्तन्तुहस्तषोडशविस्तृतम् ॥३७॥कुर्यात्तुलक्षणोपेतंयज्ञ
मण्डलमुत्तमम्॥ततोपरेह्निपूर्वाह्णमातॄणाम्पूजनञ्चरेत्॥३८॥कुङ्कुमलग्नांवसोर्धारांवृद्धिश्राद्धन्तथैवच॥चन्दनागुरुकस्तूरीधूमकर्पूरचूर्णकैः ३९॥
सम्पूज्यमण्डलस्थानन्तस्मिन्ह्रौंशंभवेनमः॥अस्त्रायहुम्फडित्येवंलिखेन्मन्त्रद्वयम्बुधः ॥४०॥ मन्त्रविन्मण्डलज्ञश्चसूत्रैःकम्बलसम्भवैः॥कौशे
यैर्वास्वस्तिकाख्यम्प्रथमंमण्डलंलिखेत्॥४१॥चतुर्हस्तप्रमाणन्तुमण्डलंविलिखेत्ततः ॥ हस्तप्रमाणम्पद्मन्तुमण्डलस्यप्रकीर्त्तितम् ॥४२॥

द्वाराणांसार्द्धहस्तानिकर्णिकाकेशरोज्वलम् ॥ सितंरक्तञ्चपीतञ्चकृष्णंहारितमेवच ॥ ४३ ॥ शालिचूर्णैश्चकौसुम्भैर्हारिद्रैर्हरिदुद्भवैः ॥ कुर्या
त्तथाश्वनैश्चूर्णैराजामण्डलवृद्धये ॥ ४४ ॥ पद्मान्ततःसमारभ्यतालम्पश्चिमगामिनम् ॥ पश्चिमद्वारमध्येचचतुर्हस्तंविनिर्दिशेत् ॥ ४५ ॥
प्रत्येकन्द्वारमध्येतुपद्मंचैवांष्टपत्रकम् ॥ कुर्यान्मण्डलभागज्ञश्चूर्णैरेवपृथक्पृथक् ॥ ४६ ॥ चूर्णैस्तु मण्डलङ्कृत्वासूत्राण्युत्सारयेत्ततः ॥
उत्सार्यसूत्रंप्रथमम्मण्डलम्पूजयेत्ततः ॥ ४७ ॥ भवनायनमइतिततोहस्तंवियोजयेत् ॥ सव्यावलम्बहस्तन्तुरजःपातंसमाचरेत् ॥ ४८ ॥
मध्यमानामिकाङ्गुष्ठैरुपरिष्टाद्यथेच्छया ॥ अधोमुखाङ्गुलीकृत्वापातयेच्चविचक्षणः॥४९॥समारेखातुकर्त्तव्य.विच्छिन्नापुष्पराजिता ॥ अंगुष्ठप
र्वनैपुण्यात्समाकार्याविजानता ॥५०॥ संशक्तविषमंस्थूलंविच्छिन्नंकृसराकृतम् ॥ पयन्तमार्पितंह्रस्वमालिखेन्नकदाचन ॥५१॥ संशक्तेकल
हंविद्याद्दूर्ध्वरेखेतुविग्रहम् ॥ अतिस्थूलेभवेद्व्याधिर्नित्यम्पीडाविमिश्रिते ॥ ५२ ॥ विन्दुभिर्भयमाप्नोतिशत्रुपक्षान्नसंशयः॥कृशायाञ्चार्थहानिः
स्याच्छिन्नायाम्मरणन्ध्रुवम् ॥ ५३ ॥ वियोगोवाभवेत्तस्यइष्टद्रव्यसुतस्यवा ॥ अविदित्वालिखेद्यस्तुमण्डलन्तुयथेच्छया ॥ ५४ ॥ सर्वदोषा
नवाप्नोतियेदोषाःपूर्वमीरिताः ॥ सितसर्षपदूर्वायारेखाःकार्याविजानता ॥ ५५ ॥ क्रिमलंविजयम्भद्रंविमानंशुभदंशिवम् ॥ वर्द्धमानञ्चदेवञ्च
शताक्षंकामदायकम् ॥ ५६ ॥ रुचिकंस्वस्तिकञ्चैवद्वादशैतेतुमण्डलाः ॥ यथास्थानंयथायज्ञंयोजनीयाविचक्षणैः ॥ ५७ ॥ सागरेमथ्यमाने
तुपीयूषार्थंसुरोत्करैः ॥ पीयूषधारणार्थायनिर्मिताविश्वकर्मणा ॥ ५८ ॥ कलाङ्कलान्तुदेवानामसित्वातेपृथक्पृथक् ॥ यतःकृतास्तुकलशा
स्ततस्तेपरिकीर्त्तिताः ॥ ५९ ॥ नवैवकलशाःप्रोक्तानामतस्तान्निबोधत ॥ गोह्योपगोह्योमरुतोमयूखश्चतथापरः ॥ ६० ॥ मनोहाचार्य

भद्रश्चविजयस्तनुदूषकः ॥ इन्द्रियघ्नोथविजयोनवमःपरिकीर्त्तितः ॥ ६१ ॥ तेषामेवक्रमाद्भूपनवनामानियानितु ॥ शृणुतान्यपराण्येवशा
न्तिदानिसदैवहि ॥ ६२ ॥ क्षितीन्द्रःप्रथमःप्रोक्तोद्वितीयोजनसम्भवः ॥ पवनाग्नीततोद्वेतुयजमानस्ततःपरः ॥ ६३ ॥ कोषसम्भवनाभ्यां
तुपष्ठःसपरिकीर्त्तितः ॥ सोमस्तुसप्तमःप्रोक्तआदित्यस्तुतथाष्टमः ॥ ६४ ॥ विजयोनामकलशोयोसौनवमउच्यते ॥ सतुपञ्चमुखःप्रोक्तो
महादेवस्वरूपधृक् ॥ ६५ ॥ घटस्यपञ्चवक्रेषुपञ्चवक्रःस्वयन्तथा ॥ यथाकाष्ठांस्थितःसम्यग्वामदेवादिनामतः ॥ ६६ ॥ मण्डलस्यं
तुपद्मान्तःपञ्चवक्रंघटन्यसेत् ॥ क्षितीन्द्रम्पूर्वतोन्यस्यपश्चिमेजलसम्भवम् ॥ ६७ ॥ वायव्येवायवन्यस्यआग्नेयेह्यग्निसम्भवम् ॥
नैर्ऋत्येयजमानन्तुऐशान्याङ्कोषसम्भवम् ॥ ६८ ॥ सोममुत्तरतोयोज्यंसौरंदक्षिणतोन्यसेत् ॥ न्यस्यैवंकलशाँश्चैवतेषुचैतान्विचिन्त
येत् ॥ ६९ ॥ कलशानाम्मुखेब्रह्माग्रीवायांशङ्करःस्थितः ॥ मूलेतुसंस्थितोविष्णुर्मध्येमातृगणाःस्थिताः ॥ ७० ॥ दिक्पालादेवताः
सर्वावेष्टयन्तिदिशोदश ॥ कुक्षौतुसागराःसप्तसप्तद्वीपाश्चसंस्थिताः ॥ ७१ ॥ नक्षत्राणिग्रहाःसर्वेतथैवकुलपर्वताः ॥ गंगाद्याःसरितः
सर्वावेदाश्चत्वारएवच ॥ ७२ ॥ कलशेसंस्थिताःसर्वेतेषुतानिविचिन्तयेत् ॥ रत्नानिसर्वबीजानिपुष्पाणिचफलानिच ॥ ७३ ॥ वज्रमौ
क्तिकवैदूर्यमहापद्मेन्द्रस्फाटिकैः ॥ सर्वधाममयम्बिल्वन्नागरोदुम्बरन्तथा ॥ ७४ ॥ बीजपूरकजम्बीरकाश्मीराम्रातदाडिमम् ॥ यवंशालि
श्चनीवारंगोधूमंसितसर्षपम् ॥ ७५ ॥ कुंकुमागुरुकर्पूरमदनंरोचनन्तथा ॥ चन्दनञ्चतथामांसीमेलांकुष्ठन्तथैवच ॥ ७६ ॥ कस्तूरीपत्रचूर्ण

१ पत्रचन्द्रत्र इ०पा० ।

ञ्चजलानिर्यासकाम्बुदम् ॥ शैलेयम्बदरञ्जातीपत्रपुष्पेतथैवच ॥ ७७ ॥ कालशाकन्तथापृक्कादेवीपर्णकमेवच ॥ वचान्धात्रीसमञ्जिष्ठान्तु
रुष्कम्मंगलाष्टकम् ॥ ७८ ॥ दूर्वामोहनिकाम्भद्रांशतमूलींशतावरीम् ॥ वर्णानांसरलांक्षुद्रांसहदेवांगजाह्वयाम् ॥ ७९ ॥ पूर्णकोषांसिता
म्पीठांगुञ्जांशिरसिकानलौ ॥ ८० ॥ व्यामकंगजदन्तञ्चशतपुष्पाम्पुनर्नवाम् ॥ ब्राह्मींदेवींशिवांरुद्रांसर्वसन्धानिकान्तथा ॥ ८१ ॥ समाह
त्यशुभानेतान्कलशेषुनिधापयेत् ॥ कलशस्ययथादेशंविधिंशम्भुङ्गदाधरम् ॥ ८२ ॥ यथाक्रमम्पूजयित्वाशम्भुंमुख्यतयायजेत् ॥ प्रासा
देनतुमन्त्रेणशम्भुंतन्त्रेणशंकरम् ॥ ८३ ॥ प्रथमम्पूजयेन्मध्येनानानैवेद्यवेदनैः ॥ दिक्पालानाङ्घटेष्वेवदिक्पालानापिपूजयेत् ॥ ८४ ॥
पूर्ववहिःस्थापितेषुग्रहाणांकलशेषुच ॥ नवग्रहान्पूजयेत्तुमातृर्मातृघटेषुच ॥ ८५ ॥ सर्वेदेवाघटेपूज्याघटास्तेषाम्पृथक्पृथक् ॥ नवैवतत्र
पूर्वोक्ताःस्मृतामुख्यतयानृप ॥ ८६ ॥ भक्ष्यैर्भोज्यैश्चपेयैश्चपुष्पैर्नानाविधैःफलैः ॥ यावकैःपायसैश्चैवयथासम्भवयोजितैः ॥ ८७ ॥ पुष्य
स्नानायनृपतिःपूजयेत्सकलान्सुरान् ॥ दक्षिणेमण्डलस्याथकुण्डन्निर्मायपायसैः ॥ ८८ ॥ समिद्भिःशालिसिद्धार्थैर्घृतैर्दूर्वाक्षतैस्तथा ॥
केवलैश्चतथैवाज्यैःपूजितान्सकलान्सुरान् ॥ ८९ ॥ होमेनतोषयेद्वृद्धचैनृपःसर्त्विक्पुरोहितः ॥ होमान्तेमण्डलोदीच्यांवेदिकायांसपट्टक
म् ॥ ९० ॥ रोचनाख्यमलंकारांस्तथासर्वान्नियोजयेत् ॥ वृद्धावंगुलमंगुल्यापड्विंशांगुलिकावधि ॥ ९१ ॥ वृत्तंवाचतुरस्रंवापद्मन्त्रिकोण
सञ्ज्ञकम् ॥ रत्नैशान्पद्ममध्येतुगोमुष्टिकविनायकैः ॥ ९२ ॥ श्रीश्रीवृक्षवरारोहामुमादेवींशुभान्विताम् ॥ रत्नैःसर्वैरलंकारैःपट्टंकार्यन्द्विहस्त

१ पृक्काशाकविशेषः ।

कम् ॥ ९३ ॥ हस्तविस्तारमुच्छ्रायन्नवहस्तन्दशांगुलम् ॥ स्नानार्थंसार्द्धहस्तञ्चपट्टंवृत्तंगुणान्वितम् ॥ ९४ ॥ शय्याचतुर्गुणादी
र्घाधनुर्मानन्तुपीठकम् ॥ गजसिंहकृताटोपंहेमरत्नविभूषितम् ॥ ९५ ॥ सिंहाख्यंसार्द्धविस्तारादण्डासनमथापिवा ॥ व्याघ्रचित्र
कपट्टैर्वाउपधानानिकारयेत् ॥ ९६ ॥ अन्यैर्वानिर्मितैश्चर्मसृदुतूलकपूरिता ॥ शय्यादीर्घार्द्धविस्तीर्णाचतुर्हस्तासुलक्षणा ॥ ९७ ॥
वितस्त्यधिकमिच्छन्तिनृपस्यगुरुविद्यया ॥ अर्द्धचन्द्रसमंकुर्यादासनञ्चतुरस्रकम् ॥ ९८ ॥ उपधानानिशय्यायाःकर्णादिमूलभे
दतः ॥ षोडशैवात्रकार्याणिवर्णचित्रयुतानिच ॥ ९९ ॥ यानंसिंहासनम्पट्टंशय्योपकरणादिकम् ॥ राज्ञोनूतनयोग्यन्तद्वेद्याउत्तरतो
न्यसेत् ॥ १०० ॥ तेषान्तुपश्चिमेस्वर्णरत्नौघखचितेवरे ॥ पर्यंकेयज्ञदार्वोघनिर्मितेमहदास्तरे ॥ १ ॥ ऊर्द्ध्वाच्छादनसंयुक्तेचर्मावृतच
तुष्टये ॥ वृषभस्यतथोर्णायाःसिंहशार्दूलयोरपि ॥ २ ॥ पादपीठेरत्नयुतेपादावारोप्यपार्थिवः ॥ तस्मिन्पर्यंकपीठस्थेचर्मखड्गचतुष्टये ॥
॥ ३ ॥ नानालङ्कारभूषाढ्यन्नृपतिंरत्नशालिनम् ॥ स्नापयेद्ब्राह्मणैःसार्द्धराजानंसुखसंङ्गतम् ॥ ४ ॥ संवीतकम्बलंकृष्णंम्बहुवस्त्रै
श्चशोभितम् ॥ कलशैर्बलिपुष्पाद्यैःशालिचूर्णैश्चस्नापयेत् ॥ ५ ॥ अष्टौषोडशविंशाष्टशतमष्टाधिकञ्चवा ॥ कलशानांसमाख्याताअ
धिकस्योत्तरोत्तरम् ॥ ६ ॥ जयकल्याणदैर्मन्त्रैर्मंगलोत्थैश्चशाम्भवैः ॥ वैष्णवैरथदिक्पालैर्ग्रहमन्त्रैश्चमातृकैः ॥ ७ ॥ आज्यन्तेजःसमु
द्दिष्टमाज्यम्पापहरंपरम् ॥ आज्यंसुराणामाहारआज्येलोकाःप्रतिष्ठिताः ॥ ८ ॥ भौमान्तरिक्षंदिव्यंवायत्तेकल्मषमागतम् ॥ सर्वन्तदाज्यसं

१ संस्थितमितिवापाठः । २ दृष्टमितिपाठः ।

स्पर्शात्प्रणाशमुपगच्छतु ॥ ९ ॥ ततोपनीयगात्रात्तुकम्बलंवस्त्रमेवच ॥ कलशैःस्नापयेद्भूपपुष्पस्नानायपूरितैः ॥ ११० ॥ एभिर्मन्त्रैर्नर
श्रेष्ठतनुतत्त्वार्थसाधकैः ॥ सुरास्त्वामभिषिञ्चन्तुयेचसिद्धाःपुरातनाः ॥ ११ ॥ ब्रह्माविष्णुश्चरुद्रश्चसाध्याश्चसमरुद्गणाः ॥ आदित्यावस
वोरुद्राआश्विनौयौभिषग्वरौ ॥ १२ ॥ अदितिर्देवमाताचस्वाहालक्ष्मीःसरस्वती ॥ कीर्तिर्लक्ष्मीर्धृतिःश्रीश्चसिनीवालीकुहूस्तथा ॥१३॥ दि
तिश्चसुरसाचैवविनताकद्रुरेवच ॥ देवपत्न्यश्चयाःप्रोक्तादेवमातरएवच ॥ १४ ॥ सर्वास्त्वामभिषिञ्चन्तुसिद्धाश्चाप्सरसाङ्गणाः ॥ नक्षत्राणिमु
हूर्ताश्चपक्षाहोरात्रसन्धयः ॥ १५ ॥ संवत्सरानिमेषाश्चकलाःकाष्ठाःक्षणालवाः ॥ सर्वेत्वामभिषिञ्चन्तुकालस्यावयवास्तथा ॥ १६ ॥ वैमा
निकाःसुरगणामनवःसागरैःसह ॥ सरितश्चमहानागानागाःकिम्पुरुषास्तथा ॥ १७ ॥ वैखानसामहाभागाद्विजावैहायसाश्चये ॥ सप्तर्षयःस
दाराश्चध्रुवस्थानानियानितु ॥ १८ ॥ मरीचिरत्रिःपुलहःपुलस्त्यःक्रतुरंगिराः ॥ भृगुःसनत्कुमारश्चसनकश्चसनन्दनः ॥ १९ ॥ सनात
नश्चदक्षश्चजैगीषव्योभिनन्दनः ॥ एकतश्चद्वितश्चैवत्रितोजाबालिकाश्यपौ ॥१२०॥ दुर्वासादुर्विनीतश्चकण्वःकात्यायनस्तथा॥मार्कण्डेयो
दीर्घतपाःशुनःशेपोविदूरथः॥२१॥और्वःसंवर्त्तकश्चैवच्यवनोत्रिःपराशरः ॥ द्वैपायनोयवक्रीतोदेवरातःसहात्मजः॥२२॥एतेचान्येचबहवोवेद
व्रतपरायणाः॥सशिष्यास्तेभिषिञ्चन्तुसदाराश्चतपोधनाः ॥२३॥ पर्वतास्तरवोनद्यःपुण्यान्यायतनानिच ॥ प्रजापतिःक्षितिश्चैवगावोविश्वस्य
मातरः॥२४॥वाहनानिचदिव्यानिसर्वेलोकाश्चराचराः॥अग्नयःपितरस्ताराजीमूताःखान्दिशोजलम्॥२५॥ एतेचान्येचबहवःपुण्यसङ्कीर्त्तनाः
शुभाः॥तोयैस्त्वामभिषिञ्चन्तुसर्वोत्पातानिवर्हणैः॥२६॥ इत्येवंशुभदैरेतैर्दिव्यैर्मन्त्रैस्तथापरैः ॥ सौरैर्नारायणैरौद्रैर्ब्रह्मशक्रसमुद्भवैः ॥ २७ ॥

आपोहिष्ठाहिरण्येतिसम्भवेतिसुरेतिच ॥ मानस्तोकेतिमन्त्रेणगन्धद्वारेत्यनेनच ॥२८॥ सर्वमंगलमांगल्येश्रीश्चतेग्रहयोगिभिः ॥ इत्येवंस्ना
नमासाद्यगात्रमावृत्यकम्बलैः ॥ २९ ॥सर्वमङ्गलमन्त्रेणवस्त्रंकार्पासकन्धियात् ॥ आचम्यचततोदेवान्गुरुंविप्रांश्चपूजयेत् ॥ १३० ॥ ध्व
जञ्छत्रञ्चामरञ्चघण्टाञ्चाश्वान्गजांस्तथा ॥ मन्त्रञ्चस्वाधारयेत्तुततोगच्छेद्धुताशनम् ॥ ३१ ॥ तत्रगत्वावह्निमध्येवह्नेःश्रीर्वीक्ष्यपार्थिवः ॥
सुनिमित्तान्यनित्तानिलक्षयेत्तत्रबिन्दुभिः ॥ ३२ ॥ दैवज्ञकञ्चुकंयमात्यबान्दिपौरजनैर्वृतः ॥ वादित्रघोषैस्तुमुलैस्तथातौर्यत्रिकैःशुभैः ॥
॥ ३३ ॥ कृत्वाशेषेपुनःशान्तिमाशीर्वाच्यचवैद्विजान् ॥ पूर्णांविधायविधिवद्दक्षिणांकनकान्विताम् ॥ ३४ ॥ धान्यानिचाथवासांसिदत्त्वा
कुर्याद्विसर्जनम् ॥ ततःशेषजलैःसर्वानमात्यादीन्पुरोहितः ॥ ३५ ॥ सेचयेच्चतुरंगश्चबलश्चापिसराष्ट्रकम् ॥ एवंकृत्वानृपःपश्चात्त्रिरात्रंसंयतो
भवेत् ॥ ३६ ॥ मांसमैथुनहीनश्चकुर्यान्मांगल्यसेवनम् ॥ पुष्यनक्षत्रयुक्तातुतृतीयायादिलभ्यते ॥ ३७ ॥ तस्याम्पूज्यासदादेवीचण्डिकाश
करेणह ॥ पांश्चालिकाविहाराद्यैःशिशूनांकौतुकैस्तथा ॥ ३८ ॥ वैवाहिकेनविधिनामोहयेच्चण्डिकांशिवाम् ॥ चतुष्पथेषुसर्वेषुदेवदेवीगृहेपुच ॥
॥ ३९ ॥ पताकाभिरलंकुर्य्यादेवंकुर्वन्नसीदति ॥ एवंकृत्वाशान्तियागन्तथापुष्याभिषेचनम् ॥ १४० ॥ चतुरंगैःसमंराजाभार्याभिस्तनयैस्स
ह ॥ राज्यमण्डलसंयुक्तःपरत्रेहनसीदति ॥ ४१ ॥ नातःपरतरोयज्ञोनातःपरतरोत्सवः ॥ नातःपरतराशान्तिर्नातःपरतरंशिवम् ॥ ४२ ॥
अनेनैवविधानेननृपतेरभिषेचनम् ॥ युवराज्याभिषेकञ्चकुर्याद्राजपुरोहितः ॥ ४३ ॥ नृपाभिषेककरणमादौयादिसमाचरेत् ॥ अनेनैवविधा

१ वह्निभिरितिपाठः । २ अन्तःपुररक्षकः कञ्चुकी । ३ कन्यापुत्तिकाप्रसिद्धा ।

नेनस्थिरःस्यान्नृपतिस्तदा ॥ ४४ ॥ अयंयज्ञःसमुद्दिष्टःशक्रार्थंब्रह्मणःपुरा ॥ एवंयज्ञन्नृपःकृत्वापरत्रेहनसीदति ॥ ४५ ॥ इतिश्रीकालिका
पुराणेएकोननवतितमोध्यायः ॥ ८९ ॥ और्वउवाच ॥ अथातःशृणुराजेन्द्रशक्रोत्थानंध्वजोत्सवम् ॥ यत्कृत्वानृपतिर्यातिनकदाचित्परा
भवम् ॥ १ ॥ रवौहरिस्थेद्वादश्यांश्रवणेनबिडौजसम् ॥ आराधयेन्नृपःसम्यक्सर्वविघ्नोपशान्तये ॥ २ ॥ राजोपरिचरोनामवसुनामापरस्तुयः
॥ नृपस्तेनायमतुलोयज्ञःप्रावर्त्तितःपुरा ॥ ३ ॥ प्रावृट्कालेचतमसिद्वादश्यामासितेतरे ॥ पुरोहितोबहुविधैर्वाद्यैस्तूर्यैःसमन्वितः ॥ ४ ॥
प्रथमंशक्रकेत्वर्थंवृक्षमामन्त्र्यवर्द्धयेत् ॥ सांवसरोवार्द्धकिश्चकृतमङ्गलकौतुकः ॥ ५ ॥ उद्यानेदेवतागारेश्मशानेमार्गमध्यतः ॥ येजातास्तरव
स्तांस्तुवर्जयेद्वासवध्वजे ॥ ६ ॥ बहुवल्लीयुतंशुष्कम्बहुकण्टकसंयुतम् ॥ कुब्जंवृक्षादनीयुक्तंलताछन्नन्तरुन्त्यजेत् ॥ ७ ॥ पक्षिवाससमा
कीर्णङ्कोटरैर्बहुभिर्युतम् ॥ पवनानलविध्वस्तन्तरुंयत्नेनवर्जयेत् ॥ ८ ॥ नारीसञ्ज्ञाश्चयेवृक्षाअतिह्रस्वाअतिकृशाः ॥ तान्त्सदावर्जयेद्धीरः
सर्वदाशक्रपूजने ॥ ९ ॥ अर्जुनोप्यश्वकर्णश्चप्रियकोपवणेवच ॥ औदुम्बरश्चपञ्चैतेकेत्वर्थेह्युत्तमाःस्मृताः ॥१०॥ अन्येचदेवदार्वाद्याःशाला
द्यास्तरवस्तथा ॥ प्रशस्तास्तुपरिग्राह्यानाप्रशस्ताःकदाचन ॥ ११ ॥ धृत्वावृक्षन्ततोरात्रौस्पृष्ट्वामन्त्रामिमम्पठेत् ॥ यानिवृक्षेषुभूतानितेभ्यः
स्वस्तिनमोस्तुवः ॥ १२ ॥ उपहारंगृहीत्वेमंक्रियतांवासवध्वजम् ॥ पार्थिवस्त्वांवरयतेस्वस्तितेस्तुनगोत्तमम् ॥ १३ ॥ ध्वजार्थन्देवराजस्य
पूजेयम्प्रतिगृह्यताम् ॥ ततोपरेह्नितञ्छित्वामूलमष्टांगुलम्पुनः ॥ १४ ॥ जलेक्षिपेत्तथाग्रस्यच्छित्त्वैवचतुरंगुलम् ॥ ततोनीत्वापुरद्वारंकेतु

---

१ गणकः । २ सालभेदः । ३ वांशीतिदेशभाषा । ४ तद्वेतिपाठोवा ।

न्निर्म्मायतत्रवै ॥ १५ ॥ शुक्लाष्टम्याम्भाद्रपदेकेतुंवेदीम्प्रवेशयेत् ॥ द्वाविंशद्धस्तमानस्तुअधमःकेतुरुच्यते ॥ १६ ॥ द्वात्रिंशत्ततोज्याया
न्द्वाचत्वारिंशदेवच ॥ ततोधिकःसमाख्यातोद्वापञ्चाशत्तथोत्तमः ॥ १७ ॥ कुमार्यःपञ्चकर्त्तव्याःशक्रस्यनृपसत्तम ॥ शालमय्यस्तुताःसर्वा
अपराःशक्रमातृकाः ॥ १८ ॥ केतोःपादप्रमाणेनकार्याःशक्रकुमारिकाः ॥ मातृकार्द्धप्रमाणन्तुयन्त्रिहस्तद्वयन्तथा ॥ १९ ॥ एवंकृत्वाकु
मारीश्चमातृकाःकेतुमेवच ॥ एकादश्यांसितेपक्षेयष्टिन्तामधिवासयेत् ॥ २० ॥ अधिवास्यततोयष्टिंगन्धद्वारादिमन्त्रकैः ॥ द्वादश्याम्मण्ड
लंकृत्वावासवंविस्तृतात्मकम् ॥ २१ ॥ अच्युतम्पूजयित्वातुशक्रम्पश्चात्प्रपूजयेत् ॥ शक्रस्यप्रतिमांकुर्यात्काञ्चनीन्दारवीञ्चवा ॥ २२ ॥
अन्यतैजससम्भूतांसर्वाभावेतुमृन्मयीम् ॥ ताम्मण्डलस्यमध्येतुपूजयित्वाविशेषतः ॥ २३ ॥ ततःशुभेमुहूर्तेतुकेतुमुत्थापयेन्नृपः ॥ वज्रह
स्तसुरारिघ्नबहुनेत्रपुरन्दर ॥ २४ ॥ क्षेमार्थंसर्वलोकानाम्पूजेयम्प्रतिगृह्यताम् ॥२५॥ एह्येहिसर्वामरसिद्धसंघैरभिष्टुतोवज्रधरामरेश ॥ समुत्थि
तस्त्वंश्रवणाद्यपादेगृहाणपूजाम्भगवन्नमस्ते ॥ २६ ॥ एवमुत्तरतन्त्रोक्तैर्दहनप्लवनादिभिः ॥ इतिमन्त्रेणतन्त्रेणनानानैवेद्यवेदनैः ॥ अपूपैः
पायसैःपानैर्गुडैधानाभिरेवच ॥ २७ ॥ भक्षैर्भोज्यैश्चविविधैःपूजयेच्छ्रीविवृद्धये ॥ घटेषुदशदिक्पालान्ग्रहांश्चपरिपूजयेत् ॥ २८ ॥
साध्यादीन्त्सकलान्देवान्मातृःसर्वाअनुक्रमात् ॥ ततःशुभेमुहूर्तेतुज्ञानीवर्द्धकिसंयुतः ॥ २९ ॥ केतूत्थापनभूमिन्तुयज्ञवेद्यास्तुपश्चिमे ॥
विप्रैःपुरोहितैःसार्द्धंगच्छेद्राजासुमंगलैः ॥ ३० ॥ रज्जुभिःपञ्चभिर्बद्धंयन्त्रश्लिष्टंसमातृकम् ॥ कुमारीभिस्तुसंयुक्तान्दिक्पालानाञ्चपट्टकैः ॥
॥ ३१ ॥ बृहद्भिरतिकान्तैश्चनानाद्रव्यैःसुपूरितैः ॥ यथावर्णैर्यथादेशेयोजितैर्वस्त्रवेष्टितैः ॥ ३२ ॥ युक्तन्तांकिंकिणीजालैर्बृहद्घण्टौघचामरैः ॥

भूषितम्मुकुरैरुच्चैम्माल्यैर्बहुविधैस्तथा ॥ ३३ ॥ बहुपुष्पैःसुगन्धैश्चभूषितंरत्नमालया ॥ चित्रमाल्याम्बरैश्चैवचतुर्भिरापितोरणैः ॥ ३४ ॥
उत्थापयेन्महाकेतुंराजकीयःशनैःशनैः ॥ तमुत्थायमहाकेतुम्पूजितम्मण्डलान्तरे ॥ ३५ ॥ प्रतिमान्तान्नयेन्मूलङ्केतोःशक्रं विचिन्तयन् ॥
यजेत्तम्पूर्ववत्तत्रशचीम्मातलिमेवच॥३६॥ जयन्तन्तनयन्तस्यवज्रमैरावन्तथा ॥ ग्रहाँश्चाप्यथदिक्पालान्त्सर्वांश्चगणदेवताः॥३७॥अपूपाद्यैः
पूजयेत्तुबलिभिःपायसादिभिः॥पूजितानाञ्चदेवानांशश्वद्धोमंसमाचरेत्॥३८॥होमान्तेतुबलिन्दद्याद्वासवायमहात्मने ॥ तिलंघृतञ्चाक्षतञ्चपुष्प
न्दूर्वान्तथैवच ॥ ३९ ॥ एतैस्तुजुहुयाद्देवान्त्स्वैःस्वैर्मन्त्रैर्नरोत्तम ॥ ततोहोमावसानेतुभोजयेद्ब्राह्मणानपि ॥ ४० ॥ एवंसम्पूजयेन्नित्यंसप्तरात्र
न्दिनेदिने ॥ ब्राह्मणैःसहितोराजावेदवेदांगपारगैः ॥ ४१ ॥ सर्वत्रशक्रपूजासुयज्ञेषुपरिकीर्त्तितः ॥ त्रातारमितिमन्त्रोयंवासवस्याप्रियःपरः
॥ ४२ ॥ एवंकृत्वादिवाभागेशक्रोत्थापनमादितः ॥ श्रवणर्क्षयुतायान्तुद्वादश्याम्पार्थिवःस्वयम् ॥ ४३ ॥ अन्तपादेभरण्यान्तुनिशिशक्रं
विसर्ज्जयेत् ॥ सुप्तेषुसर्वलोके षुयथाराजानपश्यति ॥ ४४ ॥ षण्मासान्मृत्युमाप्नोतिराजादृष्ट्वाविसर्ज्जनम् ॥ शक्रस्यनृपशार्दूलतस्मान्नेक्षेत
तन्नृपः ॥ ४५ ॥ विसर्ज्जनस्य मन्त्रोयम्पुराविद्भिरुदीरितः ॥ सार्द्धंसुरासुरगणैःपुरन्दरशतक्रतो ॥ ४६ ॥ उपहारंगृहीत्वेमम्महेन्द्रध्वजग
म्यताम् ॥ सुतकेतुसमुत्पन्नेवारेभौमस्यवाशनेः ॥ ४७ ॥ भूमिकम्पादिकोत्पातेवासवन्नविसर्ज्जयेत् ॥ उत्पातेसप्तरात्रन्तुतथोपप्लवदर्शने
॥ ४८ ॥ व्यतीत्यशनिभौमौचह्यन्यर्क्षोपिविसर्ज्जयेत् ॥ सूतकेत्वथसम्प्राप्तेव्यतीतेसूतकेपुनः ॥ ४९ ॥ यस्मिन्तस्मिन्दिनेचैवसूतकान्ते
विसर्ज्जयेत् ॥ तथाकेतुंनृपोरक्षेत्पतन्तिशाकुनायथा ॥ ५० ॥ नकेतौनृपशार्दूलयावन्नाहिविसर्जनम् ॥ शनैःशनैःपातयेत्तुयथोत्थापनमा

दितः ॥ ५१ ॥ कृतन्तथा न्यथाभग्नेकेतौमृत्युंमवाप्नुयात् ॥ विसृष्टंशक्रकेतुन्तुसालंकारन्तथानिशि ॥ ५२ ॥ क्षिपेदनेनमन्त्रेणत्वगाधेसलि
लेनृप ॥ तिष्ठकेतोमहाभागयावत्संवत्सरञ्जले ॥ ५३ ॥ भवायसर्वलोकानामन्तरायविनाशक ॥ उत्थापयेत्तूर्यरवैःसर्वलोकस्यवैपुरः
॥ ५४ ॥ रहोविसर्ज्जयेत्केतुंविशेषोयम्प्रपूजने ॥ एवंयःकुरुतेपूजांवासवस्यमहात्मनः ॥ ५५ ॥ सचिरम्पृथिवीम्भुक्त्वावासवंलोकमाप्नुयात् ॥
नतस्यराज्येदुर्भिक्षन्नाधयोव्याधयःक्वचित् ॥ ५६ ॥ स्थास्यन्तिमृत्युर्न्नाकालेजनानान्तत्रजायते ॥ तत्तुल्यःकोपिनान्योस्तिप्रियःशक्रस्यपा
र्थिवः ॥ तस्यपूजासर्वपूजाकेशवाद्याश्चतत्रगाः ॥ ५७ ॥ सकलकलुषहारिव्याधिदुर्भिक्षनाशंसकलभवनिवेशंसर्वसौभाग्यकारि ॥ सुर
पतिगृहगाभिवार्च्चनंशक्रकेतोःप्रतिशरदमनेकैःपूजयेच्छ्रीविवृद्धये ॥ ५८ ॥ ॥ इतिश्रीकालिकापुराणेनवतितमोध्यायः ॥ ९० ॥
॥ और्वउवाच ॥ ॥ ज्येष्ठेदशहरायान्तुविष्णोरीष्टिन्नृपशृणु ॥ येनवाविधिनाकुर्यादिष्टिंविष्णोर्नृपःसदा ॥ १ ॥ प्रत्यब्दम्पार्थिवःकुर्या
त्प्रतिमांकाञ्चनींहरेः ॥ अन्यतेजोमयींवापिदारवींवाशिलामयीम् ॥ २ ॥ ताम्प्रतिष्ठाप्यविधिनामानोन्मानैस्तुशिल्पिभिः ॥ प्रति
ष्ठांविधिवत्तस्याःकुर्याद्विप्रैःपुरोहितैः ॥ ३ ॥ तांसंस्थाप्यसुरागारेस्वयंवायत्नतःकृते ॥ वासुदेवस्यबीजेनपूर्वोक्तविधिनातथा ॥ ४ ॥
सर्वोपचारैर्भक्त्यातुवासुदेवंप्रपूजयेत् ॥ पूजान्तेसंस्कृतेवह्नौकुण्डमध्येस्थितोद्विजः ॥ ५ ॥ आज्यैःसहस्रञ्जुहुयादाहुतीनांहरेःप्रियम् ॥
सम्पूज्यवासुदेवन्तुहोमंकृत्वाततोद्विजः ॥ ६ ॥ नृपस्यानुमतेतान्तुप्रतिमांमण्डलन्नयेत् ॥ प्रतिमायाःकपोलौद्वौस्पृष्ट्वादक्षिणपाणिना ॥७॥

१ स्वयमित्यादिअगारेइत्यस्यविशेषणम् ।

प्राणप्रतिष्ठां कुर्वीततस्यान्देवस्यवैहरेः ॥ कृतायान्तुप्रतिष्ठायाम्प्राणानांनृपसत्तम ॥ ८ ॥ विष्णुप्राणास्ताम्प्रतिमामायांतिनियतंस्वय
म् ॥ प्राणेष्वथागतेष्वस्यांदेवत्वन्नियतम्भवेत् ॥ ९ ॥ अकृतायाम्प्रतिष्ठायाम्प्राणानाम्प्रतिमासुच ॥ यथापूर्वन्तथाभावःस्वर्णादीनान्नवि
ष्णुता ॥ १० ॥ अन्येषामपिदेवानाम्प्रतिमास्वपिपार्थिव ॥ प्राणप्रतिष्ठाकर्तव्यातस्यादेवत्त्वसिद्धये ॥ ११ ॥ सुवर्णन्तुसुवर्णस्याच्छिला
दारुतथाशिला ॥ अन्यच्चस्वस्वरूपंस्यात्प्राणस्थानमृतेसदा ॥ १२ ॥ वासुदेवस्यबीजेनतद्विष्णोरित्यनेनच ॥ तथैवांगांगिमन्त्राभ्याम्प्रति
ष्ठामाचरेद्धरेः ॥१३॥ तथैवहृदयेंगुष्ठन्दत्त्वाशश्वच्चमन्त्रवित् ॥ एभिर्मन्त्रैःप्रतिष्ठाप्यहृदयेपिसमाचरेत् ॥ १४ ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यै
प्राणाःक्षरन्तुय त्॥असौदेवत्वसंख्यायैस्वाहेतियजुरुच्चरन् ॥१५॥ अंगमन्त्रैरङ्गिमन्त्रैर्वैदिकैरित्यनेनच ॥प्राणप्रतिष्ठांसर्वत्रप्रतिमासुसमाचरेत
॥१६॥प्रतिमापूजनेकुर्यादात्मन्यपिचमन्त्रवित् ॥ प्राणप्रतिष्ठाम्प्रथमम्पूजाभागविशुद्धये॥१७॥ अस्मिन्प्राणप्रतिष्ठान्तुप्रतिमापूजनादृते ॥
नकश्चिच्चुबुधःकुर्यात्कृत्वामृत्युमवाप्नुयात् ॥ १८ ॥ विष्णोरिष्टिमिमांकृत्वादशम्याम्पार्थिवोत्तमः ॥ तस्यामेवतुपूर्णायाम्प्रतिमांस्थापयेत्ततः
॥ १९ ॥ एवन्दशहरायान्तुकृत्वेष्टिम्पार्थिवोहरेः ॥ सर्वान्कामानवाप्नोतिनिर्विघ्नोपिसजायते ॥ २० ॥ श्रीपञ्चम्यांश्रियन्देवींकुन्दैःसम्पूजये
त्सदा ॥ वासवंगजराजस्थमुपहारैस्तथोत्तमैः ॥ २१ ॥ लक्ष्म्यास्तन्त्रम्महामन्त्रंवासवस्यपुरोदितम् ॥ अत्रापिपूजनेग्राह्यम्मण्डलादियथा
क्रमम् ॥ २२ ॥ एवंकृतेपूजनेतुश्रीपञ्चम्यांविशेषतः ॥ श्रीयुतोनृपतिर्भूयान्नश्रीहानिमवाप्नुयात् ॥ २३ ॥ सदाचारविशेषोयङ्कथितस्तवपा
र्थिव ॥ निषेधेतुविशेषांश्चशृणुयेनश्रियेर्ष्यते॥२४॥असम्पूज्यतथाविष्णुंशिवमग्निम्पुरंदरम् ॥ अदत्त्वाचबथादानन्नभुञ्जीतनृपःक्वचित् ॥२५॥

हावयेदग्निहोत्रन्तुनित्यमेवपुरोहितैः ॥ अकृत्वाचाग्निहोत्रन्तुभुञ्जन्नरकमाप्नुयात् ॥ २६ ॥ नारक्षितेगृहेराजारत्नदीपैर्विवर्जिते ॥ स्वपेत्तथास्त्रि
यासार्द्धन्नकदाचनसंविशेत्॥२७॥भुक्तान्नंश्रीफलन्नाद्यात्तथाधात्रीफलंनृपः॥बुद्धिक्षयकराह्येतामापआसवमृत्तिकाः ॥२८॥ निम्बाटरूपचूताश्च
बुद्धिवृद्धिकरामताः॥बुद्धिक्षयकरान्नित्यन्त्यजेद्राजाचभोजने॥२९॥भक्षयेदन्वहम्बुद्धिवृद्धिहेतुंनृपोत्तमः॥ नपर्यायविहीनन्तुप्रारोहेदासनन्नृपः
॥३०॥नयानन्नगजन्नाश्वमारोहेद्धीनमासनैः॥नैकस्तुविचरेद्राजाकदाचिदपिनिर्ज्जने ॥३१॥ मदहेतून्नभुञ्जीयात्कदाचिदपिभोजने ॥ कदाचि
न्नापिसेवेतह्यघृम्याम्मांसमैथुने ॥ ३२ ॥ दर्शश्राद्धंगयाश्राद्धन्तिलैस्तर्पणमेवच ॥ नजीवत्पितृकोभूपकुर्यात्कृत्वावमाप्नुयात् ॥३३॥ नक्षेत्रजा
र्दीस्तनयान्राज्येराजाभिषेचयेत् ॥ पितॄणांशुद्धयेनित्यंऔरसेतनयेसति ॥३४॥ औरसःक्षेत्रजश्चैवदत्तःकृत्रिमएवच ॥गूढोत्पन्नोपविद्धश्चभा
गार्हास्तनयाइमे॥३५॥कानीनश्चसहोढश्चक्रीतःपौनर्भवस्तथा॥स्वयन्दत्तश्चदासश्चषडेतेपुत्रपांसुलाः॥३६॥अभावेपूर्वपूर्वेषाम्परान्समभि
षेचयेत्॥पौनर्भवंस्वयन्दत्तन्दासंराज्येनयोजयेत् ॥ ३७ ॥ दत्ताद्याश्चापितनयानिजगोत्रेणसंस्कृताः ॥ आयांतिपुत्रतांसम्यगन्यबीजसमु
द्भवाः ॥ ३८ ॥ पितुर्गोत्रेणयःपुत्रःसंस्कृतःपृथिवीपतेः ॥ आचूडान्तन्नपुत्रःसपुत्रतांयातिचान्यतः ॥ ३९ ॥ चूडान्तायादिसंस्कारानि
जगोत्रेणसंस्थिताः ॥ दत्ताद्यास्तनयास्तेस्युरन्यथादासउच्यते ॥ ४० ॥ ऊर्ध्वन्तुपञ्चमाद्वर्षाद्दत्ताद्यांश्चसुतान्नृप ॥ गृहीत्वापञ्चवर्षीयम्पुत्रेष्टि
म्प्रथमञ्चरेत् ॥ ४१ ॥ पौनर्भवन्तुतनयञ्जातमात्रंसमानयेत् ॥ कृत्वापौनर्भवष्टोमञ्जातमात्रस्यतस्यवै ॥ ४२ ॥ सर्वांस्तुकुर्यात्संस्काराञ्जात
कर्म्मादिकान्नरः ॥ कृतेपौनर्भवष्टोमेसुतःपौनर्भवःस्मृतः ॥ ४३ ॥ एकोद्दिष्टंपितुःकुर्यान्नश्राद्धम्पार्वणादिकम् ॥ क्रीतायावनितामूल्यैःसादा

सीतिनिगद्यते ॥ ४४ ॥ तस्यांयोजायतेपुत्रोदासःपुत्रस्तुसस्मृतः ॥ नराज्ञोराज्यभाक्सस्याद्विप्राणान्नापिश्राद्धकृत् ॥ ४५ ॥ अधमःसर्वपुत्रे
भ्यस्तन्तस्मात्परिवर्ज्जयेत् ॥ पुराणंधर्म्मशास्त्राणिसंहिताश्चमुनीरिताः ॥ ४६ ॥ नाध्यापयेन्नृपःशूद्रैर्विहितानियदृच्छया ॥ यस्यराज्ये
सदाशूद्राःपुराणंसंहितान्तथा ॥ ४७ ॥ पठन्तिस्यात्सहीनायःराजाराष्ट्रेणसान्वयः ॥ मोहाद्वाकामतःशूद्रःपुराणंसंहितांस्मृतिम् ॥ ४८ ॥ पठ
न्नरकमाप्नोतिपितृभिःसहपापकृत् ॥ शूद्रेभ्योविहितंयत्तुयश्चमन्त्रउदाहृतः ॥ ४९ ॥ तद्विप्रवचनाद्वाह्यंद्वयंशूद्रैःसदैवहि ॥ नयोजयेन्नृपःशूद्रं
व्यवहारस्यदर्शने ॥ ५० ॥ नियोज्यतत्रतम्भूपस्तामिस्रेतेनपच्यते ॥ हीनायुश्चभवेल्लोकोराजावापिसहायजः ॥ ५१ ॥ काणंव्यङ्गमपुत्रंवा
नाभिज्ञमजितेन्द्रियम् ॥ नह्रस्वंव्याधितंवापिनृपःकुर्यात्पुरोहितम् ॥ ५२ ॥ कृपणस्यधनंराजानगृह्णीयात्कदाचन ॥ नद्विजानान्तथादद्या
द्धनानिविपुलान्यपि ॥ ५३ ॥ नारोहेत्काम्बुकोन्मत्तगजंराजाकदाचन ॥ आरुह्यकाम्बुकन्तन्तुपरत्रेहविषीदति ॥ ५४ ॥ अनायुष्यन्नकुर्यात्तु
कर्मभूपःकदाचन ॥ सततञ्चायुषोवृद्धचैयतेतसकलैर्द्धनैः ॥ ५५ ॥ नक्रूरवारेनाष्टम्यान्नषष्ठ्यान्नृपसत्तमः ॥ अञ्जनाभ्यञ्जनेकुर्यात्ताम्बूलस्या
पिभोजनम् ॥ ५६ ॥ अतिसूक्ष्मन्तथापूर्णग्रहणञ्चन्द्रसूर्ययोः ॥ नालोकयेत्स्वयंराजारक्तंसूर्यन्तथैवच ॥ ५७ ॥ उत्पातञ्चायतेयत्तुदिव्यम्भौ
मञ्चनाभसम् ॥ नेक्षेतयत्नान्नृपतिर्दृष्ट्वानाद्याद्यहम्पुनः ॥ ५८ ॥ सर्वदामंगलंरत्नन्धारयेत्सहदूर्वया ॥ अवस्त्राच्छादितंगात्रन्नविप्रेभ्यःप्रदर्श
येत् ॥ ५९ ॥ नतोयेषुमुखम्पश्येन्नाद्यान्मांसानिपर्वसु ॥ नारोहयेत्खरञ्चोष्ट्रन्नवामामपिगुर्विणीम् ॥ ६० ॥ एवन्नरयुतोराजाचतुरंगंविवर्द्धयन् ॥
आत्मानंसततंरक्षन्त्सदावीर्यंविवर्द्धयेत् ॥ ६१ ॥ बीजक्षयकरन्नित्यम्भक्ष्यंभोज्यञ्चपानकम् ॥ वर्ज्जयेत्क्षारशाकाद्यान्बह्वम्लम्बहुतिक्त

कम् ॥ ६२ ॥ कांस्यराजतपात्रस्थन्तोयंनद्याश्चवर्द्धनम् ॥ मूत्रवृद्धिकरंवीर्यक्षयकारिविवर्ज्जयेत् ॥ ६३ ॥ ताम्रायःस्वर्णशीसानाम्पात्रस्थं फलचर्मणोः ॥ शुक्रवृद्धिकरन्तोयन्तदुपासीतयत्नतः ॥ ६४ ॥ सर्वमूलेषुकृत्येषुसदाचारेषुतिष्ठितः ॥ भुक्तेहविविधान्भोगा नैन्द्रंस्थानंव्रजेत्परम् ॥ ६५ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ एवमौर्वस्तुसगरंशशासमुनिपुंगवः ॥ शास्त्राणिचैवसर्वाणिसदाचाराँ श्चगृह्यकान् ॥ ६६ ॥ बहुशःकथयामाससगरायमहात्मने ॥ तन्नास्तियत्पुरौर्वेणकथितंसगरायन ॥ ६७ ॥ राजनीतिःसतान्नी तिर्यच्चान्यच्छास्त्रसम्भवम् ॥ संहितासुपुराणेषुयच्चागमचयेस्थितम् ॥ ६८ ॥ सर्वंशुश्रावसगरोमुखादौर्वस्यधीमतः ॥ तेषान्तुकथित ङ्किञ्चिदुद्धृत्यद्विजसत्तमाः ॥ ६९ ॥ विष्णुधर्मोत्तरेपूर्वम्मयारहसिभाषितम् ॥ राजनीतिंसदाचारंवेदवेदांगसंगतम् ॥ ७० ॥ रहस्यंसत तंविष्णोर्वीक्षध्वन्द्विजसत्तमाः ॥ यच्चानुदितमन्यत्रगदितंवाससंशयम् ॥ ७१ ॥ संशयच्छेदनन्तेषुयुष्मभ्यङ्कथितन्द्विजाः ॥ अनुक्तसंशयच्छे दिपुरणङ्कालिकाह्वयम् ॥ योभ्यसेत्सततंविप्रःसवेदानाम्फलंलभेत् ॥ ७२ ॥ ॥ इतिश्रीकालिकापुराणेएकनवतितमोध्यायः ॥ ९१ ॥ ॥ ॥ ऋषयऊचुः ॥ ॥ संक्षेपतःसदाचारोविशेषोराजनीतिषु ॥ श्रुतस्त्वद्वचनादौर्वःसगराययथोक्तवान् ॥ १ ॥ विष्णुधर्म्मोत्तरेतन्त्रेबाहुल्यं सर्वतःपुनः ॥ द्रष्टव्यस्तुसदाचारोद्रष्टव्यास्तेप्रसादतः ॥ २ ॥ भूयोनःसंशयोयोस्तितदनुक्तन्त्वयापुरा ॥ छिन्धिविप्रेन्द्रपृच्छामःपरंकौतूह लंहिनः ॥ ३ ॥ अपुत्रस्यगतिर्न्नास्तिश्रूयतेवेदलोकयोः ॥ वेतालभैरवौयातौपुरावैतपसेगिरिम् ॥ ४ ॥ पूर्वन्त्वकृतदारौतौतयोःपुत्रानचश्रु ताः ॥ नजाताप्यथवाजातायदिनानाद्विजोत्तम ॥ ५ ॥ तेषान्तुसम्यगिच्छामिश्रोतुंसंस्थानमुत्तमम् ॥ मार्कण्डेयउवाच ॥ ॥ अपुत्रस्य

गतिर्नास्तिनिश्चितश्चेतिसत्तमाः ॥ ६ ॥ स्वपुत्रैर्भ्रातृपुत्रैर्वापुत्रवन्तोहिस्वर्गताः ॥ जातापत्यौचतौविप्राधीरौवेतालभैरवौ ॥ ७ ॥ ययो
र्वंशान्प्रवक्ष्यामिशृण्वन्तुचमहर्षयः ॥ सम्यक्सिद्धिमवाप्यैवयदावेतालभैरवौ ॥ ८ ॥ हरस्यमन्दिरम्प्राप्तौकैलासम्प्रतिहर्षितौ ॥ तदाहरस्य
वचनान्नन्दीतौरहसिद्विजाः ॥ ९ ॥ प्राहेदंवचनन्तथ्यंसान्त्वयन्निवबोधकृत् ॥ नन्द्युवाच ॥ अपुत्रौपुत्रजननेभवंतौशंकरात्मजौ ॥ १० ॥
यतताञ्जातपुत्रस्यसर्वत्रसुलभागतिः ॥ पुत्रामनस्कम्पुत्रविहीनःपरिपश्यति ॥ ११ ॥ नतपोभिर्न्नधर्म्मेणतन्मोचयतुमीश्वरः ॥ केवलात्पुत्रजन
नात्तस्मान्मोक्षःप्रजायते ॥ १२ ॥ तदुत्पादयताम्पुत्रम्भवन्तौदैवयोनिषु ॥ अमर्त्यतातुयुवयोःक्षीरपानादजायत ॥१३॥ कात्यायन्यास्ततः
पुत्रानमर्त्याःस्वसमायतः ॥ तस्माद्यथातथापुत्रानुत्पाद्यसुरयोनिषु ॥ १४ ॥ प्रियौभवन्तौशिवयोर्भवनन्नाचिरादिति ॥ मार्कण्डेयउवाच ॥
तस्येतिवचनंश्रुत्वानन्दिनःप्रीतमानसौ ॥ १५ ॥ एवमेवकरिष्यावोनन्दिनश्चेत्यभाषताम् ॥ ततस्तौसततंकृत्वानन्दिनोवचनंहृदि ॥ १६ ॥
अचेष्टतांस्वपुत्रार्थेव्रजन्तौतावितस्ततः॥अथैकदाभैरवोसौउर्वशीमप्सरोवराम् ॥१७॥ हिमवत्पर्वतप्रस्थेददर्शसुमनोहराम् ॥ अथतांकामुकोभू
त्वाययाचेसुरतोत्सवम् ॥१८॥ वेश्याभावाच्चसुप्रीतासायथेच्छमुवाचतम् ॥ ततस्तस्याम्भैरवस्तुचकारसुरतोत्सवम् ॥१९॥प्रीतायामुर्वशीदेव्यां
सुप्रीतोभूच्चकेलिभिः॥सुप्रीतायामथोर्वश्यान्तेजोभिर्भैरवस्यतु॥२०॥सद्योजातोभवत्पुत्रोबालसूर्यसमप्रभः॥ तन्तु पुत्रंपरित्यज्ययौस्वस्थान
मुर्वशी॥२१॥आदायतनयम्पश्चाद्भैरवःस्वपदंययौ॥संस्कृत्यतनयन्तन्तुभैरवोमोदसंयुतः॥२२॥सुरेशमितितन्नाम चकारसगणाधिपः ॥ अथत
ज्जातवयसंशक्रसूर्यसमप्रभम् ॥२३॥ विद्याधराधिपत्येतुसुरेशमभ्यषेचयत् ॥ सतुविद्याधराध्यक्षस्तनयामातिसुन्दराम् ॥ २४॥ येमेगन्धर्वरा

जस्यधृतराष्ट्राह्वयस्यच ॥ तस्यान्तस्यसुतोजज्ञेरुरुर्नामनोहरः ॥ २५ ॥ रुरोस्तुतनयोबाहुर्मैनाक्यामभ्यजायत ॥ बाहोस्तुपुत्राश्चत्वारस्त
पनोङ्गदईश्वरः ॥ २६ ॥ कुमुदोभूत्कनीयाँस्तुचार्वत्यान्तुमनोहरः ॥ कुमुदस्यसुतोजज्ञेदेवसेनोमहाबलः ॥ २७ ॥ सदेवसेनःपृथिवीमवतीर्य
मनोहरः ॥ मान्धातुर्यौवनाश्वस्यतनयांकैशिनीम्मुहुः ॥२८॥ वरयामासभार्यार्थेमृद्वङ्गीमप्सरःसमाम्॥यौवनाश्वोपिमान्धाताशक्रस्यवचनाद्
दौ ॥ २९ ॥ केशिनीन्तनयांस्वीयान्देवसेनायवाञ्छया ॥ केशिनीमुपयम्याथदेवसेनस्तयासह ॥ ३० ॥ वाराणस्यांशम्भुपुर्यांहरमाराधय
च्छिवम् ॥ आराधितोहरःप्रीतस्तस्येष्टम्प्रददौवरम् ॥ ३१ ॥ सोप्याददेहरात्तस्मादिष्टमेववरत्रयम् ॥ यावच्चसूर्योभवितातावत्स्थास्यतिसन्त
तिः ॥ ३२ ॥ अस्यामेवनगर्याम्मेमद्वंशस्यापिराजता ॥ प्रसन्नोममवंशेत्वन्नित्यमेवभविष्यसि ॥ ३३ ॥ इत्यादायवरंसोपिदेवसेनोमहाकृती ॥
शंकरस्यप्रसादेनचिरन्ताम्बुभुजेपुरीम् ॥३४॥ देवसेनोथकेशिन्याञ्जनयामासपुत्रकान् ॥ यूयंशृणुतसप्तैतान्नामतःकीर्तितांस्तथा ॥ ३५ ॥
सुमनावसुदानश्चऋतुधृग्यवनःकृती ॥ नीलोविवेकीह्येतेवैसर्वशास्त्रविशारदाः ॥ ३६ ॥ सर्वेवंशकराःपुत्रादेवसेनस्यसत्तमाः ॥ अथकालेतुसं
प्राप्तेदेवसेनोपिभार्यया ॥३७॥ पुत्रेषुराज्यन्निःक्षिप्ययातोविद्याधरक्षयम् ॥ ततस्तेतस्यतनयाःकृत्वासुमनसन्नृपम् ॥ ३८ ॥ वसुदानादयः
सर्वेबुभुजुश्चोत्तमांश्रियम् ॥ जाताःसुमनसःपुत्रास्त्रयःशूरामहाबलाः ॥ ३९ ॥ सुमतिश्चविरूपश्चसत्यःशास्त्रार्थपारगाः ॥ सुमतेरभवत्कन्या
सुतःसत्यस्यडिण्डिमः ॥ ४० ॥ विरूपस्याभवद्राधिर्गाधेर्म्मित्रोभवत्सुतः ॥ तेषाङ्कल्पोभवद्राजाकल्पात्तुविजयोभवत् ॥ ४१ ॥ योविजि
त्यक्षितिंसर्वाम्पार्थिवान्भूरितेजसः ॥ शक्रस्यानुमतेचक्रेखाण्डवंशतयोजनम् ॥ ४२ ॥ यत्सव्यसाचीह्यदहत्पाण्डुपुत्रःप्रतापवान् ॥ आवहत्प

महाबलपराक्रमः ॥ सुदर्शनस्यनृपतेरवस्कन्दमथाकरोत् ॥ ५९ ॥ नासहत्सोह्यवस्कन्दंविजयस्यसुदर्शनः ॥ चतुरंगबलेनाशुयुद्धाया
भिमुखोभवत् ॥ ६० ॥ विजयोरथमारुह्यनियोज्यचतुरंगिणीम् ॥ सेनांसुदर्शनंयोद्धुंसम्मुखोभवदञ्जसा ॥ ६१ ॥ तदामहायुद्धमासीद्विजये
नमहात्मना ॥ सुदर्शनस्यनृपतेर्वृत्रवासवयोर्यथा ॥ ६२ ॥ सुदर्शनस्यसेनानीरुमण्वान्नामवीर्यवान् ॥ काञ्चनंरथमारुह्यविजयंसम्मुखो
भ्ययात् ॥ ६३ ॥ अक्षौहिण्यस्तुसप्तास्यपरिवार्यसमन्ततः ॥ व्यधमत्तांशत्रुसेनांयावतीमुद्यतायुधः ॥ ६४ ॥ विजयस्यचसेनानीः
सञ्जयःसरिपुञ्जयः ॥ नागानीकेनजग्राहरुमण्वन्तंससैनिकम् ॥ ६५ ॥ तयोर्महदभूद्युद्धंसेनान्योर्वीरयोर्महत् ॥ ववर्षशरवर्षे
णरुमण्वानथसञ्जयम् ॥ ६६ ॥ कुर्वंश्चापिमहानादंगजन्दृष्ट्वेवकेशरी ॥ रुमण्वानथविंशत्याबाणैर्विध्वाथसञ्जयम् ॥ ६७ ॥ क्षुरप्रे
णधनुस्तस्यचिच्छेदकृतहस्तवत् ॥ सोपिकार्म्मुकमादायतदान्यत्सञ्जयस्त्रिभिः ॥ ६८ ॥ बाणैर्विव्याधभल्लेनधनुश्चिच्छेदतत्क्षणात् ॥
शतान्यष्टौचनागानांसहस्राणिचपञ्चषट् ॥ ६९ ॥ पत्तीनांवाजिनान्त्रीणिसहस्राणिसमन्ततः ॥ सञ्जयोनिर्जघानाशुबाणवर्षैःसुदारुणैः ॥
॥ ७० ॥ अथान्यद्धनुरादायरुमण्वान्कुपितोभृशम् ॥ भल्लेनसारथेरस्यशिरःकायादपाहरत् ॥७१॥ हयांश्चास्यचतुर्भिस्तुबाणैर्निन्येयमक्षय
म् ॥ चतुरःपञ्चभिर्बाणैरविध्यच्चापिसञ्जयम् ॥ ७२ ॥ सञ्जयोप्यतिवेगेनगदामादयतत्क्षणात् ॥ अवतीर्यरथोपस्थाद्रुमण्वन्तमधावत ॥
॥ ७३ ॥ सधावन्तंसञ्जयन्तंरुमण्वान्द्रुतहस्तवत् ॥ शरवर्षेणसञ्छाद्यवारयामाससञ्जयम् ॥७४॥ गदायाभ्रामणेनासौनिवार्यशरवर्षणम् ॥

१ अवस्कन्दः विजिगीषूणां निवेशस्थानम् । २ अस्यसप्त अक्षौहिण्य आसन् ताभिः परिवार्येत्यर्थः ।

रमाम्प्रीतिञ्ज्वलनस्यमहात्मनः ॥ ४३ ॥ ऋषयऊचुः ॥ ॥ कथंसखाण्डवश्चक्रेविजयःशतयोजनम् ॥ तद्वयंश्रोतुमिच्छामःकथयस्वतपोध
न ॥४४ ॥ ॥ मार्कण्डेयउवाच ॥ ॥ सोमवंशेभवद्राजामहाबलपराक्रमः॥धीरःसुदर्शनोनामचारुरूपःप्रतापवान्॥४५॥सवैहिमवतोना
तिदूरेभङ्क्त्वामहावनम्॥सिंहान्व्याघ्रान्त्समुत्सार्यकचिच्चापितपोधनान्॥४६॥ खाण्डवीन्नामनगरीमकरोत्तत्रशोभनाम्॥त्रिंशद्योजनविस्तीर्णा
मायतांशतयोजनाम्॥४७॥उच्चप्राकारसंयुक्तांसाट्टालाम्बुदतोरणाम्॥निम्नाभिरतिदीर्घाभिःपरिखाभिःसमावृताम् ॥४८॥ अधृष्यामपरैर्वीरैर्ना
नाजनसमावृताम् ॥ दीर्घिकाभिश्चोपवनैर्बहुभिश्चाप्सरोगणैः ॥ ४९ ॥ आकीर्णाञ्चतथारामैरुत्तमैरपिमानवैः ॥ सोत्सवाःसततंयत्रजनादे
वान्दिवित्रिस्थितान् ॥ ५० ॥ स्पर्धन्तेस्मसुदायुक्ताआद्याभोगसमन्विताः ॥ सवैसुदर्शनोराजाखात्वाभूमिंविदार्यच ॥ ५१ ॥ गङ्गाङ्ग
नखलान्देवींवाहयामासखाण्डवीम् ॥ सम्प्लाव्याखाण्डवीमध्यन्तेनखातैश्चवर्त्मभिः ॥ ५२ ॥ वक्रानुवक्रगाभूत्वायातिसीतान्नदीम्प्राति ॥
साजित्वासकलान्भूपान्वित्तान्याहृत्यभूरिशः ॥ ५३ ॥ राशीचकारखाण्डव्यामध्येरत्नैरनेकशः ॥ अन्येषान्नगरेभ्यस्तुजनानानीयभूपतिः ॥
॥ ५४ ॥ खाण्डव्यांवासयामासहठादपिसुदर्शनः ॥ देवदानवगन्धर्वाञ्जित्वाजित्वायुधाकृती ॥ ५५ ॥ देववृक्षन्देवरत्नन्देवीश्चा
पितथौषधीम् ॥ खाण्डव्यांरोपयामाससभूपालःसुदर्शनः ॥ ५६ ॥ असहिष्णुस्ततोजिष्णुर्नृपातिन्तंसुदर्शनम् ॥ कृतापचारम्बहुधादेवा ना
श्चतथानृणाम् ॥ ५७ ॥ वाराणसीपतिंवीरंविजयञ्जयशालिनम् ॥ सन्धायकृतसाचिव्यन्तद्वैरेसमयोजयेत् ॥ ५८ ॥ विजयोविवरम्प्राप्य

आससादरुमण्वन्तंकेशरीवमहागजम् ॥७५॥ आसाद्यतांगदांगुर्वीमाविद्ध्यातीवसञ्जयः ॥ एकेनैवप्रहारेणसरथन्तंव्यपोथयत्॥७६॥सपपा
तमहावीरःपृथिव्यांगदयाहतः ॥ ७७ ॥ वज्राहतोयथाशालःप्रफुल्लोवनमध्यगः ॥ रुमण्वन्तान्निपातितन्दृष्ट्वाराजासुदर्शनः ॥ शोकको
पसमाविष्टःसधूमइवपावकः ॥ ७८ ॥ जज्वालाकुलदेहोपिक्रोधेनातीवसंयुतः ॥ आरुह्यजवनैरश्वैर्युक्तंवैयाघ्रकृत्तिना ॥ ७९ ॥
रथंकाञ्चनचित्रांगांसिंहध्वजविभूषितम् ॥ आमुक्तोधनुरादायविस्फार्यचपुनःपुनः ॥ ८० ॥ ससैन्यःसञ्जयंराजासमाद्रवतवेगवान् ॥
अथास्यनिशितैःशस्त्रैःसेनामग्रगताम्भृशम् ॥ ८१ ॥ न्यहनत्सकलान्राजामृगानिवमृगाधिपः ॥ एकामक्षौहिणीमग्रगामिनींविपुलौ
जसाम् ॥ ८२ ॥ क्रोशद्भ्येनन्यहनत्तमांसीवदिवाकरः ॥ हत्वाचाक्षौहिणीमेकामासाद्यसञ्जयन्नृपः ॥ ८३ ॥ बाणैःषष्ट्यातुविव्याध
ध्वजमेकेनचिच्छिदे ॥ सञ्जयोप्यथविंशत्याहृदिविध्वासुदर्शनम् ॥ ८४ ॥ ललाटेत्वेकबाणेनप्राविध्यत्कृतहस्तवत् ॥ क्षुरप्रेणास्यकोदण्ड
ञ्छित्त्वाराज्ञःप्रतापवान् ॥ ८५ ॥ सारथिन्दशभिर्बाणैःपुनर्विव्याधसञ्जयः ॥ कोदण्डमन्यमादायतदाराजासुदर्शनः ॥ ८६ ॥ शरवर्षेणती
व्रेणववर्षातीवसञ्जयम् ॥ तयोर्महदभूद्युद्धम्मुनिविस्मयकारकम् ॥ ८७ ॥ शस्त्रैरस्त्रैर्भृशन्तीक्ष्णैर्बलिवासवयोरिव ॥ ततःसुदर्शनोराजाभल्लेना
स्यदृढन्धनुः ॥ ८८॥ चिच्छेदसारथिञ्चास्यजघाननिशितैःशरैः ॥ स्वयंसंयम्यवाहान्त्ससञ्जयःपरवीरहा ॥८९॥ धनुरन्यत्समादायपरिवार्य
सुदर्शनम् ॥ विव्याधदशभिर्बाणैर्द्धनुरप्यच्छिनद्दृढम् ॥ ९० ॥ शरासनान्तरंराजासमादायसुदर्शनः ॥ सञ्जयस्यचतुर्वाहाञ्छरैर्निन्येयमक्ष

१ रुमण्वन्तम् ।

यम् ॥ ९१ ॥ मुष्टौधनुश्चचिच्छेदतश्चविव्याधपञ्चभिः ॥ विरथश्छिन्नबाहश्चसञ्जयःस्वङ्गचर्म्मणी ॥ ९२ ॥ आदायसम्मुखंराज्ञोभ्यद्रवत्कु
पितोभृशम् ॥ तस्यचापन्ततःस्वङ्गंक्षुरप्रेणसुदर्शनः ॥ ९३ ॥ द्विधाचिच्छेदभल्लेनचर्मचाप्यच्छिनत्तदा ॥ अथद्रुतन्तदोपेत्यसञ्जयः स्यन्द
नोत्तमम् ॥ ९४ ॥ सुदर्शनस्य सूतन्तुकराभ्याम्पातयत्क्षितौ ॥ रथाभ्याशेगतस्यास्यसञ्जयस्यसुदर्शनः ॥ ९५ ॥ शिरश्चिच्छेदखड्गेन
ततोसौन्यपतद्भुवि ॥ सपपाततदातस्यरथाभ्याशेमहाबलः ॥ ९६ ॥ कृतःपरशुनारण्येपुष्पितःशालवृक्षवत् ॥ सञ्जयम्पतितन्दृष्ट्वाविजयः
क्रोधमूर्च्छितः ॥ ९७ ॥ महताशंखनादेननादयँस्तुनभःस्थलम् ॥ रथेनस्वर्णचित्रेणव्याघ्रचर्मविराजता ॥ ९८ ॥ केतुनावृषभेणाथयोजना
द्धोच्छ्रितनचे ॥ नादायन्ककुभःसर्वारथौघपरिवेष्टितः ॥ ९९ ॥ विमुञ्चञ्छरवर्षाणिससादचसुदर्शनम् ॥ आसाद्यतन्नृपम्भूपोविजयःपरवीरहा
॥ १०० ॥ हृदिविध्वात्रिभिर्बाणैस्तिष्ठतिष्ठेतिचाब्रवीत् ॥ सुदर्शनोपिविजयन्नदन्तङ्कुञ्जरोपमम् ॥ १ ॥ दशभिर्न्निशितैर्बाणैर्विद्ध्वाचिच्छेद
तद्धनुः ॥ अथैनञ्छिन्नधन्वानञ्जघ्नुर्देशेत्रिभिःशरैः ॥ २ ॥ निर्भिद्याथमहानादंननादससुदर्शनः ॥ सोन्यद्धनुःसमादायकङ्कपत्रैस्त्रिभिःशरैः ॥
॥ ३ ॥ विव्याधहृदयेवीरोविजयोपिसुदर्शनम् ॥ ततस्तन्नृपतिश्रेष्ठमहाशक्तिंसुदीपिताम् ॥४॥ नागकन्याङ्कोपयुक्तांलेलिहानामिवातुलाम् ॥
स्वर्णदण्डांसुतीक्ष्णाग्रान्तैलधौतांसुनिर्मलाम् ॥ ५ ॥ समुद्यम्य[illegible]चिक्षेपविजयःशात्रवम्प्रति ॥ सुदर्शनस्यहृदयंसाशक्तिःप्रविवेशह ॥ ६ ॥
सविह्वलोरथोपस्थेह्यधोवक्त्रउपाविशत्॥तस्मिन्मोहसमापन्नेनृपतौचसुदर्शने॥७॥तस्याग्रतस्तथापार्श्वेयेस्थितास्तत्रसैनिकाः॥ तान्त्सर्वानहन

१ आर्षत्वादडभावः ।

॥ ॥ इन्द्रउवाच ॥ ॥ राजन्महावनमिदमासीद्देवगणावृतम् ॥ नचगन्धर्वयक्षाणान्मुनीनाञ्चमनोहरम् ॥२७॥ सर्वानुत्सार्यदेवादीन्मम
चाप्यप्रियेरतः ॥ भङ्क्त्वावनमिदंगुह्यमुत्साद्यचतपोधनम् ॥ २८ ॥ खाण्डवीन्नगरीञ्चक्रेहठाद्राजासुदर्शनः ॥ तदिदम्पुनरेवत्वंवनङ्कुरुनरो
त्तमः ॥ २९ ॥ तत्राहंविहरिष्यामितक्षकेणसमंरहः ॥ मुनीनाञ्चतपःस्थानमतुलन्तेप्रसादतः ॥ १३० ॥ भविष्यतिचयक्षाणांकिन्नराणाञ्चपा
र्थिव ॥ मार्कण्डेयउवाच ॥ एतच्छ्रुत्वावचस्तस्यशक्रस्यविजयस्तदा ॥ ३१ ॥ वनमेवाकरोत्तत्तुखाण्डवींशक्रगौरवात् ॥ गच्छन्तुभो
यथास्थानम्प्रजाःसर्वायथेच्छया ॥ ३२ ॥ येषांवाञ्छास्तिलोकानाम्मद्राज्यगमनेपुनः ॥ वाराणसीन्तेगच्छन्तुमयैवप्रतिपालिताम् ॥
॥ ३३ ॥ ततस्तस्यवचःश्रुत्वाजनाःकेचिन्निजास्पदम् ॥ जग्मुर्वाराणसींकेचिद्विजयेनाभिपालिताम् ॥ ३४ ॥ ततोधनानान्ताम्राशी
त्रत्नानांञ्चपृथक्पृथक् ॥ मणीनांकनकानाञ्चकुप्यानांविजयस्तथा ॥ ३५ ॥ विविधैर्वारयामासपुरींवाराणसीम्प्रति ॥ गन्धर्वाणाञ्च
देवानांयदानीतंहटात्पुरा ॥ ३६ ॥ रत्नदार्वादिकंयत्तुविजयन्तत्प्रसाद्यच ॥ तैस्तैर्न्नीतञ्चखाण्डव्याःस्वस्थानम्प्रतिहर्षितैः ॥ ३७ ॥ त्रिंशद्यो
जनविस्तीर्णांशतयोशनमायताम् ॥ ताम्पुरींविजयश्चक्रेनचिरादेववैवनम् ॥ ३८ ॥ तस्मिञ्छक्रस्यसम्मत्यातक्षकःसहितोगणैः ॥
उवाससुचिरन्तत्रततोभून्निर्ज्जनंवनम् ॥३९ ॥ तत्रदेवाःसगन्धर्वाःक्रीडन्तेप्सरसांगणाः ॥ आशंसन्तश्चविजयंरणेषुविजयावहम् ॥ १४० ॥
अष्टाविंशतिमेप्राप्तेयुगेद्वापरशेषतः ॥ वह्निर्ब्राह्मणरूपेणभिक्षाञ्जिष्णुमयाचत ॥ ४१ ॥ दातुमंगीकृतेभिक्षान्तदापाण्डुसुतेनवै ॥ वह्निःस्वरू
पमास्थायजिष्णुंवचनमब्रवीत् ॥ ४२ ॥ अहमग्निःपाण्डुपुत्रयज्ञभागाभिभोजनात् ॥ व्याधितोहन्ततोव्याधिम्ममत्वन्नाशयाधुना ॥ ४३ ॥

द्राजाक्षणमात्राद्विजोत्तमाः॥८॥रथान्दशसहस्राणितावन्त्येवचदन्तिनाम्॥पञ्चविंशसहस्राणिवाजिनाञ्चतरस्विनाम् ॥ ९ ॥ लक्षद्वयन्तुपत्तीनां
क्षणमात्रादपोथयत् ॥ सतुलब्ध्वाततःसञ्ज्ञान्धनुरादायवैदृढम् ॥ ११० ॥ शरवर्षेणविजयंववर्षससुदर्शनः ॥ निवार्यशरवर्षेणविजयन्तुसु
दर्शनः ॥ ११ ॥ भल्लेनकार्मुकंसज्यन्तस्यचिच्छेदतत्क्षणात् ॥ सारथेस्तुशिरःकायाद्भल्लेनापाहरत्ततः ॥ १२ ॥ हयाँश्चचतुरश्चास्यप्रेषया
मासमृत्यवे॥ अथैनंविरथम्भूपन्दशभिःकंकपत्रिभिः ॥ १३ ॥ विव्याधहृदयेभूयोननादचसुदर्शनः ॥ सच्छिन्नधन्वाविरथोगदामादायवेग
वान् ॥ १४ ॥ विजयोविजयाकांक्षीसुदर्शनमधावत ॥ आपतन्तम्महावीरम्बाणवर्षैःसुदर्शनः ॥१५॥ ववर्षवर्षासुयथावारिदःपृथिवीधरम् ॥
विजयःशरवृष्टिन्ताम्प्राच्छाद्यस्वशरेणवै ॥ १६ ॥ गदयातंरथारूढमाससादतुतत्क्षणात् ॥ आसाद्यतंमहावीर्यंविजयोथसुदर्शनम् ॥ १७ ॥
शीर्षेप्रहृत्यगदयापातयामासभूतले ॥ गिरेःशृंगंयथातुंगंवज्राशनिविदारितम् ॥ १८ ॥ तथासुदर्शनोराजादारितोगदयापतत् ॥ तस्मिन्निपति
तेवीरेसेनाभिस्तस्यसैनिकाः ॥ १९ ॥ भयात्सम्प्राद्रवंस्तस्माद्दिशश्चप्रादिशस्तथा ॥ नष्टेषुतस्यसैन्येषुविजयःखाण्डवीम्पुरीम् ॥ १२० ॥
प्रविश्यददृशेतत्रराशीभूतान्गिरीनिव ॥ सुवर्णानाञ्चरत्नानांसञ्चयान्बहुशःपुनः ॥ २१ ॥ दृष्ट्वासरांसितत्रैषप्रफुल्लकमलानिच ॥ हंसकारण्ड
वानादैर्नादितानिसमन्ततः ॥२२॥राशीन्त्सुवर्णरत्नानाम्पर्वतानिवविस्तृतान् ॥ पुष्पितान्देववृक्षाँश्चभ्रमद्भ्रमरभूषितान् ॥ २३ ॥ प्रासादान्वि
पुलाञ्छुभ्रान्कैलाससदृशान्गजान् ॥ प्रस्फुटाँश्चसुगन्धाद्यान्प्रतिगेहव्यवस्थितान् ॥ २४ ॥ उत्फुल्लनयनोराजाविजयःपरवीरहा ॥ मेने
मरावतीन्तान्तुपुरींक्षितिगतामिव ॥ २५ ॥ तंवीक्षन्तन्नरपतिन्नगरीन्तांसुरेश्वरः ॥ समेत्यविजयम्प्राहसान्त्वयञ्श्लक्ष्णयागिरा ॥ २६ ॥

खाण्डवन्नामविपिनंसपक्षिमृगराक्षसम् ॥ यदित्वम्माम्भोजयितुंशक्नोषिश्वेतवाहन ॥ ४४ ॥ तदाममह्यसौव्याधिरपयास्यतिनोचिरात् ॥
पुरातुविजयोराजाखाण्डवीन्नामताम्पुरीम् ॥ ४५ ॥ भङ्क्त्वावनंयतश्चक्रेतेनतत्खाण्डवंवनम् ॥ मदर्थन्देवविहितंवनन्तुश्वेतवाहन ॥ ४६ ॥
विरोधात्तत्तुशक्रस्यनस्वयम्भोक्तुमुत्सहे ॥ तस्मात्राहिमहाभागवनेतस्मिन्नियोजय ॥ ४७ ॥ यथाहंसकलंभोक्तुंशक्नोमित्वत्प्रसादतः ॥
तस्यतद्वचनंश्रुत्वासव्यसाचीमहाबलः ॥ ४८ ॥ दाहयामासविपिनन्तत्सर्वम्प्राणिसंयुतम् ॥ देवकीतनयेनासौवासुदेवेनपालितः
॥ ४९ ॥ खाण्डवन्दाहयामासज्वलनस्याहितेरतः ॥ सुप्रीतःप्रददौतस्मादर्जुनायमहात्मने ॥ १५० ॥ वह्निर्द्धनुश्चगाण्डीवंवारुणन्देवनिर्म्मि
तम् ॥ अक्षय्येचेषुधीदिव्येरूप्याभाँश्चतुरोहयान् ॥ ५१ ॥ हनूमताधिष्ठितन्तुमहान्तंवानरध्वजम् ॥ खड्गञ्चत्रिशिखन्तीक्ष्णन्दहनःसव्यसा
चिने ॥ ५२ ॥ नीरोगश्चाभवद्वह्निस्तदाजिष्णुप्रसादतः ॥ तैर्बाणैस्तेनधनुषातेनखड्गेनकेतुना ॥ ५३ ॥ तदश्वस्यन्दनेनापिविजिग्येफाल्गु
नोरिपून् ॥ एवम्भैरववंशेषुसञ्जातोविजयोनृपः ॥ ५४ ॥ खाण्डवन्नामविपिनञ्चकारसुमहाकृती ॥ विजयस्यसुताजातास्त्रयोदशमहाबलाः
॥ ५५ ॥ द्युतिमान्त्सौम्यदर्शीचभूरिःप्रद्युम्नएवच ॥ क्रतुस्तुण्डोविरूपाक्षोविक्रान्तोथधनञ्जयः ॥ ५६ ॥ प्रहर्षःप्रबलःकेतुस्तथोपरिचरोपरः॥
एषांराजाभवद्वीरःशेषोपरिचरस्तुयः ॥ ५७ ॥ वाराणस्यान्नगर्यांयोयज्ञलक्षम्पुराकरोत् ॥ लक्षयज्ञकरःकोपिनासीन्नापिभविष्यति ॥ ५८ ॥
राजाक्षितौमहाभागोयथोपरिचरस्तथा ॥ एषांसुतिप्रसूतैश्चव्याप्तंसर्वमिदञ्जगत् ॥५९॥ चिरेणतान्कःसंख्यातुंशक्नोतिभुविमानुषः ॥ क्रमाद्भै
रववंशेनव्याप्तंलोकत्रयन्त्विदम् ॥ १६० ॥ एतद्वःकथितंविप्राःसन्तानम्भैरवस्यतु ॥ येषांश्रुत्वाकथामात्रन्नापुत्रोजायतेनरः ॥ ६१ ॥ इदंयः

कीर्त्तयेत्पुण्यश्चचरितंविजयस्यतु ॥ सततंविजयस्तस्यजायेतनपराभवः ॥ ६२ ॥ एकाग्रमनसायस्तुशृणुयादिदमुत्तमम् ॥ तस्यवंशस्यवि
च्छेदोनकदाचिद्भविष्यति॥ ६३॥इतिका०पु०द्विनवतितमोध्यायः॥९२॥ ॥ मार्कण्डेयउवाच॥वेतालस्यचसन्तानंशृण्वन्तुमुनिसत्तमाः ॥
यच्छ्रुत्वासर्वपापेभ्यस्तत्क्षणादेवहीयते॥१॥दक्षस्यतनयाचाभूत्सुरभिर्नामनामतः॥गवाम्मातामहाभागासर्वलोकोपकारिणी॥२॥तस्यान्तुतन
याजज्ञेकश्यपात्तुप्रजापतेः॥नाम्नासा रोहिणीशुभ्रासर्वकामदुघानृणाम् ॥३॥ तस्याञ्जज्ञेशुनःशेपान्मुनेरितितपोधनात्॥कामधेनुरितिख्यातास
र्वलक्षणसंयुता ॥ ४ ॥ सासिताभ्रप्रतीकाशाचतुर्वेदचतुष्पदा ॥ स्तनैश्चतुर्भिर्द्धर्मार्थकामप्रसवकारिणी ॥ ५ ॥ सासुवर्णशरीरातुकालेनमह
तासती ॥ निर्मलंयौवनम्प्रापकामधेनुर्मनोहरम् ॥ ६ ॥ ताञ्चरन्तींमेरुपृष्ठेचारुरूपांसुलक्षणाम् ॥ ददर्शसतुवेतालःकामुकश्चाभ्यपद्यत ॥
॥ ७ ॥ तंकामुकञ्चवेतालंविदित्वाकामधेनुका ॥ पशुधर्मात्स्वयम्भेजेतम्पुत्रंशशभृद्धृतः ॥ ८ ॥ सोवापतस्याम्परममामोदंशंकरात्मजः ॥
साचापिपरमान्तस्मिन्मुदमापातिहर्षिता ॥ ९ ॥ तयोःप्रवृत्तेसुरतेतस्यांगर्भोभवत्तदा ॥ कालेप्राप्तेतुसुषुवेकामधेनुर्महावृषम् ॥ १० ॥ सोचि
रेणैवकालेनसुमहान्वृषभो भवत् ॥ महाककुदसंयुक्तश्चारुशृंगसमन्वितः ॥ ११ ॥ उत्क्षिप्याविचलत्कर्णयुगलोदीर्घवालधिः ॥ ककुदेनचशृं
गाभ्यांकर्णायांससिताभ्रवत् ॥ १२ ॥ विचलन्दृदृशेदेवैःशृंगैरिवसिताचलः ॥ वेतालस्त्वकरोत्तस्यनामशृंगइतिद्विजाः ॥ १३ ॥ सतुशृं
गोज्ञानशालीसमाराधयदीश्वरम् ॥ सोपितुष्टोवरन्तस्मैददाविष्टंहरःप्रभुः ॥ १४ ॥ तमेववाहनञ्चक्रेकृत्वादेवतनुंवृषम् ॥ सचिरायुश्चबलवा

शृंगद्वयान्वित इतिवापाठः ।

न्पृथिवीधारणेक्षमः ॥ १५ ॥ शृंगोनाममहातेजाःकेतुःसोप्यभवत्प्रभोः ॥ शृंगोभूत्वामतोयस्माच्छंकरस्यमहात्मनः ॥ १६ ॥
अतःशृंगइतिख्यातिमथप्राहमहेश्वरः ॥ सतुशृंगोमहादेवेध्यानासक्तेक्वचित्क्वचित् ॥ १७ ॥ वरुणस्यगृहंगत्वासुरभेस्तनयास्तुयाः ॥
रूपयौवनसम्पन्नाभेजेलंसुरतेनताः ॥ १८ ॥ वरुणस्यगृहेगावःसर्वलक्षणसंयुताः ॥ तिष्ठन्तिसततांविप्रास्तासुतासुसुताःपुनः ॥ १९ ॥
बहवस्तुसमुत्पन्नास्तेषांसूतिप्रसूतिभिः ॥ सर्वञ्जगदिदंव्याप्तंतेभ्योयज्ञंप्रवर्त्तते ॥ २० ॥ आज्येनदेवास्तुष्यन्तियज्ञाआज्येप्रतिष्ठिताः ॥
यज्ञाधीनमिदंसर्वञ्जगत्स्थावरजंगमम् ॥ २१ ॥ तदाज्यन्तुगवाधीनन्ततःसर्वंगविस्थितम् ॥ तदिदंसकलंविश्वंगवाधीनन्द्विजोत्तमाः
॥ २२ ॥ वेतालस्यचतागावोवंश्याःसर्वप्रियाःसदा ॥ यइदंशृणुयान्नित्यंवेतालस्यमहात्मनः ॥ २३ ॥ वंशानाञ्जन्मविप्रेन्द्राःसमुखी
वलवान्भवेत् ॥ नगावोनापिंविभवास्तस्यनश्यन्तिवैक्वचित् ॥ २४ ॥ नचभूतपिशाचाद्यास्तंपश्यन्तिकदाचन ॥ वेतालःसतत
न्तस्यरक्षामाचरतिस्वयम् ॥ इतिवःकथितंविप्रायथावेतालभैरवौ ॥ २५ ॥ जनयामासतुःपुत्रान्विच्छिन्नाःसंशयाश्चवः ॥ यथाच
कालिकादेवीमोहयामासशंकरम् ॥ २६ ॥ यथोत्पन्नाशरीरार्द्धंकृतंशम्भोर्यथातथा ॥ कालिकायैनमस्तुभ्यमितियोभाषतेस्वयम् ॥
॥ २७ ॥ तस्यहस्तेस्थितामुक्तिस्त्रिवर्गस्तुवशानुगः ॥ इतिवःकथितम्पुण्यम्पुराणंकालिकाह्वयम् ॥२८॥ मन्त्रयन्त्रमयंशुद्धञ्ज्ञानदंकामदम्प
रम् ॥ इतिगुह्यतमंलोकेवेदेषुचतथाद्विजाः ॥ २९ ॥ देवगन्धर्वसिद्धाद्यैःस्पृहणीयमिदंसदा ॥ अधीतञ्चश्रुतम्मत्तोवशिष्ठेनमहात्मना ॥३०॥
इदम्पुराणममृतंकालिकाह्वयमुत्तमम् ॥ तेनगुप्तमिदंसर्वंकामरूपेसुरालये ॥ ३१ ॥ तदिदानींसमाख्यातंव्यक्तीकृत्यमहर्षयः ॥ युष्माभिरपि

नोदेयंगोप्यंलोकेषुसर्वदा ॥ ३२ ॥ शठायचलचित्तायनास्तिकायाजितात्मने॥भक्तिश्रद्धाविहीनायनदातव्यंकदाचन ॥ ३३ ॥ इदंसकृत्प
ठेद्यस्तुपुराणङ्कालिकाह्वयम् ॥ सकामानखिलान्प्राप्यशेषेऽमृतमवाप्नुयात् ॥३४॥ मन्दिरेलिखितंयस्यपुराणमिदमुत्तमम् ॥ सदातिष्ठतिनो
तस्यविघ्नःसञ्जायतेद्विजाः ॥३५॥ योऽधीतेहन्यहन्येतद्गुह्यन्तन्त्रमिदम्परम् ॥ अधीतःसकलावेदास्तेनेहद्विजसत्तमाः ॥ ३६ ॥ तस्मान्नैवा
धिकोन्योस्तिकृतकृत्योविचक्षणः ॥ ससुखीबलवाल्लोकेदीर्घायुरपिजायते ॥३७॥ योलोकमीशःसतताम्बिभर्तियःपालयत्यन्तकरस्तथाते ॥
इदंसमस्तम्भ्रममभ्रमंवायदीयरूपञ्चनमोस्तुतस्मै ॥ ३८ ॥ प्रधानपुरुषोयस्यप्रपञ्चोयोगिनांहृदि ॥ यःपुराणाधिपोविष्णुःप्रसीदतुसवःस्थितः
॥ ३९ ॥ योहेतुरुग्रःपुरुषःपुराणःसनातनःशाश्वतईश्वरःपरः ॥ पुराणकृद्वेदपुराणवेद्यःप्रस्तौमितन्नौमिपुराणशेषे ॥ ४० ॥ इतिसकलजगद्धि
भर्तियासांमधुरिपुमोहकरीरमास्वरूपा ॥ रमयतिचहरंशिवास्वरूपावितरतुवोविभवंशुभानिमाया ॥ ४१ ॥ ॥ इतिश्रीकालिकापुराणेत्रि
नवतितमोध्यायः ॥ ९३ ॥ ॥ छ ॥ संपूर्णमेतत्कालिकापुराणम् । ॥ छ ॥ ॥ छ ॥

१ समस्तंक्रममक्रमंवा इतिवापाठः ।

श्रीमन्महेशकुलदुग्धनिधिप्रसूतःश्रीरुद्रसिंहशशभृन्मिथिलाधिराजः ॥
श्रीमाँस्ततोऽजनिगुणेश्वरसिंहनामायोधर्म्मनिष्ठगुणसागरदानवीरः ॥ १ ॥

धनञ्जयौघेनसुवर्णकारःसुवर्णसिद्धिंविदधातियद्वत् ॥
विद्वत्तमौघेनतथाऽस्यशुद्धिंकृत्वायथाबुद्धिसुमुद्रितञ्च ॥ २ ॥

नेत्रेन्दुवसुशीतांशुसम्मितेशाकवत्सरे ॥
शुभेभाद्रपदेमासिपक्षेवर्द्धितशीतगौ ॥ ३ ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६४, शके १८२९.

अत्रेयमभ्यर्थना.

अस्माकं मुद्रणालये वेद-वेदान्त-धर्मशास्त्र-प्रयोग-योग-सांख्य-ज्योतिष-पुराणेतिहास-वैद्यक-मंत्र-स्तोत्र-कोश-काव्य-चम्पू-नाटकालंकार-संगीत-नीति-कथाग्रंथाः, बहवः स्त्रीणां चोपयुक्ता ग्रंथाः, बृहज्ज्योतिषार्णवनामा बहुविचित्रचित्रितोऽयमपूर्वग्रन्थः संस्कृतभाषया, हिन्दीमार्वाडचन्यतरभाषाग्रन्थास्तत्तच्छास्त्राद्यर्थानुवादकाः, चित्राणि, पुस्तकमुद्रणोपयोगिन्यो यावत्यस्सामग्र्यः, स्वस्वलौकिकव्यवहारोपयोगिचित्रचित्रितालिखितपत्रवत्पुस्तकानिच; मुद्रयित्वा प्रकाशन्ते सुलभेन मूल्येन विक्रयाय । येषां यत्राभिरुचिस्तत्तत्पुस्तकाद्युपलब्धये एवं नव्यतया स्वस्वपुस्तकानि मुमुद्रयिषुभिः सुलभयोग्यमौल्येन क्षीसकाक्षरैः स्वच्छोत्तमोत्तमपत्रेषु मुद्रिततत्पुस्तकानां स्वस्वसमयानुसारेणोपलब्धये च पत्रिकाद्वारातैः प्रेषयीणोऽस्मि ।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम् ।

क्षेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः खेतवाड़ी–मुंबई.

॥ इति कालिकापुराणं संपूर्णम् ॥